The Department of Public Instruction, Bombay.

THE

PARÂŚARA-DHARMA-SAMHITÂ

OR

PARÂŚARA-SMṚITI,

WITH

THE COMMENTARY

OF

SÂYAṆA-MÂDHAVÂCHÂRYA.

EDITED WITH VARIOUS READINGS, CRITICAL NOTES, INDEXES, APPENDICES, &C.,

BY

PAṆḌIT VÂMAN ŚÂSTRI ISLÂMPURKAR.

VOLUME III. PART I.

(500 COPIES.)

Registered for Copyright under Act XXV. of 1867.

1911.

Price Rs. 4.

Sold at :

GOVERNMENT CENTRAL PRESS, BOMBAY.

Bombay Sanskrit and Prakrit Series, No. LXVII.

पराशरधर्मसंहिता

सायणमाधवाचार्यकृतटीकासहिता ।

टिप्पणी पाठान्तराणि विषयानुक्रमणिका वर्णानुक्रमः

सूचिरित्यादिभिः सहिता ।

तृतीयं

व्यवहारकाण्डम् ।

प्रथमोऽध्यायः

स च

इस्लामपुरग्रामजनुषा विद्वद्वरगोविंदशास्त्रिसूनुना

वामनशर्मणा संशोधितः ।

मुंबई ।

शालिवाहनशकाब्दाः १८३३ ।

खिस्ताब्दाः १९११ ।

मूल्यं रूपकचतुष्टयम् ।

मुम्बय्याम्

एज्युकेशन सोसायटी मुद्रणालयमिलित-

ब्रिटिश इंडिया मुद्रणालये मुद्रितम् ।

PREFATORY NOTE.

In presenting to the public the third volume, व्यवहाराध्याय or
यवहारमाधव, of the Parâśara-Dharma-Samhitâ, Part I., I have
o offer a few preliminary remarks on the printed copy
nd MSS. procured by me personally and those received
rom friends in different parts of the country, which were
onsulted in the preparation of this Part. In all I have
leven MSS. and one printed copy of Parâśara-Dharma-
Samhitâ with me, and they may be divided into two
lasses : (*i*) The four which were used by me ; (*ii*) the seven
which I had to reject, as they were very defective all
hrough, very carelessly written, and were of the least
value. Those in the first class may be particularized as
follows :—

A. This is an excellent Devanâgarî MS., written on paper manufactured in Portugal, consisting of 268 pages (leaves), à 7 to 13 lines, à 21 to 25 aksharas, written Śaka 1727 (A. D. 1805) at Kavalé and corrected throughout in ochre (सोनकाव) and white lead (सफेता), coloured ink substitutes. The special praiseworthy feature of this MS. is that it gives various readings together with the corresponding meaning, either in the margin or in the body of the leaf itself, evidently derived from the number of the MSS. and authorities consulted by the original writer. The genuineness of these readings is luckily enough on a satisfactory and sound basis, which helps

to clear up the charge often and lightly laid against the old-time Indian Sanskritists, that they had not the genius or patience to trace variations in the readings of the texts they have laboriously preserved for posterity.

This valuable MS. was purchased for me by my friend and co-student, Ramkrishna Prabhakar Dhavalkar Shastri, the learned hereditary Purâṇika (पुराणिक) at the ancient Shrine of "Śrî-Śântâ Durgâ" of Kavalé or Kaivalyapūra (कैवल्यपूर) in Goa. The largest and predominating worshippers at this famous shrine come from the Sârasvata (Gauḍa) Brahman community of the Mahârâshṭra, who are to be found all over the Bhârata-varsha. This happy purchase, together with some more MSS., came from the valuable collection in the possession of Govare Bâwâ, a learned Pandit known for his vast knowledge and mastery over the Vedas and the Shastras. The colophon is as follows :—

इति श्रीमत् सायणमाधवाचार्यप्रणीतम् व्यवहारमाधवाख्यं प्रकरणं समाप्तम्। गोपाळ गाडगीळ इत्यनेन लिखित्वा। श्रीमत्कैवल्यरूप गोम्बोवा गुरुचरणारविंदयो समर्पितम्। शके १७२७ श्रीः शुभंभवतु लेखकपाठकयोः।

B. This MS. was most kindly and liberally placed at my disposal by my friend, M. R. Ry. Vyenkata Swami, who had also obtained for me the MSS. for the first two volumes of this Part. As might be expected from its southern origin, this MS. is in Telugu characters on palm leaves, consisting of 198 leaves, à 2′-6″ × 2″, à 8 lines, à

50 to 54 akṣharas, and is written by stencil, with the red and the black colouring substances introduced in the headings to the various chapters and the text respectively. The writer of this MS. has made an effort to elucidate in Telugu the technical words, giving their popular substitutes. The colophon is as follows :—

लिखितमिदं शालिवाहनशके विरूपाक्ष क्षेत्रे अष्टसप्तत्यधिक षोडशशतमे वर्षे आषाढ कृष्ण दशम्यां श्रीमत व्यंकट रायरु ममयजमानस्य निदेशात् राज राजेश्वर शर्मणा धर्मवृद्धिर्भवतु शुभंभवतु श्रीः श्रीः श्रीः

C. This MS., which is written in the Jain style, has been purchased for me by Veda Shâstra Saṃpanna Narayaṇ Shastri Parvanikar, Court Pandit to H.H. the Maharaja of Jayapur. This is defective in many parts and more or less mutilated throughout, with several omissions in the text, though tolerably correct. It has no date at the end.

D. This MS. was kindly lent to me by the late lamented Raja Rajendralal Mitra, the eminent Oriental Scholar of Calcutta. It is written on country-made paper in the old Maithila (मैथिल) characters, consisting of 256 pages (leaves) à 16 lines, à 21 aksharas. This has some parts wanting, and a few mutilations, but is correct generally. It has no date at the end.

E. This is a copy of Parâśara Dharma Saṃhitâ (पराशरधर्मसंहिता) printed in the *Bibliotheca Indica* at Calcutta.

2. To begin with, this volume contains the Civil Law (व्यवहार) of Parâśara, condensed in four verses only. This concise treatment of this important portion of Hindu

Law is not due to the absence of its development at the time. The Civil Law of the Smṛitis was, it seems, considerably modified, and Parâśara, to avoid further conflict, has wisely invested the verdicts of the learned in the current usages of the country with great authority by stating that questions of Civil Law be referred, for determination, to a Parishad or an assembly of the learned.

This gap in a detailed treatise on Law by Parâśara has been filled up by Mâdhavâchârya's commentary or rather an enlargement and amplification of the view expressed or propounded in the text—the four verses of Parâśara, which is given *in extenso* in the present volume. Mâdhava has quoted largely from मनु, याज्ञवल्क्य, कात्यायन, बृहस्पति, प्रजापति, हारीत, वसिष्ठ, विष्णु, नारद, गौतम, &c.

Quotations from मनु, याज्ञवल्क्य and नारद are generally to be found in their known works. In rare instances quotations attributed to one of these three jurists cannot be traced in their works; but this may be probably due to occasional errors in citing the author's name. For instance, I refer to pp. 86 and 115. On the latter page there is an alleged quotation from मनु, but it is not to be found in his known works. It is, however, to be found in Nârada *in extenso,* and yet it is quoted *verbatim* by Vijñâneśvara in his Mitâksharâ, who attributes it to कात्यायन. It is a common experience that identical thoughts and expressions are often found in the works of two distinguished writers in different parts of the country, where either of them could not possibly have heard or seen any writings of the other, and such coincidences are not rare in literature in different parts of the civilized world. It is, therefore, not quite

proper to definitely deny the authorship of the above quotation to Nârada (नारद) and attribute it to कात्यायन alone.

Again, there are several quotations attributed to कात्यायन and बृहस्पति, whose works have been made frequent use of by माधवाचार्य in this work, which are not to be found in any of the works, printed or in manuscript, of the two authors named, which I have been enabled to secure and consult. The authors, in fact, have not, as far as I know, treated Civil Law (व्यवहार) in any of their known works.

As to गौतम, वसिष्ठ, विष्णु and हारीत, quotations from these can be ascertained well enough except in a few instances.

I have given Bṛihat-Parâśara-Saṃhitâ ('बृहत्पराशरसंहिता') as an Appendix to this Part. I reserve my remarks as to this work of Parâśara for some future occasion. The Table of Contents, the List of the Names of the Authors, Index to Quotations, &c., will be found in the second Part of this Volume.

VÂMAN ŚÂSTRI ISLÂMPURKAR.

Girgaum, Bombay.

ॐ नमः श्रीगणेशाय ।

पराशरधर्मसंहिता ।

व्यवहारकाण्डम् ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥

सोऽहं प्राप्य विवेकतीर्थपदवीमाम्नायतीर्थे परं
मज्जन्सज्जनतीर्थसंगनिपुणः सद्वृत्ततीर्थं श्रयन् ।
लब्धामाकलयन् प्रभावलहरीं श्रीभारतीतीर्थतो
विद्यातीर्थमुपाश्रयन् हृदि भजे श्रीकण्ठमव्याहतम् ॥ २ ॥

सत्यैकव्रतपालको द्विगुणधीस्त्र्यर्थी चतुर्वेदिता
पञ्चस्कन्धकृती षडन्वयदृढः सप्ताङ्गसर्वंसहः ।
अष्टव्यक्तिकलाधरो नवनिधिः पुष्यद्दशप्रत्ययः
स्मार्त्तोद्ध्रायधुरन्धरो विजयते श्रीबुक्कणक्ष्मापतिः ॥ ३ ॥

इन्द्रस्याङ्गिरसो नलस्य सुमतिः शैब्यस्य मेधातिथिर्
धौम्यो धर्मसुतस्य वैन्यनृपतेः स्वौजा निमेर्गौतमिः ।
प्रत्यग्दृष्टिररुन्धतीसहचरो रामस्य पुण्यात्मनो
यद्वत्तस्य विभोरभूत्कुलगुरुर्मन्त्री तथा माधवः ॥ ४ ॥

प्रज्ञामूलमही विवेकसलिलैः सिक्ता बलोपघ्निका
मन्त्रैः पल्लविता विशालविटपा सन्ध्यादिभिः षड्गुणैः ।

---

१. B. C. read अष्टव्यक्त° for अष्टव्यक्ति°. २. A. reads °पुरन्धरो for °धुरन्धरो.
३. A. B. C. read विजयतां for विजयते. ४. D. reads °पघ्निता for °पघ्निका.
५. A. has marginal reading °तला for °टपा.

शक्त्या कोरकिता यशःसुरभिता सिद्ध्या समुद्यत्फला
सम्प्राश भुवि भाति नीतिलतिका सर्वोत्तरं माधवम्॥५॥
श्रीमती जननी यस्य सुकीर्त्तिर्मायणः[1] पिता।
सायणो भोगनाथश्च[2] मनोबुद्धी सहोदरौ॥६॥
यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी।
भारद्वाजं कुलं यस्य सर्वज्ञः स हि माधवः॥७॥

स माधवः सकलपुराणसंहिता-
प्रवर्त्तकः स्मृतिसुषमा[3]पराशरः।
परावरस्मृत[4]जगदीहितास्पये
पराशरस्मृतिविवृतौ प्रवर्तते॥८॥

व्याख्याते आचार-प्रायश्चित्ते। अथ व्यवहारः प्रस्तूयते। यद्यप्यृणादानादीनामष्टादशपदानां व्यवहाराणां मध्ये कमपि व्यवहारं पराशरो न व्युत्पादितवान् तथापि आचारकाण्डे चतुर्णां वर्णानां क्रमेण आचारान् ब्रुवन्

'क्षत्रियस्तु प्रजा रक्षन्,'

इत्यस्मिन्वचने क्षत्रियविशेषस्य राज्ञ आचारविशेषमेवमवोचत्—

'क्षितिं धर्मेण पालयेत्'।

इति। तत्र क्षितिपालनं[5] नाम क्षित्यादिश्रितासु प्रजासु दुष्टानां

---

१. A. B. C. read सुकीर्तेः. २. C. reads लोकनाथ° for भोगनाथ° and D. reads °बुद्धिस° originally, but it is corrected by red ink °बुद्धी स°. ३. A. and B. read °षु यथा, but B. has in correction °सुषमा° instead of °षुं यथा; while C. स्मृतिसुखमा°. ४. A. B. D. read पराशरस्मृति° for परावरस्मृत°. ५. C. reads °पालनादिस्वादि श्रुतासु प्रजासु दुष्टानांशिष्टो.°

शिक्षया शिष्टोपद्रवपरिहारः[1] । एतदर्थ[2] एव हि[3] जगदीश्वरस्य राम-कृष्णादिक्षत्रियावतारः । तच्च गीतासु भगवता विस्पष्टमभिहितम्—

> 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
> अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
> परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
> धर्मसंस्थापनार्थाय संभवामि युगे युगे ' ॥
> (भ. गी. ४. ६-७)

इति । यथा महतां रावणादीनां शिक्षायै रामाद्यवतारस्तथा क्षुद्राणां चोरादीनां शिक्षायै राजावतार इति द्रष्टव्यम् । अत एव मनुः—

> 'अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।
> रक्षार्थमस्य लोकस्य[4] राजानमसृजत्प्रभुः ॥
> चन्द्रा[5]-ऽनिल-यमा-ऽर्काणामग्नेश्च वरुणस्य च ।
> इन्द्र-वित्तेशयोश्चैव मात्रा निर्हृत्य[6] शाश्वतीः ॥
> यस्मादेषां[7] सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः ।
> तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥
> तपत्यादित्यवच्चैव चक्षूंषि च मनांसि च ।
> न चैनं[8] भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥
> सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट् ।
> स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥

---

१. D. reads निग्रहः शिष्टोपद्रवपरिहारश्च. २. D. reads एतदर्थेनैव for एतदर्थ एव. ३. C. adds आह after एव. ४. C. and D. read सर्वस्य for लोकस्य. A. also in marginal reading and B. in correction read सर्वस्य for the same. ५. B. originally reads इन्द्रा° for चन्द्रा°. ६. D. reads आहृत्य for निर्हृत्य. ७. D. reads एव for एषां. ८. D. reads एवं for एनं.

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नर[1]रूपेण तिष्ठति ॥
एकमेव दहत्यग्निर्नरं दु[2]रुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशु-द्रव्यसंचयम् ॥
कार्यं चा[3]वेक्ष्य शक्तिं च देश-कालौ च तत्वतः ।
कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः' ॥

(म. स्मृ. ७. ३–१०)

इति। एतच्च सर्वमाचारकाण्डे[4]ऽस्माभिः राजधर्मान् व्याचक्षमाणैः प्रपञ्चितम्। बृहस्पतिस्तु विशेषतः ऋणादानादिव्य[5]वहार-विचारमेव राजोत्पत्तिप्रयोजनमभिप्रेत्य तद्विचारक्षमत्वमुपपाद-यितुमिन्द्राद्यात्मकत्वं राज्ञ उदाजहार—

'गु[6]णधर्मानतो राज्ञः कथयाम्यनुपूर्वशः ।
धनिकार्णिकसन्दिग्धौ प्रतिभू-लेख्य-साक्षिणः ॥
विचारयति यः सम्यक् तस्योत्पत्तिं निबोधत ।
सोमा-ऽग्न्यर्का-ऽनिलेन्द्राणां वित्ताप्पत्योर्यमस्य च ॥
तेजोमा[7]त्रां समुद्धृत्य राज्ञो मूर्तिर्हि[8] निर्मिता ।
तस्य सर्वाणि भूतानि चराणि स्थावराणि च ॥
भयाद्भो[9]गाय कल्पन्ते स्वधर्मान्न चलन्ति च ।

---

१. B. reads ऽनन्त° for नर°. २. C. reads दुरव° for दुरुप°. ३. B. C. D. read सो° for चा.° ४. B. and D. add एव after °काण्डे. ५. C. reads °व्यवहारमेव instead of °व्यवहारविचारमेव. ६. B. and C. read गुणधर्ममतो; while D. reads गुणधर्मश्रतो for गणधर्मानतो. ७. C. and D. read °मात्रं for °मात्रां. ८. D. substitutes वि° for हि. ९. C. reads भोगस्य for भोगाय; while D. reads भूयो भोगाय for भयाद्भोगाय.

नाऽराजके कृषि-वणिक्-कुसीदपशुपालनम् ॥
तस्माद्वर्णाश्रमाणां तु नेताऽसौ निर्मितः पुरा ' ।

इति । लोके हि राजा भूपो नृप इत्येते शब्दा एकार्थवाचित्वेन प्रयुज्यन्ते । तत्र राजशब्दो रूढः । भूप-नृपशब्दौ यौगिकौ । भुवं पातीति भूपः । नॄन् पातीति नृपः । तथा च राज्ञो भूपालकत्वं मनुष्यपालकत्वं च गुणः । तत्प्रयुक्तो धर्मो व्यवहारविचारः । स च पूर्वमेवाभिहितः । किं तु वर्णाश्रमधर्मान्व्याचक्षाणेन बृहस्पतिना राजन्यपि क्षत्रियत्वरूपवर्णप्रयुक्तो गृहस्थाश्रमप्रयुक्तश्च धर्मोऽभिहितः । अतः परं भूपत्वगुणप्रयुक्तो व्यवहारविचारात्मको राजधर्मोऽभिधीयते । धनिको धनप्रदाता । ऋणिकस्तदीयस्य धनस्य गृहीता । तयोः सन्दिग्धिर्विवादः । प्रतिभूस्तस्य प्रत्यर्पणं कारयिष्यामीति प्रतिश्रुत्य तदीयस्य भारस्य वोढा । लेख्यं धनसंख्यावृद्धिविशेषादियुक्तं पत्रम् । साक्षिण उत्तमा-ऽधमर्णयोः सम्प्रतिपन्ना मध्यस्थाः । एतेषां प्रतिभ्वादीनां त्रयाणां सन्दिग्धिन्यायान्यायवर्तिताभ्यां सन्देहः । तस्मिन् सन्देहे सति यो राजा विचारयितुं प्रभवति तस्योत्पत्तिरभिधीयत इत्यर्थः । यस्माद्राजा सोमेन्द्रादिदेवतांशसम्भवत्वात् ऋणादानादीन् व्यवहारान् विचारयितुं प्रभवति तस्मात्तानसौ विचारयेत् । तदाह याज्ञवल्क्यः—

---

१. D. reads °पशु° for °परि.° २. D. reads सुरैः for पुरा. ३. D. does not add °रूप° after क्षत्रियत्व°. ४. D. substitutes अर्थस्य for धनस्य. ५. A. and B. read संदिग्ध° and C. संदिग्धे for संदिग्धिः. ६. A. reads °भूस्थादीनां: while B. also originally reads the same, but in correction of the same and in marginal reading of A. C. °भुवादीनि. ७. A. and B. read °प्रवर्तिताभ्यां. ८. B. originally reads ऋणादि° for ऋणादान°.

'व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह।
धर्मशास्त्रानुसारेण क्रोध-लोभविवर्जितः' ॥
(या. स्मृ. २. १.)

इति। अत्र व्यवहारशब्दो रूढि-योगाभ्यां निर्णयफलकमर्थि-प्रत्यर्थिविवादमाचष्टे[1]। तत्र रूढिः कात्यायनेन निरूपिता—

'प्रयत्नसाध्ये विच्छिन्ने धर्माख्ये न्यायविस्तरे[2]।
साध्यमूलस्तु यो वादो व्यवहारः स उच्यते' ॥

इति। न्यायः शिष्टसम्प्रतिपन्नं लौकिकमाचरणं तस्य विस्तरः 'इदं मदीयं धनमन्येनापहृतम्' 'तत् क्षेत्रधनादिकं एतस्य युक्तं नान्यस्य' इत्युपपत्तिपुरःसरो निर्णयः[3]। तस्मिन्न्यायविस्तरे विषयीभूते सति तत्प्रवर्त्तकोऽर्थि-प्रत्यर्थिनोर्यो विवादः स व्यवहार उच्यते। 'मदीयं धनमन्येनापहृतं[4] तत्पुनर्मया साधनीयम्' इत्यर्थी यदुद्दिश्य प्रवर्तते तद्धनं साध्यम्[5]। तद्धि मूलं यस्य विवादस्य सोऽयं साध्यमूलः। अयं[6] च कदा सम्पद्यत इत्यपेक्षायामुक्तम्—

'प्रयत्नसाध्ये विच्छिन्ने धर्माख्ये न्यायविस्तरे'।

इति।

'सत्यं ब्रूयात्प्रियं ब्रूयान्न स्तेनः स्यान्न वार्धुषिः'।

इत्यादिविधि-निषेधावुपलभ्य[7] विहितानुष्ठाने प्रतिषिद्धवर्जने चोत्पन्न उत्साहः प्रयत्नस्तेन साध्यो धर्मनामकः पदार्थो यदा

१. B. C. D. read अर्थिविवादं instead of अर्थि-प्रत्यर्थिविवादं. २. C. reads विस्तारः for विस्तरः. ३. This sentence is not in A. B. C.; ४. B. originally reads अन्येन, but in margin reads अनेन; while C. reads अनेकेन for अन्येन. ५. This sentence is not mentioned in C. ६. C. and D. read स for अयं. ७. This word is not mentioned in C.

विच्छिन्नो भवति तदानीमयं विवाद उपपद्यते[1]। असति तु धर्मविच्छेदे नास्ति[2] व्यवहारस्यावकाशः। अत एव नारदः–

'मनुः प्रजापतिर्यस्मिन्काले राज्यमबूभुजत्।
धर्मैकतानाः पुरुषास्तदाऽऽसन् सत्यवादिनः॥
तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः।
नष्टे धर्मे मनुष्येषु व्यवहारः प्रवर्तते'॥

(ना. स्मृ. १. १-२.)

इति। बृहस्पतिस्तु द्वेष-लोभादिदुष्टस्यैव व्यवहारकर्तृत्वमाह[3]-

'धर्मप्रधानाः पुरुषाः पूर्वमासन्नहिंसकाः।
लोभ-द्वेषाभिभूतानां व्यवहारः प्रवर्त्तितः[4]'॥

इति। तस्माद्धर्मे विच्छिन्ने सति साध्यमूलो न्यायनिर्णयफलो विवादो व्यवहारशब्देन रूढ्याऽभिधीयते। हारीतोऽपि रूढिम[5]-भिप्रेत्याह–

'स्वधर्मस्य यथा प्राप्तिः परधर्मस्य वर्जनम्।
न्यायेन क्रियते यत्तु व्यवहारः स उच्यते'॥

इति। व्यवहारशब्दस्य यौगिकमर्थं कात्यायन आह-

'विनानार्थेऽवसन्देहे हरणं हार उच्यते।
नानासन्देहहरणाद्व्यवहार इति स्मृतः'॥

इति। व्यवहार इत्यत्र वि शब्दो नानेत्यस्मिन्नर्थे वर्त्तते। अव-शब्दश्च सन्देहे वर्त्तते। तानेतानेवंविधानेकसंदेहहारिणो व्यवहारानर्थ्यादि[6]गतराग-द्वेषवशात् प्राप्तान् राजा सम्यग्विचारयेत्।

१. C. reads उत्पद्यते for उपपद्यते. २. A. and B. had original reading नास्मिन्, but corrected form is नास्ति. ३. C. and D. read व्यवहर्तृत्वं for व्यवहारकर्तृत्वं. ४. B. originally reads प्रवर्तते, but corrected reads प्रवर्त्तितः; while D. reads प्रवर्तते for the same. ५. D. reads निरूढि° for रूढि.° ६. B. originally reads अर्थादि°, but corrected reads अर्थ्यादि°; while D. reads अर्थादि° instead of अर्थ्यादि°.

तद्विचारश्च राज्ञो गुणधर्मरूप आचारः। अतएवाचारकाण्डे व्यवहाराणामन्तर्भावमभिप्रेत्य पराशरः पृथग्व्यवहारकाण्डमकृत्वा 'क्षितिं धर्मेण पालयेत्,' इति सूचनमात्रं व्यवहाराणां कृतवान्। तानेतान् सूचितान् व्यवहारान् वयं स्मृत्यन्तराणि तन्निबन्धनानि चानुसृत्य यथाशक्ति निरूपयामः। तत्र पूर्वोदाहृताभ्यां रूढि-योगस्मृतिभ्यां व्यवहारस्वरूपं निरूपितम्।

अथ तद्भेदा निरूप्यन्ते। तत्र सपणत्वाऽपणत्वाभ्यां द्वैविध्यमाह नारदः—

'सोत्तरोऽनुत्तरश्चेति स विज्ञेयो द्विलक्षणः।
सोत्तरोऽभ्यधिको यत्र विलेखापूर्वकः पणः'* ॥

(ना. स्मृ. १. ४)

---

*अस्य व्याख्यनम्। व्यवहार इत्यनुवर्तते। व्यवहार एकः सोत्तरो अपरो अनुत्तर इति द्विलक्षणो ज्ञेयः। सोत्तरलक्षणं चास्यैव श्लोकस्योत्तरार्धेन व्याख्यातम्। 'सोत्तरोऽभ्यधिको यत्र विलेखापूर्वकः पण' इति। अत्र च व्यवहारस्य सोत्तरत्वे पणाधिक्यं केचिदपरिज्ञानादेव ब्रुवते। यत्किल लभ्यद्रव्यादधिकः पणो यत्र भवति स एव सोत्तर उच्यते। यत्पुनर्लभ्यद्रव्यादधिकः पणो न भवति सोऽनुत्तर इति। तदिदमसमञ्जसं वचनम्। किंतर्ह्यत्र मुनिनारदांतर्गतभावार्थोऽयमेवैष्वेवाक्षरेषु लक्ष्यः। यदेकं तावल्लभ्यद्रव्यं व्यवहारसंदेह एव स्थितं तिष्ठत्येव द्वितीयं पुनरिदं यदमर्षितो वादी प्रतिवादी वा एवंविधप्रभूतद्रव्यव्यवहारे अपि शतद्वयमात्रं शतैकमात्रं वार्धशतमात्रमपि यावन्निजविभवानुसारेण द्रव्यमुपन्यस्यति स एवाभ्यधिकः पणो दरिद्रस्य। अतः पणाधिक्यमेतत् द्वितीयद्रव्योपन्यास एव द्रष्टव्यम्। न पुनरनवस्थाप्रसंगो द्रव्याधिक्यविषय इति।

१: C. reads तामेव तेनैवाय for तानेतान्; while D. तामेवाय. २. B. and A. originally °स्मृ°, but corrected it read °सृ°; while C. and D. read °सृत्य for °स्मृत्य. ३. B. had formerly °पूर्वकः, but corrected became पूर्वतः; while C. and D. read °पूर्वकः for °पूर्वतः.

इति । 'अहं यदि पराजयेयं तदा शास्त्रमापितादण्डद्रव्यादधि-कमेव द्रव्यं राज्ञे तुभ्यं च दास्यामि' इति पत्रं लिखित्वा यदभि-भाषणं तदुत्तरं तेन सह वर्तत इति सोत्तरः । तद्रहितोऽनुत्तरः ।
पुनरपि चतुष्पादादिभिस्त्रयोदशभिः प्रकारैर्व्यवहारस्यावांतर-भेदान् स एव निर्दिश्य विवृणोति—

'चतुष्पाद[२]श्चतुःस्थानश्चतुःसाधन एव च ।
चतुर्हितश्चतुर्व्यापी चतुष्कारी च कीर्तितः* ॥ (८)

तथाचोक्तमेवान्यैरपि च—

' वादी वा प्रतिवादी वा यः समर्थः स्वतारणे ।
द्रव्यं वित्तानुसारेण करोति स पणः स्मृतः ' ॥

इति । अथवा किमन्येनायमभ्यधिकः पणशब्दः प्रशंसायामेव संबध्यते । यथा समस्तयुक्तव्यवहाराणां मध्ये स एवाभ्यधिको व्यवहारो यत्र ' विलेखापूर्वकः पण' इति यथोक्तम् । सोऽपि पणो यदि विलेखा-पूर्वको भवति तदा सोत्तरो व्यवहार उच्यते । अन्यथा पुनरनुत्तर एव । अस्य निगमः । लेखा लेखनम् । विशेषेण लेखा विलेखा । तत्पूर्वकः पणः कर्त्तव्य इति । अत्रापि मुनिभावार्थोऽयम् । यदि विलेखा लिखि-ताक्षरनिबन्धपूर्वः पणो भवति तदासोत्तरो व्यवहारोऽसौ । यदि पुनर्वा-ङ्मात्र एवानिबद्धाक्षरो मुक्तवचनैर्जल्पित एव न चाक्षरैर्निर्बद्धस्तदा सपणः कृतोऽपि अकृतवत् द्रष्टव्यः । यतोऽनक्षरैर्निर्बद्धपणो निर्णयकाले व्यभिचरत्येव इति ॥ ४ ॥

* अत्रानेन श्लोकद्वयेनापि व्यवहारस्य संख्यापूर्वकः संज्ञासूत्रोपन्यास एव कृतः ॥ ८ ॥

१. B. originally had °ह्रा°, but corrected it became °त्वा°; while C. and D. substitute °त्वा° for °ह्रा.° २. In the word चतुष्पादः C. and D. read चतुष्पाच for चतुष्पादः.

त्रियोनिर्ह्यभियोगश्च द्विद्वारो द्विगतिस्तथा।
अष्टाङ्गोऽष्टादशपदः शतशाखस्तथैव च* ॥ (९)
धर्मश्च व्यवहारश्च चरित्रं राजशासनम्।
चतुष्पाद्व्यवहारोऽयमुत्तरः पूर्वबाधकः† ॥ (१०)
§तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु।
चरित्रं तु स्वीकरणे राजाज्ञायां तु शासनम् ॥ (११)

---

* सविस्तरार्थप्रतिपत्तिविवरणं वक्ष्यमाणमुपरितनश्लोकैः शास्त्रकार एव करिष्यति ॥ ९ ॥

† एवं चतुष्पादो ऽयमभिहितो व्यवहारः। अस्य चैवंनिर्दिष्टचतुष्पादस्य चतुर्णामपि पादानां विवरणश्लोको ऽयमनुगत एव भवति ॥ १० ॥

§ यदा धनिकर्णिकयोरेकान्तव्यवहारेऽपि परस्परं सत्याचलनं नास्ति तदाऽसौ सत्यव्यवहार उच्यते। तस्मिन् सत्यसंव्यवहारे साक्षात् धर्म एव स्थितो भवति। सच व्यवहार-चरित्र-राजशासनानामदत्तावकाशस्व-रूपत्वेन स्वतो वर्तमानः धर्म एवोच्यते।'व्यवहारस्तु साक्षिषु' इति यदुक्तं तत्र धनिकर्णिकयोरेकतरदोषादपि सत्यधर्मचलनशङ्कोत्पत्तौ संजातायां साक्षिप्रत्ययो यः संव्यवहारः प्रवर्तते स व्यवहार इत्युच्यते। सचोत्तर-पूर्वस्य बाधयोत्पन्नस्तेन पूर्वबाधक इति। यत् 'चरित्रं पुस्तकरणे' इत्युक्तं तच्चरित्रमिति पत्रक-भूर्ज- चीरक-संपुटिकादिषु साक्षिस्वहस्तसुनिबद्धं कृत्वा यो व्यवहारः प्रवर्तते स चरित्रमित्युच्यते। स च पूर्ववाक्यात्'उत्तरः पूर्वबाधक' इति। यस्तु राज्ञा समावेदितो व्यवहारः स राजशासनायत्तः सर्वेषामप्येतेषामधिकः सर्वोत्तरश्च। यत इत्युक्तम्—

'ग्रामे दृष्टः पुरे याति पुरे दृष्टस्तु राजनि।
राज्ञा दृष्टः कुदृष्टो वा नास्ति पौनर्भवो विधिः'॥

इति। तदेवायं चतुर्विभागरूपत्वाच्चतुष्पादो व्यवहारः। तदा तदत्र लोकसंव्यवहारः संव्यवहार इत्युच्यते। स च द्विविधः प्रयोजनापेक्षया प्रवर्तितोऽपि देश,कालवशात् ॥ ११ ॥

सामाद्युपायसाध्यत्वाच्चतुःसाधन उच्यते ।
चतुर्णामपि वर्णानां रक्षणाच्च चतुर्हितः* ॥ (१२)

कर्तृनर्थो[1] साक्षिणश्च सभ्यान्[2] राजानमेव च ।
व्याप्नोति पादशो यस्माच्चतुर्व्यापी ततः स्मृतः† ॥ (१३)

धर्मस्यार्थस्य यशसो लोकपंक्तेस्[3]तथैव च ।
चतुर्णां करणादेष चतुष्कारी प्रकीर्तितः‡ (१४) ॥

कामात् क्रोधाच्च लोभाच्च त्रिभ्यो यस्मात् प्रवर्तते[4] ।
त्रियोनिः कीर्त्यते तस्मात्[5] त्रयमेतद्विवादकृत् ॥ (२६)

---

*साम-भेदोपप्रदान-दण्डैश्चतुर्भिरपि साधनोपायैर्यथावसरप्रयुक्तैःसाध्यते तेन चतुःसाधन उक्तः । एवं चायमस्खलितप्रवृत्तधर्मा व्यवहारः चतुर्णामपि वर्णानामाश्रमाणां च रक्षणात्परिपालनाच्चतुर्हितो भवतीति ॥ १२ ॥

†स च यदा सुदृष्टो भवति ततश्चतुरो ऽप्येतान्पादशो धर्मरूपेण व्याप्नोति। अथ कुदृष्टो भवति ततस्तानेव पापरुपेण व्याप्नोति इति चतुर्व्यापीति ॥ १३ ॥

‡लोकपक्तिर्जनानुरागः। शेषं प्रसिद्धम् । एतेषां चतुर्णामपि करणात् चतुष्कारीति उच्यते ॥ १४ ॥

---

१. D. reads कर्त्तारं तत् for कर्तृनर्थो. २. C. reads सत्यात् for सभ्यान्. ३. A. reads °हेतो: also B. the same, but corrected reads °पक्तेः. ४. A. and B. read °च वर्तते instead of प्रवर्तते. ५. A. reads येन. B. also originally reads येन, but corrected reads तस्मात् and तत्र; while C. reads यस्मात्, and D. reads यत्र.

द्व्यभियोगस्तु विज्ञेयः शंका-तत्वाभियोगतः।
शंकाऽसतां तु संसर्गात् तत्वं होढादिदर्शनात्॥* (२७)

पक्षद्वयाभिसम्बन्धात्[1] द्विद्वारः[2] स उदाहृतः।
पूर्ववाद[3]स्तयोः[4] पक्षः प्रतिवादस्तदुत्तरः[5]† ॥ (२८)

---

*तत्र द्विप्रकार एवाभियोगो भवति। एकः शंकाभियोगो द्वितीयस्तत्वाभियोगः। एतयोश्च द्वयोरपि लक्षणमेकस्यैव श्लोकस्यार्धेनाभिहितम्। शंका सदा असत्संसर्गादिति। असन्तो ये प्रसिद्धाश्चौरकर्मवृत्तयः। तथा वेश्याद्यूतव्यसनं चासत् एतेषु यस्य सदा अत्यासक्तिर्दृश्यते तस्य गृहभेदज्ञस्योपरि नाष्टिकस्य पुरूषस्य महती शङ्का समुत्पद्यते। तेनार्थचलनं तस्यासत्संगिनो नाष्टिकोऽभियोगं यं ददाति स शंकाभियोग उच्यते। यस्तु तत्वाभियोगः स होढादिदर्शनाद्भवति। स्वकीयं द्रव्यं यन्नष्टं तद्धोढमुच्यते। तं दृष्ट्वा योऽभियोगः परस्य दीयते स तत्वाभियोग उच्यते। तत्र शंकाभियोगस्य देवकुलं निर्णयस्थानम्। तत्वाभियोगस्य राजकुलमिति॥ २७॥

† पूर्वपक्षरूपं प्रथमं द्वारं तेन द्वारेण व्यवहारः प्रविशति। द्वितीयं द्वारं प्रतिपक्षस्थित उत्तरवादी यानि वदति तेन द्वारेण प्रविशतीति॥ २८॥

---

१ B. originally reads संबद्धौ but corrected reads सम्बन्धात्, while C. and D. read, संबन्धात् for संबद्धौ. २. Only C. reads द्विचारः for द्विद्वारः. ३. In this whole line A. B. C. read पूर्वपाद° and प्रतिपाद°, respectively. ४. B. originally reads °स्तु यो, but corrected reads °स्तयोः. ५. B. before correction had °स्तु उत्तरः but after °स्तदुत्तरः.

भूतच्छलानुसारित्वात् द्विगतिः स उदाहृतः।
भूतं तत्वार्थसंयुक्तं प्रमादाभिहितं छलम्॥* (२९)
राजा सत्पुरुषः सभ्याः शास्त्रं गणक-लेखकौ।
हिरण्यमग्निरुदकमष्टाङ्गः स उदाहृतः॥† (१५)
‡ऋणादानं ह्युपनिधिः संभूयोत्थानमेव च॥(१६)

* व्यवहारो यथा प्रवेशकाले द्विद्वारः तथा नियमनकाले ऽपि द्विर्गतिः। तत्र व्यवहारस्यैका गतिर्धर्मन्यायतत्वभूतार्थनिर्णयेन भवति। द्वितीया प्रमादाभिहितनिर्णयेन भवतीत्यर्थः॥ २९॥

† तत्र राजपुरूषो दुष्टावकोटनार्थी।तस्यानवसरे राजकीयचक्षुर्भूतो राज्ञा नियुक्तः प्राड्विवाकः पुरुषः। स उभयात्मकः सत्यश्च राजपुरुषश्च। तथा सभ्या उपरिवक्ष्यमाणलक्षणाः। तथा शास्त्रं मनु-नारदविश्वरूपात्मकम्। सत्यासनं शतभेदव्यवहारदण्डनियमसन्देहविच्छेदकारकम्। तथा लेखकः स्थानप्रतिबद्धः। भाषोत्तरक्रिया जयपत्रादिलेखनोपयोगी। हिरण्यमग्निरुदकमिति एतान्यपि त्रीणि प्रत्यक्षदेवतास्वरूपाणि। इत्येतान्यष्टावप्यङ्गानि यदा सभायां संनिहितानि भवन्ति तदा दिव्यादिष्वपि धर्मः साक्षादेव। तीर्थं सत्यासत्ययोर्विभक्तिं परिस्फुटिकरोति॥ १५॥

‡ अथाष्टादशपदमुच्यते। तस्य 'ऋणादान' मित्यादि सूत्रम्।

एवं चैषामष्टादशव्यवहारपदानां मध्ये यस्य यस्य पदस्य ये ये निरूपणीया व्यवहारभेदा मुनिना दृष्टास्तस्य तस्यैव ते ते संख्यापूर्वकाः संयोज्य संततप्रकरणस्थिता एव द्वात्रिंशन्मात्रा अपि सविस्तरमभिहिताः। एष सकलशास्त्रार्थसंग्रहः। तेषां च यथाक्रमस्थितिभेदसहितानामष्टादशव्यहारपदानामनुलग्ना एव निर्णया भविष्यन्ति। तेन व्यवहारभेदा अपि द्वात्रिंशदधिकशतप्रमाणाः। शाखोपशाखावस्थिताः संक्षेप-विस्तर-संख्योपलक्षिता इहापि लिख्यन्ते। तत्रतावत्संक्षेपसंख्येयम्।

१. D. reads तत्वादि° for तत्वार्थ°. २. C. reads °हतं for °हितं in the word प्रमादाभिहितं.

वेतनस्यानपाकर्म तथैवास्वामिविक्रयः ॥ (१७)

दत्तस्य पुनरादानमशुश्रूषाऽभ्युपेत्य च ॥ (१६)

विक्रीयासंप्रदानं च क्रीत्वानुशय एव च ॥ (१७)

इदानीमियमेव भेदसंख्या प्रत्येकतामुद्दिष्टव्यवहारपदशाखाभेदैः सविस्तरादभिधीयते। तत्र ऋणादाने देयादेयादिभेदाः कृताः। ऋणभेदो धनभेद आपद्ब्राह्मणवृत्तिः। प्रमाणभेदः। कुसीद-वार्धुषिकभेदौ। प्रतिभूभेदः। आधिभेदो लेख्यभेदः। असाक्षिभेदः। पूर्वोत्तरसाक्षिनियमः। षड्विवादपदकसाक्षिनिन्दा। साक्षिप्रत्युद्धारः। कूटसाक्षिकम्। साक्ष्यधिश्रावणा। साक्षिबलाबलम्। लेख्यसाक्ष्यभावविधिः। घटविधिः। अग्निविधिः। उदकविधिः। विषविधिः। कोशविधिः इति पंचविंशति भेदमृणादानं भवेत्।

तथा औपनिधिके—न्यासः। औपनिधिकम्। याचितकम्। अन्वाहितकम्। शिल्पिहस्तगतमिति भेदाः षट्। संभूयसमुत्थाने—सामवायिकम्। ऋत्विग्याज्यम्। शौल्किकं चेति भेदत्रयम्। दत्ताप्रदानिके—देयमदेयं दत्तमदत्तं चेति भेदचतुष्टयम्। अशुश्रूषाभ्युपगमे—शुश्रूषाभेदः। अशुभकर्मभेदः। शिष्यवृत्तम्। अन्तेवासिवृत्तम्। अधिककर्मकृद्वृत्तम्। स्वामिप्रसादाद्दास्यविमोक्षश्चेति भेदा नव। वेतनस्यानपाकर्मणि—भृतकवेतनम्। गोपालादिकम्। पण्यस्त्रीशुल्कविधानम्। भाटकविकल्पश्चेति भेदचतुष्टयम्।

अस्वामिविक्रये—अस्वामिविक्रयो निधिलाभश्चेति भेदद्वयम्। विक्रियासंप्रदानमेकभेदम्। क्रीत्वानुशये—कालभेदः। परिभुक्तवासोनियमः। धातुक्षयभेदः। तान्तवसंस्कारश्चेति भेदचतुष्टयम्। समयस्यानपाकर्मैकभेदम्। तथा क्षेत्रजे-क्षेत्रवादो गृहवादः। उद्यानवादो निपानवादः। आयतनवादो ग्रामवादश्चतुष्पथादिभूषणप्रतिषेधः। सेतुविधानं। खिलविषयः सस्यरक्षा सस्यवृद्धिहेतुविधानम्।

---

१. C. reads व for वा°. २. C reads °विक्रियाः for °विक्रयः. ३. B. originally reads कृत्वा, but corrected क्रीत्वा.

समयस्यानपाकर्म विवादः क्षेत्रजस्तथा ।
स्त्रीपुंसयोश्च संबन्धो दायभागोऽथ साहसम् ॥ (१८)
वाक्पारुष्यं तथैवोक्तं दण्डपारुष्यमेव च ।
द्यूतं प्रकीर्णकं चैवेत्यष्टादशपदः स्मृतः ॥ (१९)
एषामेव प्रभेदोऽन्यो द्वात्रिंशदधिकं शतम् ।
क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते' ॥ (२०)
(ना. स्मृ. १. ८-२१)

स्त्री-पुंसयोः संबन्धे—पुंस्त्वपरीक्षा । कन्यादाननियमः । ऋत्विग्व्यतिक्रमदोषः । कन्यादानकालः । कन्यावरयोरदुष्टदूषणापराधः । विवाहविधिः । स्वैरिण्यादिविधानम् । अपत्यताविवेकः । संग्रहणविधानम् । स्त्रीव्यतिक्रमदण्डः । गुरुतल्पलक्षणम् । पश्वादिगमनदोषः । पत्न्यभावेऽपत्यविधिः । जारजातविधानम् । नियुक्ता-ऽनियुक्तापरगमनविधिः । दुष्टस्त्री-पुरुषविधानम् । प्रोषितभर्तृकानिर्णयः । संकेतलक्षणम् चेत्येवं विंशतिभेदाः ।

दायभागे—रिक्थभागविवेकः । तद्भागनिरूपणा । अविभाज्यनियमः। स्त्रीधननिरूपणा । स्त्रिया अभावे स्त्रीधननिरूपणा । भ्रातृद्रव्यविधिः । माता-पितृपुत्रविभागः । अज्ञातपितृपुत्रिकादिविधिः । अनियुक्तपितृविधानम् । दीर्घतीव्रामयादिपुत्रांशविधिः । संसृष्टिपुत्रविभागः । प्रेतादिभ्रातृद्रव्यलब्धविधिः । कुटुम्बार्थे युक्तायासादिविधिः । विभागसंदेहनिर्णयः । पुत्रसंख्यानियमश्चेति भेदानामेकोनविंशतिः ।

साहसे—साहसलक्षणम् । साहसदण्डविधानम् । आधिच्छलस्तेयम् । क्षुद्रद्रव्यमध्यमोत्तमविधानम् । द्विविधतस्करलक्षणम् । तस्करस्य व्यत्रकर्षणम् । भक्तावकाशदानादि । चौरविधिः । साहसस्तेयदण्डः । पदेन चौरान्वेषणविधिः । चोराभावे चौरादिद्रव्यापनयनं चेति द्वादश भेदाः ।

वाक्पारुष्ये—तद्भेदः । दण्डपारुष्ये तद्भेदः । उभयोर्दण्डलक्षणं चेति भेदत्रयम् । द्यूतसमाह्वयमेकभेदम् । प्रकीर्णके—राज्ञा स्वयं वर्णाश्रमपालनम् । राजोपवर्णनम् । राज-ब्राह्मणवृत्तिः । स्वद्रव्यदाने राज्ञोऽभ्यनुज्ञा । ब्राह्मणकर्मवृत्तिनिरूपणम् । अष्टमंगलकविधानमिति षड्भेदाः । एवमेतेष्वष्टादशप्रधानव्यवहारपदेष्वंतर्गतव्यवहारपदभेदाः द्वात्रिंशदधिकशतं भवन्तीत्यलं विस्तरेण ॥ १६-२० ॥

इति। ननु-धर्मादीनां पादत्वमयुक्तम्। प्रतिज्ञोत्तर-प्रमाण-निर्णयानां व्यवहारपादत्वात्। यतो याज्ञवल्क्यः प्रतिज्ञादीनि प्रकृत्याह–

'चतुष्पाद्व्यवहारोऽयं* विवादेषूपदर्शितः'

(या. स्मृ. २. ८.)

इति। बृहस्पतिरपि–

'पूर्वपक्षः स्मृतः पादो द्वितीयश्चोत्तरः स्मृतः।
क्रियापादस्तृतीयस्तु चतुर्थो निर्णयः स्मृतः'॥

इति। नायं दोषः। धर्मादीनां प्रकारान्तरेण पादत्वोपपत्तेः। योऽयं निर्णयाख्यश्चतुर्थः पादोऽभिहितः। स धर्मादिभिश्चतुर्भिर्निष्पद्यते। तदाह बृहस्पतिः–

'धर्मेण व्यवहारेण चरित्रेण नृपाज्ञया।
चतुष्प्रकारोऽभिहितः संदिग्धेऽर्थे विनिर्णयः'॥

इति। तस्मान्निर्णयहेतुतया धर्मादीनां व्यवहारपादत्वं भविष्यति। तेषां च निर्णयहेतुत्वं कात्यायनेन प्रपञ्चितम्–

'दोषकारी तु कर्तृत्वं धनस्वामी स्वकं धनम्।
विवादे प्राप्नुयाद्यत्र स धर्मेणैव निर्णयः'॥

इति। दोषकारी वाक्पारुष्यादिकारी। यस्मिन्विवादे व्यवहारे चरित्र-राजशासननैरपेक्ष्येण धर्माभिमुखः सन्नधर्माद्भीतः स्वकी-

* चतुष्पाच्चतुरंशकल्पनया विवादेषु ऋणादानादिषु उपवर्णितो दर्शित इत्यर्थः। भाषोत्तरक्रिया-साध्यसिद्धिरित्याख्याः चत्वारः पादाः। संप्रतिपत्त्युत्तरे तु साधनानिर्देशात् भाषार्थस्यासाध्यत्वाच्च न साध्यसिद्धिलक्षणः पादोऽस्ति। अतः तत्र द्विपात्त्वमेव भवति।

१. B. originally reads प्रकृत्यादीनि, but corrected reads प्रतिज्ञादीनि.
२. D. reads सद्धर्मो° for सन्नध°.

यं दोषकर्तृत्वं स्वयमेवांगीकरोति यत्र धनस्वामी व्यवहारादि-प्रयासमंतरेणाधर्माभिमुखाद्धनापहारिणः स्वकीयं धनं प्राप्नोति तत्र दोषकारिणो धर्माभिमुख्यमेव निर्णयहेतुः। व्यवहारस्य निर्णयहेतुत्वं स एवाह—

'स्मृतिशास्त्रं तु यत्किञ्चित् प्रथितं धर्मसाधकैः ।
कार्याणां निर्णयार्थे तु व्यवहारः स्मृतो हि सः' ॥

इति। यत्र धर्मशास्त्रकुशलैर्विद्वद्भिरर्थिप्रत्यर्थिनोरग्रे निर्णयार्थं धर्मशास्त्रं प्रख्यापितं भवति स निर्णयो व्यवहारजन्यः। चरित्रजन्यं निर्णयमाह स एव—

'यद्यदाचर्यते येन धर्म्यं चाधर्म्यमेव वा ।
देशस्याचरणं नित्यं चरित्रं तद्धि कीर्तितम्' ॥

इति। शास्त्रोक्तधर्मानपेतं धर्म्यं तद्विपरीतमधर्म्यम्। तदुभयं देशाचारानुसारेण यत्र स्वीक्रियते तत्र चरित्रं निर्णयहेतुः राजशासनस्य निर्णयहेतुतामाह स एव—

'न्यायशास्त्राविरोधेन देशदृष्टेस्तथैव च ।
यद्धर्मं स्थापयेद्राजा न्याय्यं तद्राजशासनम्' ॥

इति। न्यायशास्त्रमिति व्यवहारप्रतिपादकस्मृतिशास्त्रम्। तस्य च देशाचारस्याविरोधेन राजायमनुशास्ति स निर्णयो राजशासनजन्यः। यथोक्तानां धर्मादीनां चतुर्णां मध्ये पूर्वस्य पूर्वस्य बाध्यत्वं उत्तरस्योत्तरस्य बाधकत्वं च बृहस्पतिना प्रपञ्चितम्—

---

१. D. reads निर्णयाद्धेतोः for निर्णयार्थे तु. २. C. and D. read निर्णयाय for निर्णयार्थं. ३. D. reads आचरते for आचर्यते. ४. C. and D. read वा° for चा°. ५. B. originally reads °शास्त्रं°. but corrected °शास्त्रा°. ६. B. originally reads न्याय्यं, but corrected न्याय्यं; while C. substitutes स्थाप्यं and याप्यं.

'शास्त्रं केवलमाश्रित्य क्रियते यत्र निर्णयः ।
व्यवहारः स विज्ञेयो धर्मस्तेनापि वर्द्धते ॥
देशस्थित्याऽनुमानेन नैगमानुमतेन च ।
क्रियते निर्णयस्तत्र व्यवहारस्तु बाध्यते ॥
विहाय चरिताचारं यत्र कुर्यात्पुनर्नृपः ।
निर्णयं सा तु राजाज्ञा चरित्रं बाध्यते तया' ॥

इति । चतुर्षु वर्णेषु यःकश्चिद्राजद्रोहं कृत्वा राज्ञा तर्जितः सन् अतिभीरुतया स्वापराधमङ्गीचकार तत्र समीपवर्तिनः साक्षिणो वर्णिवधं निवारयितुमिच्छन्तः सत्यमुल्लंघ्य–

'तत्र साक्ष्यनृतं वदेत्'

(म. स्मृ. १०. १३०.)

इत्येतादृशं शास्त्रमेवाश्रित्य तदीयमपराधं पर्यहार्षुः । तत्र व्यवहारेण धर्मो बाध्यते । केरलदेशादौ वेश्यागमने साक्षिभिरापादितेऽपि देशाचारवशान्नायं राज्ञा दण्डयते । तत्र चरित्रेण व्यवहारस्य बाधः। सत्यपि तादृशे देशाचारे त्वयैवं न कर्तव्यमिति राजा चेदनुशास्ति तदा राजाज्ञया चरित्रस्य बाधः। य एते प्रोक्ता धर्मादयश्चत्वारः पादाः ते चतुर्षु सभ्यादिषु प्रतिष्ठिताः । दोषकारी स्वयमनृताद्भीतोऽप्यपराधोऽस्तीति सत्यं

१. C. and D. read शास्त्रमेव स° for शास्त्रं केवलम्. २. B. originally reads वर्द्धते, but corrected हीयते; while C. and D. read नीयते for वर्द्धते. ३. B. originally reads बाध्यते, but corrected कथ्यते; while C. and D. both read साध्यते for बाध्यते. ४. B. originally reads °त्तु नर्तनम् for पुनर्नृपः. ५. C. and D. read राज्ञो भीतः सन् for राज्ञा तर्जितः सन्. ६. A. has marginal reading तादृशेतत्र व्यवहर्तव्यम्; while B. has original reading, the same, but corrected त्वयैतत्र व्यवहर्तव्यम्. ७. A. has marginal readings सत्या° and सामा° and B. has corrected readings सत्या° and सभ्या.° ८. A. in marginal reading reads अपराधात्; while B. originally reads अपराधात् and corrected अपराध.

ब्रूते । अतो धर्मस्य सत्येऽवस्थानम् । प्रतिज्ञोत्तरयोः कृतयोः साक्षिणा यस्य पक्षोऽभ्युपगम्यते तस्य जयः । तेन व्यवहारस्य साक्षिण्यवस्थानम् । कर्नाटकदेशे बलान्मातुलसुताविवाहो न दोषाय । केरलदेशे कन्याया ऋतुमतीत्वं न दोषायेत्येवमादिकस्तद्देशसमयः[1] । तत्र तत्र पत्रादिशासनेऽवतिष्ठते । शिष्यत इति शासनम् । राजानुशासनेन[2] प्रजानां वर्तनम् । तत्र राजाज्ञायां प्रतिष्ठितं साम-भेद-दान-दण्डैश्चतुर्भिर्दोषकारिणो दोषनिवारणा[3]च्चतुःसाधनत्वम् ॥ चतुर्हितत्वं विस्पष्टम् । कर्त्रादिचतुष्टयव्यापित्वं[4] मनुना स्पष्टीकृतम्–

'पादो धर्मस्य कर्तारं पादो गच्छति साक्षिणम् ।
पादः सभासदः सर्वान्पादो राजानमृच्छति'* ॥
(म. स्मृ. ८. १८.)

---

* नचैषा मनीषा कर्तव्या आर्थिना प्रत्यर्थिना वान्यतरस्य भूम्याद्यपह्रियते स एव भूम्यपहारदोषभाग् भवति । वयं तु तदकारिणः किमिति दोषवंतः स्यामो ? यतस्तस्यायं चतुर्धा विभज्यते । अर्थवादश्चायम् । न ह्यन्यकृतस्यैनसोऽन्यत्र गमनमस्ति । तेषामपि मिथ्यादर्शननिषेधादुत्पद्यते मिथ्यालम्बनम् । राज्ञः स्वयमपश्यतोऽप्यधिकृतराजस्थानीयादिदोषात् दोषवत्त्वम् । यदि राजाधिकृतो मिथ्याचरितेन ज्ञापितः पराजितं दुष्टं न गृण्हीते न च पुनः सम्यङ्निर्णयं करोति ततः सोऽपि पापभाग्भवति । अधिकृतोपलक्षणार्थं वा राजग्रहणम् । यदा राजा स्वयं मिथ्या पश्यति तदा दुष्यति । यदा राजस्थानीयस्तदा तस्य दोषः । यदा पुनर्निन्दार्ह एव निन्द्यते तदा राजा भवत्यनेनाः अपापः । सभासदोऽपि तस्मात् पापाद्विमुच्यन्ते । तत्सर्वमेवैनः कर्तारमेवैकं प्रतिपद्यते । यथाह नारदः–

'राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः ।
एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते' इति ।

---

१. A. and B. originally read ताकृद्दाः, but A. has marginal reading तद्देश° and B. has corrected the same. २. A. has marginal reading राजानुज्ञानुसारेण and B. has corrected reading the same. ३. In A. this word दोषनिवारणात् is not found. ४. A. originally reads °व्याप्तित्वं.

इति। जेतुर्नृपस्य वा धर्मोऽर्थयशो-लोकानुरागसंपादनाच्चतु-ष्कारित्वम्। त्रियोनित्वं स्पष्टम्। असतां कितव-स्तेनादीनां संसर्गं यः करोति तस्मिन्नपि चौर्यादिशंका जायते। होढा अपहृत-द्रव्यादिदर्शनं तल्लिङ्गं वा तस्मादभियोगो भवति। अर्थि-प्रत्यर्थि-नोर्यौ पूर्वोत्तरपक्षौ तौ व्यवहारस्य प्रवर्तकौ तस्माद् द्विद्वारत्वम्। द्रव्यसंख्यादिकं याथातथ्येनान्यथा वा राजादीनामग्रे यदा ब्रूते तदा तस्योभयस्योपरि व्यवहारः प्रवर्तते ततो द्विगे-तित्वम्। अष्टाङ्गेषु स पुरुषो राजेत्येतदेकमङ्गम्। अतो-नास्ति नवत्वसंख्याप्रसक्तिः। ऋणादानादीनामष्टादशपदानां स्वरूपमुपरिष्टात्तत्रतत्र विचारयिष्यते। एतेषामष्टादशपदानां मध्येएकैकस्य पदस्यावांतरक्रियाभेदादनंतभेदभिन्नत्वं शतशा-खत्वम्। एतानष्टादशपदानवांतरानन्तभेदभिन्नान्व्यवहारान्प्र-कारान्तरेण द्वेधा उपसंगृण्हाति कात्यायनः—

> 'द्विपदे साध्यभेदात्तु पदाष्टादशतां गते।
> अष्टादशक्रियाभेदात् भिन्नान्यथ सहस्रधा' ॥

इति। द्विपदत्वं विशदयति बृहस्पतिः—

> 'द्विपदो व्यवहारस्याद्धन-हिंसासमुद्भवः।
> द्विसप्तकोऽर्थमूलस्तु हिंसामूलश्चतुर्विधः' ॥

---

१. A. has marginal reading °शास्त्रयशो° for °यशो° and B. has correction. २. C. reads द्विमसित्वम् for द्विगतित्वम्. ३. B. originally reads विचारिष्यते, but corrected विचरिष्यते, C. reads विचरिष्यसे, and D. विचारयिष्यंते. ४. A. and B. originally read °शास्त्र°, but in margin A. reads °शाख° and B. corrected; while C. D. also read °शाल° instead of °शाख°. ५. C. and D. simply read संगृण्हाति. ६. B. originally reads द्वे पदे, but corrected द्विपदे; while C. and D. read द्वे गती for द्विपदे. ७. A. has °क्ति° in margin, B. corrected. C. originally reads °धि° for °ध्य.°

इति। तदेतदुभयविधं स एव विवृणोति—

'कुसीद-निधि-देयाद्यं संभूयोत्थानमेव च
भृत्यदानमशुश्रूषा भूवादोऽस्वामिविक्रयः ॥
क्रय-विक्रयानुशयः समयातिक्रमस्तथा।
स्त्री-पुंसयोगः स्तेयं च दायभागोऽक्षदेवनम् ॥
एवं सम्यक् समुत्थानं पदानि च चतुर्दश।
पुनरेव प्रभिन्नानि क्रियाभेदैरनेकधा ॥
पारुष्ये द्वे साहसं च परस्त्रीसंग्रहस्तथा।
हिंसोद्भवपदान्येवं चत्वार्याह बृहस्पतिः' ॥

इति। जगति संभावितानशेषान्विवादानुक्तेष्वष्टादशसु स एवान्तर्भावयति—

'पदान्यष्टादशैतानि धर्मशास्त्रोदितानि तु।
मूलं सर्वविवादानां ये विदुस्ते परीक्षकाः' ॥

इति। इति व्यवहारपरिच्छेदः ॥

अथ सभा निरूप्यते।

तत्र बृहस्पतिः—

'दुर्गमध्ये गृहं कुर्याज्जलवृक्षावृतं पृथक्।
प्राक्दिशि प्राङ्मुखीं तस्य लक्षण्यां कल्पयेत् सभाम् ॥

१. B. originally reads °निधी,° but corrected °निधि° and °निध्य°; while C. °निधि° and D. °निध्य°. २. B. originally शार°, corrected शास्त्र°; while C. reads शास्त्र° for शास्त्र°. ३. A. and B. originally read ऽथ°, but corrected read ऽक्ष°, C. and D. also substitute ऽक्ष°. ४. B. has marginal reading प्रजापतिः and B. corrected. ५. D. reads °वृक्षान्वितं for °वृक्षावृतं.

माल्य-धूपासनोपेतां वीज-रत्नसमन्विताम् ।
प्रतिमा-लेख्य-देवैश्च युक्तामग्न्यम्बुना तथा' ॥

इति। गृहं राजगृहम्। तस्य प्राग्दिशि धर्माधिकरणभूता सभा। सा च वास्तुशास्त्रलक्षणोपेता कर्तव्या। तस्याः सभाया धर्माधिकरणत्वं कात्यायनो दर्शयति—

'धर्मशास्त्रविचारेण मूलशास्त्रविवेचनम् ।
यत्राधिक्रियते स्थाने धर्माधिकरणं हि तत्' ॥

इति । मूलस्यावेदितार्थस्य सारासारविवेचनं तत्त्वनिष्कर्षः। तत्र प्रवेशनं स एवाह—

'[४]प्रातरुत्थाय नृपतिः शौचं कृत्वा समाहितः* ।
गुरुं ज्योतिर्विदं वैद्यान्देवान्विप्रान्पुरोहितान् ॥
यथार्हमेतान्संपूज्य सुपुष्पाभरणा[६]म्बरैः ।
अभिवन्द्य च गुर्वादीन्सुमुखां प्रविशेत्सभाम्' ॥

इति। प्रविश्य च विद्वद्भिर्मन्त्रिभिः सहकार्याण्यनुसन्दध्यात्। तदाह मनुः—

---

* शौच—गुरु-ज्योतिर्विदादिपूजनं नित्यकृत्यत्वेन विहितम्। न पुनर्व्यवहारदर्शननिमित्तम्। व्यवहारान् अदिदृक्षोरपि शौचादीनामवश्यकर्तव्यत्वेनोक्तत्वात् ।

---

१. B. corrected reads °पट्ट° for °धूपा°. २. A. in margin reads °सार° B. originally reads °सार°, but corrected °शास्त्र°. D. reads °धर्म° for °शास्त्र°. ३. C. reads प्रवेशे for प्रवेशनं; whille D. substitutes प्रवेशकालं for प्रवेशनं. ४. A. and D. read the whole line thus प्रातरुत्थाय च नृपः कृत्वा नित्यं समाहितः। ५. A. has marginal reading समा°; while B. reads in correction समा° for पुरो°. ६. C. reads °भरणं नृपः; while D. reads °भरणैर्नृपः. ७. C. and D. read सुमुखाम् for सुमुखां. ८. only D. substitutes तत्र for च.

'व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्[२] सभाम् ॥
तत्रासीनः स्थितो वापि पाणिमुद्यम्य दक्षिणम् ।
विनीतवेषाभरणः पश्येत् कार्याणि कार्यिणाम्[३] ॥
प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः ।
अष्टादशसु मार्गेषु निबद्धानि[४] पृथक् पृथक्' ॥

(म. स्मृ. ८. १-३)

इति । अथ[५] विचारकालमाह कात्यायनः—

'दिवसस्याष्टमं भागं मुक्त्वा कालत्रयं तु[६] यत् ।
स कालो व्यवहाराणां शास्त्रदृष्टः परः स्मृतः' ॥

इति । दिवसं अष्टधाकृत्वा प्रथमं भागमग्निहोत्राद्यर्थं मुक्त्वा अनन्तरं भागत्रयं व्यवहारकालः । अत्र[७] वर्ज्यास्तिथीराह संवर्तः-

'चतुर्दशी ह्यमावास्या पौर्णमासी तथाऽष्टमी ।
तिथिष्वासु न पश्येत्तु व्यवहारान्न नित्यशः'† ॥

---

† सामान्यतः प्रतिक्षणं प्रत्यहं च प्राप्तस्य व्यवहारदर्शनस्य अपवादोऽयम् । दिवसस्याष्टमभागवर्जनं चतुर्दश्यादितिथिवर्जनमपि सति सम्भवे द्रष्टव्यम् । दण्डपारुष्यादौ तु तत्कालमेव व्यवहारा द्रष्टव्याः । यथाह कात्यायनः—

'साक्षि-लिङ्गादिनाशने साध्यनाशस्य सम्भवे ।
न कालनियमं पश्येत् व्यवहारस्य दर्शने' ॥ इति ।

---

१. C. reads व्यवहर्त्तुं दिदृक्षुः instead of व्यवहारान् दिदृक्षुः. २. C. reads प्राविशेत् for प्रविशेत्. ३. B. originally reads कारिणाम्, but corrected कार्यिणाम्. ४. D. reads व्यवहारान् instead of निबद्धानि. ५. in C. and D. अथ is not found. ६. D. substitutes च for तु. ७. This word is only found in C. and D.

इति । येयमुक्ता सभा तस्याश्चातुर्विध्यमाह बृहस्पतिः—

'प्रतिष्ठिताऽप्रतिष्ठिता मुद्रिता शास्त्रिता तथा ।
चतुर्विधा सभा प्रोक्ता सभ्याश्चैव तथाविधाः ॥
प्रतिष्ठिता पुरे ग्रामे चलानामप्रतिष्ठिता ।
मुद्रिताऽध्यक्षसंयुक्ता राजयुक्ता च शास्त्रिता' ॥

इति । राजगृहसमीपवर्त्तिनः सभास्थानान्मुख्यादन्यान्यमुख्यानि स्थानान्याह भृगुः—

'दश स्थानानि वादानां पञ्च चैवाब्रवीद्भृगुः ।
निर्णयं येन गच्छन्ति वादं प्राप्य च वादिनः ॥
आरण्यास्तु स्वकैः कुर्युः सार्थिकाः सार्थिकैस्तथा ।
सैनिकाः सैनिकैरेव ग्रामेऽप्युभयवासिनः ॥
उभयानुमतं चैव गृह्णन्ति स्थानमीप्सितम् ।
कुलिकाः सार्थमुख्याश्च पुर-ग्रामनिवासिनः ॥
ग्राम-पौरगणश्रेण्यश्चातुर्विद्याश्च वर्गिणः ।
कुलानि कुलिकाश्चैव नियुक्ता नृपतिस्तथा' ॥

---

१. A. has marginal reading एवं वा; while B. originally reads एवं and corrected येयं. २. C. reads मुद्रिका for मुद्रिता. ३. B. originally reads शास्तिता, but correction is शास्त्रिता. ४. A. and C. originally read बला° and B. originally reads छला°, but corrected चला°. ५. A. and B. originally read शास्तिता; while corrected शास्त्रिता. ६. C. D. read विवादं for वादं. ७. च is not found in C. and D. ८. B. reads originally स्वास्तिकैः, but corrected तु स्वकैः. ९. B. originally reads आर्थिकाः and corrected सार्थिकाः. १०. C. and D. read °वासिभिः for °वासिनः. ११. C. reads गृण्हते; while D. मृग्यते for गृण्हन्ति. १२. B. originally reads स्वामिनेप्सितम् and corrected स्थानमीप्सितम्. १३. B. orginally reads चातुर्विध्याः, but corrected चातुर्विद्याः; while D. reads चातुर्वैद्याः. १४. B. originally reads वर्गिनः, but corrected वर्गिणः. १५. B. originally reads च प्रतिष्ठिताः instead of नृपतिस्तथा.

इति । स्वैकैरारण्यकैः। ग्रामेऽपीत्यादिशब्दात् ये तु अरण्यादौ ग्रामे च निवसन्ति ते ह्युभयवासिभिः ग्रामवासिभिः अरण्यवासिभिर्वा निर्णयं कुर्युः । उभयव्यवहाराभिज्ञत्वात्तेषाम् । कुलिकाः कुलश्रेष्ठिनः । सार्थिनो ग्रामयात्रादौ मिलितो जनसङ्घः । मुख्या ग्रामण्यादयः। पुरं मुख्यं नगरम् । तस्मादर्वाचीनो ग्रामः । पुरग्रामनिवासिनां भेदः कुलिकादीनि पञ्च स्थानानि तानि चारण्यकादिजनविशेषाणामेव । ग्रामाकारेणावस्थितजनविवादे समीपग्रामनिवासिभिर्निर्णयः । अर्थि-प्रत्यर्थिनोरनुशयानुमतं स्थानं कुलिक-सार्थमुख्य-पुरग्रामनिवासिनो गृंण्हते। ग्रामादीनि दश स्थानानि साधारणानि। ग्रामो ग्रामाकारेणावस्थितो जनः। पौरः पुरवासिनां समूहः । गणाः कुलानां समूहः । श्रेण्यः रजकाद्यष्टादश हीनजातयः । चातुर्विद्या आन्वीक्षिक्यादिविद्याचतुष्टयोपेताः* । वर्गिणो गणप्रभृतयः । तथा च कात्यायनः–

* विद्याचतुष्टयं कामन्दकीये प्रदर्शितम्—

' आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्तथैव च ।
विद्याश्चतस्र एवैता लोकसंस्थितिहेतवः ' ॥

इति । तत्र आन्वीक्षिकी–श्रवणादनु पर्यालोचना प्रयोजनमस्याः । न्यायविद्येत्यमरः । प्रत्यक्ष-परोक्षाभ्यामीक्षितस्य अर्थस्यानु पश्चात् ईक्षणं अन्वीक्षा । सा प्रयोजनं यस्याः सा आन्वीक्षिकी । इयं हि त्रयी वार्तादिविद्याचतुष्टयान्तर्गता आत्मविज्ञानहेतुका धर्मार्थसंसाधिका । एतस्यां ये कुशलास्ते विद्याचतुष्टयेऽपि कुशला एव । त एवात्र विवक्षिताः । न केवलं तर्कशास्त्रकुशलाः ।

१. This sentence is not found in A. B. and C. २. This sentence is not found in A. B. and C. ३. C. and D. read सार्थो for सार्थिनो. ४. C. reads °मारि कुर्वतो गणिताः for °मनिवासिनो गृण्हते,' which is absurd; while D. reads गृह्णन्ते.

'गणाः पाखण्डपूगाश्च व्रातांश्च श्रेणयस्तथा।
समूहस्थाश्च ये चान्ये वर्णाख्या ये बृहस्पतिः'॥

इति। आयुधधराणां समूहो व्रातः। कुलान्यर्थि-प्रत्यर्थिनोः सगोत्राणि। कुलिकास्तत्र वृद्धा नियुक्ता अपि प्राड्विवाकसहिता-स्त्रयः सभ्याः नृपति-ब्राह्मणादिसहिताः। सभ्यानाह याज्ञवल्क्यः

'श्रुताध्ययनसंपन्ना धर्मज्ञाः सत्यवादिनः।
राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः'॥
(या. स्मृ. २. २.)

इति। तेषां संख्यामाह बृहस्पतिः—

*'लोक-वेदाङ्ग-धर्मज्ञाः सप्त पञ्च त्रयोऽपि वा।

---

*मनुरपि सभां प्रविश्य व्यवहारान् पश्येदित्युक्त्वा सभाशब्दो लोके गृह-प्रासादविशेषेऽपि वर्तते—

'मयेन निर्मिता दिव्या सभा हेमपरिष्कृता'

इत्यादिभारतोक्तेः क्वचित् पुरुषविशेषसंघटिताऽपि सभा भवेदिति तन्निरासार्थं सभाया लक्षणमाह—

'यस्मिन् देशे निषिदन्ति विप्रा वेदविदस्त्रयः।
राज्ञश्चाधिकृतो विद्वान् ब्राह्मणस्तां सभां विदुः'॥
(म. स्मृ. ८. ११.)

इत्युक्तवान्।

---

१. A. in marginal reading, B. in correction and C. originally substitute ग्रामस्थाश्च पुरस्थाश्च ब्राह्मणाः for गणाः पाखण्डपूगाश्च व्रातांश्च, but D. reads the same as in original, A. only substituting ब्राह्मणाः for व्रातांश्च. २. A. in marginal reading, and B. in correction; while C. and D. as usual read वर्ग्याख्याः for वर्णाख्याः. ३. A. in margin, B. in correction, C. and D. as usual read °स्ते for ये. ४. This sentence is dropped from C.; while D. substitutes ज्ञातम् for व्रातः. ५. B. and C. only mention अपि. ६. D. reads नृपतिर्ब्राह्मणादिसहितः for नृपति-ब्राह्मणादिसहिताः. ७. A. in marginal reading; while B. in correction and C. and D. as usual read °धर्माङ्ग-सत्य° for °वेदाङ्ग-धर्म°.

येत्रोपविष्टा विप्राःस्युः सा यज्ञसदृशी सभा' ॥

इति । तत्र वर्ज्यान् स एवाह—

'देशाचारानभिज्ञा ये नास्तिकाः शास्त्रवर्जिताः ।
उन्मत्त-लुब्ध-क्रुद्धाश्च न प्रष्टव्या विनिर्णये' ॥

इति । राज्ञः प्रतिनिधिमाह याज्ञवल्क्यः—

'अपश्यता कार्यवशाद्व्यवहारान् नृपेण तु ।
सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्' ॥
(या. स्मृ. २. ३)

इति । सोऽपि राजवत्सर्वकार्याणि विचारयेत् । तदाह मनुः—

'यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम् ।
तदा नियुंज्याद्विद्वांसं ब्राह्मणं कार्यदर्शने ॥
सोऽस्य कार्याणि संपश्येत्सभ्यैरेव त्रिभिर्वृतः ।
सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा' ॥
(म. स्मृ. ८. ९-१०.)

इति । स च विचारको ब्राह्मणः प्राड्विवाक* इत्युच्यते तदाह बृहस्पतिः—

---

*अर्थि-प्रत्यर्थिनौ पृच्छतीति प्राट् । तयोर्वचनं विरुद्धमविरुद्धं च सभ्यैः सह विविनक्ति विवेचयति वेति विवाकः । प्राट् चासौ विवाकश्चेति प्राड्विवाकः । उक्तं च—

'विवादानुगतं पृष्ट्वा ससभ्यस्तान् प्रयत्नतः ।
विचारयति येनासौ प्राड्विवाकस्ततो मतः' ॥ इति ।

---

१. A. has marginal reading शास्त्रो°; while B. has original and corrected B. reads तत्रो°. २. A. has marginal reading लोकाग्र्याः; while B. has recorrected reading, C. and D. also read विप्राग्र्याः for विप्राः स्युः. ३. B. originally reads उन्मत्त-लुब्ध-क्रुद्धर्षा and corrected °क्रुद्धाश्च; while D. reads उन्मत्त-कुहका लुब्धाः. ४. C. reads यदाह for तदाह. ५. B. originally reads प्रविश्यारमा°, but corrected प्रविश्याग्र्या°; while D. reads प्रविश्येमा°.

'राजा कार्याणि संपश्येत्प्राड्विवाकोऽथ वा द्विजः ।
न्यायांगान्यग्रतः कृत्वा सभ्यशास्त्रमते स्थितः ॥
बलेन चतुरङ्गेण यतो रञ्जयते प्रजाः ।
दीप्यमानः स्ववपुषा तेन राजाभिधीयते ॥
विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च ।
प्रियपूर्वं प्रा[1]ग्वदति प्राड्विवाकोऽभिधीयते' ॥

इति । नारदोऽपि—

'अष्टादशपदाभिज्ञः षड्भेदाष्टसहस्रवित् ।
आन्वीक्षिक्यादिकुशलः श्रुति-स्मृतिपरायणः ॥
विवादसंश्रितं धर्मं पृच्छति प्रकृतं मतम् ।
विवेचयति ये[2]स्तस्मात्प्राड्विवाकस्तु संस्मृतः ॥
*यथा शल्यं भिषक्कायादुद्धरेद्य[3]न्त्रयुक्तितः ।
प्राड्विवाकस्तथा शल्यमुद्धरेद्व्यवहारतः' ॥ (१६) ॥
(ना. स्मृ. ३. १६.)

---

*यथा नष्टशल्यमदृष्टमपि दुःखोद्धरणीयमपि भिषग्वैद्यः शस्त्रक्रियानिपुण इत्यर्थः । बहुप्रकारं शल्यतन्त्रप्रयोगयुक्तिभिः शल्यमुद्धरेत् । एवमेव प्राड्विवाकः व्यवहारान्तर्गतं पापशल्यं अनुपलक्ष्यमपि व्यवहारयुक्तिभिरुद्धरेदित्यभिप्रायः ।

---

१. C. reads वाग्वदति for प्राग्वदति. २. A. has marginal reading यस्तस्मात्; while B. corrected reads यत्तस्स्यात्. ३. A. has marginal reading °यन्त्र for यंत्र°; while B. originally reads यत्र and corrected यन्त्र°.

इति । प्राड्विवाकस्य गुणाः स्मृत्यंतरे दर्शिताः—

'अक्रूरो मधुरः स्निग्धः क्रमायातो विचक्षणः ।
उत्साहवानलुब्धश्च वादे योज्यो नृपेण तु' ॥

इति । प्राड्विवाकस्यानुकल्प्यमाह कात्यायनः—

'ब्राह्मणो यत्र न स्यात्तु क्षत्रियं तत्र योजयेत् ।
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्' ॥

इति । बृहस्पतिरपि—

'यत्र विप्रो न विद्वान्स्यात्क्षत्रियं तत्र योजयेत् ।
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्' ॥

इति । तदवर्जने बाधमाह मनुः—

'जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः ।
धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथंचन ॥ (२०)
यस्य शूद्रस्तु कुरुते राज्ञो धर्मविवेचनम् ।
तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः ॥ (२१)
द्विजान्विहाय यः पश्येत्कार्याणि वृषलैः सह ।
तस्य प्रक्षुभ्यते राष्ट्रं बलं कोशश्च नश्यति' ॥

(म. स्मृ. ८. २०–२२)

इति । गणक-लेखकावपि कार्यावित्याह बृहस्पतिः—

१. B. C. and D. read अनुकल्प° for अनुकल्प्य°. २. A. has marginal reading °तत्वज्ञं; while B. has original, but corrected reads °न्यायज्ञं. ३. C. and D. read ब्राह्मणो ब्रुवः instead of ब्राह्मणब्रुवः. ४. D. reads सम्पश्येत् for यः पश्येत्. ५. C. reads प्रक्षुभते for प्रक्षुभ्यते. ६. C. reads राष्ट्रं for राष्ट्रं.

'शब्दाभिधानतत्त्वज्ञौ गणनाकुशलौ शुची ।
नानालिपिज्ञौ कर्तव्यौ राज्ञा गणक-लेखकौ' ॥

इति । व्यासोऽपि—

'त्रिस्कन्धज्योतिषाभिज्ञं* स्फुटप्रत्ययकारकम् ।
श्रुताध्ययनसंपन्नं गणकं योजयेन्नृपः ॥
स्फुटलेखं नियुञ्जीत शाब्दं लाक्षणिकं शुचिम् ।
स्पष्टाक्षरं जितक्रोधमलुब्धं सत्यवादिनम्' ॥

इति । साध्यपालोऽपि कर्तव्य इति तेनैवोक्तम्—

'साध्यपालस्तु कर्तव्यो राज्ञा साध्यस्य साधकः ।
क्रमायातो दृढः शूद्रः सभ्यानां च मते स्थितः' ॥

*तत्रतावत् ज्योतिः शास्त्रस्य त्रयः स्कन्धाः । ते च गणितस्कन्धः जातकस्कन्धः, सिद्धान्तस्कन्धश्चेति त्रयः । तत्र गणितं द्विविधमुक्तं लीलावत्याम् । व्यक्तं पाटीगणितं अव्यक्तं बीजगणितमिति । जातकस्कन्धे तु जातस्य शिशोः शुभाशुभचिन्ता । सिद्धान्तस्कन्धस्तु भास्कराचार्यैः शिरोमणौ प्रदर्शितः । यथा—

'त्र्युट्यादिप्रलयान्तकालकलनामानप्रभेदः क्रमात्
चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः ।
भू-धिष्ण्यग्रहसंस्थितेश्च कथनं जन्मादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः' ॥

इति । एवं प्रकारकत्रिस्कन्धज्योतिषाभिज्ञो लेखकोऽत्र नियोक्तव्य इत्याशयः ।

---

१. A. has marginal reading राजा वि° for शब्दाभि° and B. originally reads राजा वि°, but corrected शब्दाभि°. २. B. originally reads °तिथिज्ञौ, but corrected reads °लिपिज्ञौ; while C. and D. read °क्षरज्ञौ and °विधिज्ञौ. ३. D. reads °कारणम् for °कारकम्. ४. A. has marginal reading सुतीर्था° for श्रुताध्य°; while B. originally reads सुतीर्थाह्वान° and corrected श्रुताध्ययन°.

इति। बृहस्पतिरपि—

'आकारणे रक्षणे च साक्ष्यर्थि-प्रतिवादिनाम्।
सभ्याधीनः सत्यवादी कर्तव्यस्तु स पूरुषः'॥

इति। राज्ञा कतिपयैर्वणिग्भिरधिष्ठितं सदः कर्तव्यम्। तदाह कात्यायनः—

'कुल-शील-वयो-वृत्त[१]-वित्तवद्भिरमत्सरैः।
वणिग्भिः स्यात्कतिपयैः कुलभूतैरधिष्ठितम्'॥

इति। कुलभूतैर्वृन्दभूतैरित्यर्थः। तेषामुपयोगमाह स एव—

'श्रोतारो वणिजस्तत्र कर्तव्या न्यायदर्शिनः[२]'।

इति। यथोक्तराजादियुक्तायाः सभाया दशाङ्गानि सप्रयोजनान्याह बृहस्पतिः—

'नृपोऽधिकृतसभ्याश्च स्मृतिर्गणक-लेखकौ।
सहेमाग्न्यम्बु-पुरुषाः[३] साधनाङ्गानि वै दश॥
एतद्दशाङ्गकरणं यस्यामध्यास्य पार्थिवः।
न्यायं पश्येत्कृतमतिः सा सभाऽध्वरसंमिता॥
दशानामपि चैतेषां कर्म प्रोक्तं पृथक्पृथक्।
वक्ताऽध्यक्षो[४] नृपः शास्ता सभ्याः कार्यपरीक्षकाः॥
स्मृतिर्विनिर्णयं ब्रूते जयदानं धनं तथा।
शपथार्थौ[५] हिरण्याग्नी जलं तृषित-लुब्धयोः[६]॥

१. D. reads °वृद्धैः for °वृत्त°. २. D. reads °दर्शने for °दर्शिनः ३. A. B. C. read हेमाग्न्यम्बु-स्वपुरुषाः for सहेमाग्न्यम्बु-पुरुषाः. ४. B. originally reads वक्ताऽभ्यस्तो, but corrected वक्ताऽध्यक्षो; while D. reads सभाध्यक्षो for वक्ताऽध्यक्षो. ५. C. and D. read शपथार्थे for शपथार्थौ. ६. B. originally reads °क्षुब्धयोः, but corrected °लुब्धयोः; while C. reads °लुब्धयोः for the same.

गणको गणयेदर्थं[1] लिखेन्न्यायञ्च लेखकः ।
प्रत्यर्थिसभ्यानयनं साक्षिणां च स पूरुषः ॥
वाग्दण्डश्चैव धिग्दण्डो विप्राधीनौ[2] तु तावुभौ ।
अर्थदण्ड-वधावुक्तौ राजायत्तावुभावपि ॥
राज्ञा ये विदिताः सम्यक् कुल-श्रेणि-गणादयः[3] ।
साहस-न्यायवर्ज्यानि कुर्युः कार्याणि ते नृणाम्' ॥
इति । यथाविधिविचारे राज्ञः फलमाह कात्यायनः--
'सप्राड्विवाकः सामात्यः सब्राह्मण-पुरोहितः ।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः' ॥
इति । वैपरीत्ये दोषमाह मनुः—
'अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चैव गच्छति' ॥
(म. स्मृ. ८. १२८.)
इति । सभ्यानां फलमाह बृहस्पतिः—
'अज्ञानतिमिरोपेतान् संदेहपटलान्वितान् ।
निरामयान्यः कुरुते शास्त्राञ्जनशलाकया ॥
इह कीर्तिं राजपूजां लभते स्वर्गतिं च सः ।
लोभद्वेषादिकं त्यक्त्वा यः कुर्यात् कार्यनिर्णयम् ॥
शास्त्रोदितेन विधिना तस्य यज्ञफलं भवेत्' ।
इति । विपक्षे दोषमाह कात्यायनः—
'न्यायशास्त्रमतिक्रम्य सभ्यैर्यत्र विनिश्चितम् ।
तत्र धर्मो ह्यधर्मेण हतो हंति न संशयः ॥

---

१. C. and D. read °दर्थे for दर्थं. २. A. has marginal reading °धि° for °धी°; while B. had originally °धि°, but corrected became °धी.° ३. C. reads °गणोत्तमाः for °गणादयः.

अपन्यायप्रवृत्तं तु नोपेक्षेरन्[1] सभासदः ।
उपेक्षमाणाः सनृपा नरकं यान्त्यधोमुखाः ॥
अन्यायेनापि तं यांतं येऽनुयांति[2] सभासदः ।
तेऽपि तद्भागिनस्तस्माद्बोधनीयः स तैर्नृपः ॥
न्यायमार्गादपेतं तु ज्ञात्वा चित्तं महीपतेः ।
कर्तव्यं[3] तत्प्रियं तत्र न सभ्यः किल्बिषी भवेत्' ॥

इति । कार्यानिष्पत्तावपि यथाशास्त्रवादिनो नास्ति प्रत्यवाय इति स एवाह—

'सभ्येनावश्यकर्तव्यं धर्मार्थसहितं वचः ।
शृणोति यदि नो राजा स्यात्तु सभ्यस्ततोऽनघः' ॥

इति । यदा तु राजा यथाशास्त्रं धर्मं श्रुत्वा दोषकारिणे पक्षपातं न करोति तदा निष्पापो[4] भवति । तदाह मनुः—

'राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः ।
एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते[5]' ॥
(म. स्मृ. ८. १९.)

इति । अन्यथावादिनः सभ्यस्य दण्डमाह नारदः—

'रागादज्ञानतो वापि यो लोभादन्यथा वदेत् ।
सभ्योऽसभ्यः स विज्ञेयस्तं पापं विनयेद्द्रुतम्' ॥

इति । कात्यायनोऽपि —

---

१. A. in margin reads उपेक्षेयुः and B. originally and corrected reads उपेक्षन्ते; while C. D. उपेक्ष्यं तत् for उपेक्षेरन्. २. D. substitutes तु for ऽनु. ३. A. has marginal reading स्मर्तव्यं; while B. has in correction and C. D. as usual read वक्तव्यं for कर्तव्यं. ४. C. reads न पातो for निष्पापो. ५. B. originally reads विद्यन्ते, but corrected निन्द्यते; while C. नेष्यन्ते for the same.

'स्नेहादज्ञानतो वापि लोभाद्वा मोहतोऽपि वा ।
तत्र सभ्योऽन्यथावादी दण्ड्योऽसभ्यः स्मृतो हि सः' ॥

इति । याज्ञवल्क्योऽपि—

'रागाल्लोभाद्भयाद्वापि स्मृत्यपेतादिकारिणः ।
सभ्याः पृथक्पृथग्दण्ड्या विवादाद्द्विगुणं* दमम्' ॥
(या. स्मृ. २. ४.)

इति । बृहस्पतिरपि—

'अन्यायवादिनः सभ्यास्तथैवोत्कोचजीविनः ।
विश्वस्ते वञ्चकाश्चैव निर्वास्याः सर्व एव ते' ॥

इति । कात्यायनः—

*अत्र विज्ञानेश्वरः—विवादपराजयनिमित्ताद्दमाद्द्विगुणं दमं दण्ड्याः न पुनर्विवादास्पदीभूतात् द्रव्यात् । तथा सति स्त्रीसङ्ग्रहणादिषु दण्डाभाव-प्रसङ्गः । राग-लोभ-भयानामुपादानं रागादिष्वेव द्विगुणो दमो नाज्ञान-मोहादिषु इति नियमार्थम् । न च—

'राजा सर्वस्येष्टे ब्राह्मणवर्ज्यम्'—

इति गौतमवचनात् न ब्राह्मणा अदण्ड्या इति मन्तव्यम् । तस्य प्रशंसार्थत्वात् । यत्तु—

'षड्भिः परिहार्यो राज्ञा वध्यश्चा-ऽबन्ध्यश्चा-ऽदण्ड्यश्चा-ऽबहिःकार्यश्चा-ऽपरिवाद्यश्चाऽ-परिहार्यश्च

इति तदपि 'स एष बहुश्रुतो भवति । लोक-वेद-वेदाङ्गवित् वाकोवाक्येतिहासपुराणकुशलः तदपेक्षस्तद्वृत्तिश्चाष्टाचत्वारिंशत्संस्कारैः संस्कृतः त्रिषु कर्मस्वभिरतः षट्सु वा समयाचारिकेष्वभिविनीतः' । इतिप्रतिपादितबहुश्रुतविषयम् । न ब्राह्मणमात्रविषयं इति ।

१. C. and D. read सभ्यो दण्ड्यः for दण्ड्योऽसभ्यः. २. C. and D. read द्वेषात् for लोभात्. ३. C. reads दमः for दमम्.

'अनिर्णीते तु यद्यर्थे सम्भाषेत रहोऽर्थिना।
प्राड्विवाकोऽथ[1] दण्ड्यः स्यात्सभ्याश्चैव विशेषतः'॥

इति। राजादीनां सभायामुपवेशनप्रकारमाह बृहस्पतिः—

'पूर्वामुखस्तूपविशेद्राजा सभ्या उदङ्मुखाः।
गणकः पश्चिमास्यस्तु लेखको दक्षिणामुखः'॥

इति। सभोपविष्टा[2] नृपादयो यस्यांगानि तमङ्गिनं व्यवहारं पुरुषरूपेण परिकल्पयति स एव—

'एषां मूर्द्धा नृपोऽङ्गानां मुखं चाधिकृतः स्मृतः[3]।
बाहू सभ्याः स्मृतिर्हस्तौ जङ्घे गणक-लेखकौ॥
हेमाग्न्यम्ब्वन्न-पुरुषाः पादौ च पुरुषस्य च'।

इति। या वृद्धराहित्यादिदोषरहिता सा मुख्या सभा। तदुक्तं महाभारते—

'न सा सभा यत्र न संति वृद्धाः
वृद्धा न ते ये न वदन्ति धर्मम्।
नासौ धर्मो यत्र न सत्यमस्ति
न तत्सत्यं यच्छलेनानुविद्धम्'[4]॥
(ना. स्मृ. ३. १८.)

इति। इति सभा निरूपणम्।

---

१. D. reads ऽपि for ऽथ. २. A. has marginal reading सभाप्रविष्टा; while B. originally reads the same, but corrected सभोपविष्टाः. ३. D. reads कृतः for स्मृतः. ४. B. originally reads कपटेना°, but corrected यच्छलेना°. C. also reads as B.'s corrected form.

अथ व्यवहारदर्शनविधिर्निरूप्यते । तत्र प्रजापतिः—

'राजाऽभिषेकसंयुक्तो ब्राह्मणो वा बहुश्रुतः ।
धर्मासनगतः पश्येद्व्यवहाराननुल्बणम्' ॥

इति । नारदः—

'* तस्माद्धर्मासनं प्राप्य राजा विगतमत्सरः ।
समः स्यात्सर्वभूतेषु बिभ्रद्वैवस्वतं व्रतम् ॥ (३४)
(ना. स्मृ. १. ३४.)

इति । [1]वैवस्वतव्रतमुक्तं बृहस्पतिना—

---

* यस्मात्—
धर्मेणोद्धरतो राज्ञो व्यवहारान् कृतात्मनः ।
सम्भवन्ति गुणाः सर्वे सत्यं वन्हेरिवार्चिषः ॥ (३२)
धर्मश्चार्थश्च कीर्तिश्च लोकपक्तिरुपग्रहः ।
प्रजाभ्यो बहुमानं च स्वर्गे स्थानं च शाश्वतम् ॥

तस्मादेवंविधमहार्थलाभात् राजा विगतमत्सरो राग-द्वेषविवर्जितो वैवस्वतो यमो धर्मराजः तस्य व्रतं लोकानां स्वकर्मजातशुभाशुभ-फलदत्वं तद्विभूतिवान् धारयन् धर्मासनं धर्माधिकरणं प्राप्य सर्वभूतेषु समः स्यादिति भावः ।

† 'वैवस्वतव्रतमुक्तं बृहस्पतिना' नास्तीदं A. संज्ञकपुस्तकातिरिक्तेष्वादर्शपुस्तकेषु । नोपलभ्यते चाधस्तनं वाक्यं बृहस्पतिस्मृतौ । D. संज्ञकपुस्तके इदं वचनं यमवाक्यत्वेन दर्शितम् । परं नोपलभ्यते यमस्मृतौ । तस्मादिदं बृहस्पतिवाक्यं यमवाक्यं वेति विचारयन्तु सुधिय इत्यलमप्रसक्तेन ।

---

१. A. had marginal reading °स्थान° and original reading °नप° similarly B. has corrected reading °सन° and original °सन° C. also reads °नप° for °सन°.

'यथा[1] यमः प्रिय-द्वेष्यौ प्राप्ते काले नियच्छति ।
तथा राज्ञा नियंतव्याः प्रजास्तद्धि यमव्रतम्' ॥

इति । यद्व्यवहारप्रतिपादकं धर्मशास्त्रं यच्च तदन्तर्गतं द्रव्यदण्डादिरूपमर्थशास्त्रं तदुभयमपि व्यवहारदर्शिना[2] राज्ञाऽनुसरणीयम् । तदाह स एव—

'धर्मशास्त्रा-ऽर्थशास्त्राभ्यामविरोधेन पार्थिवः ।
समीक्षमाणो निपुणं[3] व्यवहारगतिं नयेत्'* ॥
(ना. स्मृ. १. ३७)

इति । धर्मशास्त्राणि पितामहेन दर्शितानि—

'वेदाः साङ्गास्तु चत्वारो मीमांसा स्मृतयस्तथा ।
एतानि धर्मशास्त्राणि पुराणं[4] न्यायदर्शनम्' ॥

इति । ननु-नधर्मशास्त्रांतर्गतमर्थशास्त्रम् । किंत्वन्यदेवं नीत्यात्मकम्[5] । यत्तु भविष्यत्पुराणे[6] दर्शितम्—

* क्वचित् धर्मशास्त्रोक्तं अर्थशास्त्रविरुद्धं भवति । क्वचित् पुनरर्थशास्त्रोक्तं धर्मशास्त्रविरुद्धं भवति । तयोरितरेतरतामालोच्य यथा लोकाचारविरुद्धं न भवति तथा ससभ्योऽपि राजा व्यवहारगतिं नयेत् निर्णयं-कुर्यादित्यर्थः ।

१. D. split the two words यथा यमः, and quotes them as author and reads the following thus:-प्रिय-द्वेष्यौ समौ ज्ञात्वा for यथा यमः प्रियद्वेष्यौ. २. A.has marginal reading; °वर्तिना for °दर्शिना; while B. originally reads °दर्शिना and corrected °वर्तिना. ३. D. reads निपुणो for निपुणं. ४. D. reads पौराणं न्यायवित्तमम् for पुराणं न्यायदर्शनम्. ५. A. in margin reads रीत्यात्मकम्; while B. originally reads रीत्या° and corrected नीत्या°. ६. D. reads भविष्यपुराणे, for भविष्यत्पुराणे.

'षाड्गुण्यस्य प्रयोगश्चाऽप्रयोगः कार्यगौरवात् ।
सामादीनामुपायानां योगो व्यास-समासतः ॥
अध्यक्षाणं च निक्षेपः कण्टकानां निरूपणम् ।
दृष्टार्थे संस्मृतिः प्रोक्ता ऋषिभिर्गरुडाग्रज' ॥

इति । बाढम् अस्मिन्नप्यर्थशास्त्रे धर्मशास्त्राविरुद्धो योंऽशः स उपादेयः । इतरस्तु परित्याज्यः । तदाह नारदः—

'यत्र विप्रतिपत्तिःस्याद्धर्मशास्त्रार्थशास्त्रयोः ।
अर्थशास्त्रोक्तमुत्सृज्य धर्मशास्त्रोक्तमाचरेत्'* ॥
(ना. स्मृ. १. ३९)

* धर्मशास्त्रार्थशास्त्रयोर्विरोधे धर्मशास्त्रं बलवत् । धर्मशास्त्रेऽपि एकस्याः स्मृतेः स्मृत्यन्तरेण विरोधे पुरस्तादुक्तयाज्ञवल्क्यवचनेन व्यवहार-न्यायस्य बलवत्वम् । धर्मशास्त्रोक्तमपि न सर्वं ग्राह्यम् । यथा—

'अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात्' ।

इत्यादिना विहितोऽपि नियोगो—

'नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम् ॥ (६४)
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवावेदनं क्वचित् ॥ (६५)
अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः' । (६६)
(म. स्मृ. ९. ६४—६६)

इत्यादिवचनैर्निषिद्धत्वात् लोकव्यवहारे शिष्टैरनादृतत्वान्नाचरणीयम् । तथा—

१. D. reads °स्य for °श्चा°. २. C. reads च for सं°; while D. reads इयं° for सं.

इति। धर्मशास्त्रयोर्द्वयोर्विरोधे न्यायेन निर्णेतव्यम्[1]। तदाह याज्ञवल्क्यः–

'स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः'

(या. स्मृ. २. २१)

इति। व्यवहारतो वृद्धव्यवहारात् प्रसिद्धो न्यायो बलवान्। न्यायानाश्रयणे बाधमाह बृहस्पतिः–

'केवलं शास्त्रमाश्रित्य न कर्तव्यो विनिर्णयः।
युक्तिहीने विचारे तु धर्महानिः प्रजायते॥
चोरोऽचौरः साध्वसाधुर्जायते व्यवहारतः।
युक्तिं विना विचारेण माण्डव्यश्चोरतां गतः॥
असत्याः सत्यसदृशाः सत्याश्चासत्यसन्निभाः।
दृश्यन्ते[2] भ्रान्तिजनकास्तस्माद्युक्त्या विचारयेत्'॥

इति। न्यायस्य निर्णायकत्वमुपपादयति मनुः–

'यथानयत्यसृक्पातैर्[3]मृगस्य मृगयुः पदम्।
नयेत्तथानुमानेन धर्मस्य नृपतिः पदम्॥ (४४)

'नष्टेमृते प्रव्रजिते क्लीबे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते'॥

इत्यादिवचनैः पुनरुद्वाहे विहितेऽपि अन्यत्र निषेधदर्शनात् शिष्टैरपरिगृहीतत्वाच्च स्त्रीपुनरुद्वाहो वर्जनीय एव। एवं मातुलकन्यापरिणयः श्रुति-स्मृत्यादिभिर्निषिद्धोऽपि शिष्टैरादृतत्वात् दाक्षिणात्यैः कर्तव्य एव भवति।

---

१. D. reads धर्मशास्त्रार्थशास्त्रयोः for धर्मशास्त्रयोर्द्वयो°ः. २. C. reads भासन्ते for दृश्यन्ते. ३. D. reads °पुक्तैः for °पातैः.

बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम्।
स्वरवर्णेङ्गिताकारैश्चक्षुषश्चेष्टितेन च' ॥ (२६)
(म. स्मृ. ८. २५-४४.)

इति। याज्ञवल्क्योऽपि—

'असाक्षिके हते[2] चिन्हैर्युक्तिभिश्चागमेन च।
द्रष्टव्यो व्यवहारस्तु कूटचिन्हकृताद्भयात्' ॥
(या. स्मृ. २. ३९)

इति। 'यत्तु पूर्वमुक्तं 'भूतछलानुसारित्वात् द्विगतिः' इति तत्र छलं हेयं भूतमुपादेयम्। तदाह याज्ञवल्क्यः—

'छलं[5] निरस्य भूतेन व्यवहारान्नयेन्नृपः।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः' ॥
(या. स्मृ. २. १९.)

इति। निर्णये[6] प्रमाणं साक्ष्यादिकम्। तदाह गौतमः—

'विप्रतिपत्तौ साक्षिनिमित्ता तस्य व्यवस्था'।
(गौ. स्मृ. २७. १३)

इति। मनुरपि—

'प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः।
अष्टादशसु मार्गेषु निबद्धानि[7] पृथक्पृथक्' ॥
(म. स्मृ. ८. ३.)

---

१. D. reads वाक्यैः for बाह्यैः. २. B. originally reads धने, but corrected reads हते. ३. C. and D. read चिन्हे for चिन्हैः. ४. B. originally reads °तु° for °यं°; while C. and D. do not read हेयं भूतमुपादेयं. ५. B. originally reads बलं, but corrected reads छलं. ६. C. reads निर्णायके for निर्णये. ७. D. reads निबन्धानि for निबद्धानि.

इति। देशाचारैः शास्त्रोक्तदिव्यादिभिश्चाष्टादशपदसंबंधीनि कार्याणि निर्णयेत्। तत्र देशाचारोऽनुकल्पः। तदाह कात्यायनः–

'तस्माच्छास्त्रानुसारेण राजा कार्याणि साधयेत्।
वाक्याभावे तु सर्वेषां देशदृष्टमतं नयेत्' ॥

इति। देशदृष्टस्य लक्षणमाह स एव–

'यस्य देशस्य यो धर्मः प्रवृत्तः सार्वकालिकः।
श्रुति-स्मृत्यविरोधेन देशदृष्टः स उच्यते' ॥

इति। तत्तद्देशीयानां मिथो विवादे तद्देशदृष्टेन निर्णयः। तदाह स एव–

'देश-पत्तन-गोष्ठेषु पुर-ग्रामेषु वादिनाम्।
तेषां स्वसमयैर्धर्मः शास्त्रतोऽन्येषु तैः सह' ॥

इति। यत्र तद्देशीयानामितरैः सह विवादः। तत्र शास्त्रतो निर्णयो न तु देशदृष्टतः। लेख्यादिप्रमाणाभावे राजा स्वेच्छया निर्णयेत्। तदाह स एव–

'लेख्यं यत्र न विद्येत न भुक्तिर्न च साक्षिणः।
न च दिव्यावतारोऽस्ति प्रमाणं तत्र पार्थिवः' ॥

इति। वणिगादिसमयेषु समयिभिरेव निर्णेतव्यम्। तदाह व्यासः।

---

१. C. reads °सा° for °श्वा°. २. C. reads °दृष्टमनन्तयेत्; while D. reads °दृष्टेन तन्नयेत् for °दृष्टमतं नयेत्. ३. C. reads प्रशस्तः for प्रवृत्तः. ४. D. omits तत्. ५. B. originally substiutes °मार्गेषु for °ग्रामेषु. ६. A. and B. read स्वसमये. ७. D. reads धर्म शास्त्रतो for धर्मः शास्त्रतो. ८. D. adds तत् to तद्देशीयानाम्. ९. A. and B. read शास्त्रे यो for शास्त्रतो.

' वणिक्शिल्पि-प्रभृतिषु कृषि-रङ्गोपजीविषु ।
अशक्यो निर्णयो ह्यन्यैस्तज्ज्ञैरेव तु कारयेत्' ॥
गुरुः स्वामी कुटुम्बी च पिता ज्येष्ठः पितामहः ।
विवादं नैव पश्येयुः स्वाधीने विषये नृणाम्' ॥

इति । निर्णयकारिणामुत्तमाधमभावमाह नारदः—

' कुलानि श्रेणयश्चैव गणाश्चाधिकृतो नृपः ।
प्रतिष्ठा व्यवहाराणां सर्वेषामुत्तरोत्तरम्' ॥

इति । पितामहोऽपि— (ना. स्मृ. १. ७.)

' ग्रामे दृष्टः पुरे यायात् पुरे दृष्टस्तु राजनि ।
राज्ञादृष्टः कुदृष्टो वा नास्ति तस्य पुनर्भयम्' ॥

इति । राज्ञो नियममाह पितामहः—

' न रागेण न लोभेन न क्रोधेन ग्रसेन्नृपः ।
परैरप्रार्थितानर्थान्न चापि स्वमनीषया' ॥

इति । अस्यापवादमाह स एव—

' छलानि चाऽपराधांश्च पदानि नृपतेस्तथा ।
स्वयमेव निगृण्हीयान्नृपस्त्वावेदकैर्विना' ॥

इति । तत्र छलान्याह स एव—

---

१. C. reads अन्यैरेव न and D. तत्तैरेव तु for तज्ज्ञैरेव तु. २. D. reads कुटुम्बं for कुटुम्बी. ३. D. reads विवादानथ for विवादं नैव. ४. A. B. C. read गुर्व्येषा° for सर्वेषा°. ५. A. has marginal reading पुरं; while B. in correction पुरीं. ६. B. originally reads सुदृष्टो; while corrected कुदृष्टो. ७. B. corrected reads °र्भवेत्, C. reads °र्भवः, D. also reads as C. ८. D. reads कोपेन for क्रोधेन. ९. B. corrected reads ग्रसे°, D. reads नये°. १०. D. reads नृपतिः for नृपतेः.

पथिभङ्गी कराक्षेपी प्राकारोपरि लङ्घकः ।
निपा[1]नस्य विनाशी च तथा चायतनस्य चे[2] ॥
परिखापूरकश्चैव राजच्छिद्रप्रकाशकः ।
अन्तःपुरं वासगृहं भाण्डागारं महानसम् ॥
प्रविशत्यनियुक्तो यो भोजनं च निरीक्षते[3] ।
विण्मूत्र-श्लेष्मघा[4]तानां क्षेप्तु[5]कामो नृपा[6]ग्रतः ॥
पर्यङ्कासनबन्धश्चा[7]ऽप्यग्रस्थाननिरोधकः ।
राज्ञोतिरिक्तवे[8]षश्च श्चवृत्तःप्रविशेत्तु यः ॥
यश्चापद्वारेण प्रविशेदवे[9]लायां तथैव च ।
शय्यासने पादुके च शयनास[10]नरोहणे ॥
राजन्यासन्नशयने यस्तिष्ठति समीपतः ।
राज्ञो विद्विष्टसेवी चा[11]न्यदत्तविहितासनः ॥
वस्त्राभरणयोश्चैव सुवर्णपरिधायकः ।
स्वयंग्राहेण ताम्बूलं गृहीत्वा भक्षयेत्तु यः ॥
अनियुक्तप्रभाषी च नृपाक्रोशक एव च ।
एकवासास्तथाभ्यक्तो मुक्तकेशोऽव[12]गुंठितः ॥

---

१. A. has marginal reading नृपालस्य; while B. originally reads नृपा-लस्य and corrected निपानस्य° २. C. substitutes वा for च. ३. D. reads निरीक्ष्यते. for निरीक्षते. ४. B. originally reads °वातानां, but corrected °घातानां. ५. B. originally reads हेतुकामः, but corrected क्षेप्तुकामः. ६. C.D. read नृपात्मजः for नृपाग्रतः, ७. D. reads °बन्धी चा° for °बन्धश्चा. ८. A. has marginal readings °वर्षश्च, द्विवर्षश्च, वर्षाद्यः; while B. reads the same forms in correction and D. reads °वेषैश्च विधृतश्च for °वेषश्च श्चवृत्तः प्र°. ९. C. reads °दचैत्यायां for °दवेलायां. १०. A. has marginal reading °श° for °स° in the word °नासन°; while B. in correction reads °श°. ११. C. D. read वा° for चा°. १२. A. has marginal reading °कुं°, °लुं° for °गुं° in the word ऽगुंठितः, while B. reads in correction °मुण्डितः, C. reads °लुंठितः and D. ऽगृहीतः for ऽगुंठितः.

विचित्रिताङ्गः स्रग्वी च परि[1]धानविधून[2]कः
[3]शिरःप्रच्छादनश्चैव छिद्रान्वेषणतत्परः ॥
आसङ्गी मुक्तकेशश्च पक्षि-पर्णा-ऽक्षिदर्शकः ।
दन्तोल्लेखनकश्चैव कर्ण-नासाविशोधकः ।
छलान्येतानि पञ्चाशद्भवंति नृपसन्निधौ' ॥

इति । [4]सापराधानाह नारदः—

'आज्ञालङ्घनकर्तारः स्त्रीवधो वर्णसंकरः' ।
परस्त्रीगमनं चौर्यं गर्भश्चैव पतिंविना ॥
वाक्पारुष्यमवाच्यं यद्दण्डपारुष्यमेव च ।
गर्भस्य पातनं चैवेत्यपराधा दशैव हि' ॥

इति । विवादमन्तरेणापि दण्डनहेतुत्वादेतेषामपराधत्वम् । अतएव संवर्त्तः—

'[5]आसेधं [6]प्रतिभङ्गं च यश्च गर्भः [7]पतिं विना ।
स्वयमन्वेषयेद्राजा विना चैव विवादिना ॥
कन्यापहारकं पापं विप्रं च पतितं तथा ।
परार्थवादसंयुक्तं स्वयं राजा विचारयेत् ॥
षड्भागकालं शुल्कार्थे मार्गभेदकमेव च ।
स्वराष्ट्रे चौर्यभीतिं च परदाराभिमर्शनम् ॥

---

१. A. has marginal reading °काल° for °धान°; while B. reads in correction °बाल° and C. reads °वाल° for °धान°. २. A. substitutes °म° for °न° in the margin; while B. has corrected reading and C. reads originally °म° for °न.° ३. These three lines are omitted in C. and D. ४. C. and D. read अपराधा° for सापराधा°. ५. C. and D. read आसेवं for आसेधं. ६. A. has marginal reading पथि°; while B. in correction and C. D. as usual read पथि° for प्रति°. ७. C. reads पतन्ति वा for पतिं विना.

गो-ब्राह्मणनिहंतारं सस्यानां चैव घातकम्।
दशैतानपराधांश्च स्वयं राजा विचारयेत्' ॥

इति। पादान्याह पितामहः—

'उत्कृती[1] सस्यघाती च अग्निदश्च[2] तथैव च।
विवेसकः[3] कुमार्याश्च निधानस्योपगोपकः ॥
सेतु-कण्टकभेत्तारः क्षेत्रसंसारकस्तथा।
आरामछन्दसश्चैव गरदश्च तथैव च ॥
पटहा घोषणाछादी द्रव्यमस्वामिकं च यत्।
राजावलीढद्रव्यं च यश्चैवांगविनाशनम् ॥
द्वाविंशतिपदान्याहुर्नृपज्ञेयानि[4] पण्डिताः'।

इति। यत्र छलादीनि राजा स्वयं द्रष्टुमशक्तः तत्रस्तोभकात् सूचकाच्च बोद्धव्यम्[5]। तयोः स्वरूपमाह कात्यायनः—

'शास्त्रेण निन्दितं त्वर्थं मुख्यश्चार्थः[6] प्रचोदितः ॥
आवेदयति यः पूर्वं स्तोभकः स उदाहृतः ॥
नृपेणैव नियुक्तो यः परदोषमवेक्षितुम्[7]।
नृपस्य समयं[8] ज्ञात्वा सूचकः स उदाहृतः' ॥

इति। शास्त्रेण निन्दितं छलादिकमर्थम्। मुख्यो धनलाभश्च प्रधानः। राज्ञा शास्त्रादिपर्यालोचनपुरःसरमेव कार्यं कर्तव्यम्। तदाह हारीतः—

---

१. B. originally reads उत्कृष्टसस्य° for उत्कृती सस्य°; while A. has marginal reading निकृत्तवित्त°. २. A. in margin and B. originally read °दग्धः for °दश्च. ३. In C. and D. these three lines are not found and is this word विवेसकः; A. and B. one in margin and one in correction but subsititute °श° for °स°. ४. C. reads °विंशति° for °विंशति° ५. C. reads द्रष्टव्यम् for बोद्धव्यम्. ६. A. in margin reads मुधास्वा°, B. originally and D. मुख्यो राज्ञा for मुख्यश्चार्थः. ७. B. originally reads °मपेक्षितुम् for °मवेक्षितुम्. ८. D. reads सूचयेत् for समयं.

‘ शास्त्राणि वर्णधर्मांस्तु प्रकृतीनां च भूपतिः ।
व्यवहारस्वरूपं च ज्ञात्वा कार्यं समाचरेत्’ ॥

इति । प्रकृतयः पितामहेन दर्शिताः--

‘ रजकश्चर्मकारश्च नटो बुरुड एव च ।
कैवर्तकश्च विज्ञेयो म्लेच्छो भिल्लस्तथैव च ॥
मेथिकश्चिरवव्यालः हस्तलक्ष-दुघट्टिकाः ।
कोसेदिका भारुपदा मातंगाः पदगोपकाः ॥
एताः प्रकृतयः प्रोक्ता अष्टादशमनीषिभिः ।
वर्णानामाश्रमाणां च सर्वदा तु बहिः स्थिताः’ ॥

इति । मनुश्च जात्यादि समीक्षणीयमित्याह--

‘ जाति-जानपदान् धर्मान् श्रेणिधर्मांश्च शाश्वतान् ।
समीक्ष्य कुलधर्मांश्च सवर्णे प्रतिपादयेत्’ ॥

इति । उन्मार्गवर्त्तिनो बलात्स्वमार्गे स्थापयेदित्याह याज्ञवल्क्यः —

‘ कुलानि प्रकृतीश्चैव श्रेणिर्जानपदानपि ।
स्वधर्माच्चलितान् राजा विनीय स्थापयेत्पथि’ ॥

इति । कार्यदर्शनप्रकारमाह नारदः--

---

१. These two lines are omitted in B. and C. २. B. in correction reads ज्ञात्यादि and C. originally जात्यादि. ३. C. reads ज्ञाति° for जाति°. ४. A. has marginal reading स्वे for स°; while B. in correction, and C. and D. originally read स्ववर्णे for सवर्णे. ५. B. reads उन्माद° for उन्मार्ग°; C. and D. also the same. ६. C. reads बालान् for बलात्; while D. reads कुलादिन्. ७. A. and B. originally read °चरितान् for °चलितान्.

'धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः।
समाहितमतिः पश्येत् व्यवहारमनुक्रमात्॥
आगमः प्रथमः कार्यो व्यवहारपदं ततः।
विचारो निर्णयश्चेति दर्शनं स्याच्चतुर्विधम्'॥
(ना. स्मृ. १. ३५–३६)

इति। आगमोऽर्थिवचनश्रवणं तदादौ कर्तव्यम्। ततस्तद्वचनमृणादानाद्यन्यतमस्मिन्पदेऽन्तर्भाव्यम्। ततः प्रतिज्ञोत्तरप्रमाणानां विचारः। ततः प्रमाणतो जयावधारणम्।

इति व्यवहारदर्शनविधिः।

अथासेधादिविधिः।

तत्र नारदः—

'वक्तव्येऽर्थे न तिष्ठन्तमुत्क्रामन्तं च तद्वचः।
आसेधयेद्विवादार्थी यावदाह्वानदर्शनम्'॥
(ना. स्मृ. १.४७)

इति। प्रथमं तावदर्थी प्रत्यर्थिनोऽग्रे त्वयैतावन्मह्यं देयमित्यादिकं कार्यं ब्रूयात्। तत्र यदि तदुक्तमनभ्युपगम्योत्क्रान्तुमिच्छेत् तदा स्वकार्यपर्यंतं राजाज्ञया तं निरुंध्यात्। आसेधस्य भेदानाह स एव—

'स्थानासेधः कालकृतः प्रवासात् कर्मणस्तथा।
चतुर्विधः स्यादासेधस्तमासिद्धो न लङ्घयेत्'॥
(ना. स्मृ. १.४८)

---

१. C. and D. read °व्ये° in the word वक्तव्यार्थे. २. D. reads °मासेधं° for °मासिद्धो.

इति। अस्मात्स्थानात्त्वया न चलितव्यमिति स्थानासेधः मदीयद्रव्यप्रदाने दिनमेतन्नोल्लङ्घनीयमिति कालासेधः। अदत्त्वा ग्रामान्तरं नगन्तव्यमिति प्रवासासेधः। अदत्त्वा न सन्ध्यावन्दनं कार्यमिति कर्मासेधः। सन्ध्यावन्दनादिवदिन्द्रियनिरोधो नासेधार्हः। तदाह कात्यायनः–

'यस्त्विन्द्रियनिरोधेन [1]व्यवहारोत्सवादिभिः।
आसेधयेदनासेध्यैः[2] स दण्ड्यो न त्वतिक्रमात्'॥

इति। इन्द्रियनिरोधवद्विषमदेशोऽपि नासेधार्ह इत्याह नारदः—

' नदीसन्तार-कान्तारदुर्देशोपप्लवादिषु।
आसिद्धस्तं परासेधमुत्क्रामन् नापराध्नुयात्'॥
(ना. स्मृ. १.४९)

इति। आसेध्यासेधकयोः [3]स्वकालोल्लङ्घने दण्डमाह स एव–

' आसेधकाल आसिद्ध आसेधं योऽतिवर्तते।
स विनेयोऽन्यथा कुर्वन्नासेद्धा दण्डभाग्भवेत्'॥
(ना. स्मृ १.५१)

इति। अन्यथा कुर्वन्नयोग्ये निशीथादिकाले तमासेधयन्। अनासेध्यानाह कात्यायनः–

' वृक्ष-पर्वतमारूढा हस्त्यश्व-रथ-नौ[4]गताः।
विषमस्थाश्च ते सर्वे नासेध्याः कार्यसाधकैः[5]॥

---

१. C. reads ब्यासेधात् कुशलादिभिः; while D. reads ब्याहरेत् कुशलादिभिः for व्यवहारोत्सवादिभिः. २. B. originally reads °धैः while correction °ध्यैः, C. and D. read for the same. ३. D. reads तत्° for स्व°. ४. A. in marginal reading and in correction reads °मताः for °गताः; while C. reads the same. ५. B. originally reads °सिद्धिदैः, but corrected °साधकैः. A. also has marginal reading °सिद्ध° for °साध°.

व्याध्यार्ता[१] व्यसनस्थाश्च यजमानास्तथैव च ।
अनुत्तीर्णाश्च नासेध्या मत्तोन्मत्तजडास्तथा ॥
न कर्षको बीजकाले सेनाकाले च[२] सैनिकाः ।
प्रतिज्ञाय प्रयाताश्च कृतकालश्च नान्तरा ॥
उद्युक्तः कर्षकः सस्ये वापस्यागमने सदा[३] ।
आरम्भात्[४] सङ्ग्रहं यावत्तत्कालं न विवादयेत्' ॥

इति । बृहस्पतिरपि—

'सत्रोद्वाहो[५]द्यतो रोगी शोकार्तोन्मत्त[६]-बालकाः ।
मत्तो वृद्धोऽनु[७]युक्तश्च नृपकार्योद्यतो व्रती ॥
आसन्ने सैनिकः सङ्ख्ये कर्षको वापसङ्ग्रहे[८] ।
विषमस्थाश्च नासेध्याः स्त्रीसनाथास्तथैव च' ॥

इति । नारदोऽपि—

'निवेष्टुकामो रोगार्त्तो यियक्षुर्व्यसने स्थितः ।
अभियुक्तस्तथा[९]न्येन राजकार्योद्यतस्तथा ॥
गवां प्रचारे गोपालः सस्यारम्भे कृषीवलाः ।
शिल्पिनश्चापि तत्काल आयुधीयाश्च[१०] विग्रहे ॥

---

१. A. in marginal reading and B. in correction read से° for व्या° in the word व्याध्यार्त्ताः. २. C. and D. substitute ऽथ for च. ३. A. in margin and B. in correction read य° for स° in the word सदा. C. and D. also read the same. ४. D. reads आरम्भसंग्रहं for आरम्भात् संग्रहं. ५. A. in margin, B. in correction substitute °ज्ञो° for °त्रो°; while C. reads originally. ६. C. reads मत्त° for °न्मत्त° and D. °मृत° for the same. ७. A. in margin, B. in correction, C. and D. as usual subsitute ऽनि° for ऽनु°. ८. D. reads कर्षकश्चाय° for कर्षको वाप°. ९. C. reads सेना for ऽन्येन. १०. A. in margin and B. in origin read °स्त्र° for °श्च; while C. and D. as usual read °श्च, but B. corrected reads °स्त्र°.

अमात्यव्यवहारश्च दूतो दानोन्मुखो[1] व्रती ।
विषमस्थाश्च नासेध्या न चैतानाव्हयेन्नृपः' ॥

(ना. स्मृ. १. ६२--६४)

इति । कदा तर्हि द्रव्यं दापनीयमित्याकांक्षायां बृहस्पतिराह–

' वणिग्विक्रीतपण्यस्तु सस्ये जाते कृषीवलः ।
सत्रोद्यताश्चैव तथा दापनीयाः कृत क्रियाः' ॥

इति । यद्यासिद्धो नागच्छेत्तदा राज्ञा समानेयः । तदाह बृहस्पतिः–

' यस्या[2]भियोगं कुरुते सत्येनाशङ्कयाऽथ वा ।
तमेवा[3]नाययेद्राजा मुद्रया पुरुषेण वा' ॥

इति । नारदोऽपि–

' देशं कालञ्च विज्ञाय कार्याणाञ्च बलाबलम् ।
अकल्पादीनपि शनैर्या[4]नैराव्हानयेन्नृपः' ॥

इति । आव्हा[5]नानर्हानाह हारीतः

' अकल्प-बाल-स्थविर-विषमस्थ-क्रियाकुलान् ।
कार्यातिपाति-व्यसनि-नृपकार्योत्सवाकुलान् ॥
मत्तोन्मत्तप्रम[6]त्तांश्च स्वजातिप्रभुक्तां स्त्रियम् ।
[7]धर्मोत्सुकान् जडानार्तभृत्यान् नाव्हानयेन्नृपः' ॥

इति । कात्यायनोऽपि––

---

१. A. in margin, B. in origin read °त्को for °न्मुखो; while B. in correction reads °त्सुको, C. and D. as usual, read °न्मुखो. २. D. reads यत्रा° for यस्या°. ३. Only C. reads तमेनं दीपयेत् for तमेवानाययेत्. ४. D. reads तथा शनः for शनैर्यानैः. ५. A. in margin and B. originally read आव्हानानर्थान् instead of आव्हानानर्हान् ; while C. reads आहूतानर्हानाह. ६. D. reads this line thus जडान्मत्तप्रमत्तांश्च स्वजातिविमुखां स्त्रियम् and C. रोगोन्मत्तप्रमत्तांश्च जातित्यक्तां स्त्रियं तथा and E. मत्तोन्मत्तप्रमत्तार्तभृत्यान् नाव्हानयेन्नृपः. ७. This line is found only in D.

'धर्मोत्सुकानभ्युदये रोगिणो थ जडानपि।
अस्वस्थमत्तोन्मत्तार्त-स्त्रियो नाव्हाययेन्नृपः॥
न हीनपक्षां युवतिं कुले जातां प्रसूतिकाम्।
स्वजातिप्रभुकां चैव तथा नाव्हानयेन्नृपः'॥

इति। स्वजातिप्रभुका तु मरीचिना निरुक्ता—

'सर्ववर्णोत्तमा कन्या सा जातिप्रभुका स्मृता।
तदधीनकुटुम्बिन्यः स्वैरिण्यो गणिकाश्च याः॥
निष्कुला याश्च पतितास्तासामाव्हानमिष्यते'।

इति। दुष्टस्य दण्डमाह बृहस्पतिः—

'आहूतो यस्तु नागच्छेद्दर्पाद्बन्धुबलान्वितः।
अभियोगानुरूपेण तस्य दण्डं प्रकल्पयेत्'॥

इति। कात्यायनोऽपि—

'आहूतस्त्ववमन्येत यः शक्तो राजशासनम्।
तस्य कुर्यान्नृपो दण्डं विधिदृष्टेन कर्मणा॥
हीने कर्मणि पञ्चाशन्मध्यमे तु शतावरः।
गुरुकार्येषु दण्डः स्यान्नित्यं पञ्चशतावरः'॥

इति। आपन्नस्याऽनागमनेऽपि दण्डो नेत्याह व्यासः—

'परानीकहते देशे दुर्भिक्षे व्याधिपीडिते।
कुर्वीत पुनराव्हानं दण्डं न परिकल्पयेत्'॥

इति।

इत्यासेधविधिः।

---

१. A. in margin and B. in correction substitute °ना° for °डा° in जडानपि. २. This is mentioned only in D.; ३. A. B. C. read ता जातिप्रभुका स्मृताः; while in the preceding half of this line, D. reads nominative case instead of objective case. ४. C. and D. read दृप्तस्य for दुष्टस्य

अथ दर्शनोपक्रमः ।

तत्र मनुः—

'धर्मासनमधिष्ठाय संवीताङ्गः समाहितः ।
प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत्' ॥

(म. स्मृ. ८. २३.)

इति । आरब्धुः[1] कर्तव्यमाह कात्यायनः—

'काले कार्यार्थिनं पृच्छेत् प्रणतं पुरतः स्थितम् ।
किं कार्यं का च ते पीडा मा भैषीर्ब्रूहि मानव' ॥

इति ।

केन कस्मिन्कथं[2] कस्मात्पृच्छेदेनं[3] सभागतत् ।

इति । बृहस्पतिरपि—

'आगतानां विवदतामसकृद्वादिनां नृपः ।
वादान्पश्येन्नात्मकृतान्न चाध्यक्षनिवेदितान् ॥
पीडितः स्वयमायातः शास्त्रेणार्थी यदा भवेत्
प्राड्विवाकस्तु[4] तं पृच्छेत्पुरुषो वा शनैः शनैः' ॥

इति । पृष्टश्च कार्यं यथावदावेदयेदित्याह याज्ञवल्क्यः—

'स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्' ॥

(या. स्मृ. २. ५.)

---

१. D. reads आरभ्य for आरब्धुः. २. A. in margin and B. in correction read कदा for कथं. ३. D. reads °देवं for °देनं. in B. C. D. mention this line, But not in A.; ४. A. in margin and B. in correction substitute °स्थि° for °स्तु.

इति । यदि केनचिन्निमित्तेन स नावेदयेत् । तदा स व्यवहारो न[1] बलात्कारयितव्य इत्यभिप्रेत्य चेदित्युक्तम् । आवेदनकाले सख्यादयो[2] वर्जनीया इत्याह उशनाः—

'ससखोऽनुत्तरीयो[3]* वा मुक्तकच्छः[4] सहासनः ।
वामहस्तेन वा स्रग्वी वदेद्दण्डमवाप्नुयात्' ॥

इति । अर्थिनः[5] प्रतिनिधिमभ्युपगच्छति †कात्यायनः—

'अर्थिना सन्नियुक्तो वा प्रत्यर्थिप्रहितोऽपि वा ।
यो यस्यार्थे विवदते तयोर्जय-पराजयौ' ॥

(ना. स्मृ. १. २२.)

इति । अन्तरेणापि नियोगं पित्रादयो विवादं कुर्युरित्याह पितामहः—

'पिता माता[6] सुहृद्वापि बन्धुः सम्बन्धिनोऽपि वा ।
यदि कुर्युरुपस्थानं वादं तत्र प्रवर्तयेत् ॥

---

*सखा मित्रं तेन सहितः ससखः । अनुत्तरीयः प्रावरणरहितः । सहासनः प्राड्विवाक-सभ्यादीनामासने तैः सह स्थितः । यद्वा हासो हास्यं तेन सहितः । वामहस्तमग्रे कृत्वा यः वदति इत्यनेन सभ्यादीनामवज्ञाव्यञ्जनं गम्यते । एते सर्वेऽपि दण्ड्या एव ।

†सर्वेष्वप्यादर्श पुस्तकेषु अधस्तनं आर्थिनेत्यादि वाक्यं कात्यायनीयत्वेनावतारितम् । उपलभ्यते चैतन्नारदस्मृतौ । कात्यायनव्यवहारस्त्वदृष्टाश्रुतपूर्वः । अतो न निश्चीयते इदं कात्यायनीयं वानवेति । विज्ञानेश्वरेण तु (व्य. ६ श्लोकव्याख्यायां) अन्यतरनामानिर्देशमन्तरा ' इति सामान्यतयैवोद्धृतम् ।

---

१. D. does not read न. २. A. in margin and B. originally read शख्या° for सख्या°. ३. A. and B. read स्वशस्त्रो for ससखो. ४. A. in margin and B. in correction place °शस्त्रः for °कच्छः. ५. A. in margin and B. originally substitute द्वय° for अ.° ६. A. in margin and B. originally read भ्राता for माता.

'यो ऽनधीत्य* द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः' ॥
(म. स्मृ. २. १६८ व. स्मृ. ३.२)

'अकुर्वन्† विहितं कर्म निन्दितं च समाचरन् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति' ॥

---

*अन्यत्र अर्थशास्त्रादौ । स जीवन्नेव सान्वयः पुत्र-पौत्रादिसहितः शूद्रत्वं गच्छति । उशनसा तु—

'यो ऽन्यत्र कुरुते यत्नमनधीत्य श्रुतिं द्विजः ।
स वै मूढो न सम्भाष्यो वेदबाह्यो द्विजातिभिः' ॥
(उ. स्मृ. ३. ८१)

इति असम्भाष्यत्वमुक्त्वा—

'यो ऽधीत्य विधिवद्वेदं वेदान्तं न विचारयेत् ।
स सान्वयः शूद्रकल्पः स पाद्यं न प्रपद्यते' ॥
(उ. स्मृ. ३. ८३)

इति वेदानधीत्यापि वेदान्तविचाराकरणे शूद्रकल्पत्वमुक्तम् । वेदमनधीत्यापि वेदाङ्गस्मृत्याद्यध्ययने न दोषः । एतदेवाभिप्रेत्य शङ्ख-लिखितावाहतुः—'न वेदमनधीत्यान्यां विद्यामधीयीत, अन्यत्र वेदाङ्ग-स्मृतिभ्यः' इति।

† अस्य पूर्वार्धं याज्ञवल्क्यस्मृतौ—

'विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
(अ. ३ श्लो. २१९)

इति । उत्तरार्धं मनुस्मृतौ—

प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः' ।
(अ. ११ श्लो. ४४)

इति च दृश्यते । तस्मात् पूर्वार्धं मानवं उत्तरार्धं याज्ञवल्कीयमिव प्रतिभाति तथापि आनन्दगिरिस्वामिभिः तैत्तिरीयोपनिषद्भाष्यस्य वार्तिकस्य च टीकायां समग्रतयैव सङ्गृहीतं वर्तते । तत्र तु 'प्रसक्तश्चेन्द्रियार्थेषु' इति पाठः।

अत्रोच्यते । अस्तु[1] वा[2] प्रत्यवायविरोधित्वम् । नैतावता[3] फला-भावः । मन्त्रलिङ्गेन श्रुति-स्मृतिवाक्याभ्यां च तत्फलावगमात् । 'मयि वर्चो बलमोजो निधत्त'–इति मन्त्रलिङ्गम् । छान्दोग्य-वाक्यं च आश्रमत्रयस्य लोकहेतुतां चतुर्थाश्रमस्य मोक्ष-हेतुतां दर्शयति । 'त्रयो *धर्मस्कन्धाः यज्ञो ऽध्ययनं दान-मिति । प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृती-यो ऽत्यन्तमात्मानमाचार्यकुले ऽवसादयन् । सर्व एते पुण्यलोका भवन्ति ब्रह्मसँस्थो ऽमृतत्वमेति' (छां. उ. २.२३.१) इति । एतस्य च[4] वाक्यस्य आश्रमपरत्वं-'परामर्शं जैमिनिः' (शा.सू. ३.४.१८) †इत्यादिभिर्व्याससूत्रैः[5] प्रतिपादितम् । स्मृतिवाक्यं चैतत् । 'न-

---

* ओङ्कारस्य उपासनविध्यर्थं 'त्रयो धर्मस्कन्धा' इत्यारब्धम् । धर्म-स्कन्धाः धर्मप्रविभागा इत्यर्थः । यज्ञः अग्निहोत्रादिः, अध्ययनं नियमपू-र्वकं वेदाभ्यासः, दानं भिक्षमाणेभ्यो यथाशक्ति द्रव्यसंविभागः, इत्येषः प्रथमो धर्मस्कन्धः । एतेन गृहस्थाश्रमो ऽभिधीयते । कृच्छ्र-चान्द्रायणा-दितपकर्ता तापसः वानप्रस्थो वा द्वितीयो धर्मस्कन्धः । ब्रह्मचारी सन् आचार्यकुलवासी अत्यन्तं गुरुगृहे आत्मानं क्षपयन् नैष्ठिकः तृतीयो धर्मस्कन्धः । त्रयो ऽप्येते आश्रमिणः पुण्यो लोको येषां ते पुण्यलोकाः भवन्ति । अवशिष्टस्तु परिव्राट् ब्रह्मणि सम्यक् स्थितः अमृतत्वं मोक्षं प्रा-प्नोति इति श्रुत्यर्थः ।

† 'त्रयो धर्मस्कन्धाः' इत्यादयो ये शब्दा ऊर्ध्वरेतसाश्रमाणां सद्भा-वायोदाहृताः न ते तत्प्रतिपादनाय प्रभवन्ति । यतः एषु शब्देषु आश्रमान्तराणां परामर्शं जैमिनिराचार्यो मन्यते । न विधिम् । न ह्यत्र

---

१. D. omits the whole of the following:— अस्तु वा प्रत्यवायविरोधित्वम् । नैतावता फलाभावः । मन्त्रलिङ्गेन श्रुति-स्मृतिवाक्याभ्यां च तत्फलावगमात्. २. I. omits वा. ३. B. C. and F. read न तावता for नैतावता. ४. I. adopts तत्तत्. ५. A. omits च. ६. A. has सूत्रे for सूत्रैः.

यथा आम्रे फलार्थे निमित्ते छायागन्ध इत्यनूत्पद्येते । एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते'—इति । इदं च वाक्यं नित्यकर्मविषयत्वेन वार्त्तिके विश्वरूपाचार्य उदाजहार–

'आम्रे फलार्थ' इत्यादि ह्यापस्तम्बस्मृतेर्वचः ।
फलवत्त्वं समाचष्टे नित्यानामपि कर्मणाम्' ।।
(बृ. उ. भा. वा. १. १. ९७)

इति । तथा च मनुः–

"वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः ।
तद्धि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिम्' ।।
(म. स्मृ. ४. १४)

लिङादीनामन्यतमश्चोदनाशब्दो ऽस्ति । यतो धर्मस्कन्धत्वेन त्रीनाश्रमानुदाहृत्य 'सर्व एते' इत्यनेन परामर्शपूर्वकं आश्रमाणामनात्यन्तिकफलत्वं सङ्कीर्त्य आत्यन्तिकफलतया ब्रह्मसंस्थता स्तूयते इति सूत्रार्थः ।

* न केवलं वेदोदितमेव वेदोक्तं अपि तु स्मृतीनां वेदमूलत्वात् स्मार्तमपि वेदोक्तमेव । स्वकं स्वाश्रमोक्तम् । परमां गतिं मोक्षलक्षणां प्राप्नोति । नित्यकर्मानुष्ठानात् पापक्षये सति निष्पापान्तःकरणेन ब्रह्मसाक्षात्कारान्मोक्षावाप्तेः ।

'ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः' ।
इति भारते मोक्षधर्मोक्तेः ।

---

१. We read with A. नित्यकर्मविषयत्वेन for which all others have only नित्यकर्मत्वेन. २. For आम्रे फलार्थे B. C. D. and E. substitute आम्रे निमित्त; while G. E. and the text of Brihadâranyaka vârtika read आम्रे निमित्त. ३. A. reads कर्मणामपि for अपि कर्मणाम्.

इति । कूर्मपुराणे ऽपि-

'यथाशक्ति चरेत्कर्म निन्दितानि विवर्जयेत् ।
विधूय मोहकलिलं लब्ध्वा योगमनुत्तमम् ॥
गृहस्थो मुच्यते बन्धात् नात्र कार्या विचारणा' ।
(कू. पु. १. २. १९. २८-२९)

इति । ननु-अस्त्वेवम् । अभ्युदयहेतुत्वं तु न सम्भवति । प्रमाणाभावात् । प्रत्युत श्रुति-स्मृतिभ्यां तन्निषिद्ध्यते—

'न कर्मणा न प्रजया धनेन'-
(म. ना. उ. १०. ५; कै. उ. २)

इति श्रुतिः ।

'ज्ञानादेव तु कैवल्यम्' ।

इति स्मृतिः । मैवम् । परमात्मप्रकरणे निःश्रेयसहेतुवेदनेच्छासाधनत्वेन यज्ञादीनां विधानात् । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति । यज्ञेन दानेन'-इति श्रुतेः । निषेधस्तु साक्षान्निःश्रेयससाधनत्वं गोचरयिष्यति । तस्मात् न मुक्तानां अग्न्याधानादिकर्मापेक्षा ऽस्ति । वेदनोत्पत्तौ सा विद्यते । एतच्च उभयं-*'अत एव चाग्नीन्धनाद्यनपेक्षा' (शा. सू. ३

---

* 'पुरुषार्थो ऽतःशब्दात् (शा. सू. ३ । ४ । १) इत्येतत्सूत्रं व्यवहितमपि अत्र परामृश्यते । 'अत एव च' विद्यायाः पुरुषार्थहेतुत्वात् । अग्नीन्धनादीनि आश्रमकर्माणि विद्यया स्वार्थसिद्धौ नोपक्षितव्यानि इति सूत्रार्थः ।

---

१. All but A. read मुक्तौ for मुक्तानाम्.

४. २५)* 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' (ब्रा. सू. ३. ४. २६) इत्याभ्यामधिकरणाभ्यां निर्णीतम्। तथा च कर्मणां परम्परया मोक्षहेतुत्वं वायवीयसंहितायामभिहितम्–

'कर्मातिशयमासाद्य पशोः पाशपरिक्षयः।
एवं प्रक्षीणपापस्य बहुभिर्जन्मभिः क्रमात्॥ (६९)
भवेद्विषयवैराग्यं वैराग्याद्भावशोधनम्।
भावशुद्ध्युपपन्नस्य शिवज्ञानसमन्वयः॥ (७०)
ज्ञान-ध्यानाभियुक्तस्य पुंसो योगः प्रवर्त्तते।
योगेन तु परा भक्तिः प्रसादस्तदनन्तरम्॥ (७५)
प्रसादान्मुच्यते जन्तुर्मुक्तः शिवसमो भवेत्'। (७६)
(शि. पु. ५. १. २. ६९-७६)

---

*उक्तसूत्रेण आश्रमकर्मणामत्यन्तमेवानपेक्षायां प्राप्तायामुच्यते। स-
पेक्षेति। विद्या सर्वाण्याश्रमकर्माणि अपेक्षते। न अत्यन्तमनपेक्षा।
द्या उत्पन्ना सति फलसिद्धिं प्रति न किञ्चिदन्यदपेक्षते तथापि स्वोत्पत्ति
ति तु आश्रमकर्मादिकमपेक्षत्येव। एतदेवाह श्रुतिः—

'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति।
यज्ञेन दानेन तपसा ऽनाशकेन'॥
(बृ. उ. ४. ४. २२.)

ते।

---

१. A. reads वायुसंहितायाम् for वायवीयसंहितायाम्. २. In the text of hivapurána धर्मा-. ३. Here we take our reading from A. though all hers read पाप- for पाश-. In Shivapurána we find पाप. The former of ese is not incorrect in its own way, but this verse comes from e philosophy of the Páshupatas and the words पशु and पाश are chnical ones in that philosophy. ४. In Shivapurána we find fferent reading for this verse as:–साम्बे सर्वेश्वरे भक्तिर्ज्ञानपूर्वा प्रजायते। वानुगुणमीशस्य प्रसादो व्यतिरिच्यते॥७०॥. ५. A. and I. read ज्ञानध्यानमियु- स्य for ज्ञान-ध्यानाभियुक्तस्य. ६. H. alone reads -स्तदनन्तर: for -स्तदनन्तरम्.

इति। ननु—प्रत्यवायपरिहाराय पुण्यलोकप्राप्तये ब्रह्मवेदनाय च प्रतिदिनं नित्यकर्मणस्त्रिः[१]प्रयोगः प्राप्तः। तन्न[२]। खादिरवत् सकृत्प्रयुक्तस्यैव वचनसंयोगभेदेन फलाऽभेदोपपत्तेः।

'खादिरो यूपो भवति'। (तै. ब्रा. २. ४. २४.) —इति क्रत्वर्थं वचनम्। 'खादिरं वीर्यकामस्य यूपं कुर्वीत' —इति वचनं पुरुषार्थम्। तदेतत् वचनद्वयं एकस्यैव खादिरस्य प्रयोजनद्वैविध्ये हेतुः। 'एकस्य तूभयत्वे संयोगपृथक्त्वम्' (पू. मी. ४. ४. ३१) इति जैमिनिसूत्रात्। एवमत्रापि पूर्वोदाहृतवचनत्रयबलात् प्रयोजनत्रैविध्ये ऽपि सकृदेव प्रयोगः। तच्च 'विहितत्वाच्चाश्रमकर्मापि' (शा. सू. ३. ४. ३२) —इत्यस्मिन्नधिकरणे निर्णीतम्। न च नित्यस्यापि फलवत्त्वे नित्यकाम्ययोर्भेदाभावः—इति शङ्कनीयम्। करणे फलसाम्ये ऽपि अकरणे प्रत्यवाय-तदभावाभ्यां तद्भेदात्। न खलु आयुष्काम-वृष्टिकामेष्ट्याद्यकरणे कश्चित् प्रत्यवायः श्रूयते। एष एव नित्यन्यायो नैमित्तिके ऽप्यवगन्तव्यः। 'स्नाते

* आयुष्कामेष्टिः आश्वलायनश्रौतसूत्रे 'आयुष्कामेष्ट्यां' (२. १०. १) इत्यत्र द्रष्टव्या। वृष्टिकामेष्टिरपि तत्रैव 'वृष्टिकामेष्टिः करीरी' (२. १३. १) इत्यत्र द्रष्टव्या। 'कारीर्या वृष्टिकामो यजेत' इत्यादिना चास्य क्रत्वर्थत्वम्

१. H. has -स्त्रिधा प्रयोगः for -स्त्रिः प्रयोगः. २. For तन्न B. C. and H. read न simply, and E. omits the whole तन्न; while G. reads च for it. ३. All except A. omit एव. ४. A. omits the word खादि ५. All but A. and I. read करणे ऽतिशयसाम्येऽपि for करणे फलसाम्ये ऽपि; which is the reading of A. and I. ६. G. reads नित्य-काम्यभोगो नित्यन्यायो.

जुहोति । भिन्ने जुहोति' इत्यादि अनियतवेद[1]वाक्याधिकारिविशेषणोपेतं नैमित्तिकम्* । नित्यवत् काम्यस्यापि विहितत्वेन शुद्धिहेतुत्वात् मोक्षसाधनत्वं—इति चेत् । न । राग†[2]प्राधान्यात् । शुद्धिस्तु उपसर्जनत्वेन रागविषयं भोगं सम्पाद्योपक्षीयते[3] । अत एव गीतायां भगवता मुमुक्षोरर्जुनस्य फलासक्तिर्निषिद्धा—

'योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥
(भ. गी. २. ४८)

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन[4] ।
मा कर्मफलहेतुर्भूः - - - - - - -' ॥
(भ. गी. २. ४७)

---

* केचित्तु—'निमित्तं पर्वण्यादिकमनुरुध्य प्रवृत्तं नैमित्तिकं' इत्याहुः । अनियतवेदवाक्याधिकारिविशेषणोपेतत्वे हि चैत्यवन्दनादिकस्यापि नैमित्तिकत्वं भवेदिति तेषामाशयः ।

† 'राग' शब्देनात्र विषयसेवनाभिलाष एव ग्राह्यः । नेच्छामात्रम् । 'सुखानुशयी रागः' (२.७) इति योगसूत्रात् 'सुखाद्रागः' (६.२.१०) इति वैशेषिकसूत्राच्च विषयगोचराभिलाषस्यैव रागत्वाभिधानात् ।

---

१. For -वेदवाक्याधिकारि- A. and I. read -भेदनाधिकार्य-; B. C. E. and F. read वेदवाद्यधिकारि-. २. A. and I. read रागविषयभोगं for रागविषयं भोगं. ३. For सम्पाद्योपक्षीयते E. and G. read सम्पाद्योपजायते. ४. All but A. read कथञ्चन for कदाचन.

इत्यादिना। नित्यकर्मणि तु बुद्धिशुद्धिः प्रधानम्। फलमुपसर्जनम्। अत एव भुज्यमानेनापि फलेन तदनित्यत्व-सातिशयत्वदोषदर्शनरूपो विवेको न प्रतिबध्यते। तदुक्तं वार्तिककारेण—

'नित्येषु* शुद्धेः प्राधान्यात् भोगो ऽप्यप्रतिबन्धनः।
भोगं भङ्गुरमीक्षन्ते बुद्धिशुद्ध्यनुरोधतः' ॥
(बृ. उ. भा. वा. १. १. ६०८)

इति। नित्यं च कर्म द्विविधम्। संस्कारकं विविदिषाजनकञ्च। विहितत्वमात्रबुद्ध्या क्रियमाणं संस्कारकम्। तथा च स्मर्यते। 'यस्यैते ऽष्टाचत्वारिंशत् संस्काराः स ब्रह्मणः सायुज्यं सलोकतां गच्छति' इति। ईश्वरार्पणबुद्ध्या क्रियमाणं विविदिषाजनकम्। तच्च भगवता दर्शितम्—

'यत् करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्' ॥
(भ. गी. ९. २७)

---

* नित्येषु कर्मसु चित्तशुद्धेः प्रधानफलत्वात् उपसर्जनत्वेन भविष्यतोऽपि भोगस्य तदनुष्ठातॄणां नापेक्षेति भावः। यतस्ते हि बुद्धिशुद्ध्यनुरोधेन भोगं भङ्गुरं क्षणविनाशिनं अवलोकयन्ति। कः खलु शाश्वतसुखप्राप्तिसाधनं फलं विहाय क्षणभङ्गुरमिच्छेत्? न कोऽपीत्यर्थः।

---

१. All but A. omit शुद्धि· २. G. omits एव. ३. D. omits the whole from शुद्धिस्तु- (p. 60, l. 8) to सातिशयत्व.- ४. For अष्टाचत्वारिंशत् A. and G. read चत्वारिंशत्. ५. A. adds अष्टावात्मगुणा after संस्काराः; and omits स. ६. All except A. and I. substitute व्रजति for गच्छति. ७. H. and I. read भगवतेरितम् for भगवता दर्शितम्.

इति गीतायामपि। तत्र संस्कारेण चित्तस्य वेदनयो-ग्यतामात्रं सम्पद्यते। विविदिषा तु[2] प्रवृत्तिमुत्पाद्य अवश्यं वेदनं सम्पादयति। तस्मात् मुमुक्षोरीश्वरार्पणं प्रशस्तम्। तदेव हितशब्देन धर्मस्याभिमतसाधनत्वाभिधानात्[3]—अभीष्टसिद्धिः प्रयोजनं—इत्युक्तं भवति।

धर्मशब्देन विषयो निर्दिश्यते। अभ्युदय-निःश्रेयसे साधनत्वेन धारयति—इति धर्मः। स च लक्षण—प्रमाणाभ्यां* चोदनासूत्रै[4]†र्व्यवस्थापितः। ननु—चोदनाऽवगम्यस्य न स्मृतिविषयत्वम्। सर्वत्रानन्यलभ्यस्यैव विषयत्वावगमात्। अथ मन्यसे चोदनागम्यो[5]ऽपि अर्थवादपरिहारेण शाखा-न्तरगतविशेषोपसंहारेण च अनुष्ठानक्रमसौकर्याय सङ्गृह्यते इति। तत्र। कल्पसूत्रेषु तथा सङ्गृहीतत्वात्। अतो न धर्मस्य विषयत्वम् —इत्याशङ्क्याह। 'शौचाचारम्' इति। अयं भावः। द्विविधो धर्मः। श्रौतः स्मार्तश्च। तत्र अग्न्याधाना-

*लक्ष्यते येन तल्लक्षणं यथा धूमोऽग्नेः। यो ऽर्थः पुरुषं निःश्रेयसेन संयुनक्ति स धर्मः निःश्रेयःसम्पादकत्वं धर्मस्य लक्षणम्। प्रमाणं तु चोदना। क्रियायाः प्रवर्तकं वचनं चोदनेत्युच्यते। आचार्यचोदितः करोति इति हि दृश्यते। विस्तरस्तु शबरभाष्ये द्रष्टव्यः।

† 'चोदनालक्षणो ऽर्थो धर्मः' (पू. मी. १। १। २) इत्यादीनि चोदनासूत्राणि।

१. A. omits the whole from विविदिषाजनकं (p. ६१. l. १८) to सम्पद्यते both inclusive. २. A. omits तु. ३. A. reads -साधक- for -साधन-. ४. A. and I. read -सूत्रे व्यवस्थापितः for -सूत्रैर्व्यवस्थापितः. ५. For चोदनागम्यो ऽपि B. C. D. E. and F. read चोदनागम्यो ऽपि. ६. A. and I. omit अभि-.

दिपूर्वको ऽधीतप्रत्यक्षवेदमूलो दर्श-पूर्णमासादिः श्रौतः । अनुमितपरोक्षशाखामूलः शौचाचमनादिः स्मार्तः । तत्र आधानादेः कल्पसूत्रेषु सङ्ग्रहे ऽपि शौचादेरसङ्ग्रहात् विषयत्वं —इति ।

ननु— स्मृत्यन्तरेष्वपि शौचादिरुक्तः— इत्यत आह । 'वर्त्तमाने कलौ युगे' इति । कलौ युगे वर्त्तमाने सति याजनाध्यापनादीनां जीवनाय असम्पूर्त्तेः मानुषाणां जीवनाय अभ्युदयाय निःश्रेयसाय च हितः सुकरो यो धर्मः ब्राह्मणकर्तृकः* कृष्यादिः सो ऽत्र प्राधान्येन प्रतिपाद्यते—इति अनन्यलभ्यत्वात् विषयत्वमित्यर्थः ।

'यथावत्' इतिपदेन कार्त्स्न्यमभिदधानः सङ्कोचं निवारयति । न त्वन्यथाकथनं निवार्यते । स्मर्तृणामभ्रान्त्यविप्रलम्भाभ्यां तदप्रसक्तेः । अत एव सत्यवतीसुत इति सम्बोधनम् । यदा योषिदपि सती सत्यवती माता सत्यवादिनी†

---

* इदमग्रे मूल एव विस्तरेण स्पष्टीभविष्यति ।

† यथोक्तं महाभारते—

'रूप-सत्त्वसमायुक्ता सर्वैः समुदिता गुणैः ।
सा तु सत्यवती नाम सत्यवादित्वसंश्रयात्' ॥

इति । अत्र चतुर्थचरणे 'मत्स्यघात्यभिसंश्रयात्' इत्यपि पाठान्तरं मुंबईमुद्रितपुस्तके दृश्यते ।

---

१. D. reads -मूलशौचा- for -मूलः शौचा.- २. For कार्त्स्न्यमभिदधानः A. and I. read कार्त्स्न्याभिधायिना. ३. For स्मर्तृणामभ्रान्त्यविप्रलंभाभ्यां तदप्रसक्तेः A. and I. read स्मर्तॄणां भ्रान्ति-विप्रलम्भाद्यप्रसक्तेः ४. A. omits सती ; while all others except I. omit सत्यवती and retain सती.

तदा किमु वक्तव्यं वेदाचार्यस्तत्पुत्रः सत्यवादी—इति । चकारेण सुमहत्त्वं समुच्चिनोति ।

अत्र—प्रोक्तानामधिकारि-प्रयोजन-विषयाणां परस्परसम्बन्धो विस्पष्टः । तत्र प्रयोजनाधिकारिणोरर्थ्यमानार्थित्वम् । अधिकारी हि प्रयोजनमर्थयते । प्रयोजन-विषययोश्च जन्यजनकभावः । ज्ञाते धर्मे तदनुष्ठानेनाभ्युदय-निःश्रेयससिद्धेः । अधिकारि-विषययोश्चोपकार्योपकारकभावः । विषयः प्रयोजनमुत्पाद्याधिकारिणं प्रत्युपकरोति । विषय-ग्रन्थयोश्च प्रतिपाद्य-प्रतिपादकभावः । तदेवमनुबन्धचतुष्टयस्य सुलभत्वात्समाहितमनस्कैः श्रोतृभिरस्मिन् ग्रन्थे प्रवर्त्तनीयं इति श्लोकद्वयस्य तात्पर्यार्थः ॥ १–२ ॥

ननु—पराशरस्मृत्यवतारे व्यासं प्रति प्रश्नो व्यधिकरण—इत्याशङ्क्य श्लोकद्वयेन परिहरति—

तच्छ्रुत्वा ऋषिवाक्यं तु सशिष्योऽग्न्यर्कसन्निभः ।
प्रत्युवाच महातेजाः श्रुति-स्मृतिविशारदः ॥ ३ ॥
न चाहं सर्वतत्त्वज्ञः कथं धर्मं वदाम्यहम् ।
अस्मत्पितैव प्रष्टव्य इति व्यासः सुतोऽब्रवीत् ॥ ४ ॥

तदित्यादिना । सुमन्तु-वैशम्पायन-जैमिनि-पैलैः चतुर्वेदप्रवर्त्तकैः पुराणप्रवर्त्तकसूतसहितैः शिष्यैः सह वर्तते इति स-

१. D. E. G. and I. read सत्यवादीति प्रकारेण सुमहत्त्वम्, and this brings the two sentences into one. २. A. and I. read अधिकारिभिः प्रयोजनमर्थ्यते for अधिकारी हि प्रयोजनमर्थयते ; while D. omits हि. ३. A. ... one reads मुनिवाक्यं for ऋषिवाक्यं. ४. B. C. and F. read धर्मतत्त्वज्ञः for सर्वतत्त्वज्ञः.

शिष्यः । यथा अग्निर्ज्वालाभिरुपेतः यथा च सूर्यो रश्मिभिः एवमसौ स्वसमानविद्यैः शिष्यैरुपेतः । अत एव महाते-जस्त्वम् । तेजःशब्देनात्र ब्रह्मवर्चसं विवक्षितम् । इतरेण तेजसा प्रयोजनाभावात् । तामेव विवक्षां 'श्रुतिविशारदः' इत्यनेन स्पष्टयति । श्रुति-स्मृत्योः क्रमेणाग्न्यर्कदृष्टान्तौ योज-नीयौ । अग्निः सन्निकृष्टमेव दहन्नपि अहनि रात्रौ चाविशेषेण दहति । एवमधीयमानप्रत्यक्षश्रुतिषु कतिपया एव धर्मा ज्ञाय[1]-माना युक्तावस्थायामयुक्तावस्थायां[2] चाविशेषेण ज्ञायन्ते अर्को दिवैव भासयन्नपि सन्निकृष्टं विप्रकृष्टं च अखिलं भास-यति । एवं युक्तावस्थायामेव स्मर्यमाणा अपि विप्रकीर्णाने-कशाखानिष्ठधर्माः सर्वेऽपि स्मर्यन्ते । अथ वा तपसा अत्यन्त-परिशुद्धोऽयं इत्यस्मिन्नर्थे अग्निदृष्टान्तः[3] । 'अग्निः शुचिव्रत-तमः' (ऋ. सं. ६. ३. ४०. १; तै. सं. ५. ३. ५. ११) इति श्रुतेः । बहुविषयाभिव्यक्तिक्षमत्वेऽर्कदृष्टान्तः[4] ॥ ३ ॥

ननु—एवं सति—'न चाहं सर्वतत्त्वज्ञः'—इति वचनं व्य-हतम् । न[5] । तस्य पितृप्रशंसारूपार्थवादत्वात् । 'अपशवो वा अन्ये गो-अश्वेभ्यः' (तै. सं. ५. २. ९. ४) इति वचनं यथा गवाश्वप्रशंसापरम् । न त्वजादीनां पशुत्वं निषेधति । प्रत्यक्षविरोधात्, आग्नीषोमीयादिपशुविधिविरोधाच्च[6] । एवमिदं व्यासवचनं न व्यासस्य सर्वज्ञत्वं निषेधति । किन्तु पितरं

---

१. After ज्ञायमाना A. and I. add भवन्ति ; but it seems to have no proper use in this place. B. C. and F. omit ज्ञायमाना. २ B. C. and F. omit अयुक्तावस्थायां. ३. B. C. E. and F. read अग्निर्दृष्टान्तः for अग्निदृष्टान्तः. ४. B. C. E. and F. read अर्को दृष्टान्तः for अर्कदृष्टान्तः. ५. Except A. and I. all others omit न. ६. D. reads अग्निष्टोमीयादि- for आग्नीषोमीयादि-.

प्रशंसति। यद्वा। गुरुविषये विनयः कर्त्तव्य–इत्याद्याचार-शिक्षार्थमिदमुक्तम्। अथवा 'न चाहम्'–इति वदतो व्यासस्यायमाशयः–सम्प्रति कलिधर्माः पृच्छ्यन्ते। तत्र[१] न तावदहं स्वतः कलिधर्मतत्त्वं जानामि। अस्मत्पितुरेव तत्र प्रावीण्यात्। अत एव 'कलौ पाराशराः स्मृताः' (प. स्मृ. १. २४) इति वक्ष्यते। यदि पितृप्रसादात् मम तदभिज्ञानं तर्हि स एव पिता प्रष्टव्यः। न हि मूलवक्तरि लभ्यमाने प्रणालिका[२] युज्यते–इति*।

पालनात् 'पिता'। पालकत्वं च अत्र कलिधर्मोपदेशेन–इति प्रस्तावानुसारेण द्रष्टव्यम्। अनयैव विवक्षया जनक-तातादि-शब्दानुपेक्ष्य पितृशब्दं प्रयुङ्क्ते। एवकारेण अन्ये स्मर्त्तारो व्यावर्त्यन्ते। यद्यपि मन्वादयः कलिधर्माभिज्ञाः तथापि पराशरस्यास्मिन्विषये तपोविशेषबलादसाधारणः कश्चिदतिशयो द्रष्टव्यः। यथा काण्व-माध्यन्दिन-काठक-कौथुम-तैत्तिरीयादिशाखासु कण्वादीनामसाधारणत्वं तद्वदत्रा[३]वगन्तव्यम्।

'व्यासः[४] सुतः' इत्युक्तेरयमाशयः–कलिधर्मसम्प्रदायोतस्यापि पराशरसुतस्य यदा तद्धर्मरहस्याभिधाने सङ्कोचः

---

* नन्दपण्डितस्तु–'पराशरस्यैव प्रतिकल्पं कलिधर्मप्रवचनाधिकारिपुरुषत्वं श्रुति-स्मृतिभ्यामवगत्य स्वस्यानुचितं कलिधर्मानुशासनं मन्वानो व्यासः सुतो ऽहं धर्मं कथं वदामि अस्मत्पितैव प्रष्टव्य इत्यवदत्' इत्याह। धरणीधरो ऽपि–'पराशरस्यैव प्रतिकल्पं कलिधर्मप्रवचनाधिकारित्वमिति गूढोऽभिप्राय' इत्युक्तवान्।

---

१. A. and I. omit तत्र. २. We read प्रणालिका though the MSS. read प्रणाडिका, there being no difference between ड and ल in Sanskrit. ३. A. omits अत्र. ४. All but H. read सुतो व्यासः for व्यासः सुत..

तदा किमु वक्तव्यमन्येषाम्—इति । तदेवं व्यासमुखेन पराशरे गौरवातिशयबुद्धिमुत्पादयितुं पराशरस्मृत्यवतारे ऽपि व्यासं प्रति प्रश्नो न व्यधिकरणः इत्यवगन्तव्यम् ॥ ४ ॥

यथाविधि गुरूपसत्त्या विद्याप्राप्तिः इत्यभिप्रेत्य उपसत्तिं[1] दर्शयति—

> ततस्त[2] ऋषयः सर्वे धर्मतत्त्वार्थकाङ्क्षिणः ।
> ऋषिं व्यासं पुरस्कृत्य गता[3] बदरिकाश्रमम्[4] ॥५॥

इति । सर्वत्र वस्तुनि सामान्येन ज्ञाते विशेषेणाज्ञाते ज्ञानाकाङ्क्षा भवति । धर्मशब्दो ऽत्र सामान्यमभिधत्ते । तत्त्वार्थशब्दो विशेषम् । तत्र सामान्यं अधीतवेदेन[5] श्रुत[6]व्याकरणेन लक्षण-प्रमाण[7]कुशलेन पुरुषेण ज्ञायते । वेदो हि[8] धर्मसामान्यं निरूपयति । 'धर्मो विश्वस्य जगतः प्रतिष्ठा' (म. ना. उ. १. २२)—इति । शाखान्तराध्यायिनस्तु व्याकरणबलात् तदभिज्ञानम् । अभ्युदय-निःश्रेयसे धारयति—इति व्युत्पत्तेर्दर्शयितत्वात् । औणादिकप्रक्रियायां[9] कुशलस्तेन लक्षणेन ज्ञानातु[10] । अर्थत्वे तु[11]—चोदनागम्यो धर्मः—इति लक्षणम् । तत्र अर्थशब्देन श्येनाद्य[12]भिचाराणां अनर्थानां निवृत्तिः । 'श्येन-

---

१. D. E. G. and H. read उपपत्तिं for उपसत्तिं. २. K. and L. read ततस्तु for ततस्त. ३. A. and I. read गत्वा for गता. ४. D. E. and G read बदरिकाश्रमान for बदरिकाश्रमम्. ५. B. C. and F. read अधीते वेदे for अधीतवेदेन. ६. E. and G. read अश्रुतव्याकरणेन for श्रुतव्याकरणेन ७. B. has -प्रमाणाकुशलेन for -प्रमाणकुशलेन. ८. A. omits हि. ९. A. D. E. and I. read -प्रक्रियायामकुशल- for -प्रक्रियायां कुशल-. १० A. and I. read जानाति for ज्ञानातु. ११. A. replaces सति by तु. १२ A. alone reads श्येनाभिचरणादीनां for श्येनाद्यभिचाराणां.

नाभिचरन् यजेत*' इति श्रुत्युक्तस्य[1] श्येननामकयागफलस्य शत्रुवधस्य 'न हिंस्यात् सर्वभूतानि'—इति निषेधविषयत्वेन अनर्थत्वात् तद्धेतोः श्येनस्याप्यनर्थत्वम्। श्येनस्य स्वरूपतो निषेधाविषयत्वात् विधेयत्वमप्यविरुद्धम्। न च—निषेधविषयत्वेन आग्नीषोमीयवधस्यापि अर्थशब्देन व्यावर्त्यत्वादव्याप्तिः[2]—इति शङ्कनीयम्। तत्र विशेषविधिना सामान्यनिषेधस्य अपोहितत्वात्। चोदनाशब्देन प्रत्यक्षादेर्यावृत्तिः। 'घटं कुरु' इति लौकिकविधावतिव्याप्तिः[3]—इति चेत्। न। चोदनाशब्दस्य वेदविषये प्रसिद्धत्वात्। पङ्कजादाविव अवयवार्थस्य प्रवृत्तिनिमित्तमात्रत्वात्[4]। उक्तलक्षणाभिधानेनैव 'धर्मे चोदनाप्रमाणम्'—इत्यर्थादभिहितं भवति। एवं लक्षणादिभिः सामान्येन ज्ञाते ऽपि[5] ऋषीणां तद्विशेषज्ञाने भवत्येवाकाङ्क्षा†।

तत्र विशेषप्रश्नकुशलत्वात् व्यासस्य पुरस्कारः। कलि-

---

* अयं च श्येनयागः आश्वलायनश्रौतसूत्रे (अ. ९. ७) उक्तः स्य च इतिकर्तव्यतादिकं तत्रैव द्रष्टव्यम्। आभिचारिकमिदं कर्म अस्व र्थत्वेनैव वेदे उक्तम्।

† नन्दपण्डित-धरणीधरौ तु—'धर्मतत्त्वार्थकाङ्क्षिणः इति— कलि कालानुष्ठेयस्य धर्मस्य तत्त्वं अबाधितं रूपं स एवार्थः तं काङ्क्षन्ति' इति व्याख्यातवन्तौ।

---

१. A. reads श्रुतेः उक्तस्य for श्रुत्युक्तस्य; while all others except I. omi[t] इति altogether. २. B. C. and F. read अप्राप्तिः for अव्याप्तिः. ३. W[e] read with A. while all others read विधिष्वतिव्याप्तिः for -विधावतिव्याप्ति[ः]. ४. A. and I. read प्रवृत्त्यानिमित्तत्वात् for प्रवृत्तिनिमित्तमात्रत्वात्. ५. Her[e] [w]e read with A. and I.; while all others read सामान्ये ज्ञाते ऽपि fo[r] [सा]मान्येन ज्ञाते ऽपि.

कल्मषविमोचन[1]हेतुत्वात् अक्षय्य[2]फलहेतुत्वाच्च बदरिकाश्रम-निवासः । तदुक्तं कूर्मपुराणे—

‘बदर्याश्रममासाद्य मुच्यन्ते[3] कलि[4]कल्मषात् ।
तत्र नारायणो देवो नरेणास्ते सनातनः ॥
अक्षय्यं[5] तत्र दत्तं[6] स्याज्जप्यं[7] वा ऽपि तथाविधम् ।
महादेवप्रियं तीर्थं पावनं तद्विशेषतः ।
तारयेच्च पितॄन् सर्वान् दत्त्वा श्राद्धं विशेषतः’ ॥
(कू. पु. १. २. ३६. ४८–४९)

इति ॥ ५ ॥

पराशरस्य तपोमहिमानं प्रख्यापयितुमाश्रमं विशिनष्टि—

नानापुष्पलताऽऽकीर्णं फल[8]वृक्षैरलङ्कृतम् ।
नदीप्रस्रवणोपेतं पुण्यतीर्थोपशोभितम् ॥ ६ ॥
मृग-पक्षिनिनादाढ्यं[9] देवताऽऽयतनावृतम् ।
यक्ष-गन्धर्व-सिद्धैश्च *नृत्य[10]-गीतैरलङ्कृतम् ॥ ७ ॥

* अत्र कुत्राचि'नृत्य'शब्दः कुत्रापि 'नृत्त'शब्दश्च वर्तते । यद्यपि नृत्य-नृत्तशब्दयोः व्याख्याकृद्भिर्न विशेषः प्रतीतः तथापि तत्रास्ति कश्चिद्विशेषः । यथोक्तं चन्द्रिकायां—'नृत्यं पदार्थाभिनयो नृत्तं तालल‍याश्रितम्' इति ।

१. All but A. read -विमोक- for -विमोचन-. २. All but A. D. and G. read अक्षय- for अक्षय्य-. ३. A. and I. read मुच्येत for मुच्यते; all others read मुमुचे for the same. ४. In Kúrma Purana we find सर्वकिल्बिषात्. ५. Except A. D. and I. All others and the text of Kúrma Purana read अक्षयं. for अक्षय्यं ६. D. has कर्म for दत्तं ; and Kúrma Purana दानं. ७. B. C. and F. read -जप्तं for -जप्यं. ८. Except J. K. I. and L. all others read फल-पुष्पैः for फलवृक्षैः. The commentators prefer the word फलवृक्षैः ९. For -निनादाढ्यं G. reads -निनादाढ्य, while L. reads -निनादाढ्य-; and D. reads -भिराढ्यं च for -निनादाढ्यं. १०. A. and I. read नृत्त-for नृत्य-.

इति। अत्युत्कटेन* तपसा फलमिहैवाविर्भवति। तथा सति यादृशं फलमुत्कृष्टमुपलभ्यते तादृशस्य तपस उत्कर्षो निश्चेतव्यः। इह च[1] तेषु तेषु ऋतुषु[2] सम्भाव्यमानानां नानाविधानां पुष्पाणां निरन्तरं सङ्कीर्णत्वमुपलभ्यते। ततो देवार्चनलक्षणं तपः पक्वं इति गम्यते। एवं फलवृक्षोत्कर्षात्[3] आहारनियतेः परिपाको निश्चीयते। घर्मकालेऽपि अविच्छिन्नेन नदीप्रवाहेण स्नाननियति[4]पाकावगमः†। पुण्यतीर्थं विष्णुगङ्गादि। पुण्यतीर्थशोभया[5] च[6] आश्रमस्यैतस्य तपोऽतिशयजनकत्वे हेतु[7]रुपन्यस्तः॥ ६॥

मृगादीनामन्योन्यवैरत्यागेन निर्भयाणां विस्रब्धो यो निनादः तेन अहिंसाऽनुष्ठानसिद्धिर्दर्शिता। तथा च योगशास्त्रे पतञ्जलिः यम-नियमादीनां क्रमेण सिद्धिलिङ्गानि सूत्रयन्

---

* 'अत्युत्कटैः पुण्य-पापैरिहैव फलमश्नुते' इति वसिष्ठोक्तिरपि अत्रानुसन्धेया।

† 'नियति' शब्दोऽत्र नियमवाची। भगवता पतञ्जलिना 'वितर्काहिंसादयः' (पा० २. ३४) -इत्यादिना प्रतिपक्षभावनामुक्त्वा—प्रतिपक्षभावनाद्धेतोर्हेया वितर्का यदाऽस्य स्युरप्रसवधर्माणः तदा तत्कृतमैश्वर्यं योगिनः सिद्धिसूचकत्वेन भवतीति दर्शयितुं वैरत्याग-क्रियाफलाश्रयत्वाद्याः सिद्धयोऽभिहिताः। तास्तु योगसूत्रभाष्ये द्रष्टव्याः।

---

१. A. omits च. २. All but A. and I. omit ऋतुषु, which is necessarily wanted here. ३. H. and I. read फलवृन्दोत्कर्षात् for फलवृक्षोत्कर्षात्. ४. For -नियति- B. C. and F. read -नियम-; while D. E. and H. -नियत-. ५. For पुण्यतीर्थं विष्णुगंगादि। पुण्यतीर्थशोभया. D. reads पुण्यतीर्थविष्णुगंगादिपुण्यतीर्थशोभया; while H. reads पुण्यतीर्थविष्णुगंगादिपुण्य-. ६. Except A. all others omit च. ७. G. reads तपोऽतिशयजनत्वेहेतु-; and D. तपोऽतिशयजनकत्वेहहेतु- for तपोऽतिशयजनकत्वे हेतु-.

अहिंसासिद्धिं सूत्रयामास । 'तत्सन्निधौ वैरत्यागः' (पा. यो. सू. २. ३५.) इति ।

पूर्वे महर्षयो ऽत्र तपश्चरन्तः एकैकं देवालयं स्वस्वकाले निर्मिमिरे । तैः सर्वैरावृतत्वमस्याश्रमस्य तापोऽतिशयहेतुतायां सर्वसम्प्रतिपत्तेर्लिङ्गम् । अथवा चन्द्र-सूर्यादयो देवाः पूर्वस्मिन् जन्मनि मनुष्याः सन्तो ऽत्रैव नानाविधेष्वायतनेषु तपस्तप्त्वा देवत्वं लेभिरे–इति विवक्षया देवनामाङ्कितैरायतनैरावृतत्वमुक्तम् । यक्षादयः* पूर्वजन्मानुष्ठिततपःफलदेवयोनित्वमनुभवन्तो† ऽप्यत्रागत्य एतदीयतपोऽतिशयं दृष्ट्वा हृष्यन्तो नृत्यन्ति गायन्ति च । अनेन देवैरपि अर्थनीयत्वमाश्रमस्य प्रदर्शितम् । युक्तं चैतत् । देवजन्मनो ऽप्युत्तमस्य फलस्यात्र सम्पादयितुं शक्यत्वात् । अथवा यक्षादयो मुमुक्षवः सन्तो ऽत्रागत्य मोक्ष[1]साधनत्वेन नृत्त-गीताभ्यां ईश्वरं भजन्ते । अत एव याज्ञवल्क्येनेदमुक्तम्–

---

* 'यक्ष् पूजायाम्' । यक्ष्यते पूज्यते इति यक्षः । 'अकर्तरि' (३. ३. १९) चेति कर्मणि घञ् । यक्षादीनां देवतांशत्वात् देवयोनित्वम् । यथाहामरसिंहः—

'विद्याधरो-ऽप्सरो-यक्ष-रक्षो-गन्धर्व-किन्नराः ।
पिशाचो गुह्यकः सिद्धो भूतो ऽमी देवयोनयः' ॥

इति । सांप्रतं 'ह्मसोबा' इत्यादिनामभिः महाराष्ट्रेषु प्रसिद्धाः यक्षशब्दवाच्या एवेति प्रतिभाति ।

† देवा योनिरेषां ते देवयोनयः देवांशका इत्यर्थः । न तु, देवानामिव योनिरुत्पत्तिकारणं अविभाव्यमेषां ते–इति व्यधिकरणबहुव्रीहिः ।

---

१. मोक्ष. is omitted by A.

'वीणावादनतत्त्वज्ञः श्रुति-जातिविशारदः।
तालज्ञश्चाऽप्रयासेन मोक्षमार्गं[१] निगच्छति*'॥

(या. स्मृ. ३. ११६.)

इति ॥ ७ ॥

गुरूपसत्तावनुष्ठेयं प्रकारविशेषं दर्शयति—

तस्मिन्नृषिसभामध्ये शक्तिपुत्रं पराशरम्।
सुखासीनं महातेजा[२] मुनिमुख्यगणावृतम् ॥ ८ ॥
कृताञ्जलिपुटो भूत्वा व्यासस्तु ऋषिभिः सह।
प्रदक्षिणाभिवादैश्च स्तुतिभिः[३] समपूजयत् ॥ ९ ॥

इति। 'तस्मिन्' इति आश्रमोक्तिः। वक्ष्यमाणधर्माणामशेषमुनिसम्मतत्वं दर्शयितुं 'ऋषिसभा' इत्युक्तम्। ऋषिष्वपि विशेषेण स्मृतिकाराणां[४] गोत्रप्रवर्त्तकानां च अत्रियाज्ञवल्क्यादीनां सम्पत्तिं विवक्षित्वा आह। 'मुनिमुख्य' इति। न केवलं तपोबलेन पराशरस्य महिमा किन्तु वि-

* 'अपरान्तकमुल्लोप्यं' इत्यादीनि सप्त गीतानि महागीतानि चोक्त्वा 'गेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितं' इति गीताभ्यासस्य ऐकाग्र्यतापादकत्वेन आत्मैकतापत्तिकारणत्वं प्रदर्श्य, तत्साधकानां वीणावादनादीनामपि मुक्तिपथप्रापकत्वमाह। वीणेति। श्रुतिः द्वाविंशतिप्रकारा। जातयस्तु षड्जाद्याः सप्त तासु विशारदः। तालः गीतकालपरिमाणम् तत्स्वरूपज्ञो ऽपि, तत्र मानसस्यैकाग्र्यात् सुलभत्वेनैव मोक्षमार्गं गच्छति। एतदपि भगवत्प्रीत्यर्थमेवानुष्ठितं चेत् मोक्षसाधकं, अन्यथा तु बन्धहेतुरेव।

१. H. reads -मार्गं for -मार्गं. २. M. reads महात्मानं for महातेजा. ३. K. and L. read तमृषिं for स्तुतिभिः. ४. A. reads स्मृतिकारिणां for स्मृतिकाराणां.

शिष्टजन्मनापि इत्याह । 'शक्तिपुत्रम्' इति । अयं च महिमा पराशरशब्दनिर्वचनपर्यालोचनया विस्पष्टमवगम्यते । तच्च निर्वचनं महद्भिरुदाहृतम्—

'पराकृताः शरा यस्मात् राक्षसानां वधार्थिनाम् ।
अतः पराशरो नाम ऋषिरुक्तो मनीषिभिः ॥
परस्य कामदेवस्य शराः सम्मोहनादयः ।
न विद्यन्ते यतस्तेन ऋषिरुक्तः पराशरः ॥
परेषु पापचित्तेषु नादत्ते कोपलक्षणम् ।
शरं यस्मात् ततः प्रोक्तः ऋषिरेव पराशरः ॥
परं मातुर्निजाया यदुदरं तदयं गतः ।
ऋचमुच्चार्य निर्भिद्य निरगात् स पराशरः'* ॥

इति । 'सुख' शब्देनैकाग्र्यं च विवक्षितम् । चित्तस्याशेषविक्षेपपरिहारेणैकाग्र्यं यथा भवति तथोपविष्टमित्यर्थः । 'ऐकाग्र्य-आसीन-महातेजः' पदानि पूर्वं व्याख्यातानि ॥८॥

'अञ्जलि' पदेन भक्त्यतिशयो द्योत्यते । परया[2] भक्त्या गुरूपदिष्टार्थतत्त्वमाविर्भवति[3] । तथाच श्वेताश्वतरशाखायां श्रूयते—

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः' ॥

(श्वे. उ. ६. २३.)

* अत्र 'पराशर' नाम्नश्चतुर्धा निरुक्तिः । सा च परस्परं भिन्ना । उत्तानार्था च । वाक्यानीमानि कुत्रत्यानीति न ज्ञायते ।

१. B. D. E. and H. omit इति. २. All except A. and I. read पराशरभक्त्या for परया भक्त्या. This is a real mistake though to be found in all the MSS. ३. B. and F. read गुरुसम्दिष्टार्थतत्त्वं for गुरूपदिष्टार्थतत्त्वं.

इति। अन्तरेण गुरुभक्तिमुपदिष्टो ऽप्यर्थो निष्फलो भवति। एतदपि क्वचित् श्रूयते,—

' अध्यापिता ये गुरून्[२] नाद्रियन्ते
विप्रा* वाचा मनसा कर्मणा वा।
यथैव ते न गुरुभिर्[३]भोजनीयाः
तथैव तान् न भुनक्ति श्रुतं तत्॥
(व. स्मृ. २. ११)

इति। यथा गुरुमनाद्रियमाणाः शिष्याः न गुरुणा पालनीयाः तथा तत् श्रुतम[४]पि तान्[५] शिष्यान् स्वफलदानेन न पालयति इत्यर्थः। देववद्गुरोः पूजनीयत्वात् तस्मिन् प्रदक्षिणादयो युज्यन्ते। तर्हि आवाहनासन-स्वागतादयो ऽप्युपचाराः प्राप्यन्ते—इति चेत्। प्राप्यन्तां नाम। प्रदक्षिणादीनामुपलक्षणत्वात्। अथवा दूरादागत्य गुरुदर्शनं कुर्वतामुचिताः प्रदक्षिणादय एव इति तावन्तो ऽत्र निर्दिश्यन्ते॥ ९॥

उक्तोपसत्तेर्यथाविधित्वं द्योतयितुं गुरोः परितोषपूर्वकं कृपाविशेषमाद[६]र्शयति—

त[७]तः सन्तुष्टहृदयः पराशरमहामुनिः।
आह सुस्वागतं ब्रूहीत्यासीनो मुनिपुङ्गवः॥ १०॥

---

* अत्र 'विप्र' शब्दो न केवलं ब्राह्मणवाची। अपि तु गुरूपसत्तिपूर्वकमध्ययनाधिकारिशिष्यवाचकः। अन्यथा क्षत्रियादीनां गुर्वनादरे दोषाभावप्रसङ्गः स्यात्।

---

१. A. and I. read तदपि for एतदपि. २. All but A. and H. read गुरुं for गुरून्. ३. गुरोः for गुरुभिः; while H. omits गुरुं altogether and then reads गुरोः. ४. D. reads कृतमपि for श्रुतमपि. ५. For अपि तान् reads अधीतार्थं. ६. A. reads दर्शयति for समादर्शयति. ७. Except J. K. and L. all others read अथ for ततः.

इति । गुरुसन्तोषस्य श्रेयोहेतुत्वमन्वय-व्यतिरेकाभ्यां पुराणसारे ऽभिहितम्—

‘ गुरावतुष्टे ऽतुष्टाः स्युः सर्वे देवा द्विजोत्तमाः ।
तुष्टे तुष्टा यतस्तस्मात् सर्वदेवमयो गुरुः ॥
श्रेयोऽर्थी यदि गुर्वाज्ञां मनसाऽपि न लङ्घयेत् ।
गुर्वाज्ञापालको यस्मात् ज्ञानसम्पत्तिमश्नुते ’ ॥

इति । आदरपूर्वकेण स्वागतप्रश्नेन कृपाविशेषो दर्शितः । आदरार्था सुशब्दस्य द्विरुक्तिः । अथवा सुशब्देनैकेन आगमने लौकिकं सौख्यमुक्तम् । द्वितीयेन यथाविध्युपसत्तिलक्षणं शास्त्रीयं सौष्ठवमुच्यते । ऋषिष्वागतेषु पराशरेणाभ्युत्थातव्यम्—इति शङ्कां वारयति । ‘ आसीनः ’ इति । तत्र हेतुत्वेन पराशमहामुनि-मुनिपुङ्गवशब्दद्वयेन विशेष्यते । महामुनि-मुनिपुङ्गवशब्दौ क्रमेण वयसा विद्यया च ज्येष्ठत्वमाहतुः । उभयविधज्यैष्ठ्यात् न अनेनाभ्युत्थातव्यम् ॥१०॥

आसीनेन यथा स्वागतं पृष्टम् एवमागतेनाप्यवस्थितर

* महामुनिः ‘मन् ज्ञाने’ इत्यस्मात् ‘मनेरुत् च’ (उ. ४.१२३ इत्यनेन इन् । मननशीलो मुनिः । अमरसिंहस्तु ‘वाचंयमो मुनिः’ इत्याह ।

१. D. has पुराणसारेण for पुराणसारे. २. D. reads मनसा न विलंघयेत् for मनसापि न लंघयेत. ३. A. omits आगमने. ४. B. reads लौकिकसौख्य for लौकिकं सौख्यं. ५. A. reads पराशरेणाभ्युत्थातव्यम् for पराशरेणाभ्युत्थातव्यम्. ६. All but A. read simply पराशरः शब्दद्वयेन विशेष्यते for पराशरो महामुनि-मुनिपुंगवशब्दद्वयेन विशेष्यते. ७. Except A. and I. all others put in an additional शब्द after महामुनि and thus read महामुनिशब्द-मुनिपुंगवशब्दौ.

कुशलं प्रष्टव्यम्। अतः प्रथमं तत्[१] पृष्ट्वा गुरुणा स्वकीयकुश-[२]
लेऽभिहिते सति पश्चात् बुभुत्सितार्थं पृच्छति—इत्याह—

कुशलं[३] सम्यगित्युक्त्वा व्यासः पृच्छत्यनन्तरम्[४]।

इति उक्त्वा। 'गुरुमुखात् कुशलं श्रुत्वा च' इत्यध्याहृत्य[५] योजनीयम्॥

बुभुत्सितार्थे प्रश्नप्रकारं दर्शयति—

यदि जानासि भक्तिं मे स्नेहाद्वा भक्तवत्सल॥ ११॥
धर्मं कथय मे तात अनुग्राह्यो[६] ह्यहं[७] तव।

इति। प्रियः शिष्यः पुत्रो वा रहस्योपदेशमर्हति। नेतरः। सोऽयमर्थः छन्दोगैर्मधुविद्यायामाम्नायते। 'इदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्याय वा अन्तेवासिने॥५॥ नान्यस्मै कस्मै चन*' (छां. उ. ३. ११. ५–६) इति। अतोऽत्र व्यासस्य पुत्रत्वं शिष्यत्वं चास्ति इत्यभिप्रेत्य पक्षद्वयो-

* 'इदं' ज्ञानं। 'तत्' यथोक्तम्। ज्येष्ठायैव वक्तव्यमिति पूर्वेषामयं नियमः। नेदानीन्तनानाम्। ज्येष्ठाय पुत्राय सर्वप्रियार्हाय कनिष्ठायापि वा। अथवा 'प्रणाय्याय' योग्याय 'अन्तेवासिने' शिष्याय ब्रह्म प्रब्रूयात् इति तात्पर्यम्।

१. A. reads तत्त्वविशा for तत् पृष्ट्वा. २. A. and I. read स्वकीये कुशले for स्वकीयकुशले. ३. M. reads कुशलं कुशलेत्युक्त्वा for कुशलं सम्यगित्युक्त्वा. Before this line G. has an additional line not to be found in any other MS., namely :—वत्स सुस्वागतं तेषां ऋषीणामासमन्ततः; M. also has an additional line in the place of above, and it reads thus :—स्वागत सुस्वागतं चे च ऋषयश्च समन्ततः. ४. A. J. and M. read -स्वतः परम् for -त्यनन्तरम्. ५. E. G. and H. read इत्यत्वाऽऽहृत्य for इत्यध्याहृत्य. Before अनुग्राह्यो A. adds हि. ७. A. reads ऽप्यहं for ह्यहं.

पन्यासः। यदि लिङ्गैर्मदीयो मानसो भक्तिविशेषोऽनुमीयेत तदा तव भक्तवत्सलत्वात् शिष्यबुद्धया मामनुगृहाण। अननुमानेऽपि पुत्रस्नेहात् अनुग्राह्योऽहम्। सर्वथाऽप्युपदेष्टव्य एव धर्मः ॥ ११ ॥

ननु—सन्ति बहवो धर्माः मन्वादिभिः प्रोक्ताः। तत्र को धर्मो भवता बुभुत्सितः? इत्याशंक्य बुभुत्सितं परिशेषयितुं बुद्धान् धर्मानुपन्यस्यति।

श्रुता मे मानवा धर्मा वासिष्ठाः काश्यपास्तथा ॥ १२ ॥
गर्गेया गौतमीयाश्च तथा चौशनसा स्मृताः।
अत्रेर्विष्णोश्च संवर्त्तात् दक्षादङ्गिरसस्तथा ॥ १३ ॥
शातातपाच्च हारीतात् याज्ञवल्क्यात्तथैव च।
आपस्तम्बकृता धर्माः शङ्खस्य लिखितस्य च ॥१४॥
कात्यायनकृताश्चैव तथा[11] प्राचेतसान्[12]मुनेः[13]।

---

१. A. H. and I. read मदीये मानसे भक्तिविशेषोऽनुमीयते for मदीयो मानसो भक्तिविशेषोऽनुमीयेत. २. A. omits सन्ति. ३. All but A. take धर्माः after प्रोक्ताः. ४. D. E. G. J. K. and L. read गार्गीया for गर्गेयाः, while A. reads गार्गीय-गौतमीयाश्च. for गर्गेया गौतमीयाश्च. ५. B. and E. read चौशनसा स्मृताः; D. G. H. J. K. L. and M. have चौशनसाः स्मृताः. ६. A. and I. read श्रुताः for स्मृताः keeping चौशनसाः. ७. In this Shloka for all the ablatives M. substitutes respective nominatives and reads as follows:—अत्रेर्विष्णोश्च सांवर्त्ता दाक्षा आंगिरसास्तथा। शातातपाश्च हारीता याज्ञवल्क्यकृताश्च ये ॥ ८. M. takes the second line, namely :—कात्यायन- &c., before the first half आपस्तम्ब- &c. ९. A, reads -कृतान् धर्मान् for -कृता धर्माः. १०. Before this line G. adds an extra line धर्मराजकृताश्चैव बृहस्पतिकृताश्च ये। ११. M. reads प्राचेतसकृताश्च ये for तथा प्राचेतसान्मुनेः. १२. D. and H. read प्राचेतसो मुनेः for प्राचेतसान्मुनेः. १३. After all the above lines G. has an additional line श्रुतिरम्बोऽप्रवादस्तात श्रुत्वर्था मानवास्तथा।

इति । मे श्रुताः मया श्रुता इत्यर्थः । संबन्धसामान्य-वाचिन्याः षष्ठ्याः कर्तृकृतिलक्षणे[१] विशेषे पर्यवसानात् । अत्रेः इत्यादीनां पञ्चम्यन्तानां श्रुताः—इत्यनेनानुषक्तेन सम्बन्धः । आपस्तम्बेन कृताः प्रोक्ताः इति यावत् । शङ्खस्य लिखितस्य च सम्बन्धिनो धर्माः । ताभ्यां प्रोक्तत्वं तत्सम्बन्धित्वम् । प्रचेता एव प्राचेतसः। वायस-राक्षसादाविव† स्वार्थे तद्धितः । अस्तु वा प्रचेतसः पुत्रः कश्चित् धर्मशास्त्रकारः ॥ १२, १३, १४ ॥

ननु—मानवादयः स्मार्त्ता धर्माः[५] श्रुताश्चेत् तर्हि मा नाम[६] ते बुभुत्स्यन्तां श्रौतास्त्वग्निहोत्रादयो बुभुत्सिष्यन्ते[७] इत्याशंक्याह—

श्रुता ह्येते भवत्प्रोक्ताः श्रुत्यर्था[८] मे[९] न विस्मृताः ॥ १५ ॥
अस्मिन् मन्वन्तरे धर्माः कृत[१०]-त्रेतादिके युगे ।

इति । ये प्रत्यक्षश्रुतीनामर्थाः अग्निहोत्रादयो धर्माः एते मया श्रुताः । तदेतत् तत्रापि प्रसिद्धं इति द्योतनार्थो हि-

---

† वयः एव वायसः । रक्ष एव राक्षसः इत्यत्र यथा स्वार्थे तद्धितः तथा प्राचेतस इत्यत्रापि तद्धित इति भावः । प्राचेतस इति वाल्मीकेरपि नामास्तीति रामायणादिभ्यो ऽवगम्यते ।

---

१. B. C. D. and F. read कर्तृलम्भने for कर्तृकृतिलक्षणे; while E. G. and H. omit it altogether. २. Except A. all others omit वायस. ३. For [illegible] E. G. and H. read [illegible]. ४. H. omits च. ५. A. and [illegible] read स्मार्तधर्माः for स्मार्ता धर्माः. ६. All but A. omit नाम. ७. A. reads बुभुत्स्यन्ते for बुभुत्सिष्यन्ते. ८. B. C. E. F. G. H. M. read श्रौतार्थाः for श्रुत्यर्थाः; but the Tikakar prefers श्रुत्यर्थाः. ९. For मे M. substitutes [illegible]. १०. K. reads [illegible] for कृत-त्रेतादिके.

शब्दः। तत्र हेतुः भवत्प्रोक्ताः—इति। व्यासः पराशरादधीतवान्—इति पौराणिकाः। श्रुतानामपि विस्मृतिश्चेत् पुनरपि स्मारणमपेक्षेत—इत्याशंक्य न विस्मृताः—इत्युक्तम्। प्रायेणाग्निहोत्रादीनां कलौ दुर्लभत्वमभिप्रेत्य 'कृतत्रेतादिके'—इत्युक्तम्। आदिशब्देन द्वापरं गृह्यते। 'अस्मिन् *मन्वन्तरे' इति निर्देशः प्रदर्शनार्थः। ननु मन्वन्तराण्यतीतान्यनागतानि वा व्यवच्छिनत्ति। तद्व्यवच्छेदे प्रयोजनाभावात्। न हि नानाविधेषु मन्वन्तरेषु धर्मं भिद्यमानं क्वचिदुपलभामहे। अस्मिन्मन्वन्तरे कृतादिषु त्रिषु युगेषु प्रायेण सम्भावितानुष्ठानाः प्रत्यक्षश्रुत्यर्थाः ये धर्माः तेऽपि मानवादिस्मार्त्तधर्मवत् श्रुतत्वान्न बुभुत्सिताः॥ १८॥

इदानीं परिशिष्टं बुभुत्सितं पृच्छति—

सर्वे धर्माः कृते जाताः सर्वे नष्टाः कलौ युगे॥१६
चातुर्वर्ण्यसमाचारं किञ्चित् साधारणं वद।

इति। सर्वशब्दो देश-कालावस्थादिभेदेन धर्माणां बहुविधत्वमाचष्टे। एतच्च महाभारते आनुशासनिके पर्वणि उमामहेश्वरसंवादे प्रपञ्चितम्—

* अस्मिन्नित्यनेन प्रकृतं वैवस्वतमन्वन्तरमेव गृह्यते। किञ्चिदधिका दिव्यानां युगानामेकसप्ततिः मन्वन्तरमिति तु प्रसिद्धमेव।

१. A. H. and I. read स्मरण- for स्मारण-. २. For धर्मं भिद्यमानं B. C. and F. read धर्माभिधानं; and धर्माभिमानं is that of E. and G. ३. I. reads कृतादिकेषु for कृतादिषु. ४. H. and I. omit त्रिषु. ५. All but I. read स्मृतत्वात् for श्रुतत्वात्. but the latter appears to be more correct. ६. D. reads -विधतां for -विधत्वं. ७. A. reads अनुशासनिकपर्वणि for आनुशासनिके पर्वणि.

'धर्मा बहुविधा[१] लोके श्रुतिभेदमुखोद्भवाः *।
[२]देशधर्माश्च दृश्यन्ते कुलधर्मास्तथैव च ॥
जातिधर्मा वयोधर्मा गुणधर्माश्च शोभने ।
शरीर-कालधर्माश्च आपद्धर्मास्तथैव च ॥
एतद्धर्मस्य नानात्वं क्रियते लोकवासिभिः' ।

इति । ते च सर्वे धर्माः प्राणिभिः कृतयुगे यथावदनुष्ठिता भवन्ति । युगसामर्थ्येन[३] धर्मस्य चतुष्पदो[४]ऽपि अपरिक्षयात् । त्रेतादिषु क्रमेण क्षीयमाणा धर्माः कलियुगावसाने सर्वात्मना विनष्टा भवन्ति । तदेतत् सर्वं पुराणसारे विस्तरेण प्रदर्शितम्[५]—

---

* श्रुतीनां यो भेदः अनेकत्वं तन्मुखेन उद्भवो येषाम् । धर्मस्य चोदनालक्षणत्वात् तासां चानेकत्वात् धर्माणामनेकत्वमिति भावः ।

† धर्मस्य अनेकविधत्वे अन्यान्यपि कारणानि दर्शयति । देशेति । देश-कुलादीन्यपि धर्मस्य भेदे कारणानि । अत्र धर्मस्य बहुत्वद्योतनायैव देशधर्म-कुलधर्मादीनां ग्रहणम् । अन्यथा तेषामवैदिकत्वात् अननुष्ठाने प्रत्यवायाभावाच्च विवाहादिष्वेव ग्रहणं न सम्भवेत् ।

---

१. D. E. and G. read चतुर्विधा for बहुविधाः. The former seems to be not correct as there are more four Dharmas mentioned in the following lines. २. For this line J. (नन्दपण्डित) देशभेदाश्च दृश्यन्ते कुलभेदास्तथैव च ।. ३. All but A. read -साम्येन for -सामर्थ्येन. ४. B. C. and F. read चतुष्पदेष्वपरिक्षयात्; while D. E. G. and H. read चतुष्पदेऽप्यपरिक्षयात् for चतुष्पदोऽपि अपरिक्षयात्. ५. For पुराणसारे विस्तरेण प्रदर्शितम् B. C. and F. read पुराणसारेण दर्शितम्; while D. E. G. and H. read पुराणकारेण विस्तरेण दर्शितम्.

'कृते चतुष्पात्* सकलो व्याजोपाधिविवर्जितः।
वृषः प्रतिष्ठितो धर्मो मनुष्येष्वभवत् पुरा ॥
धर्मः पादविहीनस्तु त्रिभिरंशैः प्रतिष्ठितः।
त्रेतायां, द्वापरेऽर्धेन व्यामिश्रो धर्म इष्यते ॥
त्रिपादहीनस्तिष्ये तु सत्तामात्रेण तिष्ठते' ॥

इति। तिष्यः कलिः। तथाच बृहस्पतिरपि—

'कृतेऽभूत् सकलो धर्मस्त्रेतायां त्रिपदः स्थितः।
पादः प्रविष्टो ऽधर्मस्य मत्सरद्वेषसंभवः ॥
धर्माधर्मौ समौ भूत्वा द्विपादौ द्वापरे स्थितौ।
तिष्ये ऽधर्मस्त्रिभिः पादैर्धर्मः पादेन संस्थितः' ॥

इति। तथा लैङ्गपुराणे कलौ धर्मनाशं प्रस्तुत्य तद्धेतुत्वेन पुरुषदोष उपन्यस्तः—

---

* वृषरूपस्य धर्मस्य—'तपः शौचं दया दानमिति पादाः प्रकीर्तिताः'। एवमधर्मस्यापि—'स्मय-सङ्ग-मदा अनृतं' चेति चत्वारः पादाः। त्रेतादिष्वनुक्रमेण अधर्मपादैः धर्मपादानां नाशो भवतीति भावः।

---

१. All but A. J. (नंदपण्डित) read निर्व्याजोपाधिवर्जितः for व्याजोपाधिविवर्जितः. २. Except A. and I. all others read अवसत for अभवत. ३. For द्वापरेऽर्धेन व्यामिश्रो धर्म इष्यते B. C. E. and F. read द्वापरेऽर्धं स्वमाश्रितो धर्मरक्षणे; while D. and G. द्वापरेऽर्धे तु गमिते मामियो धर्मरक्षणे; and H. reads द्वापरेऽर्धन्तु नष्टो वै वृषो धर्मोऽवतिष्ठति. These two readings for the whole line. ४. A. reads तथा बृहस्पतिनापि for तथाच बृहस्पतिरपि I. omits च. ५. पादप्रतिष्ठो ऽधर्मः स्यात् is the reading of D. for पादः प्रविष्टो ऽधर्मस्य. ६. A. reads ऽधर्मस्थितिः पादैः &c., for ऽधर्मस्त्रिभिः पादैः.

'*आद्ये कृते तु यो धर्मः[1] स त्रेतायां प्रवर्त्तते।
द्वापरे व्याकुलीभूतः[2] प्रणश्यति कलौ युगे ॥
(लिं. पु. १. ३९. ७०. कू. पु. १. १.२८. ६७)

तिष्ये मायामसूयाञ्च वधञ्चैव तपस्विनाम्।
साधयन्ति नरास्तत्र तमसा व्याकुलेन्द्रियाः' ॥
(लिं. पु. १. ४०.१; कू. पु. १. १. २९. १.)

इति। विष्णुपुराणे ऽपि[3]—

'†वर्णाश्रमाचारवती प्रवृत्तिर्न कलौ नृणाम्।
न साम-यजु-ऋग्वर्गविनिष्पादनहेतुकी[4][5]' ॥
(वि. पु. ६. १. १०)

इति। आदित्यपुराणे ऽपि—

---

* आद्ये चतुर्षु युगेषु आदिभूते। नतु सृष्टिप्रवृत्तिकालीने।

† वर्णा ब्राह्मणादयः आश्रमा ब्रह्मचर्यादयः तेषां ये आचाराः 'शमो दमः' इत्यादिना वक्ष्यमाणाः तद्विशिष्टा लोकानां प्रवृत्तिः यतो न भवति कलौ अतः ऋक्-सामादिवेदाध्ययन-तदुक्तकर्मानुष्ठानादिकमपि न भवतीति तात्पर्यम्।

---

१. In Ling Purána and Kúrma Purána we find धर्मोऽस्ति for यो धर्मः. २. A. reads ऽप्याकुलीभूतः. In Ling Purána व्याकुलीभूत्वा and in Kúrma Purána व्याकूलीभूय. for व्याकुलीभूतः. ३. H. omits अपि. ४. For न साम-यजु-ऋग्वर्ग- B. C. and F. read नच सामर्ग्यजुर्वर्ग-; and H. reads न साम-ऋग्यजुर्वर्ग-. Weshnu Purána -ऋग्यजुर्वेद-. ५. A. and I. read -हेतुका: while B. and F. read -हैतुकी for हेतुकी.

'*यस्तु कार्त्तयुगो धर्मो न कर्त्तव्यः कलौ युगे ।
पापप्रसक्तास्तु यतः कलौ नार्यो नरास्तथा' ॥

इति । अतः कलौ प्राणिनां प्रयाससाध्ये धर्मे प्रवृत्त्य-सम्भवात् सुकरो धर्मोऽत्र बुभुत्सितः । स च द्विविधः । चतुर्णां वर्णानां साधारणोऽसाधारणश्च । तत्र साधारणो बृहस्पतिना निरूपितः—

'दया क्षमाऽनसूया च शौचानायासमङ्गलम् ।
अकार्पण्यास्पृहत्वे च सर्वसाधारणा इमे' ॥

इति । तथा विष्णुनाऽपि—

'क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः ।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया ॥
आत्मवत्त्वमलोभत्वं देवतानां च पूजनम् ।
अनभ्यसूया च तथा धर्मः सामान्य उच्यते' ॥

(वि. स्मृ. २. १६-१८

* युगान्तरधर्मः कलियुगे नानुष्ठातव्य इति दर्शयति यस्त्वित्यादिन कार्तयुगः कृतयुगे भवः । तत्र हेतुमाह । पापप्रसक्ता इति ।

१. A. E. G. H. and I. road कार्तयुगे. for कार्तयुगो. २. F and G. read नाहर्तव्य· for न कर्तव्यः. ३. All but A. read अकार्पण्य हस्त्वञ्च for अकार्पण्यास्पृहत्वे च. ४. B. C. and F. read सर्वसाधार च for सर्वसाधारणा इमे ; For the same D. सर्वसाधारणानि तु, and F and H. सर्वसाधारणो विधिः. ५. D. reads तीर्थानुशरणं for तीर्थानु ६. E. G. and H. read आत्मव्रतमलोभत्वम् for आत्मवत्त्वमलोभत्वम्. In text of Vishnu Smriti we find the whole line as follows:—अ लोभशून्यत्वं देव-ब्राह्मणपूजनम् ।

*असाधरणो[1] ऽपि बृहस्पतिना स्मर्यते—

'स्वाध्यायो ऽध्यापनं चापि[2] यजनं याजनं तथा[3]।
दानं प्रतिग्रहश्चापि षट्कर्माण्यग्रजन्मनः॥
इज्या ऽध्ययन-दाने[4] च प्रजानां परिपालनम्।
शस्त्रास्त्रधारणं सेवा कर्माणि[5] क्षत्रियस्य तु॥
स्वाध्यायो यजनं दानं[6] पशूनां पालनं तथा।
कुसीद-कृषि-वाणिज्यं वैश्यकर्माणि सप्त वै[7]॥
शौचं[8] ब्राह्मणशुश्रूषा सत्यमक्रोध[9] एव च।
शूद्रकर्म तथा मन्त्रो नमस्कारो †ऽस्य[10] नोदितः'॥

इति। गीतास्वपि भगवानाह—

---

* नारदेन तु साधारणधर्मः— 'त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति' इति त्रिंशल्लक्षणवानुक्तः। स तु श्रीमद्भागवते सप्तमस्कन्धे युधिष्ठिरनारदसंवादे द्रष्टव्यः।

† शूद्रस्य वैदिकमन्त्रानधिकारित्वात् तेन 'नमः' इत्याकारकमन्त्रेणैव सर्वाणि कर्माणि कर्तव्यानीति तात्पर्यम्।

---

१. A. and D. read असाधारणाः for असाधारणो substituting स्मर्यन्ते for स्मर्यते. २. D. and G. substitute वा- for चा-. ३. B. C. E. F. and H. read च तत्; and D. and G. च यत्, for तथा. ४. All but A. read दानं च for -दाने च. ५. D. reads धर्माणि for कर्माणि; the form धर्माणि common in the Vedic language but not in the ordinary one. D. has सत्यं for दानं. ७. H. has च; and I. reads तु for वै. ८. H. reads गो-ब्राह्मणानां शुश्रूषा for शौचं ब्राह्मणशुश्रूषा. ९. D. reads सत्यप्रियपरं वचः for सत्यमक्रोध एव च. १०. A. reads ऽप्यचोदित; and I. च चोदितः for ऽस्य नोदितः.

'*यस्तु कार्त्तयुगो धर्मो न कर्त्तव्यः कलौ युगे ।
पापप्रसक्तास्तु यतः कलौ नार्यो नरास्तथा' ॥

इति । अतः कलौ प्राणिनां प्रयाससाध्ये धर्मे प्रवृत्त्य-सम्भवात् सुकरो धर्मोऽत्र बुभुत्सितः । स च द्विविधः । चतुर्णां वर्णानां साधारणोऽसाधारणश्च । तत्र साधारणो बृहस्पतिना निरूपितः—

'दया क्षमाऽनसूया च शौचानायासमङ्गलम् ।
अकार्पण्यास्पृहत्वे च सर्वसाधारणा इमे' ॥

इति । तथा विष्णुनाऽपि—

'क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः ।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया ॥
आत्मवत्त्वमलोभत्वं देवतानां च पूजनम् ।
अनभ्यसूया च तथा धर्मः सामान्य उच्यते' ॥

(वि. स्मृ. २. १६-१७

* युगान्तरधर्मः कलियुगे नानुष्ठातव्य इति दर्शयति यस्त्वित्यादिना । कार्तयुगः कृतयुगे भवः । तत्र हेतुमाह । पापप्रसक्ता इति ।

१. A. E. G. H. and I. read कार्तयुगे. for कार्तयुगो. २. D. E. and G. read नाहर्तव्यः for न कर्तव्यः. ३. All but A. read अकार्पण्यास्पृहत्वञ्च for अकार्पण्यास्पृहत्वे च. ४. B. C. and F. read सर्वसाधारणानि च for सर्वसाधारणा इमे ; For the same D. सर्वसाधारणानि तु, and E. G. and H. सर्वसाधारणो विधिः. ५. D. reads तीर्थानुशरणं for तीर्थानुसरणं. ६. E. G. and H. read आत्मव्रतमलोभत्वम् for आत्मवत्त्वमलोभत्वम्. In the text of Vishnu Smriti we find the whole line as follows:—आर्जवं लोभशून्यत्वं देव-ब्राह्मणपूजनम् ।

*असाधरणो ऽपि बृहस्पतिना स्मर्यते–

'स्वाध्यायो ऽध्यापनं चापि यजनं याजनं तथा ।
दानं प्रतिग्रहश्चापि षट्कर्माण्यग्रजन्मनः ॥
इज्या ऽध्ययन-दाने च प्रजानां परिपालनम् ।
शस्त्रास्त्रधारणं सेवा कर्माणि क्षत्रियस्य तु ॥
स्वाध्यायो यजनं दानं पशूनां पालनं तथा ।
कुसीद-कृषि-वाणिज्यं वैश्यकर्माणि सप्त वै ॥
शौचं ब्राह्मणशुश्रूषा सत्यमक्रोध एव च ।
शूद्रकर्म तथा मन्त्रो नमस्कारो †ऽस्यं नोदितः' ॥

इति । गीतास्वपि भगवानाह–

---

* नारदेन तु साधारणधर्मः– 'त्रिंशलक्षणवान् राजन् सर्वात्मा येन तुष्यति' इति त्रिंशलक्षणवानुक्तः । स तु श्रीमद्भागवते सप्तमस्कन्धे युधिष्ठिरनारदसंवादे द्रष्टव्यः ।

† शूद्रस्य वैदिकमन्त्रानधिकारित्वात् तेन 'नमः' इत्याकारकमन्त्रेणैव सर्वाणि कर्माणि कर्तव्यानीति तात्पर्यम् ।

---

१. A. and D. read असाधारणाः for असाधारणो substituting स्मर्यन्ते for स्मर्यते. २. D. and G. substitute वा- for चा-. ३. B. C. E. F. and I. read च तत्; and D. and G. च यत्, for तथा. ४. All but A. read दानं च for -दाने च. ५. D. reads धर्माणि for कर्माणि; the form धर्माणि is common in the Vedic language but not in the ordinary one. ६. D. has सत्यं for दानं. ७. H. has च; and I. reads तु for वै. ८. H. reads गो-ब्राह्मणानां शुश्रूषा for शौचं ब्राह्मणशुश्रूषा. ९. D. reads सत्य-वापरं वचः for सत्यमक्रोध एव च. १०. A. reads ऽप्यचोदित; and I. स्य चोदितः for ऽस्य नोदितः.

'ब्राह्मण-क्षत्रिय-विशां शूद्राणां च परन्तप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥
शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं[१] कर्म स्वभावजम् ॥
कृषि-गोरक्ष-वाणिज्यं वैश्यकर्म स्वभावजम् ।
शौर्यं तेजो धृतिर्दाक्ष्यं[२] युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्' ॥

(भ. गी. १८. ४१-४४)

इति । एवं द्वैविध्ये सति साधारणो ऽस्मिन् श्लोके[३] पृच्छ्यते । 'किञ्चित्'-इति क्रियाविशेषणम् । तथा सति किमः[४] सङ्कोचवाचित्वात् संक्षेपेणेत्यर्थः सम्पद्यते[५] । युक्तञ्चैतत् । असाधारणधर्मप्रश्ने विस्तरात्[६] ॥ १६ ॥

अथ[७] असाधारणं धर्मं[८] पृच्छति-

---

१. D. and Bhagavad-gitâ read ब्रह्मकर्म for ब्राह्मं कर्म. But the former is the more general expression. २. E. and G. read धृति रक्षां and H. धृतीरक्षा for धृतिर्दाक्ष्यं. ३. A. reads कलौ for श्लोके, and D. E. G. and H. read लोके for the same. ४. B. reads कथनसंकोचेन वदति संक्षेपेण C. and F. read कथनसंकोचनेन वाचिवत् संक्षेपेण ; and D. E. G. and H. कथनसंकोचवाचित्वात् संक्षेपेण, for किमः संकोचवाचित्वात् संक्षेपेण. ५. B. C. D. and F. read सम्पद्येत for सम्पद्यते. ६. After विस्तरात् A. reads इति वक्ष्यमाणत्वादिति ; B. C. and F. विस्तरादितिनियमापातात्, E. G. and H. विस्तरादिति नियमापातात् and D. विस्तरादिति च नियमापातात्. ७. D. omits अथ. ८. All but A. read असाधारणधर्मं for असाधारणं धर्मं.

चतुर्णामपि वर्णानां कर्त्तव्यं धर्म[1]कोविदैः ॥ १७ ॥
ब्रूहि धर्मस्व[2]रूपञ्च सूक्ष्मं स्थूलं च विस्तरात् ॥

इति । धर्मस्वरूपे वादिविप्रतिपत्तेः तदीयविवेकस्य दुःशकत्वात् च[3] तत्र प्रावीण्यं विवक्षित्वा धर्मस्वरूपज्ञ इति सम्बोध्यते । तार्किकास्तावत् आत्मगुणौ धर्माधर्मौ—इत्याहुः—

'विहितक्रियया* साध्यो धर्म[4]ः पुंसो गुणो मतः ।
प्रतिषिद्धक्रियासाध्यः पुंगु[5]णोऽधर्म उच्यते ' ॥

इति । मीमांसकास्तु 'चोदनालक्षणोऽर्थो धर्मः' (पू. मी. १. १. २.) इत्यसूत्रयन् । तत्र भाट्टा[6] मन्यन्ते—

'द्रव्य-क्रिया-गुणादीनां धर्मत्वं[7] स्थापयिष्यते ।
तेषामैन्द्रियकत्वे† ऽपि न ताद्रूप्ये[8]ण धर्मता ॥
श्रेयःसाधनता ह्येषां नित्यं वेदात् प्रतीयते ।
ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः ' ॥
(तं. वा. १. १. २. १३–१४.)

---

* विहिता वेदेन विहिता या क्रिया तया साध्यः अर्थात् वेदोक्तकर्मणा प्राप्यः ।

† द्रव्यादीनां लक्षणानि न्याय-वैशेषिकभाष्यादौ द्रष्टव्यानि । चोनया प्रवृत्तानां कर्मणां श्रेयःसाधनत्वं 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुखं भवति ' इत्यादिवेदवाक्येभ्यः प्रतीयते ।

---

१. D. reads कर्मकोविदैः for धर्मकोविदैः. २. D. reads धर्मस्वरूपञ्च क्षेममूलञ्च for धर्मस्वरूपज्ञ सूक्ष्मं स्थूलञ्च. ३. D. omits च. ४. In A. धर्मः and पुंसः interchange their places. ५. B. C. and F. read सगुणो for पुंगुणो. ६. B. reads भट्टा for भाट्टा. ७. D. A. and MSS. of Tantra Vārtica read धर्मः स्थापक इष्यते for धर्मत्वं स्थापयिष्यते. ८. B. C. D. and F. read तद्रूपेण for ताद्रूप्येण.

इति । प्राभाकरास्तु कार्यनियोगापूर्वशब्दैरुच्यमानं धात्वर्थसाध्यं स्वर्गादिफलसाधनमात्मगुणं धर्ममाहुः । दुर्विवेच्यत्वं च महाभारते धृष्टद्युम्नेनोक्तम्–

'अधर्मो धर्म इति च व्यवसायो न शक्यते ।
कर्त्तुमस्मद्विधैर्ब्रह्मन् अतो न व्यवसाम्यहम्' ॥

(म. भा. आ. १९६. ११. १२)

इति । ईदृशस्यापि धर्मस्य स्वरूपमव्याकुलो जानातीत्यस्ति तत्र प्रावीण्यम् । धर्मस्वरूपं च विश्वामित्र आह–

*'यमार्याः क्रियमाणं तु शंसन्त्यागमवेदिनः ।
स धर्मो यं विगर्हन्ते तमधर्मं प्रचक्षते ॥
ईदृशस्य हि धर्मस्य स्वरूपं व्याकुलो न तु ।
जानातीत्यस्ति तत्रापि प्रावीण्यं धर्मशालिनाम्' ॥

इति । मनुरपि–

---

* आर्याः पूज्या विद्वांसः यं धर्ममिति शंसन्ति स धर्मः । यं निन्दन्ते स अधर्मः एतेन वेदप्रोक्तोऽपि आर्याऽनादृतो धर्मो न भवतीति स्पष्टं भवति ।

---

१. B. C. and F. read -शब्देन for -शब्दैः. २. All but A. and I. read दुर्विवेचकत्वं for दुर्विवेच्यत्वम्. ३. A. B. C. D. E. F. and I. substitute ततो for अतो. In the Mahâbhârat text in the first line we find वा for च; and in the second line ततोऽयं न व्यवस्यते. ४. For विगर्हन्ते D. reads गर्हयंते.

'विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं* निबोधत' ॥
(म. स्मृ. २. १.)

इति । नन्वेवं[1] धर्मस्वरूपमनिरूपितमेव[2] स्यात् । तथाहि[3] विश्वामित्र-मनुवाक्याभ्यां तावत् सामान्याकारः प्रतीयते । न तु द्रव्य-गुणादिरूपो[4] विशेषाकारः । वादिनस्त्वत्र विप्रतिपन्नाः—इति भवतैवोक्तम् । एतदेवाभिप्रेत्य[5] महाभारते राजधर्मे[6] स्मर्यते—

'न कल्माषो न कपिलो न कृष्णो न च[7] लोहितः ।
अणीयान् क्षुरधारायाः को धर्मं वक्तुमर्हति' ॥

इति । नैष दोषः[8] । उक्तवाक्ययोरधर्मव्यावृत्तस्याकारविशेषस्य स्फुटं प्रतीयमानत्वात् । वादिविप्रतिपत्तेश्च समाधातुं शक्यत्वात्[9] । स्वर्गादिसाधनस्य शास्त्रैकसमधिगम्यस्यातिशयस्य धर्मत्वेन[10] सर्वसम्प्रतिपत्तेः । स चातिशयो द्विविधः । द्रव्यादिनिष्ठः आत्मनिष्ठश्च । तत्रात्मनिष्ठस्यातिशयस्य साक्षात्

---

* राग-द्वेषरहितैः विद्वद्भिः वेदविद्भिः । सद्भिः धार्मिकैः । हृदयेन आभिमुख्येन श्रेयःसाधनत्वेन अभ्यनुज्ञातः एवंविधो यो धर्मः तं निबोधत इति योजना । एतेन— 'वेदप्रमाणकः श्रेयःसाधनं धर्मः' इति धर्मलक्षणं मनुराहेत्यवगन्तव्यम् । हारीतो ऽप्येवमेवाह—'श्रुतिप्रमाणको धर्मः' इति । एवं सति मीमांसकाभिमतस्य मन्वादिस्मृतिकाराभिमतस्य च धर्मलक्षणस्य न कश्चिद्भेद इति स्पष्टम् ।

---

१. D. reads तदेवं धर्मस्वरूपं निरूपितमेव for नन्वेवं धर्मस्वरूपमनिरूपितमेव. २. A. reads धर्मस्त्वनिरूपित- for धर्मस्वरूपमनिरूपित-. ३. A. omits हि. ४. D. omits -गुणादि-. ५. D. reads तदेव- for एतदेव-. ६. The same राजधर्मेषु for राजधर्मे. ७. A. has तु for च. ८. B. C. and F. read नैवोक्तदोषः for नैष दोषः. ९. All MSS. concur in reading शक्यते for शक्यत्वात्. १०. D. reads -समधिगम्यस्यापि विषयस्य धर्मत्वेन for -समधिगम्यस्यातिशयस्य धर्मत्वेन.

फलसाधनत्वात् फलनिष्पत्तिपर्यन्तं चिरकालमुपस्थानाच्च[१] तद्विवक्षया आत्मगुणोऽपूर्वशब्दवाच्यो धर्मः—इति तार्किक-प्राभाकरावाहतुः[२]। उक्तस्यापूर्वस्य[३] फलोत्पत्तिदशात्वमभिप्रेत्य[४] तत्साधनभूतो द्रव्याद्यतिशयो[५] धर्मः—इत्याहुर्भाट्टाः। ब्रह्मवादिनामप्येतदविरुद्धम्। 'व्यवहारे भट्टनयः' *इत्यभ्युपगमात्। एवं धर्मस्वरूपे निरूपिते सति[६] अव्याकुलत्वेन तदभिज्ञत्वं सम्भवति[७]।

चतुर्णां वर्णानां मध्ये धर्मकोविदैरसाधारणधर्माभिज्ञैः[८] कर्त्तव्यं विस्तरात् ब्रूहि। स च कर्त्तव्यो धर्मो द्विविधः। स्थूलः सूक्ष्मश्च। मन्दमतिभिरपि सुखेन बुध्यमानः शौचाचमनसन्ध्यावन्दनादिः स्थूलो धर्मः[९]। शास्त्रपारङ्गतैः[१०] पण्डितैरेव बोद्धुं योग्यः इतरेषामधर्मत्वभ्रान्तिविषयो द्रौपदीविवाहादिः सूक्ष्मो धर्मः। तथा च महाभारते[११]—द्रुपदः एकस्याः

---

* वेदान्तिनस्तु 'सर्वं खल्विदं ब्रह्म' इत्यादिवाक्येभ्यः आत्मज्ञानमेव परमं धर्मं वदन्ति। तथापि व्यवहारदशायां तस्यानुपयोगात् आत्मज्ञानसमकालमेव व्यवहारस्य लोपाभावाच्च 'व्यवहारे भट्टनयः' इति मीमांसकोक्तन्याय एव आदर्तव्य इत्याहुः।

---

१. B. C. and F. read -मन्त्रस्थानात् for -मुपस्थानात्. २. D. reads प्रभाकरा for प्राभाकरा-. ३. B. C. and F. prefix भाट्टास्तु to उक्तस्य; and omit the भाट्टा at the end of the sentence. ४. D. reads -दृश्यत्व- for -दशात्व-. ५. Except A. and I. all others read द्रव्यातिशयो for द्रव्याद्यतिशयं ६. All but A. read तस्य instead of सति. ७. A. reads भवति for संभवति ८. B. reads साधारणधर्मातिरिक्तं; while all others except A. and -रसाधारणधर्मातिरिक्तं for -रसाधारणधर्माभिज्ञैः. ९. Except B. C. and I all others read स्थूलधर्मः for स्थूलो धर्मः. १०. G. reads शास्त्रधर्मपारङ्गतैः for शास्त्रपारङ्गतैः. ११. All but H. omit महा-.

कन्यायाः[1] बहुपतित्वं लोक-वेदविरुद्धं मन्वानः अधिचिक्षेप[2]। तत्र लोकविरोधः स्फुट एव[3]। तिर्यक्ष्वपि एकस्यां[4] गवि वृषभ-द्वययुद्धदर्शनात्। वेदे ऽप्येवं[5] श्रूयते। 'एकस्य बह्वो जाया भवन्ति नैकस्यै[6] बहवः सह[7] पतयः' (तै. सं. ६. ५. ४) इति। 'यदेकस्मिन् यूपे द्वे रशने परिव्ययति तस्मादेको द्वे जाये विन्दते। यन्नैकां रशनां द्वयोर्यूपयोः परिव्ययति[8] तस्मान्नैका द्वौ पती विन्दते'- इति च[9]।

तत्र—

*'लोक-वेदविरुद्धो ऽयं धर्मो धर्मभृतां[10] वर'।
(म. भा. आ. १९५. २८.)

* लोकविरुद्धः लोकाचारविरुद्धः। वेदविरुद्धः 'एकस्य बह्वो' इत्यादिवेदवाक्यविरुद्धः। 'नैकस्यै बहवः सह पतयः' इत्यस्यां श्रुतौ 'सह' इत्यनेन युगपद्बहुपतित्वनिषेधो विहितः न तु समयभेदेन। अतो नैकस्मिन् समये पञ्च पतयो भवितुमर्हन्ति इति भावः। अत्र 'कर्तुमर्हसि कौन्तेय कस्मात्ते बुद्धिरीदृशी' इत्युत्तरार्द्धमनुसन्धेयम्।

१. A. and I. योषितः for कन्यायाः. २. A. reads आचचक्षे; and all the remaining MSS. except H. and I. read आचिक्षेप for अधिचिक्षेप. ३. All but A. add इति to एव. ४. All except A. read यथैकस्यां for तिर्यक्ष्वपि एकस्यां. ५. H. reads वेदे चैवं for वेदेऽप्येवं. ६. A. B. C. F. and I. read नैकस्या for नैकस्यै. ७. B. C. D. F. H. and I. omit सह; while A. and I. read स्युः for it. ८. H. reads उपव्ययति for परिव्ययति. ९. A. omits च. १०. A. reads धर्मवतां for धर्मभृतां; in all MSS. and printed copies both these lines are said to be the saying of युधिष्ठिर, but in the original Mahábhárut we find that the first line is addressed to युधिष्ठिर by द्रुपद; and reads as follows:—लोक-वेदविरुद्धं त्वं नाधर्मं धर्मविच्छुचिः। कर्तुमर्हसि कौन्तेय, &c. The second line is addressed to द्रुपद by युधिष्ठिर and reads as त्रिषो वयं गतिम्. This change of lines is evidently a mistake.

इति वदतः द्रुपदस्य भ्रान्तिनिवृत्तये युधिष्ठिर आह—

'सूक्ष्मो* धर्मो महाराज नास्य विद्मो गतिं वयम्' ॥

(म. भा. आ. १९६. २९.)

इति । धर्मत्वं च बहुपतित्वस्य तत्रैव बहुधा प्रपंचितम् । एवं धर्मव्याधोपाख्याने-विद्याऽभ्यासात् गरीयसी मातापितृशुश्रूषा । विनाऽप्यभ्यासं तच्छुश्रूषयैव तस्य ज्ञानोत्पत्तेः-इति प्रतिपाद्य सूक्ष्मत्वं धर्मस्य निगमितम्—

'बहुधा दृश्यते धर्मः सूक्ष्म एव द्विजोत्तम' ॥

(म. भा. व. २०६. ४२)

इति । इत्थं स्थूल-सूक्ष्मयोः सद्भावात् युक्तस्तदुभयविषयः प्रश्नः ॥ १७ ॥

उक्तप्रश्नस्य वक्ष्यमाणोत्तरस्य च असाङ्कर्यायोत्तरमवतारयति—

व्यासवाक्यावसाने तु मुनिमुख्यः पराशरः ॥ १८ ॥
धर्मस्य निर्णयं प्राह सूक्ष्मं स्थूलं च विस्तरात् ।

इति । मुनिमुख्य इति विशेषणेन सूक्ष्मनिर्णयकौशलं दर्शितम् । ननु-कस्यायं श्लोकः ? । न तावत् व्यासस्य ।

---

* अत्र 'पूर्वेषामानुपूर्व्येण यातं वर्त्मानुयामहे' इत्युत्तरार्धमनुसन्धेयम् । पूर्वेषां प्रचेतःप्रभृतीनाम् । तथा च प्रचेतसो नाम दश भ्रातरः एकस्मिन्नेव समये वार्क्षीं नामैकां कन्यामुपयेमिरे इति श्रीमद्भागवते चतुर्थस्कन्धे दृश्यते ।

---

१. H. J. (नंदपण्डित) reads विद्मो for विद्म. २. D. reads प्रश्न उक्तः प्रश्नस्य वक्ष्यमाणो-; and H. also has the same but only omits प्रश्नस्य ३. D. substitutes वा for च. ४. A. omits इति.

प्रश्नरूपत्वाभावात् । नापि पराशरस्य । उत्तररूपतायाः अभावात् । ननु—अत्यल्पमिदमुच्यते । आद्यश्लोके ऽपि चैव समानमिदं चोद्यम् । एवं तर्हि ईदृशेषु सर्वेषु परिहारो ऽन्वेष्टव्यः । उच्यते । पराशर एव भाविशिष्यबुद्धिसमाधानाय स्वकीयवृत्तान्तज्ञापकान् ईदृशश्लोकान् निर्ममे—इति द्रष्टव्यम् । भारतादौ व्यासवृत्तान्तश्लोकानां व्यासेनैव निर्मितत्वे सर्वसम्प्रतिपत्तेः ॥ १८ ॥

वक्ष्यमाणधर्मरहस्यग्रहणाय अप्रमत्तत्वं विधत्ते—

शृणु पुत्र प्रवक्ष्यामि शृण्वन्तु मुनयस्तथा ॥ १९ ॥

इति । तत्र मुनिसम्बोधनेनैव पुत्रस्य सम्बोधने सिद्धे ऽपि सम्प्रदायप्रवर्त्तकत्वेन विशेषतस्तत्सम्बोधनम् ॥ १९ ॥

धर्मे श्रद्धातिशयाय धर्मस्य प्रवाहरूपेण अनादितां वक्तुं स्मृतिशास्त्रस्य स्मर्तॄणां च सृष्टि-संहारौ संक्षिप्याह—

कल्पे कल्पे क्षयोत्पत्त्या ब्रह्म-विष्णु-महेश्वराः ।
श्रुति-स्मृति-सदाचारनिर्णेतारश्च सर्वदा ॥ २० ॥

इति । कल्प्यते जगदस्मिन् काले इति सृष्ट्यादिमारभ्य प्रलयोपक्रमपर्यन्तो जगदवच्छिन्नः कालः कल्पः । स च

---

१. B. C. and F. read प्रश्नरूपत्वस्याभावात्; and D. E. and G. प्रश्नरूपस्याऽभावात् for प्रश्नरूपत्वाभावात्. २. All but A. read उत्तररूपस्वाऽभावात् for उत्तररूपतायाः अभावात्. ३. A. D. and I. omit च. ४. D. reads -शिष्यबुद्धि समाधाय for -शिष्यबुद्धिसमाधानाय. ५. A. reads निर्मितत्वेन for निर्मितत्वे. ६. C. and F. read शास्त्रस्मर्तॄणां for शास्त्रस्य स्मर्तॄणां ७. A. and I. reads कर्तॄणां for स्मर्तॄणां. ८. Except A. J. and K. all others read क्षयोत्पत्तौ for -क्षयोत्पत्त्या; but B. has in its margin -त्त्या for -त्तौ. ९. A. reads -समाचार for -सदाचार-.

द्विविधः । महाकल्पो ऽवान्तरकल्पश्च । मूलप्रकृतेर्यः सर्गः तमारभ्य चतुर्मुखायुःपरिमितो महाकल्पः । चतुर्मुखस्य दिनमात्रमवान्तरकल्पः । तदुक्तं कूर्मपुराणे—

'ब्राह्ममेकमहः कल्पस्तावती रात्रिरुच्यते ।
चतुर्युगसहस्रं तत् कल्पमाहुर्मनीषिणः' ॥

इति । सो ऽयमवान्तरः कल्पः । महाकल्पस्तु ब्राह्मेण मानेन शतसंवत्सरपरिमितः इति पुराणादिषु प्रसिद्धम् । 'कल्पे कल्पे' -इति वीप्सया द्विविधानामपि कल्पानामसंख्यत्वं विवक्षितम् । तथा च लिङ्गपुराणे—

'एवं कल्पास्त्वसंख्याता ब्रह्मणो ऽव्यक्तजन्मनः ।
कोटिकोटिसहस्राणि कल्पानां मुनिसत्तमाः' ॥
(लिं. पु. १. ४. ४९.)

इति । तत्र द्वयोर्द्वयोः कल्पयोर्मध्ये क्षयो भवति । स च क्षयश्चतुर्विधः । नित्यो नैमित्तिकः प्राकृतिक आत्यन्तिकश्चेति । तदुक्तं कूर्मपुराणे—

'नित्यो नैमित्तिकश्चैव प्राकृतात्यन्तिकौ तथा ।
चतुर्धा ऽयं पुराणेषु प्रोच्यते प्रतिसञ्चरः* ॥

---

* प्रतिसञ्चरः प्रलयः । ब्रह्मणो दिवसानुरूपं निमित्तमनुरुध्य प्रवृत्तः नैमित्तिकः । महदादीनां प्रकृत्युद्भूतत्वात् तेषां यत्र लयो भवति स प्राकृतो लय इत्यभिधीयते । आत्मतत्त्वज्ञानेन जगन्मिथ्यात्वनिश्चये सर्व-

---

१. H. adds अत्र before मूल- and D. reads आमूल instead of मूल-. २. D. reads चतुर्मुखयुगपरिमितो for चतुर्मुखायुःपरिमितो. ३. A. omits अयं. ४. D. reads -मवतारकल्पः for. -मवान्तरः कल्पः. ५. H. reads प्रसिद्धः for प्रसिद्धम्. ६. D. reads वीप्सायां for वीप्सया. ७. Except H. all others read लिंगपुराणम् for लिंगपुराणे. ८. In Ling Purana we find कल्पास्तु संख्याता. ९. B. C. F. and H. omit कल्पयोः; while C. and F. omit also the second द्वयोः. १०. In Kúrma Purana we find पुराणे ऽस्मिन्.

योऽयं सन्दृश्यते नित्यं लोके भूतक्षयस्त्विह ।
नित्यः संकीर्त्यते नाम्ना मुनिभिः प्रतिसञ्चरः ॥
ब्राह्मो नैमित्तिको नाम कल्पान्ते यो भविष्यति[1] ।
महदादिविशेषान्तं[2] यदा संयाति संक्षयम् ॥
प्राकृतः प्रतिसर्गोऽयं प्रोच्यते कालचिन्तकैः ।
ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि ' ॥
(कू. पु. १. २. ४३. ८–९)

इति । तत्र प्राकृतः प्रलयः स्कन्दपुराणे सूतसंहितायामेवं निरूपितः—

' त्रिंशतैः षष्टिभिः कल्पैर्ब्रह्मणो वर्षमीरितम् ।
वर्षाणां यत् शतं तस्य तत्परार्धमिहोच्यते[3] ॥
ब्रह्मणोऽन्ते मुनिश्रेष्ठाः[4] मायायां लीयते जगत् ।
तथा विष्णुश्च रुद्रश्च प्रकृतौ विलयं गतौ ॥
ब्रह्मणश्च तथा विष्णोस्तथा रुद्रस्य सुव्रताः ।
मूर्तयो विविधास्तेषु कारणेषु लयं ययुः ॥
माया च प्रलये काले परस्मिन् परमेश्वरे ।
सत्य-बोध-सुखाऽनन्त-[5]ब्रह्म-रुद्रादिसंज्ञिते[6]' ॥
(सू. सं. १. ८. १४.–१८.)

स्यापि जगतः शुक्तिस्वरूपज्ञानसमकालमेव यथा तत्रारोपितस्य रजतस्य नाशः तद्वत् नाशो भवति स एव आत्यन्तिकः प्रलयः। अधिष्ठानज्ञानोत्तरं भ्रमस्यात्यन्तिकनाशात् अस्यात्यन्तिकप्रलयसंज्ञा ।

---

१. In the text of K. P. we find त्रैलोक्यस्यास्य कथितः प्रतिसर्गो मनीषिभिः after this line. २. In Kúrma Purana we find महदाद्यं. ३. A. reads तत्पराख्यमिहोच्यते ; and H. reads तन्महायुरिहोच्यते- for तत्परार्धमिहोच्यते; and in the text of Súta Sanhita we find द्वि- for the same. ४. J. (नन्दपण्डित) reads मुनिश्रेष्ठ for मुनिश्रेष्ठाः. ५. A. and I. read सुखानन्ते ब्रह्म- for सुखानन्त -ब्रह्म-. ६. E. G. and H. read -संहिते for -संज्ञिते.

इति । तथा च[1] कौर्मे ब्रह्म-विष्ण्वादिलयानन्तरं पञ्चभूतादिलयः पठ्यते—

'*संस्थितेष्वथ[2] देवेषु ब्रह्म-विष्णु-पिनाकिषु ।
गुणैरशेषैः पृथिवी विलयं याति वारिषु[3] ॥
तद्वारितत्त्वं[4] सगुणं ग्रसते हव्यवाहनः ।
तेजस्तु गुणसंयुक्तं[5] वायौ संयाति संक्षयम् ॥
आकाशे सगुणो वायुः प्रलयं याति विश्वभृत् ।
भूतादौ च तथाऽऽकाशो[6] लीयते गुणसंयुतः ॥
इन्द्रियाणि तु सर्वाणि तैजसे यान्ति संक्षयम् ।
वैकारिके देवगणाः प्रलयं यान्ति सत्तमाः ।
वैकारिकस्तैजसश्च भूतादिश्चेति सत्तमाः ॥
त्रिविधोऽयमहङ्कारो महति प्रलयं व्रजेत् ।
महान्तमेभिः सहितं प्रकृतिर्ग्रसते[7] द्विजाः ॥'

(कू. पु. १. २. ४४. १४–१९)

इति । एवं विष्णुपुराणादिषु प्राकृतप्रलयो[8] द्रष्टव्यः । एवमेव प्रलयमभिप्रेत्य भगवान् बादरायणः सूत्रयामास—'वि-

* संस्थितेषु स्वस्वकारणे लीनेषु । ब्रह्म-विष्णु-शिवाः रजः-सत्त्व-तमोपाधयः । ते स्वस्वगुण एव लीयन्ते । यदा भगवान् सिसृक्षुर्भवति तदा रजोगुणमाविश्य ब्रह्मरूपेण जगत्सृजति । एवं स्थित्यर्थं प्रलयार्थं च सत्त्वतमसी आविश्य विष्णु-शिवरूपेण जगत् पालयति नाशयति च । एवमेव प्रलये निर्गुणस्वरूपेणावतिष्ठन् गुणान् विसृजति तदा तदुपाधयः ब्रह्मादयः विलीयन्ते इति पौराणिकानामाशयः ।

१. A. C. E. F. G. and H. omit च ; D. reads कूर्मपुराणे for कौर्मे. and omits च. २. B. C. E. F. G. and H. read -ष्वेव for -ष्वथ; while D. -ष्वपि for the same. ३. D. reads वारिणि for वारिषु. ४. All except A. and I. read स वाततत्त्वं, for तद्वारितत्त्वं; and in Kúrma Purana we find स वारितत्त्वं. ५. In Kúrma Purana we find स्वगुणसंयुक्तं. ६. In Kúrma Purana this word is treated as neuter gender. ७. All except A. and I. read -र्ग्रसते for -र्ग्रसते. ८. Except H. and I. all others read -लयो for प्रलयो

पर्यायेण तु क्रमो ऽत उपपद्यते च' (शा. सू. २. ३. १४) इति। अतो ऽस्मात् सृष्टिक्रमात् विपर्ययेण प्रलयक्रमो ऽभ्युपगन्तव्यः। सृष्टिक्रमस्य तत्रत्येषु पूर्वसूत्रेषु विचारितत्वात 'अतः' शब्देन परामर्शः। उपपद्यते ह्ययं विपरीतक्रमः। उपादानकारणभूतायां मृद्यवस्थितायां कार्यस्य घटस्य विलीयमानत्वात्। यदि सृष्टिक्रम एव प्रलये ऽप्याश्रियेत तर्ह्यवस्थिते घटे मृद्विनाशः प्राप्नुयात्। न त्वेवं क्वचित् दृष्टम्। तस्मादुपपन्नो विपरीतक्रमः। तथा सति-सृष्टौ परमात्माद्यतद्देहान्तस्य क्रमस्य वक्ष्यमाणत्वात् प्रलये तद्विपर्ययेण अस्मद्देहादिपरमात्मान्तः क्रमो युक्तः। प्राकृतप्रलये प्रकृत्यन्तः क्रमो वक्तव्यः—इति चेत्। बाढम्। उच्यत एवासौ। परमात्मनः प्रकृतित्वात्। तथा च बह्वृचोपनिषदि परमात्मनो जगत्प्रकृतित्वं श्रूयते—'आत्मा* वा इदमेक एवाग्र आसीन्नान्यत् किञ्चन मिषत्। स ईक्षत लोकान्नुसृजा इति। स इमान् लोकानसृजत' (ऐ. उ. १. १.) इति।

* आप्नोतेः अत्तेः अततेः वा आत्मा परः सर्वज्ञः सर्वशक्तिः सर्वसंसारधर्मवर्जितः नित्य-शुद्ध-बुद्ध-मुक्तस्वभावः अजः अजरः अमरः अमृतः अभयः अद्वयो 'वा'। 'इदं' नाम-रूप-कर्मभेदाभिन्नं जगत्। 'अग्रे' सृष्टेः प्राक्। 'एक एव आसीत्'। 'नान्यत्किञ्चन' किञ्चिदपि 'मिषत्' निमिषत् व्यापारवत् इतरद्वा। मायायाः सत्त्वेऽपि तदानीं तस्या व्यापाराभावात् व्यापारवतो ऽन्यस्य निषेधः। 'स ईक्षत' इत्यादि सुगममन्यत्।

१. Except A. and I. all others read न चैवं for न त्वेवं. २. B. C. F. and G. read परमात्मादेरैतद्देहान्तस्य, and E. H. and I. परमात्मादेरस्मद्देहान्तस्य. ३. H. adds तु after प्रलये, while omitting तत्-. ४. B. C. and F. read अस्मादेहादिपरमात्मा- for अस्मद्देहादिपरमात्मा-.

ननु—श्वेताश्वतरोपनिषदि मायायाः प्रकृतित्वं परमात्मनस्तन्नियन्तृत्वं श्रूयते—

'मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्' ।

(श्वे. उ. ४. १०.)

इति । नायं दोषः । मायायाः परमात्मशक्तित्वेन शक्तिमतो ऽप्यात्मनः प्रकृतित्वावश्यम्भावात् । दहनशक्तियुक्ते ऽग्नौ दाहकत्व[1]व्यवहारदर्शनात् । आत्मशक्तित्वं च मायायास्तस्यामेवोपनिषदि श्रुतम्—

'ते ध्यानयोगानुगता अपश्यन्
देवात्मशक्तिं स्वगुणैर्निगूढाम्' ।

(श्वे. उ. १. ३.)

इति । बादरायणश्च प्रथमाध्यायोपान्त्याधिकरणे मायाविशिष्टस्य ब्रह्मणः प्रकृतित्वं निमित्तत्वं च—इत्युभयविधकारणत्वमुपपादयामास*। कुलालवत् चेतनत्वा[2]त् निमित्तत्वम्। घटे मृद इव स्वकार्ये[3] तस्यानुगमात् प्रकृतित्वम्। अनुगम्यते हि जगति मायाविशिष्टं ब्रह्म । तत्र सच्चिदानन्दत्वं ब्रह्मणो लक्षणम् । विकारित्वन्तु मायायाः । तदुभयमपि हि[4] जगत्यवेक्षामहे। 'घटोऽस्ति'—इति सद्रूपत्वम् । 'घटो भाति'[5]—इति चिद्रू-

* द्रष्टव्यमिदं 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (१. ४. २३.) इत्यादिषु सूत्रेषु शारीरभाष्ये ।

१. D. reads दाहकत्वेन for दाहकत्व-; while B. C. and F. दाहकत्वे for the same. २. Except A. E. G. and I. all others read चेतनत्वं for चेतनत्वात्. ३. A. and I. read कार्ये for स्वकार्ये. ४. All but A. and I. omit हि. ५. H. reads नास्ति for भाति.

पत्वम्। 'घटः प्रियः'—इत्यानन्दरूपत्वम् । 'घट उत्पद्यते विनश्यति च'—इति विकारित्वम् । अयमेवार्थः उत्तरतापनीये श्रूयते—'सच्चिदानन्दरूपमिदं सर्वं सद्धीदं सर्वं सत् सदिति । चिद्धीदं सर्वं काशते काशते च इत्यादि' । (नृसिं. उ. ता. ७.) तदेवमौपनिषदे मते ब्रह्मणो मूलप्रकृतित्वात् स्मृति-पुराणयोश्च श्रुत्यनुसारित्वात् ब्रह्मावशेषो जगद्विलयो ऽत्र विवक्षित इति अवगन्तव्यम् । वैशेषिकादिमतसिद्धस्तु लयो ऽस्माभिर्नात्र प्रपञ्च्यते । तस्य पुरुषबुद्धिरूपतर्कमूलत्वेन बुद्धिमद्भिः स्वयमेवोहितुं शक्यत्वात् ।

संप्रति श्रुत्यनुसारेणोत्पत्तिरभिधीयते* । सन्ति हि सृष्टिप्रतिपादिकाः बह्व्यः श्रुतयः । तत्र 'आत्मा वा इदमेक एवाग्र आसीत्'† (ऐ. उ. १.१) इत्यादि बह्वृचोपनिषद्वाक्यं पूर्वमुदाहृतम् । 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. उ. २. १. ३) इत्युपक्रम्य 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः'‡

* 'जगत' इति शेषो ऽत्रानुसन्धेयः ।

† व्याख्यातेयं श्रुतिः पूर्वम् ।

‡ 'तस्मात्' इत्यनेन मूलवाक्यसूत्रितं ब्रह्म परामृश्यते । 'एतस्मात्' इत्यनेन अनन्तरं 'सत्यं ज्ञानम्' इति यथा लक्षितं ब्रह्म ग्राह्यम् । तस्मादेतस्मात् ब्रह्मणः आत्मशब्दवाच्यात् आकाशः सम्भूतः समुत्पन्नः । आकाशो नाम शब्दगुणो ऽवकाशकरो मूर्तद्रव्याणाम् ।

१. A. reads इत्याद्यानन्दरूपत्वम् for इत्यानन्दरूपत्वम्. २. A. and I. omit सद्धीदं सर्वं and read सत् सदिति चित्तीत्थं सर्वं for सत् सदिति चिद्धीदं सर्वं. ३. B. C. D. F. and G. have only one काशते; and A. and I. प्रकाशते only. ४. A. स्मृत्यनुसारित्वात् for श्रुत्यनुसारित्वात्. ५. A. reads ब्रह्माद्यशेषो जगद्विलयो for ब्रह्मावशेषो जगद्विलयो. ६. All but A. and G. read -प्रसिद्धस्तु. ७. A. प्रलयो for लयो. ८. All except A. and D. read लयो ऽस्माभिः प्रपञ्च्यते omitting अत्र in the middle. ९. C. and F. omit संप्रति; while A. and I. substitute अथ for it.

(तै. उ. २. १. ७) इत्यादिकं तैत्तिरीय[1]वाक्यम् । 'सदेव सोम्येदमग्र आसीत्' (छां. उ. ६. २. १) इत्युपक्रम्य 'तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत' (छां. उ. ६. २. ३) इति छन्दोगवाक्यम् ।

'यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः
सहस्रशः प्रभवन्ते सरूपाः ।
तथाऽक्षराद्विविधाः[2] सोम्य भावाः
प्रजायन्ते तत्र चैवापि यन्ति' ॥

(मुं. उ. २. १. १)

इत्यथर्ववाक्यम् । 'तद्धेदं तर्ह्यव्याकृतमासीत्[*] । तन्नामरूपाभ्यामेव व्याक्रियत' (बृ. उ. १. ४. ७) इति वाजसनेयवाक्यम् ।

ननु—नैतेषु वाक्येषु सृष्टिर्व्यवस्थापयितुं शक्यते । विप्रतिपत्तेर्बहुलत्वात् । आत्म-ब्रह्म-सद्-क्षरा-ऽव्याकृतशब्दैर्वाच्यानि[3] वस्तूनि कारणतया श्रूयन्ते । न च एकस्य जगतो विलक्षणानि बहून्युपादानानि युक्तानि[4] । नैष दोषः । आत्मादिशब्दैरेकस्यैव

---

* व्याकृतस्य जगतः व्याकरणात् प्राक् या बीजावस्था तां निर्दिदिक्षुः श्रुति-स्मृति-पुराणेषु वृक्षरूपत्वेन प्रतिपादितोऽयं संसारवृक्षः इत्याह। तद्धेतदिति । 'तत्' बीजावस्थं जगत् प्रागुत्पत्तेः । भूतकालसम्बन्धित्वादव्याकृतभावितो जगतः सुखग्रहणार्थं ऐतिह्यप्रयोगो 'ह' शब्दः । तदेव इदं इदमेव च तत् अव्याकृतं आसीत् ।

---

१. A. and I. read तैत्तिरीयक- for तैत्तिरीय-. २. For विविधा सोम्य भावाः A. reads प्रवर्तन्ते हि भावाः. ३. D. omits the passage from वाच्यानि up to आत्मादिशब्दै-. ४. A. omits युक्तानि.

वस्तुनो ऽभिधीयमानत्वात्। आत्म-ब्रह्मशब्दयोस्तावदेकार्थत्वं स्पष्टम्। ब्रह्मवाक्यशेषे 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्युक्तत्वात्। सदात्मशब्दयोश्चैकार्थत्वं युक्तम्। आत्मशब्दस्य स्व-परवाचित्वात्। सत्तायाश्चौपनिषदैः* सर्व-स्वरूपत्वाभ्युपगमात्। अनुभूयते च सत्तायाः सर्वस्वरूप-त्वम्। नरविषाणादीनामपि ज्ञानजनकत्वस्वीकारेण सत्स्वरूप-त्वात्। अक्षरशब्दश्च 'अश्नुतः'–इति वा 'न क्षरति'–इति वा परमात्मानमाचष्टे। अव्याकृतशब्दो ऽपि तस्मिन् योजयितुं शक्यते। वि-स्पष्टं आ-समन्तात् कृतम्– इति व्युत्पत्त्या जगतः प्रतीतियोग्यस्थूलत्वदशा व्याकृतम्। 'न व्याकृतम्'– इति अव्याकृतशब्दः सूक्ष्मत्वदशामाह। एकस्यैव वस्तुनः स्थूल-सूक्ष्मदशे जगद्ब्रह्मशब्दाभ्यामुच्येते। विवर्त्तवादिभिः† अखण्डैकरसस्य ब्रह्मणो जगद्रूपेण प्रतिभासाभ्युपगमात्। तस्मात् अव्याकृतब्रह्मादीनां पञ्चानां शब्दानां एक एवार्थः।

* उपनिषत्प्रमाणका औपनिषदाः वेदान्तिन इत्यर्थः।

† विवर्तो नाम अन्यस्यान्यरूपेण प्रतिभासनम्। अस्मिन् विवर्तवादे अधिष्ठानस्य विवर्तरूपेण प्रतिभासनं नतु तद्रूपत्वप्राप्तिः। यथा शुक्तेः रजतरूपेण प्रतिभासनं न तु रजतरूपता। एवं ब्रह्म जगदाकारेण प्रति-भासते नतु तदन्यथाभावः। परिणामवादे तु जगद्रूपेण ब्रह्मणः परिणम-नम्। तत्तु नेष्टम्। आरम्भवादस्तु वैशेषिकाद्यनुमतः मूलप्रमाणाभावा-दुपेक्षितः।

१. A. and I. read -ैकार्थ्यं for -ैकार्थत्वं. २. Except A. and I. all others ake only तस्माद्वा एतस्मादात्मनः. ३. A. D. E. G. H. and I. read -जनक-त्वाकारेण for -जनकत्वस्वीकारेण. ४. A. omits न व्याकृतम्. ५. D. omits एव. ६. E. G. and H. omit वस्तुनः, but read a च in its place. ७. B. C. D. F. and H. read विवर्त्तनादिभिः for विवर्त्तवादिभिः. ८. B. C. D. and E. read अव्याकृतान्तानामात्मादीनां पञ्चानां for अव्याकृतब्रह्मादीनां पञ्चानां.

ननु—क्वचित्[1] असतो[2] जगत्कारणत्वं श्रूयते। 'असद्वा इदमग्र आसीत् ततो वै सदजायत' (तै. उ. २. ७. १. २) इति। नैवम्। तत्र सत्-असत् शब्दाभ्यां व्याकृताव्याकृतयोरभिधानात्। श्रुत्यन्तरे—'कथमसतः सज्जायेत'[3] (छां. उ. ६. २. २) इति शून्यस्य[4] कारणताप्रतिषेधात्।

ननु[5]—प्रतीयमानजगदाकाररहितं शून्यादपि[6] विलक्षणं चेत् ब्रह्म तर्हि तत् कीदृशं बुद्धावारोपयितव्यम्[7]?—इति चेत्। त्वयेदानीं[8] प्रष्टुं यादृशमनूदितं[9] तादृशमेव तदिति बुद्धिं समाधत्स्व। दृष्टान्तं चेत् पृच्छसि[10] न वयं वक्तुं शक्नुमः। तत्समस्य वस्त्वन्तरस्याभावात्। तथा च श्रुतिः—

'न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते'।
(श्वे. उ. ६. ८)

इति। यदि शिष्यव्युत्पादनाय दृष्टान्ताभासो[11] ऽपेक्षितः तर्हि अद्वैताकारे सुषुप्तिर्निदर्शनम्[12]। पुरुषार्थस्वरूपत्वे च[13] विषयानन्दो निदर्शनीयः। 'आनन्दो ब्रह्मेति व्यजानात्'[14] (तै. उ. ३. ५. १)। 'विज्ञानमानन्दं ब्रह्म' (बृ. उ. ३. ९. २८)

---

१. Except A. H. and I. all omit क्वचित्. २. For असतो, A. H. and I. read शून्यस्य; D. अविकृतस्य; while E. and G. विकृत्यन्यस्य. ३. D. H. and I. read -ज्जायत for -ज्जायेत. ४. We read with H. and I.; while all others read शून्यकारणता for शून्यस्य कारणता. ५. A. and D. omit ननु. ६. A. omits अपि. ७. A. reads बुध्याशयारोपयितव्यम् for बुद्धावारोपयितव्यम्. ८. A. and I. omit त्वया. ९. D. read यादृशमुदितं for यादृशमनूदितं. १०. D. and G. have पृच्छति instead of पृच्छसि. ११. A. has दृष्टान्ताभ्यासो for दृष्टान्ताभासो. १२. D. H. and I. सुषुप्तिनिदर्शनम् for सुषुप्तिर्निदर्शनम्. १३. D. reads -त्वेऽत्र for -त्वे च; while A. omits altogether. १४. After व्यजानात् A. and I. put in an इति before विज्ञान

इत्यादिश्रुतेः। अशेषशङ्कानिवृत्त्यपेक्षा चेत् ब्रह्ममीमांसां पठ इत्यलमतिविस्तरेण।

यावन्तं कालमभिव्यक्तजगदाकारोपेतं ब्रह्म पूर्वमासीत् तावन्तमेव कालमनभिव्यक्तिदशायामवस्थाय पश्चादभिव्यक्तौ[1] प्रयतते। ननु—महाप्रलये कालो वा तदियत्ता[2] वा कथं घटते?। उच्यते। कं प्रत्येतच्चोद्यम्?। न तावत् ब्रह्मवादिनं प्रति। तन्मते वियदाद्यनन्तभेदभिन्न[3]जगत्प्रतीतिं कल्पयन्त्या मायायाः कश्चिन्महाप्रलयः एतावत्[4]कालपरिमित आसीत्— इत्येवंविधप्रतीतिमात्रकल्पने को भारः?। परमाणुवादे ऽप्यस्त्येव नित्यः कालः। प्रधानवादे पञ्चविंशतितत्त्वेभ्यो बहिर्भूतस्य कालतत्त्वस्याभावात् प्रधानमेव कालशब्देन व्यवह्रियताम्। अतः प्रलयकालावसाने परमेश्वरः सृष्टिं कामयते। तथा च श्रुतयः—'कामस्तदग्रे समवर्त्तताधि' (नृ. पू. १. १) 'सो ऽकामयत। बहु स्यां प्रजायेय' (तै. उ. २. ६. १) इति। 'तदैक्षत बहुस्यां प्रजायेय इति'। (छां. उ. ६.२.३) 'स ईक्षां चक्रे' (प्र. उ. ६. ३) इत्याद्याः[5]।

ननु—कामो नाम मनोवृत्तिविशेषः, । 'कामः सङ्कल्पो विचिकित्सा श्रद्धा ऽश्रद्धा धृतिरधृतिः ह्रीर्धीर्भीरित्येतत् सर्वं मन एव' (श्वे. उ. १. ५. ३; मै. उ. ६. ३०) इति श्रुतेः। मनश्च भौतिकम्। 'अन्नमयं हि सौम्य मनः' (छां. उ. ६.-५. ४) इति श्रुतेः। तथा सति[6] भूतोत्पत्तेः पूर्वमविद्यमाने

१. A. reads अभिव्यक्त्यै for अभिव्यक्तौ. २. H. reads तदायत्ता for तदियत्ता. ३. A. and I. drop -भिन्न-. ४. E. G. and H. read तावत्- instead of एतावत्-. ५. A. and I. read इत्यादि for इत्याद्याः. ६. All but A. and I. read च for सति.

मनसि कुतः कामः? । उच्यते । न तावत् सर्ग[1]समये चोद्य-मिदमुदेति । तन्मनसो भौतिकत्वाभावात् । नित्यायाः ईश्वरेच्छायाः मनोऽनपेक्षत्वाच्च । सिसृक्षात्वं तु सर्गोपहितत्वाकारेण नित्येच्छायामुपपद्यते । औपनिषदे मते तु[2] जीवेच्छायाः भौतिकमनःकार्यत्वेऽपि[3] ईश्वरेच्छायाः मायापरिणामरूपत्वात्[4] न मनसोऽपेक्षाऽस्ति[5] । अन्तरेणापि देहेन्द्रियाणि अशेषव्यवहारशक्तिरचिन्त्या परमेश्वरस्य श्रुतिष्ववगम्यते—

'*न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते ।
पराऽस्य शक्तिर्विविधैव[6] श्रूयते
स्वाभाविकी ज्ञान-बलक्रिया च' ॥

(श्वे. उ. ६. ८)

इति ।

'अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः' ।

(श्वे. उ. ३. १९)

---

* तस्येश्वरस्य कार्यं शरीरम् । करणम् चक्षुरादिसाधनम् । तस्य स्वभावसिद्धा ज्ञानक्रिया बलक्रिया च शक्तिः श्रूयते । सर्वविषयज्ञानप्रवृत्तिः ज्ञानक्रिया । स्वसन्निधिमात्रेण सर्वं वशीकृत्य नियमनं बलक्रिया ।

---

१. Except A. and I. all others substitute तर्क for सर्ग. २. All except A. and I. omit तु. ३. E. G. and H. omit अपि, and D. reads -कार्यत्वेन for -कार्यत्वेऽपि; while H. reads -कार्यत्वं for the same. ४. B. and F. -रूपत्वेन, and C. -रूपत्वे for -रूपत्वात्. ५. A. D. and I. read मनोऽपेक्षा for मनसोऽपेक्षा. ६. C. D. E. F. G. and H. read परस्य शक्तिः for परास्य शक्तिः.

इति च। एवं च सति–असङ्गस्य कथमुत्पादकत्वम्? उत्प-
त्स्यमानानि वा वियदादीनि योग्यसामग्रीमन्तरेण कथमुत्पद्ये-
रन्?–इत्यादीनि चोद्यान्यनवकाशानि। अचिंत्यशक्त्यैव
अशेषचोद्यानां दत्तोत्तरत्वात्। तस्मात् यथाश्रुति निःशङ्कैः
सृष्टिरभ्युपेतव्या। श्रुतिश्चैवमाह– 'तस्माद्वा एतस्मादात्मन
आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः।
अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात्
पुरुषः' (तै. उ. २.१.७–१४) इति। तत्र पुरुषशब्देन शिरः-
पाण्याद्याकृतियुक्तो देहोऽभिधीयते। स च देहो ब्रह्मादिः स्त-
म्बान्तो बहुप्रकारः। तत्र ब्रह्मदेहस्य निरतिशयपुण्यपुञ्जफल-
रूपत्वात् इतरसकलदेहकारणत्वेन अनादित्वम्। तथा च–

'हिरण्यगर्भः समवर्त्तताग्रे
भूतस्य जातः पतिरेक आसीत्'।
(ऋ.सं. ८.७.३.१; तै.सं.४.१.८)

इति श्रुतिः।

'ब्रह्मा देवानां प्रथमः सम्बभूव।
विश्वस्य कर्त्ता भुवनस्य गोप्ता'।
(मुं. उ. १. १)

---

१. D. and H. read -मुत्पद्यन्ते, G. -मुत्पाद्यन्ते for -मुत्पद्येरन्; B. C. and F. -मुत्पाद्येरन् for the same. After कथमुत्पद्यन्ते (the reading of H.) the same puts in a new sentence तत्र। and then proceeds with इत्यादीनि. २. D. omits अनवकाशानि. ३. A. substitutes अनन्त- for अचिन्त्य-. ४. -द्याकार- is the reading of A. instead of -द्याकृति- of all others. ५. A. and D. read -करणत्वेन. for -कारणत्वेन. ६. After तथा च A. adds श्रुतिः; and B. C. D. F. H. and I. add श्रुति-स्मृती. ७. A. omits श्रुतिः.

इति च ।

> ‘*स वै शरीरी प्रथमः स वै पुरुष उच्यते ।
> आदिकर्त्ता स भूतानां ब्रह्मा ऽग्रे समवर्त्तत’ ॥
> (कू. पु. १. ९. ३८; वा. पु. १. ४. ६८–६९.)

इति स्मृतिः ।

एतेन विष्णु-महेश्वरदेहयोरप्यादित्वं व्याख्यातम् । एकेनैव चेतनेन गुणत्रयव्यवस्थायै देहत्रयस्य स्वीकृतत्वात् । तथा च मैत्रशाखायां श्रूयते–

> ‘तस्य प्रोक्ता अग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुरिति । अथ यो ह खलु वा वाऽस्य राजसो ऽंशो ऽसौ स यो ऽयं ब्रह्मा । अथ ह खलु वा वाऽस्य तामसो ऽंशो ऽसौ स यो ऽयं रुद्रः । अथ यो ह खलु वा वाऽस्य सात्त्विकोंऽशो ऽसौ स यो ऽयं विष्णुः । स वा एष एकस्त्रिधा भूतः ।’ (मै. उ. ५. २)

* नायं श्लोकः उपलब्धस्मृतिपुस्तकेषु कुत्राप्युपलभ्यते । केषु चित् निबन्धेषु मनुनाम्ना ऽयं सङ्गृहीतः परं सम्प्रत्युपलब्धपुस्तकेषु नोपलभ्यते । अद्वैतब्रह्मसिद्धौ चतुर्थे मुद्गरप्रहारे ऽप्ययं श्लोक उदाहृतः । न तत्र मनोर्नाम । प्रथमः शरीरी निर्गुणपरमेश्वरस्य प्रथमं सगुणं रूपमित्यर्थः ।

१. A. reads only विष्णु-महेश्वरयो- omitting -देहयो-; C. and F. substitute -देवयोः for -देहयोः. २. B. C. and F. read चैतन्येन for चेतनेन. ३. A. and H. in its correction on the margin read मैत्रेय- for मैत्र-. ४. In A. the words विष्णु and रुद्र interchange their places. ५. A. and I. read ह before यो and insert an additional वै after यो. ६.—७. A. and I. replace the each अथ in the beginning of both the lines by यथा. ८. Except A. D. H. and I. all others read भुवः for भूतः.

इति । तथोत्तरतापिनीये मायां प्रकृत्य श्रूयते—

'सैषा चित्रा सुदृढा बह्वङ्कुरा स्वयं
गुणभिन्नांकुरेष्वपि गुणभिन्ना सर्वत्र
ब्रह्म-विष्णु-शिवरूपिणी चैतन्यदीप्ता ।
तस्मादात्मन एव त्रैविध्यं सर्वत्र'

(नृ. उ. ९)

इति । स्कन्दपुराणेऽपि—

'एक एव शिवः* साक्षात् सृष्टि-स्थित्यन्तसिद्धये ।
ब्रह्म-विष्णु-शिवाख्याभिः कलनाभिर्विजृम्भितः' ॥

इति । तदेवं ब्रह्म-विष्णु-महेश्वराः तस्मिन् महाकल्पावसाने
ीयन्ते । पुनस्तत्तन्महाकल्पादावुत्पद्यन्ते इति सिद्धम् ।

अक्षरार्थस्तु—क्षयसहिता उत्पत्तिः क्षयोत्पत्तिः तयोपल-
ाता भवन्ति—इति । एवं तत्तदवान्तरकल्पानामवसाने
रम्भे च श्रुत्यादीनां निर्णेतारः क्षयोत्पत्तिभ्यामुपलक्ष्यन्ते ।
त्र श्रुतिनिर्णेतारः—वेदविभागकारी व्यासः, तत्तद्वेदशाखा-
म्प्रदायप्रवर्त्तकाः कठ-कौथुमादयः, कल्पसूत्रकाराः बौधाय-

---

* शिवः परमात्मा । 'शिवं शान्त'मिति श्रुतेः । स एक एव सन्
ष्ट्यादिसिद्धये मायागुणानाश्रित्य ब्रह्मादिरूपैः प्रकाशते ।

---

१. B. C. D. and F. यथोत्तर- for तथोत्तर-. २. D. and G. read
त्यदीप्ता. ३. A. reads -विजृम्भते for -विजृम्भितः. ४. A. reads स्वस्मिन
तस्मिन्. ५. D. and I. eliminate -कल्प. ६. For -तत्तन्महाकल्पादौ A.
d I. read only -तत्कल्पादौ ; and B. C. D. F. and H. read तत्र महा-
ल्पादौ. ७. A. omits क्षयोत्पत्तिः. ८. A. reads वेदविभागकरो for वेद-
भागकारी. ९. A. and I. omit one तत्. १०. D. and F. read काठ- for
–. ११. Except D. and G. all others read बोधायना for बौधायना .

नाश्वलायनापस्तम्बादयः, मीमांसासूत्रकृतो जैमिन्यादयश्च। स्मृतिनिर्णेतारो मन्वादयः प्रसिद्धाः। तत्र पैठीनसिः-

'तेषां मन्वङ्गिरोव्यास-गौतमात्र्युशनो-यमाः।
वशिष्ठ-दक्ष-संवर्त्त-शातातप-पराशराः॥
विष्णवापस्तम्ब-हारीताः शङ्खः कात्यायनो भृगुः।
प्रचेता नारदो योगी बौधायन-पितामहौ॥
सुमन्तुः कश्यपो बभ्रुः पैठीनो व्यास एव च।
सत्यव्रतो भरद्वाजो गार्ग्यः कार्ष्णाजिनिस्तथा॥
जाबालिर्जमदग्निश्च लौगाक्षिर्ब्रह्मसम्भवः।
इति धर्मप्रणेतारः* षट्त्रिंशदृषयस्तथा'॥

ननु-किमियं परिसंख्या?। नैवम्। तथा सति वत्स-मरीचि-देवल-पारस्कर-पुलस्त्य-पुलह-क्रतु-ऋष्यशृङ्ग-लिखित-छागलेया-ऽऽत्रेयादीनां धर्मशास्त्रप्रणेतृत्वं न स्यात्। आश्वमेधिके पर्वण्यपि तत्तन्मुनिप्रोक्तधर्मानुक्रमणात् धर्मशास्त्रकर्त्तारोऽवगम्यन्ते। 'श्रुता मे मानवा धर्माः'-इत्युपक्रम्य एवं पठ्यते-

* 'धर्मप्रणेतारः' धर्मशास्त्रकर्तार इति यावत्। धर्मप्रणेतृसंख्या विभिन्नासु स्मृतिषु पुराणादिषु च विभिन्नैव दृश्यते। क्वचिदष्टादश क्वचित् विंशतिरेवं क्वचिदधिका क्वचिन्न्यूना च दृश्यते सा च पूर्वमुपोद्घाते विस्तरेण प्रदर्शितेत्यत्र संक्षेपः।

१. A. B. C. F. G. and I. read बोधायन- for बौधायन-. २. C. substitutes पैङ्गिनो for पैठीनो. ३. For व्यास A. and I. read व्याघ्र. ४. D. reads -कार्ष्णायनि- instead of कार्ष्णाजिनि-. ५. A. and I. have लोकाक्षि- in the place of लौगाक्षि-; the former is not heard of. ६. A. omits -क्रतु-. ७. After आश्वमेधिके पर्वण्यपि D. adds -एते. ८. A. and I. drop ऽव. ९. A. reads इत्यनुक्रम्य for इत्युपक्रम्य.

[1]औमा[1]माहेश्वराश्चैव नन्दिधर्माश्च पावनाः।
ब्रह्मणा कथिताश्चैव कौमाराश्च श्रुता मया[2]॥ (१७)
धूम्रायनकृता[3] धर्माः काण्वा[4] वैश्वानरा[5] अपि।
भार्गवा याज्ञवल्क्याश्च मार्कण्डेयाश्च[6] कौशिकाः॥(१८)
भरद्वाजकृता ये च बृहस्पतिकृताश्च ये।
कुणेश्च कुणिबाहोश्च[7] विश्वामित्रकृताश्च ये॥ (१९)
सुमन्तु-जैमिनिकृताः शाकुनेयास्तथैव च।
पुलस्त्य-पुलहोद्गीताः पावकीयास्तथैव[8] च॥ (२०)
अगस्त्यगीताः सौधन्याः[9] शाण्डिल्याः सौलभायनाः[10]।
वालखिल्यकृता ये च ये च सप्तर्षिभिः कृताः[11]॥ (२१)

---

१. The author quotes this from Âśvamedhika Parva, but though we searched three different editions of that Parva, we have not found it. This and the subsequent quotations which the author says to have been quoted from the said Parva belong to Vriddha Gautama Smriti. The above mentioned Smriti contains a conversation between Yudhishthira and Krishna. Therefore we call the said Smriti the text of these quotations. Before this verse the text inserts the following three lines:-

श्रुता मे मानवा धर्मा वासिष्ठाः काश्यपास्तथा॥ (१५)
गार्गेया गौतमीयाश्च तथा बोपालितस्य च।
पराशरकृताः पूर्वमात्रेयस्य च धर्मतः॥ (१६).

All except A. and I. substitute उमा- for औमा-. २. D. reads मम for मया. ३. B. C. E. F. and G. read धूम्रायवकृताः for धूम्रायनकृताः. ४. A. reads कण्वा, B. C. and F. काथा and E. G. काठा; while H. reads काव्या all for काण्वाः. ५. D. and G. substitute वैखानसा for वैश्वानरा. ६. The text reads माण्डव्याः कौशिकास्तथा. ७. B. C. E. F. G. and H. read कुणितहेश्च for कुणिबाहोश्च; while D. has कुणिनाहेश्च. ८. The text reads पाराशर्याः, A. reads पावनीयाः for पावकीयाः, but we do not think that it ever was the name of any ऋषि or देवता. ९. A. I. and the text substitute मौद्गल्याः for सौधन्याः. १०. B. C. and F. read शौल्यभाजनाः, D. शौल्वभाजनाः, E. reads शौलभाञ्जनाः, G. शैलभञ्जनाः and H. शौलभञ्जनाः all for सौलभायनाः. ११. The text inserts the following lines:—

आपस्तम्बकृता धर्माः शङ्खस्य लिखितस्य च।
प्राजापत्यास्तथा याम्या माहेन्द्राश्च श्रुता मया॥ (२२).

†

वैयाघ्रा व्यासगीताश्च विभाण्डककृताश्च [१]ये [२]।
तथा विदुरवाक्यानि भृगोरङ्गिरसस्तथा [३]।
वैशम्पायनगीताश्च ये चान्ये एवमादयः'।(२६) [४]
इति । 'सदाचारः' [५] होलिकोद्वृषभयज्ञाह्निनैवुकादिः [६]।

---

१. A. and I. read विभण्डक- for विभाण्डक-; while all others read वितण्डक- for the same. २. After this line there appears the following line in the text—

नारदीयकृता धर्माः कापोताश्च श्रुता मया ॥ (२३)

३. After this line the text inserts—

क्रौञ्च-मातङ्गगीताश्च वत्स-हारीतकास्तथा ॥ (२४)
पिङ्गवर्मकृताः काश्याः ये च वा वसुपालिताः ।
उद्दालककृता धर्मास्तथा औशनसाः पुनः ॥ (२५)

४. The following Slokas we find in Vishṇu Dharmottara, Vol. I., Chap. 146, Ślokas 36-42 both inclusive. Here also we find a conversation between Yudhishṭhira and Krishṇa. The Ślokas are as follows:—

श्रुता मे मानवा धर्मा वासिष्ठा वा महाफला ।
पराशरकृताश्चैव तथाऽऽत्रेयस्य धीमतः ॥
ऋष्यशृङ्गस्य गार्ग्यस्य लिखितस्य यमस्य च ।
जाबालेश्च महाबाहो मुनेर्द्वैपायनस्य च ॥
औमामहेश्वराश्चैव जातिधर्माश्च पावनाः ।
कुणेश्च कुणिबाहोश्च काश्यपेयास्तथैव च ॥
बह्वावनकृताश्चैव शाकुनेयास्तथैव च ॥
अगस्त्यगीता मौद्गल्याः शाण्डिल्याः सौरभास्तथा ॥
भृगोरङ्गिरसश्चैव कश्यपोद्दालकोदिताः ।
सौमन्ता जैमिनीयाश्च पुलस्त्यस्य महात्मनः ॥
वैशम्पायनगीताश्च पिप्पलादकृताश्च ये ।
ऐन्द्राश्च वारुणाश्चैव कौबेरा वात्स्य-शौनकाः ॥
आपस्तम्बकृता धर्मास्तथा गोपालकस्य च ।
भृग्वङ्गिरःकृताश्चैव सौरा हारीतकास्तथा ॥.

५. A. reads समाचारः for सदाचारः. ६. A. reads the following :— लोके वृषभयज्ञाश्विनैर्कतादिः तस्य in the place of होलिकोद्वृषभयज्ञाह्निनैवुकादिः while the sentence is altogether omitted by B. C. and F., but in the margin of B. सदाचारस्य precedes तस्य. At the beginning of the following sentence, E. H. and I. read होलाका- for होलिको- and G. झलाको- for the same.

तस्य निर्णेतारस्तत्तत्कुलवृद्धाः। चकारः उक्तानुक्तसमुच्चयार्थः। उक्ताः मन्वादयो ब्रह्मादयश्च स्मृतिशास्त्रकर्त्तारः। अनुक्तस्तु धर्मः। तस्यापि पूर्वकल्पान्ते क्षीणस्योत्तरकल्पादौ सृष्टिर्भवति। तथा च वाजसनेयि-ब्राह्मणे सृष्टिप्रकरणे प्रजापति-मन्वोर्मनुष्यादि-पिपीलिकान्तप्राणिनां चतुर्वर्णाभिमानिदेवतानाञ्च सृष्टिमाम्नाय अत्युग्रमपि क्षत्रियादिकं नियन्तुं समर्थस्य धर्मस्य सृष्टिराम्नायते—

'स नैव व्यभवत्।
तत् श्रेयोरूपमत्यसृजत धर्मम्।
तदेतत् क्षत्रस्य क्षत्रं यद्धर्मः।
तस्मात् धर्मात् परं नास्ति'।

(बृ. उ. १. ४. १४.)

इति। अस्यायमर्थः। स प्रजापति-मन्वादिरूपधारी जगत्स्रष्टा परमेश्वरः प्रजाः सृष्ट्वा ऽपि तन्नियामकाभावात् कृतकृत्यतारूपं विभवं नैव प्राप्तवान्। ततो विचार्य नियामकत्वेन श्रेष्ठं धर्ममतिशयेनासृजत् इति। अहो महदिदं धर्मस्य सामर्थ्यम्। यत् क्षत्रियादिरुग्रो मारणे समर्थो ऽपि धर्माद्भीतः करप्रदानाद्यनुपयोगिनं याचकं विप्रादिकं न मारयति। प्रत्युत तस्मै धनं ददाति। भटाश्चातिशूराः धनुः-खड्गादिधारिणो

१ D. substitutes तत्र for तत्तत्-. २. A. H. and I. read वाजसनेय- for वाजसनेयि-. ३. A. and I. read प्रजापतिर्मनुष्या-. ४. H. drops -अपि. ५. All except A. and I. read समस्तस्य for समर्थस्य. ६. A. and I. omit धर्मात्. ७. E. G. and H. omit जगत्-. ८. D. reads प्राप्नुयात् for प्राप्तवान्. ९. A. and I. read -मतिशयेना- for -मतिशयेना-. १०. A. substitutes ताडयति for मारयति.

धिकरणे तदेव व्यावहारिकं नित्यत्वं सूत्रितम् । अतः कालिदासादिग्रन्थेष्विव वेदेष्वर्थावबोधपूर्विकायाः पदविशेषावापोद्वापाभ्यां प्रवृत्तायाः वाक्यरचनायाः अभावादपौरुषेयत्वं युक्तम्। ब्रह्मविवर्त्तत्वं वियदादेरिव वेदस्याप्यस्ति—इति मत्वा शास्त्रयोनित्वाधिकरणे वेदकर्तृत्वं ब्रह्मणो दर्शितम् । अत एव भट्टपादाः सत्यपि पुरुषसम्बन्धे स्वातन्त्र्यं निवारयामासुः—

'यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता' ।

इति । तस्मात् 'स्वतन्त्रः कर्त्ता' (पा. सू. १. ४. ५४ इत्यनेन लक्षणेन लक्षितः कर्त्ता न को ऽपि वेदस्यास्ति ।

चकारः तु—शब्दार्थे वर्त्तमानो वैलक्षण्यमाह । सन्ति हि बहवश्चतुर्मुख-मनुप्रभृतयः स्मृतिकर्त्तारः । वेदकर्त्ता तु[1] न को ऽपीति वैलक्षण्यम् । 'वेदं स्मृत्वा' इत्यत्र वाक्ये अनुषङ्गन्यायेन[2] द्वितीयार्धगतं पदत्रयमन्वेतव्यम् । अनुषङ्गन्यायश्च[3] द्वितीयाध्याये प्रथमपादे[4] वर्णितः[5] । तथा हि । ज्योतिष्टोमप्रक्रियायां[6] उपसद्धोमेषु[7] त्रयो मन्त्राः श्रूयन्ते । '[8]याते ऽग्ने ऽयाशया, रजा-

* उपलभ्यते चायं मन्त्रः वाजसनेयिसंहितायाम् । तत्र तु—

याते अग्ने ऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठा
उग्रं वचो अपावधीत् त्वेषं वचो अपावधीत्स्वाहा ।

---

१. All except H. omit तु. २. B. C. and F. read वाक्यानुषङ्गन्यायेन instead of वाक्ये अनुषङ्गन्यायेन. After वाक्य- A. adds -पुराणानां before अनुषङ्गन्यायेन. ३. A. omits -श्च. ४. For द्वितीयाध्याये प्रथमपादे A. only reads द्वितीयाध्यायप्रथमपादे. ५. A. substitutes ईरितः for वर्णितः. ६. A. drops the letter -प्र- and reads -क्रियायां. ७. A. and I. read उपसदामुपहोमेषु for उपसद्धोमेषु; while D. reads simply उपहोमेषु for the same. ८. The author has quoted this mantra omitting the common words, and Sabar Swami quotes (१. १. ४८) as follows:—याते अग्ने ऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठा उग्रं वचो अपावधीत्त्वेषं वचो अपावधीत्स्वाहा, याते अग्ने रजाशया, याते अग्ने हराशया.' Kánwás reads हरीशया. After reading the Bháshya of Mahidhara on अयाशया, रजाशया and हराशया we think these readings are incorrect.

शया, हराशया तनूर्वर्षिष्ठा गह्वरेष्ठा उग्रं वचो अपावधीत् त्वेषं वचो अपावधीं[१] स्वाहा' (वा. सं. ५. ८. ८)–इति । तत्र 'अयाशया, रजाशया, हराशया' –इति पदभेदान्मन्त्रभेदः । तत्र प्रथममन्त्रस्य तनूरित्यादि वाक्यशेषापेक्षा ऽस्ति । चरममन्त्रः 'याते ऽग्ने'–इत्यमुं वाक्यादिमपेक्षते । *मध्ये-[२]ममन्त्रश्चाद्यन्तावपेक्षते । तत्रैवं संशयः–किमपेक्षितार्थपरिपूरणाय लौकिकः कियानपि पदसन्दर्भो ऽध्याहरणीयः? किं वा श्रूयमाणं पदजातमनुषञ्जनीयम्? इति । वाक्यादेः प्रथममन्त्रेणैव सम्बन्धात् वाक्यशेषस्य च[३] चरममन्त्रेणैव[४] सम्बन्धात् लौकिकाध्याहारः–इति पूर्वः पक्षः । वैदिकाकाङ्क्षायाः सति सम्भवे वैदिकशब्दैरेव पूरणीयत्वात् अन्यमन्त्रसम्बद्धानामपि[५] पदानां बुद्धिस्थत्वेनाध्याहार्येभ्यः[६] पदेभ्यः प्रत्यासन्नत्वाच्च[७] अनुषङ्ग* एव कर्तव्यो नाध्याहारः–इति सिद्धान्तः । एवं च ...ति प्रकृते[८] ऽपि 'कल्पान्तरे[९] धर्मान् स्मरति'–इति पदत्रयं

याते अग्ने रजःशया तनूर्वर्षिष्ठा० ।
याते अग्ने हरिशया तनूर्वर्षिष्ठा० ।
(वा. सं. ५. ८. ८.)

एवं वर्तते । अत्र तु स एव संक्षेपेण गृहीतः । क्वचित् 'अयःशयाः० । ...ःशयाः० । हरिशयाः० ।' इति पाठो ऽपि दृश्यते । स तु प्रामादिकत्वात् ...न्त्यः ।

* अयमनुषङ्गन्यायः शबरभाष्ये अनुषङ्गाधिकरणे (पू. मी. २. ४८) द्रष्टव्यः ।

१. H. reads इत्यनुवाक्यादिगतम- for इत्यमुं वाक्यादिम-: but all others ...ept A. keep इत्यमुं and read वाक्यादिगतम- for वाक्यादिम-. २. A. ... I. drop the second -म- and read मध्यमन्त्रस्त्वा- E. also with A. ... I. substitute तु for च. ३. A. H. and I. omit च ४. D. omits एव. ... All but B. and I. read -सम्बन्धानां for -सम्बद्धानां. ६. A reads बुद्धि...ना- for बुद्धिस्थत्वेना-. ७. B. C. and F. omit च. ८. D. reads पूर्वं प्रकृते. ९. B. C. E. and F. repeat अन्तरे.

पूर्वार्धे ऽनुषञ्जनीयम्। चतुर्मुखस्तस्मिन् महाकल्पे परमेश्वरेण दत्तं वेदं स्मृत्वा तत्र विप्रकीर्णान् वर्णाश्रमादिधर्मान् सङ्कलय्य स्मृतिग्रन्थरूपेण उपनिबध्नाति। तथा च पितामहवचनानि तत्र तत्र निबन्धकारैरुदाह्रियन्ते। चतुर्मुखस्य स्मृतिशास्त्रकर्तृत्वं मनुना ऽप्युक्तम्—

'इदं शास्त्रं तु कृत्वा ऽसौ मामेव स्वयमादितः।
विधिवद्ग्राहयामास मरीच्यादींस्त्वहं मुनीन्' ॥

(म. स्मृ. १. ५८

इति। यथा चतुर्मुखः तथैव स्वायम्भुवो मनुः तस्मिन्न वान्तरकल्पे वेदोक्तधर्मान् ग्रथ्नाति। मनुग्रहणेन अत्रि विष्णु-याज्ञवल्क्यादयः उपलक्ष्यन्ते। तदेवं प्रतिमहाकल्प तेन तेन चतुर्मुखेन प्रत्यवान्तरकल्पं च तैस्तैर्मन्वादिभि स्मृतिप्रणयनात् धर्मादेः प्रवाहनित्यत्वं सिद्धम्। एतदेवा भिप्रेत्य आश्वमेधिके पर्वणि पठ्यते—

'युगेष्वावर्त्तमानेषु धर्मो ऽप्यावर्त्तते पुनः।
धर्मेष्वावर्त्तमानेषु लोको ऽप्यावर्त्तते पुनः' ॥

इति। युगभेदेन धर्मवैलक्षण्यमभिप्रेत्य 'धर्मान्'-इति बहुवचननिर्देशः ॥ २१ ॥

---

१. B. C. and F. read only पूर्वामुषञ्जनीयम् for पूर्वार्धे ऽनुषञ्जनीयम्. २. All repeat तस्मिन्, but we do not see the necessity of it. ३. A. reads विप्रकीर्णे for विप्रकीर्णान्. ४. D. and G. read संक्लृप्य for संकलय्य. ५. A D. E. G. H. and I. निबन्धनकारैः instead of निबन्धकारैः. ६. B. C. E. F and G. मामेवाश्रयमादित for मामेव स्वयमादितः. ७. A. and I. after तथैव add च. ८. Except E. G. and H. repeat तस्मिन्. ९. A. reads मनुग्रहणेनात्र, omits अत्रि; and changes the places of -विष्णु- and -याज्ञवल्क्य-. १०. H. reads धर्मो ह्यावर्तते for धर्मो ऽप्यावर्त्तते. ११. धर्मे ह्यावर्तमाने तु for धर्मेष्वावर्त्तमानेषु. १२. We take our reading from D. while all others have -मभ्युपेत्य for -मभिप्रेत्य.

तदेवं[1] वैलक्षण्यं प्रतिजानीते—

*अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे युगे[2]।
अन्ये कलियुगे[3] नृणां युगरूपानुसारतः॥ २२॥

इति। अत्र अन्यशब्दो न धर्मस्य स्वरूपान्यत्वमाचष्टे। किन्तु प्रकारान्यत्वम्। अन्यथा धर्मप्रमाणचोदनानामपि[4] युगभेदेन भेदापत्तेः। नहि[5] इयं चोदना कृते ऽध्येतव्या इयं तु त्रेतायाम्—इत्यादिव्यवस्थापकं किञ्चिदस्ति। प्रकारान्यथात्वे[6] त्वस्ति दृष्टान्तः। एकस्याप्यग्निहोत्रस्य सायं प्रातः कालभेदेन अनुष्ठानप्रकारभेदश्रवणात्।

'ऋतं त्वा सत्येन परिषिञ्चामि इति सायं परिषिञ्चति। सत्यं त्वर्त्तेन परिषिञ्चामीति प्रातः'।
(तै. ब्रा. २. ११)

* दृश्यते चायं श्लोको मनुस्मृतौ (अ. १. श्लो. ८५) महाभारते (शां. मो. २३१. २७; २६० अध्याये च ८) च। तत्र तु 'युगे' इत्यत्र 'ऽपरे' इति 'युगरूपानुसारतः' इत्यत्र 'युगह्रासानुसारतः' इति च पाठभेदो दृश्यते। अत्र मेधातिथिः। 'युक्तो ऽस्य कालभेदेन पदार्थस्वभावभेदस्योपसंहारः। धर्मशब्दो न यागादिवचन एव। किं तर्हि पदार्थगुणमात्रे वर्तते। अन्ये पदार्थानां धर्माः प्रतियुगं भवन्ति। यथा प्राक्दर्शितम्। यथा वसन्ते अन्यः पदार्थानां स्वभावः अन्यो ग्रीष्मे अन्य एव वर्षासु। एवं युगेष्वपि। अन्यत्वं चात्र न कारणानां दृष्टकार्यत्यागेन कार्यान्तरजनकत्वमपि। अपरिपूर्णस्य कार्यस्योत्पत्तेः शक्तेरपचयात्। तदाहुः। युगह्रासानुरूपतः इति। ह्रासो न्यूनता।

१. D. reads तदेवं for तदेव. २. M. and J. read परे for युगे. ३. A. reads कलौ युगे instead of कलियुगे. ४. D. reads नोदना- for चोदना-. ५. E. in its correction has तर्हि इयं for नहि इयं; D. has नहि इत्थं for the same. ६. A. B. C. F. and I. read प्रकारान्यत्वे for प्रकारान्यथात्वे.

इति । तपः कृच्छ्र-चान्द्रायणादिरूपेण आहारवर्जनम् ।

'तपोनानशनात् परम्' (म. ना. उ. २१. २)

—इति श्रुतेः । यद्यपि दानस्यापि तपस्त्वं श्रूयते । 'एतत् खलु वाव तप इत्याहुः यस्स्वं ददाति' (तै. सं. ६. १. ६. ३)

इति । तथापि नात्र तद्विवक्षितम् । दानस्य पृथगुक्तत्वात् । ननु—व्यासेन तपो ऽन्यथा स्मर्यते—

'तपः स्वधर्मवर्त्तित्वं शौचं सङ्गनिवर्हणम्' ।

इति । नायं दोषः । कृच्छ्रादेरपि स्वधर्मविशेषत्वात् । 'तप् सन्तापे' इत्यस्माद्धातोरुत्पन्नस्य तपःशब्दस्य देहशोषणे वृत्तिर्मुख्या । अत एव स्कान्दे ऽभिहितम्—

'वेदोक्तेन प्रकारेण कृच्छ्र-चान्द्रायणादिभिः ।
शरीरशोषणं यत्तत् तप इत्युच्यते बुधैः' ॥

इति । यत्तु तत्रैवोक्तम्—

'को ऽहं मोक्षः कथं केन संसारं प्रतिपन्नवान् ।
इत्यालोचनमर्थज्ञास्तपः शंसन्ति पण्डिताः' ॥

इति । सो ऽन्य एव तपःशब्दः । 'तप् आलोचने'—इत्यस्माद्धातोस्तदुत्पत्तेः । तत् तपो ऽत्र ज्ञानशब्देन सङ्गृहीतम् ।

यत्तदद्रेश्यमग्राह्यं (मुं उ. १. १. ५-६)–इत्यादिना 'तत्रापरा ऋग्वेदो यजुर्वेदः' (मुं. उ. १. १.५)—इत्यादिना चाथर्वणे प्रसिद्धे' इति व्याचख्यौ ।

१, A. and I. read अशन- for आहार-. २. A. B. C. E. F. H. a I. read यः स्वं ददाति ; D. यस्स्वयं ददाति for यस्स्वं ददाति. ३. A. D. a I. read शौचं सङ्गवर्जनम् for शौचं सङ्गनिवर्हणम्. ४. We take our readi from A. and I.; though all others read तथा for कृच्छ्र-; D. omits altogether. ५. A. and I. read कोऽसौ for कोऽहं. ६. E. G. and E substitute तेन for केन. ७. A. has तच instead of तत्.

'पर 'शब्दः प्राधान्येनानुष्ठेयतामाह । तर्हि—त्रेतादिषु तपो नाद्रियेत । कृते च ज्ञान-यज्ञ-दानानि नाद्रियेरन्—इति चेत् । न । इतरव्यावृत्तिरूपायाः परिसंख्यायाः अत्र अविवक्षितत्वात् । न खलु इदानीं कश्चिदनुष्ठानविधिः वक्तुमुपक्रान्तः येन विधिविशेषः परिसंख्या शङ्क्येत* । भविष्यति तु 'षट्कर्माभिरत' (प. स्मृ. १. ३८) इत्यादिना तदुपक्रमः । युगसामर्थ्यं केवलमत्र निरूप्यते । यथा वसन्ते पुष्पप्राचुर्यं ग्रीष्मे सन्तापबाहुल्यं इत्यादि ऋतुसामर्थ्यं तथा कृतादिसामर्थ्येन तपआदिप्राचुर्यं विवक्षितम् । अत एव 'युगे युगे तु सामर्थ्यम्' (प. स्मृ. १. ६४) इति वक्ष्यति । सामर्थ्यज्ञानप्रयोजनं चाभिधास्यते—

'तेषां निन्दा न कर्त्तव्या युगरूपा हि ते द्विजाः ' ॥

(प. स्मृ. १. ३३)

इति । एतत्सामर्थ्यं बृहस्पतिरपि दर्शयति—

'तपो धर्मः कृतयुगे ज्ञानं त्रेतायुगे स्थितम् ।
द्वापरे चाध्वरः प्रोक्तस्तिष्ये दानं दया दमः' ॥

इति ॥ २३ ॥

* यत्र विधित्वस्यैवाभावः तत्र तद्विशेषरूपायाः परिसंख्यायाः शङ्कैव नास्तीति भावः । अज्ञातज्ञापकं प्रवृत्त्यङ्गप्रमितिजनकं अभिधानामकदार्थान्तरबोधकपदघटितं वा वाक्यं विधिः । त्रिविधो ऽपि सो ऽत्र न सम्भवतीति तात्पर्यम् ।

१. Except A. D. and I. all others omit च. २. G. reads -मुपाक्रान्तः for -मुपक्रान्तः. ३. D. and I. read विधिविशेषः शङ्क्येत for विधिविशेषः परिसंख्या शङ्क्येत. ४. A. omits तु. ५. H. reads तदुपक्रमे युगसामर्थ्यं instead of तदुपक्रमः । युगसामर्थ्यं. ६. E. omits विवक्षितम्. ७. From विवक्षितम् up to एतत्सामर्थ्यं the whole passage has been omitted by ... ८. A. reads स्थितम् for स्मृतम्. ९. G. substitutes वा for च.

धर्मान् विभज्य तत्प्रमाणानि विभजते—

कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः ।
द्वापरे शाङ्ख-लिखिताः कलौ पाराशराः स्मृताः ॥२४॥

इति । मानवादिग्रन्थोक्तधर्माणां प्रचुरप्रवृत्त्या ग्रन्थ-प्रामाण्यप्राचुर्यमर्थसिद्धम् ॥ २४ ॥

धर्मवदधर्मस्यापि वक्तुमिष्टत्वात्* अधर्मप्रापकं स्थानवि-शेषं हेयतया विभजते—

त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ।
द्वापरे कुलमेकं तु कर्त्तारं तु कलौ युगे ॥ २५॥

इति । पतितः पुमान् प्राधान्येन यस्मिन् एकेन राज्ञा प-रिपालिते ग्रामसमूहात्मनि देशे निवसेन् स देशः सर्वोऽपि क्र सामर्थ्यात् अधर्मापादकः । एवं ग्रामेऽपि योज्यम् । कुलत्यागं नाम पतितस्य कुले विवाह-भोजनाद्यप्रवृत्तिः कर्तृत्यागः सम्भाषणादिवर्जनम् ॥ २५ ॥

---

* केचन अधर्मो न वक्तव्य इत्याचक्षते । तेषां मते धर्मस्वरूपे उक्ते तदतिरिक्तोऽधर्म इति पारिशेष्येणैव तदभिधानं भवतीति ।

---

१. Our reading coincides with A. and I., while B. C. E. F. G. r विवक्ष्य, D. विवक्षन ; and H. विविच्य for विभज्य. २. Here we take reading from D., but A. and I. read तद्वत प्रमाणानि; and all others तद्वत्त्प्रमाणानि for the simple तत्प्रमाणानि. ३. B. reads विवक्ष्यन्ते, C. and F. विवक्ष्यते, E. and G. विवक्ष्यति, A. and I. विभज्यन्ते ; all for विभजते. ४. D. I. J K. and L. read शङ्ख-for शाङ्ख-; M. takes singulars of the plurals. ५. A. and I. read विभज्यते for विभजते. ६. Except A. D. and I. all others omit पुमान्. ७. A. and D. omit प्राधान्येन. ८. A. substitutes येन केन for एकेन. ९. E. H. and I. read परिपाल्यमाने instead of परिपालिते ; D. परिपालितग्राम-. १०. D. reads -समाहारात्मनि instead of -समूहात्मनि.

त्याज्यदेशवत् निमित्तान्यपि त्याज्यानि विभजते[1]–

कृते सम्भाषणादेव[2] त्रेतायां स्पर्शनेन च।
द्वापरे त्वन्नमादाय कलौ पतति[3] कर्मणा ॥ २६ ॥

इति। कृतादिष्विव कलौ पतितसम्भाषणादिना न स्वयं पतति। किन्तु वधादिना कर्मणा पतितो भवति ॥ २६ ॥

महापुरुषतिरस्कारादौ तदीयशापपरिपाकहेतुं कालं[4] विभजते–

कृते तात्कालिकः[5] शापः त्रेतायां दशभिर्दिनैः।
द्वापरे चैकमासेन कलौ संवत्सरेण तु[6] ॥ २७ ॥

इति ॥ २७ ॥

धर्मस्य तारतम्यापादकानि निमित्तानि विभजते–

अभिगम्य कृते दानं त्रेतास्वाहूय दीयते।
द्वापरे याचमानाय सेवया दीयते कलौ ॥ २८ ॥

इति। यत्र प्रतिग्रहीता वर्त्तते तत्र दाता स्वयं गत्वा गुरु-मेव तमभिगम्य कृते दानं करोति। त्रेतायां तु प्रतिग्रहीतार-माहूय तस्मै दीयते। त्रेतासु इति बहुवचनं कृत-द्वापरा-

---

१. B. C. and F. read विभज्यन्ते for विभजते. २. M. reads the verse follows:—कृते सम्भाषणात् पापं त्रेतायां चैव दर्शनात्। द्वापरे चान्नमादाय कलौ पतति कर्मणा ॥. But it seems that none of the three commentators gard the reading. ३. C. D. and F. read पतितकर्मणा instead of पतति कर्मणा. ४. All except A. read -परिपाकहेतुकालं for -परिपाकहेतुं कालं. We prefer this reading because it is reading of many, and secondly seems though there is no commentation on the verse still नन्दपण्डित seems to prefer this reading. A. I. J. K. and L. read तत्क्षणिकः for it, is also is the reading of धरणीधर; and D. reads तत्कालतः for the same; while M. has तु तत्क्षणात् for तात्कालिकः. ६. A. and L. omit तु.

दिषु जातविकल्पवचनमिति प्रदर्शनार्थम् । द्वापरे स्वयमागत्य याचमानाय प्रतिग्रहीत्रे दीयते । कलौ न याञ्चामात्रेण दीयते । किन्तु सेवया । बृहस्पतिरपि अमुं विभागमाह-

'कृते प्रदीयते गत्वा त्रेतास्वानीयते गृहे ।
द्वापरे च प्रार्थयतः कलावनुगमान्विते' ॥

इति ॥ २८ ॥

निमित्तकृतं तारतम्यं दर्शयति-

अभिगम्योत्तमं दानमाहूयैव तु मध्यमम् ।
अधमं याचमानाय सेवादानं तु निष्फलम्॥ २९ ॥

इति । उत्तमत्वाद्यवान्तरविशेषः पुराणसारे फलद्वारेणोपपादितः ।

'गत्वा यत् दीयते दानं तदनन्तफलं स्मृतम् ।
सहस्रगुणमाहूय याचितं तु तदर्द्धकम् ॥
अभिगम्य तु यद्दानं यद्वा दानमयाचितम् ।
विद्यते सागरस्यान्तः तस्यान्तो नैव विद्यते' ॥

इति ॥ २९ ॥

कलिधर्माणामस्मिन् ग्रन्थे प्राधान्येन वक्ष्यमाणत्वात् कलिसामर्थ्यं विशेषतः प्रपञ्चयति-

जितो धर्मो ह्यधर्मेण सत्यं चैवानृतेन च ।
जिताश्चोरैश्च राजानः स्त्रीभिश्च पुरुषाः कलौ ॥३०॥

---

१. A. and I. omit दीयते. २. M. reads आहूनश्चैव मध्यमम for आहूयैव तु मध्यमम्. ३. G. याच्यमानं स्यात् instead of याचमानाय. ४. H. च for तु. ५. M. reads धर्मो जितो ह्यधर्मेण instead of जितो धर्मो ह्यधर्मेण, C and E जितो धर्मस्त्वधर्मेण for the same. ६. D. जितः सत्यो ऽनृतेन च for सत्यं चैवानृतेन च. ७. M. substitutes भृत्यैः for चोरैः. ८. A. substitutes तु for च. ९. M. replaces कलौ by जिताः.

सीदन्ति चाग्निहोत्राणि गुरुपूजा प्रणश्यति ।
कुमार्यश्च प्रसूयन्ते अस्मिन्[1] कलियुगे सदा ॥ ३१ ॥

इति । अधर्मस्य जयो नाम पादत्रयोपेतत्वम् । एकेन पादेन वर्त्तमानत्वं धर्मस्य पराजयः । तदाह बृहस्पतिः–

'तिष्ये ऽधर्मस्त्रिभिः पादैर्धर्मः पादेन संस्थितः' ।

इति । सत्यानृतयोर्धर्माधर्मरूपत्वे ऽपि पृथगुपादानं धर्माधर्मावुदाहृत्य प्रदर्शनार्थम् । यावत्[2] यावत् कलिर्विवर्द्धते तावत्तावदधर्मो विवर्धत इति विवक्षया चोराद्युदाहरणबाहुल्यम् । तदुक्तं विष्णुपुराणे–

'यदा यदा सतां हानिर्वेदमार्गानुसारिणाम् ।
तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः[3] ॥
न प्रीतिर्वेदवादेषु पाषण्डेषु दयारसः[4] ।
तदा तदा कलेर्वृद्धिरनुमेया द्विजोत्तमैः[5]' ॥

(वि. पु. ६. १. ४५–४६)

इति ॥ ३०–३१ ॥

यदुक्तं 'तपः परं कृतयुगे' इत्यादि तत्र हेतुमाह–

---

१. A. B. C. E. F. G. H. I. and M. read तस्मिन् for अस्मिन् ; while D. reads कस्मिन्. २. C. D. F. and G. have only one यावत् followed by only one तावत् ; B. repeats यावत् but not तावत्. ३. C. and G. read द्विजोत्तमैः for विचक्षणैः, this appears to be a mistake of the writer who has mistaken अनुमेया in the second verse for that of the first verse, and consequently has passed over the second verse altogether. ४. D. reads सदा रतिः for दयारसः. ५. For द्विजोत्तमैः D. reads विचक्षणैः.

कृते त्वस्थिगताः प्राणास्त्रेतायां मांसमाश्रिताः।
द्वापरे रुधिरं चैव कलौ त्वन्नादिषु स्थिताः॥ ३२॥

इति। प्राणशब्दो वायुविशेषं वृत्तिपञ्चकोपेतं हृदयादिस्थाननिवासिनमाचष्टे। प्राणस्वरूपं च मैत्रेयशाखायां विस्पष्टं श्रूयते—

'प्रजापतिर्वा एको ऽग्रे ऽतिष्ठत् स नारमतैकः स आत्मानमभिध्यायन् बह्वीः प्रजा असृजत। ता अश्मेवाऽप्रबुद्धा अप्राणाः स्थाणुरिव सन्तिष्ठमानाः सो ऽपश्यत्। स नारमत सो ऽमन्यत एतासां प्रतिबोधनायाभ्यन्तरं विशानि इति। स वायुमिवात्मानं कृत्वा ऽभ्यन्तरं प्राविशत् स एको नादात्मकं पञ्चधा ऽऽत्मानं प्रविभज्योच्यते। यः प्राणो ऽपानः समान उदानो व्यान इति। अथ योयमतिर्यगूर्ध्वमुत्क्रामयति एष वाव स प्राणः। अथ यो ऽयमवाञ्चं संक्रामति एष वाव सो ऽपानो ऽथ यो ऽयं स्थविष्ठमन्नधातुमपाने स्थापयति अणिष्ठे चाङ्गे समं नयति एष वाव समानो ऽथ यो ऽयं पीताशितमुद्गिरति निगिरति एष वाव स उदानो ऽथ येनैताः शिरा अनुव्याप्ता एष वाव स व्यानः'।

(मै. उ. २, ६)

इति। अश्मेव पाषाणवदित्यर्थः। वाक्-चक्षुरादीनीन्द्रिया-

---

१. M. places this verse before the two previous verses ३० and ३१ of the original that is before: जितोऽधर्मो, &c., reading—कृते चास्थिगताः, मांससंस्थिताः, रुधिरं यावत् and कलावन्नादिषु. २. H. reads -निवासं for -निवासिनं. ३. All except A. and D. read मैत्र- for मैत्रेय.- ४. B. C. E. and F. ऽग्रे ऽतिसत्, G. ऽग्रेऽतिसत्, H. ऽग्रे निवसत् and D. ऽग्रे ऽतिष्ठत्; all for ऽग्रे ऽतिष्ठत्.

ग्यपि प्राणाधीनव्यापारत्वात् प्राणशब्देन व्यवह्रियन्ते । अत एव छन्दोगा आमनन्ति—

'न वै वाचो न चक्षूंषि न श्रोत्राणि न
मनांसीत्याचक्षते प्राण इत्येवाचक्षते' ।

(छां. उ. ५. १. १५)

इति ।

तस्मात् इन्द्रिय-वायुसमुदायरूपं लिङ्गशरीरं लोकान्तर-गमनागमनक्षमं प्राणशब्देन विवक्षितम् । तच्च अस्थि-मांसादिमये स्थूलशरीरे कर्मरज्जुभिर्निबध्यते । तच्च बन्धनं कृतयुगसामर्थ्यादस्थ्यादिषु व्यवतिष्ठते । तथा च कृच्छ्र-चान्द्रायणाद्यर्थं आहारपरित्यागात् मांसाद्यपक्षये ऽप्यस्थ्नां सद्भावा ऽनुपक्षयात् प्राणानामव्याकुलतेति कृतयुगे तपः सुकरम्। त्रेतादिषु मांसाद्यपक्षयेण प्राणानां व्याकुलत्वात् तपो दुष्करम् । यद्यपि प्राणानां मांसाद्याश्रयेण ज्ञानादिषूपयोगविशेषो दुर्भणः । तथापि तपसो ऽसम्भवं वक्तुं तद्वर्णनम् । अत एव कूर्मपुराणे युगान्तराभिप्रायेण तपोऽन्तरं वर्णितम्—

---

१. D. reads प्राधान्य- for प्राणाधीन-. २. H. reads व्यापारवत्त्वात् instead of व्यापारत्वात्. ३. A. and I. read -गमनक्षमं instead of -गमनागमनक्षमं. ४. B. C. F. and I. -विबध्यते, and E. G. H. simply -बध्यते for -निबध्यते. ५. G. and H. read तत्र for तच्च, as also B. C. and F. ६. B C. and F. read merely -युगसामर्थ्यादिषु instead of -युगसामर्थ्यादस्थ्यादिषु. ७. A. and I. read -चान्द्रायणादिषु अन्नाद्याहार- for -चान्द्रायणाद्यर्थं आहार-. ८. A. and I. read मांसाद्युपक्षये for मांसाद्यपक्षये; D. reads for the same मांसाद्यपेक्षया. ९. A. and H. read -द्युपक्षयेण instead of -द्यपक्षयेण. १०. B. C. and F. read ज्ञानादिरूपयोगाविशेषो; and E. G. H. ज्ञानाद्युपयोगाविशेषो for ज्ञानादिषूपयोगविशेषो. ११. I. reads दुर्लभः for दुर्भणः.

'अहिंसा सत्यवचनमानृशंस्यं दमो घृणा[1]।
एतत्तपो विदुर्धीरा न शरीरस्य शोषणम्' ॥
(म. भा. शां. रा. ७९. १८)

इति ॥ ३२ ॥

इदानीं युगसामर्थ्यवर्णनस्य प्रयोजनमाह—

युगे युगे च ये धर्मास्तत्र तत्र च[2] ये द्विजाः।
तेषां निन्दा न कर्त्तव्या युगरूपा हि ते द्विजाः॥३३॥

इति। युगरूपाः युगानुरूपाः कालपरतन्त्रा इति यावत् तदुक्तमारण्यपर्वणि[3]—

'भूमिर्नद्यो नगाः शैलाः[4] सिद्धा देवर्षयस्तथा।
कालं तमनुवर्त्तन्ते यथा[5] भावा युगे युगे ॥
कालं[6] कालं समासाद्य नराणां नरपुङ्गव[7]।
बल-वर्ष्म[8]-प्रभावादि[9] प्रभवन्त्युद्भवन्ति च' ॥

इति ॥ ३३ ॥

ननु—एवं कलौ पापिनामनिन्द्यत्वात् कृत्स्नधर्माधर्म[10]-व्यवस्थापकं शास्त्रं[11] विप्लवेत। तथा हि[12]—

'जितो धर्मो ह्यधर्मेण' (प. स्मृ. १. ३०)

---

१. A. reads तपो घृणा instead of दमो घृणा. २. B. C. and F. read तत्र हि ते, and E. G. H. तत्र हि ये; both for तत्र च ये. ३. A. reads यदुक्तं for तदुक्तं. ४. A. and I. read -गाश्चैते instead of -गाः शैलाः, and कालं समनुवर्त्तन्ते for कालं तमनुवर्त्तन्ते; H. for the same कालान्तमनुवर्तन्ते. ५. A. and I. read तथा for यथा. ६. For the first कालं D. reads काले. ७. A. and I. read नरपुङ्गवाः instead of नरपुङ्गव. ८. A. and I. read बल-वर्ण- for बल-वर्ष्म-. ९. A. D. and I. read -प्रभावा हि instead of -प्रभावादि. १०. Except B. all others read कृत्स्नं धर्माधर्म- for कृत्स्नधर्माधर्म-. ११. All except H. read -व्यवस्थापकशास्त्रं for -व्यवस्थापकं शास्त्रं. १२. B. C. and F. omit हि.

इति यदुक्तं तत्र 'धर्मं चर' (तै. उ. ११. १.) इति श्रूयमाणो विधिः पीड्येत।

'नास्ति सत्यात् परो धर्मो नानृतात् पातकं परम्।
स्थितिर्हि सत्ये धर्मस्य तस्मात् सत्यं न लोपयेत्' ॥

इति राजधर्मेषूक्तम्।[2] तच्च अनृतस्यानिन्द्यत्वे बाध्येत।

'अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्।
अयशो महदाप्नोति नरकं चैव गच्छति' ॥

(म. स्मृ. ८. १२८)

इति वचनं चोरस्यानिन्द्यत्वे बाध्येत।

'स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः'।

(या. स्मृ. १. ७७.)

इति याज्ञवल्क्योक्तिः—

'भर्तारं लङ्घयेद् या तु स्त्री ज्ञातिगुणदर्पिता।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते' ॥

(म. स्मृ. ८. ३७१.)

इति मनूक्तिः—

'परित्याज्या त्वया भार्या भर्तुर्वचनलङ्घिनी।
तत्र दोषो न चास्तीति त्वं हि वेत्थ[9] यथातथम्' ॥

---

१. All except A. and I. read चरेत् for चर. २. D. reads simply इति omitting the following:—राजधर्मेषूक्तम्. ३. D. बाध्यते for बाध्येत. D. reads प्रति in the place of चैव. ५. D. adds राजधर्मेषूक्तं after and before वचनं, and again बाध्यते for बाध्येत. ६. D. याज्ञवल्क्योक्ते: याज्ञवल्क्योक्तिः. ७. B. C. and F. add अपि after मनूक्तिः; D. reads क्तैः. ८. B. reads तु वा; D. च वा for त्वया. ९. Except A. D. and ll others read वेत्सि for वेत्थ.

सर्वलक्षणयुक्तापि या तु भर्तुर्व्यतिक्रमम् ।
करोति सा परित्याज्येत्येष धर्मः सनातनः' ॥

इति ब्रह्मपुराणे मन्त्रर्षीणामुक्तिः । तदिदमुक्तित्रयं स्त्रीजितस्य अनिन्दायां बाधितं स्यात् । अच्छिद्रकाण्डे अग्निहोत्रप्रायश्चित्तं बहुधा श्रुतम् । आश्वमेधिके पर्वणि चैवाप्युक्तम् ।

'होतव्यं विधिवद्राजन् ऊर्ध्वामिच्छति यो गतिम् ।
आजन्मसत्रमेतत् स्यादग्निहोत्रं युधिष्ठिर ॥ (८८)
न त्याज्यं क्षणमप्येतद् गृहीतव्यं द्विजातिभिः ।(८९)
यच्चैतन्यं पृथिव्यां हि किञ्चिदस्ति चराचरम् ॥
तत् सर्वमग्निहोत्रस्य कृते सृष्टं स्वयम्भुवा ॥ (९६)
नावबुध्यन्ति ये चैवं नरास्तु तमसाऽऽवृताः ।
ते यान्ति नरकं घोरं रौरवं नाम विश्रुतम्' ॥ (९७)
(वृ. गौ. स्मृ. १५)

इति । तदेतत् श्रुति-स्मृतिद्वयमग्निहोत्रावमादस्यानिन्दायां बाध्येत ।

' गुरोरनिष्टाचरणं गुरोरिष्टविवर्जनम् ।
गुरोश्च सेवाऽकरणं ज्ञानानुत्पत्तिकारणम् ॥

१. D. reads परित्याज्या ह्येष for परित्याज्येत्येष. २ D. reads only तदिदमुक्तं omitting त्रयं. ३. We read with H.; all others read स्त्रीविजितस्य for स्त्रीजितस्य. ४. A. B. and E. read आश्वमेधिकपर्वणि instead of आश्वमेधिके पर्वणि. ५, A. and I. read -मिच्छन्ति ये for -मिच्छति यो. ६. Except A. and D. all read आजन्मकं सत्रमेतत् for आजन्मसत्रमेतत् D. आजन्म सत्र-. ७. For यच्चैतन्यं B. C. and F. यज्ञोतव्यं, E. यज्ञोतव्यं and G. H. यच्चैतन्यं. ८. B. C. and F. चैनं for चैवं; A. D. G. I चैतत् for the same; and E. चैतं. ९. A. omits तदेतत्. १०. H. and I read simply स्मृतिद्वय-.

आचार्यनिन्दाश्रवणं तद्बाधस्य* च दर्शनम् ।
विवादश्च तथा तेन ज्ञानानुत्पत्तिकारणम्' ॥

इति स्कन्दपुराणवचनम् । एतच्च गुरुपूजाप्रणाशस्य अनिन्दायां बाध्येत ।

'प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति ।
मासि मासि रजस्तस्याः पिता पिबति शोणितम्' ॥
(य. स्मृ. २२)

इति यमवचनम् ।

'पितुर्गृहे तु या कन्या रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता' ॥
(वि. स्मृ. २४. ४१.)

इति वचनम् । एतदुभयं कुमारीप्रसवस्यानिन्दायां बाध्येत । तः कथमनिन्दा? इत्यत आह—

युगे युगे तु सामर्थ्यं शेषं मुनिविभाषितम् ।
पराशरेण चाप्युक्तं प्रायश्चित्तं विधीयते ॥ ३४ ॥

इति । शेषं अवशिष्टं तत्तद्युगसामर्थ्यं मुनिभिरन्यैर्विशेण भाषितम् । तथा चारण्यपर्वणि पठ्यते—

'कृतं नाम युगं श्रेष्ठं यत्र धर्मः सनातनः ।
कृतमेव न कर्तव्यं तस्मिन् काले युगोत्तमे' ॥ (११)

*बाधः परिभवः । क्वचित् 'तद्वधस्य' इत्यपि पाठः ।

१. A. and I. स्कान्दपुराण- for स्कन्दपुराण-. २. A. and D. substitute शुश्रूषा- for -पूजा-. ३. All except A. and I. read प्राप्ते द्वादशमे instead प्राप्ते तु द्वादशे. ४. A. D. and H. read तस्य for तस्याः. ५. All except read तदुभयं; while B. तदीयं. ६. D. reads धर्माः सनातनाः instead धर्मः सनातनः.

न तत्र धर्माः सीदन्ति न क्षीयन्ते च वै प्रजाः ।
ततः कृतयुगं नाम कालेन गुणतां गतम् ॥ (१२)
कृते युगे चतुष्पादः श्वेतवर्णः स चाच्युतः ।
एतत् कृतयुगं नाम त्रैगुण्यपरिवर्जितम् ॥ (२२)
पादेन ह्रसते ऽधर्मो रक्ततां याति चाच्युतः । (२३)
सत्यप्रवृत्ताश्च नराः क्रियाधर्मपरायणाः ।
ततो यज्ञाः प्रवर्त्तन्ते धर्म्याश्च विविधाः क्रियाः॥ (२४)
स्वधर्मस्थाः क्रियावन्तो जनास्त्रेतायुगे ऽभवन् । (२६)
विष्णुः पीतत्वमायाति चतुर्द्धा वेद एव च । (२७)
सत्यस्यं इह विभ्रंशः सत्ये कश्चिदवस्थितः ।
सत्यात् प्रच्यवमानानां व्याधयो बहवो ऽभवन् ॥(३०)
कामाश्चोपद्रवाश्चैव तथा दैवतकारिताः । (३१)
कामकामा ह्यर्थकामा यज्ञांस्तन्वन्ति चापरे ।
एवं द्वापरमासाद्य प्रजाः क्षीयन्त्यधर्मतः ॥ (३२)
पादेनैकेन कौन्तेय धर्मः कलियुगे स्थितः । (३३)
वेदाचाराः प्रशाम्यन्ति धर्म-यज्ञक्रियास्तथा ।
ईतयो व्याधयस्तन्द्री दोषाः क्रोधादयस्तथा' ॥(३४)

(म. भा. व. १४९. ११-३४)

---

१. A. and I. substitute जीर्यन्ते for क्षीयन्ते. २. B. C. E. F. G. and H. read चातुर्वर्ण्यश्च शाश्वतः; whose correct form appears to be चातुर्वर्ण्यं च शाश्वतम्, to be found in A. I. When we read in the next but one line, we think we are justified in adopting the reading in the text. ३. A. omits the whole line. ४. A. reads सत्ये नाऽस्त्येव विभ्रंशो, and E. G. H. सत्यस्य त्विह विभ्रंशो; for सत्यस्य इह विभ्रंशः. ५. B. and H. read कामश्चोपद्रवाश्चैव instead of कामाश्चोपद्रवाश्चैव. ६. B. C. E. F. G. and H. धर्मो यज्ञ- for धर्म-यज्ञ-. ७ A. reads आधयो for ईतयो.

इति। तत्रैव—

'ब्राह्मणाः क्षत्रिया वैश्याः सङ्कीर्यन्तः परस्परम्॥ (१७)
शूद्रतुल्या भविष्यन्ति तपःसत्यविवर्जिताः[1]। (१८)
स्वभावात् क्रूरकर्माणश्चान्योन्यमभिशङ्किनः॥ (५६)
भवितारो नराः सर्वे सम्प्राप्ते युगसङ्क्षये'। (५७)
(म. भा. व. १९०. १७-५७)

इत्यादि। ब्रह्मपुराणेऽपि—

'दीर्घकालं[2] ब्रह्मचर्यं धारणं च कमण्डलोः*।
गोत्रान्मातुः सपिण्डात्तु विवाहो गोवधस्तथा॥
नराऽश्वमेधौ मद्यं च कलौ वर्ज्यं[3] द्विजातिभिः'।

इति। क्रतुरपि—

'देवराच्च† सुतोत्पत्तिर्दत्ता कन्या न दीयते।
न यज्ञे गोवधः कार्यः कलौ नै[4] च कमण्डलुः'॥

* एतद्वचनमारभ्य 'निर्वर्तितानि कर्माणि' (पृ. १३७ पं. १०) इत्यन्तानि वाक्यानि बहुभिर्निबन्धकारैः कलिवर्ज्यप्रकरणत्वेन तत्र तत्र सङ्गृहीतानि दृश्यन्ते। कुत्रचित् पञ्चैव कर्माणि वर्ज्यान्युक्तानि कुत्रापि बहूनीति भेदः। तानि च सुखावबोधार्थं सङ्क्षेपेण व्याख्यास्यामः। कमण्डलोर्धारणमुक्तं व्यासेन स्नातकव्रतेषु—

'यज्ञोपवीतद्वितयं सोदकं च कमण्डलुम्'।

इति। एतादृशः मृण्मयो वा कमण्डलुः।

† देवरात् सुतोत्पत्तिस्तु—

१. -मविशङ्किताः is that of H. for -मभिशङ्किनः; these three lines beginning with ब्राह्मणा- are omitted by A. २. A. and G. read दीर्घकालब्रह्मचर्यं for दीर्घकालं ब्रह्मचर्यं. ३. Except E. and H. all others read वर्ज्या for वर्ज्यं. ४. B. G. E. F. and H. reverse the order of न and च.

इति। वायुपुराणे ऽपि—

'ऊढायाः पुनरुद्वाहं* ज्येष्ठांशं गोवधं तथा।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम्'॥

इति। तथा अन्ये ऽपि धर्मज्ञसमयप्रमाणकाः सन्ति। यथा—

'विधवायां प्रजोत्पत्तौ देवरस्य नियोजनम्।
†बालिका-ऽक्षतयोन्योश्च वरेणान्येन संस्कृतिः॥
कन्यानामसवर्णानां विवाहश्च द्विजातिभिः।
आततायिद्विजाग्र्याणां धर्मयुद्धे न हिंसनम्॥

'अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात्'॥

इत्यादिवचनैरुक्ता व्यासादिभिराचरिता चेति ज्ञेयम्।

* ऊढाया अपि कन्यायाः पत्यौ मृते सति पुनरुद्वाह उक्तः। यथा—

'पुरा पुरुषसंयोगात् मृते देयेति केचन'।

इति।

† हेमाद्रौ 'बालायाः क्षतयोन्यास्तु' इति पठ्यते। अयमेव पाठो युक्त इति प्रतीमः। 'बालिका-ऽक्षतयोन्योः' इति द्विवचनान्तत्वात् द्वन्द्वे कृते बालिकाशब्दस्य नको ऽप्यर्थविशेषः सम्पद्यते। अनेन क्षतयोन्या अपि पूर्वस्मिन् युगे विवाहो विहित आसीदिति गम्यते। अन्यथा निषेधस्य वैयर्थ्यापातात्।

---

१. Except D. all others merely पुराणेऽपि for वायुपुराणेऽपि. २. B. reads ज्येष्ठांशो गोवधस्तथा and H. ज्येष्ठांशं गोवधस्तथा. ३. D. कमण्डलुः for कमण्डलुम्. ४. G. reads धर्मज्ञे instead of धर्मज्ञ-. ५. A. and I. omit यथा. ६. All except A. substitute सङ्गतिः for संस्कृतिः.

द्विजस्याब्धौ तु नौयातुः शोधितस्यापि* सङ्ग्रहः ।
सत्रदीक्षा च सर्वेषां कमण्डलुविधारणम् ॥
महाप्रस्थानगमनं† गोसंज्ञप्तिश्च गोसवे ।
सौत्रामण्यामपि‡ सुराग्रहणस्य च संग्रहः ।
अग्निहोत्रहवण्याश्च§ लेहो लीढापरिग्रहः ।
वानप्रस्थाश्रमस्यापि प्रवेशो विधिचोदितः ॥
वृत्त-स्वाध्यायसापेक्षमघसङ्कोचनं तथा¶ ।
प्रायश्चित्तविधानं च विप्राणां मरणान्तिकम् ॥
संसर्गदोषः स्तेनाद्यैर्महापातकनिष्कृतिः ।
वरातिथि-पितृभ्यश्च पशूपाकरणक्रिया ॥

---

* शोधितस्य कृतप्रायश्चित्तस्य ।

† एतच्च मनुनोक्तम् । यथा—
'अपराजितां वास्थाय व्रजेद्दिशमजिह्मगः । आनिपाताच्छरीरस्य युक्तो वार्यनिलाशनः' ॥

‡ अत्र सुराग्रहस्यैव निषेधात् 'पयोग्रहा वा स्युः' इत्यापस्तम्बोक्तेः सुराग्रहस्य वैकल्पिकत्वात् पयोग्रहैः सौत्रामण्यनुष्ठाने न दोष इति सुधीभिरूह्यम् ।

§ अग्निहोत्रहवनी यज्ञपात्रविशेषः । तत्र स्थितस्य हविषो लेह उक्तः ।

¶ वृत्तं यायावर-गृहस्थाद्याचारः । स्वाध्यायो वेदः तदध्ययनं वा । अघं आशौचम् ।

---

१. A. D. E. G. H. and I. read निर्याणं and B. C. F. निर्यातुः both for नौयातुः. २. D. substitutes सर्वी- for सत्र. ३. D. E. and G. substitute न for च. ४. G. and I. read हवन्याः for हवण्याः. ५. B. C. D. E. and F. read लीढ-परिग्रहः for लीढापरिग्रहः ; A. reads लीढो लेढापरिग्रहः for लेहो लीढा परिग्रहः. ६. B. C. and F. read पशूपाकरणी क्रिया for पशूपाकरणक्रिया.

दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ।
सवर्णान्याङ्गनादुष्टौ[1] संसर्गः शोधितैरपि ॥
अयोनौ[2] सङ्ग्रहे वृत्ते परित्यागो गुरुस्त्रियाः ।
*अस्थिसञ्चयनादूर्द्ध्वमङ्गस्पर्शनमेव च ॥
शामित्रं† चैव विप्राणां सोमविक्रयणं तथा ।
षड्भक्तानशनेनान्नहरणं[3][4] हीनकर्मणः‡ ॥
शूद्रेषु दास-गोपाल-कुलमित्रा-ऽर्द्धसीरिणाम् ।
भोज्यान्नता गृहस्थस्य तीर्थसेवाऽतिदूरतः ॥
शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिरीरिता ।
आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा ॥
प्रजार्थं तु द्विजाग्र्याणां प्रजाऽरणिपरिग्रहः ।
ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया ॥

---

* अत्रेदमधिकं हेमाद्रौ—

'परोद्देशात्मसन्त्याग उद्दिष्टस्यापि वर्जनम् ।
प्रतिमाभ्यर्चनार्थाय सङ्कल्पश्च सधर्मकः' ॥ इति ।

† शमिता यज्ञीयपशुहिंसकः तस्य कर्म शामित्रम् ।

‡ षड्दिनपर्यंतमलब्धाहारेण सप्तमे दिने हीनकर्मणोऽपि ग्राह्यम् यथा—

'तथैव सप्तमे भक्ते भक्तानि षडनश्नता ।
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः' ।इति ।

---

१. A. B. C. D. E. and F. read सवर्णानां तथा दुष्टेः for सवर्णान्याङ्गनादुष्टौ. २. B. C. D. and F. read सयोनौ for अयोनौ. ३. Except E, G. H. and I. all others read षड्भुक्ता for षड्भक्ता. ४. D. reads महणम् for हरणम्.

बलात्कारादिदुष्टस्त्रीसङ्ग्रहो विधिचोदितः।
यतेस्तु[1] सर्ववर्णेषु[2] भिक्षाचर्या विधानतः॥
नवोदके दशाहं[*] च दक्षिणा गुरुचोदिता।
ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च॥
भृग्वग्निपतनैश्चैव[3] वृद्धादिमरणं तथा।
गोतृप्तिमात्रे[4] पयसि शिष्टैराचमनक्रिया॥
पिता-पुत्रविरोधेषु[†] साक्षिणां दण्डकल्पनम्।
यत्र[5] सायंगृहत्वं च सूरिभिस्तत्त्वतत्परैः[6]॥
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः।
निवर्त्तितानि[‡] कर्माणि व्यवस्थापूर्वकं बुधैः॥
समयश्चापि साधूनां प्रमाणं वेदवद्भवेत्'[§]।

---

* 'दशाहेनैव शुद्ध्येत भूमिष्ठं च नवोदकं' इत्युक्तो दशाहो ऽत्रानु-
न्धेयः।

† पिता-पुत्रविवादे तु साक्षिणां त्रिपणो दमः' इत्यादिनोक्तः।

‡ एतानि कर्माणि निवर्तितानि। तथापि देवलेन 'यावद्वर्णविभागो-
स्त यावद्वेदः प्रवर्तते। संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे'॥
यादिना व्यवस्थोक्ता।

§ इमान्युपरितनानि वचनानि कुत्रत्यानीति सम्यङ् न ज्ञायते। हेमाद्रौ
ादित्यपुराणान्तर्गतानीति मदनपारिजाते सारसङ्ग्रहस्थानीति क्वचित्
लवचनानीति चोक्तम्। मूलं तु न कुत्रापि दृश्यते।

D. substitutes एतेषु for यतेस्तु. २. A. and I. reads -वर्णेभ्यः for
· ३. A. and I. read -पतनाद्यैश्च, G. -तपनैश्चैव for -पतनैश्चैव. ४. All
t D. read गोतृप्तिशिष्टे, and D. गोतृप्तिसृष्टे; for गोतृप्तिमात्रे. ५. A.
यतेः सायंगृहस्थत्वं, and all others except H. and G. यत्र सायं
त्वं for यत्र सायंगृहत्वं च. We read with H. and G. ६. D. substi-
तत्त्वदर्शिनः- for तत्त्वतत्परैः.

इति । तदुक्तमापस्तम्बेनापि— 'धर्मज्ञसमयः प्रमा॰ वेदाश्च' (आ. ध. सू. १. २) इति । एवमन्यदप्युदाहार्यम् । यथ मुनिभिस्तत्तद्युगसामर्थ्यं विधि-निषेधाभ्यां विशेषेण भाषितम् तथा विहितातिक्रम-निषिद्धाचरणयोः प्रायश्चित्तमपि चिरन्तनेन पराशरेणोक्तम् । पठ्यन्ते हि वृद्धपराशरस्य वचनानि—

'जरायुजाऽण्डजाश्चैव जीवाः संस्वेदजाश्च ये ।
अवध्याः सर्व एवैते बुधैः समनुवर्णितम् ॥
निश्चयार्थं विबुद्धानां प्रायश्चित्तं विधीयते ।
अनस्थिशतमेकं तु यदि प्राणैर्वियोजयेत् ॥
उपोष्यैकाहमादध्यात् प्राणायामांस्तु षोडश ।
त्रिःस्नानमुदके कृत्वा तस्मात् पापात् प्रमुच्यते ॥
अस्थिमद्वधे तु द्विगुणं प्रायश्चित्तं विधीयते ।
अनेन विधिना वाऽपि स्थावरेषु न संशयः ॥
कायेन पद्भ्यां हस्ताभ्यामपराधाद्विमुच्यते ।
चतुर्गुणं कर्मकृते द्विगुणं वाक्यदूषिते ॥
कृत्वा तु मानसं पापं तथैवैकगुणं स्मृतम्' ।

इति । चकारो याज्ञवल्क्य-मन्वादिसमुच्चयार्थः । प्रसि॰ द्धा हि तदीयग्रन्थेषु प्रायश्चित्ताध्यायाः । पराशरग्रहणं

१. D. reads चिरन्तरेण for चिरन्तनेन. २. B. C. D. and F. rea॰ जरायुजोऽण्डजश्चैव, and G. जरायुजोऽण्डजाश्चैव for जरायुजाऽण्डजाश्चै॰ ३. D. continues जीवो यः स्वेदजश्च यः instead of जीवाः संस्वेदजाश्च ये॰ ४. B. C. E. F. and G. read सर्वथैवैते for सर्व एवैते. ५. A. reads अनस्थि॰ मल्पमेकं तु for अनस्थिशतमेकं तु. ६. Except A. and I. all others rea॰ द्वादश instead of षोडश. ७. E. reads अस्थिमद्वधेषु, and H. अस्थिवद्वधेषु for अस्थिमद्वधे तु. ८. All except A. and E. read न मुच्यते, E. तदुच्यते for विमुच्यते. ९. A. D. H. and I. read वाक्यप्रदूषिते for वाक्यदूषिते.

कलियुगाभिप्रायम्। सर्वेष्वपि कल्पेषु पराशरस्मृतेः कलि-युगधर्मपक्षपातित्वात्। प्रायश्चित्तेष्वपि कलि¹विषयेषु पराशरः प्राधान्येनादे²रणीयः। अतः पराशर-मन्वादिप्रोक्तं प्रायश्चित्तं तत्तत्पापपरिहाराय विद्वत्परिषदा विधीयते। एतदुक्तं भवति। नानामुनिभिस्तत्तद्युगसामर्थ्यस्य प्रायश्चित्तस्य च³ प्रपञ्चितत्वात् तदुभयं पर्यालोच्य निन्दा⁴ऽनिन्दयोः व्यवस्था⁵ कल्पनीया। यः पुरुषो युगसामर्थ्यमनुसृत्य विहितानुष्ठानं प्रतिषिद्धवर्जनं प्रमादकृतपाप⁶स्य प्रायश्चित्तं च कर्तुं शक्तोऽपि न कुर्यात् तद्विषयाणि—

'भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता'।
(वि. स्मृ २४. ४१)

इत्यादि निन्दावचनानि। अशक्तविषयं 'तेषां निन्दा न कर्त्तव्या' इत्यादि वचनम्। अत एव शैवागमे पठ्यते—

'अत्यन्तरोगयुक्ता⁷ऽङ्ग-राज-चोरभयादिषु।
गुर्वग्नि-देवकृत्येषु नित्यहानौ न पापभाक्'॥

इति। तस्मात् न कोऽपि धर्म⁸शास्त्रस्य विप्लवः इति॥३४॥

ननु—उक्तप्रकारेण युगसामर्थ्यस्याशेषस्यानेकग्रन्थपरि-चयमन्तरेण दुर्बोधत्वात् कथं मन्दप्रज्ञानामल्पायुषां युगसाम-र्थ्यानुसारिणश्चातुर्वर्ण्यसमाचारस्य निर्णयः? इत्यत आह—

---

१. Between कलि- and विषयेषु, A. and I. insert -युग-. २. D. substitutes -नानुसरणीयः for -नादरणीयः. ३. Except B. C. and F. all others omit च. ४. G. E. and H. read निन्द्यानिन्द्ययोः for निन्दानिन्दयोः. ५. D. reads व्यवस्थाः कल्पनीयाः for the singulars. ६. All except A. and I. -कृतपापप्रायश्चित्तं for -कृतपापस्य प्रायश्चित्तं. ७. A. and I. read -युक्तेऽङ्गे, D. -युक्ताङ्गे and H. -युक्ताङ्गो; for -युक्ताङ्ग-. ८. All except H. read धर्माधर्मशास्त्रस्य instead of simply धर्मशास्त्रस्य.

अहमद्यैव तत्[1] सर्वमनुस्मृत्य ब्रवीमि वः[2] ।
चातुर्वर्ण्यसमाचारं शृण्वन्तु ऋषिपुङ्गवाः[3] ॥ ३५ ॥

इति । अनुस्मृतस्य[4] सर्वस्य सङ्कलय्याभिधानात् मन्दानामप्येतत् सुग्रहम् । 'अद्यैव'–इति कालविलम्बनिषेधात् अल्पायुषामप्यत्र ग्रन्थे निर्णयः सुलभः । चत्वारो वर्णाश्चातुर्वर्ण्यम् । तस्य समाचारो धर्मः । आचारशब्दः शीलापरपर्यायं[5] लौकिकं वृत्तमाचष्टे । समीचीनः शिष्टाभिमत आचारो यस्य धर्मस्य कारणत्वेन वर्त्तते सोऽयं यजन-याजनादिकर्मलक्षणो धर्मः समाचारः । अत एव आचार-धर्मयोर्हेतु-हेतुमद्रूपेण भेदं वक्ष्यति । 'आचारो धर्मपालकः' (प. स्मृ. १. ३७) इति । श्रुतिश्च धर्माचारौ भेदेन व्यपदिशति—

'यथाकारी यथाऽऽचारी तथा भवति'।

(बृ. उ. ४.४.५)

इति । श्रुत्यन्तरे च कर्म-वृत्तयोर्भेद आम्नायते–

'अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्'

(तै. उ. १.११.३)

–इति । यद्यपि–

'शृणु पुत्र प्रवक्ष्यामि शृण्वन्तु मुनिपुङ्गवाः' ।

इत्यप्रमत्तत्वं पूर्वमेव उदितं[6] तथापि युगसामर्थ्यप्रपञ्चनेन व्यवहितत्वात् तदेव पुनः स्मार्यते[7] । अथ वा पूर्वोक्तं युग-

---

१. M. substitutes तद्धर्मं for तत् सर्वं. २. D. substitutes च for वः. ३ Except D. E. G. H. and J. all others मुनिपुङ्गवाः for ऋषिपुङ्गवाः. ४. A. and I. read अनुस्मृत्य for अनुस्मृतस्य. ५. A. and I. read simply शीलपर्यायः for शीलापरपर्यायं. ६. A. D. and I. read विहितं for उदितं. ७. A. reads स्मर्यते for स्मार्यते.

सामर्थ्यश्रवणविषयम् । इदं तु धर्मश्रवणाविषयम् । इत्यपुनरुक्तिः ॥३५॥

वक्ष्यमाणधर्मज्ञानस्य परमपुरुषार्थहेतुतां कैमुतिकन्यायेन अभिधातुं ग्रन्थपाठ-तदर्थज्ञाने प्रशंसति-

पराशरमतं पुण्यं पवित्रं पापनाशनम् ।
चिन्तितं ब्राह्मणार्थाय धर्मसंस्थापनाय च ॥३६॥

इति । पराशरेण प्रोक्तं ग्रन्थजातं 'पराशरमतं' । तच्च पाठमात्रेण पुण्यप्रदम् । पुण्यं च द्विविधम् । इष्टप्रापकमनिष्टनिवर्त्तकं च । तदुभयं 'पवित्र-पापनाशन' शब्दाभ्यां विवक्ष्यते । तदेवं ग्रन्थजातं 'चिन्तितं' अर्थतो विचारितं सत् पूर्ववत् पुण्यप्रदं भवति । अर्थविचारस्य प्रयोजनं द्वेधा । स्वानुष्ठानं परोपदेशश्च । तदुभयं 'ब्राह्मण' इत्यादिपदद्वयेनोच्यते । ब्राह्मणस्यार्थो ब्राह्मण्यनिमित्तं स्वधर्मानुष्ठानमिति यावत् । 'धर्मसंस्थापनं' परेषां धर्मोपदेशेनानुष्ठापनम् । यदा ग्रन्थपाठ-तदर्थज्ञानयोरपीदृशो महिमा तदा किमु वक्तव्यमनुष्ठानं पुरुषार्थहेतुः-इति । युक्तं चैतत् । पराशरस्य

---

१. A. reads श्रवणं धर्मविषयम् for धर्मश्रवणाविषयम्. २. A. D. and I. read ज्ञातस्य for -ज्ञानस्य ; and B. C. F. read अनुष्ठानस्य; for the same. ३. B. and F. read -उच्यते ; D. विभज्यते ; and C. E. G. H. विबुध्यते for विवक्ष्यते. ४. Except H. all others read तदेव मन्थ- for तदेवं मन्थ-. ५. D. E. G. and H. read तत् instead of सत्. ६. B. C. and F. read merely अनुष्ठानं for स्वानुष्ठानं. ७. A. reads ब्राह्मणार्थो instead of ब्राह्मणस्यार्थो. ८. C. and D. read अनुष्ठानम् for अनुष्ठापनम्. ९. A. and . substitute यथा for यदा.

पुलस्त्य-वसिष्ठप्रसादलब्धवरेण सर्वशास्त्रहृदयाभिज्ञत्वम्[1] । तथा च विष्णुपुराणम्—

'वैरे महति मद्वाक्यात्[2] गुरोरप्याश्रिता[3] क्षमा ।
त्वया तस्मात् समस्तानि भवान् शास्त्राणि वेत्स्यति[4] ॥
सन्ततेर्न ममोच्छेदः[5] क्रुद्धेनाऽपि[6] यतः कृतः ।
त्वया तस्मान्महाभाग ददाम्यन्यमहं वरम्[7] ॥
पुराणसंहिताकर्त्ता भवान् वत्स भविष्यति ।
देवतापारमार्थ्यं च यथावद्वेत्स्यते भवान् ॥
प्रवृत्ते च निवृत्ते च कर्मण्यस्त्वमला मतिः[8] ।
मत्प्रसादादसंदिग्धा तव वत्स भविष्यति[9] ॥
ततश्च प्राह भगवान् वसिष्ठोऽस्मत्पितामहः[10] ।
पुलस्त्येन यदुक्तं ते सर्वमेतद्भविष्यति' ॥
(वि. पु. १. १. २८-३

इति ॥ ३६ ॥

इत्याचारकाण्डे प्रथमाध्याये आचारावतारः समाप्तः

॥ ग्रन्थानुक्रमणिका च समाप्ता ॥

---

१. Except A. and D. all others read -अभिज्ञत्वात् for -अभिज्ञत्व[म्]. २. B. reads तद्वाक्यात्, E. G. H. तद्वाक्ये, and D. यद्वाक्यात् : all f[or] मद्वाक्यात्. ३. Except A. and D. all others read गुरोरस्याश्रिता f[or] गुरोरप्याश्रिता. ४. After वेत्स्यति A. adds इति outside the verse. ५. [E.] G. H. and I. read समुच्छेदः for ममोच्छेदः. ६. B. C. F. H. and I. rea[d] क्रोधेनाऽपि for क्रुद्धेनापि. ७. B. C. F. and G. read ददाम्यन्यं महद्वरम्; while D. and H. ददाम्यन्यन्महद्वरम्; both ददाम्यन्यमहं वरम्. ८. H. reads कर्माणि स्वमला मतिः for कर्मण्यस्त्वमला मतिः. ९. A. and I. omit the verse; but we think it is necessarily required here. For, in the preceding lines, the commentator says पुलस्त्य-वसिष्ठप्रसादलब्धवरेण. Then there must appear two gifts. Of these one only is described in the preceding eight lines. Then there should be one वर as appearing in the introduced verse. १०. B. C. and F. read वशिष्ठो मत्पितामहः for वसिष्ठोऽस्मत्पितामहः.

अथाचारो निरूप्यते। यत् पृष्टम्—

'चातुर्वर्ण्यसमाचारं किञ्चित् साधारणं वद'।

(प. स्मृ. १.१७)

इति तत्रोत्तरमाह—

चतुर्णामपि वर्णानामाचारो धर्मपालकः।
आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः॥ ३७॥

इति। आचारस्यान्वय-व्यतिरेकाभ्यामैहिकामुष्मिक-श्रेयोहेतुत्वम्[1]। आचारलक्षणं च आनुशासनिके पर्वण्यभिहितम्—

'आचाराल्लभते ह्यायुराचाराल्लभते श्रियम्।
आचारात् कीर्तिमाप्नोति पुरुषः प्रेत्य चेह च॥
दुराचारो हि[2] पुरुषो नेहायुर्विन्दते महत्।
त्रसन्ति[3] चास्य भूतानि तथा परिभवन्ति च॥
तस्मात् कुर्यादिहाचारं यदीच्छेद् भूतिमात्मनः।
अपि पापशरीरस्य आचारो हन्त्यलक्षणम्[4]॥
आचारलक्षणो धर्मः सन्तश्चाचार[5]लक्षणाः।
साधूनां च यथावृत्तमेतदाचारलक्षणम्'॥

(म. भा. आ. १०४. ६–९)

---

१. Except A. C. and F. all others read -हेतूत्तरम् for -हेतुत्वम्. २. A. D. E. and G. substitute च for हि. ३. E. and G. अश्नन्ति, D. त्रस्यन्ति; for त्रसन्ति; and in the text of Mahâbhârât यस्मात् त्रसन्ति. ४ D. reads ह्रस्य for हन्त्य. ५. In the text of Mahâbhârât -चारित्र-.

इति । हारीतो ऽपि स्मरति—

'साधवः क्षीणदोषाः स्युः सच्छब्दः साधुवाचकः ।
तेषामाचरणं यत्तु स सदाचार उच्यते' ॥

इति । मनुरप्याह—

'यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते' ॥

(म. स्मृ. २. १८)

इति । सन्तः शिष्टाः । तेषां स्वरूपमाह भगवान् बौधायनः-
'शिष्टाः खलु विगतमत्सरा निरहङ्काराः कुम्भीधान्याः अलोलुपाः दम्भ-दर्प-लोभ मोह-क्रोधविवर्जिताः'-

(बौ. स्मृ. १. १. ५)

इति । आरण्यपर्वणि—

'अक्रुध्यन्तो ऽनसूयन्तो निरहङ्कार-मत्सराः ।
ऋजवः शमसम्पन्नाः शिष्टाचारा भवन्ति ते ॥
त्रैविद्यवृद्धाः शुचयो वृत्तवन्तो यशस्विनः ।
गुरुशुश्रूषवो दान्ताः शिष्टाचारा भवन्ति ते' ॥

(म. भा. व. २०७. ७८-७९)

---

१. All but A. and I. substitute तु for स्युः. २. B. C. F. and G. सच्छब्दाः साधुवाचकाः instead of the singulars. ३. In A. स follows सदाचारः instead of preceding it. ४. Except A. and H. all others omit मनुरप्याह, together with the following śloka. ५. I. and in the text of manu तस्मिन् for यस्मिन्. ६. A. and I read बोधायनः for बौधायनः. ७. D. reads -विद्याः for -वृद्धाः. ८. In the text of Mahâbhârât मनस्विनः for यशस्विनः. ९ In the text of Mahâbhârât भवन्त्युत for भवन्ति ते.

इति । अत्र सर्वत्र–शिष्टानामभिमतो दया-दाक्षिण्य-विनयाद्यन्वितो वृत्तविशेष आचारः–इत्युक्तं भवति । स सदाचारः श्रौतं स्मार्तं च धर्मं पालयति । सति सदाचारे धर्मविघातिनां नैर्घृण्य-क्रोधादीनामभावात् । असति त्वाचारे विरोधिसद्भावात् धर्म एव न प्रवर्त्तेत । कथञ्चित् प्रवृत्तो ऽपि परावर्त्तेत । सो ऽयं धर्मपालक आचारश्चतुर्णां वर्णानां साधारणः । ननु–'किञ्चित् साधारणं वद'–इति धर्मः पृष्टः प्रत्युत्तरं त्वाचारविषयं इति न सङ्गच्छते–इति चेत् । न । निमित्त-नैमित्तिकयोराचार-धर्मयोरभेदस्य विवक्षितत्वात् ॥ ३७ ॥

इदानीं ब्राह्मणस्यासाधारणं धर्मं दर्शयति—

षट्कर्माभिरतो नित्यं देवता-ऽतिथिपूजकः ।
हुतशेषं तु भुञ्जानो ब्राह्मणो नावसीदति ॥ ३८ ॥

इति । यजन-याजना-ऽध्ययना-ऽध्यापन-दान-प्रतिग्रहाः षट्कर्माणि । तदाह मनुः—

'अध्यापनं चाध्ययनं यजनं याजनं तथा ।

---

१. A. omits सर्वत्र ; while E. and H. read सर्वशिष्टानां for simply शिष्टानां. A. reads आचारः for सदाचारः; D. G. and H. omit सः and read [स]दाचारः merely. E. altogether omits the whole sentence. ३. Except [E.] and J. all others omit the expression श्रौतं स्मार्तं च ; but H. in its [m]argin has श्रौतस्मार्तं. ४. With the exception of E. all omit सति सदाचारे. [Th]is expression is not found in any of the MSS., but I think that [th]e sentence without this expression gives no consistent complete idea. [५.] D. विरोधसद्भावात् for विरोधिसद्भावात्. ६. A. and I. प्रवर्तते for प्रवर्तेत, Again परावर्तते for परावर्तेत ८. All except A. read चतुर्वर्णानां instead [of] चतुर्णां वर्णानां. ९. Except A. and D. all others read असाधारणधर्मं [in]stead of असाधारणं धर्मं.

दान प्रतिग्रहश्चापि षट्कर्माण्यग्रजन्मनः' ॥

(म. स्मृ १०. ७५)

इति । तत्र अध्यापनं कूर्मपुराणे प्रपञ्चितम् –

'एवमाचारसम्पन्नमात्मवन्तमदाम्भिकम् ।
वेदमध्यापयेद् धर्मं[1] पुराणाङ्गानि नित्यशः ॥
संवत्सरोषिते शिष्ये गुरुर्ज्ञानमनिर्दिशन् ।
हरते[2] दुष्कृतं तस्य शिष्यस्य वसतो गुरुः ॥
आचार्यपुत्रः शुश्रूषुः कनिष्ठो[3] धार्मिकः शुचिः ।
आप्तः[4] शक्तोऽर्थदः साधुरध्याप्या दश धर्मतः ॥
कृतज्ञश्च[6] तथाऽद्रोही मेधावी शुभकृत्तरः[7] ।
आप्तः प्रियोऽथ विधिवत् षडध्याप्या[5] द्विजोत्तमैः[8]' ॥

(कू. पु. १. २. १४. ३७–४०)

इति । विष्णुरप्याह–

'नापरीक्षितं[9] याजयेत्[10] नाध्यापयेत् नोपनयेत्' ।

(वि. स्मृ. २९. ४–६)

इति । वसिष्ठश्च[11]–

---

१. A. and E. read -धर्मपुराणा- for -धर्मं पुराणा-. २. A. substitutes ग्रस for हरते. ३. A. and in the text of Kûrma Purâna ज्ञानवां for कनिष्ठ ४. All except A. read शक्तोऽर्थदोऽर्थी स्वः साधु- for आप्तःशक्तोऽर्थदः साधु and in the text of Kûrma Purâna सूक्तार्थदोऽरसः. ५. A. reads स्वोऽध्याप्य दश- instead of merely अध्याप्या दश. ६. B. C. and F. read कृत्योद्यतो यो न द्रोहि ; E. G. and H. कृत्यो यतो यो अद्रोहि, for कृतज्ञश्च तथाऽद्रोही. ७. All except G. read -कृत्तरः for -कृत्तरः, and in the text of Kûrma Purâna नृपकृत्तरः for शुभकृत्तरः. ८. In the text of Kûrma Purâna द्विजातयः for द्विजोत्तमैः. ९. B. C. and F. read नापरिज्ञायाध्यापयेत ; E. G. and H. नापरिज्ञातमध्यापयेत् for नापरीक्षितम्. १०. With the exception of A. D. and G. all others omit याजयेत् ; G. interchanges the places of याजयेत् and अध्यापयेत्. ११. A. and I. omit च.

'विद्या ह वै ब्राह्मणमाजगाम
गोपाय मा शेवधिष्टे ऽहमस्मि ।
असूयकायाऽनृजवेऽयताय
न मां ब्रूया वीर्यवती तथा स्याम्' ॥
(व. स्मृ. २. ८ ; वि. स्मृ. २९. ९ ; मु. उ. १. ६१)

इति । अध्यापने नियममाह यमः–

'सततं प्रातरुत्थाय दन्तधावनपूर्वकम् ।
स्नात्वा हुत्वा च शिष्येभ्यः कुर्यादध्यापनं नरः' ॥

इति । मनुरपि–

'अध्येष्यमाणं तु गुरुर्नित्यकालमतन्द्रितः ।
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत्' ॥
(म. स्मृ. २. ७३)

इति । अध्येष्यमाणः शिष्यः । तं प्रति वेदमुच्चारयिष्यन् प्रतिदिनमध्यापनप्रारम्भे अतन्द्रितः– 'अधीष्व भोः'–इति ब्रुवन्नारभेत । समाप्तौ 'विरामोऽस्तु'–इति ब्रुवन्नुपरमेत ईश्वरप्रीतये । एतत् सर्वमभिप्रेत्य श्रुतिराह–

---

१. In the text of Vasishtha Smriti शेवधिस्ते for शेवधिष्टे. २. A. and I. read शठाय for ऽयताय. ३. Except E. and H. all others read मा for मां. ४. With the exception of H. all read अध्येष्यमाणस्तु for अध्येष्यमाणं तु. ५. E. reads अधीहि for अधीष्व. ६. For शिष्यः तं प्रति B. C. E. F. G. and H. read शिष्यान्प्रति ; besides C. and F. read अध्येष्यमाणशिष्यान. ७. D. drops प्रति. ८. E. omits अध्यापनप्रारम्भे and reads अधीहि भो for अधीष्व भो, B. C. D. F. and G. omit the following:—प्रतिदिनं अध्यापनप्रारम्भे अतन्द्रितः 'अधीष्व भो' इति ब्रुवन्नारभेत and read प्रतिदिनमध्यापनसमाप्तौ &c. H. reads भो अधीष्व instead of अधीष्व भो. With the exception of A. and I. all omit ईश्वरप्रीतये.

'अष्टवर्षं ब्राह्मणमुपनयीत । तमध्यापयीत'–इति ।

अत्र प्रभाकरो[1] मन्यते–'उपनयीत'–इति नयतेरात्मने-पदस्य आचार्यकरणे पाणिनिना सूत्रितत्वात् (पा.सू. १.३.३६) उपनयनाध्यापनयोश्चाङ्गाङ्गीरूपत्वेनैककर्तृकत्वात् आचार्यत्वकामो ऽध्यापने ऽधिकारी । अत एव मनुना स्मर्यते–

'उपनीय तु[2] यः शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते[3]' ॥

(म. स्मृ. २. १४०)

इति । एवं चाध्यापनविधौ सुस्थिते सत्यप्य[4]ध्ययनस्य पृथग्विधिर्न कल्पनीयो भविष्यति । विहितस्याध्यापनस्याध्ययनमन्तरेणानुपपत्तेरध्ययनस्यार्थे–सिद्धत्वात् । ननु–नाध्ययन[5]विधौ कल्पनादोषो ऽस्ति[6] । क्लृप्तस्यैव विधेः सत्त्वात् । 'स्वाध्यायोऽध्येतव्यः' (तै. आ. २. १५) इति श्रुतेः । मैवम् । अधिकार्यश्रवणेना[7]स्य[8] विधेरनुष्ठापकत्वायोगात् । अथोच्येत[9]–विश्वजिन्न्यायेन[10] रात्रिसत्रन्यायेन[11] वा ऽधिकारी परिकल्प्यताम्[12] । 'विश्वजिता यजेत' इत्यत्र 'एतत्[13]कामः'–इति नियोज्यविशेषणस्या[14]श्रवणात् अनुष्ठानाप्राप्तौ[15] स्वर्गस्य सर्वैरिष्यमाणत्वात् स

---

१. B. C, E. F. and H. read प्राभाकरो for प्रभाकरो. २. For तु यः C. D. and F. substitute गुरुः. ३. D. reads प्रकल्पते for प्रचक्ष ४. Except H. all others omit अपि. ५. G. reads नाध्यापन- for नाध्ययन and D. चाध्ययन- for the same. ६. A. replaces अस्ति by स्यात् and omits the following:-क्लृप्तस्यैव विधेः सत्त्वात्. ७. D. and E rea -श्रवणे instead of -श्रवणेन. ८. All except G. and H. substitute तस्य fo अस्य. ९. D. अथोच्यते. १०. A. reads विश्वजिन्नयेन for विश्वजिन्न्यायेन ११. G. omits रात्रिसत्रन्यायेन. १२. H. reads कल्पताम for -कल्प्यताम १३. A. तत for एतत. १४. A. विशेषस्य instead of विशेषणस्य. १५. All except A. read अननुष्ठानप्राप्तौ for अनुष्ठानाप्राप्तौ.

एव तद्विशेषणत्वेन परिकल्पितः । एवमत्र स्वर्गकामो माणवको नियोज्यो ऽस्तु । रात्रिसत्रे 'प्रतितिष्ठन्ति ह वा एते य एता रात्रीरुपयन्ति' इत्यर्थवादे श्रुतायाः प्रतिष्ठायाः अत्यन्तमश्रुतात् स्वर्गतः प्रत्यासन्नतया प्रतिष्ठाकामोऽधिकारी कल्पितः । एवमत्र पयःकुल्यादिकामो ऽधिकारी स्यात् । 'यदृचो ऽधीते पयसः कुल्या अस्य पितॄन् स्वधा अभिवहन्ति । यद्यजूंषि घृतस्य कुल्याः । यत्सामानि सोम एभ्यः पवते' (तै. आ. २. ११) इत्यर्थवादात्—इति । मैवम् । पयःकुल्यादेर्ब्रह्मयज्ञविधिशेषत्वात् माणवकस्याप्रबुद्धत्वेन स्वर्गकामत्वाऽसम्भवाच्च । कथञ्चित् सम्भवे ऽप्यन्योन्याश्रयत्वं दुर्वारम् । अधीते स्वाध्याये पश्चादध्ययनविध्यवगमः । तदवगमे चाध्ययनम्—इति । तस्मात् अध्ययनस्याध्यापनप्रयुक्तत्वादध्यापनमेव विधीयते नाध्ययनम्' इति ।

तदेतद्गुरुमतमन्ये वादिनो न क्षमन्ते । अनित्येनाध्यापनेन नित्यस्याध्ययनस्य प्रयोक्तुमशक्यत्वात् । अनित्यं चाध्यापनम् । जीवनकामस्य तत्राधिकारात् । तदाह मनुः—

'षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
याजनाऽध्यापने चैव विशुद्धाच्च प्रतिग्रहः' ॥

(म. स्मृ. १०. ७६.)

१. D. omits अत्यन्तम्. २. All except A. and G. read एकेभ्यः for एभ्यः. ३. B. C. and F. read इतोऽस्त्वाति, D. -इत्यादि अस्ति. E. G. इत इति, and H. इत्यादिस्तुतिरिति, for simply इति. ४. D. and H. read -श्रय for -श्रयत्वं. ५. G. and E. read अवगमने for अवगमे. ६. A. reads तयाह for तदाह.

इति। अध्ययनं तु नित्यम्। अकरणे प्रत्यवायस्य मनुना स्मृतत्वात्—

'योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः'॥
(म. स्मृ. २. १६८; व. स्मृ. ३. २.)

इति। अतः स्वविधिप्रयुक्तमेवाध्ययनम्। न चास्त्यन्योन्याश्रयः। अध्ययनात् प्रागेव सन्ध्यावन्दनादाविव पित्रादिमुखेन विध्यर्थावगमात्। पित्रादिनियमितत्वादेव[2] माणवकस्य न अप्रबुद्धत्वदोषो ऽस्ति[1]। यद्यपि तैत्तिरीयशाखायाम्—'स्वाध्यायो ऽध्येतव्यः' इति वाक्यस्य पञ्चमहायज्ञप्रकरणे पठितत्वाद् ब्रह्मयज्ञविधिरूपता[4] तथाप्यशेषस्मृतिषूपनयनपूर्वकस्याध्ययनस्य[5] प्रपञ्च्यमानत्वान्मूलभूता श्रुतिरनुमातव्या[6]। विवरणकारस्तु—'अध्यापयीत' इत्यत्रापि[7] णिजर्थस्य जीवनार्थत्वेन रागतः प्राप्तत्वात् प्रकृत्यर्थस्याध्ययनस्य विधेयतामभिप्रेत्य 'अष्टवर्षो ब्राह्मण उपगच्छेत्। सो ऽधीयीत' इति वाक्यं विपरिणमय्य[8] उपपादयामास। सर्वथा[9]ऽस्ति नित्यः[10] स्वाध्यायाध्ययनविधिः 'स्वाध्यायोऽध्येतव्य' इत्येवमात्मकः श्रौतः। तथा स्मृतिरपि—

---

१. A. E. G. and H. omit अस्ति; A. and G. substitute शा for ष. २. H. and I. read पित्रादिभिः instead of पित्रादि-. ३. A. reads एवं for एव. ४. A. reads विधिरयम् for विधिरूपता; E. विधिः श्रूयते for the same. ५. A. reads -पूर्वकं स्वाध्यायस्य for -पूर्वकस्याध्ययनस्य. ६. We read with A. and I. all others read अनुगन्तव्या for अनुमातव्या. ७. Except B C. and F. all others omit अपि. ८. E. G. and H. read विपरिणम्य for विपरिणमय्य. ९. A. reads सर्वथाप्यस्ति, B. C. E. F. H. सर्वथास्त्यस्ति, and D. सर्वथा स्वस्थः; all for सर्वथाऽस्ति. १०. All others except A. and D. read merely नित्य dropping the *visarga* after it.

'तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः ।
वेदः कृत्स्नो ऽधिगन्तव्यः सरहस्यो द्विजन्मना' ।
(म. स्मृ. २. १६५)

इति । अधिगतिरर्थविचारपर्यन्तमध्ययनम् । तथा च कूर्मपुराणे अध्ययन-तदर्थविचारयोरभावे प्रत्यवायः स्मर्यते—

'यो ऽन्यत्र कुरुते यत्नमनधीत्य श्रुतिं द्विजः ।
स वै मूढो न सम्भाष्यो वेदबाह्यो द्विजातिभिः ।।
न वेदपाठमात्रेण संन्तुष्टो वै भवेद्द्विजः ।
पाठमात्रावसायी तु पङ्के गौरिव सीदति ।।
यो ऽधीत्य विधिवद्वेदं वेदार्थं न विचारयेत् ।
स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते' ।।
(कू. पु. १. २. १४. ८६–८८)

इति । अध्ययनस्येतिकर्त्तव्यतामाह याज्ञवल्क्यः—

'गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः ।
आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत् ।।
हितं चास्याचरेन्नित्यं मनो-वाक्काय-कर्मभिः' ।
(या. स्मृ. १. २६–२७)

इति । विष्णुपुराणे ऽपि—

---

१. A. reads श्रौतैः, and D. श्रुतैः for व्रतैः. २. D. reads अधिगम्यविचार- instead of अधिगतिरर्थविचार-. ३. Except A. E. and I. all others read श्रुतं for श्रुतिं. ४. In the text of Kûrma Purâna द्विजाः for द्विजः and for सवै मूढो न संमूढो ५. In the text of Kûrma Purâna सन्तुष्येदेष वै for संतुष्टो वै भवेत. ६. In the text of Kûrma Purâna एवमाचारहिनस्तु for पाठमात्रावसायी तु. ७. At the end of the line B. C. and F. have a redundant इति. ८. B. C. E. and F. read कर्तव्यमाह for कर्तव्यतामाह. ९. D. reads तस्य for चास्य. १०. A. omits अपि.

'उभे सन्ध्ये रविं भूप तथैवाग्निं समाहितः ।
उपतिष्ठेत् तथा कुर्याद्गुरोरप्यभिवादनम् ॥
स्थिते तिष्ठेद् व्रजेत् याते नीचैरासीत चासिते ।
शिष्यो गुरोर्नरश्रेष्ठ प्रतिकूलं न सञ्चरेत् ॥
तेनैवोक्तः पठेद्वेदं नान्यचित्तः पुरःस्थितः ।
अनुज्ञातश्च भिक्षान्नमश्नीयात् गुरुणा ततः ॥
व्रतानि चरता ग्राह्यो वेदश्च कृतबुद्धिना' ।
(वि. पु. ३. ९. २-५)

इति । कौर्मेऽपि—
'आहूतोऽध्ययनं कुर्याद्वीक्षमाणो गुरोर्मुखम् ।
नित्यमुद्धृतपाणिः स्यात् साध्वाचारः सुसंयतः' ॥
(कू. पु. १. २. १४. १-२)

इति । स्वकुलपरम्पराऽऽगतायाः शाखायाः पाठोऽध्ययनम् । तदाह वसिष्ठः—
'पारम्पर्यागतो येषां वेदः स परिबृंहणः ।
तच्छाखं कर्म कुर्वीत तच्छाखाऽध्ययनं तथा' ॥
(व. स्मृ. ६. ४३)

इति । स्वशाखापरित्यागं स एव निषेधति—
'यः स्वशाखां परित्यज्य पारक्यामधिगच्छति ।
स शूद्रवद्बहिः कार्यः सर्वकर्मसु साधुभिः ॥

१. A. has instead of याते for यामि. २. A. B. C. and F. read चासने for चासिते, and D. reads चाऽऽसिते. ३. D. reads तेनैवोक्तं. ४. D. changes कृत- into धृत-. ५. With the exception of D. and H. all others read कूर्मेऽपि. ६. E. reads नित्यमभ्यतपाणिः for नित्यमुद्धृतपाणिः and in the text of Kûrma Purâna नित्यमुद्यतपाणिः स्यात् सन्ध्याचारसमन्वितः. ७. A. reads तच्छाखाकर्म- for तच्छाखं कर्म. ८. B. C. D. and F. read पारक्यमधिगच्छति.

स्वीया शाखोज्झिता येन ब्रह्म तेनोज्झितं परम् ।
ब्रह्महैव स विज्ञेयः सद्भिर्नित्यं विगर्हितः' ॥

इति । स्वशाखाऽध्ययनपूर्वकं त्वन्यशाखाऽध्ययनं तेनैवाङ्गीकृतम्—

'अधीत्य शाखामात्मीयां परशाखां ततः पठेत्' ।

इति । वेदवद्धर्मशास्त्रमप्यधीयीत । तदाह बृहस्पतिः—

'एवं दण्डादिकैर्युक्तं संस्कृत्य तनयं पिता ।
वेदमध्यापयेत् पश्चात् शास्त्रं मन्वादिकं तथा ॥
ब्राह्मणो वेदमूलः स्याच्छ्रुति-स्मृत्योः समः स्मृतः ।
सदाचारस्य च तथा ज्ञेयमेतच्चिकं सदा ॥
अधीत्य चतुरो वेदान् साङ्गोपाङ्ग-पद-क्रमान् ।
स्मृतिहीना न शोभन्ते चन्द्रहीनेव शर्वरी' ॥

इति । अत्र अध्ययनेन पञ्चधा वेदाभ्यास उपलक्षितः । तदाह दक्षः—

'वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ।
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा' ॥

इति । हारीतोऽपि—

'मन्त्रार्थज्ञो जपन् जुह्वन् तथैवाऽध्यापयन् द्विजः ।
स्वर्गलोकमवाप्नोति नरकं तु विपर्यये' ॥

१. D. reads the following:— स्वीयशाखापलापे तु for स्वीया शाखोज्झिता [ये]न; A. reads स्वीय- for स्वीया- retaining all the rest according to [t]ext. २. All except A. omit तु. ३. After-शाखाऽध्ययनम् D. adds पूर्ववत्. [४]. All the MSS. omit अपि. ५. D. reads साङ्गोपाङ्गान् पदक्रमान् instead [o]f the compound word. ६. All except A. omit the expression तदाह [द]क्षः; and I. reads तथा च. ७. A. substitutes ऽध्ययनं for ऽभ्यसनं; D. [अभ्य]ासनं for the same. ८. D. and G. read पुनः instead of जपः. [९]. E. and H. read स्वर्गे लोकम् for स्वर्गलोकम.

इति । गुरुमुखादेवाध्येतव्यं नतु लिखितपाठः कर्त्त-व्यः । तदाह नारदः—

‘पुस्तकप्रत्ययाधीतं नाधीतं गुरुसन्निधौ ।
भ्राजते न सभामध्ये जारगर्भ इव स्त्रियाः’ ॥
(ना. शि. २. १३)

इति । अध्ययने वर्जनीयानाह मनुः—

‘नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ ।
न निशान्ते प्रतिश्रान्तो[1] ब्रह्माधीत्य पुनः स्वपेत्’ ॥
(म. स्मृ. ४. ९९)

इति । नारदो[2] ऽपि—

‘हस्तहीनस्तु यो ऽधीते स्वर-वर्णविवर्जितः ।
ऋग्यजुः-सामभिर्दग्धो[3] वियोनिमधिगच्छति’ ॥
(ना. शि. २. २७; पा शि. १०. ६)

इति । व्यासो ऽपि—

‘अनध्यायेष्वधीतं यत् यच्च शूद्रस्य सन्निधौ ।
प्रतिग्रहनिमित्तं च नरकाय तदुच्यते’ ॥

॥ इत्यध्ययना-ऽध्यापनयोः प्रकरणम् ॥

अथानध्यायाः । ते च द्विविधाः । नित्या नैमित्तिकाश्च । तत्र नित्यानाह हारीतः—

‘प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वयोर्द्वयोः[4] ।
श्वोऽनध्याये ऽद्य शर्वर्यां नाधीयीत कदाचन’ ॥

---

१. P. and H. read परिश्रान्तो for प्रतिश्रान्तो. २. All except A. and I. omit नारदो ऽपि. ३. B. C. D. and F. read -सामनिर्दग्धो for -सामभिर्दग्धो. ४. All the copies consulted read पर्वणोः instead of पर्वयोः.

इति। नैमित्तिकानाह याज्ञवल्क्यः—

‘श्व-क्रोष्टु-गर्दभोलूक-साम-बाणार्त्त-निःस्वने।
अमेध्य-शव-शूद्रान्त्य-श्मशान-पतितान्तिके॥
देशे[1] ऽशुचावात्मनि च विद्युत्-स्तनित-संप्लवे।
भुक्त्वा ऽऽर्द्रपाणिरम्भोन्तरर्द्धरात्रे ऽतिमारुते॥
पांसुवर्षे दिशां दाहे सन्ध्या-नीहार-भीतिषु।
धावतः पूतिगन्धे च शिष्टे च गृहमागते॥
खरोष्ट्र-यान-हस्त्यश्व-नौ-वृक्षेरिण-रोहणे।
सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान् विदुः’॥

(या. स्मृ. १. १४८–१५१)

इति। अन्ये ऽप्यनध्यायास्तत्र तत्र स्मर्यन्ते। तदाह नारदः—

‘अयने विषुवे चैव शयने बोधने हरेः।
अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु’॥

इति। मन्वादयो मत्स्यपुराणे ऽभिहिताः—

‘आश्वयुक्शुक्लनवमी कार्त्तिके द्वादशी तथा।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च॥

---

१. D. and G. read शिष्ये for देशे. २. All except A. read भक्त्वार्द्र- for भुक्त्वार्द्र-. ३. D. and G. read पांसुप्रवर्षे दिग्दाहे for पांसुवर्षे दिशां दाहे. ४. A. and I. read तु for अपि. ५. A. and I. read तथा च, while others except D. read तथाह for तदाह.

फाल्गुनस्य त्वमावास्या पौषस्यैकादशी तथा ।
आषाढस्याथ दशमी माघमासस्य सप्तमी ॥
श्रावणस्याष्टमी कृष्णा आषाढस्यापि पूर्णिमा ।
कार्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता ॥
मन्वन्तरादयश्चैते दत्तस्याक्षय्यकारकाः ' ॥
(म. पु. १७. ६-८)

इति । युगादयो विष्णुपुराणे वर्णिताः—
' वैशाखमासस्य च या तृतीया
नवम्यसौ कार्तिकशुक्लपक्षे ।
नभस्य मासस्य च कृष्णपक्षे
त्रयोदशी पञ्चदशी च माघे ' ॥
(वि. पु. ३. १४. १३)

इति । कूर्मपुराणे—
' उपाकर्मणि चोत्सर्गे त्रिरात्रक्षपणं स्मृतम् ।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ॥
मार्गशीर्षे तथा पौषे माघमासे तथैव च ।
तिस्रोऽष्टकाः समाख्याताः कृष्णपक्षे तु सूरिभिः ' ॥
(कू. पु. १. २. १४. ७७-७८)

इति । गौतमोऽपि—' कार्तिकी फाल्गुन्याषाढी पौर्णमासी तिस्रोऽष्टकाः त्रिरात्रम् ' (गौ. स्मृ. १६. ७)—इति । उक्त-

१. A. D. E. G. and H. read पुष्यस्य for पौषस्य २. H. and I. with the exception of all others have आषाढस्यापि for आषाढस्याथ. ३. D. reads अषाढस्य तु for आषाढस्यापि. ४. B. C. D. and F. read एता for एते. ५. All except A. and I. omit वर्णिताः. ६. A. D. and I. omit इति. ७. A. D. G. H. and I. read त्रिरात्रं क्षपणं for त्रिरात्रक्षपणं. ८. D. reads पौर्णमासीः तिस्रोष्टकाः. ९. All except A. omit इति.

ौर्णमासीरारभ्य त्रिरात्रम् । तथा तिस्रोऽष्टकाः सप्तम्यादयः । ास्वपि त्रिरात्रमनध्ययनमित्यर्थः । पैठीनसिः—

'कृष्णे भवाः तिस्रोऽष्टकाः । मार्गशीर्षप्रभृतय इत्येके' ।

इति । आपस्तम्बस्तु उपाकर्माऽऽरभ्य मासं प्रदोषेऽनध्यायमाह—

'श्रावण्यां पौर्णमास्यामध्यायमुपा-
कृत्य मासं प्रदोषे नाधीयीत' ।

(आ. ध. सू. ९. १)

इति । प्रदोषशब्देनात्र पूर्वरात्रिः विवक्षिता । त्रयोद- ्यादिप्रदोषेष्वपि नाधीयीत । तथा च आदित्यपुराणम्[1]—

'मेधाकामस्त्रयोदश्यां सप्तम्यां च विशेषतः ।
चतुर्थ्यां च[2] प्रदोषेषु न स्मरेन्न च कीर्त्तयेत्' ॥

इति[3] । चतुर्थ्यादितिथिद्वैविध्ये प्रजापतिः—

'षष्ठी च द्वादशी चैव अर्द्धरात्रोनैनाडिका[4] ।
प्रदोषे न त्वधीयीत तृतीया नवनाडिका' ॥

इति । याज्ञवल्क्योऽपि—

'त्र्यहं[5] प्रेतेष्वनध्यायः शिष्यर्त्विग्-गुरु-बन्धुषु ।
उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये मृते ॥
सन्ध्या-गर्जित-निर्घात-भूकम्पोल्कानिपातने ।
[6]समाप्य वेदं द्युं[7]-निशामारण्यकमधीत्य च ॥

१. D. reads मत्स्यपुराणे for आदित्यपुराणम्, all others except A. read imply पुराणम् omit आदित्य-. २. D. substitutes म, and G. तु; for च. . A. omits इति. ४. A. reads अर्धरात्र्यूननाडिका. ५ .D. reads अहं or त्र्यहं. ६. We read with A.; all others read तथा for मृते. ७. D. eads द्य-निशम् for द्यु-निशम्.

पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ।
ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च ॥
पशु-मण्डूक-नकुल-श्वाहि-मार्जार-मूषकैः ।
कृतेऽन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्रये' ॥

(या. स्मृ. १. १४४-४७.)

इति । मनुरपि—

'चोरैरुपप्लुते ग्रामे सम्भ्रमे वा ऽग्निकारिते ।
आकालिकमनध्यायं विद्यात्सर्वाद्भुतेष्वपि' ॥[1]

(म. स्मृ. ४. ११८)

इति । कूर्मपुराणे—

'श्लेष्मातकस्य छायायां शाल्मलेर्मधुकस्य च ।
कदाचिदपि नाध्येयं कोविदार-कपित्थयोः' ॥

(कू. पु. १. २. १४. ७९)

इति । उक्तानामप्यनध्यायानामपवादमाह मनुः—

'वेदोपकरणे चैव स्वाध्याये चैव नैत्यके[2] ।
नानुरोधो ऽस्त्यनध्याये होममन्त्रेषु चैव हि' ॥

इति । वेदोपकरणानि अङ्गानि । नित्यस्वाध्यायो ब्रह्मयज्ञः ।
शौनकोऽपि—

'नित्ये जपे च काम्ये च क्रतौ पारायणेऽपि च ।
नाऽनध्यायो ऽस्ति वेदानां ग्रहणे ग्राहणे तथा'[3] ॥

१. All except G. read -ष्विति for -ष्वपि. २. A. C. F. and I. read नित्यके for नैत्यके. ३. All except H. substitute स्मृतः for तथा.

इति। कूर्मपुराणेऽपि[1]—

'अनध्यायस्तु नाङ्गेषु नेतिहास-पुराणयोः।
न धर्मशास्त्रेष्वन्येषु पर्वण्येतानि वर्जयेत्' ॥

(कू. पु. १. २. १४. ८४)

इति।

॥ इत्यनध्यायप्रकरणम् ॥

पूर्वमध्ययना-ऽध्यापने[2] सेतिकर्त्तव्यते निरूपिते। अथ यजन-याजने निरूपयामः।

तत्र यजनस्य सृष्टि प्रयोजनं चाह भगवान्—

'सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वो ऽस्त्विष्टकामधुक् ॥
देवान् भावयताऽनेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः' ॥

(भ. गी. ३. १०-१२)

इति। तस्य च यजनस्य[3] सात्त्विक-राजस-तामसभेदेन विध्यं स एवाह—

'अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥

---

१. B. C. E. F. and G. omit अपि; while D. omits the whole ntence together with the following verse and the subsequent इति. २. A. reads पूर्वमध्यापना-ऽध्ययने इतिकर्तव्यत्वेन निरूपिते. ३. E. reads तस्य सर्वस्य; while all others except A. read तस्य चाध्वरस्य, but D. omits य reading अध्वरस्य for यजनस्य; all for तस्य च यजनस्य.

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते' ॥

(भ. गी. १७. ११-१३)

इति । आश्वमेधिके पर्वणि द्विजातिप्रभृतिसृष्टेर्यज्ञार्थत्व-प्रतिपादनेन प्रस्तूयते—

'यजनार्थं द्विजाः सृष्टास्तारका दिवि देवताः ।
गावो यज्ञार्थमुत्पन्ना दक्षिणार्थं तथैव च ॥
सुवर्णं रजतं चैव पात्री-कुम्भार्थमेव च ।
इध्मार्थमथ यूपार्थं ब्रह्मा चक्रे वनस्पतीन् ॥
ग्राम्याऽऽरण्याश्च पशवो जायन्ते यज्ञकारणात्' ।

(वृ. गौ. स्मृ. १५.६३-७७)

इति । हारीतोऽपि अन्वय-व्यतिरेकाभ्यां यज्ञमहिमानं दर्शयति—

'यज्ञेन लोका विमला विभान्ति
यज्ञेन देवा अमृतत्वमाप्नुवन् ।

---

१. A. reads यः instead of यम. २. A. G. and I. read द्विजातिसृष्टेः for द्विजातिप्रभृतिसृष्टेः; while all others merely omit -प्रभृति-. ३. A. and I. read प्रशस्यते for प्रस्तूयते. We think that the author supposing that the conversation being between Yudhishthira and Krishna, his memory have failed him, and he mentioned it as from Mahâbhârat, but we find it in Vriddha Gowtam Sanhitâ 15, from 74-79, and this conversation is between Yudhishthira and Krishna. ४. A. reads पात्रं कुम्भार्थमेव च for पात्रीकुम्भार्थमेव च. ५. All except D. read वनस्पतिम् for वनस्पतीन्. ६. A. omits अपि. ७. D. reads प्रदर्शयति instead of simply दर्शयति.

यज्ञेन पापैर्बहुभिर्विमुक्तः
प्राप्नोति लोकानजरस्य विष्णोः ॥
नास्त्ययज्ञस्य लोको वै नायज्ञो विन्दते शुभम् ।
अनिष्टयज्ञो ऽपूतात्मा भ्रश्यति छिन्नपर्णवत्' ॥

इति । यज्ञविशेषास्त्वग्निहोत्रादयः । तथा च श्रूयते— 'प्रजापतिर्यज्ञानसृजताग्निहोत्रं चाग्निष्टोमं च पौर्णमासीं चोक्थ्यं चामावास्यां चातिरात्रं च'—इति । अग्निहोत्रादीनां संस्कृतैरग्निभिः साध्यत्वात् तत्संस्कारकमाधानमादावनुष्ठेयम् । तत्र प्रजापतिः—

'सर्वसंस्थाधिकारः स्यादाहिताग्नेर्धने सति ।
आदध्यान्निर्धनोऽप्यग्निं नित्यं पापभयात् द्विजः' ॥

इति । अकरणे प्रत्यवायः कूर्मपुराणे दर्शितः—

'नास्तिक्यादथवा ऽऽलस्याद्यो ऽग्नीन्नाऽऽधातुमिच्छति ।
यजेत वा न यज्ञेन स याति नरकान् बहून् ॥
तस्मात्सर्वप्रयत्नेन ब्राह्मणो हि विशेषतः ।
आधायाग्नीन् विशुद्धात्मा यजेत परमेश्वरम्' ॥

(कू. पु. १. २. २४. ७,१०)

---

१. All except D. read -नमरस्य for -नजरस्य. २. All except A. and . read नश्यति. for भ्रश्यति. ३. B. C. and F. read तत्संस्कारकर्माधानाद्या-,). तत्संस्कारसाधनमाद्या-, and E. तत्संस्कारकसाधनत्वेन आधानमाद्य-; ll for तत्संस्कारकमाधानमाद्य-. ४. A. substitutes -वनुमेयम् for -वनुष्ठेयम्. : We read with A., but all others read the following:—सर्वयज्ञा- धिकारी स्यादाहिताग्निर्धने सति ।. ६. All except A. read पापक्षयात् instead f पापभयात्. ७. D. substitutes अभिहितः for दर्शितः; while H. omits oth. ८. A. omits -यो. ९. A. substitutes वा for हि. १०. All read अग्निं for -अग्नीन्.

इति । श्रुतिश्च कालादिविशिष्टमाधानं विधत्ते–

'वसन्ते ब्राह्मणो ऽग्नीनादधीत । वसन्तो वै ब्राह्मणस्यर्तुः । स्व एवैनमृतावाधाय ब्रह्मवर्चस्वी भवति । ग्रीष्मे राजन्य आदधीत । ग्रीष्मो वै राजन्यस्यर्तुः । स्व एवैनमृतावाधाय इन्द्रियावी वीर्यवान् भवति । शरदि वैश्य आदधीत । शरद्वै वैश्यस्यर्तुः । स्व एवैनमृतावाधाय पशुमान् भवति' ।

इति । आश्वमेधिकेऽपि–

'वसन्ते ब्राह्मणस्य स्यादाधेयोऽग्निर्नराधिप ।
वसन्तो ब्राह्मणः प्रोक्तो वेदयोनिः स उच्यते ॥
अग्न्याधानं तु येनाथ वसन्ते क्रियते नृप ।
तस्य श्रीर्ब्रह्मवृद्धिश्च ब्राह्मणस्य विवर्द्धते ॥
क्षत्रियस्याग्निराधेयो ग्रीष्मे श्रेष्ठः स वै नृप ।
येनाधानं तु वै ग्रीष्मे क्रियते तस्य वर्द्धते ॥
श्रीः प्रजाः पशवश्चैव वित्तं चैव बलं यशः ।
शरत्काले तु वैश्यस्याप्याधानीयो हुताशनः ॥

---

१. A. reads ऽग्निमादधीत for ऽग्नीनादधीत. २. Except A. E. and H. all others read स एवैन- instead of स्व एवैन- repeating the same in the places of all स्व coming hereafter in the passage. ३. With the exception of B. all omit वीर्यवान् ; H. and I. besides this read इन्द्रियवान् for इन्द्रियावी of all others. ४. A. omits भवति but adds पर्वणि in its place. This quotation is also Vriddh Gowtama Sanhitâ 15, 46-52. ५. A. reads अग्न्याधेयं for अग्न्याधानं. ६. B. C. D. G. and H. read शरत्प्राप्ते ऽथ for शरत्काले तु; while E. शरत्काले ऽथ for the same.

शारद्वात्रैः[1] स्वयं वैश्यो वैश्ययोनिः स उच्यते।
शारद्याधानमेवं वै क्रियते येन[2] पाण्डव ॥
तस्य[3] वै श्रीः प्रजा ऽऽयुश्च पशवो ऽर्थश्च वर्द्धते'।
(वृ. गौ. स्मृ. १५. ४७–५२)

इति। आधानपूर्वकाश्च[4] यज्ञाः दर्शादयः। तथा च[5] वसिष्ठः—
'अवश्यं ब्राह्मणो ऽग्नीनादधीत। दर्श-पूर्णमासा-[6]
ऽऽग्रयणेष्टि-चातुर्मास्य-पशु-सोमैश्च[7] यजेत'।

इति। हारीतो ऽपि—
'पाकयज्ञान् यजेन्नित्यं हविर्यज्ञांस्तु नित्यशः।
सौम्यांस्तु विधिपूर्वेण य इच्छेत् ब्रह्म चाव्ययम्'[8] ॥

इति[9]। ते च गौतमेन दर्शिताः—
'अष्टका पार्वणश्राद्धं[10] श्रावण्याषाढी प्रौष्ठपदी
चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः। अग्न्याधे-[11]
यमग्निहोत्रं दर्श-पूर्णमासौ[12] चातुर्मास्यान्याग्रयणे-

---

१. A. reads शारद्वाग्निः instead of शारद्वात्रैः. २. All except A. read न for येन. ३. A. B. C. D. E. and F. read तस्यैव श्रीः for तस्य वै श्रीः; while H. reads तस्य श्रीर्वै for the same. ४. D. omits च. ५. D. reads for the sentence:—आधानपूर्वकार्याश्च यज्ञा दर्शादयस्तथा. ६. B. and F. read पूर्ण-दर्शमासा—for दर्श-पूर्णमासा-. ७. All except A. read पशु-सोमांश्च instead of पशु-सोमैश्च. ८. A. reads धर्ममव्ययम् for ब्रह्म चाव्ययम्. ९. इति is omitted by all. १०. B. C. and F. omit -श्राद्धं, and read पार्वणं श्रावण्यामयणी चैत्र्याश्वयुजीति सप्तपाक-&c.; G. reads अष्टकापार्वणश्राद्धश्रावण्यामयणीचैत्र्याश्व- &c.; H. reads अष्टका-पार्वणश्राद्धे चैत्र्याश्वयु-; and A. reads अष्टका-पार्वणश्राद्धे श्रावण्यामहायणीचैत्र्याश्वयुजीति &c. ११. B. reads आग्न्याधेयमग्निहोत्रं for अग्न्याधेयमग्निहोत्रं. १२. B. C. F. and H. read दर्शपूर्णमास्ये; D. दर्शपूर्णमास्य-; both for दर्शपूर्णमासौ; and A. reads दर्शपूर्णमासावाग्रयणं चातुर्मास्यम् for दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टि-.

ष्टिर्निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्यामः इति सप्त सोमसंस्थाः'।
(गौ. स्मृ. ८. ३.)

इति । अपरांस्तु महायज्ञक्रतून् देवलो दर्शितवान्—

'अश्वमेध-राजसूय-पौण्डरीक-
गोसवादयो महायज्ञक्रतवः'।

इति । एते सर्वे यज्ञाः यथायोगं नित्य-नैमित्तिक-काम्य-भेदेन त्रिविधाः—

'नित्यं नैमित्तिकं काम्यं त्रिविधं कर्म पौरुषम्'।
(मा. पु. ३४. ४)

इति मदालसोक्तेः । तत्र यज्ञानां नित्यत्वं कुथुमशाखायां श्रूयते—

'मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि । तान्याचरथ नियतम्
(मुं. उ. १. २. १)

इति । वाजसनेयिशाखायामपि—

'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः'।
(ई. उ. २)

इति ।

---

१. D. inserts -याग- between सोम- and -संस्थाः. २. A. reads महायज्ञाः क्रतवः for महायज्ञक्रतवः. ३. With the exception of A. all read अत्र for सप्त. ४. A. reads अथर्वणशाखायां for कुथुमशाखायां ५. A. reads तान्याहरथ for तान्याचरथ.

'एतद्वै[1] जरामर्यमग्निहोत्रं जरसा[2]
वा ह्येवास्मान्मुच्यते मृत्युना च'[3]।
(म. ना. उ. २९. १)

इति च। विधिवाक्येषु च[4] जीवनाद्युपबन्धस्तु नित्यत्व-लक्षकः। तद्यथा[5]—

'यावज्जीवमग्निहोत्रं जुहुयात्'।
'यावज्जीवं दर्श-पौर्णमासाभ्यां[6] यजेत'।
'वसन्ते[7] वसन्ते ज्योतिषा यजेत'।

इति। अकरणे प्रत्यवायश्च नित्यत्वगमकः। तथा चार्थर्वणे[8] श्रूयते—

'यस्यानग्निहोत्रमदर्श-पौर्णमासमचातुर्मास्यम-[9]
नाग्रयण-मतिथिवर्जितं वा[10]ऽहुतमवैश्वदेवमवि-
धिना हुतमासप्तमांस्तस्य लोकान् हिनस्ति-'
(मु. उ. १. २. ३)

इति। तथा[11] च[12] श्रुत्यन्तरम्[13]—

'यस्य पिता पितामहो वा
सोमं न पिबेत् स व्रात्यः'।

---

१. B. reads एतद्वैराजमयमग्निहोत्रं for एतद्वै जरामर्यमग्निहोत्रं. २. Except A. all others read जरया for जरसा. ३. B. C. and F. read मृत्युना वेति च for मृत्युना च'. ४. All but A. replace च by तु. ५. A. reads simply तथा for तद्यथा. ६. A. and H. read दर्श-पूर्णमासाभ्यां. for दर्श-पौर्णमासाभ्यां. ७. A. omits expression वसन्ते वसन्ते ज्योतिषा यजेत; D. reads वसन्ते only once. ८. D. reads चाथर्वण: for चाथर्वणे. ९. B. C. and F. read -होत्रमदर्शमचातुर्मास्यमपौर्णमासमना- for -होत्रमदर्श-पौर्णमासमचातुर्मास्यमना-, All others omit only अचातुर्मास्यम्. १०. A. and D. read चाहुत- for वाहुत-. ११ D. reads यथा for तथा. १२. All except A. omit च. १३ H. reads श्रुत्यन्तरे.

इति । जीवन-कामनाव्यतिरिक्तं गृह-दाहाद्यनियत-निमित्तमुपजीव्य प्रवृत्तं नैमित्तिकम् । तथा च श्रुतिः—

'यस्य गृहान् दहत्यग्निरग्नये क्षाम-
वते पुरोडाशमष्टाकपालं निर्वपेत्' ।

इति । कामनया प्रवृत्तं काम्यम् । तद्यथा—

'वायव्यं श्वेतमालभेत भूतिकामः' ।

(तै. सं. २. ३. १)-

इत्याद्याः काम्यपशवः ।

'ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः' ।

(तै. सं. २. २. ६)

इत्याद्याः काम्येष्टयः । तत्र काम्यानां कामितार्थसिद्धिः फलम् । नित्य-नैमित्तिकयोस्तु यथाविध्यनुष्ठितयोरिन्द्रलोकप्रापकत्वमाथर्वणे श्रूयते—

'काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुची च देवी
लेलायमाना इति सप्त जिह्वाः ॥

१. A. reads —व्यतिरिक्तगृह- instead of -व्यतिरिक्तं गृह- separate. २. A. reads गृहं दहत्यग्नये for गृहान्दहत्यग्निरग्नये D. omits the word अग्निः. ३. E. reads विनिर्वपेत् for निर्वपेत्; H. adds च before निर्वपेत्. ४. After भूतिकामः A. continues in the inverted commas वायुर्वै क्षेपिष्ठा देवता. ५ A. reads चापि for या च. ६. A. reads लेलीयमाना for लेलायमाना; H. reads लालायमाना for the same.

एतेषु यश्चरते भ्राजमानेषु
यथाकालं चाहुतयो ह्याददायन् ।
तं नयन्त्येताः सूर्यस्य रश्मयो
यत्र देवानां पतिरेकोऽधिवासः ॥
एह्येहीति तमाहुतयः सुवर्चसः
सूर्यस्य रश्मिभिर्यजमानं वहन्ति ।
प्रियां वाचमभिवदन्त्योऽर्चयन्त्य
एष वः पुण्यः सुकृतो ब्रह्मलोकः' ॥

(मुं. उ. १

इति । आनुशासनिके अपि—

'सुशुद्धैर्यजमानैश्च ऋत्विग्भिश्च तथाविधैः
शुद्धैर्द्रव्योपकरणैर्यष्टव्यमिति निश्चयः ॥
तथाकृतेषु यज्ञेषु देवानां तोषणं भवेत् ।
तुष्टेषु देवसङ्घेषु यज्वा यज्ञफलं लभेत् ॥
देवाः सन्तोषिता यज्ञैर्लोकान् संवर्द्धयन्त्युत ।
उभयोर्लोकयोर्देवि भूतिर्यज्ञे प्रदृश्यते ॥
तस्माद्यज्ञाद्दिवं याँति अमरैः सह मोदते ।
नास्ति यज्ञसमं दानं नास्ति यज्ञसमो विधिः ।
सर्वधर्मसमुद्देशो देवि यज्ञे समाहितः' ॥

---

१. G. omits the whole passage from श्वेतमालभेत भूतिकामः &c., up to यथा both inclusive. २. G. repeats तं twice. ३. C. D. and F. read सुशुभैः for सुशुद्धैः. ४. D. reads तथाकृतैः for तथाविधैः. ५. A. substitutes यज्ञी for यज्वा; D. reads यज्ञात् for the same. ६. A. C. E. F. and G. read भूतिर्यज्ञैः प्रदृश्यते ; B. reads भूतिर्यज्ञः प्रदृश्यते; H. reads प्रदर्श्यते for प्रदृश्यते, all for भूतिर्यज्ञे प्रदृश्यते. ७. D. reads यान्ति for याति. ८. D. reads देव यज्ञे for देवि यज्ञे.

इति । यदि कथञ्चिन्नित्यकर्माणि लुप्येरन् तदा तत्स-
माधानमाह प्रजापतिः—

'दर्शं च पूर्णमासं च लुप्त्वा ऽथोभयमेव वा ।
एकस्मिन् कृच्छ्रपादेन द्वयोरर्द्धेन शोधनम् ॥
हविर्यज्ञेष्वशक्तस्य लुप्तमप्येकमादितः ।
प्राजापत्येन शुध्येत पाकसंस्थासु चैव हि ॥
सन्ध्योपासनहानौ तु नित्यस्नानं विलोप्य च ।
होमं च नैत्यकं शुध्येद गायत्र्यष्टसहस्रकृत् ॥
समाऽन्ते सोमयज्ञानां हानौ चान्द्रायणं चरेत् ।
अकृत्वाऽन्यतमं यज्ञं यज्ञानामधिकारतः ॥
उपवासेन शुध्येत पाकसंस्थासु चैव हि ' ।

इति । कात्यायनो ऽपि—

'पितृयज्ञात्यये चैव वैश्वदेवात्ययेऽपि च ।
अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा ॥
भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् ' ।

(का. स्मृ. ३. १८. १९-२०)

इति । विहितदक्षिणापर्याप्तद्रव्याभावेऽपि नित्यं न लोप-
येत् । तदाह बौधायनः—

---

१. D. reads यदा कथञ्चित् for यदि कथञ्चित्. २. B. C. and F. read लुप्त्वा चोभय- for लुप्त्वा ऽथोभय-. ३. B. C. D. and F. replace वा by च. ४. B. C. E. F. and G. read तु लोप्य च for विलोप्य च; A. reads विलुप्य च for the same. ५. A. and D. read होमं नैमित्तिकं for होमं च नैत्यकम्; G. reads होमं च नैत्यिकं for the same. ६. All except A. read द्रव्यालाभेऽपि न for द्रव्याभावेऽपि न. ७. A. B. C. and F. read बोधायन for बौधायनः.

'यस्य नित्यानि लुप्तानि तथैवाऽऽगन्तुकानि च।
विपर्यपि न स स्वर्गं गच्छेत्तु पतितो हि सः॥
तस्मात् कन्दैः फलैर्मूलैर्मधुना ऽऽज्यरसेन वा।
नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेत्'।

इति। ननु—सम्पूर्णद्रव्यसम्पत्तावेव सोमयागः कार्यः। तदाह मनुः—

'यस्य त्रैवार्षिकं वित्तं पर्याप्तं भृत्यवृत्तये।
अधिकं वाऽपि विद्येत स सोमं पातुमर्हति'॥

इति। याज्ञवल्क्योऽपि— (म. स्मृ. ११. ७)

'त्रैवार्षिकाधिकान्नो यः स हि सोमं पिबेद्द्विजः'।

(या. स्मृ. १. १२४)

इति। त्रैवार्षिकान्नालाभे सोमयागादर्वाचीना दर्शादय एव कार्याः। एतदपि स एवाह—

'प्राक् सौमिकीः क्रियाः कुर्याद्यस्याऽन्नं वार्षिकं भवेत्'।

(या. स्मृ. १. १२४)

इति। अल्पधनस्य यज्ञो मनुना निषिध्यते—

'पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः।
न त्वल्पदक्षिणैर्यज्ञैर्यजेताऽथ कथञ्चन॥
इन्द्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजाः पशून्।
हन्त्यल्पदक्षिणो यज्ञस्तस्मान्नाऽल्पधनो यजेत्'॥

(म. स्मृ. ११. ३९–४०)

---

१. A. reads सुपथस्थोऽपि न for विपर्यपि न स; G. and D. विपदिस्थो ऽपि न, and B. C. F. विपद्य सोऽपि न for the same. २. A. and D. read मधुनाथ ...न for मधुनाऽऽज्यरसेन. ३. A. reads -वृत्तये for -वृत्तये. ४. D. reads सौमिकी क्रिया dropping the visarga; E. reads सौमिकीं क्रियां both for सौमिकीः क्रियाः. ५. D. reads यजेताऽपि for यजेताऽथ; and G. यजेतान्वय ...ञ्चन for यजेताथ कथञ्चन. ६. All but A. read प्रजां for प्रजाः.

इति । मत्स्यपुराणे ऽपि—

'अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनस्तथर्त्विजः ।
आत्मानं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः' ॥
(म. स्मृ. ११. ४१)

इति । एवञ्च सत्येतानि वचनानि 'कन्दैर्मूलैः' इत्यादिवचनेन विरुद्ध्येरन्—इति चेत् । मैवम् । एतेषां वचनानां काम्ययागविषयत्वात् । 'सम्पूर्णानुष्ठानशक्तौ सत्यामेव काम्यं कर्तव्यम्'—इति षष्ठाध्याये मीमांसितम् । तथा हि—'ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः'—इत्यत्र किं यथाशक्तिप्रयोगेणाप्यधिकारः? उत सर्वांगोपसंहारेण?—इति संशयः । नित्येषु यथाशक्तिप्रयोगस्य पूर्वाधिकरणे निर्णीतत्वात् काम्येष्वपि तथा—इति प्राप्ते ब्रूमः । नित्यानामसमर्थेनाप्यपरित्याज्यत्वात् तत्र यथाशक्तिप्रयोगः । अपरित्याज्यानि हि नित्यानि । जीवनादिनिमित्तवशेन तत्प्रवृत्तेः । नैमित्तिकं प्रत्यप्रवर्तकत्वे निमित्तत्वमेव हीयेत । कामना तु न निमित्तं येनावश्यमिष्टिं प्रवर्त्तयेत् । अतो न काम्यस्याऽपरित्याज्यत्वम् । तथा सति फलसिद्ध्यर्थमेव काम्यस्यानुष्ठेयत्वात् फलस्य च कृत्स्नाङ्गोपकृतप्रधानमन्तरेणानिष्पत्तेः । यदा कृत्स्नाङ्गानुष्ठानशक्तिस्तदैव काम्यमनुष्ठेयम्—इति सिद्धान्तः ॥

॥ इति यजनप्रकरणम् ॥

---

१. B. C. and F. read तथर्त्विजम for तथर्त्विजः. २. G. reads -प्यधिकारस्तु for -प्यधिकारः. ३. D. and G. omit प्राप्ते. ४. D. replaces तत्र by तथा. ५. A. reads यथाप्रशक्ति- for यथाशक्ति-. ६. H. reads -मिष्टं for -मिष्टिं. ७. G. reads कामस्य- for काम्यस्य-. ८. A. reads कृत्स्नांगानुष्ठाने शक्तिः for कृत्स्नाङ्गानुष्ठानशक्तिः. ९. D. omits इति यजनप्रकरणम्.

इत्थं यजनं निरूपितं याजने तु विधिः श्रूयते—
'द्रव्यमर्जयन् ब्राह्मणः प्रतिगृह्णीयाद्याजयेदध्यापयेद्वा' । न चायं नित्यविधिः । अकरणे प्रत्यवायादिनित्यलक्षणाभावात् । अपि तु काम्यविधिः । द्रव्यार्जनकामस्य तत्राधिकारात् । तत्रापि नापूर्वविधिः । जीवनोपायत्वेन याजनस्य प्राप्तत्वात् । तद्धेतुत्वं च मार्कण्डेयपुराणे दर्शितम्—

'याजनाध्यापने शुद्धे तथा शुद्धः प्रतिग्रहः ।
एषा सम्यक् समाख्याता त्रिविधा तस्य जीविका' ॥
(मा. पु. २८. ४)

इति । नापि परिसंख्या । नित्यप्राप्तेरभावात् । तस्मात् पक्षे प्राप्तत्वान्नियमविधिरयम् । स चायं नियमः पुरुषार्थ एव । न तु क्रत्वर्थः । द्रव्यार्जनविधानस्य पुरुषार्थत्वेन लिप्सासूत्रे विचारितत्वात् ।

तथा हि—द्रव्यप्राप्तिः क्रत्वर्था पुरुषार्था वा?—इति संशयः । तत्र पूर्वः पक्षः क्रत्वर्थेयम् । तथा सति नियमस्यार्थवत्त्वात् । ब्राह्मणस्य याजनादिना क्षत्रियस्य जयादिना वैश्यस्य कृष्यादिना—इति नियमः । स च पुरुषार्थपक्षे ऽनर्थकः स्यात् ।

---

१. A. reads द्रव्यमार्जयन् for द्रव्यमर्जयन्. २. We read with A.; and B. E. G. H. read पूतप्रतिग्रहः; and C. D. F. पूतःपरिग्रहः for शुद्धः प्रतिग्रहः. ३. B. C. D. F. and H. read त्रितयं instead of त्रिविधा. ४. H. reads नैत्यमविधिः for नियमविधिः. ५. A. C. and F. read पूर्वपक्षः for पूर्वः पक्षः; and D. reads पूर्वपक्षे for the same. ६. B. C. F. and H. read तथापि for तथा सति; E. reads तथा हि; while G. only तथा. ७. A. omits क्षत्रियस्य जयादिना.

उपायान्तरेणार्जितस्यापि द्रव्यस्य क्षुत्प्रतिघातादिपुरुषार्थसम्पादकत्वात् । क्रतुस्तु नान्यथा सिद्ध्यति । अतस्तत्र नियमो ऽर्थवान्–इति प्राप्ते ब्रूमः । द्रव्यं हि सम्पादितं सत् पुरुषं प्रीणयति । अतस्तस्य पुरुषार्थत्वं प्रत्यक्षं दृष्टम् । क्रत्वर्थता तु नियमान्यथाऽनुपपत्त्या कल्प्यते । क्लृप्तं च कल्प्याद्बलीयः । सति च पुरुषार्थत्वे क्रतोरपि भोजनादिवत् पुरुषकार्यतया तदर्थता ऽप्यर्थात् सम्पद्यते । नियमस्तु पुरुषार्थे ऽप्यर्जनविधौ किञ्चिददृष्टं जनयिष्यति । क्रत्वर्थत्ववादिना जीवनलोपेन क्रतुरपि न सिध्येत् । अतः पुरुषार्थो याजनादिः–इति सिद्धम् ।

ऋत्विग्भिर्विना याजयिता ऽन्यो न को ऽप्यस्ति–इति चेत् । मैवम् । आपस्तम्बसूत्रे षोडशानामृत्विजां वरणमभिधाय याजयितुः सप्तदशस्य पृथग्वरणाभिधानात्–

'सदस्यं सप्तदशं कौषीतकिनः समामनन्ति । स कर्मणामुपद्रष्टा भवति '–इति । अत एव वसिष्ठवंशोत्पन्नस्य सात्यहव्यनामकस्य महर्षेः प्रश्नवाक्ये देवभागस्य सृञ्जयनामकान् ब्राह्मणान् प्रति याजकत्वं तैत्तिरीयकब्राह्मणे श्रूयते–

'वासिष्ठो ह सात्यहव्यो देवभागं पप्रच्छत् सृञ्जयान् बहुयाजिनो यजे'– तै. सं. ६. ६. २)

---

१. D. reads नियमो ऽनर्थवानिति. for नियमो ऽर्थवानिति. २. A. reads प्रत्यक्षं द्रष्टव्यम instead of प्रत्यक्षदृष्टम्. ३. H. in the original has क्लृप्तं च but in the margin it has been corrected to श्रुतं च. ४. A. omits च. ५. A. and D. read पुरुषार्थतया for पुरुषकार्यतया. ६. A. reads क्रत्वर्थवादिनो for क्रत्वर्थत्ववादिनां. ७. B. C. and F. read सिध्येत for सिध्येत्. ८. A. substitutes तस्मात् for अतः; while B. C. D. and F. omit both. ९. D. reads ऋत्विग्भिर्विना instead of ऋत्विग्भिर्विना. १०. D. omits अस्ति. ११. All except I. omit the following from मैवम् up to वर्णाभिधानात् both inclusive in the next line. १२. A. reads सत्यहव्यनामकस्य instead of सात्यहव्यनामकस्य.

इति। तथा कौषीतकिब्राह्मणे चित्रनामकं प्रति श्वेतकेतो-र्याजकत्वमाम्नातम्—

'चित्रो ह वै गार्ग्यायणिर्यक्षमाण आरुणिं वव्रे। स ह पुत्रं श्वेतकेतुं प्रजिघाय याजयेति'—

इति। तस्माद् ऋत्विग्भ्योऽन्यः सदस्यो याजयिता। ऋ-त्विजो वा याजयितारः सन्तु। सर्वथाऽप्यस्ति ब्राह्मणानां जीवनहेतुर्याजनम्।

तत्रेतिकर्त्तव्यतारूपेण कृष्णाजिन-वाससोरन्यतरेणोपवीति-त्वं तैत्तिरीयके विधीयते—

'तस्माद्यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा यज्ञस्य प्रसृत्या अजिनं वासो वा दक्षिणत उपवीय'— (तै. आ. २.१)

इति। मन्त्रेषु ऋष्यादिज्ञानं च याजनाङ्गत्वेन छन्दो-गब्राह्मणे समाम्नायते—

'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा स्थाणुं वर्च्छति गर्त्तं वा पद्यते प्र वा मीयते पापीयान् भवति। यातयामान्यस्य छन्दांसि भवन्ति। अथ यो मन्त्रे मन्त्रे वेद सर्वमायुरेति। श्रेयान् भवति। अयातयामान्यस्य च्छन्दांसि भवन्ति। तस्मादेतानि मन्त्रे मन्त्रे वेद्यात्'—(छं. ब्रा. ३. ७. ५)इति।

---

१. A. reads कौषातकिब्राह्मणे for कौषीतकिब्राह्मणे. २. A. reads चित्रो ह वै for चित्रोऽङ्गवो. ३. We read with A.; all others read -यक्षमाणमारुणिं for -यक्षमाण आरुणिं. ४. A. reads प्रतिहूय for प्रजिघाय. ५. D. omits the whole quotation तस्मात् &c., up to इति after the sentence. ६. B. C. D. E. and F. read मन्त्रे instead of मन्त्रेषु; and G. H. read मन्त्र-ऋष्यादि-. ७. G. reads गर्तं वा पाद्यते for गर्तं वा पद्यते. ८. A. E. G. and H. प्रवामी-यते for वा मियते. ९. A. omits वेद.

ननु—कश्चित् याजनस्य[१] कश्चित् प्रतिग्रहस्य च निन्दितत्वात्[२] तदनुष्ठानवतः स्वाध्याय-गायत्र्योर्जप आम्नायते—

'रिच्यत इव वा एष प्रैव[३] रिच्यते यो याजयति प्रति वा गृह्णाति। याजयित्वा प्रतिगृह्य वाऽनश्नन् त्रिःस्वाध्यायं वेदमधीयीत। त्रिरात्रं वा सावित्रीं गायत्रीमन्वातिरेचयति'— (तै. आ. २. १५)

इति। तथाऽन्यत्रापि—

'दुहे ह वा एष छन्दांसि यो याजयति स येन यज्ञक्रतुना याजयेत्। सोऽरण्यं परेत्य शुचौ देशे स्वाध्यायमेवैनमधीयन्नासीत। तस्यानशनं दीक्षा, स्थानमुपसदः, आसनस्य सुत्या, वाग् जुहूः, मन उपभृत्, धृतिः स्रुवा, प्राणो हविः, सामाऽध्वर्युः, स वा एष यज्ञः प्राणदक्षिणोऽनन्तदक्षिणः समृद्धतरः'। (तै. आ. २. १६)

इति चेत्। नायं दोषः। तस्य अयाज्ययाजनविषयत्वात्। जीवितात्ययमापन्नस्य प्राणरक्षणार्थमयाज्ययाजनमपि सम्भाव्यते। तथा च वाजसनेयब्राह्मणम्—

'प्राणस्य वै सम्राट्कामायायाज्यं याजयति अप्रतिग्राह्यस्य वा प्रतिगृह्णाति'— (बृ. उ. ४. १. ३)

इति। तत्र प्रायश्चित्तं छन्दोगा आमनन्ति—

---

१. All except A. read यजनं for याजनस्य; and omit the following:— कश्चित् प्रतिग्रहस्य च. २. B. C. E. F. and H. read निन्दितत्वात् instead of निन्दितत्वात्. ३. All except A. omit वा. ४. A. and G. read प्रेव for प्रैव. ५. All except A. omit the whole of the remaining beginning with तस्यानशनं; and ending with समृद्धतरः in the next but one line. For इति चेत् they all read only इति. ६. None of the copies referred mention तस्य, but we think that the connection requires it here. ७. B. C. E. F. and H. read प्राणरक्षार्थम् for प्राणरक्षणार्थम्. ८. D. omits अपि. ९. B. C. D. E. F. and G. read अप्रतिगृह्यस्य; and H. reads अप्रतिगृह्य, and all omit वा.

'तदा अयाज्ययाजने दक्षिणास्त्यक्त्वा मासं चतुर्थकाले भुञ्जानः तन्मन्त्रान् गायेत्'—छं. ब्रा. ९. १. ३)

इति । तथा सुमन्तुरपि स्मरति—

'शूद्रयाजकः सर्वद्रव्यपरित्यागात् पूतो भवति । अभिशस्त-पतित-पौनर्भव-भ्रूणह-पुंश्चल्यशुचि-शस्त्रकार-तैलिक-चाक्रिक-ध्वजि-सुवर्णकार-वर्मकार-पङ्कक-वर्धकि-गण-गणिक-सौनि-क-व्याध-निषाद-रजक-बुरुड-चर्मकारा अभोज्यान्ना अप्रति-ग्राह्या अयाज्याश्च' ।

इति । तथा च वसिष्ठः—

'दक्षिणात्यागाच्च पूतो भवतीति विज्ञायते' ।

इति । तथा बौधायनोऽपि—

*'बहुप्रतिग्राह्यस्य वा प्रतिगृह्य अयाज्यं वा याजयित्वा

* अत्रेदमशुद्धमिव प्रतिभाति । बौधायनस्मृतौ तु—'बहु प्रतिग्रा-ह्यस्याऽप्रतिग्राह्यस्य वा प्रतिगृह्य अयाज्यं वा याजयित्वा अनाश्याऽन्नस्य वा ऽन्नमशित्वा तरत्समन्दीयं जपेदिति' ।

१. A. omits तदा; H. reads तदीयाज्ययाजने for तदा अयाज्ययाजने. २. D. reads दक्षिणां instead of दक्षिणाः. ३. B. C. and F. read -जाने इत्येतद्धारयेदिति; E. reads जान इत्येतद्धुपायेदिति; G. जान इत्येतदद्धुपापयेदिति; and H. जानीतेत्येतद्धारयेदिति all for तन्मन्त्रान् गायेदिति. ४. All except A. and D. read शूद्रद्रव्यपरित्यागात् for सर्वद्रव्यपरित्यागात्. ५. Excepting A. and I. others read -वस्त्रकार-; G. reads -वस्त्रकारि-, for -शस्त्रकार-. ६. A. reads आलिरव्यक- for -वर्मकार-; and omits -बुरुड-; B. C. and F. read -वेश्मक- for -वर्मकार- with no other difference; E. reads after -सुवर्णकार-, चर्मक-पङ्कु-बान्धकिमैव-गाणिक-सौनिक-व्याध-निषाद-रजक-बुरुड-वर्मकाराः for all that follows in the text; G. continues after स्वर्णकार, चर्मकार-पङ्कु-बन्धकिलागणिक- all the rest is that given in the text with the exception -चर्मकार- for which it substitutes वर्मकाराः; and H. proceeds after -सुवर्णकार-, वर्मकर-पङ्कु-बन्धकि- all the remaining being that of the text except -बुरुड- for which it reads -वरुड-. ७. A. reads विज्ञायत for विज्ञायते. ८. B. C. D. and E. read बहुप्रतिग्राह्यस्य for बहुप्रतिग्राह्यस्य. ९. All except A. omit वा.

नाद्यात् । तस्य चान्नमशित्वा तरत्समन्दीयं जपेत्'
(बौ. स्मृ. २. २. ९. ८)

इति । अयाज्ययाजकलक्षणं देवलेन दर्शितम्—

'यः शूद्रान् पतितांश्चापि याजयेदर्थकारणात् ।
याजितो वा पुनस्ताभ्यां ब्राह्मणो ऽयाज्ययाजकः' ॥

इति ।

॥ इति याजनप्रकरणम् ॥

तदेवं याजनं निरूपितम् । अथ दान-प्रतिग्रहौ निरूप्येते। तत्र दानविषया श्रुतिः—

'दानमिति सर्वाणि भूतानि प्रशंसन्ति ।
दानान्नातिदुर्धरं तस्माद्दाने रमन्ते'—
(म. ना. उ. २१. २)

इति । तथा वाक्यान्तरमपि—

'दानं यज्ञानां वरूथं दक्षिणा लोके दातारं सर्वभूतान्युपजीवन्ति । दानेनारातीनपानुदन्त । दानेन द्विषन्तो मित्रा भवन्ति । दाने सर्वं प्रतिष्ठितम् । तस्माद्दानं परमं वदन्ति'—
(म. ना. उ. २२. १.)

अयमेव पाठो युक्तः । प्रतिग्राह्यस्य बहु प्रतिगृह्य अप्रतिग्राह्यस्य वा प्रतिगृह्येति योजना । प्रतिग्राह्यस्यापि बहुप्रतिग्रहो निषिद्धः । 'यावता पञ्चयज्ञानां क्रतुर्निर्वहणं भवेत्' इत्यादिना मूले स्पष्ट एव ।

---

१. A. reads नाद्यात् for नाद्यात्. २ A. D. and G. substitute वा for च. ३. A. omits तरत्समन्दीयं जपेदिति. ४. E. reads only अयाजकलक्षणं for अयाज्ययाजकलक्षणं. ५. A. omits इति. ६. A. reads इत्थं for तदेवं. ७. B. C. D. E. and F. read भुतानि for भूतानि. ८. A. reads दुष्करम् for दुर्धरम्.

इति । आदित्यपुराणे ऽपि—

'न दानादधिकं किञ्चित् दृश्यते भुवनत्रये ।
दानेन प्राप्यते स्वर्गः श्रीर्दानेनैव लभ्यते ।।
दानेन शत्रून् जयति व्याधिर्दानेन नश्यति ।
दानेन लभ्यते विद्या दानेन युवतीजनः ।।
धर्मा-ऽर्थ-काम-मोक्षाणां साधनं परमं* स्मृतम्' ।

इति । एवं श्रुति-स्मृतिभ्यां प्रशंसापूर्वको दानविधिरु-[1]न्नीतः । याज्ञवल्क्यस्तु[2] साक्षाद्दानं व्यधत्त—

'दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः ।
याचितेनापि दातव्यं श्रद्धापूर्वं[3] तु शक्तितः ।। (२०३)
गो-भू-तिल-हिरण्यादि पात्रे दातव्यमार्चिते[4] ।
नाऽपात्रे विदुषा किञ्चिदात्मनः श्रेय इच्छता' ।।
(या. स्मृ. १. २०१)

इति । एतयोर[5]न्यतरः स्वरूपविधिः । इतरस्तु गुणविधिः । मनुरपि—

'दानधर्मं[6] निषेवेत नित्य-नैमित्तसंज्ञकम्[7] ।
परितुष्टेन भावेन[8] पात्रमासाद्य शक्तितः' ।।
(म. स्मृ. ४. २२७)

* अत्र 'दानं' इति शेषः ।

१. H. reads दानविधिराम्नातः instead of दानविधिरुन्नीतः. २. All except A. read याज्ञवल्क्यो. ऽपि for याज्ञवल्क्यस्तु. ३. B. C. and F. read -पूर्तं तु for -पूर्वं तु. ४. We read with A., while all others read -मार्चितम् for -मर्चिते. ५. A. D. E. G. and H. read तयोः for एतयोः. ६. A. and D. read दानं धर्मं for दानधर्मं. ७. B. C. G. and H. read नित्य-नैत्यक-पौष्टिकम् for नित्य-नैमित्तसंज्ञकम्, D. for the same reads नित्यमैत्तिक-पौष्टिकम्; while E. and F. read नित्य-नित्यक-पौ[illegible] D. reads [illegible]वेन for भावेन.

इति । वह्निपुराणे च अदाने वित्तवैयर्थ्योक्तिपुरःसरं दानं विहितम्–

'यस्य वित्तं न दानाय नोपभोगाय देहिनाम् ।
नापि कीर्त्यै न धर्माय तस्य वित्तं निरर्थकम् ॥
तस्माद्वित्तं समासाद्य दैवाद्वा पौरुषादथ* ।
दद्यात् सम्यग् द्विजातिभ्यः कीर्त्तनानि न कारयेत्' ॥

इति । विष्णुधर्मोत्तरे दानाभावे बाधमाह–

'सीदते द्विजमुख्याय यो ऽर्थिने न प्रयच्छति ।
सामर्थ्ये सति दुर्बुद्धिर्नरकायोपपद्यते' ॥

इति । ब्रह्मपुराणे ऽपि–

'सदाचाराः कुलीनाश्च रूपवन्तः प्रियंवदाः ।
बहुश्रुताश्च धर्मज्ञा याचमानाः परान् गृहान् ॥
दृश्यन्ते दुःखिताः सर्वे प्राणिनः सर्वदा मुने ।
अदत्तदाना जायन्ते परभाग्योपजीविनः' ॥

इति । व्यासो ऽपि–

'अक्षरद्वयमभ्यस्तं नास्तिनास्तीति यत् पुरा ।
तदिदं देहिदेहीति विपरीतमुपस्थितम्' ॥

---

* दैवं पुरुषकारश्चेत्युभावपि न पृथक्त्वेन कार्यकरणक्षमौ । दैव-पौरुषवादिनस्तु तयोरितरेतरानपेक्षत्वं साटोपं प्रतिपादयन्ति । तथापि 'उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः । दैवं पुरुषकारश्च निर्दिष्टौ कार्यसिद्धये' अयमेव सिद्धान्तः । उभयथापि प्राप्तं वित्तं देयमित्यर्थः ।

---

१. A. substitutes अग्नि- for वह्नि-. २. D. E. G. and H. omit अदाने ३. B. C. E. F. and H. read -व्यर्थोक्ति- for -वैयर्थ्योक्ति-; while G. read -व्यर्थोक्ति- for the same. ४. D. reads पुरुषाद्य for पौरुषादथ. ५. B. C. D. and F. read बाधकमाह for बाधमाह. ६. All except A. substitute तु for च. ७. A. B. C. D. and F. read दुःखिनः for दुःखिताः.

इति। स्कान्दे ऽपि—

'देहीत्येवं ब्रुवन्नर्थी जनं बोधयतीव सः।
यदिदं कष्टमर्थित्वं प्रागदानफलं हि तत्॥
एकेन तिष्ठता ऽधस्तादन्येनोपरि तिष्ठता।
दातृ-याचकयोर्भेदः कराभ्यामेव सूचितः॥
दीयमानं तु यो मोहात् गो-विप्रा-ऽग्नि-सुरेषु च।
निवारयति पापात्मा तिर्यग्योनिं व्रजेत्तु सः'॥

इति। शातातपो ऽपि—

'मा ददस्वेति यो ब्रूयात् गव्यग्नौ ब्राह्मणेषु च।
तिर्यग्योनिशतं गत्वा चाण्डालेष्वभिजायते'॥

(वृ. गौ. स्मृ. १४. ४५)

इति। दानस्य स्वरूपं तत्रेतिकर्त्तव्यतां च देवलो दर्शयति—

'अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनम्।
दानमित्यभिनिर्दिष्टं व्याख्यानं तस्य वक्ष्यते॥
द्विहेतु षडधिष्ठानं षडङ्गं षड्विपाकयुक्।
चतुःप्रकारं त्रिविधं त्रिणाशं दानमुच्यते॥
नाल्पत्वं वा बहुत्वं वा दानस्याभ्युदयावहम्।
श्रद्धा-भक्ती* च दानानां वृद्धि-श्रेयस्करे हि ते॥

* यस्मात् श्रद्धा च भक्तिश्च दानस्य वृद्धि-श्रेयस्करे तस्मादिमौ द्वौ [भवतः इति योजना।

१. A. omits इति. २. B. C. D. and F. read च इदं. ३. D. reads दस्वेति for मा ददस्वेति. ४. A. D. G. and H. read -ष्वपि जायते for अभिजायते. ५. D. reads दानस्वरूपं for दानस्य स्वरूपं. ६. A. E. and H. read द्विहेतुः for द्विहेतु. ७. A. reads त्रिनाशं for त्रिणाशं; त्रिवार्थ; G. त्रिवार्था and H. त्रिवार्थं; all for the same. ८. All except A. read श्रद्धाभक्तिश्च. for श्रद्धा-भक्ती च. ९. We read with , all others read वृद्धि-क्षयकरे for वृद्धि-श्रेयस्करे.

धर्ममर्थं च कामं च व्रीडा-हर्ष-भयानि च ।
अधिष्ठानानि दानानां षडेतानि प्रचक्षते ॥
पात्रेभ्यो* दीयते नित्यमनपेक्ष्य प्रयोजनम् ।
केवलं त्यागबुद्ध्या यत् धर्मदानं तदुच्यते ॥
प्रयोजनमुपेक्ष्यैव प्रसङ्गात् यत् प्रदीयते ।
तदर्थदानमित्याहुरैहिकं फलहेतुकम् ॥
स्त्री-पान-मृगया-ऽक्षाणां प्रसङ्गाद् यत् प्रदीयते ।
अनर्हेषु च रागेण कामदानं तदुच्यते ।
संसदि व्रीडया तुल्येष्वर्थो ऽर्थिभ्यः प्रयाचितः ॥
प्रदीयते च यद्दानं व्रीडादानमिति स्मृतम् ।
दृष्ट्वा प्रियाणि श्रुत्वा वा हर्षाद् यद्यत् प्रयच्छति ॥
हर्षदानमिति प्राहुर्दानं तद्धर्मचिन्तकाः ॥
आक्रोशा-ऽनर्थ-हिंसानां प्रतीकाराय यद्भयात् ।
दीयते वा ऽपकर्तृभ्यो भयदानं तदुच्यते ॥
दाता प्रतिग्रहीता च श्रद्धा देयं च धर्मयुक् ।
देश-कालौ च दानानामङ्गान्येतानि षड्विदुः ॥

---

* अधिष्ठानान्येव विवृणोति पात्रेभ्य इत्यादिना ।

---

१. D. reads -मनवेक्ष्य for -मनपेक्ष्य. २. A. reads धर्मबुध्या for त्यागबुध्या. ३. D. reads -वैदिकम for -रैहिकम्. ४. B. C. and F. read राजेन्द्र for रागेण. ५. For तुल्येष्वर्थो ऽर्थिभ्यः प्रयाचितः A. reads -स्तुत्या चार्थिभ्यो यत्प्रयाचितम्; and B. C. E. F. H. read स्तुत्या चार्थो ऽर्थिभ्यः प्रयाचितः. ६. A. omits तत् and reads -विचिन्तकाः for -चिन्तकाः. ७. A. and I. read आक्रोशनार्थे for आक्रोशानर्थ-, and D. -चित्तानां for -हिंसानां. ८. All others except A. read भवेत् for भयात्. ९. B. C. and F. read चापहारिभ्यो; and D. reads the whole line दीयते तापकर्तृभ्य तापदानं तदुच्यते; E. G. पापकर्तृभ्यः, and H. reads तत्प्रकर्तृभ्यः for वापकर्तृभ्यः. १०. D. has तु for च; and all others except A. D. read कर्मयुक् for धर्मयुक्.

अपापरोगी* धर्मात्मा दित्सुरव्यसनः शुचिः ।
अनिन्द्यजीवकर्मा च षड्भिर्दाता प्रशस्यते ॥
त्रिशुक्लः कृशवृत्तिश्च घृणालुः सकलेन्द्रियः ।
विमुक्तो योनिदोषेभ्यो ब्राह्मणः पात्रमुच्यते' ॥

इति । 'त्रिशुक्ल' इति त्रिभिर्माता-पित्राचार्यैः शिक्षितत्वेन शुद्धः ।

'शौचंशुद्धिर्महाप्रीतिरर्थिनां दर्शने तथा ।
सत्कृतिश्चाऽनसूया च दानश्रद्धेत्युदाहृता ॥
अपराबाधमक्लेशं स्वयत्नेनार्जितं धनम् ।
स्वल्पं वा विपुलं वा ऽपि देयमित्यभिधीयते ॥
यद्यत्र दुर्लभं द्रव्यं यस्मिन् काले ऽपि वा पुनः ।
दानार्हौ देश-कालौ तौ स्यातां श्रेष्ठौ न चान्यथा ॥
अवस्था-देश-कालानां पात्र-दात्रोश्च सम्पदा ।
हीनं वापि भवेच्छ्रेष्ठं श्रेष्ठं वा ऽप्यन्यथा भवेत् ॥
दुष्फलं निष्फलं हीनं तुल्यं विपुलमक्षयम् ।
नास्तिक-स्तेन हिंस्रेभ्यो जाराय पतिताय च ॥

---

* अङ्गान्येव विभजति अपापरागीत्यादिना ।

---

१. A. reads अव्याजतः for अव्यसनः if this reading is applied here the number shown in the text falls below, *i. e.*, it becomes only five. २. A. only reads शुक्लवृत्ति- for कृशवृत्ति-. ३. A. and I. read संवर्तेन्द्रियः for सकलेन्द्रियः; but this does not give good meaning. ४. A. and I. read शौचं शुद्धिः for शौचशुद्धिः. ५. I. only reads -रर्थिनो for -रर्थिनां. ६. A. and I. read दाने- for दान-. ७. A. and I. read आचारा- for अपरा-; this reading does not give good sense. We refer to the twelfth line from this line. ८. A. reads चा- for वा-. ९. All others except A. and I. read चोराय for जाराय; we do not accept this because स्तेन being in the verse before the word चोर gives the same meaning, therefore our reading gives good sense.

षड्विपाकयुगुद्दिष्टं षडेतानि विपाकतः ।
पिशुन-भ्रूणहन्तृभ्यां प्रदत्तं दुष्फलं भवेत् ॥
महदप्यफलं दानं श्रद्धया परिवर्जितम् ।
परबाधाकरं दानं स्फीतमप्यूनतां व्रजेत् ॥
यथोक्तमपि चेद्दत्तं चित्तेन कलुषेण तु ।
तत्तु सङ्कल्पदोषेण दानं तुल्यफलं भवेत् ॥
युक्ताङ्गैः सकलैः षड्भिर्दानं स्याद्विपुलोदयम् ।
अनुक्रोशवशाद्दत्तं दानमक्षयतां व्रजेत् ॥
ध्रुवमाजस्रिकं काम्यं नैमित्तिकमिति क्रमात् ।
वैदिको[8] दानमार्गोऽयं चतुर्धा वर्ण्यते[9] बुधैः[10] ॥
प्रपा-ऽऽराम-तडागादि सर्वकामफलं[11] ध्रुवम् ।
तदाऽऽजस्रिकमित्याहुर्दीयते यद्दिने दिने ॥
अपत्य-विजयैश्वर्य-स्त्री-बालार्थं यदिष्यते ।
इच्छासंज्ञं तु यद्दानं[12] काम्यमित्यभिधीयते ॥
कालापेक्षं क्रियापेक्षमर्थापेक्षमिति स्मृतम् ।
त्रिधा नैमित्तिकं प्रोक्तं सहोमं होमवर्जितम् ॥

---

१. All others except A. and I. read बाधकरं for बाधाकरं. २. All others except A. read कृतं for स्फीतं ; and D. reads remaining half line कृतं च न कृतं भवेत् । . ३. A. and I. read यद्दानं for चेद्दत्तं ; and E. G. H. read चेद्वृत्तं, but this does not give good sense. ४. B. C. E. F. and H. read यत्तु for तत्तु ; but this is not applicable to the past line. ५. D. reads -दोषेण for -दोषेण. ६. B. C. F. and H. read अनुक्रोशवता for अनुक्रोशवशात्; F. and G. read -वशाद्दत्तम्. ७. A. and D. read अक्षय्यतां for अक्षयतां. ८. A. reads दिव्यं च, and I. दैविको for वैदिको. ९. D. reads वर्णितो for वर्ण्यते. १०. All others except A. I. read द्विजैः for बुधैः. ११. A. D. and G. read फलप्रदं for फलं ध्रुवम् ; as the four divisions are quoted in the preceding line such as ध्रुवं, आजस्रिकं, काम्यम्, नैमित्तकम् the reading फलप्रदं is not applicable here. १२. D. reads तत् for यत्

तत्रोत्तमानि[1] चत्वारि मध्यमानि विधानतः ॥
अधमानि तु शेषाणि त्रिविधत्वमिदं विदुः ।
अन्न[2]-विद्या-मधु[3]-स्त्रीणां गो-भू-रुक्मा-ऽश्व-हस्तिनाम्[4] ॥
दानान्युत्तमदानानि उत्तमद्रव्यदानतः ।
विद्योदाच्छादनं[5] वासः परिभोगौषधानि च ॥
दानानि मध्यमानीति मध्यमद्रव्यदानतः ।
उपानत्-प्रेष्य-यानानि छत्र-पात्रा-ऽऽसनानि च ॥
दीप-काष्ठ-फलादीनि चरमं बहुवार्षिकम्[6] ।
बहुत्वादर्थजातानां संख्या शेषेषु नेष्यते ॥
अधमान्यवशिष्टानि सर्वदानान्यतो विदुः ।
इष्टं* दत्तमधीतं वा प्रणश्यत्यनुकीर्तनात् ॥
श्लाघा-ऽनुशोचनाभ्यां वा भग्नतेजा[7] विपद्यते ।
तस्मादात्मकृतं पुण्यं न वृथा परिकीर्तयेत्' ॥

इति[8] । नित्य-नैमित्तिक-काम्य-विमलाख्याश्चत्वारो दान-भेदाः पुराणसारे दर्शिताः । सात्त्विकादिभेदान् भगवानाह—

'दातव्यमिति यद्दानं दीयते ऽनुपकारिणे ।
[10]देशे काले च[9] पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥

---

*यदुक्तं त्रिणाशमिति तानेव त्रिविधान् नाशानाह । इष्टमित्यादिना ।

---

१. A. and I. read तत्रोत्तमानि, and D. reads न चोत्तमानि for तत्रोत्तमानि. २. D. reads अन्नविद्या for अन्न-विद्या-. ३. A. -मधु-वस्त्र- for-मधु-स्त्रीणां and D. H. read -मधुवाणां for the same. ४. D. reads -हस्तिनः for -हस्तिनाम्. ५. A. D. G. and H. read विद्यात् for विद्यात्. ६. A. reads -सात्त्विकं for -वार्षिकम्. ७. E. H. and I. read -तेजो for-तेजा-. ८. A. B. C. and F. omit इति. ९. I. alone takes च. १०. G. H. read काले देशे च for देशे काले च ; but such reading does not occur in गीता.

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् ॥
अदेश-काले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम्' ॥
(भ. गी. १७. २०-२२)

इति । तत्र फलविशेषो विष्णुधर्मोत्तरे दर्शितः-

'तामसानां फलं भुङ्क्ते तिर्यक्त्वे मानवः सदा ।
वर्णसङ्करभावेन वार्द्धके यदि वा पुनः ॥
बाल्ये वा दासभावेन नात्र कार्या विचारणा ।
अतोऽन्यथा तु मानुष्ये राजसानां फलं भवेत् ॥
सात्विकानां फलं भुङ्क्ते देवत्वे नात्र संशयः' ।

इति । तत्र दानपात्रमाह याज्ञवल्क्यः—

'न विद्यया केवलया तपसा वाऽपि पात्रता ।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते' ॥
(या. स्मृ. १. २००)

इति । यमोऽपि—

'विद्यायुक्तो धर्मशीलः प्रशान्तः
क्षान्तो दान्तः सत्यवादी कृतज्ञः ।
स्वाध्यायवान् धृतिमान् गोशरण्यो
दाता यज्वा ब्राह्मणः पात्रमाहुः' ॥

१. G. alone reads तिर्यक्त्वं for तिर्यक्त्वे. २. All except A. H. I. read समभा- for दासभा-, the reading समभावेन is marginally noted afterwards on H. by striking off that the समभाव. ३. D. and G. read राजसानां for राजसानां; this is quite contrary to what is meant by the author. ४. D. omits the word दान- before -पात्र-. ५ A. धर्मवान्. ६. This quotation cannot be found in the यमस्मृति (Calcutta Edition by Jivanand).

इति। वसिष्ठः—

'किञ्चिद्वेदमयं पात्रं किञ्चित् पात्रं तपोमयम्।
पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे'॥
(व. स्मृ. ६. २६ ; व्या. स्मृ. ४. ३३)

इति। बृहस्पतिः—

'आगमिष्यति यत् पात्रं तत् पात्रं तारयिष्यति'।
(व्या. स्मृ. ४. ३२)

इति। विष्णुधर्मोत्तरे—

'पतनात् त्रायते यस्मात् तस्मात् पात्रं प्रकीर्त्तितम्'।

इति। स्कन्दपुराणे पात्रविशेषो ऽभिहितः[१]—

'प्रथमं तु गुरोर्दानं दद्याच्छ्रेष्ठमनुक्रमात्[२]।
ततो ऽन्येषां च विप्राणां दद्यात् पात्रानुसारतः॥
गुरोरभावे तत्पुत्रं तद्भार्यां[३] तत्सुतां तथा।
पौत्रं प्रपौत्रं दौहित्रमन्यं वा तत्कुलोद्भवम्॥
तद्दानातिक्रमे[४] दानं प्रत्युताऽधोगतिप्रदम्'।

इति। यमो ऽपि—

'सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे[५]।
प्राधीते शतसाहस्रमनन्तं वेदपारगे'॥
(व्या. स्मृ. ४.४१; द. स्मृ. ३. २८)

इति। 'प्राधीतः' प्रारब्धाध्ययन इत्यर्थः। संवर्त्तः—

---

१. D. reads दर्शितः, and all others except A. read विहितः for अभिहितः. २. D. reads -शिष्ट- for -श्रेष्ठ-. ३. B. C. E. and F. read तद्भार्या-, and H. reads नद्भार्यां- for तद्भार्या-. In H. its original reading being struck there on the margin written as न तस्यातिक्रमे दानं &c. ४. D. ... -क्रमात् for -क्रमे. ५. D. reads ब्राह्मणे ऽव्रते for ब्राह्मणब्रुवे.

'उत्पत्ति-प्रलयौ चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स भवेद्वेदपारगः' ॥

इति ।

'शूद्रे समगुणं दानं वैश्ये तद्द्विगुणं स्मृतम् ।
क्षत्रिये त्रिगुणं प्राहुः षड्गुणं ब्राह्मणे स्मृतम्' ॥

इति । शूद्रादीनां पात्रत्वप्रतिपादनमन्नदानादिविषयम्

'कृतान्नमितरेभ्यः' (गौ. स्मृ. ५. ९)

इति गौतमवचनात् । व्यासः—

'माता-पित्रोश्च यद्दत्तं भ्रातृ-स्वसृ-सुतासु च ।
जाया-ऽऽत्मजेषु यद्दत्तं सो ऽनिन्द्यः स्वर्गसंक्रमः ॥
पितुः शतगुणं दानं सहस्रं मातुरुच्यते ।
अनन्तं दुहितुर्दानं सोदर्ये दत्तमक्षयम्' ॥

(व्या. स्मृ. ४. ३०-३१)

इति । भविष्योत्तरे—

'न केवलं ब्राह्मणानां दानं सर्वत्र शस्यते ।
भगिनी-भागिनेयानां मातुलानां पितुः स्वसुः ॥
दरिद्राणां च बन्धूनां दानं कोटिगुणं भवेत्' ।

इति । शातातपो ऽपि—

---

१. H. omits 'प्राधीतः प्रारब्धाध्ययन इत्यर्थः । संवर्तः-' उत्पत्ति-प्रलयौ चैव भूतानामागतिं गतिं । वेत्ति विद्यामविद्यां च स भवेद्वेदपारगः' इति. २. D. omits इति. ३. A. B. C. F. read दानविषयं for दानादिविषयम्; while H. reads अन्नदानातिरिक्तविषयम्. ४. स धर्मः for सो ऽनिन्द्यः. ५. A. इति is superfluous. ६. D. omits इति. ७. D. reads सर्वं प्रशस्यते for सर्वत्र शस्यते. ८. D. reads भागिनां for भगिनी-. ९. A. B. C. and E. read पितृष्वसुः for पितुः स्वसुः.

'सन्निकृष्टमधीयानमतिक्रामति यो द्विजम्।
भोजने चैव दाने च दहत्यासप्तमं कुलम्'॥

(व्या. स्मृ. ४. ३७)

इति। महाभारते ऽपि[2]–

'हृतस्वा हृतदाराश्च ये विप्रा देशविप्लवे।
अर्थार्थमभिगच्छन्ति तेभ्यो दत्तं महाफलम्'॥

इति। अपात्रमाह मनुः–

'न वार्यपि* प्रयच्छेत्तु बैडालव्रतिके द्विजे।
न बकव्रतिके पापे नावेदविदि धर्मवित्॥
त्रिष्वप्येतेषु दत्तं हि विधिना ऽप्यर्जितं धनम्।
दातुर्भवत्यनर्थाय परत्रा ऽदातुरेव च॥
यः कारणं पुरस्कृत्य व्रतचर्यां निषेवते।
पापं व्रतेन संछाद्य बैडालं नाम तद्व्रतम्†॥

* 'वार्यपि' इत्यनेन अतिशयोक्त्या द्रव्यान्तरदानिनिषेधो ऽयम्। ...रिणस्तु सर्वार्थत्वादनिषेध इति बोध्यम्। 'पापे' इत्यत्र 'विप्रे' इति ...ले विष्णुस्मृतौ च पाठः।

† मनुस्मृतौ तु नायं श्लोक उपलभ्यते। अस्य स्थाने–

'धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः।
बैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः'॥

इति दृश्यते। विष्णुस्मृतावप्येवमेव। मेधातिथ्यादिभिस्त्वयमेव व्याख्यातः।

'यस्य धर्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः।
प्रच्छन्नानि च पापानि बैडालं नाम तद्व्रतम्'॥

इति चोपलभ्यते। त्रयो ऽप्येते बैडालव्रतप्रतिपादकाः प्रायशः स-...नार्थका एव। उपलभ्यन्ते च तत्र तत्र विभिन्नेषु पुराणादिग्रन्थेषु।

१ A. alone reads -मतिक्लिष्टं for -मधीयानं. २. A. D. and I. omit अपि; ...hile H. omits the whole महाभारते ऽपि. ३. I. only reads दानं for दत्तं. ... B. C. E. F. and H. read अप्यपि, and A. reads अम्भोऽपि for वार्यपि.

अधोदृष्टिर्नैकृतिकः स्वार्थसन्धानतत्परः ।
शठो मिथ्याविनीतश्च बकव्रतचरो द्विजः' ॥
(म. स्मृ. ४. १९२-१९६ ; वि. स्मृ.
इति । शातातपो ऽपि- ९३. ८-९)
'नष्टं देवलके दत्तमप्रतिष्ठं च वार्धुषौ ।
यच्च वाणिजके दत्तं न च तत् प्रेत्य नो इह' ॥
इति । देवलकश्च स्कान्दे दर्शितः-
'देवार्चनरतो विप्रो वित्तार्थी वत्सरत्रयम् ।
स वै देवलको नाम हव्य-कव्येषु गर्हितः' ॥
इति । वृद्धमनुः-
'पात्रभूतो ऽपि यो विप्रः प्रतिगृह्य प्रतिग्रहम् ।
असत्सु विनियुञ्जीत तस्मै देयं न किञ्चन ॥
सञ्चयं कुरुते यश्च प्रतिगृह्य समन्ततः ।
धर्मार्थं नोपयुङ्क्ते च न तं तस्करमर्चयेत्' ॥
इति विष्णुधर्मोत्तरे-
'परस्वादेर्वृथा दानमशेषं परिकीर्त्तितम् ।
आरूढपतिते चैव अन्यथाप्तैर्धनैश्च यत् ॥
व्यर्थमब्राह्मणे दानं पतिते तस्करे तथा ।
गुरोश्चा ऽप्रीतिजनके कृतघ्ने ग्रामयाजके ॥

---

१ A. reads -वृत्तिकरः, and G. -व्रतधरः for -व्रतचरः. २. H. omits शातातपो ऽपि. ३. D. omits from देवलकश्च स्कान्दे दर्शितः to गर्हितः. ४. A. reads -कव्यविगर्हि- for -कव्येषु गर्हि-. ५. A. reads नोपयुञ्जीत for नोपयुङ्क्ते च. ६. A. D. E. G. H. and I. read परस्थाने for परस्वादेः. ७. I. reads आरूढे for आरूढ-.

वेदविक्रयके चैव यस्य चोपपतिर्गृहे।
स्त्रीभिर्जितेषु यद्दत्तं व्यालग्राहे[1] तथैव च॥
ब्रह्मबन्धौ च यद्दत्तं यद्दत्तं वृषलीपतौ।
परिचारेषु यद्दत्तं वृथा दानानि षोडश'॥

इति। महाभारते—

'पङ्ग्वन्ध-बधिरा मूका व्याधिनोपहताश्च[2] ये।
भर्तव्यास्ते महाराज न तु देयः प्रतिग्रहः'॥

इति। पात्रोपेक्षणमपात्रदानं च मनुर्निषेधति—

'अनर्हते यद्ददाति न ददाति यदर्हते।
अर्हानर्हापरिज्ञानाद्दानाद्धर्माश्च[3] हीयते'॥

(म. स्मृ. ३. ९९; म. भा. शां. २०. ९)

इति। भविष्योत्तरे देयस्वरूपं निरूपितम्—

'यद्यदिष्टं विशिष्टं च न्यायप्राप्तं च यद्भवेत्।
तत्तद् गुणवते देयमित्येतद्दानलक्षणम्'॥

(म. स्मृ. ३. ११९; वि. स्मृ. ९३. ३५;
सं. स्मृ. ४६; म. पु. १४५. ५१)

इति। अशेषस्य देयत्वप्राप्तौ विशेषमाह याज्ञवल्क्यः—

'स्वकुटुम्बाविरोधेन देयं दार-सुतादृते।
नान्वये[4]* सति सर्वस्वं यच्चान्यस्मै[5] प्रतिश्रुतम्'॥

(या. स्मृ. २. १७५)

---

* कुटुम्बभरणावशिष्टं दार-सुतौ वर्जयित्वा देयम्। पुत्र-पौत्रादिरूपेऽन्वये सति तु विद्यमानं सर्वं धनं न दद्यादित्यर्थः।

---

१. D. reads कालग्राहे for व्यालग्राहे. २. H. reads व्याधिना ऽप- for व्याधिनोप-. ३. B. C. E. F. and G. read धर्मा ऽधर्माश्च for दानाद्धर्माश्च, and in H. the original धर्मा ऽधर्माश्च being stricken दानाद्धर्माश्च is written on the margin. ४. D. reads समग्रा- for न्वाग्रमा-. ५ D. reads यथा -for यच्चा-.

इति । बृहस्पतिरपि–

'कुटुम्बभक्त-वसनाद्देयं यदतिरिच्यते' ।

इति । शिवधर्मे--

'तस्मात्त्रिभागं *वित्तस्य जीवनाय प्रकल्पयेत् ।

भागद्वयं तु धर्मार्थमनित्यं जीवितं यतः' ॥

इति । कुटुम्बाविरोधेन देयमित्युक्तं तस्यापवादमाह व्यासः–

' कुटुम्बं पीडयित्वा ऽपि ब्राह्मणाय महात्मने ।

दातव्यं भिक्षवे† चान्नमात्मनो भूतिमिच्छता' ॥

इति । देयविशेषेण फलविशेषमाह मनुः–

' वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः ।

तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥

भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः ।

गृहदो ऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम ॥

वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः ।

अनडुहः श्रियं जुष्टां गोदो ब्रध्नस्य विष्टपम् ॥

---

* नारदेन तु वित्तस्य पञ्चधा विभागो दर्शितः । तद्यथा—

' धर्माय यशसे ऽर्थाय कामाय स्वजनाय च ।

पञ्चधा विभजन्वित्तमिहामुत्र च मोदते' ॥

इति । अयमेव युक्तो द्रव्यविभाग इति भाति ।

† इदमपि मोक्षमार्गैकरतस्य दानशूरस्य वा संभवति । नान्यस्य । यतः कुटुम्बनिर्वाहावशिष्टस्यैव अंशतः दानमुचितम् ।

---

१. A. reads तस्मात्तु for तस्मात्त्रि-. २. B. C. F. ऽच्छानि, F. and H. ऽर्घाणि, and G. उक्तानि for ऽग्र्याणि. ३ For जुष्टां I. reads तुष्टां.

यान-शय्याप्रदो भार्यामैश्वर्यमभयप्रदः।
धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्म शाश्वतम्॥
सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते'।
(म. स्मृ. ४. २२९–२३३; वृ. गौ. स्मृ. १०.२३–२८)

इति। भविष्योत्तरे पात्रविशेषेण देयविशेषो दर्शितः–

'तथा द्रव्यविशेषांश्च दद्यात् पात्रविशेषतः।
आर्तानामन्नदानं च गोदानं च कुटुम्बिने॥
तथा प्रतिष्ठाहीनानां क्षेत्रदानं विशिष्यते।
सुवर्णं याजकानां च विद्यां चैवोर्ध्वरेतसाम्॥
कन्यां चैवानपत्यानां ददतां गतिरुत्तमा'।

इति। स्कान्देऽपि—

'श्रान्तस्य यानं तृषितस्य पानम्
अन्नं क्षुधार्त्तस्य नरो नरेन्द्र।
दद्याद्विमानेन सुराङ्गनाभिः
संस्तूयमानं त्रिदिवं नयन्ति'॥

इति। अङ्गिराः–

'देवतानां गुरूणां च माता-पित्रोस्तथैव च।
पुण्यं देयं प्रयत्नेन नाऽपुण्यं चोदितं क्वचित्'॥

इति। विष्णुधर्मोत्तरे–

---

१. E. G. and H. read सौख्यं for सौख्यं. २. For शतानां G. reads रैवानां. ३. A. reads परं स्मृतं for विशिष्यते. ४. A. B. C. D. and F. read पात्रे for पात्र-. ५. E. reads धनदानं कुटुम्बिने, and for the same A. reads गोदानं यज्वने तथा; for गोदानं च कुटुम्बिने. ६. A. reads याचकानां for याजकानां. ७. A. and I. omit इति. ८. A. reads चार्जितं, and H. नोदितं for चोदितं.

'यस्योपयोगि यद्द्रव्यं देयं तस्यैव तद्भवेत्' ।

इति । दाननिमित्तान्याह शातातपः–

'अयनादौ सदा देयं द्रव्यमिष्टं गृहे तु यत् ।
षडशीतिमुखे चैव विमोक्षे चन्द्र-सूर्ययोः ॥
संक्रान्तौ यानि दत्तानि हव्य-कव्यानि दातृभिः ।
तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि' ॥

इति । वृद्धवसिष्ठोऽपि अयनादीन् दर्शयति–

'झष-कर्कटसंक्रान्ती द्वे तूदग्-दक्षिणायने ।
विषुवे च तुला-मेषौ तयोर्मध्ये ततोऽपराः ॥
वृष-वृश्चिक-कुम्भेषु सिंहे चैव यदा रविः ।
एतद्विष्णुपदं नाम विषुवादधिकं फलम् ॥
कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः ।
षडशीतिमुखाः प्रोक्ताः षडशीतिगुणाः फलैः' ॥

इति । विष्णुधर्मोत्तरे–

'वैशाखी कार्त्तिकी माघी पूर्णिमा तु महाफला ।
पौर्णमासीषु सर्वासु मासर्क्षसहितासु च ।
दत्तानामिह दानानां फलं दशगुणं भवेत्' ॥

इति । मनुः–

'सहस्रगुणितं दानं भवेद्दत्तं युगादिषु ।
कर्म श्राद्धादिकं चैव तथा मन्वन्तरादिषु' ॥

इति । याज्ञवल्क्यः–

---

१. A. reads गृहाद्वि for गृहे तु. २. D. and G. read दानानि for दत्तानि. ३. All others except B. C. and F. omit अपि. ४. D. reads उपरागादीन् for अयनादीन. ५. A. and I. read मृग for झष. ६. A. reads विष्णुपादाधिकं for विषुवादधिकं. ७. D. reads गुणादिषु for युगादिषु.

'शतमिन्दुक्षये दानं सहस्रं तु दिनक्षये।
विषुवे शतसाहस्रं व्यतीपाते त्वनन्तकम्' ॥

इति। भारद्वाजः—

'व्यतीपाते वैधृतौ च दत्तमक्षयकृद्भवेत्'।

इति। विष्णुः—

'दिनक्षयो दिनच्छिद्रं पुत्रजन्मादि चाऽपरम्।
आदित्यादिग्रहाणां च नक्षत्रैः सह सङ्गमः ॥
विज्ञेयः पुण्यकालोऽयं ज्योतिर्विद्भिर्विचार्य च।
तत्र दानादिकं कुर्यादात्मनः पुण्यवृद्धये' ॥

इति। दिनक्षयलक्षणमुक्तं वसिष्ठेन—

'एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा।
तदा दिनक्षयः प्रोक्तः शतसाहस्रिकं फलम्' ॥

दिनच्छिद्रस्य तु लक्षणं ज्योतिःशास्त्रेऽभिहितम्—

'तिथ्यर्ध-तिथियोगर्क्षच्छेदादी राशिपर्वणः।
सदृशौ दिवस-च्छिद्रसमाख्यौ प्राह भार्गवः' ॥

इति।

'छेदादिकालः कथितः तिथिकृत्योर्घटिद्वयम्।
ऋक्षादिसङ्गमोपेतं तच्छेदत्वफलैर्युतम् ॥

. A. E. H. and I. read -व्यनन्त-, and D. G. ह्यनन्त- for त्वनन्त-. A. reads this line as follows:—दिनक्षये दिनच्छिद्रे पुत्रजन्मादिके ऽपि ३. A. B. and D. read सङ्क्रमे for सङ्क्रमः. ४. D. reads वासरे for ने. ५. A, G. and I. omit तु. ६. A. and I. read तिथ्यूर्ध- for तिथ्यर्ध- A. D. G. and I. read राशिपर्वण: for राशिपर्वणः. ८. I. reads -समा- for -समाख्यौ. ९. A. omits तिथिकृत्योर्घटिद्वयम्. १०. All others ept A. read as follows:—नागवह्निसमोपेतं तच्छे तत्त्वपलैर्युतम्; while I. -and D. G. -फलैः for -पलैः according to the reading.

पलैः षोडशभिर्युक्तं नाडिकाद्वितयं युतौ[2] ।
छेदादिसमयः प्रोक्तो दानेऽनन्तफलप्रदः' ॥

इति । दानस्य निषिद्धकालमाहतुः शङ्ख-लिखितौ–
'आहारं मैथुनं निद्रां सन्ध्याकालेषु वर्जयेत् ।
कर्म चाध्यापनं चैव तथा दान-प्रतिग्रहौ' ॥

इति[4] । स्कन्दपुराणे[5]–
'रात्रौ दानं न कर्त्तव्यं कदाचिदपि केनचित् ।
हरन्ति राक्षसा यस्मात्तस्माद्दातुर्भयावहम् ॥
विशेषतो निशीथे तु न शुभं कर्म शर्मणे ।
अतो विवर्जयेत् प्राज्ञो दानादिषु महानिशाम्' ॥

इति । तत्र प्रतिप्रसवमाह देवलः–
'राहुदर्शन-संक्रान्ति-यात्राऽऽद्यौ प्रसवेषु च ।
दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते' ॥

इति । अत्र संक्रान्तिशब्दो मकर-कर्कटविषयः । स्मृत्यन्तरे संक्रान्तिषु रात्रिदानादिनिषेधं प्रक्रम्य 'मुक्त्वा मकर-कर्कटौ'–इति पर्युदासात् ।

मत्स्यपुराणे दानस्य प्रशस्ता देशविशेषा निर्दिष्टाः–
'प्रयागादिषु तीर्थेषु पुण्येष्वायतनेषु च ।
दत्त्वा चाऽक्षय्यमाप्नोति नदी-पुण्यवनेषु च' ॥

इति । तथा व्यासेनाऽपि–

---

१ A. reads फलैः for पलैः. २. A. reads युगे for युतौ. ३. [illegible] ४. [illegible] reads निमित्त- for निषिद्ध-, probably this might be an error. ५. [illegible] omits इति. ५. D. reads स्कान्दे for स्कन्दपुराणे. ६. D. reads -यात्रादि [illegible] for -वासावी. ७ D. reads न दुष्यति for तदिष्यते. ८. B. C. and F. [illegible] च after संक्रान्तिषु. ९. A. adds काल- to देश-.

'गङ्गाद्वारे प्रयागे च अविमुक्ते च पुष्करे।
मकरे चा ऽट्टहासे[1] च गङ्गा-सागरसङ्गमे॥
कुरुक्षेत्रे गयातीर्थे तथा चा ऽमरकण्टके।
एवमादिषु तीर्थेषु दत्तमक्षय्यतामियात्'॥

॥ इति दानप्रकरणम् ॥

तदेवं सेतिकर्तव्यं दानप्रकरणं निरूपितम्। अथ प्रतिग्रहो निरूप्यते। तत्र श्रौतो विधिः पूर्वमुदाहृतः। 'द्रव्यमर्जयन् ब्राह्मणः प्रतिगृह्णीयात्'–इति। तत्र याजने येयं चर्चा[2] पूर्वमनुक्रान्ता सेयं[3] प्रतिग्रहे ऽपि यथासम्भवमनुसन्धातव्या[4]।

ननु–प्रतिग्रहो मनुना निन्दितः–

'प्रतिग्रहः प्रत्यवरः स तु विप्रस्य गर्हितः'॥
(म. स्मृ. १०. १०९)

इति। मैवम्। अस्या निन्दाया असत्[5]प्रतिग्रहविषयत्वात्। सोपरितने वचने स्पष्टीकृतम्।

'प्रतिग्रहस्तु क्रियते[6] शूद्रादप्यन्त्यजन्मनः'।
(म. स्मृ. १०. ११०)

इति। यः प्रतिग्रहो नीचात् क्रियते स गर्हित इत्यर्थः। सत्प्रतिग्रहस्तु तेनैवा ऽभ्यनुज्ञातः–

'नाध्यापनात्[7] याजनाद्वा ऽगर्हिताद्वा प्रतिग्रहात्।
दोषो भवति विप्राणां ज्वलना-ऽर्क[8]समा हि ते'[9]॥
(म. स्मृ. १०. १०३; म. भा. व. २००, ८७)

---

१. H. reads च प्रभासे for चाट्टहासे; the प्रभासे is written on margin. २. A. omits येयं चर्चा. ३. A. reads अयं for सेयं. ४. A. reads -सन्धातव्यः for -सन्धातव्या. ५. A. reads असाधु- for असत्-. ६. A. and I. read प्रतिग्रहो ऽगर्हितः स्यात् for प्रतिग्रहस्तु क्रियते. ७. A. substitutes विशुद्धाच्च प्रतिग्रहः for the whole verse नाध्यापनात् &c., and omits अगर्हिताविति छेदः. ८. In Manu Smriti ज्वलनाम्बु- for ज्वलनार्क-. ९. This verse is to be found in Mahâbhârata 3, 200, 87.

इति । अगर्हितादिति छेदः । अगर्हितप्रतिग्रहादप्यप्रतिग्रहः श्रेयान् । तथा च याज्ञवल्क्यः—

'प्रतिग्रहसमर्थो ऽपि नादत्ते यः प्रतिग्रहम् ।
ये लोका दानशीलानां स तानाप्नोति पुष्कलान्' ॥
(या. स्मृ. १. २१३)

इति । ननु—यमः प्रतिग्रहं प्रशंसति—

'प्रतिग्रहा-ऽध्यापन-याजनानाम्
प्रतिग्रहं श्रेष्ठतमं वदन्ति ।
प्रतिग्रहात् शुध्यति जप्य-होमैर्
योऽयं तु पापं न पुनन्ति वेदाः' ॥

इति । मनुस्तु तद्विपर्ययमाह—

'जप-होमैरपैत्येनो याजना-ऽध्यापनैः कृतम् ।
प्रतिग्रहनिमित्तं तु त्यागेन तपसैव च' ॥
(म. स्मृ. १०. १११)

इति । नायं दोषः । द्विजातिभ्यः प्रतिग्रहः प्रशस्तः शूद्रप्रतिग्रहो निन्दितः—इति व्यवस्थायाः सुवचत्वात् ।

ननु—सत्प्रतिग्रहे ऽपि कियानपि प्रत्यवायः प्रतीयते 'प्रतिग्रहः शुद्ध्यति जप्य-होमैः'-इत्युक्तेः । बाढम् अस्त्येव वेदपारगत्वादिसामर्थ्यरहितस्य प्रतिग्रहे प्रत्यवायः एतदेवा ऽभिप्रेत्य स्कान्दे वेदपारगस्य प्रत्यवायो निवारितः—

१. G. reads तानवाप्नोति for स तानाप्नोति. २. Except A. and I. all read प्रतिग्रहः for प्रतिग्रहात्. ३. A reads याऽयात्तु पापात् for याऽयं तु पापं. ४. G. reads तपसा न for तपसैव. ५. E. omits this. ६. A. reads दोषः for प्रत्यवायः. ७. D. reads एतदेवाभिप्रेत्योक्तं स्कान्दे वेदपारगस्य प्रत्यवायो नास्ति for एतदेव- &c.

'षडङ्गवेदविद्विप्रो यदि कुर्यात् प्रतिग्रहम्।
न स पापेन लिप्येत पद्मपत्रमिवाम्भसा' ॥

इति। एष एव न्यायो याजना-ऽध्यापनयोर्योजनीयः। अयाज्ययाजन-भृतकाध्यापन-दुष्टप्रतिग्रहेष्वेनोबाहुल्यम्। स्वेस्मिन्नीषदधिकारवैकल्ये सति प्रवर्त्तमानस्य स्वल्पः प्रत्यवायः। मुख्याधिकारिणो विहितयाजनादिप्रवृत्तौ न किञ्चिदप्येनं--इति विवेकः। सदसत्प्रतिग्रहौ विवेचयति व्यासः--

'द्विजातिभ्यो धनं लिप्सेत् प्रशस्तेभ्यो द्विजोत्तमः।
अपि वा जातिमात्रेभ्यो न तु शूद्रात् कथञ्चन' ॥

इति। सतामसम्भवे सति असतो ऽपि प्रतिग्रहश्चतुर्विंशानिमते ऽभ्यनुज्ञातः--

'[५]सीदंश्चेत् प्रतिगृह्णीयाद् ब्राह्मणेभ्यस्ततो नृपात्।
ततस्तु वैश्य-शूद्रेभ्यः शङ्खस्य वचनं यथा' ॥

इति। शूद्रप्रतिग्रहे विशेषमाहाङ्गिराः--

'यत्तु राशीकृतं धान्यं [६]खले क्षेत्रे [७]ऽथवा भवेत्।
शूद्रादपि ग्रहीतव्यमित्याङ्गिरसभाषणम्' ॥

इति। तत्रैव विशेषान्तरमाह व्यासः--

'[९]कुटुम्बार्थे तु [१०]सच्छूद्रात् [११]प्रतिग्राह्यमयाचितम्।

१. E. and H. read अन्यस्मिन्, D. reads तस्मिन् for स्वस्मिन्. २. D. reads विशेषात् for ईषत्. ३. I. reads वैकल्येन for वैकल्ये सति. ४. For -र्प्येनं D. has -र्प्यंततत्. ५. A. substitutes सश च for सीदंश्चेत्. ६. A. reads धान्यमिति for धान्यं खले. ७. D. and I. read तथा for ऽथवा. ८. D. alone has भाषितम्. ९. B. C. and F. read कुटुंबार्थे तुयः शूद्रा- प्रतिग्राह्यं तु याचितम्. १०. D. E. G. and H. have सत for सत्-. ११. D. reads प्रतिगृह्णाति याचितम्- and G. प्रतिगृह्णीत याचितम्.; for प्रतिग्राह्यमयाचितम्.

क्रत्वर्थमात्मने चैव न हि याचेत कर्हिचित्' ॥

इति । मनुरपि–

'न यज्ञार्थं धनं शूद्रात् विप्रो भिक्षेत धर्मवित् ।
यजमानो ऽपि भिक्षित्वा चाण्डालः प्रेत्य जायते' ॥
(म. स्मृ. ११. २४)

इति । असत्प्रतिग्रहोचितो ऽवस्थाविशेषः स्कन्दपुराणे दर्शितः–

'दुर्भिक्षे दारुणे प्राप्ते कुटुम्बे सीदति क्षुधा ।
असतः प्रतिगृह्णीयात् प्रतिग्रहमतन्द्रितः' ॥

इति । याज्ञवल्क्यो ऽपि–

आपद्गतः सम्प्रगृह्णन् भुञ्जानो ऽपि यतस्ततः ।
न लिप्येतैनसा विप्रो ज्वलना ऽर्कसमो हि सः' ॥

इति । मनुरपि– (या. स्मृ. ३. ४१)

'वृद्धौ च माता-पितरौ साध्वी भार्या सुतः शिशुः ।
अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् ॥
(म. स्मृ. ११. ११)

जीवितात्ययमापन्नो यो ऽन्नमत्ति यतस्ततः ।
आकाशमिव पङ्केन न स पापेन लिप्यते' ॥
(म. स्मृ. १०. १०४)

इति । गारुडपुराणे प्रतिग्राह्यस्य द्रव्यस्येयत्ता दर्शिता

'यावता पञ्चयज्ञानां कर्तुर्निर्वहणं भवेत् ।
तावदेव हि गृह्णीयात् कुटुम्बस्यात्मनस्तथा' ।

---

१. A. reads द्विजो for विप्रो. २. चण्डालः is substituted by A. D and H. for चाण्डालः. ३. A. and I. read वा for ऽपि. The text of jnavalkya Smriti reads यास्ततस्ततः ४. All MS. read -समप्रभः ; but Smriti itself has समो हि सः. ५. G. adds पुरा after दर्शिता. ६. A. r करणं नियतं भवेत्, D. and G. कर्तुर्निर्वाहनं भवेत् for कर्तुर्निर्वहणं भवेत्

इति। व्यासो ऽपि—

'प्रतिग्रहरुचिर्न स्यात् यज्ञार्थं तु समाचरेत्।
स्थित्यर्थादधिकं गृह्णन् ब्राह्मणो यात्यधोगतिम्॥
वृत्तिसङ्कोचमन्विच्छेन्नेहेत धनविस्तरम्।
धनलाभे प्रवृत्तस्तु ब्राह्मण्यादेव हीयते'॥

इति। अनापदि राजप्रतिग्रहं निन्दति याज्ञवल्क्यः—

'न राज्ञः प्रतिगृह्णीयात् लुब्धस्योच्छास्त्रवर्त्तिनः।
प्रतिग्रहे सूनि-चक्रि-ध्वजि-वेश्या-नराधिपाः।
दुष्टा दशगुणं पूर्वात् पूर्वादेते यथोत्तरम्'॥
(या. स्मृ. १. १४०–१४१)

इति। संवर्त्तः—

'राजप्रतिग्रहो घोरो मध्वास्वादो विषोपमः।
पुत्रमांसं वरं भोक्तुं न तु राजप्रतिग्रहः'॥

इति। स्कान्दे—

'मरुदेशे निरुदके ब्रह्मरक्षस्त्वमागतः।
राजप्रतिग्रहात् पुष्टः पुनर्जन्म न विन्दति॥
ब्राह्मण्यं यः परित्यज्य द्रव्यलोभेन मोहितः।
विषयामिषलुब्धस्तु कुर्याद्राजप्रतिग्रहम्॥
रौरवे नरके घोरे तस्यैव पतनं ध्रुवम्।
वृक्षा दवाग्निना दग्धाः प्ररोहन्ति घनागमे॥
राजप्रतिग्रहाद्दग्धा न प्ररोहन्ति कर्हिचित्'।

इति। विष्णुधर्मोत्तरे—

---

१. A. याचार्थं, D. स्थित्यर्थं for यज्ञार्थं. २. G. has स्थिरो यदधिकं for स्थित्यर्थादधिकं. ३. D. substitutes लब्धं स्वाच्छास्त्र- for लुब्धस्योच्छास्त्र-. ४. D. reads सूति-, G. स्वामि-for सूनि-. ५. The text of याज्ञवल्क्यस्मृति reads यथाक्रमम्. ६. D. omits following-प्ररोहन्ति घनागमे। राजप्रतिग्रहा-दग्धा-, and reads वृक्षा दवाग्निना दग्धा न प्ररोहन्ति कर्हिचित्-

'दशसूनिसमश्चक्री दशचक्रिसमो ध्वजी।
दशध्वजिसमा वेश्या दश वेश्यासमो नृपः॥
दशसूनासहस्राणि यो वाहयति सौनिकः।
तेन तुल्यः स्मृतो राजा घोरस्तस्मात् प्रतिग्रहः'॥
(म. स्मृ. ४. ८५-८६)

इति। अधार्मिकराजविषयेयं निन्दा। तथा च तत्रैव विशेषितम्—

'येषां न विषये विप्राः यज्ञैर्यज्ञपतिं हरिम्।
यजन्ते भूभुजां तेषामेतत् सूनोदितं फलम्॥
येषां पाषण्डसङ्कीर्णं राष्ट्रं न ब्राह्मणोत्कटम्।
एते सूनासहस्राणां दशानां भागिनो नृपाः॥
येषां न यज्ञपुरुषः कारणं पुरुषोत्तमः।
ते तु पापसमाचाराः सूनापापोपभोगिनः'॥

इति। अदुष्टात्तु राज्ञः प्रतिग्रहो न निन्दितः। अत एव छन्दोगशाखायां प्राचीनशालादीन् महामुनीन् राजप्रतिग्रहं प्रवर्त्तयितुमश्वपतिनामकेन राज्ञा दोषाभाव उपन्यस्तः—

'न मे स्तेनो जनपदे न कदर्यो न मद्यपः।
नाऽनाहिताग्निर्नाऽविद्वान् न स्वैरी स्वैरिणी कुतः॥
(छां. उ. ५।११।५)

---

१. This verse is altogether omitted by B. C. and F. also : we find this and the forcgoing verse in Manu Smriti, but this verse is differently written there as:- दशसूनासमं चक्रं दशचक्रसमो ध्वजः। दशध्वजसमो वेशो दशवेशसमो नृपः॥. २. D. E. G. and H. read -सूना- for -सूनि-. ३. Manu Smriti has तस्य for तस्मात. ४. All except A. E. and I. omit इयं. ५. D. reads the verse as:- येषां न विद्यते विप्राः प्राज्ञैर्यज्ञपरिग्रहः। जायते भूभुजां तेषां.- ६. A. reads ब्राह्मणास्पदम् for ब्राह्मणोत्कटम्. ७. A. has पापा हि ते स्मृताः for पापोपभागिनः. ८. D. omits महामुनीन्. ९. D. has च for मे, and for the same G. reads चः. १०. A. reads तथा for कुतः.

इति। याज्ञवल्क्यवचने ऽपि राजप्रतिग्रहनिन्दायां 'लुब्ध-स्योच्छास्त्रवर्तिनः'-इति विशेषणात् अदुष्टराजप्रतिग्रहो न निन्दित इति गम्यते। तथा च नारदो ऽपि–

'श्रेयान् परिग्रहो राज्ञां नान्येषां ब्राह्मणादृते ॥ (४१)
ब्राह्मणश्चैव राजा च द्वावप्येतौ धृतव्रतौ।
नैतयोरन्तरं किञ्चित् प्रजाधर्माभिरक्षणे ॥ (४२)
शुचीनामशुचीनां च सन्निवेशो[3] यथाम्भसाम्।
समुद्रे समतां याति तद्वद्राज्ञां धनागमः ॥ (४५)
यथा ऽग्नौ संस्थितं चैव शुद्धिमायाति काञ्चनम्।
एवं धनागमाः सर्वे शुद्धिमायान्ति राजनि' ॥ (४६)
(ना. स्मृ. १७. ४१–४६)

इति। दुष्टप्रतिग्रहवत् सत्प्रतिग्रहस्यापि[6] आपद्विषयता कुतो न कल्प्यते?–इति चेत् तन्न। ब्रह्माण्डपुराणे सत्प्रति-ग्रहस्य अनापद्यपि विहितत्वात्।

'अनापद्यपि धर्मेण याज्यतः शिष्यतस्तथा।
गृह्णन् प्रतिग्रहं विप्रो न धर्मात् परिहीयते ॥
गृह्णीयाद् ब्राह्मणादेव नित्यमाचारवर्तिनः।
श्रद्धया विमलं दत्तं तथा धर्मान्न हीयते' ॥

१. D. omits the whole from याज्ञवल्क्य to गम्यते. २. A. and G. read -रक्षणं for -रक्षणे. ३. A. has सन्निपातो for सन्निवेशो. ४. D. omits this whole line. ५. All except A. and I. read दुष्प्रतिग्रह-. ६. A. omits अपि. ७. A. C. F. and I. omit सत्. ८. A. substitutes ब्रह्मपुराणे. Brahmânda Purâna is a Mahá Purâna and Brahma Purân is an Upa Purâna, therefore it is difficult to find out the above quotation. ९. D. E. G. and H. have प्रति- for परि-. १०. A. reads धर्मो for धर्मात्.

इति । केषु चिद्वस्तुविशेषेषु अयाचितेषु न प्रतिग्रह-दोष इत्याह भारद्वाजः[1]—

'अयाचितोपपन्नेषु नास्ति दोषः प्रतिग्रहे ।
अमृतं तद्विदुर्देवास्तस्मात्तन्नैव[2] निर्णुदेत्' ॥

इति । तत्र भरद्वाजाऽभिप्रेतान् वस्तुविशेषान्निर्दिशति याज्ञवल्क्यः—

'कुशाः शाकं पयो मत्स्या गन्धाः[3] पुष्पं दधि क्षितिः*।
मांसं शय्या ऽऽसनं धानाः[4] प्रत्याख्येयं न वारि च ॥
अयाचिताहृतं[5] ग्राह्यमपि दुष्कृतकर्मणः ।
अन्यत्र कुलटा-षण्ढ-पतितेभ्यस्तथा द्विषः[6]' ॥
(या. स्मृ. १. २१४–१५)

इति । मनुरपि—

'शय्यां कुशान् गृहान् गन्धानपः[7] पुष्पं मणिं दधि ।
मत्स्यान् धानाः पयो मांसं शाकं चैव न निर्णुदेत्' ॥
(म. स्मृ. ४. २५०)

'एधोदकं[8] मूलफलमन्नमभ्युद्यतं च यत् ।
सर्वतः प्रतिगृह्णीयान्मधु चा[9]ऽभयदक्षिणाम्' ॥
(म. स्मृ. ४. २४७)

* नात्र क्षितिशब्देन भूमिर्विवक्षिता अपि तु मृत्तिकैव। भूमिग्रहणे दोषश्रवणात् 'क्षितिर्मृत्तिका' इति विज्ञानेश्वरः ।

१. All others except A. G. read भरद्वाजः. २. D. reads नैव विनिर्णुदेत् for तन्नैव निर्णुदेत्. ३. B. C. and F. read गन्धान् for गन्धाः. ४. A. has धान्यं. ५ D. reads अयाचिताद्यं. ६. D. and G. have द्विजः. ७. A. reads वासः. ८ A. and I. read अक्षतः. ९. D. reads चाऽक्षयदक्षिणाम् for चाभयदक्षिणाम्, and the text of Manu अथ for च.

इति। प्रतिग्रहानधिकारिणं स एवाह—

'हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान् घृतम्।
अविद्वान् प्रतिगृह्णानो भस्मी भवति काष्ठवत्'॥

(म. स्मृ. ४. १८८)

इति। याज्ञवल्क्योऽपि—

'विद्या-तपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः।
गृह्णन् प्रदातारमधो नयत्यात्मानमेव च'॥

(या. स्मृ. १. २०२)

इति। विदुषस्तु न कोऽपि प्रतिग्रहो दोषावह इति वाजसनेयिब्राह्मणे गायत्रीविद्यायां श्रूयते—

'यदि ह वा अप्येवंवित् बह्विव प्रतिगृह्णाति न हैव तद्गायत्र्या एकं चनपदं प्रति स य इमा२ स्त्रींल्लोकान् पूर्णान् प्रतिगृह्णीयात् सोऽस्या एतत्प्रथमं पदमाप्नुयादथ यावतीयं त्रयी विद्या यस्तावत् प्रतिगृह्णीयात् सोऽस्या एतत् द्वितीयं पदमाप्नुयादथ यावदिदं प्राणि यस्तावत् प्रतिगृह्णीयात् सोऽस्या एतत् तृतीयं पदमाप्नुयादथास्या एतदेव तुरीयं दर्शतं पदं परो रजा य एष तपति। नैव केनच नाऽऽप्यं कुत

१. D. reads प्रतिगृह्णीते and the text of Manu reads the whole line thus:— प्रतिगृह्णन्नविद्वांस्तु भस्मीभवति दारुवत्. २. A. reads -मयो.

उ एतावत् प्रतिगृह्णीयात्'—इति ।

(बृ. उ. ५. १४. ५-६)

॥ इति प्रतिग्रहप्रकरणम् ॥

ऐवं निरूपितानामध्यापनादीनां प्रतिग्रहान्तानां शब्दान्तराधिकरणन्यायेन (पू. मी. २. २. १) कर्मभेदमभिप्रेत्य 'षट्कर्माभिरतः'—इत्युक्तम् । स च न्याय इत्थं प्रवर्त्तते । यजति ददाति जुहोतीत्युदाहरणम् । तत्र संशयः किं सर्वधात्वर्थानुरक्तैका भावना उत प्रतिधात्वर्थं भिन्ना? तत्र भावनावाचकस्याख्यातस्यैकत्वात् भिन्नानामपि धात्वर्थानामुपसर्जनत्वेन प्रधानभेदकत्वासम्भवाच्चैकैव भावनेति पूर्वःपक्षः । धात्वर्थानुरञ्जनमन्तरेण केवलाख्यातेन भावनाया अप्रतीतेः उत्पत्तिशिष्टधात्वर्थेनैकेनानुरक्ते आख्यातार्थे धात्वर्थान्तराणामननुप्रवेशात् प्रतिधात्वर्थं भावनाभेदः—इति सिद्धान्तः । एवं चाध्ययनादिभिः षड्भिर्धात्वर्थैः षोढा भावना भिद्यते—इति भवन्त्येतानि षट्कर्माणि । तेषु 'अभिरतिः' श्रद्धापूर्वकमनुष्ठानम । अश्रद्धालुना ऽनुष्ठितमप्यफलं स्यात् । तदाह भगवान्—

---

१. All others except A. and I. read इति, and B. C. F. omit both. २. H. omits नि- and reads रूपितानां. ३. D. has the following wonderful reading:-किं सर्वधनर्थैका भावना उत न प्रतिधात्वर्थं वाचा तत्रभवनं वाचकस्याख्यातस्यैकत्वाभिन्नानामपि धात्वर्थानां उपसर्जनेन प्रधानभेदकत्वात संभवाचैकभावनं चेति पूर्वपक्षत्वाद्धात्वर्थानुरञ्जनमन्तरेण केवलाख्यातेन भावनाया अप्रतीतेः उत्पत्तिशिष्टधात्वर्थेनैकेनानुरक्तं आख्याता ये धात्वन्तराणाम-. ४. All others except A. substitute नाना for भिन्ना. ५. E. omits the following:-त्वेन प्रधानभेदकत्वासंभवाच्चैकैव भावनेति पूर्वः पक्षः । धात्वर्थानुरञ्जनमन्तरेण केवलाख्यातेन भावनाया अप्रतीतेरुत्पत्तिशिष्टधा-. ६. A. reads ख्याते. ७. F. has -नानुक्त for -नानुरक्त. ८. A. and I. read अध्यापना-. ९. H. has धात्वर्थः. १०. D. omits अपि.

'अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।
असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह' ॥
(भ. गी. १७. २८)

इति। 'नित्यम्' इत्युत्तरत्रोऽन्वेति न पूर्वत्र। अध्यापनादीनां त्रयाणामनित्यत्वात्। देवता च अतिथिश्च देवतातिथी तयोः प्रतिदिनं पूजको भवेत्। देवतास्वरूपं च वाजसनेयिब्राह्मणे शाकल्य-याज्ञवल्क्यसंवादे विचार्य निर्णीतम्। तत्र शाकल्यः प्रष्टा याज्ञवल्क्यो वक्ता देवताविस्तार-संक्षेपौ स्वरूपं च प्रष्टव्यो ऽर्थः। तत्र चैषा श्रुतिः—

'अथ हैनं विदग्धः शाकल्यः पप्रच्छ। कति देवा याज्ञवल्क्येति। स हैतयैव निविदा प्रतिपेदे। यावन्तो वैश्वदेवस्य निविद्युच्यन्ते। त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति। ओमिति होवाच कत्येव देवा याज्ञवल्क्येति। त्रयस्त्रिंशदिति। ओमिति होवाच कत्येव देवा याज्ञवल्क्येति। त्रय इति। ओमिति होवाच कत्येव देवा याज्ञवल्क्येति। द्वाविति। ओमिति होवाच कत्येव देवा याज्ञवल्क्येति। अध्यर्ध इति। ओमिति होवाच कत्येव देवा याज्ञवल्क्येति। एक

---

१. Except A. D. and I. all others read नेह च. २. B. has उत्तरतोऽन्वेति न तु पूर्वत्र, C. and F. उत्तरतो नान्वेति न, D. उत्तरत्वात् नेति पूर्वत्र, G. उत्तरत्वान्नेति न पूर्वत्र, H उत्तरत्र नान्वेति पूर्वत्र. ३. E. substitutes किन्तु for न. ४. D. reads देवतानां. ५. D. omits the following :—शाकल्यः प्रष्टा याज्ञवल्क्यो वक्ता देवताविस्तार-संक्षेपौ स्वरूपं च प्रष्टव्योऽर्थः अत्र चैषा श्रुतिः। अथ हैनं विदग्धः. ६. A. omits स्वरूपं.

इति । ओमिति होवाच कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥ १ ॥ स होवाच महिमान एवैषामेते त्रयस्त्रिꣳ शत्त्वेव देवा इति । कतमे ते त्रयस्त्रिꣳशदिति । अष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिꣳशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिꣳ शाविति ॥ २ ॥ कतमे ते वसव इति । अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चाऽऽदित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदꣳ सर्वꣳ वसु निहितमेते हीदं सर्वं वासयन्त तस्माद्वसव इति ॥ ३ ॥ कतमे ते रुद्रा इति । दश वै पुरुषे प्राणा आत्मैकादशस्ते यदाऽस्माच्छरीरादुत्क्रामन्त्यथ रोदयन्ति यस्माद्रोदयन्ति तस्माद्रुद्रा इति ॥ ४ ॥ कतम आदित्या इति । द्वादश एव मासाः संवत्सरस्यैत आदित्या एते हीदꣳ सर्वमाददानायन्ति तद्यदिदं सर्वमाददानायन्ति तस्मादादित्या इति ॥ ५ ॥ कतम इन्द्रः कतमः प्रजापतिरिति । स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति । कतमस्तनयित्नुरित्यशनिरिति । कतमो यज्ञ इति । पशव इति ॥ ६ ॥ कतमे षडिति । अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चाऽऽदित्यश्च द्यौश्चैते षडेते हीदꣳ सर्वꣳ षडिति ॥ ७ ॥ कतमे ते त्रयो देवा इति ।

इमे एव त्रयो लोका एषु हीमे सर्वे देवा इति। कतमौ तौ द्वौ देवाविति। अन्नं चैव प्राणश्चेति। कतमो ऽध्यर्ध इति। योयं पवत इति॥ ८॥ तदाहुर्यदयमेक इवैव पवते। स कथमध्यर्ध इति। यदस्मिन्निदꣳ सर्वमध्यार्ध्नोत्तेनाध्यर्ध इति। कतम एको देव इति। प्राण इति स ब्रह्मेत्याचक्षते इति'॥

(बृ. उ. ३. ९.१-९)

अस्याः श्रुतेरयमर्थः। उपासनार्हाणां देवानां सङ्ख्याविस्तारेण[१] कतीति[२] पृष्टो याज्ञवल्क्यो विजिगीषुकथायां प्रवृत्तत्वात् परबुद्धिव्यामोहाय निविदा प्रत्युत्तरं प्रतिपेदे। निविच्छब्दो वैश्वदेवनामके शस्त्रविशेषे[३] ऽवस्थितानां[४] सङ्ख्यावाचिनां[५] पदानां[६] समुदायमाचष्टे इति वैदिकप्रसिद्धिः। ततो यावन्तो देवा वैश्वदेवस्य निविद्युच्यन्ते। तावन्त उपास्या इत्युक्तं भवति। तानि च पदानि त्रयश्च त्री चेत्यादीनि[७]। शतत्रयं सहस्रत्रयं षट्कं च देवविस्तारः। कत्येवेत्येवकारेण तत्र तत्र[८] देवान्तरशङ्का व्युदस्यते। य एव देवाः पूर्वं विस्तृताः त एव सङ्क्षेपेण कियन्त? इति तत्र तत्र प्रश्नार्थः। कतीति सङ्ख्याप्रश्नः। कतमे त इति[९] स्वरूपविशेषप्रश्नः। तत्र शतसहस्रसङ्ख्याका

---

१. A. reads संख्याविविस्तारे, C. and F. read सन्ध्याकबविस्तारेण. २. A. and I. omit कतीति, A. adds शाकल्येन, and I. साकल्येन. ३ D. and G. have शास्त्र- for शस्त्र-. ४. D. omits ऽव-. ५. D. has संभावेतानां, and G. संख्याभाविनां for संख्यावाचिनां. ६. D. omits पदानां. ७. A. reads त्रिशतित्र्येवमादीनि. ८. A. has तत्तत्त-. ९. All except A. and I. read कथमेतानिति for कतमे त इति.

ये देवा उक्तास्ते सर्वे प्रधानभूता न भवन्ति। किं तर्हि प्राधान्येन हविर्भुजां त्रयस्त्रिंशद्देवानां योगमहिम्ना स्वीकृतैच्छिकविग्रहा एव ततो न तेषां स्वरूपविशेषः पृथक् निरूपणीय इति। त्रयस्त्रिंशद्देवेषु श्रुता वस्वादयः पुराणप्रसिद्धेभ्यो वस्वादिभ्यो ऽन्ये। तेषु शब्दप्रवृत्तिर्यौगिकी। प्राणा बाह्येन्द्रियाणि। आत्मा ऽन्तःकरणम्। इन्द्र-प्रजापतिशब्दौ लक्षणया स्तनयित्नु-यज्ञयोर्वर्तेते। लक्षितलक्षणया त्वशनि-पश्वोः। अन्न-प्राणौ भोग्य-भोक्तृत्वाभिमानिनौ। अध्यर्धशब्दो रूढ्या सङ्ख्यावाची। योगेन तु समृद्धं वायुं वक्ति। वायुः सूत्रात्मा। 'वायुर्वै गौतम तत्सूत्रम्' (बृ. उ. ३. ७. २) इति श्रुतेः। अन्ते प्राणशब्दः परमात्मवाचकः। तदेव स्पष्टयितुं स ब्रह्मेत्युक्तम्। तत् शब्दः परोक्षवाची। अकृतब्रह्मविचारं पुरुषं प्रति ब्रह्मणः शास्त्रैकसमधिगम्यत्वात् पारोक्ष्यम्—इति। तत्र प्राणशब्दवाच्यः परमात्मैवैको मुख्यो देवः। तत्स्वरूपं च श्वेताश्वतरा विस्पष्टमामनन्ति—

'एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्च'॥
(श्वे. उ. ६. ११; ब्र. उ. ३.)

१. B. C. and F. omit ऐच्छिक-, and E. G. H. substitute भौतिक for the same. २. इति is omitted by all except A. and I. ३. G. reads -स्तनयित्नो: for -पश्वोः. ४. D. omits रूढ्या. ५. A. omits स. ६. त्यत् is substituted by all except A. and I. ७. A. and I. read परोक्षम्. ८. H. reads चेत्ता. We think this reading is more correct; but the Bhâshya and others prefer चेता; while D. reads चेत्ता.

इति। एतमेव देवं शास्त्रकुशलास्तैस्तैः शब्दविशेषैर्बहुधा व्यवहरन्ति। तथा च[1] मन्त्रवर्णः—

'सुपर्णं* विप्राः कवयो वचोभि-
रेकं सन्तं बहुधा कल्पयन्ति'।

इति। ते च शब्दविशेषा विस्पष्टमन्यस्मिन्मन्त्रे श्रूयन्ते—

'इन्द्रं मित्रं वरुणमग्निमाहु-
रथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वद-
न्त्यग्निं यमं मातरिश्वानमाहुः'॥

इति। ननु—इन्द्र-मित्र-वरुणादयः शब्दा भिन्नदेवता-वाचिनो न त्वेकं देवमभिदधति। अन्यथा वारुणयागे[2] ऐन्द्रो[3] मन्त्रः प्रयुज्येत[4]। नायं दोषः। एकत्वे ऽपि देवतात्वम्[5]। मूर्ति-भेदेन मन्त्रव्यवस्थोपपत्तेः। यथा शैवागमेषु शिवस्यैकत्वे ऽपि प्रतिमाभेदेन[6] दक्षिणामूर्ति-चिन्तामणि-मृत्युञ्जयादयो मन्त्राः

* शोभने पर्णे पक्षावस्य सुपर्णः। 'बृहद्रथन्तरे ते पक्षौ' इति श्रुतेः। सुपर्णः परमेश्वरः। विप्रातीति विप्रः। 'प्रा पूर्तौ' स्वज्ञानेन पूरणकर्तारो विद्वांसो विप्राः। ते एकं सन्तमप्येनं बहुधा कल्पयन्ति उपास्त्यादिसिद्धये। वस्तुतस्त्वेक एव परमेश्वरः। एतेन—मन्दमतीनामनुग्रहार्थं विविधकर्मानुष्ठानसिद्ध्यर्थं च कल्पितं शिव-विष्ण्वादिमूर्तिभेदमेव परमार्थसत्यं मत्वा ईश्वरबाहुल्यादुद्विजमानाः अनाकलितवैदिकधर्मरहस्याः पारक्यधर्ममुररीकुर्वन्तो ऽल्पप्रज्ञत्वादुपेक्ष्या इत्यलमतिप्रसङ्गेन।

१. E. G. H. omit च. २. A. has वरुणयागस्य. ३. B. adds अपि before ऐन्द्रो. ४. B. C. and F. read युज्येत for प्रयुज्येत्. ५. A. G. and I. read देवस्य मू-; D. E. देवत्वमू-, and H. देवत्वस्य मू-, for देवतात्वम्। मू-. ६. A. substitutes प्रासाद- for प्रतिमा- and reads प्रासाददक्षिणामूर्त्ति-; B. C. and F. प्रतिमाभेदैः द-, D. E. and H. प्रतिमाभेदद-, and G. प्रतिमाभेदात् द-.

मूर्तिविशेषेषु व्यवस्थिताः । यथा वा[1] वैष्णवागमेषु गोपाल-वामनादयो मन्त्राः तथा देवे[2] ऽपि किं न स्यात् ।

ननु—द्रव्य-देवते यागस्य स्वरूपम् । रूप[3]भेदाच्च कर्मभेदः प्रतिपादितः । 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्'—इत्यत्र यथा ऽऽमिक्षा-वाजिनयोर्द्रव्य-योर्भेदः तथा विश्वेषां[4] देवानां वाजिभ्यो देवेभ्यो भेदो ऽभ्युपग-न्तव्यः—इति । बाढम् । अभ्युपगम्यते ह्येकस्यैव वास्तवस्य[5] देवस्य कर्मानुष्ठानदशायामौपाधिको भेदः* । अत एव वाज-सनेयिब्राह्मणे इष्टिप्रकरणे कर्मानुष्ठातृ[6]प्रसिद्धं देवभेदमनूद्य तदपवादेन[7] वास्तवं देवैकत्वमवधारितम्—

'तद्यदिदमाहुरमुं यजेतामुं यजेतेत्येकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा इति' ।

न चैकस्माद्देवात् फलभेदो दुःसम्पाद इति शङ्कनीयम् । उपास्तिप्रकारभेदेन तदुपपत्तेः । 'तं यथायथोपासते तदेव भवति'—इति श्रुतेः । यथैको ऽपि राजा छत्र-चामरादिसे-वाप्रकारभेदेन फलभेदे[8] हेतुस्तद्वत् ।

---

* उपाधिशब्देनात्र सत्त्व-रजस्तमो गुणाः तज्जनितत्वेन कल्पितानि शरीराणि वा ग्राह्याणि । तद्यथा—कर्मारम्भे विघ्ननाशनार्थं कल्पितस्य गजमुखाद्याकारविशेषोपाधिविशिष्टस्य गणपतेः कल्पनम् । एवमेवेन्द्र-वरुणादीनां देवानां कर्मानुष्ठानकाले तत्तत्कार्यसिद्ध्यर्थं कल्पनम् ।

---

१. A. omits वा, and D. substitutes च. २. A. and I. read वेदे for देवे. ३. A. and I. have स्वरूप-. ४. H. reads विशेषाद. ५. H. and I. read वासवस्य. ६. A. and D. have कर्मानुष्ठान-. ७. E. G. and H. read तदनुवादेन for तदपवादेन. ८. All others except A. and I. read फलभेदहे-.

ननु-देवः फलं ददातीत्येतन्मीमांसको न सहते। तथा हि नवमाध्याये विचारितम्। किं यागेनाराधिताया देवतायाः फलं? उतापूर्वद्वारकं यागस्य फलसाधनत्वं? इति संशयः। तत्र भङ्गुरस्य यागस्य कालान्तरभाविफलम्प्रति साधनत्वायोगादवश्यं द्वारं किञ्चित् कल्पनीयम्। देवताप्रसादश्च श्रुति-युक्तिभ्यां तद्वारं स्यात्।

'तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति'।

(तै. सं. २. ६..४. ३)

इति श्रुतिः। युक्तिरप्युच्यते। [१]क्रियया प्राप्तुमिष्टतमत्वात् कर्म कारकं प्रधानम्। तेन [२]कर्मणा व्याप्यत्वात्[३] सम्प्रदानं ततोऽपि प्रधानम्। इन्द्रादिदेवताश्च सम्प्रदानत्वेन प्राधान्यात् पूजामर्हन्ति[४]। यागश्च[५] पूजारूपत्वादतिथेर्भोजनमिव देवताया[६] अङ्गं स्यात्। तस्मात् राजादिवद्देवः फलं ददातीति पूर्वः पक्षः। अत्रोच्यते। याग-देवतयोर्यो ऽयमङ्गाङ्गीभाव उपन्यस्तः स तु शब्दाकाङ्क्षानुसारेण विपर्येति। तथा हि– यजेतेत्याख्यातेन भावना ऽभिधीयते। सा च–किं? केन? कथं? इति भाव्यकरणे इतिकर्तव्यतालक्षणमंशत्रयं क्रमेणाकाङ्क्षति। तत्र यागस्य समानपदोपनीतत्वे ऽप्ययोग्यत्वान्न भाव्यता। स्वर्गस्य तु वाक्यादुपनीतस्यापि पुरुषार्थत्वेन योग्यत्वात् भाव्यता स्यात्। तस्य च स्वर्गस्य[७] साधनाकाङ्क्षायां यागः करणत्वेनान्वेति।

१. A. inserts कर्तुः. २. A. B. C. F. insert च before कर्मणा. ३. A. and I. read व्याप्तत्वात्. ४. All others except A. and I. take singular. ५. A. has यागस्य. ६. A. retains plural. ७. C. and F. read सर्वस्व for स्वर्गस्य.

तच्च करणं साध्यरूपत्वात्[1] स्वनिष्पादकं सिद्धं द्रव्यदैवतमितिकर्त्तव्यत्वेन गृह्णाति—इति । ततो यागो ऽङ्गी देवता च तदङ्गम् । एवं च सति नातिथिवद्देवता यागेनाराध्यते[2] । या तु श्रुतिः—'तृप्त एवैनम्'—इति नासौ स्वार्थे तात्पर्यवती । प्रत्यक्षादिविरोधात्* । न हि काचिद्विग्रहवती देवता हविर्भु-क्त्वा[3] तृप्ता फलं प्रयच्छतीति प्रत्यक्षेणोपलभ्यते । प्रत्युत तदभावः प्रत्यक्षेण योग्यानुपलब्ध्या वा प्रमीयते । किं च अश्वमेधे 'गां दंष्ट्राभ्यां मण्डूकान् दन्तैः'[4] इत्यादावङ्गावयवा[5]न दंष्ट्रादिद्रव्याणां हविषां भोक्तृत्वेन गोमण्डूकादयस्तिर्यञ्चो[6] ऽपि[7] देवताविशेषाः श्रूयन्ते । न च तेषां फलप्रदातृत्वं[8] सम्भाव्यते ।

'ओषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा'—

(तै. सं. ७. ३. १९; ७. ३. २०)

इत्यादावचेतनानामोषधि-वनस्पति-तदवयवानां देवतात्वं श्रूयते । तत्र कुतो हविर्भोक्तृत्वं कुतस्तरां तृप्तिः कुतस्तमां

* असति प्रत्यक्षोपलम्भे अर्थो बाधितो भवति । इन्द्रस्य प्रत्यक्षत्वाभावात् श्रुतिरियं न स्वार्थे तात्पर्यवती भवतीति भावः ।

१. A. and I. read -स्वरूपत्वात्. २. G. reads -न राध्यते. ३. D. omits from भुक्त्वा to प्रत्यक्षेण. both inclusive. ४. This mantra is differently read by the following manuscripts as:—A. has स्तेगां दंष्ट्राभ्यां मण्डूकान् जम्भ्येभिः, B. and C. स्तेगां दंष्ट्राभ्यां मण्डूकान् जम्भेभिः. E. and F. स्तेगां दंष्ट्राभ्यां मण्डूकान् दन्तैः, D. and G. गां दंष्ट्राभ्यां मण्डूका काङ्क्षन्. ५. A. has इत्यादावय-, B. C. E. F. H. इत्याद्यङ्गावय-, and I. इत्याद्यवय-. ६. A. I. C. F. have स्तेगमण्डूः. ७. Except A. and I. all omit ऽपि. ८. C. F. and H. read फलदातृत्वं.

फलदानम्। तस्माद्विग्रहादिमतां देवानां[1]मभावान्न देवताप्रसादो यागस्य फलद्वारम्। किन्तु श्रूयमाणफलसाधनत्वान्यथानुपपत्तिकल्प्यमपूर्वं तद्द्वारम्। अभ्युपगतेष्वपि देवेष्वपूर्वस्यैव फलद्वारत्वमवश्यं वक्तव्यम्। मन्त्रा-ऽर्थवादेतिहास-पुराणेषु देवतानामपि[2] तपश्चरण-क्रत्वनुष्ठान-ब्रह्मास्त्रादिमन्त्रप्रयोगेभ्यः* समीहित[3]सिद्ध्यनुकीर्त्तनात्। तस्मान्न देवः फलप्रदः इति सिद्धम्। औपनिषदास्त्वीश्वरस्य† फलदातृत्वं मन्यन्ते। तथा हि तदीये शास्त्रे तृतीयाध्याये विचारितम्। किं धर्मः फलं ददाति? आहोस्विदीश्वरः? इति संशयः। तत्र मीमांसकोक्तन्यायेन धर्मः फलप्रद इति पूर्वःपक्षः। सिद्धान्तस्तु किं धर्मो ऽन्यानधिष्ठित एव फलप्रदः? किं वा केनचिच्चेतनेनाधिष्ठितः? नाद्यः। अचेतनस्य तारतम्यानभिज्ञस्य यथोचितफलदातृत्वायोगात्। द्वितीये तु येनाधिष्ठितः स एव फलदाता ऽस्तु[4]। न चैवं धर्मस्य[5] वैयर्थ्यमिति शङ्कनीयम्। वैषम्य-नैर्घृण्यपरिहाराय धर्मापेक्षणात्। असति तु धर्मे कांश्चिदुत्तमसुखं कांश्चिन्मध्यमं कांश्चिदधमं प्रापयन्नीश्वरः कथं विषमो न भवेत्। कथं वा विविधं[6] दुःखं प्रापयन्निर्घृणो न स्यात्। धर्माधर्मानुसारेण तत् प्रापणे गुरु-पितृ-राजादीना-

* अयमर्थः— मन्त्रार्थवाद-पुराणादिषु देवतानामपि समीहितं तपश्चरणादिद्वारैव सिद्धमित्यनुवर्णितं न साक्षात् तस्मात् कर्मैव फलप्रदं न देवता।

† औपनिषदा वेदान्तिनः। ते च कर्मानुरूपं शुभमशुभं वा ईश्वरः फलं ददातीति मन्यन्ते।

१. A. has देवादीना-. २. C. and F. देवात्मनामपि, I. देवानामपि. ३. D. F. G. and H. have समाहित- for समीहित-. ४. A. reads फलं ददातु. ५. All except A. H. and I. have धर्मवैयर्थ्य-. ६. A. has चित्रं for विविधं, and all others except I. विचित्रं for the same.

मिव न वैषम्य-नैर्घृण्ये प्राप्नुतः। न हि दुष्टशिक्षां शिष्ट-परिपालनं च कुर्वतां गुर्वादीनां वैषम्य-नैर्घृण्ये विद्येते। यदुक्तं—'गो-मण्डूकादीनां तिरश्चामोषधि-वनस्पत्यादीनां च स्थावराणां फलप्रदत्वमयुक्तम्'—इति। तत् तथैवास्तु। ईश्वरस्य फलदातृत्वे कः प्रत्यूहः। यदपि—

'तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति'।

(तै. सं. २. ५. ४. ३)

—इति तत्रापीन्द्रदेवतायामवस्थितो ऽन्तर्यामी फलप्रदत्वेन विवक्षितः।

'अन्तः प्रविष्टः शास्ता जनानाम्'।

इति श्रुतेः। तस्मादीश्वरस्य[२] प्रसाद एव फलद्वारम्। न च जैमिनेय-वैयासिकयोर्मतयोः परस्परं विरोधः। विवक्षाविशेषेण तत्समाधानात्। यथा देवदत्तस्यैव पक्तृत्वे ऽपि सम्यगभिज्वलनं[३] विवक्षित्वा 'काष्ठानि पचन्ति'—इति व्यवहारः तथा परमेश्वरस्यैव फलप्रदत्वे ऽपि तारतम्यापादन-[४]निमित्ततया प्राधान्यं विवक्षित्वा 'धर्मः फलप्रदः'[५]—इति व्यवहारः किं न स्यात्। तस्मादविरोधात् फलप्रदो जगदीश्वर एक एव सर्वत्र पूजनीयो[६] देव इत्यलमतिप्रसङ्गेन[७]।

॥ इति देवतास्वरूपनिरूपणप्रकरणम् ॥

अतिथेर्लक्षणं स्वयमेव वक्ष्यति। उभयोः पूजनप्रकार-मुपरितनश्लोके निरूपयामः। 'देवता ऽतिथिपूजको नावसी-

१. A. B. C. and F. स्लेग- for गो-. २. All others except H. I. read ईश्वरप्रसाद. ३. H. has अभिज्वालनं. ४. A. and I. read -पादनिमित्त-. ५. From फलप्रदः to the end is omitted by D. ६. All others except A. and I. read पूजनीय एवाल-. ७. H. -मिति प्रसं-.

दति '-इत्युक्तेरपूजायामवसीदति इत्यवगम्यते । तथा च कूर्मपुराणे-

'यो मोहादथवाऽऽलस्यादकृत्वा देवतार्चनम् ।
भुङ्क्ते स याति नरकं सूकरेष्वभिजायते ' ॥
(कू. पु. १. २. १८. १२१)

'अकृत्वा देवपूजां च महायज्ञान् द्विजोत्तमः ।
भुञ्जीत चेत्स मूढात्मा तिर्यग्योनिं निगच्छति ' ॥
(कू. पु. १, २. १८. ११९)

इति । मार्कण्डेयः—

'अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स तस्य दुष्कृतं दत्त्वा पुण्यमादाय गच्छति' ॥
(मा. पु. २९. ३१; वि. पु. ३. ९. १५; वि. स्मृ. ६७. ३३)

इति । देवलोऽपि-

'अतिथिर्गृहमभ्येत्य यस्य प्रतिनिवर्त्तते ।
असत्कृतो निराशश्च स सद्यो हन्ति तत्कुलम् '॥

---

१. In Kûrma Purâṇa we find as अज्ञानात्. २. A. and I. read -ष्विह. . In the text of Kûrma Purâṇa we find the reading as follows :— ·कृत्वा तु द्विजः पञ्चमहायज्ञान् द्विजोत्तमाः referring to both these verses his reading is more correct. ४. All others except A. and D. as also he text of the Kûrma Purâṇa read स गच्छति. ५ This quotation rom मार्कण्डेयः- to -गच्छति is omitted by A. and I.; the author quotes this verse from Mârkaṇḍaya, but we also find it in Vishṇu Smriti and Vishṇu Purâṇa.

इति । पूजायां तु न केवलं[1] पापाभावः[2] किन्त्वभ्युदयो ऽस्ति । तथा च विष्णुधर्मोत्तरे—

'ये ऽर्चयन्ति सदा विष्णुं शङ्ख-चक्र-गदाधरम् ।
सर्वपापविनिर्मुक्ता ब्रह्माणं प्रविशन्ति ते' ॥

इति । कूर्मपुराणे—

'वेदाभ्यासो ऽन्वहं शक्त्या महायज्ञक्रियास्तथा ।
नाशयन्त्याशु पापानि देवानामर्चनं तथा' ॥

(कू. पु. १. २. १८. १९.)

इति । मनुरपि—

'अतिथिं पूजयेद्यस्तु श्रान्तं चादृष्टमानसम्[3] ।
संवृषं[4] गोशतं तेन दत्तं स्यादिति मे मतिः' ॥

(व. स्मृ. २७. ७)

इति । विष्णुरपि—

'स्वाध्यायेनाग्निहोत्रेण यज्ञेन तपसा तथा ।
नाप्नोति गृही लोकान् यथा त्वतिथिपूजनात्' ॥

(वि. स्मृ. ६७. ४४.)

इति[5] । वैश्वदेवाद्यर्थमोदनं पाचयित्वा तेन होमे कृते सति यो[6] ऽवशिष्ट ओदनः स हुतशेषः । तमेव भुञ्जीत न तु स्वभोजनार्थं पाचयेत् । यदाह[7] भगवान्—

१. B. C. D. and F. add एव to केवलं. २. A. and I. read अवसादः for पापाभावः. ३. A. and I. -मागतम्, B. C. F. -मानस; and F. वा दुष्टमानसम्. ४. D. सवत्सं. ५. A. omits इति. ६. All except A. and I. omit यो. ७. A. reads तथाह; and the other all except I. तदाह.

'यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्' ॥
(भ. गी. ३. १३)

इति। 'हुतशेषम्'—इत्यत्र हुतशब्दो महाभारते व्याख्यातः—
'वैश्वदेवादयो होमा हुतमित्युच्यते बुधैः' ।

इति । तस्य शेषो हुतशेषः । स च हुतशेषशब्दो देवर्षि-मनुष्यादिपूजोपयुक्तावशिष्टमुपलक्षयति । तदाह मनुः—

'देवानृषीन् मनुष्यांश्च पितॄन् गृह्यांश्च देवताः ।
पूजयित्वा ततः पश्चाद् गृहस्थः शेषभुग्भवेत् ॥
अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात् ।
यज्ञशिष्टाशनं ह्येतत् सतामन्नं विधीयते' ॥
(म. स्मृ. ३. ११७–११८)

इति। 'ब्राह्मणो नावसीदति' इत्यत्र विवक्षितस्य ब्राह्मणस्य लक्षणं महाभारते दर्शितम्—

'सत्यं दानं तपः शौचमानृशंस्यं दमो घृणा ।
दृश्यन्ते यत्र विप्रेन्द्र स ब्राह्मण इति स्मृतः ॥
जितेन्द्रियो धर्मपरः स्वाध्यायनिरतः शुचिः ।
काम-क्रोधौ वशे यस्य तं देवा ब्राह्मणं विदुः ॥
यस्य चात्मसमो लोको धर्मज्ञस्य मनस्विनः ।
स्वयं धर्मेण चरति तं देवा ब्राह्मणं विदुः ॥

१. D. omits from 'हुतशेषम्'—to अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात् both inclusive, this is only on account of the writer's carelessness. २. G. गृह्याश्च, E. and H. read वा ग्रश्च. ३. H. adds इति after भवेत्. ४. A. and I. वशौ. ५. All except A. and I. read सर्वं धर्मेण चरितं.

योऽध्यापयेदधीते वा याजयेद्वा यजेत वा ।
दद्याद्वाऽपि यथाशक्ति तं देवा ब्राह्मणं विदुः ॥
क्षमा दया च विज्ञानं सत्यं चैव दमः शमः ।
अध्यात्मनि रतिर्ज्ञानमेतद्ब्राह्मणलक्षणम्' ॥

इति । तथा च अनाहिताग्नितायामपि उक्तलक्षणलक्षितो ब्राह्मणो नावसीदतीति वाक्यार्थः पर्यवसितो भवति ।

'चतुर्णामपि वर्णानाम्'—इति 'षट्कर्माभिरतः'—इति वचनद्वयेन साधारणा-ऽसाधारणधर्मौ संक्षिप्योपदर्शितौ । यद्यप्यध्यापनादित्रयमेव विप्रस्याऽसाधारणं नाध्ययनादित्रयम् । तस्य वर्णत्रयसाधारणत्वात् । तथापि षट्कर्माभिरतत्वं विप्रस्यैवेति न कोऽपि विरोधः ॥ ३८ ॥

अथात्र साधारणाध्ययनादिप्रसङ्गेन बुद्धिस्थं साधारणमाह्निकं संक्षिप्याह—

सन्ध्या स्नानं जपो होमो देवतातिथिपूजनम् ।
आतिथ्यं वैश्वदेवं च षट्कर्माणि दिनेदिने ॥३९॥

इति । 'सन्ध्यास्नानम्'—इत्यत्र यवागूपाकन्यायेन स्नानस्य प्राथम्यं व्याख्येयम् । स च न्यायः पञ्चमाध्याये प्रथमपादे प्रतिपादितः । 'यवाग्वाऽग्निहोत्रं जुहोति । यवागुं च पचति'—इति श्रूयते । तत्र संशयः किमग्निहोत्र-यवागूपाकयोर-

---

१. All others except A. and I. have रतं for रतिः. २. From तथा च—to पर्यवसितो भवति is omitted by all except A. and I. ३. A. reads तथात्र, and all others except I. तत्र. ४. All except K. and L. read दैवतानां च for देवतातिथि-. ५. A. omits यवाग्वा. ६. Except F. G. H. All others omit च. ७. A. omits तत्र.

नियतः क्रमः? उत नियतः ? यदपि नियतः तदपि पाठेन नियम्यते उतार्थेन? तत्र विध्योरनुष्ठानमात्रपर्यवसानात् क्रमस्य नियामकाभावात् अनियतः—इत्येकः पूर्वः पक्षः । पूर्वाधिकरणेषु 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति' * इत्यत्र पाठस्य नियामकत्वाभ्युपगमात् अत्रापि तत्सम्भवात् यथापाठक्रमनियमः-इत्यपरः पूर्वः पक्षः । 'यवाग्वा'—इति तृतीयया श्रुत्या होमसाधनत्वावगमादसति च द्रव्ये होमानिष्पत्तेरर्थाद् यवागूपाकः पूर्वभावी-इति सिद्धान्तः । एवमत्रापि स्नानस्य शुद्धिहेतुत्वाच्छुद्धस्यैव सन्ध्यावन्दनाधिकारित्वात् स्नानं पूर्वभावि इति द्रष्टव्यम् । तत्र स्नानं तत्पूर्वभाविनां ब्राह्ममुहूर्तोत्थान-हितचिन्तनादीनां सर्वेषामुपलक्षणम् । तत्र याज्ञवल्क्यः—

'ब्राह्मे मुहूर्ते उत्थाय चिन्तयेदात्मनो हितम् ।
धर्मा-ऽर्थ-कामान् स्वे काले यथाशक्ति न हापयेत्' ॥
(या. स्मृ. १. ११५)

इति । मनुरपि—

'ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च'॥
(म. स्मृ. ४. ९२)

* द्रष्टव्यमिदं पूर्वमीमांसायां पञ्चमे ऽध्याये प्रथमे पादे 'श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात्' इत्येतत्सूत्रव्याख्यायां शबरभाष्ये ।

१. A. and I. read यदा नियतस्तदा, and others except H. यदापि नियतस्तदापि. २. A. has नियामकत्वा-. ३. A. adds क्रमः after अनियत. ४. D. omits पूर्वः. ५. D. reads -धिकरणे. ६. B. D. and E. read ब्राह्मणं. ७. A. reads तथापाठक्रम- ८. D. reads असति द्रव्यहोमो निःपतेत् अर्थाद्यवागूपाकः पूर्वभावीति द्रष्टव्यम् । तत्र स्नानपूर्वभावि -for the intermediate portion of -साधनत्वावगमात् and ब्राह्ममुहूर्तो-. ९. अत is added to एव by A. १०. D. reads उपारमेत् for न हापयेत्.

इति। 'वेदतत्त्वार्थः' परमात्मा। तथा च कूर्मपुराणे—

'ब्राह्मे मुहूर्त्ते उत्थाय धर्ममर्थं च चिन्तयेत्।
कायक्लेशं तदुद्भूतं ध्यायीत मनसेश्वरम्'॥
(कू. पु. १. २. १८. ३)

इति। विष्णुपुराणेऽपि—

'ब्राह्मे मुहूर्त्ते उत्थाय[१] मानसे मतिमान्नृप।
विबुद्ध्य[२] चिन्तयेद्धर्ममर्थं चास्याऽविरोधिनम्[३]॥
अपीडया[४] तयोः[५] काममुभयोरपि चिन्तयेत्।
परित्यजेदर्थ-कामौ धर्मपीडाकरौ नृप॥
धर्ममप्यसुखोदर्कं लोकविद्विष्टमेव च'॥
(वि. पु. ३. ११. ५-७)

इति। सूर्योदयात् प्रागर्द्धप्रहरे द्वौ मुहूर्त्तौ। तत्राद्यो ब्राह्मो द्वितीयो रौद्रः। तत्र ब्राह्मे चिन्तनीयार्थविशेषं दर्शयति विष्णुः—

'उत्थायोत्थाय बोद्धव्यं किमद्य सुकृतं कृतम्।
दत्तं वा दापितं वाऽपि[६] वाक् सत्या वापि[७] भाषिता॥
उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम्[८]।
मरण-व्याधि-शोकानां किमद्य निपतिष्यति'॥

इति। 'ध्यायीत मनसेश्वरम्' इति यदुक्तं तत्र प्रकारविशेषो वामनपुराणे दर्शितः[९]—

---

१. The text of Vishṇu Purâṇa सुस्थे च for उत्थाय. २. In Vishṇu Purâṇa विबुद्ध for विबुध्य. ३. All except I. read चाप्यविरोधिनम. ४. In Vishṇu Purâṇa the following one line is seen between अपीडया, &c., and परित्यजेदर्थकामौ, &c., but the author did not find it necessary to the present. 'दृष्टादृष्टविनाशाय त्रिवर्गे समदर्शिता. ५. A. reads ऽनयोः for तयोः. ६. A. reads ऽपि हुतं for दापितं. ७. E. II. and I. read चापि. ८. D. and G. have यद्भयं समुप-. ९. I. omits दर्शितः.

'ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च।
गुरुश्च शुक्रः शनि-राहु-केतवः
कुर्वन्तु सर्वे मम सुप्रभातम्' ॥
(वा. पु. १४. २३)

इत्यादि।

॥ इति ब्राह्मे मुहूर्त्ते आत्महितचिन्तनप्रकरणम् ॥

हितचिन्तनानन्तरं श्रोत्रियादिकमवलोकयेत् न तु पापिष्ठादिकम्। तदाह कात्यायनः—

'श्रोत्रियं सुभगं गां च अग्निमग्निचितं तथा।
प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते ॥
पापिष्ठं दुर्भगं चान्धं नग्नमुत्कृत्तनासिकम्।
प्रातरुत्थाय यः पश्येत् तत्कलेरुपलक्षणम्' ॥
(का. स्मृ. १९. ९–१०)

इति। ततो मूत्र-पुरीषे कुर्यात्। तदाहाङ्गिराः—
'उत्थाय पश्चिमे रात्रे तत आचम्य चोदकम्।
अन्तर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा ॥
वाचं नियम्य यत्नेन ष्ठीवनोच्छ्वासवर्जितः।
कुर्यान्मूत्र-पुरीषे तु शुचौ देशे समाहितः' ॥

१. A. substitutes त्रिपुरान्तकोऽमिर्-. २. All others except D. and G. substitute सहभानुजेन for शनि-राहु-केतवः. ३. A. omits तथाह. ४. All except A. and G. read सुभगां. ५. A. reads -दार्तिभ्यः स विमुच्यते. ६. A. and I. read मध्यं for चान्धं. ७. A. reads तथाचाऽङ्गिराः. ८. E. G. H. and I. read निष्ठीवो-. for ष्ठीवनो-.

इति । तत्र तृणनियमं विशिनष्टि–

'शिरः प्रावृत्य कुर्वीत शकृन्मूत्रविसर्जनम् ।
अयज्ञीयैरनार्द्रैश्च तृणैः सञ्छाद्य मेदिनीम्' ॥

इति । तत्र कालभेदेन दिङ्नियममाह याज्ञवल्क्यः–

'दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ।
कुर्यान्मूत्र-पुरीषे तु रात्रौ चेद्दक्षिणामुखः' ॥
(या. स्मृ. १.१६)

इति । कर्णश्च दक्षिणः ।

'पवित्रं दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजेत्' ॥

इति स्मृत्यन्तरे पवित्रस्य दक्षिणकर्णस्थत्वाभिधानात् । यज्ञोपवीतस्यापि तदेव स्थानं न्याय्यम् । अङ्गिरास्तु विकल्पेन स्थानान्तरमाह–

'कृत्वा यज्ञोपवीतं तु पृष्ठतः कण्ठलम्बितम् ।
विण्मूत्रं तु गृही कुर्यात् यद्वा कर्णे समाहितः' ॥

इति । तत्र कर्णे निधानमेकवस्त्रविषयम् । तथा च सांख्यायनः–

'यद्येकवस्त्रो यज्ञोपवीतं कर्णे
कृत्वा मूत्र-पुरीषोत्सर्गं कुर्यात्' ॥

---

१. D. substitutes तत्र नियमं वसिष्ठ आह for तत्र तृणनियमं विशिनष्टि. If we allow the reading of D. it means that it is of Vasishta; but we cannot find it in Vasishta Smriti. For the same तृणनियमान् appears in A. I.; and in B C. E. G. H. तृणनियमो. This is grammatically incorrect. २. B. E. and H. omit विक. ३. All except A. and I. read -स्थामाभि-. ४. G. has विकल्पे for विकल्पेन. ५. G. reads यद्येकवस्त्रो for यद्येकवस्त्रो. ६. D. omits उत्सर्गं and reads मूत्रपूरीषे कुर्यात्; while B. C. E. F. and H. read - उत्सर्गे.

इति। ननु—उक्तो दिङ्नियमो न व्यवतिष्ठते। अन्यैरन्यथा-स्मरणात्। तत्र यमः—

'प्रत्यङ्मुखस्तु पूर्वाह्णे ऽपराह्णे प्राङ्मुखस्तथा।
उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः' ॥

इति। अत्र केचिद्विकल्पमाश्रित्य व्यवस्थापयन्ति। तदयुक्तम्। सामान्य-विशेषशास्त्रयोर्विकल्पायोगात्। सामान्य-शास्त्रं हि याज्ञवल्क्यवचनम्। दिवसे कृत्स्ने ऽप्युदङ्मुखत्वं-विधानात्। यमवचनं तु विशेषशास्त्रम्। उदङ्मुखत्वस्य मध्याह्नविषयत्वेनात्र सङ्कोचप्रतीतेः। मा ऽस्तु तर्हि विकल्पः। यमवचनोक्ता तु व्यवस्था भविष्यति—इति चेत्। तदपि न युक्तम्। प्राक्-प्रत्यङ्मुखत्वनिराकरणायैव देवलेन सदैवेति विशेषितत्वात्।

'सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुखः'।

इति। अत्र प्रातः-सायाह्नशब्दौ दिवा-रात्रिविषयौ। तथा च मनुः—

'मूत्रोच्चार-समुत्सर्गं दिवा कुर्यादुदङ्मुखः।
दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा' ॥
(म. स्मृ. ४. ५०)

इति। एवं तर्हि यमोक्तयोः प्राक्-प्रत्यङ्मुखत्वयोः का गतिः? सूर्याभिमुखनिषेधगमकोक्तिरिति ब्रूमः। तदुक्तं महाभारते—

---

१. G. has तदेतदयुक्तम्. २. D. omits हि. ३. B. C. and F. omit अपि. ४. D. and G. omit -त्व-; while H. reads उदङ्मुख इति वचनात् for उदङ्मुखत्वविधानात्. ५. D. reads विशेषवच्छास्त्रम्. ६. A. reads यमवचनोक्तो नियमः for यमवचनोक्ता तु व्यवस्था भविष्यति-इति चेत्. D. substitutes अव्यवस्था भविष्यतीति चेत्, this reading is correct and gives different sense. ७. H. omits तु. ८. A. reads एतदपि for तदपि. ९. A. and I. read सूर्याभिमुखत्वनिषेधपरा यमोक्तिरिति. The reading is correct, but it seems the repetition 'यमोक्तिरिति' is contrary to the style.

'प्रत्यादित्यं प्रत्यनलं प्रतिगां च प्रतिद्विजम् ।
मेहन्ति ये च पथिषु ते भवन्ति गतायुषः'॥

इति । यत्तु देवलेनोक्तम्–

'विण्मूत्रमाचरेन्नित्यं सन्ध्यासु परिवर्जयेत्'॥

इति तन्निरुद्धेतरविषयम् ।

'न वेगं धारयेत् । नोपरुद्धः क्रियां कुर्यात्'

इति स्मरणात् । यदपि मनुनोक्तम्–

'छायायामन्धकारे वा रात्रावहनि वा द्विजः ।
यथासुखमुखः कुर्यात् प्राणबाधभयेषु च'॥

(म. स्मृ. ४. ५१; ग. पु. १. २१५. २७)

इति । तदपि नीहारान्धकारादिजनितदिङ्मोहनविषयम् ।
देशनियमो विष्णुपुराणेऽभिहितः–

'नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः ।
दूरादावसथान्मूत्रं पुरीषं च समाचरेत्'॥

(वि. पु. ३. ११. ८-९)

इति । आपस्तम्बोऽपि–

'दूरादावसथान्मूत्र-पुरीषे कुर्यात्
दक्षिणां दिशमपरां वा' ।

(आ. ध. सू. १. ११. ३१. २)

इति । मनुरपि–

'दूरादावसथान्मूत्रं दूरात् पादावसेचनम् ।
उच्छिष्टान्ननिषेकं च दूरादेव समाचरेत्'॥

(म. स्मृ. ४. १५१)

इति । स एव वर्ज्यदेशानाह–

---

१. D. reads प्रत्यमरं प्रतिगङ्गां, E. प्रत्यबलं for प्रत्यनलं. २. I. reads यद्यपि for यत्तु. ३. H. I. and also the text of manu read प्राणबाधा-. ४. The text of the Âpastambhadharmsûtra reads आराद्-.......... दक्षिणां दिशं दक्षिणापरां वा. (See G. Bühler's 1st Edition which seems to be incorrect.)

'न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे ॥ (४५)
न फालकृष्टे न जले न चित्यां न च पर्वते ।
न जीर्णदेवायतने न वल्मीके कदाचन ॥ (४६)
न ससत्त्वेषु गर्तेषु न गच्छन्नापि च स्थितः ।
न नदीतीरमासाद्य न च पर्वतमस्तके ॥ (४७)
वाय्वग्नि-विप्रानादित्यमपः पश्यंस्तथैव गाः ।
न कदाचन कुर्वीत विण्मूत्रस्य विसर्जनम्' ॥ (४८)

(म. स्मृ. ४. ४५–४८)

इति। पर्वतमस्तक इति पुनर्ग्रहणं दोषाधिक्यज्ञापनाय। यमो ऽपि—

'तुषाङ्गार-कपालानि देवताऽऽयतनानि च।
राजमार्ग-श्मशानानि क्षेत्राणि च खलानि च ॥
उपरुद्धो न सेवेत छायां दृश्यं चतुष्पथम्।
उदकं चोदकान्तं च पन्थानं च विवर्जयेत् ॥
वर्जयेत् वृक्षमूलानि चैत्य-श्वभ्र-बिलानि च'।

इति। हारीतः—

'आहारं तु रहः कुर्यात् विहारं चैव सर्वदा।
गुप्ताभ्यां लक्ष्म्युपेतः स्यात् प्रकाशे हीयते श्रिया' ॥

१. A. हलकृष्टे न च जले for न फालकृष्टे न जले. २. All others except D. and I. read बहुले for न जले. ३. H. reads न शाद्वले for कदाचन. ४. A. has चैत्येषु for गर्तेषु. ५. Others except D. read नाप्यवस्थितः. नापि च स्थितः; while A. reads नाधिरोहितः. ६. H. reads आश्रित्य for साद्य. ७. I. reads च for गाः. ८. This sentence is omitted by all others except H. ९. I. reads छायावृक्षं चतुष्पथम्; G. छायां नद्यं चतुष्पथम् and A. छायादृश्ये चतुष्पथे for छायां दृश्यं चतुष्पथम्. १०. A. reads सर्वथा. ११. A. and D. read लक्ष्मियुक्तः.

इति । आपस्तम्बो ऽपि–

'न च सोपानत्को मूत्र-पुरीषे कुर्यात्' ।

(आ. ध. सू. १. १०. ३०. १८)

इति । यमो ऽपि–

'प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत् ।
दृष्ट्वा सूर्यं निरीक्षेत गामग्निं ब्राह्मणं तथा' ॥

इति । ततो लोष्टादिना परिमृष्टगुद-मेहनो गृहीतशिश्न-श्चोत्तिष्ठेत् । तथा च भरद्वाजः–

'अथापकृष्य विण्मूत्रं लोष्ट-काष्ठ-तृणादिना ।
उदस्तवासा उत्तिष्ठेत् दृढं विधृतमेहनः' ॥

इति ।

॥ इति विण्मूत्रोत्सर्जनप्रकरणम् ॥

अथ शौचप्रकरणम् । तत्र याज्ञवल्क्यः–

'गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः ।
गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः' ॥

(या. स्मृ. १. १७)

इति । देवलो ऽपि–

'आ शौचान्तं मृजेच्छिश्नं प्रस्रावोच्चारयोरपि ।
गुदं हस्तं च निर्मृज्यान्मृदम्भोभिर्मुहुर्मुहुः' ॥

---

१. -गुद- is omitted by A. २. I. reads अवकृष्य च for अथापकृष्य, and A. यथा प्रकृष्य for the same. ३. All others except I. read -विधिः for -प्रकरणम. ४. D. and I. read आ शौचात्प्रोत्सृजेत, B. C. and F. आ शौचान्तान्मृजेत for आ शौचान्तं मृजेत.

इति। दक्षो ऽपि—

'तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा' ॥

इति। अभ्युद्धरणासम्भवे विशेषमाह विवस्वान्[1]—

'रत्निमात्राज्जलं त्यक्त्वा[2] कुर्याच्छौचमनुद्धृते।
पश्चात्तच्छोधयेत्तीर्थमन्यथा ह्यशुचिर्भवेत्' ॥

इति। शौचयोग्यां मृत्तिकामाह यमः—

'आहरेन्मृत्तिकां विप्रः कूलात् ससिकतां तथा' ॥

इति। तत्रैव विशेषमाह मरीचिः—

'विप्रे शुक्ला तु मृच्छौचे रक्ता क्षत्रे विधीयते।
हारिद्रवर्णा वैश्ये तु शूद्रे कृष्णां विनिर्दिशेत्[3]' ॥

इति। उक्तविशेषासम्भवे या काचित् ग्राह्या। तदाह मनुः—

'यस्मिन् देशे तु यत्तोयं या च यत्रैव मृत्तिका।
सैव तत्र प्रशस्ता स्यात् तया शौचं विधीयते' ॥

(म. स्मृ. १०. ४७)

इति। विष्णुपुराणे वर्ज्या मृद्विशेषा दर्शिताः—

'वल्मीक-मूषकोत्खातां[4] मृदमन्तर्जलात्तथा[5]।
शौचावशिष्टां गेहाच्च नादद्याल्लेपसम्भवाम्॥ (१८)
अन्तःप्राण्यवपन्नां च हलोत्खातां न कर्दमात्'।

(वि. पु. ३. ११. १८–१६)

---

१. A. omits विवस्वान्, and I. reads विश्वामित्रः for the same. २ D. reads रत्निमात्रजलं त्यक्त्वा, and I. रत्निमात्रजलात्तीर्थे for रत्निमात्राज्जलं त्यक्त्वा. ३. All others except I. read कृष्णेति निर्दिशेत् for कृष्णां विनिर्दिशेत्. ४ All others except H. read -मूषिक; but मूषक is correct. ५ D. reads -जले and I. -जलां for -जलात्.

इति । अन्तर्जलमृत्तिकाप्रतिषेधस्तु वापी-कूपादिव्यतिरिक्त-विषयः । अत एव यमः—

'वापी-कूप-तडागेषु नाहरेद्बाह्यतो मृदम् ।
आहरेज्जलमध्यात् तु परतो मणिबन्धनात्' ॥

इति । देवलो ऽपि काश्चिन्निषिद्धा मृदो दर्शयति—

'अङ्गार-तुष-कीटा-ऽस्थि-शर्करा-वालुकान्विताम् ।
वल्मीकोपरि तोयान्त[1]-कुड्या[2]-फाल-श्मशानजाम् ॥
ग्रामबाह्यान्तरालस्थां वालुकां पांसुरूपिणीम् ।
आहृतामन्यशौचार्थमाददीत न मृत्तिकाम्' ॥

इति । हस्तनियममाह देवलः—

'धर्मविद्दक्षिणं हस्तमधः शौचे न योजयेत् ।
तथा च वामहस्तेन नाभेरूर्ध्वं न शोधयेत्' ॥

इति । ब्रह्माण्डपुराणे दिङ्नियमो ऽभिहितः—

'उद्धृत्योदकमादाय मृत्तिकां चैव वाग्यतः ।
उदङ्मुखो दिवा कुर्याद्रात्रौ चेद्दक्षिणामुखः' ॥

इति । मृत्सङ्ख्यामाह शातातपः—

'एका लिङ्गे करे सव्ये तिस्रो द्वे हस्तयोर्द्वयोः ।
मूत्रशौचं समाख्यातं शकृति त्रिगुणं भवेत्' ॥

१. I. reads तोयान्तः for तोयान्त-. २. D. reads कुड्या-यूप-श्मशानजाम्; while all others except A. and I. read कुड्या-पूतश्मशानजाम्, and on the margin of H. appears the correction -यूप- for -पूत-. ३. A reads पुरीषे द्विगुणं भवेत; while D. reads शकृति द्विगुणं भवेत्.

इति । मनुरपि[1]–

'एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश ।
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता[2] ॥
एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः ।
वानप्रस्थस्य त्रिगुणं यतीनां तु चतुर्गुणम्' ॥

(म. स्मृ. ५.१३६–१३७; वि. स्मृ. ६०. २५–२६)

इति । बौधायनो ऽपि–

'पञ्चा ऽपाने मृदो योज्या[3] वामपादे तथा करे[4] ।
तिस्रस्तिस्रः क्रमाद्योज्याः सम्यक्शौचं चिकीर्षता[5]' ॥

इति । वसिष्ठो ऽपि–

'पञ्चा ऽपाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः ।
उभयोः पादयोः सप्त लिङ्गे द्वे परिकीर्तिते[6] ॥
'एकस्मिन् विंशतिर्हस्ते द्वयोर्ज्ञेयाश्चतुर्दश' ।

(व. स्मृ. ६. १८)

इति । विंशत्यादिकं ब्रह्मचारिविषयम् ' द्विगुणं ब्रह्मचारिणः' इत्युक्तत्वात् । आदित्यपुराणे–

---

१. E. and H. omit मनुरपि. The following two verses are found in the text of the Vishṇu Smṛiti, and the latter verse is found in the text of the Vasiṣṭha Smṛiti. २. All others except A. D. and I. read शुद्धिमवाप्नुयात्, and B. C. F. add इति after शुद्धिमवाप्नुयात्. ३. E. and G. read ऽपाने गुदे योज्या, but this appears to be a mistake. ४. All others except A. and I. read वामपाणौ दशेतरे ; but the meaning would be contrary. ५. A. has चिकीर्षत: for चिकीर्षता. ६. All others except G. and I. read -कीर्तिताः for -कीर्तिते. This latter half is not found in the text of the Vasiṣṭha Smṛiti. I. has आदित्यपुराणे after the end of this verse, but we do not see any use of the words in this place.

'स्त्री-शूद्रयोरर्द्धमानं प्रोक्तं शौचं मनीषिभिः।
दिवाशौचस्य निश्यर्द्धं पथि पादं विधीयते॥
आर्त्तः कुर्याद्यथाशक्ति शक्तः कुर्याद्यथोदितम्'।

इति। बौधायनोऽपि–

'देशं कालं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम्।
उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्'॥

(बौ. स्मृ. १. १. १-५३)

इति। वृद्धपराशरः–

'उपविष्टस्तु विण्मूत्रं कर्तुं यस्तु न विन्दति।
स कुर्यादर्द्धशौचं तु स्वस्य शौचस्य सर्वदा'॥

(ग. पु. १. २१७-३३)

इति। आनुशासनिके शौचेतिकर्तव्यता दर्शिता–

'शौचं कुर्याच्छनैर्धीरो बुद्धिपूर्वमसङ्करम्।
विप्रुषश्च तथा न स्युर्यथा चोरुं न संस्पृशेत्॥
बुद्धिपूर्वं प्रयत्नेन यथा नैवं स्पृशेत् स्फिचौ'।

इति। दक्षोऽपि–

---

१. G. reads पादो for पादं. २. A. reads समाचरेत् for प्रकल्पयेत्. ३. A. I. read कर्तुः. ४. All others except A. and I. substitute च for तु. ५ has न for स. As in the Tilgu character the letters न and स rese each other, we cannot positively say whether this is a mistake. ६ reads शौनकेनेतिकर्तव्यता for शौचेतिकर्त्तव्यता. ७. D. reads यथा न संस्पृशेत्, and A. न च स्पृशेत् for न संस्पृशेत्. ८. B. C. and F. read स्पृशेदिति, G. नैनं स्पृशेदिति, and I. नैनं स्पृशेद्द्विजाः. For the same E. H. read चोरू न संस्पृशेत्.

'षडन्या नखशुद्धौ तु देयाः शौचेप्सुना मृदः ।
न शौचं वर्षधाराभिराचरेत्तु कदाचन' ॥

इति । मरीचिरपि—

'तिसृभिश्चातलात् पादौ शोध्यौ गुल्फात्तथैव च ।
हस्तौ त्वामणिबन्धाच्च लेप-गन्धापकर्षणे' ॥

इति । यथाविधि कृते शौचे गन्धश्चेन्नापगच्छति तदाऽऽह मनुः—

'यावन्नापैत्यमेध्याक्ताद्गन्धो लेपश्च तत्कृतः ।
तावन्मृद्वारी देयं स्यात् सर्वासु द्रव्यशुद्धिषु' ॥
(म. स्मृ. ५. १२६)

इति । मनस्तुष्ट्यभावे तु देवल आह—

'यावत्तु शुद्धिं मन्येत तावच्छौचं विधीयते ।
प्रमाणं शौचसङ्ख्यायां न विप्रैरुपदिश्यते' ॥
(ग. पु. १. २१७-३६)

इति । पितामहोऽपि—

'न यावदुपनीयन्ते द्विजाः, शूद्रास्तथाऽङ्गनाः ।
गन्धलेपक्षयकरं शौचमेषां विधीयते' ॥

---

१. A. and I. read शोधयेत् for च्चातलात्; while D. reads च्चाबलात् for the same. २. G. and I. read गुल्फौ तथैव च. ३. A. has द्वौ मणिबन्धाच्च. ४. All others except I. read -गंधापकर्षणम्. ५. All others except A. and the text of Manu read -त्यमेध्याक्तो गन्धो. ६. All others except A. and the text of Manu read च्चारेयं, but the commentators of मनु do not follow this reading, as they think वारि and मृत् are used separately. ७. A. reads शौचसंख्यायाः. ८. G. and H. have तावत् for यावत्, but in the margin of H. appears the correction यावत्. ९. D. has शौचमेव, A. and G. शौचमेवं.

इति । अत्र स्त्री-शूद्रग्रहणं अकृतोद्वाहाभिप्रायम् । अनुपनीतद्विजसाहचर्यात्* । मृत्परिमाणमाह शातातपः—

'आर्द्रामलकमात्रास्तु ग्रासा इन्दुव्रते† स्थिताः ।
तथैवाहुतयः सर्वाः शौचार्थे या च मृत्तिका'[1] ॥

इति । यत्तु दक्षाङ्गिरोभ्यां परिमाणान्तरमुक्तम्—

'अर्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता ।
द्वितीया च तृतीया च तदर्धेन प्रकीर्तिता ॥
प्रथमा प्रसृतिर्ज्ञेया द्वितीया तु तदर्द्धिका ।
तृतीया मृत्तिका ज्ञेया त्रिभागकरपूरणी' ॥

(द. स्मृ. ५. ७.; ग. पु. १. २१७. २)

इति तत्र सर्वत्र न्यूनपरिमाणेन[2] गन्धाद्यक्षये सत्यधिकपरिमाणं द्रष्टव्यम् । सत्यपि गन्धक्षये शास्त्रोक्तसङ्ख्या पूरणीयैव[3] । यथाह दक्षः—

* 'स्त्रीणामुपनयनस्थाने विवाहः' इत्युक्तेः 'स्त्री-शूद्रौ च सधर्माणौ' इत्युक्तेश्च अनुपनीतद्विजवत् अकृतोद्वाहयोः स्त्री-शूद्रयोरपि गन्धलेपक्षयकरमेव शौचं विधीयते इत्यभिप्रायः ।

† इन्दुव्रतं चान्द्रायणम् । तत्र ग्रासाः होमेषु आहुतयः शौचे मृत्तिकाश्च आर्द्रामलकप्रमाणाः कर्तव्या इत्यर्थः ।

१. B. C. and F. read शौचार्थे यास्तु मृत्तिकाः, A. E. G. and H. शौचे देयास्तु मृत्तिकाः, and I. शौचे देयाश्च मृत्तिकाः for शौचार्थे या च मृत्तिका.
२. D. reads -परिमाणे for -परिमाणेन. ३. All others except D. omit एव.

'न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता।
प्रायश्चित्तेन पूयेत विहितातिक्रमे कृते' ॥

(द. स्मृ. ५. १३)

इति। एवमुक्तशौचकरणे ऽपि यस्य भावशुद्धिर्नास्ति न
ास्य शुद्धिरित्याह व्याघ्रपादः—

'शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा।
मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथा ऽऽन्तरम् ॥
गङ्गातोयेन कृत्स्नेन मृद्भारैश्च नगोपमैः।
आ मृत्योश्चाचरन् शौचं भावदुष्टो न शुद्ध्यति' ॥

इति। शौचस्य द्विविधस्यापि सर्वकर्माधिकारहेतुत्वमन्वय-
र्यतिरेकाभ्यां दक्षो दर्शयति—

'शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः।
शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः' ॥

इति। (द. स्मृ. ५. २)

॥ इति शौचप्रकरणम् ॥

अथ गण्डूषविधिः। तत्रापस्तम्बः—

'एवं शौचविधिं कृत्वा पश्चाद्गण्डूषमाचरेत्।
मूत्रे रेतसि विट्सर्गे दन्तधावनकर्मणि ॥

१. D. reads शौचसिद्धि- for शौचं शुद्धि-, A. B. C. and F. read शौच
[illegible]द्धि-, and E. G. H. शौचं सिद्धि-. २. A. reads न गोमयैः. ३. The inter-
[illegible]diate portion from this heading to the next heading 'अथाचमन-
[illegible]धि is omitted by all others except A. and I., it is difficult to state
[illegible]ether this portion has been entirely omitted by the author himself
[illegible]it has been inserted by some one else.

भक्ष्याणां भक्षणे चैव क्रमाद्गण्डूषमाचरेत् ।
चतुरष्ट-द्विषट्-त्र्यष्टगण्डूषैः षोडशैस्तथा ॥
मुखशुद्धिं प्रकुर्वीत ह्यन्यथा दोषमाप्नुयात् ।
पुरस्ताद्देवताः सर्वा दक्षिणे पितरस्तथा ॥
पश्चिमे मुनि-गन्धर्वा वामे गण्डूषमाचरेत् ।
गण्डूषसमये विप्रस्तर्जन्या वक्त्रताडनम् ॥
कुर्वीत यदि मूढात्मा रौरवं नरकं व्रजेत्[१] ।

इति ।

॥ इति गण्डूषविधिः ॥

अथाचमनविधिः । तत्र वृद्धपराशरः—

'कृत्वाऽथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः
निबद्धशिख-कच्छैस्तु[२] द्विजे आचमनं चरेत्[३] ।
कृत्वोपवीतं सव्यांसे[४] वाङ्मनः-कायसंयतः' ॥

इति । याज्ञवल्क्योऽपि—

'अन्तर्जानुः शुचौ[५] देशे उपविष्ट उदङ्मुखः ।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्' ॥
(या. स्मृ. १. १८)

इति । गौतमोऽपि—

१. A. reads प्रव्रजु-. २. H. reads -कक्ष- for -कच्छ-. ३ D and H. read द्विराचमनमाचरेत् for द्विज आचमनं चरेत. ४. D. reads सव्येन; while all others except A. and I. read सव्येंऽसे for सव्यांसे. ५. All except D. and the text of Yajñavalkyasmṛiti omit the Visarga and read अन्तर्जानु शुचौ.

'शुचौ देशे आसीनो दक्षिणं बाहुं जान्वन्तरा कृत्वा यज्ञोपवीती आ मणिबन्धनात् पाणी प्रक्षाल्य वाग्यतो हृदयस्पृशः त्रिश्चतुर्वा अप आचामेत्। द्विः प्रमृज्यात्। पादौ चाभ्युक्षेत्। खानि चोपस्पृशेत् शीर्षण्यानि* मूर्द्धनि च दद्यात्'। (गौ. स्मृ. १. ११)

इति। तत्र त्रिश्चतुर्वेत्यैच्छिको विकल्पः। ब्रह्मतीर्थं तीर्थान्तरेभ्यो विविनक्ति याज्ञवल्क्यः—

'कनिष्ठा-देशिन्यङ्गुष्ठमूलान्यग्रं करस्य च।
प्रजापति-पितृ-ब्रह्म-देवतीर्थान्यनुक्रमात्' ॥
(या. स्मृ. १. १९)

इति। एतदेव शङ्ख-लिखिताभ्यां स्पष्टीकृतम्—
(या. स्मृ. १. १९)

'अङ्गुष्ठमूलस्योत्तरतः प्रागग्रायां रेखायां ब्राह्मं तीर्थम्। प्रदेशिन्यङ्गुष्ठयोरन्तरा पित्र्यम्। कनिष्ठातलयोरन्तरा प्राजापत्यम्। पूर्वेणाङ्गुलिपर्वणि दैवम्'।

* खानि इन्द्रियाणि। शीर्षण्यानि शीर्षे भवानि नासिका-चक्षुः-श्रोत्रादीनि चोपस्पृशेत्। मूर्धनि च जलं दद्यात् इति योजना।

१. All others except A. and the text of Gautama read दक्षिणबाहुं. २. A. reads जान्वन्तरं. ३. Except A. D. I. and the text of Gautama others read पार्णि for पाणी. ४. This is omitted by all others except A. and the text of Gautama. ५. A. reads -भ्युक्षयेत्. ६. D. reads नखानि for खानि. ७. D. adds अपि to अंगुष्ठयोः. ८. A. and I. read कनिष्ठिका-करतल-.

इति । आचमनीयमुदकं विशिनष्टि शङ्खः—

'अद्भिः समुद्धृताभिस्तु हीनाभिः फेन-बुद्बुदैः ।
वह्निना न च तप्ताभिरक्षाराभिरुपस्पृशेत्' ॥[1]
(शं.स्मृ. ९. ६)

इति । याज्ञवल्क्योऽपि[2]—

'अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेन-बुद्बुदैः ।
हृत्-कण्ठ-तालुगाभिस्तु यथासङ्ख्यं द्विजातयः*॥
शुध्येरन् स्त्री च शूद्रश्च[3] सकृत्स्पृष्टाभिरन्ततः ॥
(या. स्मृ. १. २०-२१)

इति । मनुरपि—

'हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः[4] ।
वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरन्ततः†' ॥
(म. स्मृ. २. ६२)

इति । प्रचेता अपि—

'अनुष्णाभिरफेनाभिः पूताभिर्वस्त्र-चक्षुषा ।
हृद्गताभिरशब्दाभिः त्रिश्चतुर्वाद्भिराचमेत्' ॥

---

* द्विजातयः ब्राह्मण-क्षत्रिय-वैश्याः शुध्येरन् इति पूर्वेणान्वयः । स्त्री-शूद्रौ चकारात् अनुपनीतद्विजश्च अन्ततः अन्तेन तालुना स्पृष्टाभिरपि । तृतीयार्थे तसिः ।

† प्राशिताभिः अन्तरास्यप्रविष्टाभिः कण्ठमप्राप्ताभिरपीत्यर्थः । 'अन्ततः जिह्वौष्ठान्तेनापि' इति कुल्लूकभट्टः ।

---

१. 'वह्निना न च तप्ताभिरक्षाराभिरुपस्पृशेत्'। याज्ञवल्क्योऽपि 'अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेन बुद्बुदैः is omitted by D. २. A. and I. omit अपि. ३. A. D. and I. read शूद्राश्च. ४. H. and I. read भूपतिः.

इति । तत्र[1]ापवादमाह यमः[2]–

‘ यात्रायामीक्षितेनापि[3]* शुद्धिरुक्ता मनीषिणाम् ।
उदकेनातुराणां च तथोष्णेनोष्णपायिनाम्’ ॥

इति । उदकस्य ग्रहणप्रकारं परिमाणं चाह भरद्वाजः–

‘ आयतं पर्वतः[4] कृत्वा गोकर्णाकृतिवत्[5]करम् ।
संहतांगुलिना[6] तोयं गृहीत्वा पाणिना द्विजः ॥
मुक्ताङ्गुष्ठकनिष्ठेन शेषेणाचमनं चरेत् ।
माषमज्जनमात्रास्तु संगृह्य त्रिः पिबेदपः[7]’ ॥

इति । स च पाणिर्दक्षिणो द्रष्टव्यः ।

‘ त्रिः पिबेद्दक्षिणेनापः’ ।

इति पुराणवचनात् । उदकपानानन्तरभाविनिमित्तकर्त्त[8]-
व्यतामाह दक्षः–

‘ संवृत्याङ्गुष्ठमूलेन[9] द्विःप्रमृज्यात्ततो मुखम् ।
संहताभिस्त्रिभिः[10] पूर्वमास्यमेवमुपस्पृशेत् ॥

* यात्रायां प्रयाणे केवलं जलावलोकनेनापि शुद्धिर्भवति । न तत्र स्पर्शनाद्यपेक्षा । ‘ रात्राववीक्षितेनापि’ इति पाठस्तु असङ्गत इव प्रतिभाति ।

१. B. C. and F. add अपि to तत्र. २. A. substitutes याज्ञवल्क्य for यमः, but we do not find this verse in the text of the same. ३. All others except D. read रात्राववीक्षितेनापि for यात्रायामीक्षितेनापि, but we would not see the meaning of अवीक्षितेनापि . if right, would be an exception to an आचमन how the सायंसंध्यावन्दन is to be performed. ४ A. and I. read सर्वतः. ५. I. reads -मस्करम्. ६. A. reads संहताङ्गुलिना. ७. D. reads -दथ for -दपः. ८. D. reads भावि निमित्तकर्त्तव्यता-. ९. A. reads सम्पत्स्याङ्गुष्ठ-, B. C. D. and F. संमृज्याङ्गुष्ठ-, and E. G. H. संभृत्याङ्गुष्ठ- for संवृत्याङ्गुष्ठ-. १०. A. reads संहताभिभवतमृभि पूर्वमास्यमुपस्पृशेत्, B. C. E. F. and H. संहताभिस्त्रिभिः पूर्वमास्यमेतदुपस्पृशेत् । and D. संहताङ्गुलिभिः पूर्वमास्यमेतदुपस्पृशेत्.

अङ्गुष्ठेन प्रदेशिन्या घ्राणं स्पृष्ट्वा त्वनन्तरम् ।
अङ्गुष्ठानामिकाभ्यां तु चक्षुः-श्रोत्रे ततः परम् ॥
कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयं तु तलेन वै ।
सर्वाभिश्च शिरः पश्चात् बाहू चाग्रेण संस्पृशेत्' ॥

(द. स्मृ. २.१४-१७)

इति । वृद्धशङ्खस्त्वन्यथास्पर्शनमाह–

' तर्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटद्वयम् ।
मध्यमाङ्गुष्ठयोगेन स्पृशेन्नेत्रद्वयं ततः ॥
नाभिं च हृदयं तद्वत् स्पृशेत् पाणितलेन तु ।
संस्पृशेच्च ततः शीर्षमयमाचमने विधिः' ॥

(शं. स्मृ. ९. ५-७

इति । एवमन्ये ऽप्यन्यथान्यथा वर्णयन्ति । तत्र यथा शाखं व्यवस्था द्रष्टव्या । आचमननिमित्तान्याह मनुः–

'कृत्वा मूत्रं पुरीषं वा खान्याचान्त उपस्पृशेत् ।
वेदमध्येष्यमाणश्च अन्नमश्नंश्च सर्वदा' ॥

(म. स्मृ. ५.१३८)

इति । कूर्मपुराणे ऽपि–

---

१. B. C. and F. reads बाहूनग्रेण for बाहू चाग्रेण. २. D. omits the portion intervening between तर्जन्यङ्गुष्ठयोगेन स्पृशेत in the first half of the first line and स्कन्धद्वयं ततः in the latter half of the 4th line. ३. D. substitutes तु for च. ४. A. D. and I. do not repeat the word अन्यथा. ५. D. omits तत्र. ६. A. and I. read पाण्याचान्त, and D. स्नात्वावाप. ७. All others except A. and the text of Manu read पीत्वापो ऽध्येष्यमाणश्च. ८. I. reads वेदमपि च; while others except A. read वेदमन्नं च. ९. A. D. H. and I. omit अपि.

'चण्डाल-म्लेच्छसम्भाषे* स्त्री-शूद्रोच्छिष्टभाषणे ।
उच्छिष्टं पुरुषं स्पृष्ट्वा भोज्यं वाऽपि तथाविधम् ॥
आचामेदश्रुपाते वा लोहितस्य तथैव च ।
अग्नेर्गवामथाऽऽलम्भे स्पृष्ट्वा ऽप्रयतमेव च ॥
स्त्रीणामथाऽऽत्मनः स्पर्शे नीलीं वा परिधाय च' ॥
(कू. पु. १. २. १३. ४–८)

इति । 'स्त्री-शूद्रोच्छिष्टभाषणे-' इत्येतज्जपादिविषयम् । तथा च पद्मपुराणे—

'चाण्डालादीन् जपे होमे दृष्ट्वा ऽऽचामेद्द्विजोत्तमः' ।

इति । मनुरपि—

'सुप्त्वा क्षुत्त्वा च भुक्त्वा च निष्ठीव्योक्त्वाऽनृतं वचः ।
रथ्यां श्मशानं चाक्रम्य आचामेत् प्रयतोऽपि सन्' ॥
(म. स्मृ. ५. १४५)

इति । बृहस्पतिरपि—

* चाण्डालैः म्लेच्छैश्च सह सम्भाषे सम्भाषणे । उच्छिष्टैः स्त्री-शूद्रैः सह उच्छिष्टेन वा तैः सह भाषणे आचामेदिति भावः ।

१. B. C. and F. read -भाषणम्. २. B. C. E. F. and G. read दृष्ट्वा for स्पृष्ट्वा. ३. All others except A. and I. substitute चा for वा. ४ After this line we find in the Kûrma Purâṇa the following two lines:- भोजने सन्ध्ययोः स्नात्वा त्यागे मूत्र-पुरीषयोः । आचान्तोऽप्याचमेत्स्पृष्ट्वा सकृत्सकृदथान्यतः. ५. A. reads तथात्मसंस्पर्शे, and I. यथात्मसंस्पर्शे for अथात्मनः स्पर्शे. ६. All others except A. I. and the Kûrma Purâṇa read नीवीं for नीलीं. ७. All others except A. and I. read -पुराणम्. ८. In the text of manu appears -नृतानि च. ९. A. omits this portion and I. omits only अपि.

'अधोवायुसमुत्सर्गे आक्रन्दे क्रोधसम्भवे ।
मार्जार-मूषकस्पर्शे प्रहासे ऽनृतभाषणे ॥
निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नपि स्पृशेत्' ॥

इति । यमो ऽपि–

'उत्तीर्योदकमाचामेदवतीर्य तथैव च ।
एवं स्यात्तेजसा युक्तो वरुणो ऽपि सुपूजितः'* ॥

इति । हारीतो ऽपि–

'नोत्तरेदनुपस्पृश्य जलम्' ।

इति । वसिष्ठो ऽपि–

'क्षुते निष्ठीवने सुप्ते परिधाने ऽश्रुपातने ।
पञ्चस्वेतेषु चाचामेच्छ्रोत्रं वा दक्षिणं स्पृशेत्' ॥

इति । दक्षिणकर्णस्पर्शनमाचमनासम्भवे वेदितव्यम् ।
तथा च मार्कण्डेयपुराणम्–

'सम्यगाचम्य तोयेन क्रियाः कुर्वीत वै शुचिः ॥ (६७)
देवतानामृषीणां च पितॄणां चैव यत्नतः ॥ (६८)
कुर्यादाचमनं स्पर्शं गोपृष्ठस्या ऽर्कदर्शनम् † ।

---

* एवं कृते सति जलाधिष्ठातृदेवता वरुणो ऽपि पूजितो भवतीत्यर्थः ।

† नेदमुपलब्धपुस्तकेषु दृश्यते । तथापि 'पूर्वाभावे ततः परं'–इत्यस्य ग्रहणे इदमपेक्षितमेवेति स्पष्टमेव ।

---

१. All others except A. and D. read -मूषिकास्पर्शे, which appears to be a mistake. If the word मूषिका meaning a female rat is kept then the meaning would be that at the touch of the female rat alone the आचमन is to be performed. २. All others except D. read कुर्वन्नुपस्पृशेत्. ३. A. and I. read वरुणेन सुपूजितः, and D. वरुणेनापि पूजितः for the same. ४. D. and I. substitute वा for चा. ५. A. H. and I. read क्रियां.

कुर्वीतालम्भनं चापि दक्षिणश्रवणस्य वा ॥ (७०)
यथाविभवतो ह्येतत् पूर्वाभावे ततः परम्।
न विद्यमाने पूर्वोक्ते उत्तरप्राप्तिरिष्यते' ॥ (७१)

(मा. पु. ३४. ६७-७१)

इति। दक्षिणकर्णप्रशंसा च 'प्रभासादीनि तीर्थानि'–इत्यादिना वक्ष्यते। अथ वा बौधायनोक्तं द्रष्टव्यम्–

'नीवीं विसृज्य परिधायाप उपस्पृशेत्।
आर्द्रं तृणं गोमयं भूमिं वा समुपस्पृशेत्'।

(बौ. स्मृ. १. १०. १६-१७)

इति। षट्त्रिंशन्मते द्विराचमननिमित्तं दर्शितम्–

'होमे भोजनकाले च सन्ध्ययोरुभयोरपि।
आचान्तः पुनराचामेज्जप-होमार्चनादिषु'॥

इति। याज्ञवल्क्योऽपि–

'स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे।
आचान्तः पुनराचामेद्वासो विपरिधाय च' ॥

(या. स्मृ. १. १९६)

इति। बौधायनोऽपि–

'भोजने हवने दाने उपहारे प्रतिग्रहे।
हविर्भक्षणकाले* च तत् द्विराचमनं स्मृतम्'॥

* हविर्भक्षणं पुरोडाशेडादिभक्षणम्।

१. A. B. C. D. and F. substitute वा for च. २. B. C. and F. read गोभूमिं गोमयं वा संस्पृशेत्; while A. E. H. and I. भूमिं गोमये वा संस्पृशेत्.

इति । कूर्मपुराणे ऽपि—

'प्रक्षाल्य पाणी पादौ च भुञ्जानो द्विरुपस्पृशेत् ।
शुचौ देशे समासीनो भुक्त्वा च द्विरुपस्पृशेत् ॥
(कू. पु. १. २. १२. ६४)

ओष्ठौ विलोमकौ स्पृष्ट्वा वासो विपरिधाय च ।
रेतो-मूत्र-पुरीषाणामुत्सर्गे ऽयुक्तभाषणे ॥
जृम्भित्वा ऽध्ययनारम्भे कास-श्वासागमे तथा ।
चत्वरं वा श्मशानं वा समागम्य द्विजोत्तमः ॥
सन्ध्ययोरुभयोस्तद्वदाचान्तो ऽप्याचमेत् पुनः' ॥
(कू. पु. १. २. १३. १-३)

इति । अयुक्तभाषणं निष्ठुरभाषणम् । आचमनापवादमाह बौधायनः—

'दन्तवद्दन्तलग्नेषु दन्तसक्तेषु धारणा ।
ग्रस्तेषु तेषु नाचामेत्तेषां संस्थानवच्छुचिः' ॥
(बौ.स्मृ. १. ४. १. २४

१. A. D. E. G. and H. read शुष्कभाषणे for ऽयुक्तभाषणे. २. D read धावित्वा; while A. and the text of Kûrma Purâṇa read ष्ठीवित्वा. ३. The text of the Kûrma Purâṇa reads समाक्रम्य. ४. A. and I. read ततः for पुनः. ५. A. D. E. G. and H. read शुष्क- for अयुक्त. ६. A. and I. read अस्थितेषु च; while D. reads ग्रस्तेषु तेषु for ग्रस्तेषु तेषु. ७. The text of the Baudhâyana smrite reads the whole verse as follows:—

दन्तवद्दन्तसक्तेषु दन्तवत्तेषु धारणा ।
ग्रस्तेषु तेषु नाचामेत्तेषां संस्रावबच्छुचिः ॥

In this verse both the readings संस्थानवत् and संस्रावबत are doubtful. They do not give any proper meaning. Dr. Bühler corrects संस्रावणा, but we think संस्था न चाऽशुचिः would be a more correct reading.

इति । दन्तलग्न-दन्तसक्तयोर्निर्हार्यानिर्हार्यरूपेण भेदः । अत एव देवलः—

> 'भोजने दन्तलग्नानि निर्हृत्याचमनं चरेत् ।
> दन्तलग्नमसंहार्यं लेपं मन्येत दन्तवत् ॥
> न तत्र बहुशः कुर्याद्यत्नमुद्धरणे पुनः ।
> भवेदाशौचमत्यर्थं तृणवेधाद्व्रणे कृते' ॥

इति । ग्रस्तेषु[1] तेषु स्वस्थानाच्च्युतेषु[2] च निगीर्णेष्वित्यर्थः[3] । तत्र मनुः—

> '[4]दन्तवद्दन्तलग्नेषु जिह्वास्पर्शकृते[5] न तु ।
> परिच्युतेषु च स्थानान्निगिरन्नेव तच्छुचिः' ॥

(बौ. स्मृ. १. ८. १. २९)

इति । एतच्च रसानुपलब्धौ वेदितव्यम् । यथाऽऽह शङ्खः—

'दन्तवद्दन्तलग्नेषु रसवर्जनमन्यतो जिह्वाभिस्पर्शनात्' ।

इति । फल-मूलादिषु विशेषमाह शातातपः—

---

१. A. and I. read अस्थितेषु च; while D. reads ग्रस्तेषु for प्रस्तेषु. २. A. and I. omit स्व-. ३. Except A. D. and I. all others read स्वस्थानेषु तेषु, omitting च्युतेषु. ४. This verse the author quotes from Manu; but we find this only in one manuscript with Govind Raja's commentary (5 between 141 and 142 verse), but neither Govindraja nor any of the other six commentators on Manu has commented it, the reading of it being—

> दन्तवद्दन्तलग्नेषु दन्तास्यस्थेषु चैव हि ।
> च्युतेष्वास्यप्रविष्टेषु निगिरन्नेव तच्छुचि ॥

५. All others except A. and I. read स्पर्शे कृते for स्पर्शकृते.

'दन्तलग्ने फले मूले भुक्तस्नेहावशिष्टके ।
ताम्बूले चेक्षुदण्डे च नोच्छिष्टो भवति द्विजः'॥

इति । षट्त्रिंशन्मते अपि,—

'ताम्बूले चैव सोमे* च भुक्तस्नेहावशिष्टके ।
दन्तलग्नस्य संस्पर्शे नोच्छिष्टस्तु भवेन्नरः ॥
त्वग्भिः पत्रैर्मूल-पुष्पैस्तृण-काष्ठमयैस्तथा ।
सुगन्धिभिस्तथा द्रव्यैर्नोच्छिष्टो भवति द्विजः' ॥

इति । एतच्च मुखसौरभ्याद्यर्थोपभुक्तावशिष्टविषयम् ताम्बूलसाहचर्यात् । 'दन्तलग्नस्य संस्पर्शे' इति अनिर्हार्यस्य दन्तलग्नस्य जिह्वया संस्पर्शे इत्यर्थः । याज्ञवल्क्योऽपि-

'मुखजा विप्रुषो मेध्यास्तथाऽऽचमनबिन्दवः ।
श्मश्रु चास्यगतं दन्तसक्तं त्यक्त्वा ततः शुचिः' ॥
(या. स्मृ. १. १९६

इति । मुखनिःसृता बिन्दवो यद्यङ्गे पतन्ति तदा नाचम नापादकाः । तथा च गौतमः—

---

* सोमः सोमवल्लीरस इति यावत् ।

---

१. G. reads भवतु for भवति. २. E. and H. read षड्विंशतिमते अपि b we do not find any work of this name on Dharmaśāstra. Probal this is a mistake of the writer. ३ A. adds इति after भवेन्नर. ४. reads फलैः पुष्पैः for मूल-पुष्पैः. ५. All others except A. and I. re सौरभाद्यर्थो. ६. D. reads प्रतिहार्यस्य, B. C. and F. निर्हार्यस्य. E. G. a H. हार्यस्य for अनिर्हार्यस्य. ७. B. C. and F. read न पतन्ति, D. G. and H. निपतन्ति for पतन्ति. ८. A. reads आचमनापवादका, and D. आचमनापादकाः for नाचमनापादकाः.

'न मुख्या विप्रुष उच्छिष्टं कुर्वन्ति ताश्चेदङ्गे निपतन्ति'।

(गौ. स्मृ. १. १६)

इति। आचमनबिन्दवस्त्वङ्गस्पृष्टा अपि मेध्याः। तथा च मनुः—

'स्पृशन्ति बिन्दवः पादौ य आचामयतः परान्।
भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत्'॥

(म. स्मृ. ५. १४२; वि. स्मृ. २३. ५४)

इति। अत्र पादग्रहणं अवयवान्तरस्याप्युपलक्षणार्थम्। तथा च यमः—

'पतन्त्याचामतो याश्च शरीरे विप्रुषो नृणाम्।
उच्छिष्टदोषो नास्त्यत्र भूमितुल्यास्तु ताः स्मृताः'॥

इति। श्मश्रुविषये विशेषमाहाऽऽपस्तम्बः—

'न श्मश्रुभिरुच्छिष्टो भवत्यन्तरास्ये
सद्भिः यावन्न हस्तेनोपस्पृशति'।

(आ. ध. सू. १. ५. १६. ११)

इति। आचमने वर्ज्यानाह भृगुः—

१. A. and I. omit न; for the same E. G. and H. substitute अ-. २. All others except A. and the text of Gautama read न चेदङ्गे for ताश्चेदङ्गे. ३. D. reads अङ्गास्पृष्टा, B. C. E. F. and H. अङ्गं स्पृष्टा, and A. I. G. अङ्गं स्पृष्टा for अङ्गस्पृष्टा. ४ All others except A. I. and the text of Manu read मन्त्याचामयत: for य आचामयतः. ५. D. reads भूमिगै; while the commentator Govindrâja reads भूमिकैः for भौमिकैः. ६ Except Govindrâja all other commentators and A. read तावप्रयतो. ७. D. reads अवान्तरस्य for अवयवान्तरस्य. ८. A. B. C. E. F. and I. read आचमतो. ९. A. reads वस्य for वाच-.

‘ विना यज्ञोपवीतेन तथा ऽधौतेन वाससा ।
मुक्त्वा शिखां वा[1]प्याचामेत् कृतस्यैव पुनः क्रिया ॥
सो[2]ष्णीषो बद्धपर्यङ्कः प्रौढपादश्च* यानगः ।
दु[3]र्देशप्रगतश्चैव नाचामन् शुद्धिमाप्नुयात्’ ॥

इति । बौधायनो ऽपि—

‘ पादप्रक्षालनो[4]च्छेषेण नाचामेत् । यद्या[5]चामेत् भूमौ स्रावयित्वाऽऽचामेत् । ना[6]ङ्गुलीभिर्न स[7][8]बुद्बुदाभिर्न सफेनाभिर्नो[9]ष्णाभिर्न क्षा[10]राभिर्न वि[11]वर्णाभिर्न दु[12]र्गन्धरसाभिर्न कलुषाभिः । न हसन् न ज[13]ल्पन् न ति[14]ष्ठन्

---

* प्रौढपादो यथा—

‘आसनारूढपादस्तु जानुनोर्जङ्घयोस्तथा ।
कृतावसक्थिको यस्तु प्रौढपादः स उच्यते’ ॥

इत्युक्तलक्षणः । जानुनोः जङ्घयोः कृतावसक्थिकः कृतपृष्ठजानुजङ्घाबन्ध इति भावः ।

---

१. B. C. and F. read वा नाचामेत्, H. and I. चाचामेत् for वाप्याचामेत्. २. Except D. all others read सोष्णीषी. ३. B. C. E. F. and H. read दुर्देशप्रपन्नश्चैव, G. दुर्देशः प्रपन्नश्चैव, and D. दुर्वेषश्च प्रवश्चैव for दुर्देशप्रगतश्चैव. ४. All others except G. and the text of Baudhâyana read पादप्रक्षालना-च्छेषेण. ५. Except D. and the text of Baudhâyana all others omit यद्याचामेत्. ६. Except A. and the text of Baudhâyana all others omit नाङ्गुलीभिः. ७. D. substitutes च for स-. ८. All others except A. I. and the text of Baudhâyana omit स-. ९. A. and I. read नोच्छिष्टाभिः. १०. B. C. and F. read न जाताभिः, E. न जात्याभिः, and G. न जातिभिः for न क्षाराभिः. ११. D omits न विवर्णाभिः, and A. adds नोष्णाभिः before न कलुषाभिः. १२. This is omitted by all others except A. and the text of Baudhâyana. १३. B. C. and F. read जलस्थो for जल्पन्. १४. A. omits न जल्पन् न तिष्ठन्.

न विलोकयन् न प्रह्वो न प्रणतो न मुक्तशिखो न प्रावृतकण्ठो न वेष्टितशिरा न बद्धकक्ष्यो न बहिर्जानुः न त्वरमाणो नाऽयज्ञोपवीती न प्रसारितपादः शब्दमकुर्वन् त्रिरपो हृदयङ्गमाः पिबेत्'।

(बौ. स्मृ. १. ५. १२.-१९)

इति। देवलोऽपि—

'सोपानत्को जलस्थो वा मुक्तकेशोऽपि वा नरः।
उष्णीषी वाऽपि नाचामेद्वस्त्रेणाबध्य वा शिरः' ॥

इति। आपस्तम्बोऽपि—

न वर्षधाराभिराचामेत्'।

(आ. ध. सू. १. ६. १५. ४)

इति। यमोऽपि—

'अपः कर-नखस्पृष्टा य आचामति वै द्विजः।
सुरां पिबति स व्यक्तं यमस्य वचनं यथा' ॥

इति। ब्रह्माण्डपुराणेऽपि—

'कण्ठं शिरो वा प्रावृत्य रथ्या-ऽऽपणगतोऽपि वा।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्' ॥

इति। गौतमोऽपि—

---

१. B. C. E. F. and I. omit न विलोकयन्; while H. in its correction reads नाविलोकयन्. २. B. C. D. E. F. G. H. and I. add after this word नाबद्धकच्छो न बहिर्जानुर्न वेष्टितशिरा न बद्धकक्षो न पठमानो नायज्ञोपवीति न प्रसारितपादः for न प्रावृतकण्ठो न वेष्टितशिरा न बद्धकक्ष्यो न बहिर्जानुः न त्वरमाणो नायज्ञोपवीती न प्रसारितपादः ३. A. and D. read मुक्तकेशो ऽथ वा. ४. D. reads-नाबद्धशीर्षकम्. ५. A. and I. read धाराभिराचामेत्. ६. This verse and the words ब्रह्माण्डपुराणे ऽपि following it are omitted by D. ७. A. and I. read -नखैः. ८. All others except A. and I. read व्यक्तं.

'नाञ्जलिना पिबेन्न तिष्ठन् उद्धृतोदकेनाचामेत्'।
(गौ. स्मृ. ९. ३)

इति। न तिष्ठन्निति स्थलविषयम्। जले तु तिष्ठन्नप्याचामेत्। तथा च विष्णुः—

'जान्वोरूर्ध्वं जले तिष्ठन्नाचान्तः शुचितामियात्।
*अधस्ताच्छतकृत्वोऽपि समाचान्तो न शुद्ध्यति'॥

इति। कौशिकोऽपि—

'अपवित्रकरः कश्चिद्ब्राह्मणोऽपि उपस्पृशेत्।
अकृतं तस्य तत् सर्वं भवत्याचमनं तथा॥
वामहस्ते स्थिते दर्भे दक्षिणेनाचमेद्यदि।
रक्तं तु तद्भवेत्तोयं पीत्वा चान्द्रायणं चरेत्'॥

इति। मार्कण्डेयस्तु दक्षिणहस्तस्य सपवित्रतां विधत्ते—

'सपवित्रेण हस्तेन कुर्यादाचमनक्रियाम्।
नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छिष्टं तु वर्जयेत्'॥

इति। गोभिलो हस्तद्वयेऽपि पवित्रं प्रशंसति—

'उभयत्र स्थितैर्दर्भैः समाचामति यो द्विजः।
सोमपानफलं तस्य भुक्त्वा यज्ञफलं भवेत्'॥

* अधस्तात् जान्वोरधः परिमाणे जले स्थित्वा शतकृत्वोऽप्याचमनं निष्फलमित्यर्थः।

१. A. and I. add न and read नोद्धृतोदकेन. २. D. omits अपि. ३. D. and H. read ब्राह्मणो य उपस्पृशेत. ४. H. substitutes अपि for तु. E. omits the portion from मार्कण्डेयस्तु...............गोभिलो. H. also has omitted this portion, but it appears as correction in its margin. ५. G. and H. omit स-. ६. A. and I. add तु. after गोभिल-. ७. All others except A. omit अपि. ८. I. reads सपवित्रत्वं. ९. A. reads हस्तद्वय-. १०. G. reads -चरति for -चामति. ११. G. reads लभेत.

इति। स्नानानन्तरभाविन्याचमने दक्षो विशेषमाह—

'स्नात्वा ऽऽचामेत्तदा विप्रः पादौ कृत्वा जले स्थले।
उभयोरप्यसौ शुद्धस्ततः कार्यक्षमो* भवेत्॥

इति। हारीतः—

'आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपम्।
शुष्कवासा स्थले कुर्यात्तर्पणाचमनं जपम्'॥

इति। स्थलविषये विशेषो दर्शितः स्मृत्यन्तरे—

'अलाभे ताम्रपात्रस्य करकं च कमण्डलुम्।
गृहीत्वा स्वयमाचामेन्नरो नाऽश्रयतो भवेत्॥
करकालाबुकाद्यैश्च ताम्र-पर्णपुटेन च।
स्वहस्ताचमनं कार्यं स्वहस्तेऽपोश्च वर्जयेत्॥
करपात्रे च यत्तोयं यत्तोयं ताम्रभाजने।
सौवर्णे राजते चैव नैवाऽशुद्धं तु तत् स्मृतम्'॥

इति। एवमुक्तलक्षणस्याचमनस्य प्रशंसामाह व्याघ्रपात्—

'एवं यो ब्राह्मणो नित्यमुपस्पर्शनमाचरेत्।
ब्रह्मादिस्तम्बपर्यन्तं जगत् स परितर्पयेत्'॥

---

* कार्यक्षमः सन्ध्यावन्दनादीन्यन्यानि वा कार्याणि कर्तुं योग्यः भवति।

---

१. B. C. E. F. G. and H. omit कार्य- and read ततः क्षेमो भवेद्दिजः. In the margin of H. appears correction. २. D. G. and F. omit this latter half of this verse. ३. All others except A. and I. read अलाबु ताम्रपात्रं च for अलाभे ताम्रपात्रस्य. ४. All others except A. and I. read -चर्मपुटेन for पर्णपुटेन. ५. All others except A. D. and I. read करपत्रे for करपात्रे. ६. B. C. and F. substitute च for सौ; while G. substitutes स. for the same.

इति । वृद्धशङ्खो[1]ऽपि–

'त्रिःप्राश्नीयाद्यदम्भस्तु प्रीतास्तेनास्य देवताः ।
ब्रह्मा विष्णुश्च रुद्रश्च भवन्तीत्यनुशुश्रुम[2] ॥
गङ्गा च यमुना चैव प्रीयेते परिमार्जनात् ।
पादाभ्यां प्रीयते विष्णुर्ब्रह्मा शिरसि कीर्त्तितः ॥
नासत्य-दस्रौ प्रीयेते स्पृष्टे[3] नासापुटद्वये ।
स्पृष्टे लोचनयुग्मे तु प्रीयेते शशि-भास्करौ ॥
कर्णयुग्मे तथा स्पृष्टे प्रीयेते त्वनिला-ऽनलौ ।
स्कन्धयोः स्पर्शनादेव प्रीयन्ते सर्वदेवताः ॥
नाभिसंस्पर्शनान्नागाः प्रीयन्ते चास्य नित्यशः ।
संस्पृष्टे हृदये चास्य प्रीयन्ते सर्वदेवताः ॥
मूर्द्धसंस्पर्शनादस्य प्रीतस्तु पुरुषो भवेत्' ।
(शं. स्मृ. ९. ९-१३)

इति । आचमनाकरणे प्रत्यवायो दर्शितः पुराणसारे[4]–

'यः क्रियाः कुरुते मोहादनाचम्यैव[5] नास्तिकः* ।
भवन्ति हि वृथा तस्य क्रियाः सर्वा न संशयः' ॥

इति ।

॥ इति आचमनप्रकरणम् ॥

---

* अत्र नास्तिकशब्देन आचमनस्यावश्यकर्तव्यत्वमनादृत्य कर्म कर्तुं प्रवृत्त इति ज्ञेयम् । ननु नास्ति कश्चित् परलोक इति वदः इत्युक्तलक्षणो नास्तिकः । तस्य प्राप्तेरभावात् निषेधस्य वैयर्थ्यमेव स्यात्

1. This line and the following lines the author quotes from Vridhasankha. We have no such work as Vridhasankha. The work we have bears the name Sankha wherein these eleven lines appear. It is difficult to say whether the work we have is the work Vridhasankha or Sankha. 2. All except A. and D. read अनुशुश्रुम 3. D. reads स्पृशेत for स्पृष्टे. 4. A. omits पुराणसारे. 5. D. substitutes च for एव.

अथ दन्तधावनविधिः तत्रात्रिः—

'मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः।
तदार्द्रकाष्ठं शुष्कं वा भक्षयेद्दन्तधावनम्' ॥
(ल. अ. स्मृ. ४. ५-६)

इति। व्यासोऽपि—

'प्रक्षाल्य हस्तौ पादौ च मुखं च सुसमाहितः।
दक्षिणं बाहुमुद्धृत्य कृत्वा जान्वन्तरा ततः ॥
तिक्तं कषायं कटुकं दुर्गन्धं कण्टकान्वितम्।
क्षीरिणो वृक्षगुल्मादीन् वर्जयेद्दन्तधावने' ॥

इति। विष्णुः—

'कण्टकिक्षीरवृक्षोत्थं द्वादशाङ्गुलसम्मितम्।
कनिष्ठाङ्गुलिवत् स्थूलं पर्वार्द्धकृतकूर्चकम् ॥
दन्तधावनमुद्दिष्टं जिह्वोल्लेखनिका तथा।
सुसूक्ष्मं सूक्ष्मदन्तस्य समदन्तस्य मध्यमम् ॥
स्थूलं विषमदन्तस्य त्रिविधं दन्तधावनम्।
द्वादशाङ्गुलकं विप्रे काष्ठमाहुर्मनीषिणः ॥
क्षत्र-विट्-शूद्रजातीनां नव-षट्-चतुरङ्गुलम्'।

इति। आङ्गिराः—

---

१. A. and I. read अ- for त-. २. D. reads जान्वन्तरात् for जान्वन्तरा ३. A. reads सगन्धं, and others सुगन्धं for दुर्गन्धं. ४. B. C. and F. read -गुल्माद्या for -गुल्मादीन्. ५. All others except A. read भक्षयेत. but this reading is quite useless. ६. D. omits this word. ७. A. D. H. and I. read -ङ्गुलिकं; while D. reads -ङ्गुलिकं विप्रे दन्तकाष्ठं मनीषिण-.

'आम्र-पुन्नाग-बिल्वानामपामार्ग-शिरीषयोः ।
भक्षयेत् प्रातरुत्थाय वाग्यतो दन्तधावनम् ॥
वटाश्वत्थार्क-खदिर-करवीरांश्च वर्जयेत् ।
जात्यं च बिल्व-खदिरमूलं तु ककुभस्य च ॥
अरिमेदं प्रियङ्गुं च कण्टकिन्यस्तथैव च ।
प्रक्षाल्य भक्षयेत पूर्वं प्रक्षाल्यैव च सन्त्यजेत् ॥
उदङ्मुखः प्राङ्मुखो वा कषायं तिक्तकं तथा ।
प्रातर्भुक्त्वा च यतवाग्भक्षयेद्दन्तधावनम्' ॥

इति । कात्यायनो दन्तधावनस्य काष्ठाभिमन्त्रणमन्त्रं दर्शयति—

'आयुर्बलं यशो वर्चः प्रजाः पशु-वसूनि च ।
ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वनस्पते' ॥

(का. स्मृ. १. १०. ४.

इति । वर्ज्यानाहोशनाः—

'नाङ्गुलीभिः स्वकान् दन्तान्नरः प्रक्षालयेत्सदा ।
दक्षिणाभिमुखो नाद्यात् नीलं धव-कदम्बकम् ॥

---

१. All others except D. and I. add इति after दन्तधावनम्. This word is generally used at the end ot a quotation. If the word was used by the author himself then the following verses would appear to have been quoted from some other work, the name whereof is not found mentioned. २. B. C. F. and G. read भक्षयेत for वर्जयेत; while H. add इति after वर्जयेत. ३. D. reads खदिरं for खदिर-. ४. All others except D. read भुक्त्वा for भूत्वा, but it is quite incorrect and does not give any sense. ५. The text of Kâtyâyana reads पशून् for पशु-. ६. D. and G. read देहि for धेहि. ७. All others except A. omit some letters in this line. B. C. E. F. and I. read नाङ्गुलिभिर्दन्ताश्च प्रक्षालयेत, D. अङ्गुलिभिर्दन्ताश्च प्रक्षालयेत; while G. नाङ्गुलिभिर्दन्ताश्च प्रक्षालयेत. This is in prose but we do not find the text of Usanas in prose. ८. A. and I read नद्यां for नाद्यात्. ९. B. C. and F. read नालं for नीलं.

तिन्दुकेङ्गुद-बन्धूक-मोचामरज-बल्वजम् ।
कार्पासं दन्तकाष्ठं च विष्णोरपि हरेच्छ्रियम् ॥
न भक्षयेत पालाशं कार्पासं शाकमेव च ।
एतानि भक्षयेद् यस्तु क्षीणपुण्यः स जायते' ॥

इति । वर्ज्यतिथ्यादीनाह विष्णुः—

'प्रतिपद्दर्शषष्ठीषु चतुर्दश्यष्टमीषु च ।
नवम्यां भानुवारे च दन्तकाष्ठं विवर्जयेत्' ॥

इति । यमो ऽपि—

'चतुर्दश्यष्टमी दर्शः पूर्णिमा संक्रमो रवेः ।
एषु स्त्री-तैल-मांसानि दन्तकाष्ठं च वर्जयेत् ॥
श्राद्धे जन्मदिने चैव विवाहे ऽजीर्णदोषतः ।
व्रते चैवोपवासे च वर्जयेद्दन्तधावनम्' ॥

इति । व्यासो ऽपि—

'श्राद्धे यज्ञे च नियमान्नाद्यात् प्रोषितभर्तृका ।
श्राद्धे कर्तुर्निषेधो ऽयं न तु भोक्तुः कदाचन ॥
अलाभे दन्तकाष्ठानां निषिद्धायां तथा तिथौ ।
अपां द्वादशगण्डूषैर्विदध्याद्दन्तधावनम्' ॥

इति । वृद्धयाज्ञवल्क्यः—

---

१. B. C. E. F. G. and H. read मोचाकरञ्जवल्लिजं for मोचामरजबल्वजं; while D. reads मोचामरजवल्लिजं. २. D. reads शांकमेव च for शाकमेव च. It seems more correct. ३. B. C. F. and H. substitute च for -षु. ४. All others except A. and I. read दर्श-. ५. The next three lines after this word and the word इति after these lines are omitted by G. ६. D. reads काष्ठानि. ७. A. reads न तत् for नाद्यात्. ८. A. and D. read श्राद्धकर्तुर्निषेधो; while G. reads श्राद्धकर्तृनिषेधो for श्राद्धे कर्तुर्निषेधो. ९. A. omits वृद्ध- and reads simply याज्ञवल्क्यः, but we do not find this verse in yājnyavalkyasmriti.

'इष्टका-लोष्ट-पाषाणैरितराङ्गुलिभिस्तथा ।
मुक्त्वा चानामिका-ऽङ्गुष्ठौ वर्जयेद्दन्तधावनम्' ॥[1]

इति ।

॥ इति दन्तधावनप्रकरणम् ॥

अथ स्नान-जप[2]-होमादिर्दर्भपाणिना कर्त्तव्यत्वादादौ दर्भविधिरुच्यते । तत्र हारीतः—

'अच्छिन्नाग्रान् सपत्रांश्च[3] समूलान् कोमलान् शुभान् ।
पितृ-देव-जपार्थं तु[4] समादध्यात् कुशान् द्विजः ॥
कुशहस्तेन यज्जप्तं दानं[5] चैव कुशैः सह ।
कुशहस्तस्तु यो भुङ्क्ते तस्य संख्या न विद्यते' ॥

इति । पुराणे[6] ऽपि—

'कुशपूतं भवेत् स्नानं[7] कुशेनोपस्पृशेत् द्विजः ।
कुशेन चोद्धृतं[8] तोयं सोमपानेन सम्मितम्' ॥

इति । गोभिलो ऽपि—

'कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः ।
कुशाग्रे शङ्करं विद्यात् त्रयो देवा व्यवस्थिताः' ॥

इति । कौशिकः—

'शुचौ देशे शुचिर्भूत्वा स्थित्वा[9] पूर्वोत्तरामुखः ॥
ॐकारेणैव मन्त्रेण कुशाः स्पृश्या[10] द्विजोत्तमैः' ॥

१. B. C. and F. read न कुर्यात् for वर्जयेत्. २. A. omits -जप-. ३. A. reads पवित्रांश्च for सपत्रांश्च. ४. A. and I. read पितृ-देवर्षिपूजार्थं for पितृ-देव-जपार्थं तु; while D. substitutes च in the place of तु. ५. A. and I read पानं for दानं. ६. A. and I. read पुराणान्तरे ऽपि, but it seems incorrect. ७. D. substitutes खातं in the place of स्नानं. ८. All others except A. D. and I. read चाहृतं for चोद्धृतं. ९. D. reads स्थितः. १० D. reads कुशान् स्पृष्ट्वा for कुशाः स्पृश्याः.

इति। उत्पाटनमन्त्रस्तु—

'विरिञ्चिना सहोत्पन्न परमेष्ठिनिसर्गज।
नुद पापानि सर्वाणि दर्भ स्वस्तिकरो मम'॥

इति। वर्णभेदेन विनियोगभेदमाह कात्यायनः—

'हरिता याज्ञिया दर्भाः पीतकाः पाकयज्ञियाः।
समूलाः पितृदैवत्याः कल्माषा वैश्वदेविकाः'॥

(का. स्मृ. १. २. ३)

इति। कुशाभावे शङ्खः—

'कुशाभावे द्विजश्रेष्ठः काशैः कुर्वीत यत्नतः।
तर्पणादीनि कर्माणि काशाः कुशसमाः स्मृताः'॥

इति। यमो ऽपि—

'कुशाः काशा यवा दूर्वास्तथा व्रीहय एव च।
बल्वजाः पुण्डरीकाश्च सप्तधा बर्हि उच्यते'॥

इति। वर्ज्यानाह हारीतः—

'चितौ* दर्भाः पथि दर्भा ये दर्भा यज्ञभूमिषु।
स्तरणासन-पिण्डेषु षट् कुशान् परिवर्जयेत्॥
ब्रह्मयज्ञेषु ये दर्भा ये दर्भाः पितृतर्पणे।
हता मूत्र-पुरीषाभ्यां तेषां त्यागो विधीयते॥

---

* अस्मिन्श्लोके पूर्वार्द्धे 'भवाः' इत्यध्याहृत्यान्वयः कार्यः। उत्तरार्धे ...नीति योजनीयम्।

---

१. A. reads निसर्गतः, and I. निसर्गजः. २. E. G. and H. read ...कयज्ञिकाः for पाकयज्ञियाः. ३. D. omits इति. ४. D. reads द्विज.
... All others except A. and I. read -श्रेष्ठ. ६. All others except A. ...d I. read तस्यतः for यत्नतः. ७. D. reads बिल्वकाः for बल्वजाः.
... A. reads गर्त्तेषु. ९. A. reads ब्रह्मयज्ञे च. १०. D. reads तर्पिताः.

अपूता गर्हिता दर्भा ये संच्छिन्ना नखैस्तथा ।
क्वथितानग्निदग्धांश्च कुशान् यत्नेन वर्जयेत्' ॥

इति । कुशोत्पाटने कालनियममाह हारीतः—

'मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः ।
अयातयामास्ते दर्भा नियोज्याः स्युः पुनः पुनः' ॥

इति । शङ्खोऽपि—

'दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणाश्च विशेषतः ।
अयातयामान्येतानि नियोज्यानि पुनः पुनः' ॥

इति । पवित्रधारणे फलमाह मार्कण्डेयः—

'कुशपाणिः सदा तिष्ठेत् ब्राह्मणो दम्भवर्जितः ।
स नित्यं हन्ति पापानि तूलराशिमिवानलः' ॥

इति । शातातपः—

'जपे होमे च दाने च स्वाध्याये पितृतर्पणे ।
अशून्यं तु करं कुर्यात् सुवर्णरजतैः कुशैः' ॥

इति । पवित्रप्रकारमाह कात्यायनः—

---

१. H. in its margin reads गर्भिताः. २. All others except A. and I read नखैः स्मृताः. ३. B. C. and F. read कालनियमेनायातयामतामाह fo कालनियममाह. ४. A. reads दर्भोच्छ्रयो, and I. दर्भच्चयो for दर्भोच्चयो ५. A. and I. omit अपि; while E. omits the words शंखोऽपि and th verse following it. H. also omits, but it appears in its margin correction excepting the word अपि after शङ्खः, and in D. it appear after the next quotation of Mârkandeya. ६. G. reads दर्भवर्जितः fo दम्भवर्जितः, but it does not give any good sense. ७. A. and D. rea अन्यूनं for अशून्यं.

'अनन्तर्गर्भिणं साग्रं कौशं[1] द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्' ॥
(का. स्मृ. १. २. १०)

इति[2] । मार्कण्डेयोऽपि[3]—
'चतुर्भिर्दर्भपिञ्जूलैर्ब्राह्मणस्य पवित्रकम् ।
एकैकन्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमम् ॥
त्रिभिर्दर्भैः शान्तिकर्म पञ्चभिः पौष्टिकं तथा ।
चतुर्भिश्चाभिचारांश्च[*][5] कुर्वन् कुर्यात् पवित्रकम्[4] ॥

इति । अत्रिः—
'ब्रह्मयज्ञे जपे चैव ब्रह्मग्रन्थिर्विधीयते ।
भोजने वर्त्तुलः प्रोक्त[6] एवं धर्मो न हीयते[7]' ॥

इति ।

॥ इति दर्भविधि[8]प्रकरणम् ॥

[*] अभिचारः शत्रुहननाद्यर्थमनुष्ठीयमानं कर्म । तच्च श्येनयागादि वैदिकं भैरवमन्त्रादितान्त्रिकमिति द्विविधम् ।

१ A. and I. read कुशं for कौशं. २. All others except A. B. C. F. and I. omit इति. ३. I. omits अपि. ४. In the margin of H. after this verse appears the following portion:—

स्मृत्यर्थसारे-'सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रंथितं नवम्' ।

५. A. reads अभिचारापि for अभिचारांश्च. ६. A. and I. read वर्तुलम् प्रोक्तं. ७. A. reads विधीयते for न हीयते. ८. A. and I. omit विधि and read दर्भप्रकरणम्.

तदेवं 'सन्ध्या स्नानम्' इत्यस्मिन् वचने स्नानशब्दोपलक्षितानि ब्राह्ममुहूर्तोत्थानादीनि कुशावध्यन्तानि कर्माणि निरूपितानि। अथेदानीं मूलवचनोक्तं स्नानं प्रपञ्च्यते। तत्र कूर्मपुराणम्–

'प्रक्षाल्य दन्तकाष्ठं वै भक्षयित्वा यथाविधि।
आचम्य प्रयतो नित्यं प्रातःस्नानं समाचरेत्' ॥

(कू. पु. १. २. १८, १८)

इति। व्यासः–

'उषःकाले तु सम्प्राप्ते कृत्वा चावश्यकं बुधः ॥
स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधि'।

(व्या. स्मृ. १. २-३)

इति। दक्षोऽपि–

'अस्नात्वा नाचरेत् कर्म जप-होमादि किञ्चन।
लाला-स्वेदसमाकीर्णः शयनादुत्थितः पुमान् ॥ (१)
अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः।
स्रवत्येव दिवा-रात्रौ प्रातःस्नानं विशोधनम् ॥ (२)
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टफलं हि तत्।
सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकम्' ॥(१२)

(द. स्मृ. २. ७–१२

इति। व्यासः–

---

१. A. reads प्रकम्यते. २. This is omitted by A. ३. A. substitutes for स. ४. A. and D. read दिवा-रात्रं प्रातःस्नानेन शुध्यति. ५. G. omits इ

'ऋषीणामृषिना नित्यं प्रातःस्नानान्न संशयः ।
अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्विचिन्तितम् ॥
प्रातःस्नानेन पापानि पूयन्ते नात्र संशयः' ।
(व्या. स्मृ. १. ४-६)

इति । दक्षो ऽपि—

'अज्ञानाद्यदि वा मोहाद्रात्रौ दुश्चरितं कृतम् ।
प्रातःस्नानेन तत् सर्वं शोधयन्ति द्विजातयः' ॥

इति । स्नानप्रकारः चतुर्विंशतिमते ऽभिहितः—

'स्नानमब्दैवतैर्मन्त्रैर्वारुणैश्च मृदा सह ।
कुर्याद्व्याहृतिभिर्वाऽथ 'यत् किञ्चेद'मृचा ऽपि वा' ॥

इति । कात्यायनो ऽपि—

'यथाऽहनि तथा प्रातः नित्यं स्नायादतन्द्रितः ।
दन्तान् प्रक्षाल्य नद्यादौ गृहे चेत् तदमन्त्रवत्' ॥
(का. स्मृ. १. १०. १.)

इति । अमन्त्रवदिति मन्त्रसंक्षेपोऽभिप्रेतः । यतः स एवाह—

* अब्दैवता मन्त्राः—'आपोहिष्ठा मयोभुवः०, यो वः शिवतमो रसः० तस्मा अरंगमामवः०', एते त्रयः । ते च—ऋक्संहितायां (१०.१.९) वाजसनेयिसंहितायां (११.१) सामसंहितायां उत्तरार्चिके (९.१०) द्रष्टव्याः । वारुणमन्त्राश्च—'तत्त्वायामि ब्रह्मणा वन्दमानः' (ऋ. सं. १६.१.) इति पञ्च 'त्वन्नोऽग्ने वरुणस्य' (ऋ. सं. १.१.४-५.) इति द्वौ 'इमं मे वरुण श्रुधि०' (ऋ. सं. १.६.१) इत्येकः एतेऽष्टौ ऋक्संहितायां प्रसिद्धाः । 'यत्किञ्चेदं०' (ऋ. सं. ७.५.१९) एषो ऽपि प्रसिद्ध एव ।

१. I. reads दुर्विचिन्तनम्. २. A. and D. substitute च for वा. ३. I reads अनातुरः for अतन्द्रितः. ४. D. reads ऽभिहितः for ऽभिप्रेत.

'अल्पत्वाद्धोमकालस्य बहुत्वात् स्नानकर्मणः ।
प्रातः संक्षेपतः स्नानं होमलोपो विगर्हितः' ॥
(का. स्मृ. २. १२. ६)

इति । कालनियममाह जाबालिः—
'सततं प्रातरुत्थाय दन्तधावनपूर्वकम् ।
आचरेदुषसि स्नानं तर्पयेद्देव-मानुषान्' ॥

इति । चतुर्विंशतिमतेऽपि[2]—
'उषस्युषसि यत् स्नानं सन्ध्यायामुदितेऽपि वा ।
प्राजापत्येन तत्तुल्यं सर्वपापप्रणाशनम्' ॥

इति । उदिते इत्युदयाभिमुखे इत्यर्थः । उदयस्यात्युपरि स्नानं चेत् सन्ध्याऽप्युत्कृष्येत । स्नानपूर्वकत्वात् सन्ध्यायाः । सन्ध्योत्कर्षश्च योगियाज्ञवल्क्येन निषिद्धः—
'सन्धौ सन्ध्यामुपासीत नास्तगे नोद्गते रवौ' ।

इति । यथोक्तकाले स्नानं कुर्वन्नघमर्षणं* कुर्यात् । तथाह शौनकः—
'स्नात्वाऽऽचान्तो वारिमध्ये त्रिः पठेदघमर्षणम् ।

इति । ब्रह्माण्डपुराणे स्नानाङ्गतर्पणं विहितम्—

*अघमर्षणं तु–'ऋतं च सत्यं'० (ऋ. सं. १०. १९०. १२; तै. आ. १०.१.) इति तृचेन सूक्तेन त्रिरावृत्तेन कर्तव्यम् । कात्यायनानां तु 'द्रुपदादिवे०' इति मन्त्रेणाघमर्षणं विहितम् ।

१. Srautachandrikâ reads प्रातर्न तनुयात्स्नानं दैव-. २. D. omits अपि. ३. G. reads चेत् स्नानं for स्नानं चेत. ४. A. omits this word and reads simply याज्ञवल्क्येन; while all others except I. read योग- for योगि-. ५. D. reads चोद्यगे; while all others except A. and I. read चोद्गते for नोद्गते. ६. A. and I. read यथोक्तं स्नानं कुर्वन् for यथोक्तकाले स्नानं कुर्वन्. ७. A. and I. read तदाह for तथाह. ८. D. reads पिबेत for पठेत्.

'नित्यं नैमित्तिकं* काम्यं त्रिविधं स्नानमुच्यते ।
तर्पणं तु भवेत्तस्य अङ्गत्वेन प्रकीर्त्तितम्' ॥

इति । यमोऽपि—

'द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकाञ्जलिम् ।
गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत्' ॥

इति । कार्ष्णाजिनिः—

'नाभिमात्रे जले स्थित्वा चिन्तयन्नूर्ध्वमानसः' ।

इति । तर्पयेदिति शेषः । नृसिंहपुराणेऽपि—

'स्वेन तीर्थेन† देवादीनद्भिः सन्तर्पयेत्ततः ।
देवान् देवगणांश्चापि मुनीन्मुनिगणानपि ॥
पितॄन् पितृगणांश्चापि नित्यं सन्तर्पयेत्ततः' ।

(नृ. पु. ५८. ८८-८९)

इति । चतुर्विंशतिमते—

* नित्यं प्रत्यहमवश्यं कर्तव्यं सन्ध्यावन्दनादि नित्यकर्माङ्गत्वेन विहितम् । काम्यं घर्मादिपरिहारार्थं मलापकर्षणार्थं वा कृतम् । नैमित्तिकं ग्रहण-सङ्क्रान्त्यादिनिमित्तेन कृतम् ।

† अत्र तृतीयार्धं वर्जयित्वा 'पितॄन् पितृगणान् देवान्' इत्यादि केचन पठन्ति तत्प्रामादिकमिव प्रतिभाति । पूर्वं सामान्यतः देव-पितृ-ऋषींस्तर्पयेदित्युक्त्वा पुनः विशेषेण तर्पणमभिहितमिति ज्ञेयम् ।

१. A. reads व्यवस्थितम्. २. D. reads पूजयेत for पूरयेत, but it seems incorrect. ३. D. omits this. ४ D. reads कार्ष्णाजिन:. ५. D. reads चिन्तयेत् for चिन्तयन्. ६. A. B. C. F. and I. omit अपि. ७. I reads पितॄन् पितृगणान् देवानद्भिः while all others except A. and the text of Nrisinha Purâṇa read पितॄन् ऋषिगणान्. देवानद्भिः. ८. B. C. and F. read सर्वान् for देवान्. ९. This line is omitted by A. and I.

'स्नानादनन्तरं तावत् तर्पयेत् *पितृदेवताः ।
उत्तीर्य पीडयेद्वस्त्रं सन्ध्याकर्म ततः परम्' ॥

इति । भरद्वाजो ऽपि—

'वस्त्रोदकमपेक्षन्ते ये मृता दासकर्मिणः[१] ।
तस्मात् सर्वप्रयत्नेन जलं भूमौ निपातयेत' ॥

इति । वस्त्रनिष्पीडनमन्त्रस्तु—

'ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ।
ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम्' ॥

इति ।

॥ इति स्नानप्रकरणम् ॥

स्नानानन्तरं वासः परिदध्यात् । तथा च मत्स्यपुराणे[२]—

'एवं स्नात्वा ततः पश्चादाचम्य च विधानतः[३] ।
उत्थाय वाससी शुक्ले[४] शुद्धे तु परिधाय च[५]' ॥

(म. पु. १०२. १३)

इति । कर्म कुर्यादिति शेषः । योगि[६]याज्ञवल्क्यः—

* इदं च स्नानाङ्गतर्पणमिति ज्ञेयम् । तच्च 'भूर्देवांस्तर्पयामि' इत्यादिरूपं व्याहृतिभिरेव कर्तव्यमित्युक्तमन्यत्र ।

१. B. C. and F. read शरकर्मिणः, and D. दासकर्मणः for दासकर्मिणः. २. A. reads वामनपुराणे; while all others except I. read मत्स्यपुराणम् for मत्स्यपुराणे. ३. A. and D. read यथाविधि for विधानतः. ४. D. reads शुक्ते for शुक्ले. ५. All others except A. and I. substitute वा for च. ६. All others except A. and I. substitute योग- for योगि-.

'स्नात्वैवं वाससी धौते अच्छिन्ने परिधाय च ।
प्रक्षाल्योरू मृदाऽद्भिश्च हस्तौ प्रक्षालयेत्ततः' ॥

इति । अत्र विशेषमाह व्यासः—

'नोत्तरीयमधः कुर्यान्नोपर्यधस्थमम्बरम् ।
नान्तर्वासो विना जातु निवसेद्वसनं बुधः' ॥

इति । अत्र मार्कण्डेयपुराणे विशेषोऽभिहितः—

'अवमृज्यान्न च स्नानो गात्राण्यम्बर-पाणिभिः* ।
न च निर्धुनुयात् केशान् वासश्चैव न निर्धुनेत्' ॥
(मा. पु. ३४. २८)

इति । अत्र कारणमाह गोभिलः—

'पिबन्ति शिरसो देवाः पिबन्ति पितरो मुखात् ।
मध्यतः सर्वगन्धर्वा अधस्तात् सर्वजन्तवः ॥
तस्मात् स्नातो नैव प्रमृज्यात् स्नानशाट्या न पाणिना' ।

इति । व्यासोऽपि—

'तिस्रः कोट्योऽर्द्धकोटी च[11] यावन्त्यङ्गरुहाणि वै ।
[12]वसन्ति सर्वतीर्थानि तस्मान्न परिमार्जयेत्' ॥

इति । जाबालिः—

* इदं नैमित्तिकस्नाने क्रियाङ्गस्नाने वा भवितुमर्हति । न तु मलापकर्षणादौ । अवमार्जनं विना मलापकर्षणस्यैवासम्भवात् ।

१. A. reads शुक्ले. २. A. and I. read मृदा चाद्भिः. ३. A. substitutes ति in the place of ततः. ४. All others except A. D. and I. read अधस्त्व- or अधस्थ-. ५. D. reads विवसेत. ६. A. reads नरः for न च. ७. I. reads पीडयेत् for निर्धुनेत्. ८. D. reads तत्र for अत्र. ९. A. reads वलः for गोभिलः. १०. A. and I. read नावमृज्यात्; while D. reads न ज्यात्तु for न प्रमृज्यात्. ११ D. reads कोटिश्च for कोटी च. १२. A. and I. read स्रवन्ति for वसन्ति, but it does not give any good sense here.

'स्नानं कृत्वाऽऽर्द्रवासास्तु विण्मूत्रं कुरुते यदि ।
प्राणायामत्रयं कृत्वा पुनः स्नानेन शुद्ध्यति' ॥

इति । वस्त्रविषये विशेषमाह भृगुः—

'ब्राह्मणस्य सितं वस्त्रं नृपते रक्तमुल्बणम्* ।
पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते' ॥

इति । प्रजापतिरपि—

'क्षौमं वासः प्रशंसन्ति तर्पणे सदशं तथा ।
काषायं धातुरक्तं वा नोल्बणं तत्र कर्हिचित्' ॥

इति । देवलोऽपि—

'स्वयं धौतेन कर्त्तव्या क्रिया धर्म्या विपश्चिता ।
न तु नेजकधौतेन† नाहतेन न कुत्रचित्' ॥

इति । नाहतेनेति समस्तं पदम् । अहतलक्षणमाह पुलस्त्यः—

'ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् ।
अहतं तद्विजानीयात् सर्वकर्मसु पावनम्' ॥

इति । बौधायनोऽपि—

* उल्बणं विशेषेण रक्तमित्यर्थः । रक्तस्यैव विशेषणमिदम् ।

† नेजको वस्त्रनिर्णेजनकर्ता रजक इत्यर्थः । केरलादयस्तु रजकधौतमेव वस्त्रं शुद्धं मन्यन्ते ।

१. A. reads रक्तमम्बरं. It seems more correct. २. D. reads विशदं, but this is quite incorrect. ३. B. C. and F. read कषायं. ४ A. reads धातुवस्त्रं च. ५. I. reads सोल्बणं for नोल्बणं. ६. This is omitted by A. ७. I. reads सेवक- for नेजक-, and A. B. C. E. F. G. and H. read रजक- for the same. This is grammatically correct but incorrect as regards prosody. ८. A. G. and H. substitute च for न. ९. I. reads आहत- for अहत.- १०. I. reads सदृशं for सदशं. ११. E. reads धावितं for धारितम. १२. Except A. D. G. and I. all others read बोधायनः for बौधायनोऽपि.

'कर्त्तव्यमुत्तरं वासः पञ्चस्वेतेषु कर्मसु।
स्वाध्यायोत्सर्ग-दानेषु भुक्त्याचमनयोस्तथा' ॥

इति। एतत् सर्वकर्मोपलक्षणार्थम्। अनुत्तरीयस्य कर्ममात्रनिषेधात्। तथा च भृगुणोक्तम्—

'विकच्छोऽनुत्तरीयश्च नग्नश्चाऽवस्त्र एव च।
श्रौतं स्मार्त्तं तथा कर्म न नग्नश्चिन्तयेदपि ॥
नग्नो मलिनवस्त्रः स्यान्नग्नश्चार्द्रपटः स्मृतः।
नग्नस्तु दग्धवस्त्रः स्यान्नग्नः स्यूतपटस्तथा' ॥

इति। विष्णुपुराणेऽपि—

'होम-देवार्चनाद्यासु क्रियासु पठने तथा।
नैकवस्त्रः प्रवर्त्तेत द्विजो नाऽऽचमने जपे' ॥

(वि. पु. ३. १२. २०)

इति। गोभिलोऽपि—

'एकवस्त्रो न भुञ्जीत न कुर्याद्देवतार्चनम्'।

इति। अत्रानुकल्पमाह योगियाज्ञवल्क्यः—

'अलाभे धौतवस्त्रस्य शाण-क्षौमाविकानि च।
कुतुपं योगपट्टं च द्विवासास्तु न वै भवेत्' ॥

---

१. I. only reads -होम- for -उत्सर्ग-. २. A. and I. read भक्ताचमनयो:, while D. and G. read भुक्त्वाचमनयो, but the latter seems incorrect. ३. D. reads -लक्षणार्थे. ४. D. has वा for च. ५. A. reads -चिन्तयामिति. ६. The text of Vishṇu Purâṇa reads द्विजवाचनके for द्विजो नाऽऽचमने The commentator Śridhar uses this word in the sense of Puṇyâhavâchana. ७. All others except A. and I. omit this word. ८. All others except A. and I. read योग-. ९. D. reads -वस्त्राणां. १०. B. C. F. G. and H. read विवास- for विवासा-.

इति । कुतपं* योगपट्टं च धारयेदिति शेषः ।

॥ इति वस्त्रधारणप्रकरणम् ॥

अथ ऊर्ध्वपुण्ड्रविधिः । स च ब्रह्माण्डपुराणे दर्शितः -

'पर्वताग्रे नदीतीरे मम क्षेत्रे विशेषतः ।
सिन्धुतीरे च वल्मीके तुलसीमूलमाश्रिते ॥
मृद एतास्तु सम्पाद्याः वर्जयेत्त्वन्यमृत्तिकाम् ।
श्यामं शान्तिकरं प्रोक्तं रक्तं वश्यकरं भवेत् ॥
श्रीकरं पीतमित्याहुर्वैष्णवं श्वेतमुच्यते ।
अङ्गुष्ठः पुष्टिदः प्रोक्तो मध्यमाऽऽयुष्करी भवेत् ॥
अनामिकाऽन्नदा नित्यं मुक्तिदा च प्रदेशिनी ।
एतैरङ्गुलिभेदैस्तु कारयेन्न नखं स्पृशेत् ॥
वर्त्तिदीपाकृतिं वाऽपि वेणुपत्राकृतिं तथा ।
पद्मस्य मुकुलाकारं तथैव कुमुदस्य च ॥

* कुतपः छागस्य ऊर्णया घटितः कम्बलविशेषः। तथा च मेदिनी- कुतपोऽस्त्रियां दौहित्रे वाद्ये छागलकम्बले' । (२१. १९) इति । स च 'नेपालकम्बल' इति प्रसिद्धः । योगपट्टस्तु प्रसिद्ध एव ।

१. All manuscripts read कुतुपं instead of कुतपं, which is the proper word here. कुतुप is a different word meaning a leather vessel in which oil or ghee is kept. It has not the sense of कुतप meaning a blanket. २. A. reads त्रिपुण्ड्रविधिः. ३. All others except A. and I. read ब्रह्मपुराणे. We cannot positively say whether this quotation is from Brambanda Purâṇa or from Bruhma Purâṇa. ४. D. reads समक्षेत्रे; while I. reads धर्मक्षेत्रे. ५. I. reads तुलसीमूलमृत्तिकाम्, but the next line does not keep the necessity of this reading. ६. A. and I. read संपाद्याः for सम्पाद्याः; while D. reads सु for तु. ७. Except A. H. and I. all others read मृत्तिकाः. ८. A. and I. read सर्वे for नखं ९. D. reads पात्राकृति

मत्स्य-कूर्माकृतिं वाऽपि शङ्खाकारमतःपरम् ।
दशाङ्गुलप्रमाणं तु उत्तमोत्तममुच्यते ॥
नवाङ्गुलं मध्यमं स्यादष्टाङ्गुलमतः परम् ।
सप्त-षट्-पञ्चभिः पुण्ड्रं मध्यमं त्रिविधं स्मृतम् ॥
चतुस्त्रिद्व्यङ्गुलैः पुण्ड्रं कनिष्ठं त्रिविधं भवेत् ।
ललाटे केशवं विद्यान्नारायणमथोदरे ॥
माधवं हृदि विन्यस्य गोविन्दं स्कन्धमूलके[१] ।
उदरे दक्षिणे पार्श्वे विष्णुरित्यभिधीयते ॥
तत्पार्श्वे बाहुमध्ये तु मधुसूदनमुत्स्मरेत्[२] ।
त्रिविक्रमं कण्ठदेशे वामकुक्षौ[३] तु वामनम् ॥
श्रीधरं बाहुके वामे हृषीकेशं तु कर्णके ।
पृष्ठे च पद्मनाभं तु ककुद्दामोदरं स्मरेत् ॥
द्वादशैतानि नामानि वासुदेवेति मूर्द्धनि ।
पूजाकाले च होमे च सायं[५] प्रातः समाहितः ॥
नामान्युच्चार्य विधिना धारयेदूर्ध्वपुण्ड्रकम्' ।

इति । सत्यव्रतोऽपि—

---

१. All others except A. and I. read कण्ठकूपके for स्कन्धमूलके.
२. Except A. all others read मधुसूदनमनुस्मरेत्; while I. omits तु.
३. Except A. and I. all others read वामे कुक्षौ for वामकुक्षौ. ४. I. reads this line first, instead of the former line. ५. B. C. D. E. F. and H. read सायंकाले, and G. सायंकालः for सायं प्रातः.

'ऊर्ध्वपुण्ड्रो मृदा शुभ्रो ललाटे यस्य दृश्यते।
स चाण्डालो ऽपि शुद्धात्मा पूज्य एव न संशयः' ॥

इति ।

॥ इति ऊर्ध्वपुण्ड्रप्रकरणम् ॥

अथ प्रातःस्नानप्रसङ्गेन स्नानान्तराण्युच्यन्ते । तत्र शङ्खः-

'स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः ।
तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं भवेत्' ॥

इति । तत्र मुख्यस्नानस्य षट्प्रकारता आग्नेयपुराणे दर्शिता-

'नित्यं नैमित्तिकं काम्यं क्रियाऽङ्गं मलकर्षणम् ।
क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्त्तितम्' ॥
(अ. पु. १५५. ३-४)

इति । एतेषां लक्षणमाह शङ्खः-

'अस्नातश्च पुमानार्हो जपाग्निहवनादिषु ।
प्रातःस्नानं तदर्थं तु नित्यस्नानं प्रकीर्त्तितम् ॥
चण्डाल-शव-यूपांश्च* स्पृष्ट्वा ऽस्नातां रजस्वलाम् ।
स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि तत् ॥

*यूपस्पर्शनिषेधस्तु कर्मसमाप्त्यनन्तरं ऋत्विजेतरेषामिति बोध्यम् । गोभिलेन त्वत्र होमादिकमप्युक्तम् (गो. गृ. सू. ३. ३. ३४) ।

१. I. has the following verse before this:-

'मन्त्राक्तो धारयेन्नित्यं ऊर्ध्वपुण्ड्रं विना तु तत् ।
यत्कर्म कारयेन्नित्यं तत्सर्वं निष्फलं भवेत्' ॥

We do not see any necessity of it in this place. २. I. reads -पुण्ड्रं मृदा शुभ्रं. ३. A. D. and G. read चण्डालो ऽपि विशुद्धात्मा. ४. D. and G. read -विधिः for -प्रकरणम्. ५. अथ is omitted by all others except A. ६. D. omits इति. ७. This line and the verse following it is omitted by G. ८. A. and I. read यदाप्नोति for यदा स्नाति.

पुष्यस्नानादिकं* यत्तु दैवज्ञविधिचोदितम्[1] ।
तद्धि काम्यं समुद्दिष्टं नाकामस्तत् प्रयोजयेत् ॥
जप्तुकामः पवित्राणि अर्चिष्यन् देवताः पितॄन् ।
स्नानं समाचरेद्यस्तु क्रियाऽङ्गं तत्प्रकीर्त्तितम् ॥
मलापकर्षणं नाम स्नानमभ्यङ्गपूर्वकम्† ।
मलापकर्षणार्थाय प्रवृत्तिस्तस्य नान्यथा ॥
सरःसु देवखातेषु तीर्थेषु च नदीषु च ।
क्रियास्नानं समुद्दिष्टं स्नानं तत्र मता क्रिया'॥

यद्यपि मध्याह्नस्नानस्य नेदानीमवसरस्तथापि प्रातः-स्नानवत्तस्य नित्यत्वात् प्रसङ्गेनाभिधीयते । तस्य नित्यत्वं च व्याघ्रपादेनोक्तम्—

'प्रातःस्नायी भवेन्नित्यं मध्यस्नायी भवेदिति' ।

इति । कूर्मपुराणे—

'ततो मध्याह्नसमये स्नानार्थं मृदमाहरेत् ।
पुष्पाक्षतान् कुश-तिलान् गोमयं शुद्धमेव च ॥

* पुष्यनक्षत्रे कर्तव्यं स्नानं ज्योतिःशास्त्रे प्रसिद्धम् । तत्तु तत्रैव द्रष्टव्यम् ।

† अभ्यङ्गः तैलमर्दनम् । आयुर्वेदे तु—'मूर्ध्नि दत्तं यदा तैलं भवेत् सर्वाङ्गसङ्गतम् । स्रोतोभिस्तर्पयेत् बाहू अभ्यङ्गः स उदाहृतः' इति अभ्यङ्गलक्षणमुक्तम् । तथापि उक्तलक्षणो ऽभ्यङ्गः दाक्षिणात्यानामेव ।

१. I. reads पुण्य- for पुष्य-, but our reading is more correct. २. A. reads -नोदितम् for -चोदितम्. ३. A. reads सकामः for नाकामः. ४. D. reads वाऽर्चिष्यम्. ५. H. reads यत्तु for यस्तु. ६. A. and I. read कीर्तिता for नान्यथा. ७. The text of the Kûrmapurâṇa reads गोशकृच्च for गोमयं.

नदीषु देवखातेषु तडागेषु सरःसु च ।
स्नानं समाचरेन्नित्यं गर्त्त-प्रस्रवणेषु च ॥
परकीयनिपानेषु[1] न स्नायाद्वै कदाचन ।
पञ्च पिण्डान् समुद्धृत्य स्नायाद्वा ऽसम्भवे पुनः' ॥
(कू. पु. १. २. १८. ५८-६०)

इति । तत्राधिकार्यनधिकारिणौ व्यासो[2] विभजते–
'स्नानं मध्यन्दिने कुर्यात् सुजीर्णेऽन्ने निरामयः ।
न भुक्त्वा ऽलङ्कृतो रोगी[3] नाज्ञाते ऽम्भसि नाकुलः' ॥

इति । आश्रमभेदेन स्नानव्यवस्थामाह दक्षः[4]–
'प्रातर्मध्याह्नयोः स्नानं वानप्रस्थ-गृहस्थयोः ।
यतेस्त्रिषवणं प्रोक्तं[5] सकृत्तु ब्रह्मचारिणः' ॥

इति । अन्वय-व्यतिरेकाभ्यां स्नानस्य समन्त्रतामाह व्यासः–
'मन्त्रपूतं[6] जले स्नानं प्राहुः स्नानफलप्रदम् ।
न वृथा वारिमग्नानां यादसामिव तत् फलम्' ॥

इति[7] । योगियाज्ञवल्क्यः–

१. D. and G. read -निखातेषु for -निपानेषु. २. A. omits व्यासो, and D. I. read अधिकार्यनधिकारिणौ. ३. A. and G. read योगी, and D. भोगी for रोगी. ४. D. reads दत्तः for दक्षः; while G. omits the portion from दक्षः to समन्त्रतामाह, both the words inclusive. ५. A. substitutes स्नानं in the place of प्रोक्तं, but it is of no use here. ६. D. reads the first line of this verse as मन्त्रपूतैर्जलैर्यत्स्यात्स्नानं फलप्रदम्, B. C. F. read the second line as न वृथा वारिणा स्नानं यादसामिव तत्फलम्, and G. न वृथावारिणः स्नानं यादसामिव तत्फलम्. ७. All omit this except A.

'मत्स्य-कच्छप-मण्डूकास्तोये मग्ना दिवानिशम् ।
वसन्ति चैव ते स्नानान्नाप्नुवन्ति फलं* क्वचित्' ॥

इति । समन्त्रत्वं द्विजातिविषयम् । यदाह विष्णुः—

'ब्रह्म-क्षत्र-विशां चैव मन्त्रवत् स्नानमिष्यते ।
तूष्णीमेव हि शूद्रस्य स्त्रीणां च कुरुनन्दन' ॥

इति । 'स्नानार्थं मृदमाहरेत्'— इति यदुक्तं तत्र विशेषमाह शातातपः—

'शुचिदेशात्तु संग्राह्या शर्कराश्मादिवर्जिता ।
रक्ता गौरा तथा श्वेता मृत्तिका त्रिविधा स्मृता ॥
कर्दमाऽऽखूत्कराद्वेपाद् जलाश्च पथ-वृक्षयोः ।
कृतशौचावशेषाश्च न ग्राह्याः सप्त मृत्तिकाः ॥
मृत्तिकां गोमयं वाऽपि न निशायां समाहरेत् ।
न गोमूत्र-पुरीषे तु गृह्णीयाद्बुद्धिमान्नरः' ॥

इति । योगियाज्ञवल्क्योऽपि—

---

* यस्मात् जले वसतामपि मत्स्यादीनां न स्नानफलं लक्ष्यते तस्मात् अस्ति किंचिदधिकं तत्र । तच्च समन्त्रकत्वमेवेति ध्येयम् ।

---

१. A. reads -कूर्मक-. २. B. C. and F. read स्नानं for स्नानात्. ३. This word is omitted by D. ४. B. C. F. and G. read यदाह. ५. D. reads स्नानार्थं. ६. A. reads शुच्यौ देशे तु. ७. G. reads संग्राह्या, and all other adjectives qualifying मृत्तिका in plural. ८. All others except D. and H. read मृत्तिका-; while H. reads वल्मीका-. ९. A. and I. read बिलाच्च वरि-वृक्षयोः, but the word वरि does not give any good meaning. १०. I. reads कृतशौचावशिष्टा च.

'गन्धोदकान्तं[1] विविधत् स्थापयेत्तत् पृथक् क्षितौ ।
त्रिधा कृत्वा मृदं तां तु गोमयं तद्विचक्षणः ॥
अधमोत्तम-मध्यानामङ्गानां क्षालनं तु तैः[2] ।
भागैः पृथक् पृथक् कुर्यात् क्षालने मृदसङ्करः'[3] ॥

इति । शौनकोऽपि—

'प्रयत्नो मृदमादाय दूर्वा-ऽपामार्ग-गोमयम् ।
एकदेशे पृथक् कुर्यात् क्षालने मृदसङ्करः' ॥

इति । वसिष्ठः—

'मृदैकया शिरः क्षाल्यं[5] द्वाभ्यां नाभेस्तथोपरि ।
अधश्च[6] तिसृभिः कार्यं षड्भिः पादौ तथैव च ॥
प्रक्षाल्य सर्वकायं तु द्विराचम्य यथाविधि'[4] ।

(कू. पु. १. २. १८. ६१)

इति । कायप्रक्षालनानन्तरभाविकर्त्तव्यमाह[7] शौनकः—

'गायत्र्या आदित्यो देवता ख्याता 'ऽतो देवा'*[8]

* 'अतो देवा ' इत्ययं मन्त्रः ऋक्संहितायां (१. २२. १६) सामसंहितायां उत्तरार्चिके (८. २. ५. ६) च प्रसिद्धः । 'यत इन्द्र ' इति मन्त्रस्तु ऋक्संहितायां (८. ६१. १३), सामसंहितायां छन्दस्यार्चिके (३. ३. ४. २), तत्रैवोत्तरार्चिके (५. २. १५. १), तैत्तिरीयारण्यके (१०. १.) च प्रसिद्धः । 'स्वाग्निदाविशस्पतिः' इति च ऋक्संहितायां (१०. १५. २. २), तैत्तिरीयारण्यके च (१०. ५५), अथर्वसंहितायां चापि (८. ९. २२.) प्रसिद्धः । 'तत्र तु विशाम्पतिः ' इति पाठः ।

१. D. E. G. and H. read गन्धांरकान्तं. २. D. and G. read वै for तै. ३. A. reads सालने मृदसङ्करम्. ४. All others except A. omit this quarter of the verse and read only 3 quarters. ५. G. reads क्षाल्य द्वाभ्यां नाभिस्तथोपरि; while D. reads -क्षाल्यं. ६. A. reads अधश्चतसृभिः. ७. A reads कृत्यमाह. ८. B. C. and F. read गायत्र्या आदित्या अवहित्व्यात अतो देवा इति, E. गायत्र्या आदित्या अवहितख्यातो अतो देवा इति, D. गायत्र्या आदित्या अवहिता ऽतो देवा इति, G. गायत्र्या आदित्यो अवहिताऽतो देवा इति and H. गायत्र्या आदित्या अवहितख्याता ततो देवा इति.

इति मृदमभिमन्त्रयेत् । ततो 'यत
इन्द्र', 'स्वस्तिदा विशस्पतिर्वृत्रहा विमृध',
'इदं सुमेजरित'[1] इति मृदं संगृह्य[2] प्रतिमन्त्रं
प्रतिदिशं क्षिपेत् पूर्वादिक्रमेण ।
ततः सम्मार्जनं कुर्यात् मृदा पूर्वं तु मन्त्रवत्' ।

'अश्वक्रान्ते' (म. ना. उ. ४. ४.) इत्यादयो मृद्ग्रहणमन्त्रा यजुर्वेदे प्रसिद्धाः।

'पुनश्च गोमयेनैवमग्रमग्रमिति ब्रुवन् ।
अग्रमग्रं चरन्तीनामोषधीनां वने वने[3] ॥
तासामृषभपत्नीनां पवित्रं कायशोधनम्[4] ।
त्वं मे रोगांश्च शोकांश्च पापं च नुद[5] गोमय' ॥

(आ. ३. ६)

इति गोमयमन्त्रैः[6] । दूर्वाग्रहणे[7]—

'काण्डात् काण्डादिति द्वाभ्यामङ्गमङ्गमुपस्पृशेत्' ।

इति । दूर्वाद्वयेन[8] इति शेषः[9] ।

'अपापमपकिल्बिषमपकृत्यामपोरपः[10][11] ।

---

१. B. C. E. F. and H. read इदं सुमेजनित for इदं सुमेजरित. २. All others except A. and I. omit संगृह्य. ३. B. C. E. F. and H. read रसं वने for वने वने. ४. A. and I. read सुरभीणां शरीरतः and add extra line उत्पन्नं लोकसौख्यार्थं पवित्रं कायशोधनम्, but we do not find this in any other manuscript. For the same B. C. E. F. and H. read पावनं कायशोधनम्. ५. I. reads हर for नुद. ६. I. omits the words गोमयमन्त्रः. ७. All others except A. and H. omit this. ८. D. reads दूर्वया and all others except A. and I. read अर्चयेत् for दूर्वाद्वयेन. ९. G. reads विशेषः. १०. B. C. E. F. and H, read अपाघ-; while G. reads अपाद्य- for अपाप-. ११. I. reads -मपोरप, and B. C. F. -मयोरसः for -मपोरपः.

अपामार्ग त्वमस्माकमपदुष्टभयं नुद- ॥
स्वाहेत्य'थापामार्गेण अङ्गमङ्गमुपस्पृशेत् ।

अथ हिरण्यशृङ्गमापो देवीरप्स्वन्तरित्यप उपस्थाय 'सुमित्रिया न' इत्यपः स्पृष्ट्वा 'दुर्मित्रिया न' इति बहिः क्षिपेत् । ततः—

इन्द्रः शुद्ध इत्यृचापः प्रविश्य मनसा जपेत् ।
तत्र गायेत सामानि अपि वा व्याहृतीर्जपेत् ।
'शिवेन मे' जपित्विदमाप इत्यप आप्लवेत्' ॥

इति । वसिष्ठः—

'ये ते शतमिति द्वाभ्यां तीर्थान्यावाहयेद्बुधः ।
कुरुक्षेत्रं गयां गंगां प्रभासं नैमिषं तथा' ॥

इति । शङ्खः—

'प्रपद्ये* वरुणं देवमम्भसां पतिमीश्वरम् ।
याचितं देहि मे तीर्थं सर्वपापापनुत्तये ॥ (३)

---

* एते मन्त्रास्तु महानारायणोपनिषदि चतुर्थखण्डे चतुर्थमन्त्रादितो द्रष्टव्याः ।

---

१. B. C. E. and F. read त्वमस्मदपदुःस्वप्नं सुवः स्वाहा, G. त्वमस्मदपदुःस्वप्न्यं सुवः स्वाहा, H. त्वमस्मदीयदुःस्वप्नं सुवः स्वाहा and I. त्वमस्माकं दुष्टं भय नुद स्वाहा. २. D. reads इत्यङ्गमङ्गमपामार्गेणोपस्पृशेत्, B. C. E. F. G. H. and I. omit अथ and read स्वाहेत्यपामार्गेण अङ्गमङ्गमुपस्पृशेत. ३. All others except A. and I. read गायेत्सामानि for गायेत सामानि. ४. I reads जपेत् for तथा. ५. The text of the Śaṅkha Smriti reads as follows —

प्रपद्य वरुणं देवमम्भसां पतिमर्चितम् ।
याचेत देहि मे तीर्थं सर्वपापापनुत्तये ॥.

तीर्थमावाहयिष्यामि सर्वाघौघनिषूदनम्[1] ।
सान्निध्यमस्मिंस्तोये[2] च क्रियतां मदनुग्रहात् ॥ (४)
रुद्रान् प्रपद्ये वरदान् सर्वानप्सुषदस्तथा । (५)
आपः[3] पुण्याः पवित्राश्च प्रपद्ये वरुणं[4] तथा । (६)
शमयन्त्वाशु मे पापं रक्षन्तु च सदैव माम्[5]' ॥ (७)

(शं. स्मृ. ८. ३–७)

इति । वसिष्ठः—

'आपोहिष्ठेदमापश्च द्रुपदादिव इत्यपि ।
तथा हिरण्यवर्णाभिः पावमानीभिरन्ततः ॥
ततोऽर्कमीक्ष्य चोङ्कारं निमज्ज्यान्तर्जले बुधः ।
प्राणायामांश्च कुर्वीत गायत्रीं चाघमर्षणम्' ॥

इति । विष्णुरपि—

'ततोऽप्सु[6] निमग्नस्त्रिरघमर्षणं जपेत्[7] ।
तद्विष्णोः परमं पदमिति वा[8] द्रुपदां सावित्रीं वा ।

१. D. and F. G. read सर्वपापै प्रमुच्यते. २. B. C. and F. read सान्निध्यमस्मिंश्चत्तोये स्थीयतां, D. and G. -श्चत्तोये स्थीयतां. E and H. सान्निध्यमस्मिन्स्वत्तोये स्थीयतां and I. सान्निध्यमस्मिंश्चत्तोये क्रियतां. ३. D. and I. read अपः. ४. The text of the Saṅkha Smriti reads शरणं for वरुणं. ५. The text of the Śaṅkha Smriti read मां च रक्षन्तु सर्वदा . ६. B. C. D. E. F. and G. read ततोऽप्सु मानसि-, but it seems to be a mistake of the writer. H. reads for the same ततोऽप्सु मज्जमानसि-. ७. All others except A. and I. omit जपेत्. ८. वा द्रुपदां is omitted by all except A. and I.

युञ्जते नम-इत्यनुवाकं वा । पुरुषसूक्तं वा । स्ना-
तश्चार्द्रवासा देवर्षि-पितृतर्पणमम्भस्थ एव कुर्यात्' ॥
(वि. स्मृ. ६४. १९-२१)

इति । मेधातिथिरपि—

'ततोऽम्भसि निमग्नस्तु त्रिः पठेदघमर्षणम्' ।
प्रदद्यान्मूर्धनि तथा महाव्याहृतिभिर्जलम्' ॥

इति। वसिष्ठः—

'स्नात्वा संगृह्य वासो ऽन्यद्रूरू संशोधयेन्मृदा ।
अपवित्रीकृतौ तौ तु कौपीनास्नाववारिणा ॥
यो ऽनेन विधिना स्नाति यत्रतत्राम्भसि द्विजः ।
स तीर्थफलमाप्नोति तीर्थे तु द्विगुणं फलम्' ॥

इति । तत्रानुकल्पमाह योगियाज्ञवल्क्यः—

'य एष विस्तृतः प्रोक्तः स्नानस्य विधिरुत्तमः ।
असामर्थ्यान्न कुर्याच्चेत्तत्रायं विधिरुच्यते' ॥
स्नानमन्तर्जले चैव मार्जनाचमने तथा ॥
जलाभिमन्त्रणं चैव तीर्थस्य परिकल्पनम् ।
अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः ।
स्नानाचरणमित्येतदुपदिष्टं महात्मभिः' ॥

इति ।

॥ इति माँध्याह्निकस्नानम् ॥

---

१. All others except A. and I. आर्द्रवाससा देवर्षिपितृतर्पणमंतस्थ एव कुर्यात्. २. All others except A. and I. read अपवित्रीकृते ते तु ३. A. reads -कुत्राम्भसि. ४. D. and G. read तीर्थेषु. ५. A. reads भवेत् ६. D. omits योगि- and reads याज्ञवल्क्यः, E. and H. read योग्ययाज्ञवल्क्यः ७. All others except A. and I. read मध्याह्नस्नानम्.

अथ नैमित्तिकस्नानम्। तत्र मनुः—

'दिवाकीर्त्तिमुदक्यां च पतितं सूतिकां तथा।
शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति'॥

(म. स्मृ. ५. ८५)

इति। दिवाकीर्त्तिश्चाण्डालः। अङ्गिराः—

'शवस्पृशमथोदक्यां सूतिकां पतितं तथा।
स्पृष्ट्वा स्नानेन शुद्धः स्यात् सचैलेन न संशयः'॥

इति। गौतमोऽपि—

'पतित-चाण्डाल-सूतिकोदक्या-शवस्पृक्-तत्स्पृष्टिस्पर्शने सचैल उदकोपस्पर्शनात् शुद्ध्येत्'॥

(गौ. स्मृ. ७. १६)

इति। पतितादिस्पृष्टिनं समारभ्य तृतीयस्य सचैलं स्नानम्। चतुर्थस्य तु उदकोपस्पर्शनाच्छुद्धिः। तथा च मरीचिः—

'उपस्पृशेच्चतुर्थस्तु तदूर्ध्वं प्रोक्षणं स्मृतम्'।

इति। यत्तु संवर्त्तेन द्वयोरेव स्नानमुक्तम्—

---

१. B. C. E. F. G. and H. read दिवाकीर्त्त्ये for दिवाकीर्त्तिं, but this form is not found in Lexicographical works. २. B. C. E. F. G. and H. read दिवाकीर्त्त्यश्चांडालः. ३. All others except A. and I. read शुद्धिः. ४. Here our reading follows: A. I. and the text of Gautam, but B. C. E. F. and H. read शवस्पृशितत्स्पृष्टमुपस्पर्शने; while D. reads शवस्पृशिनं स्पृष्ट्वा तत्स्पृष्टमुपस्पर्शने, and G. शवस्पृशि तत्स्पृष्टमुपस्पार्शनि for शवस्पृक्-तत्स्पृष्टिस्पर्शने. ५. B. C. E. F. G. and H. read न चतुर्थस्य। तस्य तु उदकोपस्पर्शनाच्छुद्धिः. ६. This is omitted by all others except D. aud I.

'तत्स्पृष्टिनं स्पृशेद्यस्तु स्नानं तस्य विधीयते ।
ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा' ॥

इति । तदबुद्धिपूर्वस्पर्शविषयम् । तथा च संग्रहकारः–

'अबुद्धिपूर्वकस्पर्शे द्वयोः स्नानं विधीयते ।
त्रयाणां बुद्धिपूर्वे तु तत्स्पृष्टिन्यायकल्पना' ॥

इति । कूर्मपुराणे–

'चाण्डाल-सूतिक-शवैः संस्पृष्टं संस्पृशेद्यदि ।
प्रमादात्तत आचम्य जपं कुर्यात् समाहितः ॥
तत्स्पृष्टिस्पृष्टिनं स्पृष्ट्वा बुद्धिपूर्वं द्विजोत्तमः ।
आचमेत विशुद्ध्यर्थं प्राह देवः पितामहः' ॥

(कू. पु. १. २. ३३. ६९-७०)

इति । याज्ञवल्क्योऽपि–

'उदक्या सूतिभिः स्नायात् संस्पृष्टस्तैरुपस्पृशेत् ।
अब्लिङ्गानि जपेच्चैव गायत्रीं मनसा सकृत्' ॥

(या. स्मृ. ३. ३०)

इति । एतद्दण्डाद्यन्तरितस्पर्शविषयम् । अन्यथा द्वयोः स्नानमित्यनेन विरोधः प्रसज्ज्येत । वस्त्रान्तरितस्पर्शने तु दण्डान्तरितन्यायप्रामाण्यादाह प्रचेताः–

---

१. A. substitutes यथा for तथा. २. I. reads -स्पर्शन-. ३. D. reads न बुद्धिसंस्पर्शे. ४. I. reads कूर्मपुराणम्. ५. The text of Kûrma Purâna reads ततः स्नात्वाथ आचम्य. ६. The text of the Kûrma Purâna reads -स्पृष्टस्पर्शिनं for स्पृष्टिस्पृष्टिनं. ७. D. reads सूतक्यो सूतिभिः स्नायात्, and A. उदक्याऽशुचिभिः. ८. D. reads प्रसज्यते. ९. A. D. and G read यत्र वस्त्रान्तरितस्पर्शनं न तत्र दण्डान्तरितन्यायः । तदाह प्रचेताः

'वस्त्रान्तरितसंस्पर्शः साक्षात्स्पर्शो ऽभिधीयते।[1]
साक्षात्स्पर्शो तु यत् प्रोक्तं तद्वस्त्रान्तरिते ऽपि च'[2] ॥

इति। चतुर्विंशतिमते स्नानस्य निमित्तान्तरमप्युक्तम्—

'बौद्धान् पाशुपतान् जैनान् लोकायतिक-कापिलान्*।
विकर्मस्थान् द्विजान् स्पृष्ट्वा सचैलो जलमाविशेत्।
कापालिकांस्तु[4] संस्पृश्य प्राणायामो ऽधिको मतः' ॥

इति। चाण्डालादिस्पर्शनिमित्तस्नाने विशेषमाह विष्णुः—

'स्नानार्हो यो निमित्तेन कृत्वा तोयावगाहनम्†।
आचम्य प्रयतः पश्चात् स्नानं विधिवदाचरेत्' ॥

इति। योगियाज्ञवल्क्यो ऽपि—

'तूष्णीमेवावगाहेत यदा स्यादशुचिर्नरः।
आचम्य प्रयतः पश्चात् स्नानं विधिवदाचरेत्' ॥

इति। गार्ग्यो ऽपि—

'कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च।
नित्यं याादृच्छिकं चैव यथारुचि समाचरेत्' ॥

इति।

---

* अत्र कापिलशब्देन साङ्ख्यानां ग्रहणम्। ते च निरीश्वरा एव। निरीश्वरवादित्वात् तेषां स्पर्शस्य निषेधः। सेश्वराणां तु न कुत्रापि निषेधः।
† प्रथमं अधिकारसिद्ध्यर्थं तूष्णीं तोयावगाहनं कृत्वा अनन्तरं यथाविधि स्नानं कुर्यात्। अन्यथा मन्त्रपठने नाधिकारः।

१. D. reads वस्त्रान्तरितकः स्पर्शः, and G. वस्त्रान्तरितसंस्पर्शो. २. B. D. F. and G. read विधीयेते for अभिधीयते. ३. All others except . omit अपि. ४. D. and G. read कपालिकान् for कापालिकान्. ५. This ne and the following two lines are omitted by D. and H. but they ppear as marginal correction in H.

॥ इति नैमित्तिकस्नानप्रकरणम् ॥

अथ काम्यस्नानम् । तत्र पुलस्त्यः—

'पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृतौ ।
अमावास्यां नदीस्नानं पुनात्यासप्तमं कुलम् ॥[1]
चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ ।
न प्रेतत्वमवाप्नोति[2] गङ्गायां च विशेषतः ॥
शिवलिङ्गसमीपे तु यत्तोयं पुरतः स्थितम् ।
शिवगङ्गेति विज्ञेयं तत्र स्नात्वा दिवं व्रजेत्' ॥

इति । यमो ऽपि—

'कार्त्तिक्यां पुष्करे स्नातः सर्वपापैः प्रमुच्यते ।
माघ्यां स्नातः प्रयागे तु मुच्यते सर्वकिल्बिषैः ॥
ज्येष्ठे मासि सिते पक्षे दशम्यां हस्तसंयुते ।
दशजन्माघहा गङ्गा तेन पापहरा स्मृता' ॥

इति । विष्णुः—

'सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥
पुनर्वसु-बुधोपेता चैत्रे मासि सिता ऽष्टमी ।
स्रोतस्सु विधिवत् स्नात्वा वाजपेयफलं लभेत्' ॥

इति । आदित्यपुराणे ऽपि—

---

१. B. has कुले for कुलम्. २. A. reads न स प्रेतत्वमाप्नोति. ३. A. reads -तीर्थमिति ख्यातं. ४. A. reads द्वादश्यां. ५. G. reads चैत्रमासि सिताष्टमी, and B. C. D. E. F. and H. चैत्रमाससिताष्टमी. ६. E. H. and I. read आदित्यपुराणे, and all others except A. and D. omit ऽपि.

'कार्त्तिकं सकलं मासं नित्यस्नायी जितेन्द्रियः ।
जपन् हविष्यभुक् दान्तः सर्वपापैः प्रमुच्यते ॥
तुला-मकर-मेषेषु प्रातःस्नायी सदा भवेत् ।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम्' ॥

इति । मत्स्यपुराणे ऽपि–

'आषाढादि*चतुर्मासं प्रातःस्नायी भवेन्नरः ।
विप्रेभ्यो भोजनं दत्त्वा कार्त्तिक्यां गोप्रदो भवेत् ॥
स वैष्णवपदं याति विष्णुव्रतमिदं स्मृतम्' ।

इति । मार्कण्डेयो ऽपि–

'सर्वकालं तिलैः स्नानं पुण्यं व्यासो ऽब्रवीन्मुनिः ।
तुष्यत्यामलकैर्विष्णुरेकादश्यां विशेषतः ॥
श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः ।
सप्तमीं नवमीं चैव पर्वकालं च वर्जयेत्' ॥

इति । विष्णुः–

'बालाश्च तरुणा वृद्धा नर-नारी-नपुंसकाः ।
स्नात्वा माघे शुभे तीर्थे प्राप्नुवन्तीप्सितं फलम् ॥
माघे मास्युषसि स्नात्वा विष्णुलोकं स गच्छति' ।

इति ।

॥ इति काम्यस्नानम् ॥

* एतच्च आषाढशुक्लदशमीमारभ्य कार्तिकशुक्लद्वादशीपर्यंतमिति बोद्धव्यम् ।

१. B. C. and F. read प्रातः, D. E. G. H. स्नातः, and I. स्नान्तः for शान्तः. २. D. reads only मात्स्ये for मत्स्यपुराणे ऽपि; while A. E. G. H. and I. omit अपि. ३. D. and G. omit इति. ४. D. reads माघमास्युषसि स्नानं, B. C. F. माघमास्युषसि स्नातो, and E. G. H. माघमास्युषसि स्नात्वा.

अथ मलापकर्षणस्नानम् । तत्र वामनपुराणम्-

'नाभ्यङ्गमर्के न च भूमिपुत्रे[1]
क्षौरं च शुक्रे रविजे च मांसम् ॥ (४९)
बुधे च[2] योषित् परिवर्जनीया
शेषेषु सर्वाणि[3] सदैव कुर्यात्' ।

(वा. पु. १४. ४९-५०)

इति । ज्योतिःशास्त्रे ऽपि[4]-

'सन्तापः[5] कान्तिरल्पायुर्धनं निर्धनता तथा[6] ।
अनारोग्यं सर्वकामा अभ्यङ्गाद्भास्करादिषु' ॥

इति । मनुरपि-

'पक्षादौ च रवौ षष्ठ्यां रिक्तायां च तथा तिथौ ।
तैलेनाभ्यज्यमानस्तु धनायुर्भ्यां विहीयते' ॥

इति । गर्गो ऽपि-

'पञ्चदश्यां चतुर्दश्यामष्टम्यां रविसंक्रमे ।
द्वादश्यां सप्तमी-षष्ठ्योस्तैलस्पर्शं विवर्जयेत्' ॥

इति । बौधायनो[7] ऽपि-

---

१. We follow here A. and the text of Vâman Purâṇa, but all other read च कुजे for रविजे. २. G. reads बुधेषु, and the text of Vâman Purâṇa read बुधेषु योषिन्न समाचरेत. ३. Except A. and the text of Vâman Purâṇa all others read सर्वेषु for सर्वाणि. ४. I. omits अपि ५. A. reads संतापशांति. ६. D. reads निर्धनमेव च, and G निर्धनतां तथा. ७. A. reads यमोऽपि for बौधायनो ऽपि.

'अष्टम्यां च चतुर्दश्यां नवम्यां च विशेषतः ।
शिरोऽभ्यङ्गं वर्जयेत्तु पर्वसन्धौ तथैव च' ॥

इति । गर्गोऽपि—

'न च कुर्यात् तृतीयायां त्रयोदश्यां तिथौ तथा ।
शाश्वतीं भूतिमन्विच्छन् दशम्यामपि पण्डितः' ॥

इति । एवं सर्वास्वपि तिथिष्वभ्यङ्गस्य निषेधं प्राप्य तैल-विशेषेणाभ्यनुजानाति प्रचेताः—

'सार्षपं गन्धतैलं च यत्तैलं पुष्पवासितम् ।
अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन' ॥

इति । यमोऽपि—

'घृतं च सार्षपं तैलं यत्तैलं पुष्पवासितम् ।
न दोषः पक्वतैलेषु स्नानाभ्यङ्गेषु नित्यशः' ॥

इति ।

॥ इत्यभ्यङ्गस्नानम् ॥

क्रियाऽङ्गस्नानं* तु नित्यस्नानवदनुष्ठेयम् ।

'प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेत् सुधीः' ।

इत्यादिकं क्रियाऽङ्गस्नानं द्रष्टव्यम् । तस्य क्रियाऽङ्गत्वं पुराणे स्पष्टीकृतम्—

* क्रियायाः करिष्यमाणस्य कर्मणः अङ्गभूतं स्नानं क्रियाङ्गम् । यथा व्रतादिग्रहणादौ पूर्वं स्नात्वा सङ्कल्पादिकं कर्तव्यमित्यभिहितं तत्र पूर्वं कर्तव्यस्य स्नानस्य क्रियाङ्गत्वम् । ननु पुत्रजन्मादौ कर्तव्यमपि क्रियाङ्गमिति शङ्कनीयम् । तस्य निमित्तप्रयुक्तत्वात् नैमित्तिकत्वं स्पष्टम् ।

१. D. reads क्रियास्नानं तु for क्रियाङ्गस्नानं तु. २. This word is omitted by all except A. and I.

'धर्मक्रियां कर्तुमनाः पूर्वं स्नानं समाचरेत् ।
क्रियाऽङ्गं तत्समुद्दिष्टं स्नानं वेदपरैर्द्विजैः' ॥

इति

॥ इति क्रियाङ्गस्नानम् ॥

अथ क्रियास्नानम् । तत्र शङ्खः—

'क्रियास्नानं प्रवक्ष्यामि यथावद्विधिपूर्वकम् ।
मृद्भिरद्भिश्च कर्त्तव्यं शौचमादौ यथाविधि ॥
जले निमग्नस्तून्मज्य चोपस्पृश्य यथाविधि ।
तीर्थस्यावाहनं कुर्यात् तत्प्रवक्ष्याम्यतः परम् ॥
प्रपद्ये वरुणं देवमम्भसां पतिमूर्जितम् ।
याचितं देहि मे तीर्थं सर्वपापापनुत्तये ॥
तीर्थमावाहयिष्यामि सर्वाघविनिषूदनम् ।
सान्निध्यमस्मिंस्तोये च क्रियतां मदनुग्रहात्' ॥

इति । षट्स्वपि स्नानेषु मुख्यानुकल्पाभ्यां जलविशेषो विष्णुपुराणे निरूपितः—

---

१. A. reads वेदमयैर्द्विजैः; while I. reads वेदमयैर्द्विजैः. २. A. reads निमग्नस्त्रिर्मृज्य, and the text of Sankha read निमज्य उन्मज्य for निमग्नस्तून्मज्य. ३. All others except A. I. and the text read तीर्थमावाहनं for तीर्थस्यावाहनं. ४. I. reads पतिमीश्वरम्, D. परमर्जितम्, and the text reads the whole verse as follows :—

प्रपद्य वरुणं देवमम्भसां पतिमर्चितम् ।
याचेत देहि मे तीर्थं सर्वपापापनुत्तये ॥.

५. D. reads सर्वाघौघनिषूदनम्. ६. All except A. are mistaken here. B. C. E. F. G. and H. read सान्निध्यमस्मिश्चित्तोये स्थीयतां, and I. सान्निध्यमस्मिश्चित्तोये क्रियतां. ७. B. C. D. and F. read स्थानेषु for स्नानेषु. ८. D. reads दर्शितः.

'नदी-नद-तडागेषु देवखातजलेषु च ।
नित्यं क्रियाऽर्थं स्नायीत गिरिप्रस्रवणेषु च ॥
कूपेषूद्धृततोयेन स्नानं कुर्वीत वा भुवि ' ।
(वि. पु. ३. ११. २४-२५)

इति । मार्कण्डेयो ऽपि-

'पुराणानां नरेन्द्राणामृषीणां च महात्मनाम् ।
स्नानं कूप-तडागेषु देवतानां समाचरेत् ॥
भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकम् ।
ततो ऽपि सारसं पुण्यं तस्मान्नादेयमुच्यते ॥
तीर्थतोयं ततः पुण्यं ततो गाङ्गं तु सर्वतः' ।

इति । मरीचिः-

'भूमिष्ठमुद्धृतं वाऽपि शीतमुष्णमथापि वा ।
गाङ्गं पयः पुनात्याशु पापमामरणान्तिकम्' ॥

इति । निषिद्धं जलमाह व्यासः-

'अनुत्सृष्टेषु* न स्नायात्तथैवाऽसंस्कृतेषु च ।

---

* अनुत्सृष्टेषु अकृतोत्सर्गेषु । असंस्कृतेषु अकृतसंस्कारेषु । हवनादि-पूर्वको जलसंस्कारः प्रयोगग्रन्थेभ्यो ऽवगन्तव्यः ।

---

१. I. reads -विलेषु. २. D. G. H. and I. read नित्यक्रियार्थे. ३. I. कूपे वोद्धृत-. ४. D. reads मार्कण्डेयो ऽपि. ५. B. C. D. and F. read ततो गङ्गा तु सर्वतः. ६. D. omits this word. ७. D. and I. read निषिद्धजलं. ८. I. reads ऽसंस्तुतेषु.

आत्मीयेष्वपि न स्नायात्तथैवाल्पजलेष्वपि[1] ॥
नद्या[2] यत्र परिभ्रष्टं नद्या यत्र विनिःसृतम् ।
गत[3]प्रत्यागतं यत्र तत्तोयं परिवर्जयेत्' ॥

इति । शातातपोऽपि–

'अन्यैरपि कृते कूपे सेतौ*[4] वाप्यादिके तथा ।
तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं समाचरेत्' ॥

इति । प्रतिप्रसवमाह मनुः–

'अलाभे देवखातानां सरसां सरितां तथा ।
उद्धृत्य† चतुरः पिण्डान् पारक्ये स्नानमाचरेत्' ॥

इति । उष्णोदकं[5] निषेधति[6] शङ्खः–

'स्नातस्य वह्नितप्तेन तथैव परवारिणा ।
शरीरशुद्धिर्विज्ञेया न तु स्नानफलं भवेत्[7]' ॥

इति[8] । याज्ञवल्क्यः–

---

* सेतौ 'घाट' इति भाषायां प्रसिद्धे ।

† विष्णुना तु– 'परनिपानेषु न स्नानमाचरेत । आचरेत्पञ्चपिण्डानुद्धृत्यापस्तथापदि' (वि. स्मृ. ६४.१-२) इति पञ्चपिण्डोद्धारः कथितः । बौधायनादिभिरप्येवमेव ।

---

१. All others except D. add इति । व्यासोऽपि after this verse of which there is no necessity as the next verse is a quotation from the special author; and for व्यासोऽपि A. substitutes पुण्डरीकोऽपि, but we do not find the name of पुण्डरीक in the list of Dharmaśâstrakâras nor in that of Purâṇakâras or Rishis. This name appears in the Pandhari Mâhâtmya which is a small modern mythological work. २. I. reads नद्यां यत्र. ३. I. reads गतं प्रत्यागतं यत्र. ४. I. reads सरो वाप्यादिके, but the next quotation from Manu shows that this is a mistake. ५. A. reads उष्णोदकस्नानं. ६. I. reads निषेधयति. ७. I. reads लभेत्. ८. D. omits इति.

'वृथा तूष्णोदकस्नानं वृथा जप्यम्[1] अवैदिकम्।
वृथा त्वश्रोत्रिये दानं वृथा भुक्तमसाक्षिकम्' ॥

इति। यत्तूष्णोदक[2]विधानम्—

'आप एव सदा पूतास्तासां वह्निर्विशोधकः।
ततः सर्वेषु कालेषु उष्णाम्भः पावनं स्मृतम्' ॥

इति—यच्च[3] षट्त्रिंशन्मते ऽपि—

'आपः स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः।
तेन सन्तः प्रशंसन्ति स्नानमुष्णेन वारिणा' ॥

इति—तदातुरस्नानविषयम्[4]। तथा च यमः—

'आदित्यकिरणैः पूतं पुनः पूतं च वह्निना।
आम्नातमातुरस्नाने प्रशस्तं स्यात्[5] भृतोदकम्' ॥

इति। यदा तु नद्याद्यसम्भवस्तदा अनातुरस्याप्युष्णोदकस्नानमानिषिद्धमित्याह यमः—

'नित्यं नैमित्तिकं चैव क्रियाङ्गं मलकर्षणम्।
तीर्थाभावे तु कर्त्तव्यमुष्णोदकपरोदकैः' ॥

इति[6]। यदपि वृद्धमनुनोक्तम्—

---

१. D. and H. read जाप्यम् for जप्यम्. २. A. and I. add -स्नान- after उष्णोदक-. ३. यच्च is omitted by all others except A. ४. A. reads तदातुरविषयं for तदातुरस्नानविषयम्. ५. B. C. E. F. G. and H. read न शुभोदकं; while D. reads न भृतोदकं for स्यात् भृतोदकम्. Both the readings do not give any good sense. We prefer न हिमोदकम् to either of these which is found in the marginal correction of A. ६. इति is omitted by D. and G.

'मृते जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥
संक्रान्त्यां भानुवारे च सप्तम्यां राहुदर्शने।
आरोग्य-पुत्र-मित्रार्थी न स्नायादुष्णवारिणा ॥
पौर्णमास्यां तथा दर्शे यः स्नायादुष्णवारिणा।
स गोहत्याकृतं पापं प्राप्नोतीह न संशयः' ॥

इति। तत्र उक्तेषु मरणादिषु नोष्णोदकैः स्नायात् अपि तु परकीयैरुद्धृतोदकैर्वेत्युक्तमिति न विरोधः। उष्णोदक-स्नाने विशेषमाह व्यासः—

'शीतास्वप्सु निषिच्योष्णा मन्त्रसम्भारसम्भृताः।
गेहेऽपि शस्यते स्नानं नदीफलसमं विदुः' ॥

इति। गौणं तु स्नानमुत्तरत्र स्वयमेव वक्ष्यति।

॥ इति क्रियास्नानम् ॥

अथ सन्ध्याविधिः। तत्र सन्ध्यास्वरूपं दक्षो दर्शयति—

'अहोरात्रस्य यः सन्धिः सूर्यनक्षत्रवर्जितः।
सा तु सन्ध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः' ॥

इति। यद्यपि कालवाचकत्वेनात्र सन्ध्याशब्दः प्रतीयते तथापि तस्मिन् काले उपास्या देवता सन्ध्याशब्देनोपलक्ष्यते।

---

१. D. reads this line as follows :—

आस्पृश्यस्पर्शने चैव स्नायात्तुष्णेन वारिणा।,

but this appears to be a mistake of the writer. २. D. reads नोद्धृतो-दकैर्वा. ३. B. C. and F. read तद्वीनमफलं च हि, and D. E G. H. तद्वीनमफलं बहिः. These two readings are correct and give different sense. ४. D. reads -नोपलभ्यते.

तथा च देवताया उपासनमुपलक्ष्य मूलवचने कर्मपरत्वेन सन्ध्याशब्दः प्रयुक्तः । अथवा सन्धौ भवा क्रिया सन्ध्या । अत एव व्यासः—

'उपास्ते सन्धिवेलायां निशाया दिवसस्य च ।
तामेव सन्ध्यां तस्मात्तु प्रवदन्ति मनीषिणः' ॥

इति । तामेव क्रियां विदधाति योगियाज्ञवल्क्यः—

'सन्धौ सन्ध्यामुपासीत नास्तगे नोद्गते रवौ' ।

इति । सा च सन्ध्या त्रिविधा । तदुक्तमत्रिणा—

'सन्ध्यात्रयं तु कर्त्तव्यं द्विजेनात्मविदा सदा' ।

इति । तत्र कालभेदेन देवताया नामभेदमाह व्यासः—

'गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने ।
सरस्वती च सायाह्ने सैव सन्ध्या त्रिधा स्मृता ॥
प्रतिग्रहादन्नदोषात् पातकादुपपातकात् ।
गायत्री प्रोच्यते तस्माद्गायन्तं त्रायते यतः ॥
सवितृद्योतनात् सैवं सावित्री परिकीर्तिता ।
जगतः प्रसवित्री वा वाग्रूपत्वात् सरस्वती' ॥

---

१. I. reads तथा देवतया उपलक्षणमुपलक्ष्य for तथा च देवताया उपासनमुपलक्ष्य. २. D. has उपास्तिः for उपास्ते. ३. B. C. E. F. and G. read निशायां for निशायाः. ४. Except A. and I. all others read तस्मात् तत्. ५. B. C. and F. read तस्मिन्काम्, and एव is omitted by all others except A. ६. All others except A. read नामाभिभेदम् for नामभेदम्. ७. All others except A. and I. read विष्णु. ८. After this word B. C. and F. add इति, but it is useless here. ९. B. C. and F. read प्रतिग्रहान्नदोषाच्च, and E. G. H. प्रतिग्रहान्नदोषात्तु for प्रतिग्रहादन्नदोषात्. १०. A. reads चैव ११. D. reads स्वग्रूपत्वात्, which is probably a mistake.

इति । वर्णभेदः स्मृत्यन्तरे ऽभिहितः[1]—

'गायत्री तु भवेद्रक्ता सावित्री शुक्लवर्णिका ।
सरस्वती तथा कृष्णा उपास्या वर्णभेदतः ॥
गायत्री ब्रह्मरूपा तु सावित्री रुद्ररूपिणी ।
सरस्वती विष्णुरूपा उपास्या रूपभेदतः' ॥

इति । उपासनमभिध्यानम्[2] । अत एव तैत्तिरीयब्राह्मणम्—

'उद्यन्तमस्तं यन्तमादित्यमभिध्यायन् कुर्वन्[3]
ब्राह्मणो विद्वान् सकलं भद्रमश्नुते ऽसावादित्यो
ब्रह्मेति । ब्रह्मैव सन् ब्रह्माप्येति य एवं वेद' ।

इति । अयमर्थः — वक्ष्यमाणप्रकारेण प्राणायामादिकं कर्म कुर्वन् यथोक्तं नाम-वर्ण-रूपोपेतं[4] सन्ध्याशब्दवाच्यमादित्यं ब्रह्मेति ध्यायन्नैहिकमामुष्मिकं च सकलं भद्रमश्नुते । य एव-[5] मुक्तध्यानेन शुद्धान्तःकरणो[6] ब्रह्म साक्षात् कुरुते स पूर्वमपि ब्रह्मैव सन्नज्ञानात् जीवत्वं प्राप्तो यथोक्तज्ञानेन तदज्ञानापगमे ब्रह्मैव प्राप्नोति[7]—इति । व्यासो ऽपि एतदेवाभिप्रेत्याह—

'न भिन्नां प्रतिपद्येत गायत्रीं* ब्रह्मणा सह ।
सो ऽहमस्मीत्युपासीत[8] विधिना येन केन चित्' ॥

* ब्रह्मणा आत्मना सह । सोहमस्मीति विधिना 'देवो भूत्वा देवं यजेत् नादेवो देवमर्चयेत्' इति तान्त्रिकैः 'ब्रह्मैवाहमस्मीत्यभिध्यायेत्' इति औपनिषदैश्चोक्तेन प्रकारेणेत्यर्थः ।

१. B. C. E. F. G. and H. read विहितः for ऽभिहितः. २. D. reads अभिध्यानम्. ३. G. omits कुर्वन्. ४. A. reads यथोक्तनामाभिध्येयरूपोपहितम्, while H. and I. read यथोक्तनामरूपोपेतं. ५. D. omits य and reads एवमुक्त-. ६. D. has सिद्धान्तःकरणो. ७. I. reads प्राप्नोति, which a mistake. ८. H. reads साहमस्मि.

इति । तत्र प्रातःसन्ध्यायाः कालपरिमाणमाह दक्षः—

'रात्र्यन्त्ययामनाडी द्वे सन्ध्यादिः काल उच्यते ।
दर्शनाद्रविरेखायास्तदन्तो मुनिभिः स्मृतः' ॥

इति । आ सङ्गवं प्रातःसन्ध्याया गौणः कालः । आ प्रदोषावसानं च सायंसन्ध्यायाः । तदाह बृहन्मनुः—

'न प्रातर्न प्रदोषश्च सन्ध्याकालो ऽतिपत्स्यते ।
मुख्यकल्पो ऽनुकल्पश्च सर्वस्मिन् कर्मणि स्मृतः' ॥

इति । कूर्मपुराणे सन्ध्योपास्तिप्रकारो दर्शितः—

'प्रागग्रेषु ततः स्थित्वा दर्भेषु सुसमाहितः ।
प्राणायामत्रयं कृत्वा ध्यायेत् सन्ध्यामिति श्रुतिः' ॥

इति । याज्ञवल्क्यो ऽपि—

'प्राणानायम्य संप्रोक्ष्य तृचेनाब्दैवतेन तु' ॥

इति । बृहस्पतिः— (या. स्मृ. १. २४)

'बद्ध्वाऽऽसनं नियम्यासून् स्मृत्वा चर्य्यादिकं तथा ।
सन्निमीलितदृङ्मौनी प्राणायामं समभ्यसेत्' ॥

इति । प्राणायामलक्षणं मनुराह—

---

१. D. drops the visarga. २. All others except A. and I. read बृद्धमनुः for बृहन्मनुः. ३. D. reads पठ्यते; while B. C. E. F. G. and H. read -पद्यते for -पत्स्यते. ४. G. reads मुख्यः कालोऽनुकल्पश्च; while all others except A. and I. read मुख्यकालो ऽनुकल्पश्च. ५. All others except A. read प्राक्कूलेषु. ६. I. substitutes च in the place of सु-. ७. D. has सन्ध्यामुपासते for सन्ध्यामिति श्रुतिः. ८. B. C. and F. read चार्षादिकं. H. वर्षादिकं, and I. चार्यादिकं for चर्य्यादिकं. D. reads the whole line as follows :—

'बद्धासनं नियम्याशु स्मृत्वा चर्यादिकं तथा'।

'सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते' ॥

(म. स्मृ. ५५. ९)

इति । याज्ञवल्क्यः—

'गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकाम् ।
प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः' ॥

(या. स्मृ. १. २३)

इति । योगियाज्ञवल्क्यो ऽपि—

'भूर्भुवः स्वर्महर्जनस्तपः सत्यं तथैव च ।
प्रत्योङ्कारसमायुक्तस्तथा 'तत्सवितुः' परम् ॥
'ॐ आपोज्योति' रित्येतच्छिरः पश्चात्प्रयोजयेत् ।
त्रिरावर्त्तनयोगात्तु प्राणायामः प्रकीर्त्तितः' ॥

इति । स च प्राणायामः पूरक-कुम्भक-रेचकभेदेन त्रिविधो ज्ञेयः । तथा च योगियाज्ञवल्क्यः—

'पूरकः कुम्भको रेच्यः प्राणायामस्त्रिलक्षणः ।
नासिकाऽऽकृष्ट उच्छ्वासो ध्मातः पूरक उच्यते ॥

---

१. This verse appears in the Vishṇu Smṛiti. The text of the said Smṛiti and all other manuscripts except A. and I. read सव्याहृतिकां.
२. I. reads दशप्रणवसंयुक्तां, but the commentator Vijñânesvara does not take this reading. ३. D. omits this. B. C. and F. read वृद्धयाज्ञवल्क्यो ऽपि; while G. and H. read simply याज्ञवल्क्यो ऽपि, but we don't find the following quotation in the text of yajñavalkya, and we are unable to say whether yogiyajñavalkya or the vṛiddhayajñavalkya this versecontains.
४. H. reads प्राणायामः सुशान्कितः, B. C. E. F. and G., प्राणायामस्तु शान्कितः, D. प्राणायामास्तु शान्कितः. ५. D. and G. have -कृत.

कुम्भको निश्चलः श्वासो रेच्यमानस्तु रेचकः'* ॥

इति। मार्जनमाह व्यासः—

'आपोहिष्ठेत्यृचैः कुर्यान्मार्जनं तु कुशोदकैः।
प्रणवेन तु संयुक्तं क्षिपेद्वारि पदे पदे ॥
विप्रुषोऽष्टौ क्षिपेदूर्ध्वमधो 'यस्य क्षयाय' च।
रजस्तमो मोहजातान् जाग्रत्-स्वप्न-सुषुप्तिजान् ॥
वाङ्-मनः-कायजान् दोषान् नवैतान् नवभिर्दहेत्'।

इति। प्रजापतिरपि—

'ऋगन्ते मार्जनं कुर्यात् पादान्ते वा समाहितः।
अर्द्धर्चान्तेऽथवा कुर्याच्छिष्टानां मतमीदृशम्' ॥

इति। मार्जने तीर्थविशेषमाह हारीतः—

'मार्जनार्चन-बलिकर्म-भोजनानि देवतीर्थेन कुर्यात्'।

तच्च मार्जनं न धाराच्युतौ कार्यम्। तथा च ब्रह्मा—

'धाराच्युतेन तोयेन सन्ध्योपास्तिर्विगर्हिता।
पितरो न प्रशंसन्ति न प्रशंसन्ति देवताः' ॥

---

* अयमर्थः— ओंकारसहितव्याहृतिचतुष्टयसहितां सशिरस्कां गायत्रीं जपन् दक्षिणनासापुटेन वायुं ऊर्ध्वमाकर्षयेत् एष पूरकः। तथैव तावत्कालमेव वायुं धारयेत् एष कुम्भकः। तथैव रेचयेत् एष रेचकः। एतत्त्रयात्मकः प्राणायाम इत्युच्यते।

---

१. All others except I. read रिच्यमान-for रेच्यमान-. २. A. reads -त्यृचा. ३. I. reads वपुष्वष्टौ. ४. All others except A. D. and I. read यस्य क्षयाय जित्, which seems to be a mistake, and D. substitutes तु for च. ५. C. omits रजः through mistake, E. and G. read रक्षस्तमोमोहजातान्, which does not give good sense. A. and I. read रजस्तमो-मोहभवान्. ६. A. and I. read शातातपः for प्रजापतिरपि. ७. A. reads the whole line as follows:—

ऋगन्ते वाऽथ पादान्ते मार्जनं तु समाहितः।.

८. All others except D. read हारीतोऽपि for मार्जने तीर्थविशेषमाह हारीतः. ९. D. substitutes तच for तच्च. १०. च is omitted by I.

इति । कथं तर्हि मार्जनमिति तत्राह स एव—

'नद्यां तीर्थे ह्रदे[1] वाऽपि भाजने मृण्मयेऽपि वा ।
औदुम्बरेऽथ सौवर्णे राजते दारुसम्भवे ॥
कृत्वा तु वामहस्ते वा सन्ध्योपास्तिं समाचरेत्' ।

इति । कृत्वा उदकमिति शेषः । मृण्मयादिपात्रसद्भावे तु वामहस्तस्य प्रतिषेधः ।

'वामहस्ते जलं कृत्वा ये तु सन्ध्यामुपासते ।
सा सन्ध्या वृषली ज्ञेया असुरास्तैस्तु[2] तर्पिताः' ।

इति स्मरणात् । मृण्मयाद्यभावे तु—'कृत्वा तु वामहस्ते वा' इत्यनेन वामहस्तविधानात्[3] । एवमुक्तविधिना मार्जयित्वा 'सूर्यश्चे'त्यपः पिबेत् । तदाह बौधायनः—

'अथातः सन्ध्योपासनविधिं व्याख्यास्यामः (१) ।
तीर्थं गत्वा[4] प्रयतोऽभिषिक्तः प्रक्षालितपाणिपादो विधिनाऽऽचम्य[5] 'अग्निश्च* मामन्युश्चेति' सायमपः पीत्वा 'सूर्यश्च मामन्युश्चेति' प्रातः ।

* 'अग्निश्च मामन्युश्च' 'सूर्यश्च मामन्युश्च' इत्येतौ मन्त्रौ महानारायणोपनिषदि (१४.५-६) द्रष्टव्यौ ।

१. I. reads तटे for ह्रदे; while A. reads संध्यां तीर्थे तटे. २. I. reads तेषु for तैस्तु. ३. I. reads इत्यनेनैव विधानात for इत्यनेन वामहस्तविधानात्. ४. Here the text of Baudhâyana (edited by E. Hultzsch, Vienna) is throughout mistaken. It reads as follows:—गत्वा प्रयतोऽभिषिक्तः प्रयतो वाऽनभिषिक्तः प्रक्षालितपादपाणिरप आचम्य सुरभिमत्याब्लिङ्गाभिः for गत्वा प्रयतोऽभिषिक्तः प्रक्षालितपाणिपादो विधिनाऽऽचम्य 'अग्निश्च मामन्युश्चेति' सायमपः पीत्वा 'सूर्यश्च मामन्युश्चेति' प्रातः सपवित्रेण पाणिना वसुमत्याब्लिङ्गाभिः. ५. All others except A. and I. read ऽप आचम्य for विधिनाऽऽचम्य.

सपवित्रेण पाणिना वसुमत्या अब्लिङ्गाभिर्वारुणीभिः हिरण्यवर्णाभिः पावमानीभिर्व्याहृतिभिः अन्यैश्च पवित्रैरात्मानं प्रोक्ष्य प्रयतो भवति' ।

(बौ. स्मृ. २. ४. १–२)

इति । भारद्वाजः—

'सायमग्निश्च मेत्युक्त्वा प्रातः सूर्येत्यपः पिबेत् ।
आपः पुनन्तु* मध्याह्ने ततश्चाऽऽचमनं चरेत्' ॥

इति । कात्यायनोऽपि—

'शिरसो मार्जनं कुर्यात् कुशैः सोदकबिन्दुभिः ।
प्रणवो भूर्भुवःस्वश्चौ गायत्री च तृतीयिका ॥
अब्दैवतऋचश्चैव चतुर्थमिति मार्जनम्' ।

(का. स्मृ. २. १०. ४–५)

इति । मार्जनानन्तरं प्रजापतिः—

'जलपूर्णं तथा हस्तं नासिकाऽग्रे समर्पयेत् ।
ऋतं चेति पठित्वा च तज्जलं तु क्षितौ क्षिपेत्' ॥

इति । ततः सूर्यायार्घ्यं दद्यात् । तथा च व्यासः—

---

* मन्त्रोऽयं महानारायणोपनिषदि (१४. २) द्रष्टव्यः ।

---

१. All others except D. read सावित्रेण for सपवित्रेण, and omit पाणिना. [२]. A. and D. read सुरभिमत्या for वसुमत्या; while B. C. and F. read [illegible] सुवसुरभिमत्या, but this reading does not give any sense. ३. D. [o]mits the portion from this word to तु मध्याह्ने &c., &c., in the next quota[t]ion. ४. B. C. E. F. and H. read भरद्वाजः. ५. A. D. and I. read [प्र]णवो भूर्भुवः स्वश्च, E. G. and H. read प्रणवो भूर्भुवः स्वरौ for प्रणवो [भू]र्भुवः स्वश्चौ. ६. D. reads अब्दैवतमृचं चैव [illegible] I. अब्दै[व]त्यमृचं चैव.

37+

'कराभ्यां तोयमादाय गायत्र्या चाभिमन्त्रितम् ।
आदित्याभिमुखस्तिष्ठन् त्रिरूर्ध्वं सन्ध्ययोः क्षिपेत्' ॥

इति ।

'उत्थायार्कं प्रति प्रोहेत् त्रिकेणाञ्जलिमम्भसाम्' ।
(का. स्मृ. २.११.१०)

इत्येतत् कात्यायनवचनं मध्याह्नसन्ध्यापरम् । हारीतोऽपि-

'सावित्र्याऽभिमन्त्रितमुदकं पुष्पमिश्रमञ्जलिना क्षिपेत्' ।

इति । अर्घ्यदाने मन्त्रान्तरमुक्तं विष्णुना-

'कराभ्यामञ्जलिं कृत्वा जलपूर्णं समाहितः ।
उदुत्यमिति मन्त्रेण तत्तोयं प्रक्षिपेद्भुवि' ॥

इति । ततः प्रदक्षिणं कृत्वा उदकं स्पृशेत् । तदुक्तं वराहपुराणे-

'सायं मन्त्रवदाचम्य प्रोक्ष्य सूर्यस्य चाञ्जलिम् ।
दत्वा प्रदक्षिणं कृत्वा जलं स्पृष्ट्वा विशुद्ध्यति' ॥

इति । श्रुतिरपि-

'यत् प्रदक्षिणं प्रक्रमन्ति तेन पाप्मानमवधुन्वन्ति' ।

इति । कूर्मपुराणम्-

---

१. B. C. F. and G. read -र्ध्वमथवा क्षिपेत्; while A. and I. read -र्ध्वमथत्रोत्क्षिपेत्. २. The portion from उत्थायार्क- to मध्याह्नसन्ध्यापरम् is omitted by all others except D. E. G. and H. ३. D. and G. insert कात्यायनोऽपि before उत्थाय-, omit वचनम्, and read एतन्मध्याह्नपरम्. ४. All others except A. and I. read करपूर्णं for जलपूर्णं. ५. A. reads च क्षितौ क्षिपेत्; while all others except D. and I. read च क्षिपेद्भुवि. ६. A reads ततः प्रदक्षिणं कृत्वा उदकं च स्पृशेत् पुनः and adds इति in the former line after this. ७. B. C. E. F. G. and H. read only पुराणे; while I reads ब्रह्माण्डपुराणे. ८. A. reads this line as follows :—

सायं सन्ध्यामुपासीत दत्वा सूर्याय चाञ्जलिम् ।

'अथोपतिष्ठेदादित्यमुदयन्तं समाहितः ।
मन्त्रैस्तु विविधैः सौरैः ऋग्यजुः-सामसम्भवैः' ॥

इति । उपस्थानं तु स्वशाखोक्तमन्त्रैः कार्यम् ।

'उपस्थानं स्वकैर्मन्त्रैरादित्यस्य तु कारयेत्' ।

इति वसिष्ठस्मरणात् । कूर्मपुराणे 'उपस्थानं तु सूक्तैः' इत्यादिना प्रपञ्चितम् ।

'प्राक्कूलेषु' इत्यारभ्य आदित्योपस्थानपर्यंतं प्रातःसन्ध्यायां यदुपवर्णितं तदितरयोरुभयोरपि सन्ध्ययोः समानम् । तत्र मध्याह्नसन्ध्यायां विशेषो नारायणेनाभिहितः—

'आपः पुनन्तु मन्त्रेण आपोहिष्ठेति मार्जनम् ।
प्रक्षिप्य चाञ्जलिं सम्यगुदुत्यं चित्रमित्यपि ॥
तच्चक्षुर्देव इति च हंसः शुचिषदित्यपि ।
एतत् जपेदूर्ध्वबाहुः सूर्यं पश्यन् समाहितः ॥
गायत्र्या तु यथाशक्ति उपस्थाय दिवाकरम्' ।

इति । कालविशेषस्तु शङ्खेन दर्शितः—

'प्रातःसन्ध्यां सनक्षत्रां मध्यमां स्नानकर्मणि ।
सादित्यां पश्चिमां सन्ध्यामुपासीत यथाविधि' ॥

इति । स्नानकर्मणीति माध्याह्निकस्नानानन्तरमित्यर्थः । माध्याह्निकसन्ध्याया गौणकालमाह दक्षः—

'अध्यर्द्धयामादासायं सन्ध्यामाध्याह्निकीष्यते' ।

इति । सन्ध्यात्रयस्य तारतम्येन देशविशेषमाह व्यासः—

---

१. D. omits इति. २. D. E. G. and H. read शुद्धैरित्यादिना. All others except A. and I. read प्राक्कूलेष्वित्याद्यादित्योपस्थानपर्यन्तं प्रातःसन्ध्यायामुपवर्णितं तदितरयोः सन्ध्ययोः समानम्, but H. omits सन्ध्ययोः. I. reads -सन्ध्यायां. ६. I. reads -चये.

'गृहे त्वेकगुणा सन्ध्या गोष्ठे दशगुणा स्मृता ।
शतसाहस्रिका नद्यामनन्ता विष्णुसन्निधौ ॥
बहिःसन्ध्या दशगुणा गर्त्त-प्रस्रवणेषु च ।
ख्याता तीर्थे शतगुणा साहस्रा जाह्नवीतटे '॥

इति । शातातपोऽपि—

'अनृतं मद्यगन्धं च दिवामैथुनमेव च ।
पुनाति वृषलस्यान्नं सन्ध्या बहिरुपासिता' ॥

इति । बहिःसन्ध्यायामुपासितायां यदा विहरणाद्यङ्ग-लोपस्तदा गृह एव सन्ध्यात्रयं कर्त्तव्यमित्याहात्रिः—

'सन्ध्यात्रयं तु कर्त्तव्यं द्विजेनात्मविदा सदा ।
उभे सन्ध्ये तु कर्त्तव्ये ब्राह्मणैश्च गृहेष्वपि '॥

इति । यद्यपि प्रशस्तत्वाद्बहिरेव सन्ध्यात्रयं कर्त्तव्यत्वेन प्राप्तं तथापि श्रौतत्वेन विहरणस्य प्राबल्यात् तदनुरोधेन सायं-प्रातःसन्ध्ये गृहेऽभ्यनुज्ञायेते । सायंसन्ध्यायामुपस्थाने मन्त्र-विशेषमाह नारायणः—

' वारुणीभिस्तथादित्यमुपस्थाय प्रदक्षिणम् ।
कुर्वन् दिशो नमस्कुर्याद्दिगीशांश्च पृथक् पृथक्' ॥

इति । वारुण्यश्च —'इमं मे वरुण' (ऋ. सं. १. ६. १.) —इत्याद्याः । यद्यपि वारुणीभिर्वरुणस्योपस्थानं लिङ्गबलात् प्राप्तं

---

१. After the end of this verse I. has इति । महाभारते. २. D. and H. read दिवास्वापं च मैथुनम् for दिवामैथुनमेव च. ३. B. C. and F. read बहिःसन्ध्या उपासिता; while D. E. G. and H. read बहि सन्ध्यामुपासिता. ४. All others except A. and I. omit बहिःसन्ध्यायामुपासितायां. ५. D. reads तथा श्रोत्रियत्वेन for तथापि श्रौतत्वेन.

तथापि श्रुतेः प्राबल्यात् तया लिङ्गं बाधित्वा आदित्योपस्थाने एव[1] विनियुज्यन्ते । एतच्च तृतीयाध्याये* विचारितम् ।

तथा हि । 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते'[2] इति श्रूयते । इन्द्रो देवतात्वेन यस्यामृचि मन्त्रलिङ्गात् प्रकाश्यते सेयमृगैन्द्री । 'कदाचन स्तरीरसि नेन्द्र सश्चसि'[3] इत्यादिका । तत्र लिङ्गादिन्द्रोपस्थाने मन्त्रस्य विनियोगः प्रतीयते । गार्हपत्यमिति द्वितीयया श्रुत्या तु गार्हपत्योपस्थाने । तत्र संशयः । किमुभयं समुच्चित्योपस्थेयं ? उतैक एव ? तत्रापि किं यः कश्चिद्वैकल्पिकः ? किं वेन्द्र एव ? उत गार्हपत्य एव ? इति । तत्र श्रुति-लिङ्गयोः समबलप्रमाणत्वात् विरोधानुपलम्भाच्च समुच्चयः-इत्येकः पक्षः । एकोपस्थाने मन्त्रस्य निराकाङ्क्षत्वात् नैराकाङ्क्ष्यलक्षणविरोधादनन्तरनियामकादर्शनाद्वैकल्पिकः — इति द्वितीयः पक्षः । श्रुतेः शब्दात्मिकायाः अर्थसामर्थ्यानुसारित्वात् सामर्थ्यस्य चोपजीव्यत्वेन प्राबल्यादिन्द्र एवोपस्थेयः—इति तृतीयः पक्षः । मन्त्रगतो हीन्द्रशब्दो रूढ्या शक्रमभिधत्ते । 'इदि परमैश्वर्ये'—इत्यस्माद्धातोरुत्पन्नत्वात् स्वकार्यविषयपरमैश्वर्योपेतं गार्हपत्यमभिधत्ते । 'गुणाद्वाप्यभिधानं स्यात्'-इति न्यायेनोभयसाधारणत्वेन लिङ्गस्य सन्देहापादकत्वम् । अर्थाच्चेयेन

---

* पूर्वमीमांसायां तृतीयाध्यायस्य तृतीये पादे सप्तमे ऽधिकरणे 'श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' (३. ३. ४) इत्यस्मिन् सूत्रे शबरभाष्ये वार्तिके च द्रष्टव्यमिदम् ।

---

१. Except A. and I. other manuscripts omit एव and insert मन्त्राः.
२. I. reads उपतिष्ठेत्. ३. D. reads सश्चसि.

'रूढिर्योगमपहरति'—इति न्यायेन शीघ्रबुद्ध्युत्पादिकायाः रूढेः प्राबल्याच्छक्र एवोपस्थेयः—इति। एवं तर्हि लिङ्गादपि शीघ्रबुद्ध्युत्पादकत्वेन श्रुतिरेवात्र विनियोजिका। तथा ह्याचार्यैरुक्तम्-

'मन्त्रार्थं मन्त्रतो बुद्ध्वा पश्चाच्छक्तिं निरूप्य च।
मन्त्राकाङ्क्षाबलेनेन्द्रशेषत्वश्रुतिकल्पनम्॥
श्रुत्या प्रत्यक्षया पूर्वं गार्हपत्याङ्गतां गते।
निराकाङ्क्षीकृते मन्त्रे निर्मूला श्रुतिकल्पना॥
तेन शीघ्रप्रवृत्तित्वाच्छ्रुत्या लिङ्गस्य बाधनम्'॥

तस्माद्गार्हपत्य एवोपस्थेयः इति सिद्धम्। सन्ध्यां प्रशंसति यमः—

'सन्ध्यामुपासते ये तु सततं शंसितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्॥
यदह्ना कुरुते पापं कर्मणा मनसा गिरा।
आसीनः पश्चिमां सन्ध्यां प्राणायामैस्तु[1] हन्ति तत्॥
यद्रात्र्या कुरुते पापं कर्मणा मनसा गिरा।
पूर्वसन्ध्यामुपासीनः प्राणायामैर्व्यपोहति॥
ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः[2]।
प्रज्ञां यशश्च कीर्तिं च ब्रह्मवर्चसमेव च'॥

इति। अकरणे प्रत्यवायो दर्शितो दक्षेण—

'सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु।
यदन्यत् कुरुते कर्म न तस्य फलभाग्भवेत्'॥
(द. स्मृ. २. २०)

१. D. reads प्राणायामः. २. A. reads उपाययुः for अवाप्नुयुः

इति। गोभिलो ऽपि–

'सन्ध्या येन न विज्ञाता सन्ध्या येनाऽनुपासिता।
जीवमानो भवेच्छूद्रो मृतः श्वा चोपजायते'॥

इति। विष्णुपुराणे ऽपि–

'उपतिष्ठन्ति वै[1] सन्ध्यां ये न पूर्वां न पश्चिमाम्।
व्रजन्ति ते दुरात्मानस्तामिस्रं नरकं नृप'॥

(वि. पु. ३. ११. १००.)

इति। कूर्मपुराणे ऽपि[2]–

'यो ऽन्यत्र[3] कुरुते यत्नं धर्मकार्ये द्विजोत्तमः।
विहाय सन्ध्याप्रणतिं स याति नरकायुतम्'॥

(कू. पु. १. २.१८.३१)

इति। एतत्सर्वमनार्त्तविषयम्। तथा च याज्ञवल्क्यः–

'[4]अनार्त्तश्चोत्सृजेद्यस्तु स विप्रः शूद्रसम्मितः।
प्रायश्चित्ती भवेच्चैव लोके भवति निन्दितः'॥

इति। अत्रिरपि–

'नोपतिष्ठन्ति ये सन्ध्यां स्वस्थावस्थासु वै द्विजाः।
हिंसन्ति वै सदा पापा भगवन्तं दिवाकरम्'॥

इति। विष्णुपुराणे[5] ऽपि–

---

१. B. C. E. F. G. and H. substitute ये in the place of वै; while D. and the text of the Vishṇu Purâṇa read उपतिष्ठन्ति ये सन्ध्यां न पूर्वां न च पश्चिमाम्. २. D. omits अपि. ३. D. reads यो बाल्यात्कुरुते यत्नं: while B. C. E. F. G. and H. read योऽन्यत्र कुरुते कर्म. ४. There is no trace of this Śloka in the yajnawalkya smṛity. ५. D. reads विष्णुरापि for विष्णुपुराणेऽपि, but it is evidently a mistake.

'सर्वकालमुपस्थानं सन्ध्ययोः पार्थिवेष्यते ।
अन्यत्र सूतका-ऽशौच-विभ्रमा-ऽतुरभीतितः' ॥
(वि. पु. ३.११.१७)

इति । सूतकादौ तु सत्यपि सामर्थ्ये सन्ध्योपासनं न कार्यमित्याह मरीचिः—

'सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते' ।

इति । यदपि पुलस्त्येनोक्तम्—

'सन्ध्यामिष्टिं च होमं च यावज्जीवं समाचरेत् ।
न त्यजेत् सूतके वाऽपि त्यजन् गच्छत्यधोगतिम्' ॥

इति—तन्मानसिकसन्ध्याऽभिप्रायम् । यतस्तेनैवोक्तम्—

'सूतके मृतके चैव सन्ध्याकर्म न सन्त्यजेत् ।
मनसोच्चारयेन्मन्त्रान् प्राणायाममृते द्विजाः ॥
एतद्विदित्वा* यः सन्ध्यामुपास्ते संशितव्रतः ।
दीर्घमायुः स विन्देत सर्वपापैः प्रमुच्यते' ॥

इति ।

॥ इति सन्ध्याविधिः ॥

---

* प्रयोगपारिजाते भरद्वाजस्त्वेवमाह—
'सूतके मृतके कुर्यात् प्राणायाममन्त्रकम् ।
तथा मार्जनमन्त्रांस्तु मनसोच्चार्य मार्जयेत् ॥
गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत् ।
मार्जनं तु न वा कार्यमुपस्थानं नचैव हि' ॥ इति ।

---

१. B. C. E. F. H. and I. read सन्ध्यायाः. २. All others except A. D. I. and the text of the Vishṇu Purâṇa read -जीविनः for -भीतितः. ३. Except A. all others omit तु. ४. I. reads पुनस्तेनोक्तम for पुलस्त्येनोक्तम्. ५. A. and G. read सन्ध्यामिष्टिं चरुं होमं. ६. I. reads न तु त्यजेत. ७. Here all other manuscripts except A. and I. read शंसित- for संशित, but both the readings are correct and give good sense. ८. This is omitted by all others except A. and I.

अथ सन्ध्याङ्गजपविधिः । तत्र मनुः—

'आचम्य प्रयतो नित्यमुभे सन्ध्ये समाहितः ।
शुचौ देशे जपन् जप्यमुपासीत यथाविधि ' ॥

इति । कथमित्यपेक्षिते आह शङ्खः—

'कुशबृ[१]स्यां समासीनः कुशोत्तरीयां[२] वा कुशपवित्रपाणिः उदङ्मुखः[३] सूर्याभिमुखो वा ऽक्षमालामादाय देवतां ध्यायन् जपं कुर्यात्' ।

इति । व्यासो ऽपि—

'प्रणव-व्याहृतियुतां[४] गायत्रीं च जपेत्ततः' ।

इति । योगियाज्ञवल्क्यस्तु अन्ते ऽपि प्रणवयोगार्थमाह—

'ॐकारं पूर्वमुच्चार्य भूर्भुवः-स्वस्तथैव च ।
गायत्रीं प्रणवं चान्ते जप एवमुदाहृतः' ॥

इति । बौधायनो ऽपि—

'उभयतः प्रणवां सव्याहृतिकां जपेत्' ।

इति । नृसिंहपुराणे[५] जपयज्ञस्य भेदो ऽभिहितः—

'त्रिविधो जपयज्ञः स्यात्तस्य भेदं निबोधत ।
वाचिकश्च उपांशुश्च मानसस्त्रिविधः[६] स्मृतः ॥

१. B. C. F. and I. read -बृष्यां; while D. E. G. and H. बृश्यां. २. I. reads कुशोत्तरायाम्. ३. All others except A. and D. omit उदङ्मुख, but the next वा shows its necessity here. ४. D. reads युतां. ५. D. reads नृसिंहपुराणेऽपि जपहोमभेदो विहितः. ६. In the Narsinha Purâṇa the portion from Adhyâya 57, verse 7, to Adhyaya 61, verse 14, treats of the conversation between Hârîta and several other Rishis. We have got a manuscript called the Laghu Hârîta Smriti which corresponds to the said conversation. The Laghu Hârîta Smriti reads तत्त्वं for भेदं and reads मानसश्च त्रिधा कृतिः । त्रयाणामपि यज्ञानां श्रेष्ठः स्यादुत्तरोत्तरः.

त्रयाणां जपयज्ञानां श्रेयान् स्यादुत्तरोत्तरः' ॥
(नृ.पु ५८.७८-७९; ल. हा. स्मृ. ४.४०-४१.)

इति । वाचिकोपांशुत्वयोर्लक्षणं पुराणेऽभिहितम्—

'यदुच्चनीचोच्चरितैः शब्दैः स्पष्टपदाक्षरैः ।
मन्त्रमुच्चारयेद्वाचा वाचिकोऽयं जपः स्मृतः ॥
शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयन् ।
अपरैरश्रुतः किञ्चित् स उपांशुजपः स्मृतः' ॥
(नृ. पु. ५८.८०-८१; ल. हा. स्मृ. ४.४२-४३)

इति । विश्वामित्रेण मानसस्य लक्षणमुक्तम्—

'धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम् ।
शब्दार्थचिन्तनं भूयः कथ्यते मानसो जपः' ॥
(नृ. पु. ५८.८२; ल. हा. स्मृ. ४.४४.)

इति । त्रयाणां तारतम्यं च तेनैवोक्तम्—

---

१. I. reads श्रेयः स्यात् for श्रेयान् स्यात्. २. Here all manuscript except A. read -स्वरितैः, which is the proper word. ३. The Nrisinha Purâṇa reads शब्दमुच्चारयेद्वाचा जपयज्ञः स वाचिकः, and the Laghu Hârîta मन्त्रमुच्चारयन् वाचा जपयज्ञस्तु वाचिकः. ४. The Laghu Hârîta reads किञ्चिदोष्ठौ प्रचालयेत् and किञ्चिच्छ्रवणयोग्यः स्यात् स उपांशुर्जपः स्मृतः, and the Nrisinha Purâṇa reads किञ्चिन्मन्त्रं स्वयं विद्यात् उपांशुः स जपः स्मृतः. ५. G. reads प्रचालयेत. ६. D. reads धियायदक्षरं; while I. reads ध्यायेत् यदक्षर-. We find this verse in the Narsinha Purâṇa. It reads—

धिया यदक्षरश्रेण्यां वर्णाद्वर्णं पदात् पदम् ।
शब्दार्थचिन्तनं ध्यानं तदुक्तं मानसं जपः ॥

and Laghu Hârîta reads—

धिया पदाक्षरश्रेण्या अवर्णमपदाक्षरम ।
शब्दार्थचिंतनाभ्यां तु स उक्तो मानसो जपः ॥

७. D. omits च.

'उत्तमं मानसं जप्यमुपांशु मध्यमं स्मृतम् ।
अधमं वाचिकं प्राहुः सर्वमन्त्रेषु वै द्विजाः ॥
वाचिकस्यैकमेकं स्यादुपांशु शतमुच्यते ।
सहस्रं मानसः प्रोक्तो मन्वत्रि-भृगु-नारदैः' ॥

इति । जपनियममाह शौनकः—

'कृत्वोत्तानौ करौ प्रातः सायं चाधोमुखौ तथा ।
मध्ये स्कंध-कराभ्यां तु जप एवमुदाहृतः ॥
मनःसन्तोषणं शौचं मौनं मन्त्रार्थचिन्तनम् ।
अव्यग्रत्वमनिर्वेदो जपसम्पत्तिहेतवः' ॥

इति । मनुरपि—

'पूर्वां सन्ध्यां जपंस्तिष्ठेत् सावित्रीमार्कदर्शनात् ।
पश्चिमां तु समासीनः सम्यगृक्षविभावनात्' ॥

(म. स्मृ. २. १०१)

इति । मध्याह्ने जपस्य नियमः वायुपुराणे दर्शितः —

'तथा मध्याह्नसन्ध्यायामासीनः प्राङ्मुखो जपेत्' ॥

इति । वर्ज्यानाह व्यासः—

---

१. D. reads उपांशुर्मध्यमः स्मृतः. and for the same I. reads उपांशुं मध्यमं स्मृतम् which seems to be incorrect. २. I. reads उपांशु. ३. I. reads साहस्रो मानसः. ४. F. and G. substitute वा for चा. ५. All others except A. and I. substitute ततः for तथा. ६. I. reads through mistake स्तम्ब-कराभ्यां. ७. B. C. E. F. and G. read सम्यगार्क्षविभावनात्. and H. सम्यगर्क्षविभावनात्. ८. B. C. D. E. F. and G. read मध्याह्न-जपस्य. ९. All others except A. and I. omit वायु-, and read only पुराणे for वायुपुराणे. १०. B. C. E. F. and H. read तथा च मध्यसन्ध्यायाम्, while G. reads तथा मध्यमसन्ध्यायाम्.

'न संक्रामन् न च हसन् न पार्श्वमवलोकयन् ।
नापाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा ॥
न पदा पादमाक्रम्य न चैव हि तथा करौ ।
न चासमाहितमना न च संश्रावयन् जपेत्' ॥

इति । बौधायनोऽपि–

'नाभेरधः संस्पर्शं कर्मसंयुक्तो वर्जयेत्' ।

(बौ. स्मृ. १. ५, १८)

इति । व्यासोऽपि–

'जपकाले न भाषेत व्रत-होमादिकेषु च ।
एतेष्वेवावसक्तस्तु यद्यागच्छेत् द्विजोत्तमः ॥
अभिवाद्य ततो विप्रं योगक्षेमं च कीर्त्तयेत्' ।

इति । योगियाज्ञवल्क्योऽपि–

'यदि वाग्यमलोपः स्याज्जपादिषु कदाचन ।
व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम्' ॥

इति । संवर्त्तोऽपि–

'लोकवार्त्ताऽऽदिकं श्रुत्वा दृष्ट्वा स्पृष्ट्वा प्रभाषितम् ।
संध्यां विना च यज्जप्तं तत्सर्वं निष्फलं भवेत्' ॥

इति । प्रभाषितं बहुभाषिणं पुरुषमित्यर्थः । गौतमोऽपि–

---

१. D. reads न संक्रमन्, and G. चङ्क्रमन् for न सङ्क्रामन्. २. A. and I. read नायासितो, and G. नापश्रितो. ३. I. reads संस्पर्शनं. ४. D. reads कर्मयुक्तो विवर्जयेत, and G. कर्मयुक्तो हि वर्जयेत. ५. A. omits व्यासोऽपि ६. B. C. F. and G. read यथागच्छन, E. and H. यथाऽऽगच्छन. ७. D. reads विप्राः. ८. H. reads स्पृष्ट्वा दृष्ट्वा. ९. B. C. E. F. and H. read जप्यं. १०. B. C. D. and F. read बहुभाषणं; while G. reads बहुभाषित and all except A. omit -अर्थः. ११. गौतमोऽपि is omitted by D.

'गच्छतस्तिष्ठतो वाऽपि स्वेच्छया कर्म कुर्वतः।
अशुचेर्वा विना संख्यां तत्सर्वं निष्फलं भवेत्॥
क्रोधं लोभं तथा निद्रां निष्ठीवन-विजृम्भणे।
दर्शनं च श्व-नीचानां वर्जयेज्जपकर्मणि॥
आचामेत्संभवे चैषां स्मरेद्विष्णुं सुरार्चितम्।
ज्योतींषि च प्रशंसेद्वा कुर्याद्वा प्राणसंयमम्॥
ज्वलनं गाश्च विप्रांश्च यतीन्वाऽपि विशुद्धये'।

इति। देशनियमस्तु याज्ञवल्क्येनोक्तः—

'अग्न्यागारे जलान्ते वा जपेद्देवालये ऽपि वा।
पुण्यतीर्थे गवां गोष्ठे द्विजक्षेत्रे ऽथ वा गृहे'॥

इति। शङ्खो ऽपि—

'गृहे त्वेकगुणं जप्यं नद्यादौ द्विगुणं स्मृतम्।
गवां गोष्ठे दशगुणमग्न्यागारे शताधिकम्॥
सिद्धक्षेत्रेषु तीर्थेषु देवतायाश्च सन्निधौ।
सहस्र-शत-कोटीनामनन्तं विष्णुसन्निधौ'॥

इति। कूर्मपुराणे ऽपि—

'गुह्यका राक्षसाः सिद्धा हरन्ति प्रसभं यतः।
एकान्ते तु शुभे देशे तस्माज्जप्यं सदाचरेत्'॥
(कू. पु. १. २. १८–८२)

इति। जपसंख्यामाह योगियाज्ञवल्क्यः—

---

१. A. reads क्रोधं मांद्यं क्षुतं for क्रोधं लोभं तथा. २. E. reads विधर्षणम्. A. reads दर्शनं श्वादिनीचानां. ४. D. reads आचमेत्. ५. E. G. and read सिद्धतीर्थेषु क्षेत्रेषु. ६. B. C. F. and the text of Kûrma Purâṇa read समाचरेत्.

'ब्रह्मचार्याहिताग्निश्च शतमष्टोत्तरं जपेत् ।
वानप्रस्थो यतिश्चैव सहस्रादधिकं जपेत्' ॥

इति । [१]स्मृत्यन्तरे—

'दर्शे श्राद्धे प्रदोषे च गायत्रीं दश संख्यया ।
अष्टाविंशत्यनध्याये सुदिने तु यथाक्रमम्' ॥

इति । यमोऽपि—

'सहस्रपरमां देवीं शतमध्यां दशावराम् ।
गायत्रीं तु जपेन्नित्यं सर्वपापप्रणाशिनीम्' ॥
(नृ.पु.५८.८६.ल.हा.स्मृ.४.४८; ल.अ.स्मृ.२.१२.)

इति । आपस्तम्बोऽपि—

'दर्भेष्वासीनो दर्भान् धारयमाणः सोद-
केन पाणिना प्राङ्मुखः सावित्रीं सहस्रकृत्व
आवर्त्तयेच्छतकृत्वोऽपरिमितकृत्वो वा' ॥

इति ।

॥ इति जपविधिः ॥

जपाङ्गभूतामक्षमालामाह हारीतः—

'शङ्खरूप्यमयी माला काञ्चनीभिरथोत्पलैः ।
पद्माक्षकैश्च रुद्राक्षैर्विद्रुमैर्मणि-मौक्तिकैः ॥

---

१. The portion after the end of this line to यमो ऽपि. is omitted by D. २. The portion from स्मृत्यन्तरे to यमोऽपि is omitted by all others except A. and I. ३. G. and I. read -प्रणाशनीम्. ४. A. omits अक्ष- and reads only मालाम्. ५: B. C. and F. read कांचनी स्फटिकोपलैः, D. कांतिनी निबजोत्पलैः, E. कांचिनी वन जोत्पलैः, G. कांचनी वनजोत्पलैः and H., कांचनीं निबजात्पलैः. for कांचनीभिरथोत्पलैः. ६. D. reads पद्माक्षजैः.

रजतेन्द्राक्षकैर्माला तथैवाङ्गुलिपर्वभिः ।
पुत्रजीवमयी माला शस्ता वै जपकर्मणि ' ॥

इति । गौतमोऽपि–

'अङ्गुल्या जपसंख्यानमेकमेकमुदाहृतम् ।
रेखयाऽष्टगुणं पुत्रजीवैर्दशगुणाधिकम् ॥
शतं स्याच्छङ्खमणिभिः प्रवालैश्च सहस्रकम् ।
स्फटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते ॥
पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते ।
कुशग्रन्थ्या च रुद्राक्षैरनन्तफलमुच्यते ' ॥

इति । अथाक्षमालामणिसंख्यामाह प्रजापतिः–

'अष्टोत्तरशतां कुर्याच्चतुःपञ्चाशिकां तथा ।
सप्तविंशतिका कार्या ततो न्यूना न च स्मृता ॥
अष्टोत्तरशता माला उत्तमा सा प्रकीर्तिता ।
चतुःपंचाशिका या तु मध्यमा सा प्रकीर्तिता ॥
अधमा प्रोच्यते नित्यं सप्तविंशतिसंख्यका ' ॥

इति । गौतमोऽपि–

'अङ्गुष्ठं मोक्षदं विद्यात्तर्जनी शत्रुनाशिनी ।
मध्यमा धनकामायाऽनामिका पौष्टिकी तथा ॥

---

१. B. C. E. F. G. and H. read रजतेन्द्राक्षकैः, and I तथा चेन्द्राक्षकैः. २. D. G. and I. read अष्टोत्तरशतं. ३. A. and I. read सप्तविंशतिकां चाथ. ४. All others except A. read ततो नैवाधिका हिता, which contradicts the statement in the following lines. ५. All others except A. and I. read चतुःपंचाशका स्मृता. As we have not got this स्मृति we do not know whether this reading is correct. ६. D. substitutes मता for तथा.

कनिष्ठा रक्षणी प्रोक्ता जपकर्मणि शोभना ।
अङ्गुष्ठेन जपेज्जप्यमन्यैरङ्गुलिभिः सह ॥
अङ्गुष्ठेन विना जप्यं कृतं तदफलं भवेत्' ।

इति । गायत्रीजपं प्रशंसति व्यासः—

'दशकृत्वः प्रजप्ता सा त्र्यहाद्यच्च कृतं खलु ।
तत् पापं प्रणुदत्याशु नात्र कार्या विचारणा ॥
शतजप्ता तु सा देवी पापौघशमनी स्मृता ।
सहस्रजप्ता सा देवी उपपातकनाशिनी ॥
लक्षजाप्येन च तथा महापातकनाशिनी ।
कोटिजाप्येन राजेन्द्र यदिच्छति तदाप्नुयात्' ॥

इति । यमो ऽपि—

'गायत्र्या न परं जप्यं गायत्र्या न परं तपः ।
गायत्र्या न परं ध्यानं गायत्र्या न परं हुतम्' ॥

इति । मनुरपि—

'योऽधीते ऽहन्यहन्येतां त्रीणि वर्षाण्यतन्द्रितः ।
स ब्रह्म परमभ्येति वायुभूतश्च मूर्तिमान्' ॥

(म. स्मृ. २. ८२)

इति । गौतमो ऽपि—

---

१. I. reads जपं, and all others except A. and D. read जपन्. २. D. omits अन्यैरंगुलिभिः सह ॥ अंगुष्ठेन विना जप्यं and reads अंगुष्ठेन जपेज्जप्यं कृतं तदफलं भवेत्. ३. G. reads अहाद्यच्च; while D. reads त्र्यहाद्यत्र, and I. is mistaken throughout. ४. D. reads शतं जप्ता. ५. D. E. G. and H. read पापौघशमना. ६. H. reads -नाशना, and D. E. and G. नाशनी. ७. D. reads लक्षजाप्ये तथा देवी. ८. D. omits अपि and the first line of the next verse. ९. G. reads जाप्यं. १०. All others except C. D. and G. read अतींद्रियः; while I. reads अतन्द्रितः.

'अनेन विधिना नित्यं जपं कुर्यात् प्रयत्नतः ।
प्रसन्नो विपुलान् भोगान् भुक्तिं[1] मुक्तिं च विन्दति'॥

इति[2] ।

॥ इति सन्ध्या-जपयोः प्रकरणम् ॥

अथ होमविधिः । तत्र कूर्मपुराणे—

'अथागम्य गृहं विप्रः समाचम्य यथाविधि ।
प्रज्वाल्य वह्निं विधिवज्जुहुयाज्जातवेदसम्' ॥

(कू.पु.१.२.१८.९०)

इति । दक्षो ऽपि—

'सन्ध्याकर्मावसाने तु स्वयं होमो विधीयते ।
स्वयं होमे फलं यत्स्यात्तदन्येन न लभ्यते ॥
होमे यत् फलमुद्दिष्टं जुह्वतः स्वयमेव तु ।
हूयमाने तदन्येन फलमर्धं प्रपद्यते ॥
ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयो ऽथ विट्पतिः ।
एतैरपि हुतं यत्स्यात्तद्धुतं स्वयमेव हि[3]' ॥

इति । विट्पतिर्जामाता । स्वयं होम एव मुख्यः । तदभावे ऋत्विगादिहोमः । तत्र विशेषः कूर्मपुराणे दर्शितः—

'ऋत्विक् पुत्रो ऽथ वा पत्नी शिष्यो वा ऽपि सहोदरः ।
प्राप्यानुज्ञां विशेषेण जुहुयुर्वा[4] यथाविधि' ॥

(कू.पु.१.२.१८.९१)

इति । होतृतारतम्यं दर्शयति श्रुतिः—

---

१. A. reads परां for भुक्तिं. २. D. omits इति. ३. All others except A. and I. substitute तु for हि. ४. All others except A. and the text of Kûrma Purâṇa read जुहुयाद्वा.

'अन्यैः शतहुताद्धोमादेकः शिष्यहुतो वरः ।
शिष्यैः शतहुताद्धोमादेकः पुत्रहुतो वरः ॥
पुत्रैः शतहुताद्धोमादेको ह्यात्महुतो वरः' ।

इति । ऋत्विगादिहोमे ऽपि यजमानसन्निधानेन भवितव्यम् । तदुक्तं कात्यायनेन—

'असमक्षं तु दम्पत्योर्होतव्यं नर्त्विगादिना ।
द्वयोरप्यसमक्षं तु भवेद्धुतमनर्थकम्' ॥
(का. स्मृ. ३.२०.१)

इति । उभयोः सन्निधानं मुख्यम् । तदभावे त्वेकतरसन्निधानेनापि होतुं शक्यम् । तथा च स एवाह—

'निक्षिप्याग्निं स्वदारेषु परिकल्प्यार्त्विजं तथा ।
प्रवसेत् कार्यवान् विप्रो वृथैव न चिरं वसेत्' ॥
(का. स्मृ. २.१९.१)

इति । होमकालो ऽपि तेनैव दर्शितः—

'यावत्सम्यङ् न भाव्यन्ते नभस्यृक्षाणि सर्वतः ।
लोहितत्वं च नापैति तावत् सायं तु हूयते' ॥
(का. स्मृ. १.९.३)

१. All others except A. and I. omit the first line of this verse, and read as follows:—

अन्यैः शतहुताद्धोमादेकः पुत्रहुतो वरम् ।
पुत्रैः शतहुताद्धोमादेको ह्यात्महुतो वरम् ॥

But D. substitutes शिष्यहुतो वरम् for पुत्रहुतो वरम्, and the omitted line appears in the marginal correction of H. २. D. reads यदुक्तं for तदुक्तं ३. A. omits उभयोः सन्निधानं मुख्यं, तदभावे त्वेकतरसन्निधानेनापि होतुं शक्यम् । तथा च स एवाह and reads प्रवासे विशेषमाह स्मृतिः in its stead ४. D. omits च. ५. A. and I. read विभाव्यन्ते for न भाव्यन्ते. ६. The text of Kâtyâyana reads न च लौहित्यमापैति. ७. G. reads जुहूयते, which is incorrect.

इति । आपस्तम्बो ऽपि—

'समुद्रो वा एष यदहोरात्रः तस्यैते
गाधतीर्थे यत्सन्धी तस्मात् सन्धौ
होतव्यम्—इति शैलालिब्राह्मणं
भवति । नक्षत्र दृष्ट्वा प्रदोषे
निशायां वा सायम्' ।

इति । समुद्रत्वेन निरूपितस्याहोरात्रस्य सन्धिद्वयं सुप्र-
शं तीर्थं तस्मात् सन्धिर्होमकालः—इति मुख्यः कल्पः ।
क्षत्रदर्शनादयस्त्रयः कालाः सायंहोमे ऽनुकल्पाः । एकन-
क्षत्रोदयो नक्षत्रदर्शनं, सर्वनक्षत्रोदयः प्रदोषः, निद्राबेला
नेशा। प्रातर्होमकालो ऽपि चतुर्विधस्तेनैव दर्शितः—

'उषस्युषोदयं समयाध्युषिते प्रातः' ।

इति । मनुस्तु प्रथम-द्वितीयावेकीकृत्य कालत्रयमाह—

'उदते ऽनुदिते चैव समयाध्युषिते तथा ।
सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः' ॥
(म. स्मृ. २.१५)

इति । एतेषां लक्षणमाह व्यासः—

'रात्र्यास्तु षोडशे भागे ग्रह-नक्षत्रभूषिते ।
कालें त्वनुदितं प्राहुर्होमं कुर्याद्विचक्षणः ॥

---

१. B. C. E. F. G. and H. read य अहोरात्रस्तस्यैते गाधे तीर्थे यत्सन्धी: while D. omits य and reads अहोरात्रस्तस्यै ते तीर्थे यत्सन्निधि·. २. I. reads कात्यायन- for शैलालि.– ३. D. substitutes च for वा. ४. D. reads वेशं. ५. All the manuscripts show that the following quotation from Vyâsa, but elsewhere it is said to be a quotation from Kât-yana (see Râmchandra's Commentary on Manu, 2. 15). ६. All manuscripts except A. read रात्रेः षोडशमे, which is incorrect. ७. A. reads काले त्वनुदिते प्रातः, I. reads कालं त्वनुदितं प्राहुः, and elsewhere the reading is कालं चानुदितं ज्ञात्वा.

तथा प्रभातसमये नष्टे नक्षत्रमण्डले ।
रविर्यावन्नदृश्येत समयाध्युषितं च तत् ॥
रेखामात्रस्तु दृश्येत रश्मिभिस्तु समन्वितः ।
उदितं तं विजानीयात् तत्र होमं प्रकल्पयेत्' ॥

इति । आश्वलायनस्तु अनुकल्पान्तरमाह—

'आसङ्गवान्तः प्रातः' ।

इति । होमकालः—इत्यनुवर्त्तते । अथवा सर्वे एवैते कालविशेषा यथाशाखं मुख्यतयैव व्यवतिष्ठन्ते । उदितानुदितहोमवत् । यदा तु कथञ्चिन्मुख्यकालातिक्रमः तदा गोभिलोक्तं द्रष्टव्यम्—

'अथ यदि गृह्येऽग्नौ सायंप्रातर्होमयोर्दर्शपौर्णमासयोर्वा हव्यं होतारं वा नाधिगच्छेत् कथंकुर्यादिति । आसायमाहुतेः प्रातराहुतिर्नात्येत्याप्रातराहुतेः सायमाहुतिः अमावास्यायाः पौर्णमासी नात्येत्यापौर्णमास्यमावास्या' ।

इति । बौधायनोऽपि—

'आ सायं कर्मणः प्रातरा प्रातः सायकर्मणः ।
आहुतिर्नातिपद्येत पार्वणं पार्वणान्तरात्' ॥

इति । आपन्नस्तु पक्षहोमं कुर्यात् । तथा च मरीचिः—

---

१. A. reads तथा च प्रातःसमये, and G. ततः प्रभातसमये. २. D. reads रविर्यावत्तु दृश्येत, which seems incorrect. ३. All others except A. and D. read समयाध्युषितस्तु सः. ४. A. reads रेखामात्रश्च. ५. D. G. and H. read सङ्गवान्तः for आसङ्गवान्तः, and the same I. reads आसङ्गवान्तं. ६. All others except A. and I. read यथासुखं. ७. D. E. G. and H. omit वा. ८. B. C. and F. read हव्यं वा होतारं, वा, D. E. G. and H. हव्यं होतारं नाधिगच्छेत्. ९. All others except A. D. and I. read असायकर्मणः for आ सायं कर्मणः.

'शरीरापद्भवेद् यत्र भयाद्वाऽऽर्त्तिः प्रजायते ।
तथाऽन्यास्वपि चापत्सु पक्षहोमो विधीयते'॥

इति । पक्षहोमिनः तत्पक्षमध्ये आपन्निवृत्तौ तदाप्रभृति पुनर्होमः कर्त्तव्यः । तदाह मरीचिः—

'पक्षहोमानथो कृत्वा गत्वा तस्मात् निवर्त्तिनः ।
होमं पुनः प्रकुर्यात्तु न चासौ दोषभाग्भवेत्' ॥

इति । एवं होममनुतिष्ठतापि सीमोल्लङ्घने कृते पुनराधानं कर्त्तव्यम् । तदाह कात्यायनः—

'विहायाग्निं सभार्यश्चेत् सीमामुल्लंघ्य गच्छति ।
होमकालात्यये तस्य पुनराधानमिष्यते'॥
(का. स्मृ. ३.२०.२.)

इति । होमकालानत्यये तु नास्ति पुनराधानम् । तदाह शौनकः—

'प्रोषिते तु यदा पत्नी यदि ग्रामान्तरं व्रजेत् ।
होमकाले यदि प्राप्ता न सा दोषेण युज्यते' ॥

इति । होमद्रव्यमाह स एव—

'कृतमोदनसक्त्वादि तण्डुलादि कृताकृतम् ।
व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा बुधैः ॥
हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः ।
अभावे व्रीहि-यवयोर्दध्ना वा पयसाऽपि वा ॥

---

१. I. reads होमानुष्ठितावपि, while all others except A. omit अपि. २. D. omits the portion from तु नास्ति to -सक्त्वादि, and reads होमकाला-त्यादि तण्डुलादि कृताकृतम्. ३. A. reads पुनः for यदि. ४. All others except A. and I. substitute तु for च.

तदभावे यवाग्वा वा जुहुयादुदकेन वा ।
यथोक्तवस्त्वसंप्राप्तौ ग्राह्यं तदनुकारि यत्[1] ॥
यवानामिव गोधूमा व्रीहीणामिव शालयः ।
आज्यं हव्यमनादेशे आहुतीषु[2] विधीयते ॥
मन्त्रस्य देवतायास्तु प्रजापतिरिति स्थितिः ।

इति । आहुतिपरिमाणमाह बृहस्पतिः[3]—

'प्रस्थधान्यं चतुः[4]षष्टिराहुतेः परिकीर्त्तितम् ।
तिलानां तु तदर्द्धं स्यात् तदर्द्धं[5] स्याद् घृतस्य तु'॥

इति । बौधायनोऽपि—

'व्रीहीणां वा यवानां वा शतमाहुतिरिष्यते' ।

इति । होमप्रकारः स्वगृह्योक्तविधिना द्रष्टव्यः । तदुक्तं गृह्यपरिशिष्टे—

'स्वगृह्योक्तेन विधिना होमं कुर्याद्यथाविधि'।'

इति । विष्णुरपि[6]—

'बहुशुष्केन्धने चाग्नौ सुसमिद्धे हुताशने ।
विधूमे लेलिहाने च होतव्यं कर्मसिद्धये ॥
योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारे[7] चैव मानवः ।
मन्दाग्निरामयावी च दरिद्रश्चोपजायते' ॥

(का. स्मृ. १.९.१२)

इति । एतच्च ज्ञात्वैवानुष्ठेयम् । अन्यथा दोषश्रवणात् । तदाहाङ्गिराः—

---

१. All others except A. and I. read तदनुसारि च. २. Except A. and G. all others read जुहोतिषु, which is grammatically incorrect. ३. A. and I. read वृद्धबृहस्पतिः. ४. D. reads चतुःषष्ठराहुतेः ५. D. reads घृतस्य तु तदर्धकम्. ६. A. omits विष्णुरपि. ७. D. reads ऽव्यंगारे.

'स्वाभिप्रायकृतं कर्म यत्किञ्चित् ज्ञानवर्जितम्।
क्रीडाकर्मेव बालानां तत्सर्वं निष्प्रयोजनम्' ॥

इति। चतुर्विंशतिमते—

'हतं ज्ञानं क्रियाहीनं हतास्त्वज्ञानिनः क्रियाः।
अपश्यन्नन्धको दग्धः पश्यन्नपि च पङ्गुलः' ॥

इति। श्रौत-स्मार्त्तयोरग्निव्यवस्थामाह याज्ञवल्क्यः—

'कर्म स्मार्त्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही।
दायकालाहृते वाऽपि श्रौतं वैतानिकाग्निषु' ॥
(या. स्मृ. १.९७)

इति। वैतानिका गार्हपत्यादयः। यस्य पुनःश्रौत-स्मार्त्ता-ग्निद्वयं तस्यानुष्ठानप्रकारमाह भरद्वाजः—

'होमं वैतानिकं कृत्वा स्मार्त्तं कुर्याद्विचक्षणः।
स्मृतीनां वेदमूलत्वात् स्मार्त्तं केचित् पुरा विदुः' ॥

इति। शातातपोऽपि—

'श्रौतं यत् तत् स्वयं कुर्यादन्योऽपि स्मार्त्तमाचरेत्।
अशक्तौ श्रौतमप्यन्यः कुर्यादाचारमन्ततः' ॥

इति। उक्तस्याग्नेर्नित्यतामाह गर्गः—

'कृतदारो नैवं तिष्ठेत् क्षणमप्यग्निना विना।
तिष्ठेत चेद्द्विजो व्रात्यस्तथा च पतितो भवेत्' ॥

---

१. A. reads -कर्म च. २. I. reads अज्ञानतः. ३. I. reads पङ्गुकः. A. and I. read श्रौत-स्मार्तयोरपि for श्रौत-स्मार्तयोरग्नि-, and E. omits the portion from श्रौत-स्मार्त-....... to स्मार्ताग्निद्वयं, and D. is mistaken throughout. ५. A. reads -व्यवस्था- for -प्रकार-. ६. All others except A. and I. read श्रौतं यत् स्यात्. ७. All others except A. and I. read न वै for नैव.

'यथा स्नानं यथा भार्या वेदस्याध्ययनं यथा ।
तथैवोपासनं दृष्टं नोऽऽतिष्ठेत्तद्वियोगतः' ॥

इति । सत्यां वैदिकानुष्ठानशक्तौ न स्मार्त्तमात्रेण परितुष्येत् । तदाह स एव—

'यो वैदिकमनादृत्य कर्म स्मार्त्तैतिहासिकम् ।
मोहात् समाचरेद्विप्रो न स पुण्येन युज्यते ॥
प्रधानं वैदिकं कर्म गुणभूतं तथेतरत् ।
गुणनिष्ठः प्रधानं तु हित्वा गच्छत्यधोगतिम्'॥

इति । अशक्तं प्रति व्यास आह—

'श्रौतं कर्तुं न चेच्छक्तः कर्म स्मार्त्तं समाचरेत् ।
तत्राप्यशक्तः करणे सदाचारं लभेद्बुधः' ॥

इति । होमं प्रशंसत्यङ्गिराः—

'यो दद्यात् काञ्चनं मेरुं पृथिवीं च ससागराम् ।
तत् सायं प्रातर्होमस्य तुल्यं भवति वा न वा' ॥

इति । होमान्ते भस्म धार्यम् । तदाह बृहस्पतिः—

'नर्यं भस्माग्निहोत्रान्ते धार्यमेवाग्निहोत्रिभिः ।
अनाहिताग्नेर्ब्रह्माख्यमौपासनसमुद्भवम्' ॥

इति । 'हुत्वा चैव तु भस्मना' इत्यादि स्मृत्यन्तरं च ।

॥ इति होमप्रकरणम् ॥

---

१. All others except A. and D. read न तिष्ठेत्तद्वियोगतः. २. I. reads सत्यामपि. ३. I. reads परितुष्येत. ४. All others except A. and I. read स्मार्तैतिहासिकम्. ५. I. reads श्रोतुं कर्तुं न चेच्छक्तः कर्म. ६. All others except A. and I. read अथाप्यशक्तः. ७. A. and I. read सायंप्रातर्होमस्य. The metre of the verse according to our reading is not observed, but it is not of much importance. ८. The portion from होमान्ते to स्मृत्यन्तरं च is omitted by all others except A. and I.

तदेवं 'सन्ध्या स्नानं जपो होमः'– इत्यस्मिन्मूल-वचने होमान्तानि कर्माणि निरूपितानि । तान्येतान्यष्टधा विभक्तस्य दिनस्य प्रथमभागे समापनीयानि । यद्यपि मध्याह्न-स्नानादीनि निरूपितानि तथापि तेषां प्रातःस्नानादिप्रसङ्गेन निरूपितत्वात् आद्यभागे न कर्त्तव्यता । दिवसस्याष्टधा विभागं तत्र कर्त्तव्यविशेषं च दक्षो दर्शयति–

'दिवसस्याद्यभागे तु कृत्यं तस्योपदिश्यते ।
द्वितीये च तृतीये च चतुर्थे पञ्चमे तथा ॥
षष्ठे च सप्तमे चैव अष्टमे च पृथक् पृथक् ।
विभागेष्वेषु यत् कर्म तत् प्रवक्ष्याम्यशेषतः' ॥
(द. स्मृ. २. ३–४)

त्यादिना ।

अथ मूलवचनानुसारेण देवतापूजनं वक्तव्यम् । तच्च पूजनं प्रातर्होमानन्तरम्–इति केचित् । तदाह मरीचिः–

'विधाय देवतापूजां प्रातर्होमादनन्तरम्'।

इति ।

---

१. D. omits दिनस्य. २. A. reads -नाभिहितत्वात्; while all others except D. read निरूपितानां. ३. All others except A. D. and H. omit दक्षः, but the following quotation we find in the Daksha Smriti. If the word दक्ष is omitted, the two verses in the quotation would appear to have been from the Parâshar Smriti, but we do not find the same in that Smriti. ४. B. C. E. G. and H. read दिवसस्याष्टभागे, but it seems incorrect. ५. All others except A. and I. read विभागेष्वेव for विभागेष्वेषु. ६. D. and I. read कर्त्तव्यम्, which is quite useless. ७. I. reads तथा च for तदाह; while D. omits the following—केचित् तदाह मरीचिः—

'विधाय देवतापूजां प्रातर्होमादनन्तरम् । इति.'

ब्रह्मयज्ञजपानन्तरम्—इत्यन्ये । तथा च हारीतः—

'कुर्वीत देवतापूजां जपयज्ञादनन्तरम्' ।

इति । कूर्मपुराणे ऽपि—

'निष्पीड्य स्नानवस्त्रं वै समाचम्य च वाग्यतः ।
स्वैर्मन्त्रैरर्चयेद्देवान् पत्रैः पुष्पैस्तथाऽम्बुभिः' ॥
(कू. पु. १.२.१८.१०)

इति । तत्र वयं जपयज्ञानन्तरं देवपूजां निरूपयिष्यामः। प्रातर्होमादनन्तरभावीनि ब्रह्मयज्ञान्तानि मूलवचनानुक्तान्यप्याह्निक क्रमप्राप्तत्वात्तान्युच्यन्ते । होमानन्तरकृत्यमाह दक्षः—

'देवकार्यं ततः कृत्वा गुरु-मङ्गलवीक्षणम्' ॥
(द. स्मृ. २. २३)

इति । मङ्गलमादर्शादि । तदुक्तं मत्स्यपुराणे—

'रोचनां चन्दनं हेम मृदङ्गं दर्पणं मणिम् ।
गुरुमग्निं च सूर्यं च प्रातः पश्येत् सदा बुधः' ॥

इति । विष्णुपुराणे ऽपि—

'स्वाचान्तश्च ततः कुर्यात् पुमान् केशप्रसाधनम् ।
आदर्शाञ्जन-माङ्गल्य-दूर्वाद्यालम्भनानि च ' ॥
(वि. पु. ३.११.२१)

---

१. D. reahs

निष्पीड्य स्नानवस्त्राणि समाचम्य च वाग्यतः ।
देवतां पूजयेद्धूपैर्मन्त्रैः पुष्पैस्तथाम्बुभिः ॥.

२. I. reads ततः for तत्र, and B. C. F. and I. omit वयं. ३. D. and I. read होमानन्तरभाविनि. ४. D. reads आह्निककर्मत्वेन प्राप्तत्वात्. ५. C. and F. read कूर्मपुराणे; while B. D. E. G. and H. read only पुराणे. ६. B. C. and F. read रोचना; while I. reads रोचनं. ७. The text of Vishṇu Purâṇa reads आचांतश्च. ८. B. C. and F. read आदर्शाजिन-. ९. C. D. and G. read -पूर्वाद्या-, which appears probably to be a mistake.

इति। ब्रह्मपुराणे ऽपि[1]–

'स्वमात्मानं[2] तु घृते पश्येद्यदीच्छेच्चिरजीवितम्'।

इति। नारदो ऽपि–

'लोके ऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः।
हिरण्यं सर्पिरादित्य आपो राजा तथाऽष्टमः॥
एतानि सततं पश्येत् नमस्येदर्चयेच्च[3] यः।
प्रदक्षिणं च कुर्वीत तथा ह्यायुर्न हीयते[4]'॥

(ना. स्मृ. १७.५४-५५)

इति। मनुरपि–

'अग्निचित् कपिला सत्री राजा भिक्षुर्महोदधिः।
दृष्टमात्राः पुनन्त्येते तस्मात् पश्येत नित्यशः'।

इति। वामनपुराणे ऽपि–

'होमं च कृत्वाऽऽलभनं शुभानां
ततो[5] बहिर्निर्गमनं प्रशस्तम्।
दूर्वां[6] च सर्पिर्दधि सोदकुम्भम्
धेनुं सवत्सां वृषभं सुवर्णम्॥
मृद्गोमयं स्वस्तिकमक्षतांश्च
तैलं[7] मधु ब्राह्मणकन्यकां[8] च।

१. H. and I. omits अपि. २. H. reads स्वात्मानं च, and G. वात्मानं तु. ३. The text of Nârada reads -दर्चयेत्स्वयम्. ४. B. C. nd F. read तस्य ह्यायुर्न हीयते; while the text of Nârada reads यथा ऽस्यायुः प्रवर्धते, and D. reads तथा ह्यायुर्हि वर्धते. ५. The text of the Vâman Purâṇa reads कृत्वा for ततः, and A. तथा for the same. ६. D. substitutes दुग्धं for दूर्वां, and the text of Vâman Purâṇa दूर्वां दधि सर्पिरथोदकुंभम्, and B. C. E. F. G. दूर्वां च सर्पिर्दधि चोदकुंभम्. ७. B C. E. F. G. and H. read चैलं ८. D. reads ब्राह्मणकंचुकां च

श्वेतानि पुष्पाणि तथा शमीं च
हुताशनं चन्दनमर्कबिम्बम् ।
अश्वत्थवृक्षं च समालभेत
ततश्च कुर्यान्निजजातिधर्मम्' ॥

(वा. पु. १४. ३५-३६)

इति । भरद्वाजोऽपि–

'कण्डूय पृष्ठतो[1] गां तु कृत्वा चाश्वत्थवन्दनम् ।
उपगम्य गुरून् सर्वान् विप्रांश्चैवाभिवादयेत्' ॥

इति । ब्राह्मणसमवाये प्रथमं कस्याभिवादनमित्याकाङ्क्षायामाह मनुः–

'लौकिकं वैदिकं वाऽपि तथाऽऽध्यात्मिकमेव च[2] ।
आददीत यतो ज्ञानं तं पूर्वमभिवादयेत्' ॥

(म. स्मृ. २. ११७)

इति । अभिवादनकाले स्वं नाम कीर्त्तयेदित्याह स एव

'अभिवादात् परं विप्रो ज्यायांसमभिवादयन्[3] ।
असौ नामाऽहमस्मीति स्वं नाम परिकीर्त्तयेत् ॥
भोःशब्दं[4] कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने'

(म. स्मृ. २. १२२-२१

---

१. A. reads पृष्ठगां गां तु; while B. C. F. substitute तु in the place o
२. D. E. G. H. and I. substitute वा for च. ३. D. reads
अभिवादन् पुरो विप्रं ज्यायांसमभिवादयेत्.
४. All others except A. omit Visarga and read भोशब्दं.
reads स्वस्वनाम्नाभिवादनम्; while all others except A. and the tex
Manu read स्वस्व for स्वस्य.

इति। 'अभिवादात् परं' इति अभिवादये–इति शब्दमुच्चार्य पश्चादेतन्नामाऽहं भोः– इति शब्दमुच्चारयेदित्यर्थः। अभिवादनप्रकारमाहापस्तम्बः–

'दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणो ऽभिवादयीत। उरःसमं राजन्यो मध्यसमं वैश्यः नीचैः शूद्रः (१६) प्राञ्जलिः'।

(आ. ध. सू. १. २. ५. १६–१७)

इति। एकहस्तेनाभिवादनं निषेधति विष्णुः–

'जन्मप्रभृति यत्किञ्चिच्चेतसा धर्ममाचरेत्।
सर्वं तन्निष्फलं याति ह्येकहस्ताभिवादनात्'॥

(म. स्मृ. २. ११८)

इति। एतच्च प्रत्युत्थाय कर्त्तव्यम्। तदाह मनुः–

'ऊर्ध्वं प्राणाह्युत्क्रामन्ति यूनः स्थविर आगते।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते'॥

(म. स्मृ. २. १२०)

इति। अभिवादितेन वक्तव्यामाशिषमाह स एव–

---

१. I. reads अभिवादयेत्. २. This verse is found in Manu, but three of the seven commentators on Manu has commented it. ३. Here our reading follows only A.; while all others read आपस्तम्बः for मनुः. We made a search for the verse in the Âpas-tamba Dharma Sûtra and Smṛiti, but we have not found it therein. ४. Here all others except A. read मनुः for स एव, but if the above quotation from Manu then there is no necessity of the word मनुः here.

'आयुष्मान् भव सौम्येति वाच्यो विप्रो ऽभिवादने।
अकारश्चास्य नाम्नो ऽन्ते वाच्यः पूर्वाक्षरः प्लुतः' ॥
(म. स्मृ. २. १२५)

इति। पूर्वमक्षरं यस्यासौ पूर्वाक्षरः। पूर्वमक्षरं च सामर्थ्यात् व्यञ्जनम्। स्वराणां स्वरपूर्वकत्वासम्भवात्। ततश्च अभिवादकनामगतो व्यंजननिष्ठो ऽन्तिमस्वरः प्लावनीयः। अकारेणान्तिमस्वरमात्रमुपलक्ष्यते। अशेषनाम्नामकारान्तत्वासम्भवात्। तथा च सति एवं प्रयोगो भवति, आयुष्मान् भव सौम्य देवदत्ता३-इति। यस्तु प्रत्याभिवादनप्रकारं न जानाति स नाभिवाद्य इत्याह स एव-

'यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम्।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः' ॥
(म. स्मृ. २. १२६)

इति। यस्तु जानन्नपि न प्रत्यभिवादनं करोति तस्य दोषो भविष्यत्पुराणे दर्शितः-

'अभिवादे कृते यस्तु न करोत्यभिवादनम्।
आशिषं वा कुरुश्रेष्ठ स याति नरकान् बहून्' ॥

इति। यमो ऽपि-

१. All others read आकार- except A. I. and the text of मनु. Th reading appears better, but the commentators of Manu do not acce it. २. D. and G. read पूर्वाक्षरप्लुतः. ३. I. reads नामस्य- for सामर्थ्यात् ४. All others except A. and I. read आकारेण. ५. The interm diate portion between अशेषनाम्नामका-, and स्वयं पश्चाच्छ्राव्यं कलाभृ (P. 325, L. 18) appears to be omitted in D. through writer's mistak

'अभिवादे तु यः पूर्वमाशिषं न प्रयच्छति।
यद्दुष्कृतं भवेदस्य तस्माद्भागं प्रपद्यते॥
तस्मात् पूर्वाभिभाषी स्याच्चण्डालस्यापि धर्मवित्।
सुरां पिबेति वक्तव्यमेवं धर्मो न हीयते॥
स्वस्तीति ब्राह्मणो ब्रूयादायुष्मानिति भूमिपः।
वर्धतामिति वैश्यस्तु शूद्रस्तु स्वागतं वदेत्'॥

इति। मनुरपि—

'ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च॥ (१२७)
परपत्नी तु या स्त्री स्यादसम्बन्धा च योनितः।
तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति च'॥ (१२९)
(म. स्मृ. २. १२७-१२९)

इति। 'ज्यायांसमभिवादयेत्' (म. स्मृ. २. १२२) इत्युक्तं त्र कियता कालेन ज्यायस्त्वमित्यपेक्षिते आह आपस्तम्बः—

'त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमर्हति'।
(आ. ध. सू. १. ४. १४. १३)

इति। मनुरपि—

'दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृताम्।
त्र्यब्दपूर्वं श्रोत्रियाणामल्पेनापि स्वयोनिषु'॥
(म. स्मृ. २.१३५)

---

१. F. reads भवेत्तस्य: while G. reads भवेद्यस्य. २. B. C. and F. read प्रत्यभिभाषी for पूर्वाभिभाषी. ३. E. reads सुरां पिबेति. ४. A. reads ब्राह्मणं for ब्राह्मणः, and I. reads the whole verse as follows:—

स्वस्तीति ब्राह्मणे ब्रूयात् आयुष्मानिति राजनि।
धनवानिति वैश्ये तु शूद्रे त्वारोग्यमेव च॥.

५. H. omits this word. ६. G. reads -सख्यं. ७. E. and G. read अब्दपूर्वं. ८. The text of Manu reads स्वल्पेनापि, and G. H. read मध्येनापि.

इति। समानपुरवासिनां दशभिः वर्षैः पूर्वः सखा भवति। ततोऽधिको ज्यायान्। कलाभृतां गीतादिविद्यावतां पञ्चाब्द-पूर्वःसखा। श्रोत्रियाणां वेदाध्यायिनां त्र्यब्दपूर्वः सखा भवति। ततोऽधिको ज्यायान्। स्वयोनिषु भ्रात्रादिषु सर्वेषु स्वल्पेनापि वयसा पूर्वः सखा भवति। ततोऽधिको ज्यायानित्यर्थः।

ननु—'एते मान्याः' (या. स्मृ. १. ३९) इत्यृत्विगादीनां याज्ञवल्क्येन पूज्यत्वाभिधानाद् यवीयसामपि तेषामभिवादनं प्राप्तं—इति चेत्। तन्न। प्रत्युत्थान-सम्भाषणाभ्यां मान्यत्वसिद्धेः। अत एव तेषामनभिवाद्यत्वमाह गौतमः—

'ऋत्विक्-श्वशुर-पितृव्य-मातुलानां
तु यवीयसां प्रत्युत्थानाभिवादनम्'।

(गौ. स्मृ. ६. ४)

इति। अभिवादनं अभिभाषणम्। यथा च बौधायनः—

'ऋत्विक्-श्वशुर-पितृव्य-मातुलानां तु
यवीयसां प्रत्युत्थानाभिभाषणम्'।

(बौ. स्मृ. १. २. ३. ४९)

---

१. H. omits कलाभृतां गीतादिविद्यावतां पंचाब्दपूर्वः सखा। श्रोत्रियाणां वेदाध्यायिनां त्र्यब्दपूर्वः सखा भवति। ततो ऽधिको ज्यायान्. This appears to be omitted through writer's mistake. २. I. omits गीतादि-. ३. G. and I. read -मभिवाद्यत्व-for -मनभिवाद्यत्व-. ४. D. and G., omit तु. ५. D. reads प्रत्युत्थानाभिभाषणम. This reading is better, and if the same is taken there seems no necessity of the author's definition which he further gives of the word अभिवादनं. The text of Gautama reads प्रत्युत्थानमनभिवाद्याः. ६. I. reads तथा and omits च; while all others except A. read तदाह for यथा च. D. omits the whole quotation from तथा च............ to अभिभाषणम्। इति ।.

इति। एतच्च ब्राह्मणविषयम्। तथा च शातातपः—

'अभिवाद्यो नमस्कार्यः शिरसा वन्द्य एव च।
ब्राह्मणः क्षत्रियाद्यैस्तु श्रीकामैः सादरं सदा॥
नाभिवाद्यास्तु विप्रेण क्षत्रियाद्याः कथञ्चन।
ज्ञान-कर्म-गुणोपेता यद्यप्येते बहुश्रुताः॥
अभिवाद्य द्विजः शूद्रं सचैलं स्नानमाचरेत्।
ब्राह्मणानां शतं सम्यगभिवाद्य विशुद्ध्यति'॥

इति। विष्णुरपि—

'सभासु चैव सर्वासु यज्ञे राजगृहेषु च।
नमस्कारं प्रकुर्वीत ब्राह्मणान्नाभिवादयेत्'॥

इति। गुर्वादौ तूपसंग्रहणमाह गौतमः—

'गुरोः पादोपसंग्रहणं प्रातः'।

(गौ. स्मृ. १. ११)

इति। गुरुरत्राचार्यः। यतः स एवाह—

'मातृ-पितृ-तद्बन्धूनां पूर्वजानां विद्यागुरूणां तद्गुरूणां च'।

(गौ. स्मृ. १. १९)

इति। उपसङ्ग्रहणलक्षणं मनुराह—

'व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः'॥

(म. स्मृ. २, ७२)

---

१. D. reads सर्वशः शुभा. २. H. and I. read गुर्वादेरुपसंग्रहणम्. ३. I. reads पूर्वजातानां.

इति । गुरोः सव्य-दक्षिणौ पादौ स्वकीयसव्य-दक्षिणाभ्यां पाणिभ्यां[1] स्प्रष्टव्यौ इत्यर्थः । बौधायनोऽपि—

'श्रोत्रे[2] संस्पृश्य मनः समाधायाधस्ताज्जान्वोरा पद्भ्याम्[4]' ।

(बौ. स्मृ. १. २. ३. २७)

इति । उपसंग्रहणं कुर्यादिति शेषः । एतच्च गुरुपत्नीनामपि कार्यम् । तथा च मनुः—

' गुरुवत् प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः ।
असवर्णास्तु सम्पूज्याः प्रत्युत्थानाभिभाषणैः ॥ (२१०)
भ्रातृभार्योपसंग्राह्या सवर्णाऽहन्यहन्यपि ।
विप्रोष्य तूपसंग्राह्या ज्ञाति-सम्बन्धियोषितः ॥ (१३२)

(म. स्मृ. २. १३२–२१०)

इति । एवमविशेषेणोपसंग्रहणे प्राप्ते क्वचिदपवादमाह स एव

'गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः ।
पूर्णविंशतिवर्षेण गुण-दोषौ विजानता । (२१२)
अभ्यञ्जनं स्नापनं च गात्रोद्वर्त्तनमेव च ।
गुरुपत्न्या न कार्याणि केशानां च प्रसाधनम् । (२११)

(म. स्मृ. २. २११–२१२)

इति । किं तर्हि तत्र कर्त्तव्यमित्यपेक्षिते स एवाह—

---

१. पाणिभ्यां is omitted by all others except A. and
२. D. reads श्रोत्रं for श्रोत्रे. ३. The text of Baudhâyana (edite by E. Hultzsch) reads मनःसमाधानार्थम्, but this is a mistake, neith the commentator on the text does allow this reading nor ot manuscripts follow it. ४. B. C. and F. read -रापीड्यम्. Here I. quite mistaken in adding the word उपसंग्रहणम् to the quotation Baudhâyana. ५. I. reads गात्रोत्सादन-, but except A. all others re गात्रोद्वाहन-. ६. D. reads प्रकाशनम्.

'कामं तु गुरुपत्नीनां युवतीनां युवा भुवि।
विधिवद्वन्दनं कुर्यादसावहमिति ब्रुवन्॥
विप्रोष्य[1] पादग्रहणमन्वहं चाभिवादनम्।
गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन्'॥
(म. स्मृ. २. २१६-२१७)

इति। अभिवादने वर्ज्यानाह आपस्तम्बः—
'न सोपानद्वेष्टितशिरा अनवहित[2]पाणिर्वाऽभिवादयीत'[3]।
(आ. ध. सू. १. ४. १४. २२)

इति। शङ्खोऽपि—
'नोदकुम्भहस्तोऽभिवादयेत् न[4] भैक्ष्यं चरन्न पुष्पान्नहस्तो नाशुचिः[5] न जपन्न देव-पितृ-कार्यं कुर्वन् न शयानः'[6]।

इति। आपस्तम्बोऽपि—
'तथा विषमगतायाऽगुरवे[7] नाभिवाद्यम्। (१८)
तथा अप्रयताय। (१९) अप्रयतश्च न प्रत्यभिवदेत्[8]। (२०) प्रतिवयसः[9] स्त्रियः'। (२१)
(आ. ध. सू. १. ४. १८-२१)

---

१. G. reads विप्रोऽप्यपादग्रहणम्. २. A. and D. read अवहित-. ३. C. and F. read अभिवादयते. ४. All others except A. and I. omit न. ५. D. reads रक्तपुष्पो न हस्तेनाशुचिम् for न पुष्पान्नहस्तो नाशुचि. ६. G. omits through mistake—

'न देव-पितृकार्यं कुर्वन् न शयान.'—इति। आपस्तम्बोऽपि—'तथा विषम-गताया ऽगुरवे नभिवाद्यम्। (१८) तथाऽप्रयताय। (१९) अप्रयतश्च न प्रत्यभिवदेत्। (२०) प्रतिवयसः—।.

७. Except all others read विषमगताय गुरवे, but we follow the text of Apastamba Dharma Sûtra. ८. All others except A. D. and the text of Apastamba Dharma Sûtra read प्रत्यभिवादयेत्. ९. D. reads पतिः सवयस स्त्रियः, and the text of Apastamba Dharma Sûtra (edited by G. Buhler) reads पतिवयसः.

इति । तथा ऽन्यत्र स एवाह—

'समित्-पुष्प-कुशा-ऽग्न्यम्बु-मृदन्नाऽक्षतपाणिकः[1] ।
जपं होमं च कुर्वाणो नाभिवाद्यस्तथा द्विजः[2] ॥
पाषण्डं पतितं व्रात्यं[3] महापातकिनं शठम्[4] ।
नास्तिकं च कृतघ्नं च नाभिवादेत् कथञ्चन ॥
धावन्तं च प्रमत्तं च मूत्रोच्चारकृतं तथा ।
भुञ्जानमातुरं नार्हं[6] नाभिवादेत्[5] द्विजोत्तमः ॥
वमन्तं[8] जृम्भमाणं च कुर्वन्तं दन्तधावनम् ।
अभ्यक्तशिरसं चैव स्नास्यन्तं नाभिवादयेत्[7] ॥
स्रुक्-पाणिकमविज्ञात[9]मशक्तं रिपुमातुरम् ।
योगिनं च तपःसक्तं कनिष्ठं नाभिवादयेत्' ॥

इति । शातातपो ऽपि—

'उदक्यां सूतिकां नारीं भर्तृघ्नीं गर्भघातिनीम्[10] ।
अभिवाद्य द्विजो मोहादहोरात्रेण[11] शुध्यति' ॥

इति । 'गुरोः पादोपसंग्रहणं' इत्युक्तं तत्र कीदृशो गुरित्याशङ्कायामाह मनुः—

---

१. I. reads -मृदन्नाक्षत-, but it does not give good sense. G. re -मृदन्नोक्षित- which is quite incorrect. २. All others except A. इति after द्विजः. ३. E. reads कात्स्यं. ४. D. reads उपपातकिनं for महापातकिनं शठम्, and E. substitutes शवम् for शठम्. ५. I. re नाभिवाद्यात् which is grammatically incorrect. ६. D. substitutes च in the place of नार्हं. ७. I. reads नाभिवाद्यात्. ८. B. C. F. and H. read उन्मत्तं जृम्भमाणं च; while E. reads उन्मत्तं क्षपणं ९. B. C. D. E. F. G. and H. read -ममाज्ञातं for -मविज्ञातं. १०. reads ब्रह्मघातिनीम्. ११. Here I. only reads त्रिरात्रेण तु शुध्यति अहोरात्रेण शुध्यति.

'निषेकादीनि कर्माणि यः करोति यथाविधि ।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते' ॥

(म. स्मृ. २. १४२)

इति । याज्ञवल्क्यो ऽपि—

'स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति' ।

(या. स्मृ. १. ३४)

इति । अध्यापनं विप्रविषयम् । निषेकादिकं तु सर्ववर्णसाधारणम् । पितृव्यतिरिक्तानामौपचारिकं गुरुत्वमाह मनुः—

'अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।
तमपीह गुरुं विद्यात् श्रुतोपक्रियया तथा' ॥

(म. स्मृ. २. १४९)

इति । हारीतो ऽपि—

'उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः ।
मातुलः श्वशुरस्त्राता मातामह-पितामहौ ॥
वर्णज्येष्ठः पितृव्यश्च पुंस्वेते गुरवः स्मृताः ।

---

१. D. reads चान्येन, and H. चानेन for चान्नेन. २ इति is omitted by all others except A. ३. I. reads क्रियां, but the text of Yājñavalkya does not follow this reading. ४. H. omits -वर्ण-; while I. reads निषेकादिकन्तुः सर्वसाधारणं which is a mistake of the Editor. ५. From औपचारिकं गुरु- to -सा मातुलानी (P. 332 L. 9) is omitted by E. ६. From तमपीह to मातामह-पितामहौ in the next quotation is omitted by G. ७. From -रुं to ज्येष्ठो भ्राता in the next quotation is omitted by, F. ८ B. and C. read उक्तोपक्रियया; while H. reads श्रुतोपक्रियया. ९. B. C D. E. and H. read तथा for तथा.

माता मातामही गुर्वी पितुर्मातुश्च सोदराः[1] ॥
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरुवत् स्त्रियः[2] ।

इति । अत्र पितृ-मातृग्रहणं तद्वदेते ऽपि मान्याः-इत्येतदर्थम् । अत एवाह स एव—

'अनुवर्त्तनमेतेषां[3] मनोवाक्काय-कर्मभिः' ॥

इति । व्यासो ऽपि—

'मातामहो मातुलश्च पितृव्यः श्वशुरो गुरुः ।
पूर्वजः स्नातकश्चर्त्विङ् मान्यास्ते गुरुवत्सदा ॥
मातृष्वसा मातुलानी श्वश्रूर्धात्री पितृष्वसा ।
पितामही[4] पितृव्यस्त्री गुरुस्त्री मातृवच्चरेत्' ॥

इति । मनुरपि[5]—

'पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्यपि ।
मातृवद्वृत्तिमातिष्ठेन्माता[6] ताभ्यो गरीयसी । (१३३)
उपाध्यायान् दशाचार्य[7] आचार्याणां शतं पिता ।
सहस्रं तु पितॄन्[8] माता गौरवेणातिरिच्यते[9]' ॥ (१४५)

(म. स्मृ. २. १३३-१४५)

इति । यत्तु—

---

१. I. reads सहोदराः for च सोदराः. २. B. C. D. F. G. H. and I. read गुरवः स्त्रियाम् ३. The portion from अनुवर्त्तनमेतेषां to गुरुवत्सदा in the next quotation is omitted by B. C. and F. ४. A. and D. read मातामही for पितामही. ५. D. omits मनुरपि. ६. G. reads वृत्तमातिष्ठन. ७. B. C. E. F. and H. read उपाध्यायाद्दशाचार्यः; while D. and G. read उपाध्यायाद्दशाचार्याः. ८. Here our reading follows A. and the text of Manu, but all others read पितुर्माता. ९. H. reads गौरवेभ्योऽतिरिच्यते.

'द्वौ गुरू पुरुषस्येह पिता माता च धर्मतः।
धेरा गुरुतरा तावन्माता गुरुतरा ततः॥
तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात्।
अभावे बीजिनो माता तदभावे तु पूर्वजः'॥

इति पुराणवचनं तन्निषेकादिसमस्तसंस्कारपूर्वकाध्यापकपि-
तृविषयम्। अन्यथा 'मातैव गरीयसी' इति वचनं विरुध्येत्।
तस्या गरीयस्त्वमुपपादयति व्यासः–

'मासान् दशोदरस्थं या धृत्वा शूलैः समाकुला।
वेदनाविविधैर्दुःखैः प्रसूयेत विमूर्च्छिता।
प्राणैरपि प्रियान् पुत्रान् मन्यते सुतवत्सला।
कस्तस्यानिष्कृतिं कर्तुं शक्तो वर्षशतैरपि'॥

इति। 'उपाध्यायान् दशाचार्यः'–इति यदुक्तं तत्रोपा-
ध्यायाचार्ययोर्लक्षणमाह मनुः–

'एकदेशं तु वेदस्य वेदाङ्गान्यथ वा पुनः।
यो ऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते॥(१४१)
उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते'॥ (१४०)

(म. स्मृ. २. १४१–१४०)

इति। आचार्यो ऽपि पितृ-मात्राद्यपेक्षया गरीयानेव। तदाह
स एव–

---

१. I. reads पिता गुरुतरस्तद्वन्माता गुरुतरा तथा, and D. omits the whole line. २. D. omits -समस्त-. ३. B. C. and F. substitute सा for या. ४. I. reads ततोऽपि for वेदना. ५. The text of Manu substitutes अपि for अथ, and D. reads वेदाङ्गस्यापि for वेदाङ्गान्यथ. ६. B. C. E. F. G. and H. substitute च for तु.

'उत्पादक-ब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ।
ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम्' ॥
(म. स्मृ. २. १४६; वि. स्मृ. ३०. ४४)

इति । यस्तु बालोऽपि वृद्धमध्यापयति सोऽपि तस्य गरीयानिति स एवाह—

'बालोऽपि विप्रो वृद्धस्य पिता भवति मन्त्रदः। (१५०)
अध्यापयामास पितृन् शिशुराङ्गिरसः कविः ।
पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ॥ (१५१)
ते तमर्थमपृच्छन्त देवानागतमन्यवः ।
देवाश्चैतान् समेत्योचुर्न्याय्यं वः शिशुरुक्तवान् ॥ (१५२)
अज्ञो भवति वै बालः पिता भवति मन्त्रदः ।
अज्ञं हि बालमित्याहुः पितेत्येव च मन्त्रदम् ॥ (१५३)
न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं यो ऽनूचानः स नो महान्' ॥ (१५४)
(म. स्मृ. २. १५०–१५४)

इति । तथा च विष्णुः—

'बाले समानवयसि अध्यापके गुरुवद्वर्तेत' ।
(वि. स्मृ. २८. ३१)

---

१. D. reads विप्रेभ्यः. २. D. reads अन्विराङ्गिरसः, but the text of Manu does not follow this reading. ३. B. C. D. E. F. and G. read चैनं for चैतान्. ४. B. C. D. E. F. G. and H. read अज्ञो हि बाल इत्याहु पितेत्येव च मन्त्रदः. ५. B. C. D. E. F. and G. read वित्तैः; while I. reads वृत्तेन. ६. From धर्मं to गुरुवद्वर्तितव्यमित्यभिहितं पुराणसारे is omitted by E. ७. The text of Vishṇu Smriti reads बाले समानवयसि चाध्यापके गुरुपुत्रे गुरुवद्वर्तेत. ८. D. reads गुरुवद्वृत्तिः; while I. reads गुरुवद्वर्तितव्यम.

इति। ज्येष्ठेभ्रातर्यपि गुरुवद्वर्त्तितव्यमित्यभिहितं पुराणसारे—

'ज्येष्ठो भ्राता पितृसमो मृते पितरि भृगुग:।
कनिष्ठास्तं नमस्येरन् सर्वे छन्दोनुवर्त्तिन:॥
तमेव चोपजीवेरन् यथैव पितरं तथा'।

इति। मनुरपि—

'पितृवत् पालयेत् पुत्रान् ज्येष्ठो भ्राता यवीयस:।
पुत्रवच्चापि वर्त्तेरन् यथैव पितरं तथा'॥

इति। परमगुरावपि तथैवेत्याह स एव—

'गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्'।
(म. स्मृ. २. २०५)

इति। आचार्यानुज्ञामन्तरेण मातुलादीन् असमावृत्तो नाभिवादयेदित्याह स एव—

'न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत्'।
(म. स्मृ. २. २०५)

इति। समावृत्तस्य तु नानुज्ञापेक्षा। तदाहापस्तम्ब:—

'समावृत्तेन सर्वे गुरव उपसंग्राह्या: प्रोष्य च समागमे।'
(आ. ध. सू. १. ४. १४. ७-८)

---

१. B. C. and F. read ज्येष्ठस्यात; while G. reads श्रेष्ठस्यात for ज्येष्ठ-. २. I. reads छन्दानुवर्तिन: which seems to be incorrect. ३. G. reads जीव्येरन्, but this form is not correct. ४. एव is omitted by all others except A. ५. G. reads तथाऽविसृष्टो; while all others except A. I. and the text of Manu read न चाविसृष्टो. ६. All others except A. D. I. and the text of Âpastamba Dharma Sútra omit च. ७. B. C. E. F. G. and H. read समागते for समागमे.

'आचार्य-प्राचार्यसन्निपाते प्राचार्यमुपसं-
गृह्याचार्यमुपजिघृक्षेत्' ।

(आ. ध. सू. १. २. ८. १९)

इति । अभिवादनं प्रशंसति स एव—

'अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्द्धन्ते ह्यायुः प्रज्ञा यशो बलम्' ।

इति । (म. स्मृ. २. १२१)

॥ इत्यभिवादनप्रकरणम् ॥

अथ द्वितीयभागकृत्यमुच्यते । तत्र दक्षः—

'द्वितीये च तथा भागे वेदाभ्यासो विधीयते' ।

(द. स्मृ. २. ३६)

इति । कूर्मपुराणे—

'वेदाभ्यासं ततः कुर्यात् प्रयत्नाच्छक्तितो द्विजः ।(५५)
जपेदध्यापयेच्छिष्यान् धारयेद्वै विचारयेत् ।
अवेक्षेत च शास्त्राणि धर्मादीनि द्विजोत्तमाः' ॥

(कू. पु. १. २. १८. ५५-५६)

---

१. D. and the text of Âpastamba Dharma Sûtra read उपसंजिघृक्षेदा-चार्यम्, and B. C. E. F. H. and I. read आचार्यमुपजिघृक्षेत्, while G. omits -प्राचार्य- and reads the whole sentence as follows:—आचार्यसन्निपाते आचार्यायोपसंगृह्य आचार्यम्तु यं यं जिघृक्षेत. २. The author appears to quote this verse from the Âpastamba, but we do not find it in that work. The sentence 'अभिवादनं प्रशंसति स एव' which is the ground for us to think that the next verse is from the Âpastamba is omitted by G. ३. A. has before this word वेदाभ्यासकालनिर्णयमुखेन. ४. I. reads कूर्मपुराणम्. ५. The text of the Kûrma Purâṇa reads अवेक्षेताथ ६. All others except A. and the text of the Kûrma Purâṇa read द्विजो-त्तमः, but the use of the word in the plural is more correct.

इति। वेदाभ्यासं प्रशंसति मनुः—

'वेदमेव सदाभ्यस्येत्[1] तपस्तप्स्यन्[2] द्विजोत्तमः।
वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते ॥(१६६)
[3]ऋषि-देव-मनुष्याणां वेदश्चक्षुः सनातनम्'।

(म. स्मृ. २. १६६-१६७)

इति। व्यासोऽपि—

'[4]नान्यतो ज्ञायते धर्मो वेदादेवैष निर्बभौ।
तस्मात् सर्वप्रयत्नेन धर्मार्थं वेदमाश्रयेत्' ॥

इति। याज्ञवल्क्योऽपि—

'यज्ञानां तपसां चैव शुभानां चैव कर्मणाम्।
वेद एव द्विजातीनां निःश्रेयसकरः परः' ॥

(या. स्मृ. १. ४०)

इति। तथा वेदविहीनस्य सर्वक्रियावैफल्यं मनुर्दर्शयति—

'यथा षण्ढोऽफलः स्त्रीषु यथा गौर्गवि चाफला।
यथा चाज्ञे[5]ऽफलं दानं तथा विप्रोऽनृचोऽफलः' ॥

(म. स्मृ. २. १५८)

इति। एतस्मि[6]न्नेव भागे कृत्यान्तरमाह दक्षः[7]—

'समित्-पुष्प-कुशादीनां स कालः समुदाहृतः'।

इति।

(द. स्मृ. २.२८)

॥ इति द्वितीयभागकृत्यम् ॥

१. I. reads समभ्यस्येत्. २. D. E. G. H. and I. read तपस्तप्त्वा. ३. D. omits the portion from ऋषि. to शुभानां चैव (in line 10). ४ I. reads नान्यो ज्ञायते धर्म वेदादेव स निर्बभौ. ५. B. C. E. F. and H. read राज्ञे for चाज्ञे; while G. reads राज्ञा. ६. I. reads अस्मिन्. ७. I. substitutes गर्गः for दक्षः, but it seems to be a mistake.

अथ तृतीयभागकर्त्तव्यम् । तत्र दक्षः—

'तृतीये च तथा भागे पोष्यवर्गार्थसाधनम्' ।

(द. स्मृ. २. २९)

इति । कूर्मपुराणेऽपि—

'उपेयादीश्वरं चाथ योगे-क्षेमप्रसिद्धये ।

साधयेद्विविधानर्थान् कुटुम्बार्थं ततो द्विजः' ॥

(कू. पु. १. २. १८. ५७; या. स्मृ. १. १०८)

इति । पोष्यवर्गश्च दक्षेण दर्शितः—

'माता पिता गुरुर्भार्या प्रजा दीनैः समाश्रितः ।

अभ्यागतो ऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः' ॥

(द. स्मृ. २. २९)

इति । यात्रार्थं धनसाधनं यथावृत्ति कार्यम् । तथाऽऽह मनुः—

'यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः ।

अक्लेशेन शरीरस्य कुर्वीत धनसञ्चयम्' ॥

(म. स्मृ. ४. ३)

इति । अगर्हितानि कर्माणि अध्यापनादीनि । तानि च

१. A. has धनार्जनप्रकरणम् before this word. २. F. omits कूर्मपुराणेऽपि; while I. reads कूर्मपुराणम. ३. G. and I. read योग-क्षेमार्थसिद्धये. ४. The text of the Kûrma Purâṇa reads द्विजोत्तम for ततो द्विजः. ५. Except A. and I. all others omit च. ६. B, C, E, F, G and H. read हीनः for दीनैः; while the text of Daksha reads दीना समाश्रिताः. ७. The text of Daksha substitutes अन्यः for अग्नि. ८. D. I. and the correction in H. read ग्रतश्च for यात्रार्थं; while E and G. substitute only पात्र- for the same. ९. Except A. D. and I. all other omit च निरूपितानि, but the words निरूपितानि appear in the marginal correction in H.

निरूपितानि। ननु—ब्राह्मणस्यैवैतानि कर्माणि न क्षत्रिय-विशोः। तदाह मनुः—

'त्रयो धर्म्मा निवर्त्तेरन्[१] ब्राह्मणात् क्षत्रियं प्रति।
अध्यापनं याजनं च तृतीयश्च प्रतिग्रहः॥(७७)
वैश्यं प्रति तथैवैते निवर्त्तेरन्निति स्थितिः'।

(म. स्मृ. १०. ७७-७८)

इति। अतो न तयोरध्यापनादिरर्जनोपायः। बाढम्। तत एवोपायान्तरं तेनैवोक्तम्—

'शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्-पशु-कृषिर्विशः'[२]॥

(म. स्मृ. १०. ७९.)

इति। वणिक् वाणिज्यम्। पशुः पशुपालनम्। याज्ञवल्क्योऽपि—

'प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम्।
कुसीद-कृषि-वाणिज्यं पाशुपाल्यं[३] विशः स्मृतम्'॥

(या. स्मृ. १. ११९)

इति। उपायान्तराण्याह मनुः—

'सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः।
प्रयोगः कर्मयोगश्च[४] सत्प्रतिग्रह एव च'॥

(म. स्मृ. १०. ११५)

---

१. A. निवर्त्तन्ते. २. B. C. E. F. G. and H. read पश्चुकृषी. ३. G. and H. read पशुपाल्यं, which is incorrect. ४. B. C. and F. read योगाश्च.

इति । दायो ऽन्वयागतं[1] धनम् । लाभो निधिदर्शनम्[2] । दाय-लाभ-क्रयान्वयागमाश्चतुर्णां वर्णानाम्[3] । जयः क्षत्रियस्यैव । प्रयोगो वृद्ध्यर्थं धनप्रदानम् । कर्मयोगः कृषि-वाणिज्यम् । प्रयोग-कर्मयोगौ वैश्यस्यैव । सत्प्रतिग्रहो विप्रस्यैव । कूर्मपुराणे ऽपि—

'द्विविधस्तु गृही ज्ञेयः साधकश्चाप्यसाधकः ।
अध्यापनं याजनं च पूर्वस्याहुः प्रतिग्रहम् ॥ (९)
शिलोञ्छं[4] वाप्याददीत गृहस्थः साधकः पुनः । (१०)
असाधकस्तु यः प्रोक्तो गृहस्थाश्रमसंस्थितः ।
शिलोञ्छे तस्य कथिते द्वे वृत्ती परमर्षिभिः । (११)
अमृतेनाथ[5] वा जीवेत् मृतेनाप्यथ वापदि ।
अयाचितं स्यादमृतं मृतं भैक्षं तु याचितम्' ॥ (१२)
(कू. पु. १. २. २५. २-१२)

इति । मनुरपि—

'ऋता-ऽमृताभ्यां जीवेत[6] मृतेन प्रमृतेन वा ।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कथञ्चन ॥

---

१. B. C. F. and H. read न्यायागतं; while D. reads स्वयमागतम्. २. G. omits निधि-. ३. I. omits वर्णानाम्. ४. Except A. and the text of Kûrma Purâṇa others read शिलोञ्छेनाप्युपादद्यात् गृहस्थः साधकः स्मृतः; but it seems incorrect. ५. Here we follow A. and the text of Kûrma Purâṇa; while others read अमृतेनापि जीवेत मृतेन प्रमृतेन वा, but as प्रमृत is not explained in the next line in which मृत and अमृत are explained, it seems that the latter reading is not thought proper by the author. ६. The text of Manu reads जीवेत्तु.

ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतं तु याचितं भैक्ष्यं प्रमृतं कर्षणं स्मृतम् ॥
सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत्' ॥

(म. स्मृ. ४. ४-६)

इति । पतितपरित्यक्तैककणोपादानमुञ्छः । शाल्यादेर्निपतितपरित्यक्तवल्वरीग्रहणं शिलम् । याज्ञवल्क्योऽपि—

'कुशूल-कुम्भीधान्यो वा त्र्याहिकोऽश्वस्तनोऽपि वा ।
जीवेद्वाऽपि शिलोञ्छेन श्रेयानेषां परः परः' ॥

इति । कुशूलं कोष्ठकं तद्भरितधान्यसञ्चेता कुशूलधान्यः । त्र्यहपर्याप्तधान्यसञ्चेता त्र्याहिकः । न श्वस्तनचिन्ताऽप्यस्तीत्यश्वस्तनः सद्यःसम्पादक इत्यर्थः । एतेषां अश्वस्तनान्तानां वृत्तयो मनुनोक्ता वेदितव्याः । तथाऽह—

'षट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्त्तते ।
द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीव्यते' ॥

(म. स्मृ. ४. ९)

---

१. B. C. D. E. F. G. and H. substitute प्रोक्तं for ज्ञेयं. २. E. G. and H. omit अमृतं स्यादयाचितम् । मृतं तु याचितं भैक्ष्यम्, and read ऋतमुञ्छशिलं ज्ञेयं प्रमृतं कर्षणं स्मृतम्. The omitted portion appears, however, in the marginal correction of H. ३. D. and I. read प्रोक्तं for भैक्ष्यं. ४. H. and I. read-विख्याता; while others except A. D. and the text of Manu read -र्याख्याता. ५. पतितपरित्यक्तैककणोपादानमुञ्छः । शाल्यादेर्निपतितपरित्यक्तवल्वरीग्रहणं शिलम् is found only in A. and I., but it is not found in any other manuscript. ६. B. C. and F. read आह्निको, and D. E. G. H. read द्व्याहिको. ७. The portion from कुशूल- to जीव्यते इत्यर्थः (p. 342, l. 4) is omitted by all others except A. and I.

इति । अयमर्थः—एकः कुशूलधान्यो याजनादिषट्कर्मा भवेत्। अन्यो द्वितीयः कुम्भीधान्यो याजनाध्यापन-प्रतिग्रहैर्वर्त्तेत। एकस्तृतीयस्त्र्याहिकः प्रतिग्रहेतराभ्याम्। चतुर्थस्त्वश्वस्तनो ब्रह्मसत्रेणाध्यापनेन जीव्यते इत्यर्थः* । शूद्रवृत्तिस्तूशनसा दर्शिता—

'शूद्रस्य द्विजशुश्रूषा सर्वशिल्पानि वाऽप्यथ।
विक्रयः सर्वपण्यानां शूद्रकर्मेत्युदाहृतम्' ॥

इति । याज्ञवल्क्योऽपि—

'शूद्रस्य द्विजशुश्रूषा तयाऽजीवन् वणिग्भवेत्।
शिल्पैर्वा विविधैर्जीवेद् द्विजातिहितमाचरन्' ॥

(या. स्मृ. १. १२०)

---

* अत्र मेधातिथिरेवं व्याचख्यौ—एषां कुशूलधान्यकादीनां मध्यात् एकः कुशूलधान्यकः प्रकृतैरुञ्छ-शिलायाचित-कृषि-वाणिज्यैः षट्कर्मा भवति षड्भिर्जीवति । अन्यो द्वितीयः कुम्भीधान्यकः कृषि-वाणिज्ययोर्निन्दितत्वात् । तत्त्यागे उञ्छ-शिल- याचितायाचितानां मध्यादिच्छातस्त्रिभिर्वर्त्तेत । एकस्त्र्याहिकोऽयाचितलाभं विहाय उञ्छ-शिलायाचितानां मध्यादिच्छया द्वाभ्यां वर्त्तेत । चतुर्थः पुनरश्वस्तनिको ब्रह्मसत्रेण जीवति । ब्रह्मसत्रं शिलोञ्छयोरन्यतरा वृत्तिः । ब्रह्मणो ब्राह्मणस्य सततभवत्वात्सत्रमित्याह । कुल्लूकभट्टस्तु—एषां गृहस्थानां मध्ये कश्चिद्गृहस्थो यो बहुपोष्यवर्गः स प्रकृतैर्ऋतायाचित-भैक्ष-कृषि-वाणिज्यैः पञ्चभिस्तेन चैवेत्यनेनैव चशब्दसमुच्चितेन कुसीदेनेत्येवं षड्भिः कर्मभिः षट्कर्मा भवति षड्भिरेतैर्जीवति—इति व्याचकार ।

१: I. reads वापि च. २. D. reads -वर्णानां; while I. reads -वस्तूनां. ३. B. C. F. G. and H. read -कर्माद्युदाहृतम्; while D. and E. read कर्म उदाहृतम् ४. D. reads द्विजाति-.

इति । अजीवन्निति छेदः । हारीतोऽपि—

'शूद्रधर्मो[1] द्विजातिशुश्रूषा[2]पापवर्जनं कलत्रादिपोषणं कर्षणं पशुपालनं भारोद्वहन-पण्यापण्यव्यवहार[3]-चित्रकर्म-नृत्य-गीत-वेणु-वीणा[4]-मृदङ्गवादनानि' ।

इति ।

॥ इति तृतीयभागकृत्यम् ॥

अथ चतुर्थे भागे कर्त्तव्यमुच्यते । तत्र दक्षः—

'चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत्' ॥

(द. स्मृ. २. ३६)

इति । मध्याह्नस्नानविधिस्तु प्रसङ्गात् पूर्वमेव निरूपितः। अथ ब्रह्मयज्ञविधिः । तस्य स्वरूपं तैत्तिरीयब्राह्मणे दर्शितम् ।

'यत्[5] स्वाध्यायमधीयीतैका[6]मप्यृचं यजुः[7] साम वा तत् ब्रह्मयज्ञः सन्तिष्ठते' ।

इति । लिङ्गपुराणेऽपि[8]—

'स्वशाखाध्ययनं विप्र ब्रह्मयज्ञ इति स्मृतः' ।

(लिं. पु. १. २६. १६)

इति । तस्य कालमाह बृहस्पतिः—

---

१. I. reads शूद्रस्य. २. D. E. and G. read -शुश्रूषापवर्जनं. ३. B. C. F. and I. read -पण्यव्यवहार- for -पण्यापण्यव्यवहार-. ४. D. omits -वीणा-. ५. B. C. F. and G. read यः for यत्. ६. H. reads -मधीतैका-. ७. E. omits यजुः. ८. D. omits अपि.

'स चार्वाक् तर्पणात् कार्यः पश्चाद्वा प्रातराहुतेः ।
वैश्वदेवावसाने वा नान्यदर्ते निमित्ततः' ॥

इति । अत्र वैश्वदेवशब्देन मनुष्ययज्ञान्तं कर्म विवक्ष्यते । यतः कूर्मपुराणेऽभिहितम्—

'यदि स्यात्तर्पणादर्वाक् ब्रह्मयज्ञः कृतो न हि ।
कृत्वा मनुष्ययज्ञं तु ततः स्वाध्यायमारभेत्' ॥
(कू. पु. १. २. १८. १०४)

इति । श्रुतिश्च दिग्देश-कालानाह—

'ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि
ग्रामाद्दक्षिणदिश उदीच्यां प्रागुदीच्या-
मच्छदिदर्शने चोदित आदित्ये' ।

इति । अच्छदिदर्शने इत्यनेन शब्देन देशविशेषो लक्षितः । छदिर्गृहाच्छादनं तृण-कटादि यत्र न दृश्यते तत्रेत्यर्थः । उदिते आदित्ये इत्यनेनोदयात् प्राचीनं कालं निषेधति । न तूदयानन्तर्यं विधीयते । तस्य होमकालत्वात् । मनुरपि देशादीतिकर्त्तव्यतामाह—

'अपां समीपे नियतो नैत्यकं विधिमास्थितः ।
सावित्रीमप्यधीयीत गत्वाऽरण्यं समाहितः' ॥
(म. स्मृ. २. १०४)

---

१. A. B. C. E. and F. read नान्यदन्ते; while I. reads नान्यदा तु. २. G. I. and the text of Kūrma Purāṇa read -मारभेत्. ३. B. C. E. F. read -कालावाह; while H. omits -काल-. ४. H. दच्छदिर्दर्श उदीच्यां प्रागुदीच्यां चोदित आदित्ये. I. -दच्छदिर्दर्श, &c. ५. D. and I. read अच्छदिर्दर्श-; while H. reads अच्छदिर्दश.- ६. B. C. F. omit यत्र. ७. I adds सूर्य- before उदयात. ८. I. reads निषेधयति. ९. I. reads नैत्यिकं through mistake. १०. I. -मप्यधीयीत.

इति । उपवीतादीनि कर्तव्यतां श्रुतिराह—

'दक्षिणत उपवीयोपविश्य हस्ताववनिज्य
त्रिराचमेत् [2]द्विः परिमृज्य सकृदुपस्पृश्य शि-
रश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्य' ।

इति ।

'दर्भाणां महदुपस्तीर्योपस्थं कृत्वा
प्रागासीनः स्वाध्यायमधीयीत' ।

इति च ।

'दक्षिणोत्तरौ पाणी पादौ कृत्वा
सपवित्रावोमिति प्रतिपद्यते' ।

इति च ।

'त्रीनेव प्रायुङ्क्त भूर्भुवः स्वः' ।

इति च ।

'अथ सावित्रीं गायत्रीं त्रिरन्वाह
पच्छो ऽर्धर्चशो ऽनवानम्' ।

इति च ।

'ग्रामे मनसा स्वाध्यायमधीयीत दिवा नक्तं च' ।

इति च ।

'हस्ताशौच आह्लय उतारण्येवल
उत वाचोदतिष्ठन्नुत व्रजन्नुतासीन
उत शयानो ऽधीयीतैव स्वाध्यायम्' ।

---

१. D. G. and I. read आचामेत. २. G. reads त्रि for द्वि. ३. D. reads -त्तरेण. ४. B. and C. read सर्वाम्-, while F. सर्वानम्. ५ D. and G. substitute वा for च.

इति च।

'मध्यन्दिने प्रबलमधीयीत'।

इति च।

'नमो ब्रह्मणे इति परिधानीयां त्रिरन्वाहा ऽऽप उपस्पृश्य गृहानेति। ततो यत्किञ्चिद्ददाति सा दक्षिणा'।

इति च।

दक्षिणतः प्रदक्षिणं कृत्वेत्यर्थः। तथा च योगियाज्ञवल्क्यः—

'प्रदक्षिणं समावृत्य नमस्कृत्योपविश्य च।
दर्भेषु दर्भपाणिभ्यां संहताभ्यां कृताञ्जलिः॥
स्वाध्यायं तु यथाशक्ति ब्रह्मयज्ञार्थमाचरेत्'।

इति। शौनकस्त्वितिकर्त्तव्यान्तरमाह—

'प्राणायामैर्दग्धदोषः शुक्लाम्बरधरः शुचिः।
यथाविध्यप आचम्य ओरेदिद्दर्भसंस्तरम्॥
पवित्रपाणिः कृत्वा तु उपस्थं दक्षिणोत्तरम्'।

इति। उदाहृतश्रुतौ सकृदुपस्पृश्येत्यस्यानन्तरं सव्यं पाणिं पादौ प्रोक्षेदित्यध्याहर्त्तव्यम्। उत्तरस्मिन् फलवाक्ये तथाऽनुक्रमणात्।

'येत् त्रिराचामति तेन ऋचः प्रीणाति यद् द्विः परिमृजति तेन यजूंषि यत् सकृदुपस्पृशति तेन सामानि यत् सव्यं दक्षिणं पाणिं पादौ प्रोक्षति यच्छिरश्चक्षुषी नासिके श्रोत्रे हृदय-

१. D. and G. reads -कर्तव्यतान्तर-. २. D. reads आहरेत. ३. B. C. F. and G. omit यत. ४. B. C. E. F. and G. read त्रिराचामयते; while I. त्रिराचामतिति. ५. All others except B. C. and F. omit दक्षिणं.

माल्भते तेनाथर्वाङ्गिरसो ब्राह्मणानीतिहासान्
पुराणानि कल्पान् गाथा नाराशंसीः प्रीणाति' ।

इति । दर्भाणामित्यादिश्रुत्यर्थः शौनकेन दर्शितः—

'प्राग्वोदग्वा ग्रामान्निष्क्रम्याप आप्लुत्य शुचौ देशे यज्ञोपवीत्याचम्याक्लिन्नवासा दर्भाणां महदुपस्तीर्य प्राक्कूलानां तेषु प्राङ्मुख उपविश्योपस्थं कृत्वा दक्षिणोत्तरौ पाणी पादौ संधाय पवित्रवन्तौ द्यावा-पृथिव्योः सन्धिमीक्षमाणः संमील्य वा यथायुक्तमात्मानं मन्येत तथायुक्तो ऽधीयीत स्वाध्यायमोंपूर्वा व्याहृतयः सावित्रीमन्वाह पच्छो ऽर्धर्चशः सर्वामिति तृतीयमिति शौचः ।

इति । शौचः शुचेः पुत्रः आह्नेय एवं नामक ऋषिरित्याह । आत्मेति श्रुतेः संबंधः ।

'ग्रामे मनसाऽधीयीत उत प्रबलेऽरण्ये ।
मनसा ऽधीयीत उत वा दिवा नक्तं वा
तिष्ठन् व्रजन्नासीनः शयानो वा' ।

सर्वथा स्वाध्यायमधीयीतैव । न त्वङ्गाशक्त्या प्रधानं परित्याज्यमित्यर्थः । ब्रह्मयज्ञे जप्यं आश्वमेधिके दर्शितम्—

'वेदमादौ समारभ्य तथोपर्युपरि क्रमात् । यदधीतेऽन्वहं शक्त्या तत् स्वाध्यायं प्रचक्षते ॥

१. Except A. D. and I. all others omit आदि-. २. G. omits पाणी, and E. adds after पाणी, तत्तप्यते तपो हि स्वाध्यायः. ३. G. adds the portion विज्ञायते ऽपां वा एष ओषधीनां रसो यद्दर्भाः सरसमेव तद्ब्रह्म करोति, after पवित्रवन्तौ. ४. From ओंपूर्वा- to प्रबले ऽरण्ये the intermediate portion is omitted in I. ५. B. C. E. F. and G. read यथो- for तथो-. ६. I. reads यदधीतान्वहं. ७. I. reads स्वाध्यायः.

ऋचं वा ऽथ यजुर्वा ऽपि सामगाथामथापि वा ।
इतिहास-पुराणानि यथाशक्ति न हापयेत्' ॥
(वृ. गौ. स्मृ. ८. ६६-६७)

इति । याज्ञवल्क्यो ऽपि–
'वेदाथर्व-पुराणानि सेतिहासानि शक्तितः ।
जपयज्ञप्रसिद्ध्यर्थं विद्यामाध्यात्मिकीं जपेत्' ॥
(या. स्मृ. १. १०१)

इति । ग्रहणाध्ययनवत् ब्रह्मयज्ञाध्ययनस्यानध्यायदिनेषु परित्यागप्राप्तौ मनुराह–
'वेदोपकरणे चैव स्वाध्याये चैव नैत्यके ।
नानुरोधो ऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥
नैत्यके* नास्त्यनध्यायो ब्रह्मसत्रं हि तत् स्मृतम् ।
ब्रह्माहुतिहुतं पुण्यमनध्यायवषट्कृतम्' ॥
(म. स्मृ. २. १०५-१०६)

* अत्र मेधातिथिः– 'पूर्वविधिशेषो ऽयमर्थवादः । एतेन हेतुना नैत्यके नास्त्यनध्यायः । यतो ब्रह्मसत्त्रं तत्स्मृतं सततप्रवृत्तं सत्त्रम् । यथा सहस्रसंवत्सरादिसत्त्रं न कदाचित् विच्छिद्यत इत्यतः सत्त्रमेवमिदमपि ब्रह्माध्ययननिर्वर्त्यं ब्रह्मसत्त्रत्वाच्च न कदाचिद्विच्छेत्तव्यम् । विच्छेदे हि सत्त्रत्वं न स्यात् । सत्त्रत्वमिदानीं रूपकभङ्ग्या योजयति । ब्रह्माध्ययनाहुतिहुतम् । अन्यत्सत्त्रं सोमाहुत्या हूयते । जुहोतिरनिवृत्तौ वर्तते । अनेकार्थत्वाद्धातूनां ब्रह्मशब्देन तद्विषया ऽध्ययनक्रिया लक्ष्यते । ब्रह्माध्ययनमाहुतिरिव इति ' उपमितं व्याघ्रादिभिः (पा. सू. २. १. ५६) इति समासः । अनध्याये यदध्ययनं तेन वषट्कृतं यथा याज्यान्त अविच्छेदो वषट्कारेण क्रियत एवं चतुर्दश्याद्यनध्यायाध्ययनं वषट्कारस्थानीयम् । वषट्शब्देन वौषट्शब्दो लक्ष्यते' इति । नन्दनस्तु–'अधीयत इत्यध्यायो याज्यापुरो ऽनुवाक्यादिः वषट्कृतं वषट्कारः ताभ्यां रहितं अनध्यायवषट्कृतं' इत्याह । कदाचिदत्र लेखकप्रमादो ऽपि सम्भवति ।

१. I. reads सामाथर्वमथापि. २. I. reads नैत्यिके through mistake.

इति। ब्रह्मैवाहुतिर्द्रव्यं तेन हुतम्। अधीयते इत्यध्यायो याज्यादिमन्त्रसमूहः। तेन वषट्कारेण च संहितं हुतम्। अतो नास्त्यनध्यायः। अत एव श्रुतिरनध्यायविशेषाननूद्य तेषु जपं प्रशंसति—

'य एवं विद्वान्मेघे वर्षति विद्योतमाने
स्तनयत्यवस्फूर्जति पवमाने वायाव-
मावास्यायां स्वाध्यायमधीते तप एव
तत् तप्यते तपो हि स्वाध्यायः'।

इति। तेष्वनध्यायेष्वल्पमेव पठनीयम्। तदाहापस्तम्बः—

'अथ यदि वातो वायात् स्तनयेद्वा विद्योतेत वा ऽव-
स्फूर्जेद्वैकां वर्चमेकं वा यजुरेकं वा सामाभिव्याहरेत्'।

(आ. ध. सू. १. ४. १२. ६)

इति। आत्म-देशयोरशुचित्वे ब्रह्मयज्ञो वर्जनीयः तथा च श्रुतिः—

'तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्मा ऽशु
चिर्यद्देशः'। इति। ब्रह्मयज्ञं प्रशंसति श्रुतिः—

---

१. G. reads -संख्येन हुतम for -द्रव्यं तेन हुतम्. २. All others except A. and I. read रहितं for सहितं. The commentator Nandana on Manu follows this reading. ३. B. C. and F. add अपि after तेषु ४. I. reads प्रशशंस. ५. D. reads स for य. ६. B. C. F. and H. omit वाया.- ७. B. C. E. F. G. H. and I. read विद्योतते. ८. I. adds तथा before अवस्फूर्जेत्; while B. C. E. F. G. and H. read स्फूर्जेदेकामृचम् for ऽवस्फूर्जेद्वैकां वर्चम्, and I. -देकामृचम्. and D. स्फूर्जेदेकां वर्चम. ९. D. reads सामाऽधि.-

'उत्तमं नाकमधिरोहति[2] उत्तमः समानानां भवति यावन्तं ह वा इमां वित्तस्य पूर्णां ददत् स्वर्गं लोकं[3] जयति[4]।
तावन्तं लोकं जयति। भूयांसं चाक्षय्यं चापमृत्युं[5] जयति। ब्रह्मणः सायुज्यं गच्छति'।

इति। याज्ञवल्क्योऽपि—

'यं यं क्रतुमधीयीत तस्य तस्याप्नुयात् फलम्।
त्रिर्[6]वित्तपूर्णपृथिवीदानस्य फलमश्नुते'॥
(या. स्मृ. १. ४७-४८)

इति।

॥ इति ब्रह्मयज्ञप्रकरणम् ॥

अथ तर्पणविधिः। तत्र वसिष्ठः—

'ऋक्-सामाथर्ववेदोक्तान् जप्यमन्त्रान् यजूंषि च।
जप्त्वा[7] चैवं ततः कुर्याद्देवर्षि-पितृतर्पणम्'॥

इति। बृहस्पतिरपि—

'ब्रह्मयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत्।
जप्त्वाऽथ प्रणवं वाऽपि[8] ततस्तर्पणमाचरेत्'॥

इति। विष्णुपुराणेऽपि[9]—

१. D. omits अधि-. २. B. C, E. F. G. and H. add इति after अधिरोहति. ३. D. and I. read स्वर्गलोकं. ४. D. omits the following— जयति। तावन्तं लोकं जयति। भूयांसं चाक्षय्यं चापमृत्युं जयति.। ५. B. C. F. G. and I. add पुनर् before मृत्युम्; while E. reads वा पाप्मानं मृत्युं for चापमृत्युं. ६. I. omits त्रिर् through mistake. ७. A. and D. read जपित्वैवं. ८. A. B. C. E. F. G. read चापि for वाऽपि. ९ B. C. and F. omit विष्णुपुराणेऽपि.

'शुचिवस्त्रधरः स्नातो देवर्षि-पितृतर्पणम्।
तेषामेव हि तीर्थेन कुर्वीत सुसमाहितः॥
त्रिरपः प्रीणनार्थाय देवानामपवर्जयेत्।
तथर्षीणां[1] यथान्यायं सकृच्चापि प्रजापतेः॥
पितॄणां प्रीणनार्थाय त्रिरपः पृथिवीपते'[2]।

(वि. पु. ३. ११. २६-२८)

इति। व्यासः—

'एकैकमञ्जलिं देवा द्वौ द्वौ तु[4] सनकादयः।
अर्हन्ति[3] पितरस्त्रींस्त्रीन् स्त्रियश्चैकैकमञ्जलिम्'॥

इति। आग्नेयपुरा—

'प्रागग्रेषु सुरांस्तर्पेन्मनुष्यांश्चैव मध्यतः।
पितॄंस्तु दक्षिणाग्रेषु चैक-द्वि-त्रिजलाञ्जलीन्'[5]॥

इति। अत्र अञ्जलिसङ्ख्या यथाशाखं व्यवतिष्ठते। यत्र
खायां न सङ्ख्यानियमः श्रुतः तत्र विकल्पः। तत्रैव
प्रसूत्रविन्यासविशेषो दर्शितः—

'सव्येन देवकार्याणि वामेन पितृतर्पणम्।
निवीतेन मनुष्याणां तर्पणं संविधीयते'॥

इति। सव्येनोपवीतेन वामेन[6] प्राचीनावीतेन इत्यर्थः।
ा च शङ्ख-लिखितौ—

---

१. I. reads अथर्षीणां; while G. and H. महर्षीणां. २. G. and H. read ायते. possibly this is a mistake of the writer. ३. A. and D. read र्हन्ति for अर्हन्ति. ४. D. substitutes च for तु. ५. Except A. D. d I. all others read द्व्याम् [illegible]जलाञ्जलीन् for चैक-द्वि-त्रिजलाञ्जलीन्. H. omits वामेन प्राचीनावीतेन.

'उभाभ्यामपि हस्ताभ्यां प्राङ्मुखो यज्ञोपवीती
प्रागग्रैः कुशैर्देवतातर्पणं देवतीर्थेन कुर्यात्' ।

इति । विष्णुरपि—

'ततः कृत्वा निवीतं तु यज्ञसूत्रमतन्द्रितः ।
प्राजापत्येन तीर्थेन मनुष्यांस्तर्पयेत् पृथक्' ॥

इति । बौधायनः—

'अथ दक्षिणतः प्राचीनावीती पितॄन्स्वधानमस्तर्पयामि' ।
(बौ. स्मृ. २. ५. १०. १)

इत्यादि । यत्तु—

'उभाभ्यामपि हस्ताभ्यामुदकं यः प्रयच्छति ।
स मूढो नरकं याति कालसूत्रमवाक्शिराः' ॥

इति व्याघ्रपादवचनं तच्छ्राद्धादिविषयम् । अत एव कार्ष्णाजिनिः—

'श्राद्धे विवाहकाले च पाणिनैकेन दीयते ।
तर्पणे तूभयेनैव विधिरेष पुरातनः' ॥

इति । एतच्च तर्पणं स्थलस्थो न जले कुर्यात् । तथा च गोभिलः—

'नोदकेषु न पात्रेषु न क्रुद्धो नैकपाणिना ।
नोपतिष्ठति तत्तोयं यन्न भूमौ प्रदीयते' ॥

---

१. The text of Baudhâyan omits दक्षिणतः. २. D. reads पितृभ्यः for पितॄन्. ३. All others except A. and I. read व्याघ्रपाद्वचनं. ४. D. reads उदाहृतः. ५. B. C. F. and H. read स्थलस्थो नो जले कुर्यात्; while D. स्थलस्थेनोदकैः कुर्यात, and I. स्थलस्थेन नोदके कर्तव्यम् for स्थलस्थो न जले कुर्यात्.

अथ[1] स्थलस्थो भूमावेव तर्पणं कुर्वीत न जलादाविति। तथा च विष्णुः—

'स्थले स्थित्वा जले यस्तु प्रयच्छेदुदकं नरः।
नोपतिष्ठति तद्वारि पितॄणां तन्निरर्थकम्' ॥

इति। अत्र विशेषमाह हारीतः—

'वसित्वा वसनं[2] शुष्कं स्थले विस्तीर्णबर्हिषि[3]।
[4]विधिज्ञस्तर्पणं कुर्यान्नैकपात्रे[5] कदाचन ॥
पात्राद्वा जलमादाय शुभे पात्रान्तरे[6] क्षिपेत्।
जलपूर्णे ऽथ वा गर्त्ते न स्थले तु[7] विबर्हिषि ॥
केश-भस्म-तुषाङ्गार-कण्टकास्थि[8]समाकुलम्।
भवेन्महीतलं यस्माद्बर्हिषा ऽऽस्तरणं ततः' ॥

इति। यत्तु कार्ष्णाजिनिनोक्तम्—

'देवतानां पितॄणां च जले दद्याज्जलाञ्जलिम्'।

इति तदशुचिस्थलविषयम्। तदाह विष्णुः—

'यत्राशुचि स्थलं वा स्यादुदके देवता[9]-पितॄन्।
तर्पयेत्तु यथाकाममप्सु सर्वं प्रतिष्ठितम्' ॥

इति। पात्रविशेषमाह पितामहः—

---

१. I. reads अतः. २. E. and G. read ऽऽवसथं. ३. D. reads निस्तीर्ण. ४. B. C. E. F. and G. omit the following three lines:—

विधिज्ञस्तर्पणं कुर्यान्नैकपात्रे कदाचन ॥
पात्राद्वा जलमादाय शुभे पात्रान्तरे क्षिपेत्।
जलपूर्णेऽथ वा गर्त्ते न स्थले तु विबर्हिषि ॥

H. also omits these lines, but we find them in the marginal correction of it. ५. D. and I. न पात्रेषु. ६. D. reads पात्रेऽथ वा. ७. D. substitutes न for तु; while H. reads भुवि बर्हिषि. ८. D. reads -कटका-. ९. D. and G. read देवता.

'हेम-रूप्यमयं पात्रं ताम्र-कांस्यसमुद्भवम् ।
पितॄणां तर्पणे पात्रं मृण्मयं तु परित्यजेत्' ॥

इति[१] । मरीचिः—

'सौवर्णेन च पात्रेण ताम्र-रूप्यमयेन वै[२] ।
औदुम्बरेण खड्गेन[३] पितॄणां दत्तमक्षयम्' ॥

इति । रिक्तहस्तेन न कुर्यादित्याह स एव—

'विना रूप्य-सुवर्णेन विना ताम्र-तिलैस्तथा[४] ।
विना मन्त्रैश्च दर्भैश्च पितॄणां नोपतिष्ठते' ॥

इति । स्मृत्यन्तरे च—

'खड्ग-मौक्तिकहस्तेन कर्त्तव्यं पितृतर्पणम् ।
मणि-काञ्चन-दर्भैर्वा न शून्येन[५] कदाचन ॥

इति । न चात्र समुच्चयो नापि समविकल्प इत्यभिप्रेत्य मरीचिराह—

'तिलानामप्यभावे तु सुवर्ण-रजतान्वितम् ।
तदभावे निषिञ्चेत्तु दर्भैर्मन्त्रेण वा पुनः' ॥

इति । तिलग्रहणे तु विशेषमाह योगियाज्ञवल्क्यः—

'यद्युद्धृतं निषिञ्चेत्तु तिलान् सम्मिश्रयेज्जले ।
अतो[६] ऽन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः' ॥

इति । एतदेकलोमक[७]प्रदेशाभिप्रायम् । तथा च देवलः—

---

१. G. and H. omit इति. २. A. and F. reads ताम्र-कांस्यमयेन वा; while B. C. E. and G. substitute वा for च. ३. I. reads बिल्वेन. ४. I. reads ताम्रमयैस्तथा. ५. A. reads शुष्केण; while G. शुक्लेन. ६. B. C. E. and F. read अतो नान्यत्र हस्तेन for अतोऽन्यथा तु सव्येन. ७. B. reads -हस्तोमक-.

'रोमसंस्थान्[1] तिलान् कृत्वा यस्तु तर्पयते पितॄन्।
पितरस्तर्पितास्तेन रुधिरेण मलेन वा[2]' ॥

इति। वर्णभेदेन तिलानां विनियोगविशेषं[3] दर्शयति स एव-

'शुक्लैस्तु तर्पयेद्देवान् मनुष्यान् शबलैस्तिलैः।
पितॄन् सन्तर्पयेत् कृष्णैस्तर्पयन् सर्वतो द्विजः[4]' ॥

इति। कूर्मपुराणेऽपि देवर्षि-पितृतर्पणे विशेषो दर्शितः-

'देवान् ब्रह्मऋषींश्चैव तर्पयेदक्षतोदकैः[5]।
पितॄन् भक्त्या[6] तिलैः कृष्णैः स्वसूत्रोक्तविधानतः' ॥

(कू. पु. १. २. १८.८८)

इति। तिथ्यादिविशेषेण तिलतर्पणं निषेधति[7] व्यासः-

'सप्तम्यां रविवारे च गृहे[8] जन्मदिने[9] तथा।
भृत्य-पुत्र-कलत्रार्थी[10] न कुर्यात्तिलतर्पणम्' ॥

इति। पुराणे अपि[11]-

'पक्षयोरुभयो राजन् सप्तम्यां निशि सन्ध्ययोः।
वित्त-पुत्र-कलत्रार्थी[12] तिलान् पञ्चसु वर्जयेत्' ॥

इति। बौधायनो अपि-

'न जीवत्पितृकः कृष्णैस्तिलैस्तर्पणमाचरेत्।
सप्तम्यां रविवारे च जन्मर्क्षदिवसेषु[13] च ॥

१. B. reads सोमसंस्थान्. २. Except A G. and H. others substitute च for वा. ३. H. omits -विशेष, and reads विनियोगं. ४ I. reads तर्पयन् सर्वथा द्विज. ५. The text of Kûrma Purâṇa reads this line तिलोदकैः। पितॄन् भक्त्या स्वगृह्योक्तविधानतः. ६. B. C. and F. read शक्त्या. ७. I. reads निषेधयति. ८. This is omitted by all others except A. ९. D. reads च विपिने for जन्मदिने. १०. A. and D. read पुत्र-मित्र-; while B. C. E. and F. read पुत्र-भृत्य.- ११. D. omits पुराणेऽपि. १२. All others except A. and I. read विद्या-पुत्र.- १३. D. reads जन्मर्क्षे विपिनेषु च.

गृहे निषिद्धं सतिलं तर्पणं तद्बहिर्भवेत्[1] ।
विवाहे चोपनयने चौले सति यथाक्रमम् ॥
वर्षमर्द्धं तदर्द्धं च नेत्येके तिलतर्पणम् ।
तिथि-तीर्थ-विशेषेषु कार्यं प्रेतेषु सर्वदा ' ॥

इति । तर्पणीयान् दर्शयति सत्यव्रतः—

'कृतोपवीती[2] देवेभ्यो निवीती च भवेत्ततः ।
मनुष्यांस्तर्पयेद्भक्त्या ब्रह्मपुत्रान्[3] ऋषींस्तथा ॥
अपसव्यं ततः कृत्वा सव्यं जान्वाच्य भूतले ।
दर्भपाणिस्तु विधिना[4] प्रेतान् सन्तर्पयेत्ततः' ॥

इति[5] । योगियाज्ञवल्क्यो[6]ऽपि—

' ब्रह्माणं तर्पयेत् पूर्वं विष्णुं रुद्रं प्रजापतिम् ।
वेदान् छन्दांसि देवांश्च ऋषींश्चैव तपोधनान् ॥
आचार्यांश्चैव गन्धर्वानाचार्यतनयांस्तथा ।
संवत्सरं सावयवं देवीरप्सरसस्तथा ॥
तथा देवान् नगान्नागान् सागरान् पर्वतानपि ।
सरितोऽथ मनुष्यांश्च यक्षान् रक्षांसि चैव हि ॥
पिशाचांश्च सुपर्णांश्च भूतान्यथ पशूंस्तथा ।
वनस्पतीनोषधींश्च भूतग्रामांश्चतुर्विधान् ॥
सव्यं जानुं ततोऽन्वाच्य पाणिभ्यां दक्षिणामुखः ।
तल्लिङ्गैस्तर्पयेन्मन्त्रैः सर्वान् पितृगणांस्तथा ॥

---

१. I. reads वर्जयेत्. २. I. reads कृत्वोपवीती, H. कृतोपवीतो and B. C. E. F. कृतोपनीतो. ३. D. reads पुत्रम् for पुत्रान्. ४. From विधि- to -ष्णुम् the intermediate portion -ना प्रेतान् संतर्पयेत्ततः '। इति । योगियाज्ञवल्क्योऽपि-' ब्रह्माणं तर्पयेत पूर्वं वि- is omitted by F, this is a writer's mistake. ५. Except A. all omit this word. ६. I. omits अपि.

मातामहांश्च सततं श्रद्धया तर्पयेत् द्विजः' ।

इति । शौनको ऽपि—

'अग्निर्विष्णुः प्रजापतिः'।

इत्यादि । यजुःशाखिनां तु काण्डर्षितर्पणमुक्तम्—

'अथ काण्डऋषीनेतानुदकाञ्जलिभिः शुचिः ।
अव्यग्रस्तर्पयेन्नित्यं मन्त्रेणैवाष्टनामभिः' ॥

इति । पितृतर्पणं प्रकृत्य पैठीनसिः—

'अपसव्यं ततः कृत्वा स्थित्वा च पितृदिङ्मुखः ।
पितॄन् दिव्यानदिव्यांश्च पितृतीर्थेन तर्पयेत्' ॥

इति । दिव्याः वसु-रुद्रादित्याः । अदिव्याः पित्रादयः ।
योगियाज्ञवल्क्यः —

'वसून् रुद्रांस्तथाऽऽदित्यान् नमस्कारसमन्वितान्' ।

इति । तर्पयेदिति शेषः । वस्वादीनां नामानि पैठीनसि-
ना दर्शितानि—

'ध्रुवो धर्मश्च सोमश्च आपश्चैवाऽनिलो ऽनलः ।
प्रत्यूषश्च प्रभातश्च वसवो ऽष्टौ प्रकीर्तिताः ॥
अजैकपादहिर्बुध्न्यो विरूपाक्षो ऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥

१. D. reads गृद्धया, but it seems to be a mistake. २. G. reads इत्याह. ३. B. C. E. F. G. and H. omit काण्ड- and read simply ऋषि-तर्पणमुक्तम्. ४. Except A. all omit this word. ५. A. reads रुद्रायच. ६. All others except A. and I. read प्रभासश्च. ७. I. reads शहिरभो through mistake.

सावित्रश्च जयन्तश्च पिनाकी चाऽपराजितः ।
एते रुद्राः समाख्याता एकादश सुरोत्तमाः ॥
इन्द्रो धाता भगः पूषा मित्रो ऽथ वरुणो ऽर्यमा ।
अर्चिर्विवस्वान् त्वष्टा च सविता विष्णुरेव च ॥
एते वै द्वादशा ऽऽदित्या देवानां प्रवरा मताः ।
एते च दिव्याः पितरः पूज्याः सर्वैः प्रयत्नतः' ॥

इति । ततः स्वपित्रादींस्तर्पयेत् । तत्र प्रकारमाह पैठीनसिः—

'स्वनाम-गोत्रग्रहणं पुरुषम्पुरुषम्प्रति ।
तिलोदकाञ्जलींस्त्रींस्त्रीनुत्तरुत्तैर्विनिक्षिपेत्' ॥

इति । योगियाज्ञवल्क्यो ऽपि—

'सवर्णेभ्यो जलं देयं नाऽसवर्णेभ्य एव च ।
गोत्र-नाम-स्वधाकारैस्तर्पयेदनुपूर्वशः' ॥

इति । नामग्रहणे ऽपि विशेषमाह आश्वलायनः—

'शर्मान्तं ब्राह्मणस्योक्तं वर्मान्तं क्षत्रियस्य च ।
गुप्तान्तं चैव वैश्यस्य दासान्तं शूद्रजन्मनः ॥
चतुर्णामपि वर्णानां पितॄणां पितृगोत्रतः ।
पितृगोत्रं कुमारीणां ऊढानां भर्तृगोत्रतः' ॥

इति । पितृतर्पणक्रममाह सत्यव्रतः—

---

१. D. reads अङ्घिर; while I. अहिर्. २. D. reads तथा for मता ३. Except A. all others read सर्वै for सर्वैः. ४. Except A. all om this word. ५. सूनुरुत्तैरुत्तैर्. ६. This word is omitted in all others excep A. ७. A. reads सवर्णेभ्यां ऽञ्जलिर्देयः. ८. A. and D. substitute बौधाय for आश्वलायनः, but the following verses are not found in Baudhâya ९. I. reads तर्पणे क्रम ; while D. omits -क्रम-.

'पितृभ्यः प्रत्यहं दद्यात्ततो मातृभ्य एव च ।
ततो मातामहानां च पितृव्यस्य सुतस्य च'[1] ॥

इति । विष्णुपुराणे ऽपि—

'दद्यात् पैत्रेण तीर्थेन काम्यानन्यान्[2] शृणुष्व मे ॥
मात्रे प्रमात्रे तन्मात्रे गुरुपत्न्यै तथा नृप ।
गुरवे मातुलादीनां स्निग्धमित्राय भूभुजे[3] ॥

(वि. पु. ३. ११. २९–३०)

इति । हारीतो ऽपि—

'पित्रादीन् मात्रादीन्[4] मातामहादीन्[5] पितृव्यां-
स्तत्पत्नीर्ज्येष्ठभ्रातृंस्तत्पत्नीः[6] मातुलांस्तत्पत्नीः[7]
गुर्वाचार्योपाध्यायान्[8] सुहृत्-सम्बन्धि-बान्धवान्
द्रव्यान्नदातृ-पोषक[9]-रिक्थिनस्तत्पत्नीश्च तर्पयेत्' ।

(हा. स्मृ. १२. ४)

इति । जीवत्पितृकतर्पणे विशेषमाह योगियाज्ञवल्क्यः—

'कव्यवाडनलः[10] सोमो यमश्चैवार्यमा तथा ।
अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदो ऽपि च ॥
यदि स्याज्जीवत्पितृकस्तान् विद्याच्च तथा पितॄन् ।
येभ्यो वाऽपि पिता दद्यात्तेभ्यो वाऽपि प्रदीयते ॥

---

१. D. reads पितृव्यस्यानुजस्य च. २. The text of Vishṇu Puráṇa reads काम्यं चान्यत् for काम्यानन्यान्; while I. reads through mistake कामानन्यान्. ३. I. reads भूभुज. ४. B. C. D. and F. omit मात्रादीन्. ५. मातामहादीन् is omitted by G. ६. D. reads -पत्नीं, and omits ज्येष्ठभ्रातृंस्तत्पत्नीः. ७. I. reads मातुलादीन्; while D. मातुलं तत्पत्नीं. ८. I. reads -ध्यायादीन्. ९. I. reads -पोषकारिणः, but probably this is a mistake. १०. B. C. and F. read कव्यवाडोऽनलः and D. काव्यवा-डनलः, but it seems to be a mistake.

एतांश्चैव प्रमीतांश्चा ऽप्रमीतपितृको द्विजः' ।

इति । तर्पयेदिति शेषः । अवसानाञ्जलिमाह कात्यायनः-

'पितृवंश्या मातृवंश्या ये चान्ये मत्त उदक-
मर्हन्ति तांस्तर्पयामीत्ययमवसानाञ्जलिः' ।
(का. स्मृ. २. १२. २)

इति । आदित्यपुराणे ऽपि-

'यत्र क्वचनसंस्थानां क्षुत्तृषोपहतात्मनाम् ।
तेषां हि दत्तमक्षय्यमिदमस्तु तिलोदकम् ॥
ये मे कुले लुप्तपिण्डाः पुत्र-दारविवर्जिताः ।
तेषां तु दत्तमक्षय्यमिदमस्तु तिलोदकम्' ॥

इति । मत्स्यपुराणे ऽपि-

'ये ऽबान्धवा बान्धवा वा ये ऽन्यजन्मनि बान्धवाः ।
ते तृप्तिमखिला यान्तु यश्चास्मत्तो ऽम्बु वाञ्छति' ॥
(वि. पु. ३. ११. ३९

इति । विस्तरेण कर्तुमसमर्थस्य संक्षेपेण तर्पणमुक्तं वि
ष्णुपुराणे-

---

१. Except A. B. C. and F. all others read प्रमीतांश्च प्रमीत-, but th
is a mistake. २. The text of Kâtyâyana reads पितृवंश-मातृवंशौ; whi
I. reads through mistake as follows—

पितृवंश्या मातृवंश्या ये चान्ये पितरो जनाः ।
मत्तस्तूदकमर्हन्ति ये तांस्तांस्तर्पयाम्यहम् ॥

इत्यवसानाञ्जलिरिति; but this is not found in the text of Kâtyâyan
३. G. reads अत्र for यत्र. ४. All others except A. G. and H. -तृष्णो
for -तृषोप-. ५. Except A. D. H. and I. all others एतत्कुले. ६.
substitutes -पौत्र- for -दार-. ७. B. C. and F. read यश्चास्मत्तोऽभिवाञ्छ
D. यश्च मत्तोम्बु वाञ्छति, I. reads through mistake ये वा मत्तोऽम्बु
भिच्छताः, and the text of Vishṇu Purâṇa reads tho whole line as—

ते सर्वे तृप्तिमायान्तु ये चास्मत्तोयकांक्षिणः ।

'आब्रह्मस्तम्बपर्यन्तं जगत्तृप्यत्विति ब्रुवन्।
क्षिपेत् पयोऽञ्जलींस्त्रींस्तु कुर्यात् संक्षेपतर्पणम्' ॥

इति। यमतर्पणं तु वृद्धमनुनोक्तम्—

'दीपोत्सव*चतुर्दश्यां[1] कार्यं तु यमतर्पणम्।
कृष्णाङ्गारचतुर्दश्यामपि कार्यं सदैव वा ॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने।
वृकोदराय चित्राय चित्रगुप्ताय ते नमः' ॥

इति। नियमस्तु स्कन्दपुराणे निरूपितः—

'दक्षिणाभिमुखो भूत्वा तिलैः सव्यं समाहितः।
दैवतीर्थेन देवत्वात्, तिलैः† प्रेताधिपो यतः[2] ॥

इति। एवं कुर्वतः फलमाह यमः—

'यत्र क्वचन नद्यां हि स्नात्वा कृष्णचतुर्दशीम्।
सन्तर्प्य धर्मराजानं मुच्यते सर्वकिल्बिषैः' ॥

इति। माघशुक्लाष्टम्यां भीष्मतर्पणं कुर्यात्। तदाह व्यासः—

---

* दीपोत्सवचतुर्दशी आश्विनकृष्णचतुर्दशी नरकचतुर्दशीति प्रसिद्धा। महाराष्ट्रेषु दीपावलीति च प्रसिद्धा।

† यमस्य देवेष्वेवान्तर्भावात् देवतीर्थेन तर्पणं कर्तव्यम्। एवं सति देवकार्ये यवानामेव ग्राह्यत्वात् तिलग्रहणं किमर्थमिति चेत्तत्र हेतुमाह। यतः स प्रेताधिपः अतस्तिलैरेव तर्पणं कार्यमित्यर्थः।

---

१. I. reads प्रेतोत्सव-, but this is a mistake. २. D. E. and H. read प्रेताधिपो यमः; while I. reads प्रेताधिपाय च.

'शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय यो जलम् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥
वैयाघ्रपादगोत्राय सांकृत्यप्रवराय च ।
गङ्गापुत्राय भीष्माय प्रदास्येऽहं तिलोदकम् ।
अपुत्राय ददाम्येतत् जलं भीष्माय वर्मणे ' ॥

इति । तर्पणप्रशंसा पुराणसारे दर्शिता—

'एवं यः सर्वभूतानि तर्पयेदन्वहं द्विजः ।
स गच्छेत् परमं स्थानं तेजोमूर्त्तिमनामयम् ' ॥

इति । अकरणे प्रत्यवायः पुराणे दर्शितः—

'देवतांश्च पितॄंश्चैव मुनीन् यो वै न तर्पयेत् ।
देवादीनामृणी भूत्वा नरकं स व्रजत्यधः' ॥

इति । योगियाज्ञवल्क्यो ऽपि—

'नास्तिक्यभावाद्यस्तांस्तु न तर्पयति वै पितॄन् ।
पिबन्ति देहनिःस्रावं पितरो ऽस्य जलार्थिनः' ॥

इति । हारीतो ऽपि—

'देवाश्च पितरश्चैव काङ्क्षन्ति सतिलाञ्जलिम् ।
अदत्ते तु निराशास्ते प्रतियान्ति यथागतम्' ॥

(हा. स्मृ. १४. ७.)

इति । कात्यायनो ऽपि—

---

१. I. reads वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च. २. I. reads सलिलं भीष्मवर्मणे. ३. D. reads मानवान् यो for मुनीन् यो वै. ४. I. reads याज्ञवल्क्योऽपि, but we do not find this verse in the text of Yâdnyavalkya. ५. B. C. and D. read सलिलाञ्जलिम्; while E. G. and H. read सरितां जलम्.

'छायां यथेच्छेच्छरदातपार्त्तः
पयः पिपासुः क्षुधितोऽन्नमन्नम् ।
बालो जनित्रीं जननी च बालं
योषित् पुमांसं पुरुषश्च योषाम् ॥
तथा सर्वाणि भूतानि स्थावराणि चराणि च ।
विप्रादुदकमिच्छन्ति सर्वेऽप्युदककाङ्क्षिणः ॥
तस्मात् सदैव कर्त्तव्यमकुर्वन्महतैनसा ।
युज्यते ब्राह्मणः कुर्वन् विश्वमेतद्बिभर्त्ति हि' ॥
(का. स्मृ. २. १२. ३-५)

इति । अत्र पितृगाथाः-

'अपि नः स कुले भूयाद्यो नो दद्याज्जलाञ्जलिम् ।
नदीषु बहुतोयासु शीतलासु विशेषतः' ॥

इति । तर्पणानन्तरं वस्त्रनिष्पीडनं कर्त्तव्यम् । तदाह योगियाज्ञवल्क्यः-

'यावद्देवानृषींश्चैव पितॄंश्चापि न तर्पयेत् ।
तावन्न पीडयेद्वस्त्रं यो हि स्नातो भवेत् द्विजः ॥
निष्पीडयति यो विप्रः स्नानवस्त्रमतर्प्य च ।
निराशाः पितरो यान्ति शापं दत्वा सुदारुणम्' ॥

इति । निष्पीडनं तु स्थले कार्यम् । तदुक्तं स्मृत्यन्तरे-

१. The text of Kâtyâyana reads -पात्तः परः for -पार्त्तः पयः, but this is a mistake. २. The text of Kâtyâyana reads सर्वाभ्युद. कङ्क्षिणः; while all others except A. and I. substitute हि for अपि. ३. G. substitutes अथ for अत्र. ४. A. reads पुण्यतोयासु. ५. H. reads पितॄन्नैव प्रतर्पयेत्. ६. B. reads मानवस्त्रमतर्पिताः, C. and F. read मानवस्त्रमनर्पिताः, and D. E. G. H. अतर्पिते for अतर्प्य च.

'वस्त्रनिष्पीडितं* तोयं श्राद्धे चोच्छिष्टभोजिनाम् ।
भागधेयं श्रुतिः प्राह तस्मान्निष्पीडयेत् स्थले ' ॥

इति । विष्णुपुराणे–

'आचम्य च ततो दद्यात् सूर्याय सलिलाञ्जलिम् ।
नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे ।
जगत्सवित्रे शुचये सवित्रे कर्मदायिने ' ॥

(वि. पु. ३. ११. ३७–३८)

इति ।

॥ इति तर्पणप्रकरणम् ॥

अथ देवार्चनम् । इत्थं मूलवचनानुक्तानि तर्पणान्तानि कर्माणि निरूपितानि । अथ मूलवचनोक्तं क्रमप्राप्तं देवतार्चनं निरूप्यते । तथा च नृसिंहपुराणम्–

'जलदेवान् नमस्कृत्य ततो गच्छेद् गृहं बुधः ।
पौरुषेण तु सूक्तेन ततो विष्णुं समर्चयेत् ' ॥

(नृ. पु. ५८. १२–१३)

*श्राद्धे विप्राणामुच्छिष्टं 'यजमानकुले जाता दासा दास्यो ऽन्नकाङ्क्षिण' इत्यादिना देयं तस्य ये दासादयो ऽधिकारिणः त एव हि वस्त्रनिष्पीडनोदकस्याधिकारिण इत्यर्थः ।

१. D. reads भोजनम्. २. B. C. E. and F. read ऽमिततेजसे.
३. The text of Nrisinha Purâṇa reads these two lines as follows:–

जले देवं नमस्कृत्य ततो गृहगतः पुनः ।
विधिना पुरुषसूक्तेन तत्र विष्णुं समर्चयेत ॥.

४. All others except A. and I. substitute च for तु.

इति। आग्नेयपुराणे ऽपि–

'मन्त्रैर्वैष्णव-रौद्रैस्तु सावित्रैः शाक्तिकैस्तथा।
विष्णुं प्रजापतिं वाऽपि शिवं वा भास्करं तथा॥
तल्लिङ्गैरर्चयेन्मन्त्रैः सर्वदेवान् समाहितः'॥

इति। कूर्मपुराणे ऽपि–

'ब्रह्माणं शङ्करं सूर्यं तथैव मधुसूदनम्।
अन्यांश्चाभिमतान् देवान् भक्त्या चाऽक्रोधनो नरः॥
स्वैर्मन्त्रैरर्चयेन्नित्यं पत्रैः पुष्पैस्तथाऽम्बुभिः'।

(कू. पु. १. २. १८. १०–११)

इति। स्मृत्यन्तरे–

'आदित्यमम्बिकां विष्णुं गणनाथं महेश्वरम्'।

इत्यादि। यद्यपि पूर्वं मूलवचनव्याख्याने पूजनीयो देव एक एव–इति महता प्रबन्धेन प्रपञ्चितं तथापि दर्शनभेदमाश्रित्य विष्णु-शङ्करादिभेदोपन्यासो न विरुद्ध्यते दर्शनभेदश्च पुराणसारे वर्णितः–

'शैवं च वैष्णवं शाक्तं सौरं वैनायकं तथा।
स्कान्दं च भक्तिमार्गस्य दर्शनानि षडेव हि'॥

---

१. H. and I. omit अपि. २. I. reads ऽम्बर. ३. The text of Kūrma Purāṇa reads -स्याम्बुभि-. ४. All others except A. and I. omit the following portion—

स्मृत्यन्तरे–

'आदित्यमम्बिकां विष्णुं गणनाथं महेश्वरम्' इत्यादि।

५. Except A. and I. all others read पूर्ववचन- for पूर्वं मूलवचन-. ६. B. C. and F. read this verse as follows:—

शैवं पाशुपतं शाक्तं सौरं वैनायकं तथा।
वैष्णवं च तथा षष्ठं दर्शनानि षडेव हि॥

E. follows this reading, but differs in reading वैष्णवं षडिति ज्ञेयानि for वैष्णवं च तथा षष्ठं. D. also follows this reading, but only in the first line.

इति । तत्र वैष्णवदर्शनानुसारी पूजाक्रम आश्वमेधिके निरूपितः—

'शृणु पाण्डव तत्सर्वमर्चनक्रममात्मनः ।
स्थण्डिले पद्मकं कृत्वा चाष्टपत्रं सकर्णिकम् ॥
अष्टाक्षरविधानेन अथवा द्वादशाक्षरैः ।
वैदिकैरथ वा मन्त्रैर्मम सूक्तेन वा पुनः ॥
स्थापितं मां ततस्तस्मिन्नर्चयीत विचक्षणः ।
पुरुषं च ततः सत्यमच्युतं च युधिष्ठिर ॥
अनिरुद्धं च मां प्राहुर्वैखानसविदो जनाः ।
अन्ये त्वेवं विजानन्ति मां राजन् पाञ्चरात्रिकाः ॥
वासुदेवं च राजेन्द्र सङ्कर्षणमथापि वा ।
प्रद्युम्नं चानिरुद्धं च चतुर्मूर्तिं प्रचक्षते ॥
एताश्चान्याश्च राजेन्द्र संज्ञाभेदेन मूर्त्तयः ।
विद्ध्यध्यात्मपरा एव मामेवं चार्चयेद्बुधः'॥
(वृ. गौ. स्मृ. ८. ८६-९१)

इति । आग्नेये ऽपि—

---

१. B. C. D. E. F. and G. read ·कारी. २. D. and G. read अर्चना·, and the text of Vriddha Gautama अर्चनाक्रममुत्तमम्. ३. The text of V. G. reads स्वकं हितम्. ४. D. reads मन्त्रेण for सूक्तेन. ५. The text of V. G. reads उद्धरेत. ६. Except A. all other manuscripts are mistaken here. B. reads विद्धयनर्थांतरा एव, C. F. G. H. and I. read विद्धयनर्थान्तरा एव, E. reads विद्धयन्नर्थान्तरा एव, D. विद्धयनर्थंतरावेव, and the text of V. G. read विद्धयनर्थान्तरायैव.

'अर्चनं सम्प्रवक्ष्यामि विष्णोरमिततेजसः ।
यत्कृत्वा मुनयः सर्वे परं निर्गुणमाप्नुयुः ॥
अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ।
षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतम् ॥
अग्नौ क्रियावतां देवो दिवि देवो मनीषिणाम् ।
प्रतिमास्वल्पबुद्धीनां योगिनां हृदये हरिः ॥
तस्य सर्वगतत्वाच्च स्थण्डिले भावितात्मनाम् ।
ऋग्वेदे पौरुषं सूक्तमार्चितं गुह्यमुत्तमम् ॥
आनुष्टुभस्य सूक्तस्य त्रैष्टुभं तस्य देवता ।
पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः ॥
प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे ।
तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत् ॥
पञ्चमीं वामजानौ तु षष्ठीं वै दक्षिणे न्यसेत् ।
सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे तथा ॥
नवमीं नाभिमध्ये तु दशमीं हृदये तथा ।
एकादशीं कण्ठमध्ये द्वादशीं वामबाहुके ॥
त्रयोदशीं दक्षिणे तु तथाऽऽस्ये तु चतुर्दशीम् ।
अक्ष्णोः पञ्चदशीं चैव विन्यसेन्मूर्ध्नि षोडशीम् ॥
यथा देहे तथा देवे न्यासं कृत्वा विधानतः ।

---

१. I. reads निर्वाणमाप्नुयुः. २. I. reads दिवि for रवौ. This is correct, but all other manuscripts do not follow it. ३. This line is omitted in all others except A. and I. ४. Except A. and I. all others read त्रिष्टुबं; while D. त्रिष्टुभं, but probably this is a mistake. ५. D. and G read कण्ठदेशे.

न्यासेन तु भवेत् सो ऽपि स्वयमेव जनार्दनः ॥
एवं न्यासविधिं कृत्वा पश्चाद्यागं समाचरेत् ।
पूर्वया[१]ऽऽवाहयेद्देवमासनं तु द्वितीयया ॥
पाद्यं तृतीयया चैव चतुर्थ्याऽर्घ्यं प्रदापयेत् ।
पञ्चम्याऽऽचमनं दद्यात् षष्ठ्या स्नानं समाचरेत् ॥
सप्तम्या तु ततो वासो ह्यष्टम्या चोपवीतकम् ।
नवम्या गन्धलेपं[२] तु दशम्या पुष्पकं तथा ॥
एकादश्या तथा धूपं द्वादश्या दीपमेव च[३] ।
नैवेद्यं तु त्रयोदश्या नमस्कारे चतुर्दशी ॥
प्रदक्षिणे पञ्चदशी नर्मने[४] षोडशी तथा ।
स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनं तथा ॥
हुत्वा षोडशभिर्मन्त्रैः षोडशान्नस्य चाहुतीः ।
पुनः षोडशभिर्मन्त्रैर्दद्यात् पुष्पाणि षोडश ॥
तद्य सर्वं जपेद्भूयः पौरुषं सूक्तमुत्तमम् ।
षण्मासात्[५] सिद्धिमाप्नोति ह्येवमेव समर्चयन्[६] ॥

ध्येयः सदासवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।

---

१. B. C. D. F. and G. read पूर्वमावाहयेत्, but पूर्वया is more correct. २. All others except A. and I. read गन्धमेवं for गन्धलेपं; while E. reads गन्धमाल्ये, but this is a mistake. ३. All others except A. and I. substitute हि for च. ४. B. C. D. E. F. and G. read वर्जने; while H. प्रजने, I. व्यजने and in the marginal correction of D. it reads शयने. ५. I. reads अचिरात्. ६. D. and G. read समर्चयेत्, and I. समाचरन्.

केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः' ॥

इति। बौधायनो ऽपि—

'अथातो महापुरुषस्याहरहः परिचर्याविधिं व्याख्यास्यामः। स्नात्वा शुचिः शुचौ देशे गोमयेनोपलिप्य प्रतिकृतिं कृत्वा अक्षत-पुष्पैर्यथालाभमर्चयेत्। सह पुष्पोदकेन महापुरुषमावाहयेत्। ॐ भूः पुरुषमावाहयामि ॐ भुवः पुरुषमावाहयामि ॐ सुवः पुरुषमावाहयामि ॐ भूर्भुवःसुवः पुरुषमावाहयामीत्यावाह्य आयातु भगवान् महापुरुष इति। अथ स्वागतेनाभिनन्दति, स्वागतमधुना भगवतो महापुरुषस्य। भगवते महापुरुषाय एतदासनमुपक्लृप्तमत्रास्यतां भगवान् महापुरुष इति कूर्चं ददाति। भगवतो ऽयं कूर्चो दर्भमयस्त्रिवृद्धरितसुवर्णस्तं जुषस्वेति। अत्राधः स्थानानि कल्पयति, अग्रतः शङ्खाय कल्पयामि। परतश्चक्राय कल्पयामि। दक्षिणतो गदायै कल्पयामि। वामतो वनमालायै कल्पयामि। पश्चिमतः श्रीवत्साय कल्पयामि, गरुत्मते कल्पयामि।

१. I. reads कनक-. २. I. reads फल-पुष्पै. ३. I. alone adds महा- before पुरुष-. ४. I. reads इत्यनेन. ५. B. C. D. E. and F. read स्वागतमधुना स्वागतं भगवते, and G. and H. स्वागतममुष्वागतं भगवते. ६. B. C. and F. read -मुपक्लृप्तमथावास्यतां, E. -मुपक्लृप्तमथास्यतां, D. -मुपकल्प्याथास्यतां and G. and H.- मुपक्लृप्तमन्वास्यतां. ७. All others except A. and I. read इत्यत्र.

उत्तरतः श्रियै कल्पयामि, सरस्वत्यै कल्पयामि, पुष्ट्यै कल्पयामि, तुष्ट्यै कल्पयामि । अथ सावित्र्या, पात्रमभिमन्त्र्य, प्रक्षाल्य, त्रिरपः परिषिच्य, अप आनीय, सह पवित्रेणादित्यं दर्शयेत् ओमिति । ऋतमिति स्नाप्स्यन्, 'त्रीणि पदा विचक्रम' इति पाद्यं दद्यात् । प्रणवेनार्घ्यम् । अथ व्याहृतिभिर्निर्माल्यं व्यपोह्योत्तरतो विष्वक्सेनाय नम इति । अथैनं स्नापयति 'आपोहिष्ठामयो भुवः' इति तिसृभिः 'ब्रह्मजज्ञानं' वामदेव्यर्चा यजुः पवित्रेणेत्येताभिः षड्भिः स्नापयित्वा अथाद्भिस्तर्पयति । केशवं नारायणं माधवं गोविन्दं विष्णुं मधुसूदनं त्रिविक्रमं वामनं श्रीधरं हृषीकेशं पद्मनाभं दामोदरं तर्पयित्वा, अथैतानि वस्त्र-यज्ञोपवीताचमनीयान्युदकेन व्याहृतिभिर्दत्वा व्याहृतिभिः प्रदक्षिणमुदकं परिषिच्य 'इदं विष्णुर्विचक्रम' इति गन्धं दद्यात् । 'तद्विष्णोः परमं पदम्' इति पुष्पम्, 'इरावती' इत्यक्षतान्, सावित्र्या धूपम्, 'उद्दीप्यस्व' इति दीपम, 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां भगवते महापुरुषाय जुष्टं चरुं निवेदयामीति नैवेद्यम् । अथ केशवादिनामभिर्द्वादश पुष्पाणि

---

१. I. omits त्रिरपः २. तिसृभिः is omitted in all others except A. D. and I., but D. omits the following portion -ब्रह्मजज्ञानं वामदेव्यर्चा यजुः पवित्रेणेत्येताभिः.

दद्यात्। शङ्खाय नमः, चक्राय नमः, वनमालायै नमः, श्रीवत्साय नमः, गरुत्मते नमः, श्रियै नमः, सरस्वत्यै नमः, पुष्ट्यै नमः, तुष्ट्यै नमः इति। अवशिष्टैर्गन्धमाल्यैर्ब्राह्मणानलङ्कृत्य[1] अथैनं ऋग्यजुःसामाथर्वभिः[2] स्तुवन् ध्रुवसूक्तं जपित्वा पुरुषसूक्तं वाऽन्यांश्च वैष्णवान्मन्त्रानित्येके। ॐ भूर्भुवः सुवरोम् भगवते महापुरुषाय[3] चरुमुद्वासयामीति चरुमुद्वास्य। उद्वासनकाले ॐ भूः पुरुषमुद्वासयामि, ॐ भुवः पुरुषमुद्वासयामि, ॐ सुवः पुरुषमुद्वासयामि, ॐ भूर्भुवः सुवः पुरुषमुद्वासयामीत्युद्वास्य। प्रयातु भगवान् महापुरुषोऽनेन हविषा तृप्तो हरिः पुनरागमनाय पुनः सन्दर्शनाय चेति। प्रतिमास्थानेष्वप्स्वग्नावावाहन-विसर्जनवर्जं[4] सर्वं समानम्। महत्स्वस्त्ययनमित्याचक्षते महत्स्वस्त्ययनमित्याह भगवान् बौधायनः'।

इति। कूर्मपुराणेऽपि—

'न विष्ण्वाराधनात् पुण्यं विद्यते कर्म वैदिकम्।
तस्माद्दिनादौ मध्याह्ने नित्यमाराधयेद्धरिम्॥

१. D. inserts अथ शिष्टैर्गान्धैरास्मानमलंकृत्य. २. H. and I. omit अथर्वभिः. ३. I. only adds महा- before पुरुष-. ४. D. omits अप्सु; while G. reads प्रतिमास्थाने च स्नानावाहन- etc.

तद्विष्णोरिति मन्त्रेण सूक्तेन पुरुषेण च[१] ।
नैताभ्यां[२] सदृशो मन्त्रो वेदेषूक्तश्चतुर्ष्वपि[३]'॥
(कू. पु. १. २. १८. ९४-९५)

इति । एवं[४] वैष्णवदर्शनानुसारिपूजा ज्ञातव्या ।

'अथवा देवमीशानं भगवन्तं सनातनम् ।
आराधयेन्महादेवं भावपूतो[५] महेश्वरम् ॥
मन्त्रेण रुद्रगायत्र्या प्रणवेनाथ वा पुनः ।
ईशानेनाथ वा रुद्रैस्त्र्यम्बकेन[६] समाहितः ॥
पुष्पैः पत्रैरथाद्भिर्वा चन्दनाद्यैर्महेश्वरम् ।
तथोनमः शिवायेति मन्त्रेणानेन वा यजेत् ॥
नमस्कुर्यान्महादेवमृतं सत्यमितीश्वरम् ।
निवेदयीत चात्मानं यो ब्रह्माणमितीश्वरम् ॥
प्रदक्षिणं द्विजः कुर्यात् पञ्च ब्रह्माणि[७] वा जपेत् ।
ध्यायीत देवमीशानं व्योममध्यगतं शिवम्' ॥
(कू. पु. १. २. १८. ९७-१०१)

इति । बौधायनोऽपि[८]–

'अथातो महादेवस्याहरहः परिचर्याविधिं व्याख्यास्यामः । स्नात्वा शुचौ देशे गोमयेनोपलिप्य प्रतिकृतिं कृत्वाऽक्षतपुष्पैर्यथालाभमर्चयेत् । सह पुष्पोदकेन महादेवमावाहयेत् ।

१. All others except I. substitute तु for च. २. The text of Kûrmā-purâṇa reads न नाभ्यां. ३. B. C. E. and F. read च त्रिष्वपि for चतुर्ष्वपि. ४. This line is omitted in all manuscripts except A. and I. ५. D. and G. read भावपूतं. ६. I. reads रौद्रैः. ७. I. reads ब्रह्माणि through mistake. ८. D. omits ऽपि.

ॐ भूर्महादेवमावाहयामि, ॐ भुवो महादेवमावाहयामि, ॐ सुवः महादेवमावाहयामि, ॐ भूर्भुवः सुवः महादेवमावाहयामि-इत्यावाह्य आयातु भगवान्महादेव इति। अथ स्वागतेनाभिनन्दति स्वागतमनुस्वागतं भगवते महादेवाय सुआसनमुपक्लृप्तमत्रास्यतां भगवान् महादेव इति। अत्र कूर्चं ददाति, भगवतोऽयं कूर्चो दर्भमयस्त्रिवृद्धरितसुवर्णस्तं जुषस्वेति। अत्र स्थानानि कल्पयति। अग्रतो विष्णवे कल्पयामि, ब्रह्मणे कल्पयामि। दक्षिणतः स्कन्दाय कल्पयामि, विनायकाय कल्पयामि। पश्चिमतः शूलाय कल्पयामि, महाकालाय कल्पयामि। उत्तरतः उमायै कल्पयामि, नन्दिकेश्वराय कल्पयामि। इति कल्पयित्वाऽथ सावित्र्या पात्रमभिमन्त्र्य प्रक्षाल्य त्रिरपः परिषिच्य पवित्रमप आनीय सह पवित्रेणादित्यं दर्शयेदोमिति। ऋतमिति स्नाप्स्यन् त्वरितरुद्रेण पाद्यं दद्यात्। प्रणवे-

१. I. reads स्वागतमधुना, but repetition shows more respect. २. I. does not prefix सु to आसन. ३. All others except A. and I. read आस्तां भगवान for अत्रास्यतां भगवान; while I. reads भगवन्. ४. D. reads कल्पयामि. ५. B. C. and F. read ब्रह्मणे कल्पयामि first, and E. G. H. omit विष्णवे कल्पयामि, and D. omits अग्रत· and ब्रह्मणे कल्पयामि. ६. D. reads दुर्गायै, and omits नन्दिकेश्वराय कल्पयामि. ७. Except A. B. C. and F. others read त्रिरपः पवित्रं for त्रिरप· परिषिच्य. ८. Through mistake I. reads here स्नानं पठिति रुद्रेण for ऋतमिति स्नाप्स्यन् त्वरितरुद्रेण.

नार्घ्यम् । अथ व्याहृतिभिर्निर्माल्यं व्यपोह्योत्तरतश्चण्डेशाय नम इति । अथैनं स्नापयित्वा 'आपोहिष्ठा मयोभुव' इति तिसृभिः, 'हिरण्यवर्णाः शुचयः पावका' इति चतसृभिः, 'पवमानः सुवर्चन' इत्यनुवाकेन स्नापयित्वा अद्भिस्तर्पयति । भवं देवं तर्पयामि, शर्वं देवं तर्पयामि, ईशानं देवं तर्पयामि, पशुपतिं देवं तर्पयामि, रुद्रं देवं तर्पयामि, उग्रं देवं तर्पयामि, भीमं देवं तर्पयामि, महान्तं देवं तर्पयामि—इति तर्पयित्वाऽथैतानि वस्त्र-यज्ञोपवीताचमनीयान्युदकेन व्याहृतिभिर्दत्त्वा, व्याहृतिभिः प्रदक्षिणमुदकं परिषिच्य 'नमस्ते रुद्र मन्यव' इति गन्धं दद्यात् । 'सहस्राणि सहस्रश' इति पुष्पं दद्यात् । 'ईशानं त्वां भुवनानामधिश्रियं' इत्यक्षतान् दद्यात् । सावित्र्या धूपम् । 'उद्दीप्यस्व' इति दीपम् । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां भगवते महादेवाय जुष्टं चरुं निवेदयामीति नैवेद्यम् । अथाष्टभिर्नामधेयैरष्टौ पुष्पाणि दद्यात् । भवाय देवाय नमः, शर्वाय देवाय नमः, ईशानाय देवाय नमः, पशुपतये देवाय नमः, रुद्राय देवाय नमः, उग्राय देवाय नमः,

---

१. All others except A. and I. read चण्डाय. २. I. reads महादेवं तर्पयामि. ३. B. C. E. F. and G. omit भीमं देवं तर्पयामि through mistake.

भीमाय देवाय नमः, महते देवाय नमः। विष्णवे नमः, ब्रह्मणे नमः, स्कन्दाय नमः, विनायकाय नमः, शूलाय नमः, महाकालाय नमः, उमायै नमः, नन्दिकेश्वराय नम इति। चरुशेषेणाष्टभिर्नामधेयैरष्टाहुतीर्जुहोति। भवाय देवाय स्वाहेत्यादिभिर्हुत्वाऽवशिष्टैर्गन्धमाल्यैर्ब्राह्मणानलंकृत्य अथैनं ऋग्यजुःसामभिः स्तुवन्ति। 'सहस्राणि सहस्रश' इत्यनुवाकं जपित्वाऽन्यांश्च रौद्रान्मन्त्रान्यथाशक्ति जपित्वा ॐ भूर्भुवः सुवरोमिति महादेवाय चरुमुद्वासयामीत्यादिभिरुद्वास्य। उद्वासनकाले ॐ भूः महादेवमुद्वासयामीति प्रतिमन्त्रं रुद्रमुद्वास्य।

प्रयातु भगवानीशः सर्वलोकनमस्कृतः।
अनेन हविषा तृप्तः पुनरागमनाय च॥

पुनः सन्दर्शनाय वेति। प्रतिमास्थानेष्वप्स्वग्नावावाहन-विसर्जनवर्जं सर्वं समानम्। महत्स्वस्त्ययनमित्याचक्षत इत्याह भगवान् बौधायनः'।

इति। शिवार्चनं प्रशंसति नन्दिकेश्वरः—

---

१. B. C. F. insert एकैकम् after यथाशक्ति. २ B. C. and F. read स्वर्महरोम्. ३. In the marginal correction of H. appears the following portion—चरुमुद्वासयामीति चरुमुद्वास्य अमृतापिधानमसीति प्रतिपदं कृत्वा त्र्यम्बकमित्याचमनीयं दद्यात्. I. omits उद्वासयामीति. ४. B. C. and F. give detail and read ॐ भूर्महादेवमुद्वासयामि, ॐ भुवर्महादेवमुद्वासयामि, ॐ स्वर्महादेवमुद्वासयामि, ॐ भूर्भुवःस्वर्महादेवमुद्वासयामि.

'यः प्रदद्यात् गवां लक्षं दोग्ध्रीणां वेदपारगे ।
एकाहमर्चयेल्लिङ्गं तस्य पुण्यं ततोऽधिकम् ॥
सकृत् पूजयते यस्तु भगवन्तमुमापतिम् ।
तस्याऽश्वमेधादधिकं फलं भवति भूसुराः' ॥

इति । निर्माल्यगन्धोऽपि धार्यः । 'देवानभ्यर्च्य गन्धेन' इत्यादि स्मृतिविधानात् । देवार्चनाकरणे दोषः कूर्मपुराणेऽभिहितः—

'यो मोहादथवाऽऽलस्यादकृत्वा देवताऽर्चनम् ।
भुङ्क्ते स याति नरकं सूकरेष्वभिजायते' ॥

इति । (कू. पु. १. २. १८. १२१)

॥ इति देवतापूजाप्रकरणम् ॥

अथ गुरुपूजाप्रकरणम् । इत्थं मूलवचनोक्तं देवतापूजनं निरूपितम् । 'देवतानां च'— इति चकारेण गुरुं समुच्चिनोति । गुरोरपि देवतावत् पूजनीयत्वात् । अत एव श्रुतिः—

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः' ॥
(श्वे. उ. ६. २३)

इति । शैवपुराणेऽपि—

१. D. reads संप्रदद्यात. २. B. C. D. E. F. H. and I. read अस्याश्व; while G. read अश्वमेधादप्यधिकं. ३. Except A. and I. all others omit the following portion-निर्माल्यगन्धोऽपि धार्यः। 'देवानभ्यर्च्य गन्धेन' इत्यादिस्मृतिविधानात्. ४. I. reads -प्याषि. ५. I. reads एवम्. ६. I. reads -वचनोक्तदेवतापूजनम. ७. G. and H. read देववत्. ८. This latter half [illegible] in all others except A. and I. ९. अपि is omitted in I.

'यो गुरुः स शिवः प्रोक्तो यो मन्त्रः स च शङ्करः।
शिव-विद्या*-गुरूणां च भेदो नास्ति कथञ्चन॥
शिवे मन्त्रे गुरौ यस्य भावना सदृशी भवेत्।
भोगो मोक्षश्च सिद्धिश्च शीघ्रं तस्य भवेद्ध्रुवम्॥
वस्त्राभरण-माल्यानि शयनान्यासनानि च।
प्रियाणि चात्मनो यानि तानि देयानि वै गुरोः।
तोषयेत्तं प्रयत्नेन मनसा कर्मणा गिरा'॥

(शि. पु. ९. १. ११९६–२०)

इति। मनुरपि–

'इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्।
गुरुशुश्रूषया चैवं ब्रह्मलोकं समश्नुते॥
सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः।
अनादृताश्च यस्यैते सर्वास्तस्याफलाः क्रियाः॥
यावत् त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत्।
तेष्वेव नित्यं शुश्रूषां कुर्यात् प्रियहिते रतः'॥

इति। (म. स्मृ. २. २३३–२३५)

॥ इति गुरुपूजाप्रकरणम् ॥

* विद्याशब्देनात्र मन्त्रो ग्राह्यः। अग्रेऽपि तथैवोक्तत्वात्।

१. Except A. B. C. and F. others read यः शिवः for यो मन्त्रः, but the form reading is a mistake. २. The text of Manu substitutes तु for च. ३. The text of Manu substitutes तु for च.

अथ वैश्वदेवप्रकरणम् । तत्र पञ्चमभागकृत्यमाह दक्षः–

'पञ्चमे च तथा भागे संविभागो यथार्हतः ।
पितृ-देव-मनुष्याणां कीटानां चोपदिश्यते' ॥
(द. स्मृ. २. ४२)

इति । यद्यपि 'आतिथ्यं वैश्वदेवं च'– इत्यातिथ्यस्य पूर्वभावित्वं मूलवचनोक्तं तथापि वैश्वदेवस्य देवपूजाऽनन्तरभावित्वं नृसिंहपुराणेऽभिहितम्–

'पौरुषेण च सूक्तेन ततो विष्णुं समर्चयेत्[1] ।
वैश्वदेवं ततः कुर्याद्बलिकर्म तथैव च[2]' ॥
(नृ. पु. ५८. ९३)

इति । तत्र–'ततः'–इति पञ्चमीश्रुत्या क्रमः प्रतीयते । मूलवचने तु पाठमात्रेण । पाठात्तत्सन्निधिरूपाच्छ्रुतिर्बलीयसी –इति श्रुतिलिङ्गसूत्रे (पू. मी. ३. ३. १४) व्यवस्थापितम् । तस्माद्वैश्वदेवः प्रथमं कर्त्तव्यः । एवं च सति वेदपाठोऽप्यनुगृहीतो भवति ।

'देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञः' ।
(आ. गृ. सू. ३. १. २)

इति–स्मार्त्ताच्च पाठाद्वैदिकः पाठो बलीयानिति विरोधाधिकरण- (पू. मी. १. ३. २) न्यायेनावगम्यते । तस्मादपि वैश्वदेवस्य प्राथम्यम् । तत्र वैश्वदेवं विधत्ते व्यासः–

---

१. The text of Nrisinha Purâṇa reads this as follows:—
विधिना पुरुषसूक्तेन तत्र विष्णुं समर्चयेत् ।.

२. The text of Nrisinha Purâṇa reads यथाविधि for तथैव च. ३. तत् is omitted in all others except A. and I. ४. A. reads पाठान्तरनिरूपिका श्रुतिर्बलीयसी.

'वैश्वदेवं प्रकुर्वीत स्वशाखाविहितं ततः ।
संस्कृतान्नैर्हविर्भिर्हविष्यै-व्यञ्जनान्वितैः ॥
तैरेवाऽन्नैर्बलिं दद्याच्छेषमाप्लाव्य वारिणा ।
कृताऽपसव्यः स्वधया कव्यं दक्षिणतो हरेत्' ॥

इति । ततो देवार्चनानन्तरमित्यर्थः । नारायणोऽपि–

'सभार्यस्तु शुचिः स्नातो विधिना ऽचम्य वाग्यतः ।
प्रविश्य* सुसमिद्धेऽग्नौ वैश्वदेवं समाचरेत्' ॥

इति । कूर्मपुराणेऽपि–

'शालाग्नौ लौकिके वाऽथ जले भूम्यामथापि वा ।
वैश्वदेवस्तु कर्त्तव्यो देवयज्ञः स वै स्मृतः ॥
यदि स्याल्लौकिके पाकस्ततोऽन्नं तत्र हूयते ।
शालाग्नौ तु पचेदन्नं विधिरेष सनातनः' ॥
(कू. पु. १.२.१८.१०६-१०७)

इति । अङ्गिराऽपि–

'शालाग्नौ वा पचेदन्नं लौकिके वाऽपि नित्यशः ।
यस्मिन्नग्नौ पचेदन्नं तस्मिन् होमो विधीयते' ॥

इति । शातातपोऽपि–

'लौकिके वैदिके वाऽपि हुतोत्सृष्टे जले क्षितौ ।
वैश्वदेवस्तु कर्त्तव्यः पञ्चसूना अपनुत्तये' ।

* 'प्रविश्य' गृहमग्न्यागारं वेत्यर्थः ।

१. D. हविर्भिर्व्यञ्जनान्वितैः. २. I. reads कृत्वाऽपसव्यं. ३. All the except A. B. C. and F. read सर्वं दक्षिणतो: while I. सर्वंदक्षिणतं ४. The text of Kûrma Purâṇa reads पक्वं for पाक. ५. The text Kûrma Purâṇa reads तत्र देवान्नं, B. C. E. F. and G. read तस्यान्नेनान्नम्. I तत्र चेदन्नम् and D. न स्यचेदन्नं. ६. D. omits the following विधिरेष सनातन' ॥ इति । अङ्गिरा अपि–'शालाग्नौ वा पचेदन्नं लौकिके वाऽपि नित्यशः यस्मिन्नग्नौ पचेदन्नं. ७. अपि is omitted by A. ८. शातातपोऽपि omitted by D. ९. D. reads हुतौ सृष्टे.

इति । सूनाः पञ्च दर्शयति यमः—

'पञ्च सूना गृहस्थस्य वर्त्तन्ते ऽहरहः सदा ॥
कण्डनी पेषणी चुल्ली जलकुम्भ उपस्करः ॥
एतानि वाहयन् विप्रो वध्यते वै मुहुर्मुहुः ।
एतासां पावनार्थाय पञ्चयज्ञाः प्रकल्पिताः' ॥

इति । सूना हिंसास्थानानि । कण्डनी मुसलोलूखलादिः । पेषणी दृषदुपलादिः । चुल्ली पाकस्थानम् । जलकुम्भः उदकस्थानम् । उपस्करः शूर्पादिः । अवस्करः—इति पाठे मार्जन्यादिर्द्रष्टव्यः । एताः सूनाः स्वस्वकार्ये प्रापयन् पापेन युज्यते इत्यर्थः। तत्र कालद्वयेऽपि वैश्वदेवःकर्त्तव्य इत्याह कात्यायनः—

'सायं-प्रातर्वैश्वदेवः कर्त्तव्यो बलिकर्म च ।
अनश्नताऽपि सततमन्यथा किल्बिषी भवेत्' ॥

(का. स्मृ. २. १३. १०)

इति । होमप्रकारमाह आश्वलायनः—

'अथ सायं प्रातः सिद्धस्य हविष्यस्य जुहुयात् । (१) अग्निहोत्रदेवताभ्यः सोमाय वनस्पतये अग्नी-षोमाभ्यामिन्द्राग्निभ्यां द्यावा-पृथिवीभ्यां धन्वन्तरय इन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे (२) स्वाहा' ।

(आ. गृ. सू. १.२. १. ३)

इति । हविष्यस्येति हविर्योग्यस्येत्यर्थः । अग्निहोत्रदेवताभ्यः सूर्याग्नि-प्रजापतिभ्य इत्यर्थः । आपस्तम्बो ऽपि—

---

१. A. D. E. and G. read खण्डनी. २. B. C. D. and G. read बध्यते. ३. B. C. and F. read एतेषां, but it seems to be incorrect. ४. I. reads प्रकीर्तिता. ५. A. B. C. D. E. F. and G. read खण्डनी. ६. D. reads तस्य; while I. reads नद्य.

'औपासने पचने वा षड्भिराद्यैः प्रतिमन्त्रं
हस्तेन जुहुयात्। (१६) उभयतः परिषेचनं
यथा पुरस्तात्'।

(आ. ध. सू. २.२. ३. १६.-१७)

इति। आद्यैरनुवाकादावुक्तैः 'अग्नये स्वाहा' इत्यादिभिः स्विष्टकृदन्तैः। उभयतः कर्मादावन्ते चेत्यर्थः। पारस्करोऽपि—

'वैश्वदेवादन्नात् पर्युक्ष्य स्वाहाकारैर्जुहुयात्।
ब्रह्मणे प्रजापतये गृह्याभ्यः काश्यपायानुमतये'।

(पा. गृ. सू. २. ९. २)

इति। अत्र यथास्वशाखं व्यवस्था। होतव्यान्नसंस्कारमाह व्यासः—

'जुहुयात् सर्पिषाऽभ्यक्तं तैल-क्षारविवर्जितम्।
दध्यक्तं पयसाऽक्तं वा तदभावेऽम्बुनाऽपि वा'॥

इति। द्रव्यानुकल्पश्चतुर्विंशतिमते दर्शितः—

'अलाभे येन केनापि फल-शाकोदकादिभिः॥
पयो-दधि-घृतैः कुर्याद्वैश्वदेवं स्रुवेण तु।
हस्तेनान्नादिभिः कुर्यादद्भिरञ्जलिना जले'॥

इति। यदद्यते तेनैव होतव्यम्। तदुक्तं गृह्यपरिशिष्टे—

---

१. Except A. and I. all others read उपासने, but it is incorrect. २. B. C. E. F. and G. read अग्नौ अनुवाकादावुक्तैरग्नये स्वाहेत्यादिभि. D. reads अग्नौ अनुवाकानुक्तैरग्नये स्वाहेत्यादिभि:; while H. reads आद्यैरनुवाकादावुक्तैरग्नये स्वाहेत्यादिभिः, all these for आद्यैरनुवाकादावुक्तैरग्नये स्वाहा इत्यादिभिः स्विष्टकृदन्तैः। उभयतः कर्मादावन्ते चेत्यर्थः। पारस्करोऽपि. ३. B. C. D. E. F. G. and I. read काश्यपायाग्नौ. H. also reads the same, but there is a margin correction. ४. I. reads वैश्वदेवादन्नात through mistake. ५. D. E. and G. read गृह्येभ्यः, and H. I. read गृह्यभ्यः. ६. I. reads काश्यपाया-.

'शाकं वा यदि वा पत्रं मूलं वा यदि वा फलम् ।
सङ्कल्पयेद् यदाहारस्तेनैव जुहुयादपि' ॥

इति । क्षार-लवणा-ऽवरान्नसंसृष्टेना ऽहविष्येण होमो ऽग्नौ न कार्यः । किन्तूष्णं भस्माग्न्यायतनादुत्तरतो ऽपोह्य तस्मिन् होतव्यम् । तदाहाऽऽपस्तम्बः—

'न क्षार-लवणहोमो विद्यते । तथा ऽवरान्न-संसृष्टस्य च । अहविष्यस्य होम उदीचीन-मुष्णं भस्मा ऽपोह्य तस्मिन् जुहुयात्तद्धुतम-हुतं चाग्नौ भवति' ।

(आ. ध. सू. २. ६. १५. १३–१७)

इति । परिशिष्टे ऽपि—

'उत्तानेन तु हस्तेन ह्यङ्गुष्ठाग्रेण पीडितम् ।
संहताङ्गुलिपाणिस्तु वाग्यतो जुहुयाद्धविः' ॥

इति । अनग्निकस्य वैश्वदेवे विशेषमाह वृद्धवसिष्ठः—

'अनग्निकस्तु यो विप्रः सो ऽन्नं व्याहृतिभिः स्वयम् ।
हुत्वा शाकलमन्त्रैश्च शिष्टं काकबलिं हरेत्' ॥

इति । 'देवकृतस्यैनस' इत्याद्याः शाकलमन्त्राः । विष्णुरपि—

'अन्नं व्याहृतिभिर्हुत्वा हुत्वा मन्त्रैश्च शाकलैः ।
प्रजापतेर्हविर्हुत्वा पूजयेदतिथिं ततः' ॥

इति । भूतयज्ञः कूर्मपुराणे दर्शितः—

---

१. B. C. D. E. F. G. H. and I. read परान्नसंसृष्टस्य २. I. reads हविष्यस्य होमः, but this is a mistake. ३. All others except A. and I. omit 'देवकृतस्यैनस' इत्याद्या शाकलमन्त्राः ४. D substitutes स्वय for हुत्वा.

'देवेभ्यस्तु हुतादन्नाच्छेषाद्भूतबलिं हरेत्।
भूतयज्ञः स वै ज्ञेयो भूतिदः सर्वदेहिनाम्'॥
(कू. पु. १. २. १८. १०८)

इति। हारीतोऽपि—
'वास्तुपाल-भूतेभ्यो बलिहरणं भूतयज्ञः'।
(हा. स्मृ. १५. ३)

इति। कात्यायनोऽपि—
'उद्धृत्य हविरासिच्य हविष्येण घृतादिना।
स्वशाखाविधिना हुत्वा तच्छेषेण बलिं हरेत्'॥
(का. स्मृ. २. १३. ७)

इति। गौणकर्तृनाहात्रिः—
'पुत्रो भ्राताऽथ वा ऋत्विक् शिष्य-श्वशुर-मातुलाः।
पत्नी-श्रोत्रिय-याज्याश्च दृष्टास्तु बलिकर्मणि'॥

इति। गृहे कर्त्रन्तराभावे प्रवसता स्वयमेव कर्त्तव्यमित्याह बोधायनः—
'प्रवासं गच्छतो यस्य गृहे कर्त्ता न विद्यते।
पञ्चानां महतामेषां स यज्ञैः सह गच्छति'॥

इति। बलिहरणप्रकारमाहाऽऽश्वलायनः—

---

१. The text of Kûrma Purâṇa substitutes च for तु २. The text of Kûrma Purâṇa reads स विज्ञेयो. ३. This verse is not found in a printed copy of Kâtyâyana-Smṛiti, but it is found in our Telgu manuscript. ४. D. reads -आर्षीय-. ५. B. C. and F. read शक्तः; H. also reads the same, but the marginal correction is शौनक. ६. D. and I. read शौनक. for आश्वलायनः.

'अथ बलिहरणम् ।(३) एताभ्यश्चैव देवताभ्यो ऽद्भ्य ओषधि-वनस्पतिभ्यो गृहाय गृहदेवताभ्यो वास्तुदेवताभ्यः ।(४) इन्द्रायेन्द्रपुरुषेभ्यो यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यः सोमाय सोमपुरुषेभ्यः-इति प्रतिदिशम् ।(५) ब्रह्मणे ब्रह्मपुरुषेभ्यः—इति मध्ये । (६) विश्वेभ्यो देवेभ्यः। (७) सर्वेभ्यो भूतेभ्यो दिवाचारिभ्य-इति दिवा। (८) नक्तंचारिभ्य—इति नक्तम् । (९) रक्षोभ्य —इति उत्तरतः । (१०) स्वधा पितृभ्यः—इति प्राचीनावीती शेषं दक्षिणा निनयेत्[१] ।

(आ. गृ. सू. १. २. ३–११)

इति । आपस्तम्बो ऽपि—

'अपरेणाग्निं सप्तमाष्टमाभ्यामुदगपवर्गम्[२] । (२०) उदधानसन्निधौ नवमेन । (२१) मध्येऽगारस्य दशमैकादशाभ्यां प्रागपवर्गम् । (२२) उत्तरपूर्वदेशे ऽगारस्योत्तरैश्चतुर्भिः। (२३।३) शय्यादेशे कामलिङ्गेन । (१) देहल्यामन्तरिक्षलिङ्गेन । (२) उत्तरेणापिधान्याम् । (३) उत्तरैर्ब्रह्मसदने[३] । (४) दक्षिणतः पितृलिङ्गेन[४] प्राचीनावीती । अवाचीनपाणिः कुर्यात् । (५)

---

१. A. reads दक्षिणायां. २. उदगपवर्गम is omitted by all others excep A. I. and the text of Âpastamba. ३. लिङ्गेऽन्युत्तरापिधान्यामुत्तरब्रह्मसद is the reading of B. C. F. E., and G. उत्तरं ब्रह्मसदने. ४. D omits th portion देहल्यामन्तरिक्षलिङ्गेन । उत्तरेणापिधान्याम् । उत्तरैर्ब्रह्मसदने । दक्षिणत पितृलिङ्गेन.

रौद्र उत्तरतो यथा देवताभ्यः। (६) तयोर्नाना परिषेचनं धर्मभेदात्। (७) नक्तमेवोत्तरेणं वैहायसम्'। (८)

(आ. ध. सू. २. २. ३-४. १०-,८)

इति। मार्कण्डेयपुराणे ऽपि-

'एवं गृहबलिं कृत्वा गृहे गृहपतिः शुचिः॥
आप्यायनाय भूतानां कुर्यादुत्सर्गमादरात्'।

(मा. पु. २९. २२-२३)

इति। कूर्मपुराणे च-

'श्वभ्यश्च श्वपचेभ्यश्च पतितेभ्यस्तथैव च।
दद्याद्भूमौ बहिश्चान्नं पक्षिभ्यो ऽथ द्विजोत्तमाः॥

(कू. पु. १. २. १८. १०१)

इति। मनुरपि-

'शुनां च पतितानां च श्वपचां पापरोगिणाम्।
वायसानां कृमीणां च शनकैर्निर्वपेद्भुवि॥

(म. स्मृ. ३. ९२)

इति। अन्नमिति शेषः। अन्नोत्सर्गमन्त्रो विष्णुपुराणे दर्शितः-

---

१. The text of Âpastamba reads उत्तरतो. २. I. adds तयोः before धर्म-. ३. The text reads -मेवोत्तमेन. ४. B. C. E. and F. read मार्कण्डेयेऽपि, H. and I. मार्कण्डेयोऽपि. ५. The text of Kûrma Purâṇa reads पतितादिभ्य एव च. ६. The text of Kûrma Purâṇa reads पक्षिभ्यो द्विजसत्तमाः; while G. and H. द्विजोत्तमः. ७. D. reads ऽभिहितः

[१] देवा मनुष्याः पशवो वयांसि
सिद्धाः सयक्षोरग-दैत्यसङ्घाः ।
प्रेताः पिशाचास्तरवः समस्ता
ये चाऽन्नमिच्छन्ति मयाऽन्नं[२] दत्तम् ॥
पिपीलिकाः कीट-पतङ्गकाद्या
बुभुक्षिताः कर्मनिबन्धबद्धाः ।
प्रयान्तु ते[४] तृप्तिमिदं मया ऽन्नं
तेभ्यो विसृष्टं[३] सुखिनो भवन्तु ॥
येषां न माता न पिता न बन्धुर्
नैवान्नसिद्धिर्न तथाऽन्नमस्ति ।
तत्तृप्तये ऽन्नं भुवि दत्तमेतत्
प्रयान्तु[५] तृप्तिं मुदिता भवन्तु ॥
भूतानि सर्वाणि तथा ऽन्नमेतत्
अहं च विष्णुर्न ततो ऽन्यदस्ति ।
तस्मादिदं भूतहिताय[६] भूमौ
अन्नं प्रयच्छामि भवाय[७] तेषाम् ॥
चतुर्दशो लोकगणो य एष
तत्र स्थिता ये किल भूतसङ्घाः ।

---

१. D. substitutes च for स-. २. I. reads प्रदत्तम्. the text of Vishṇu Purâṇa follows the same reading. ३. The text of Vishṇu Purâṇa reads निसृष्टं. ४. B. C. and F. read ते यान्तु. ५. The text of Vishṇu Purâṇa reads यतां. ६. The text of Vishṇu Purâṇa reads -निकायभूतं for -हिताय भूमौ, and all others except D. substitute भूतम् for भूमौ. ७. G. reads -म्यभवाय; while D. हिताय.

तृप्त्यर्थमन्नं हि मया विसृष्टं
तेषामिदं ते मुदिता भवन्तु ॥
इत्युच्चार्य नरो दद्यादन्नं श्रद्धासमन्वितः ।
भुवि भूतोपकाराय गृही सर्वाश्रयो यतः' ॥
(वि. पु. ३. ११. ४७–५३)

इति । पितृयज्ञः श्रुत्या दर्शितः—
'यत् पितृभ्यः स्वधाकरोत्यप्यप-
स्तत् पितृयज्ञः सन्तिष्ठते' ।

इति । कात्यायनोऽपि—
'अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥
श्राद्धं वा पितृयज्ञः स्यात् पित्र्यो बलिरथापि वा' ।
(का. स्मृ. २. १३. ३–४)

इति । अत्र यथास्वशाखं व्यवस्था । श्राद्धं चात्र नित्य-श्राद्धम् । तथा च कूर्मपुराणम्—
'एकं तु भोजयेद्विप्रं पितृनुद्दिश्य सत्तम ।
नित्यश्राद्धं तदुद्दिष्टं पितृयज्ञो गतिप्रदः' ॥
(कू. पु. १. २. १८. १११)

इति । मार्कण्डेयेऽपि—

---

१. B. C. and F. read स्वधां for स्वधा-. २. I. reads पित्र्यो. ३. I. omits च. ४. The text of Kûrma Purâṇa reads सत्तमम्. ५. Except A. and D. all others read मार्कण्डेयोऽपि.

'कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पितृनुद्दिश्य विप्रांस्तु भोजयेद्विप्रमेव वा' ॥
(मा. पु. २९. ३३)

इति । नित्यश्राद्धप्रकारो मत्स्यपुराणे दर्शितः—

'नित्यं तावत् प्रवक्ष्यामि अर्घ्यावाहनवर्जितम् ।
अदैवं तद्विजानीयात् पार्वणं पर्वसु स्मृतम्' ॥
(म. पु. १६. ५–६.)

इति । प्रचेताः—

'नावाहनाग्नौकरणं न पिण्डो न विसर्जनम्' ।

इति । व्यासोऽपि—

'नित्यश्राद्धे ऽर्घ्य-गन्धाद्यैर्द्विजानभ्यर्च्य शक्तितः ।
सर्वान् पितृगणान् सम्यक् सहैवोद्दिश्य भोजयेत् ॥
आवाहन-स्वधाकार-पिण्डाग्नौकरणादिकम् ।
ब्रह्मचर्यादिनियमा विश्वेदेवास्तथैव च ॥
नित्यश्राद्धे त्यजेदेतान् भोज्यमन्नं प्रकल्पयेत् ।
दत्त्वा तु दक्षिणां शक्त्या नमस्कारैर्विसर्जयेत् ।
एकमप्याशयेन्नित्यं षण्णामप्यन्वहं गृही' ॥

इति । कात्यायनस्तु तत्रानुकल्पमाह—

'एकमप्याशयेद्विप्रं पितृयज्ञार्थसिद्धये ।
अदैवं नास्ति चेदन्यो भोक्ता भोज्यमथापि वा ॥

---

१. Here all others except A. and the text of Matsya Purâṇa have made a mistake. B. C. E. F. G. H. and I. read पार्वणं तद्धि कीर्तितम्; while D. reads पार्वणे न हि कीर्तितम् २. I. reads पिण्डं. ३. D. and G. read सर्वैप्सितगुणान. ४. I. omits तु, and G. H. read अत्र for तत्र. ५. All others except A. read नित्यं for विप्रं.

अभ्युद्धृत्य यथाशक्ति किञ्चिदन्नं यथाविधि ।
पितृभ्यो ऽथ मनुष्येभ्यो दद्यादहरहर्द्विजे ॥
पितृभ्य इदमित्युक्त्वा स्वधाकारमुदाहरेत् ।
हन्तकारं मनुष्येभ्यस्तदर्द्धे निनयेदपः ॥

(का. स्मृ. २. १३. ६८)

इति । उद्धृतमन्नं ब्राह्मणाय दद्यात् । तदुक्तं कूर्मपुराणे—

'उद्धृत्य वा यथाशक्ति किञ्चिदन्नं समाहितः ।
वेदतत्त्वार्थविदुषे द्विजायैवोपपादयेत्' ॥

(कू. पु. १. २. १८. ११२)

इति । त एते देवयज्ञ-भूतयज्ञ-पितृयज्ञाख्ययोऽपि वैश्वदेवशब्देनोच्यन्ते । यत्र विश्वेदेवा इज्यन्ते तद्वैश्वदेविकं कर्म । देवयज्ञे च—

'विश्वेभ्यो देवेभ्यः स्वाहा' ।

(आ. गृ. सू. १. २. २–३.)

इति पठितत्वात् तत्रैतन्नाम मुख्यम् । येषां तु शाखायां भूतयज्ञे ऽप्ययं मन्त्रो ऽस्ति तेषां तत्राप्येतन्मुख्यम् । पितृयज्ञे

---

१. B. C. D. E. F. and G. read अभ्युद्धृत्य, also the text of Kâtyâyana reads the same. २. Except A. and the text of Kâtyâyana all others omit this line. ३. The text reads उदीरयेत् for उदाहरेत्. ४. This line is omitted by all except A. D. and the text of Kâtyâyana. ५. After this line D. adds—

तथास्मै ब्राह्मणायेति दत्त्वा भुञ्जीत वाग्यतः ।

६. After this word I. adds—

'दद्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पयो-मूल-फलैर्वाऽपि पितृभ्यः प्रीतिमावहन्' ॥

This is a repetition of a verse of Mârkaṇḍeya Purâṇa.

तु छत्रिन्यायेन तन्नामप्रवृत्तिः । अथवा मूलवचने 'वैश्वदेवं च'—इति चकारेण पितृयज्ञादिकमनुक्तं समुच्चीयते । यद्यपि—

'सायं प्रातःसिद्धस्य हविष्यस्य जुहुयात्' ।

(आ. गृ. सू. १. २. १)

इति वचनेन वैश्वदेवस्यान्नसंस्कारता प्रतीयते तथापि पुरुषार्थत्वमेवाभ्युपेयम् ।

'तानेतान्यज्ञानहरहः कुर्वीत' ।

(आ. गृ. सू. ३. १. ४)

इति वाक्यशेषे तदवगमात् । न चोभयार्थत्वं शङ्कनीयम् । परस्परविरोधात् । अन्नसंस्कारत्वे ह्यन्नस्य प्राधान्यम् । वैश्वदेवस्य गुणता । पुरुषार्थत्वे तु तद्विपर्ययः । तथा च सति एकस्यैव युगपत् प्राधान्यं गुणत्वं च विरुद्ध्येयाताम् । तर्ह्यस्त्वन्नसंस्कारतैव । मा भूत् पुरुषार्थत्वम्—इति चेत् । तन्न ।

'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः' ।

(म. स्मृ. २. २८)

इति मनुना पुरुषार्थत्वस्मरणात् । यत्तु—

'सिद्धस्य हविष्यस्य जुहुयात्' ।

(आ. गृ. सू. १. २. १)

इत्युदाहृतं तदन्यथाप्युपपद्यते । तत्र जुहुयादित्युत्पत्तिविधिः । सिद्धस्य हविष्यस्येति विनियोगः । तानेतानहरहः कुर्वीतेत्यधिकारः । किञ्च अन्नसंस्कारपक्षे प्रतिपाकमावृत्तिः प्रसज्येत ।

---

१. D. reads कस्मिकन्यायेन. २. H. omits च. ३. D. reads कुरुते. ४. I. reads विनियोगविधिः.

'प्रतिप्रधानं गुणावृत्तिः'।

इति न्यायात्। तस्मात् पुरुषार्थत्वमेव न्याय्यम्। अत एव गृह्यपरिशिष्टे ऽभिहितम्—

'प्रोषितो ऽप्यात्मसंस्कारं कुर्यादेवाऽविचारयन्'।

इति। गोभिलो ऽपि—

'यद्येकस्मिन् काले व्रीहि-यवौ पच्येयातां अन्यतरस्य हुत्वा कृतं मन्येत। यद्येकस्मिन् काले पुनः पुनरन्नं पच्येत सकृदेव[1] बलिं कुर्वीत। यद्येकस्मिन् काले बहुधाऽन्नं[2] पच्येत गृहपतिमहानसादेवैकं[3] बलिं कुर्वीत'।

इति। अयमर्थः—नानाद्रव्यकान्नपाके पुनः पुनरन्नपाके ऽपि बहूनामविभक्तानां भ्रात्रादीनां पृथक् पृथक् पाके[4] ऽपि एकस्मादेव द्रव्यात् सकृदेव गृहपतिपाकादेव होतव्यमिति।

॥ इति वैश्वदेवप्रकरणम् ॥

अथातिथ्यापरनामको मनुष्ययज्ञो निरूप्यते। आतिथ्यस्य मनुष्ययज्ञत्वं कात्यायनेनोक्तम्—

'अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो[5] नृयज्ञो ऽतिथिपूजनम्'।

(का. स्मृ. २. १३. ३)

इति। श्रुतिरपि—

'यद्ब्राह्मणेभ्योऽन्नं ददाति तन्मनुष्ययज्ञः सन्तिष्ठते'।

इति। बौधायनोऽपि—

१. All others except A. and I. read सकृदेकं. २. D. reads बहुविधाऽन्नं. ३. I. reads -देवैतं. ४. Except A. and I. all others add ऽपि after -पाके. ५. All others except A. and the text of Kâtyâyana read बलिर्भूतो.

'अहरहर्ब्राह्मणेभ्योऽन्नं दद्यादा मूल-फलशा-
केभ्यस्तथैतं मनुष्ययज्ञं समाप्नोति'।
(बौ. स्मृ. २. ९. ११. ९)

इति। कार्ष्णाजिनिरपि—

'भिक्षां वा पुष्कलां[1] वाऽपि हन्तकारमथापि वा।
असम्भवे तथा[2] दद्यादुदपात्रमथापि[3] वा'॥

इति। कूर्मपुराणेऽपि—

'हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः।
दद्यादतिथये नित्यं बुद्ध्येत परमेश्वरम्'॥
(कू. पु. १. २. १८. १४४)

इति। भिक्षादिलक्षणं मनुराह[4]—

'ग्रासमात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयम्।
अग्रं चतुर्गुणीकृत्य हन्तकारो विधीयते'॥
(मा. पु. २९. ९३.)

इति। अतिथिनिरीक्षणाय गृहांगणे कंचित्कालं तिष्ठेदित्युक्तं मार्कण्डेयपुराणे—

---

१. All others except A. and H. read पुष्कलं, but it does not give any meaning. २. A. and D. read सदा for तथा; while B. C. E. F. and G. read असम्भवेन वा for असम्भवे तथा. ३. D. reads उपपात्रं for उदपात्रं. ४. All manuscripts read मनुराह; but the following quotation does not appear in the text of Manu. It is found in Mârkaṇḍeya Purâṇa and also in Kûrma Purâṇa. The latter reads as follows:—

'भिक्षामाहुर्ग्रासमात्रामग्रं तस्याश्चतुर्गुणम्।
पुष्कलं हन्तकारं तु तच्चतुर्गुणमिष्यते'॥.

९. D. omits the following portion—

आचम्य च ततः कुर्यात् प्राज्ञो द्वारावलोकनम्।
मुहूर्तस्याष्टमं भागमुदीक्ष्यो ह्यतिथिर्भवेत्॥

इति। विष्णुपुराणे.

'आचम्य च ततः कुर्यात् प्राज्ञो द्वारावलोकनम् ॥
मुहूर्त्तस्याष्टमं भागमुदीक्ष्यो ह्यतिथिर्भवेत्' ।

(मा. पु. २९. २४–२५)

इति । विष्णुपुराणेऽपि–

'ततो गोदोहमात्रं वै कालं तिष्ठेद् गृहाङ्गणे ।
अतिथिग्रहणार्थाय तदर्धं वा यथेच्छया' ॥

(वि. पु. ३. ११. ५५)

इति ।

॥ इति मनुष्ययज्ञः ॥

तदेवं 'सन्ध्या स्नानम्'– इत्यस्मिन् मूलवचने स्नानादीन्यातिथ्यान्तानि षट् कर्माणि निरूपितानि ।

न चात्र सप्तत्वप्रतिभानात् षट्त्वं विरुद्धमिति शङ्कनीयम् । सम्मार्गन्यायेनोद्देश्यगतायाः संख्याया अविवक्षितत्वात् । यानि कर्माणि उद्देश्यगतानि तानि दिनेदिने कर्त्तव्यानीति तेषां नित्यत्वविधानात् । सम्मार्गन्यायश्च तृतीयाध्याये प्रतिपादितः ।

ज्योतिष्टोमे– 'दशापवित्रेण ग्रहं सम्मार्ष्टि'– इति श्रूयते । तत्र संशयः–किमेकस्य सम्मार्गः किंवा सर्वेषां? इति । तदर्थं चिन्ता– किमत्रोद्देश्यगता संख्या विवक्षिता उताऽविवक्षिता? इति । यथा–'पशुना यजेत'– इत्यत्र एकवचनश्रुतिबलादुपादे-

१. I. reads here and in some of the following lines सन्मार्ग instead of सम्मार्ग–, but it is a mistake. २. All others except A. and I. read यानि कर्माणीत्युद्दिश्य तानि दिनेदिने. but it seems to be incorrect. ३. D. reads निरूपितः. ४. B. C. and F. read दशापवित्रेण. ५. All others except A. and I. read तदर्थं किमुद्देश्यगता संख्या विवक्षिता नेति for तदर्थं चिन्ता किमत्रोद्देश्यगता संख्या विवक्षिता उताऽविवक्षितेति.

यपशुगता संख्या विवक्षिता। तथैव ग्रहमित्येकवचनश्रुति-बलादुद्देश्यगता ऽपि संख्या विवक्षिता भवितुमर्हति। तस्मादेकस्यैव ग्रहस्य सम्मार्गे प्राप्ते ब्रूमः। पशोरनेनैव वचनेन यागसम्बन्धावगमात् यागंप्रति पशोर्गुणीभूतत्वात् यावद्गुणं प्रधानावृत्त्यभावात् कियता पशुनेत्यवच्छेदकाकाङ्क्षायां तदवच्छेदकत्वेनैकत्व संख्या सम्बद्ध्यते– इत्युपादेयगतायाः संख्यायाः विवक्षितत्व युक्तम्। ग्रहाणां तु वाक्यान्तरेण यागसम्बन्धावगमात् सम्मार्ग वाक्ये द्वितीयाश्रुत्या सम्मार्गंप्रति ग्रहस्य प्राधान्यावगमात् प्रतिप्रधानं गुणस्य सम्मार्गस्यावर्त्तनीयत्वात् कियन्तो ग्रहाः सम्मार्जनीया-इत्याकाङ्क्षाया अनुदयात् उद्देश्यग्रहगता संख्या न विवक्षिता। तस्मात् सर्वे ग्रहाः सम्मार्जनीयाः। प्रकृतेऽप्युद्देश्यसन्ध्यादिगता षट्त्वसंख्या न विवक्षिता।

अथोच्येत–अस्यां पराशरस्मृतौ वाक्यान्तरेण सन्ध्यादीनां निरूढ्यभावादनेनैव वाक्येन नित्यत्वविशिष्टानां तेषामुत्पादनादुपादेयगतत्वेन पश्वेकत्ववद्विवक्षितत्वमेव संख्याया युक्तं–इति। एवं तर्हि सन्ध्यासहितं स्नानं सन्ध्यास्नानमिति समासे सति अङ्गेन स्नानेन सहिताया अङ्गीभूतायाः सन्ध्याया एकत्वेन परिगणनादत्र षट्संख्या विरुध्यते–इति गमयितव्यम्।

सन्ध्यादीनां नित्यत्वं चाग्निहोत्रादिवत् यावज्जीवकर्त्तव्यतयाऽवगम्यते। जीवनवदधिकारत्वं च 'दिने दिने' – इति वी-

---

१. D. reads तद्ग्रहस्य. २. All others except A. I. read गुणभूतत्वात. ३. H. reads पशुनेति परिच्छेदकाकाङ्क्षायाः तत्परिच्छेदकत्वेनैकत्वसंख्या; while all others except A. and I. read त्यवच्छेदकाकाङ्क्षायां. ४. B. C. and

प्सया ऽवगम्यते। यथा—'वसन्ते वसन्ते ज्योतिषा यजेत'—इत्यत्र वीप्सया तदवगमस्तद्वत्॥ ३९॥

'आतिथ्यं वैश्वदेवं च' इत्युक्तं तत्र कीदृशो ऽतिथिरित्याकाङ्क्षायामाह—

इष्टो[1] वा यदि वा द्वेष्यो मूर्खः पण्डित एव वा।
सम्प्राप्तो वैश्वदेवान्ते[2] सोऽतिथिः स्वर्गसङ्क्रमः*[3]॥ ४०॥

इष्टः सख्यादिः। तस्य च भोजनीयत्वं याज्ञवल्क्येनोक्तम्—

'भोजयेच्चागतान् काले सखि-सम्बन्धि-बान्धवान्'।
(या. स्मृ. १. १०८)

इति। द्वेष्यस्य भोजनीयत्वं मनुना निन्दितम्—

'काममभ्यर्चयेन्मित्रं[4] नाभिरूपमपि त्वरिम्।
द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम्'॥
(म. स्मृ. ३. १४४)

इति। एवं सत्यरि-मित्रविवेको यथा क्रियते तथैवातिथावपि तत्प्रसक्तौ तन्निराकरणाय 'इष्टो वा यदि वा द्वेष्यः'-इत्युक्तम्। मूर्खस्य भोजनीयत्वं स्मृत्यन्तरे निषिद्धम्—

'नष्टशौचे व्रतभ्रष्टे विप्रे वेदविवर्जिते।
दीयमानं[5] रुदत्यन्नं किं मया दुष्कृतं कृतम्'॥
(व्या. स्मृ. ४. ६२)

इति। पण्डितस्य भोजनीयत्वं मनुना प्रशंसितम्[6]—

* धरणीधरस्तु—'सर्वसङ्क्रमः' अमुमेव पाठमाश्रित्य 'सर्वे सङ्क्रमाः स्वर्गादयो यस्मात्' इति व्याचख्यौ।

१. M. reads प्रियो for इष्टो. २. J. K. L. and M. read वैश्वदेवे तु सम्प्राप्तः. ३. K. and L. read सर्वसङ्क्रमः. ४. The text of Manu reads कामं श्राद्धेऽर्चयेन्मित्रं; while all others except A. and I. substitute the word नित्यं for मित्रं. ५. G. reads जीयमानं. ६. H. and I. read शंसितम् for प्रशंसितम्.

'श्रोत्रियायैव देयानि हव्य-कव्यानि दातृभिः ।
अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम्' ॥

(म. स्मृ. ३. १२८)

इति । एवं सति श्राद्धादाविव वैश्वदेवान्तेऽपि पण्डित-मूर्खविवेकप्रसक्तौ तन्निराकरणायोक्तं 'मूर्खः पण्डित एव वा'-इति । वैश्वदेवान्तशब्देन देवयज्ञ-भूतयज्ञ-पितृयज्ञानामुपरि घटिका-पादमात्रपरिमितः कालो विवक्षितः । तथा च मार्कण्डेयपुराणवचनमुदाहृतम्—

'मुहूर्तस्याऽष्टमं भागम्' ।

(मा. पु. २९. २५)

इति । अत एव तस्मिन् काले समागमनमेवातिथिलक्षणं नेतरद्विद्यादि । संक्राम्यतेऽनेनेति संक्रमः स्वर्गस्य संक्रमः स्वर्गसंक्रमः स्वर्गप्राप्तिहेतुरिति यावत् । तथा चाऽऽश्वमेधिके—

'क्षुत्पिपासाश्रमार्त्ताय देश-कालागताय च ।
सत्कृत्यान्नं प्रदातव्यं यज्ञस्य फलमिच्छता' ॥

(वृ. गौ. स्मृ. ३. ७६)

इति ॥ ४० ॥

तमेवातिथिं विशिनष्टि—

दूराध्वोपगतं श्रान्तं वैश्वदेव उपस्थितम् ।
अतिथिं तं विजानीयान्नातिथिः पूर्वमागतः ॥४१॥

---

१. I. omits -पितृयज्ञ-, and reads भूतयज्ञादानामुपरि. २. D. omits च. ३. B. C. and F. read -पुराणे. ४. B. C. E. F. and G. read अत एतस्मिन् काले. ५. B. C. and F. read विप्रस्यादि. ६. The text of Vriddha Gautama reads -कालगताय. ७. D. G. and H. read दूराद्धोपगतं; while M. reads दूराध्वानं पथि श्रान्तं. ८. B. C. and F. read नातिथिं पूर्वमागतम्.

दूराध्वोपगतं ग्रामान्तरादागतम्। श्रान्तं क्षुत्-तृष्णापरिपीडितम्। अत एव व्यासः—

'अतिदूरागतः श्रान्तः क्षुत्-तृष्णा-श्रमकर्शितः।
यः पूज्यते ऽतिथिः सम्यगपूर्वः क्रतुरेव सः'॥

इति। 'नातिथिः पूर्वमागत' इति तस्मिन्नेव दिने ऽतिथिर्नोत्तरे द्युरित्यर्थः। तथा च मनुः—

'एकरात्रं हि निवसन्नतिथिर्ब्राह्मणः स्मृतः'।
(म. स्मृ. ३. १०२)

इति। 'वैश्वदेव उपस्थितम'— इति दिवसाभिप्रायम्। सायं तु वैश्वदेवकाले कालान्तरे वा प्राप्तो ऽतिथिरेव। तथा च मनुः—

'अप्रणोद्यो ऽतिथिः सायं सूर्योढो गृहमेधिना।
काले प्राप्तस्त्वकाले वा नास्यानश्नन् गृहे वसेत्'॥
(म. स्मृ. ३. १०५)

इति। सूर्योढ इति अस्तं गच्छता सूर्येण देशान्तरगमनाशक्तिमुत्पाद्य गृहं प्रापित इत्यर्थः। याज्ञवल्क्यो ऽपि—

'अप्रणोद्यो ऽतिथिः सायमपि वाग्-भू-तृणोदकैः'।
(या. स्मृ. १. १०७)

इति। प्रचेता अपि—

---

१. D. G. and H. here also read दूराध्वोपगतं. २. Except A. all others read आतुराश्रमं ग्रामः or आतुराश्रमग्रामः. ३. A. reads स पूज्यश्चातिथिः. ४ A. reads अयूप:; while D. reads अपशु·. Both are correct. ५. The text of Manu substitutes तु for हि. ६. D. omits सायं तु. ७. I. reads सूर्योढो, but it is incorrect. सूर्योढो is the correct form. ८. I. reads गृहमेधिनाम्. ९. The text of Manu reads वसन्, but the commentators do not follow the reading.

'यः सायं वैश्वदेवान्ते सायं वा गृहमागतः ।
देववत् पूजनीयोऽसौ सूर्योढः सोऽतिथिः स्मृतः'[1]॥

इति ॥ ४१ ॥

दूराध्वपदव्याचष्टे[?]माह—

नैकग्रामीणमतिथिं संगृह्णीत[2] कदाचन ।
अनित्यमागतो यस्मात्तस्मादतिथिरुच्यते ॥ ४२ ॥

न विद्यते तिथिर्यस्यासावतिथिः । तथा च यमः—

'तिथि-पर्वोत्सवाः सर्वे त्यक्ता येन महात्मना[3] ।
सोऽतिथिः सर्वभूतानां शेषानभ्यागतान् विदुः' ॥

इति । मन्वादि-युगादिप्रभृतिषु तिथिविशेषेषु द्रव्यला- भमुद्दिश्य येऽभ्यागच्छन्ति तेऽभ्यागताः । तादृशं तिथिविशे- षमनपेक्ष्य यदाकदाचित् क्षुत्तृष्णादिपीडया वा समागतो ऽतिथिः । एवं च सति एकग्रामीणः प्रतिनियतेषु तिथिविशेषेषु च समागच्छति नासावतिथिः । यस्तु ग्रामान्तरादकस्मादसङ्कि- तितो[4] बुभुक्षुः सन्नागच्छति सोऽनित्यमागतः । तमेवातिथि- त्वेन संगृह्णीत नेतरम्[5] । तथा च विष्णुपुराणम्—

'अज्ञातकुल-नामानमन्यतः समुपागतम्[6] ।
पूजयेदतिथिं सम्यक् नैकग्रामनिवासिनम् ॥
अकिञ्चनमसम्बन्धमन्यदेशादुपागतम्' ।
(वि. पु. ३. ११. ६८-६९)

---

१. I. reads सूर्योटः. २. I. reads न गृण्हीत for संगृण्हीत. ३. D. read महात्मनः. ४. B. C. and F. read आपतितो for असङ्कितितो. ५. I. [illegible] एवातिथित्वेन संगृह्णीत नेतरः for तमेवातिथित्वेन संगृण्हीत नेतरम्. ६. A reads समुपस्थितम् ●. The text of Vishnu Purāṇa reads -संबद्ध- instead of -संबन्ध-.

इति । मार्कण्डेयो ऽपि–

'न मित्रमतिथिं कुर्यान्नैकग्रामनिवासिनम् ।
अज्ञातकुल-नामानं तत्काले समुपस्थितम् ॥
बुभुक्षुमागतं श्रान्तं याचमानमकिञ्चनम् ।
ब्राह्मणं प्राहुरतिथिं स पूज्यः शक्तितो बुधैः' ॥
(मा. पु. २९. २६-२७)

इति । मनुरपि–

'नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा ।
उपस्थितं गृहे विद्याद्भार्या यत्राग्नयो ऽपि वा' ॥
(म. स्मृ. ३. १०३)

इति । एकग्रामवासी अतिथिधर्मेणागतो ऽप्यतिथिर्न भव-ति । तथा साङ्गतिकः सङ्गतेन चरः सङ्गतपूर्वो दृष्टपूर्वः–इति यावत् । नापि यत्र क्वचन देशे अतिथिधर्मेणागतो ऽतिथिः । किन्तु यस्मिन् स्वकीये परकीये वा देशे भार्या ऽग्नयो वा भव-न्ति तत्रैवोपस्थितो ऽतिथिर्भवति ॥ ४२ ॥

अतिथेः स्वरूपं निरूप्य तस्मिन्नागते सति यत्क-र्तव्यं तदाह–

अतिथिं तत्र सम्प्राप्तं पूजयेत् स्वागतादिना ।
अर्घ्यासनप्रदानेन पादप्रक्षालनेन च ॥ ४३ ॥

१. D. reads संपूज्य; while B. C. E. and F. read संपूज्य·. २. D. omits अतिथिधर्मेणागतोऽपि. ३. I. omits वा. ४ M. omits this verse. ५. All others except A. and I. read सयाऽऽसनप्रदानेन.

श्रद्धया चान्नदानेन प्रियप्रश्नोत्तरेण च ।[1]
गच्छन्तं चानुयानेन[2] प्रीतिमुत्पादयेत् गृही ॥ ४४ ॥

निगदव्याख्यातमेतच्छ्लोकद्वयम्[3] । तदेतत् ब्राह्मणविषयम् ।

'यद्ब्राह्मणेभ्योऽन्नं ददाति' ।

इति[4] ।

'अहरहर्ब्राह्मणेभ्योऽन्नं दद्यात्[5] ।

(बौ. स्मृ. २. ९. १०. ९)

इति श्रुति-स्मृतिभ्यामुदाहृतत्वात्[6] । क्षत्रियादयस्तु न ब्राह्मणगृहे ऽतिथिसत्कारमर्हन्ति । किन्तु भोजनमात्रम् । तथा च मनुः—

'न[7] ब्राह्मणस्य त्वतिथिर्गृहे राजन्य उच्यते ।
वैश्य-शूद्रौ सखा चैव ज्ञातयो गुरुरेव च ॥
यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत् ।
भुक्तवत्सु[8] च विप्रेषु कामं तमपि भोजयेत् ॥
वैश्य-शूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्मिणौ ।
भोजयेत् सह भृत्यैस्तावानृशंस्यं[9] प्रकल्पयन्[10] ॥

---

१. J. K. L. and M. omit this verse. २. B. C. D. and F. read गच्छन्तश्चानुपातेन; while G. and H. read चानुयानेन. ३. D. E. G. and H. read व्याख्यानं. ४. D. and G. omit इति. ५. I. reads ददाति. ६. B. C. E. F. G. and H. read स्मृत्योः. ७. All others except A. read ब्राह्मणस्य त्वनतिथिः. ८. The text of Manu (Bombay Edition, 1887) read भुक्तवत्स्वक्तविप्रेषु, but the commentators do not follow this. ९. B. C. and F. read -ना- for -वा-. १०. I. reads प्रकल्पयेत्; while the text of Manu reads प्रयोजयन्.

इतरानपि सख्यादीन् सम्प्रीत्या गृहमागतान्।
प्रकृत्यान्नं* यथाशक्ति भोजयेत् सह भार्यया'॥
(म. स्मृ. ३. ११०–११३)

इति। आसनादिदाने विशेषमाह स एव–
'[2]आसनावसथौ शय्यामनुव्रज्यामुपासनम्[3]।
उत्तमेषूत्तमं कुर्याद्धीने हीनं समे समम्' ॥
(म. स्मृ. ३ १०७)

इति॥ ४३-४४॥

अतिथिसत्कारकरणे प्रत्यवायमाह–

[4]अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते।
पितरस्तस्य नाश्नन्ति दश वर्षाणि पञ्च च॥४५॥

---

* 'प्रकृत्य प्रकर्षेण अन्नं कृत्वा संस्कृत्य'–इति मेधातिथिः। 'प्रकृत्य संपाद्य'–इति राघवानन्दः। 'प्रकृत्य प्राधान्यं प्रकाश्य इति यावत्'–इति नन्दनः। 'प्रकृत्यान्नं प्रकर्षेणान्नं कृत्वा'–इति रामचन्द्रः। 'प्रकृष्टमन्नं कृत्वा'–इति कुल्लूकभट्टः। सर्वज्ञनारायण-गोविन्दराजौ तु 'संस्कृत्य' इति पाठमाश्रितवन्तौ।

---

१ B. C. F. and I. read सन्कृत्यान्नं. २. Except A and the text of Manu all others read आसनावसथं ३. The text of Manu reads उपासनाम्. ४. This verse is found in J. K. and L. the texts of Parâśara. The commentators Nandapaṇḍita and Dharaṇidhara have made commentaries on it; but Madhavâchârya quotes this verse from Manu, and it appears in the same. ५. These two verses appear in J. K. and L. as the 55th and 58th Ślokas, but M. omits the whole of the first of these

काष्ठभारसहस्रेण घृतकुम्भशतेन च ।
अतिथिर्यस्य भग्नाशस्तस्य होमो निरर्थकः ॥ ४६ ॥

अहमस्य गृहे भोक्ष्ये— इत्याशया समागतोऽतिथिर्यदि भोजनमप्राप्य तद्गृहान्निवर्त्तेत तदा गृहिणा क्रियमाणं पैतृकं निष्फलं स्यात् । तथा दैविकमपि विहितद्रव्याद्यङ्गसम्पन्नमपि निष्फलं भवेत् । तथा च मनुः—

'शिलतोऽप्युञ्छतो नित्यं पञ्चाग्नीनपि जुह्वतः ।
सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन्' ॥
(म. स्मृ. ३. १००)

इति । आश्वमेधिकेऽपि—

'साङ्गोपाङ्गांस्तथा वेदान् पठतीह दिने दिने ।
न चाऽतिथिं पूजयति वृथा स पठति द्विजः ॥
पाकयज्ञैर्महायज्ञैः सोमसंस्थाभिरेव च ।
ये यजन्ति न चार्चन्ति गृहेष्वतिथिमागतम् ॥
तेषां यशोऽभिकामानां दत्तमिष्टं च यद्भवेत् ।
वृथा भवति तत्सर्वमाशया हतया हतम्' ॥
(वृ. गौ. स्मृ. ६. ६७-६९)

इति । अत्र सुकृतहान्यभिधानं दुष्कृतप्राप्तेरप्युपलक्षणम् । तथा च विष्णुः—

---

१. I. reads वैदिकोऽपि. २. D. reads शिलानप्युञ्छिनो, and G. II. and the text of Manu read शिलानप्युञ्छतः; while I. शिलोञ्छी चरतः. ३. The text of Vṛiddha Gautama reads -स्तु यो वेदान्. ४. The text of Vṛiddha Gautama reads नित्यमग्नौ पाकयज्ञं for पाकयज्ञैर्महायज्ञैः. ५. The text of Vṛiddha Gautama reads चाऽर्चन्ति. ६. The text of Vṛiddha Gautama reads ऽयतया.

'अतिथिर्यस्य भग्नाशो गृहस्थस्य तु गच्छति ।
तस्मात् सुकृतमादाय दुष्कृतं तु प्रयच्छति' ॥

इति । आश्वमेधिकेऽपि—

'वैश्वदेवान्तिके प्राप्तमतिथिं यो न पूजयेत् ।
स चाण्डालत्वमाप्नोति सद्य एव न संशयः ॥
निर्वासयति यो विप्रं देश-कालागतं[1] गृहात् ।
पतितस्तत्क्षणादेव जायते नात्र संशयः' ॥

इति ॥ ४५-४६ ॥

अतिथिसत्कारं प्रशंसति—

सुक्षेत्रे[2] वापयेद्बीजं सुपात्रे निक्षिपेद्धनम् ।
सुक्षेत्रे च सुपात्रे च ह्युप्तं दत्तं[3] न नश्यति ॥ ४७ ॥

यथा सुक्षेत्रोप्तबीजं न विनश्यति किन्तु महते फलाय कल्पते । तथा सुपात्रेऽतिथौ दत्तमन्नादिकमक्षय्यफलमित्यर्थः[4] । तदाह मनुः—

'नैवं[5] स्वयं तदश्नीयादतिथिं यन्न भोजयेत् ।
धन्यं यशस्यमायुष्यं स्वर्ग्यं चाऽतिथिपूजनम्' ॥
(म. स्मृ. ३. १०६)

---

१. All others except A. and I. read देश-कालातिथिं for देश-कालागतं. २. M. reads the whole verse as follows:—

सुक्षेत्रे वापयेद्बीजं सुपुत्रे वापयेद्धनम् ।
सुक्षेत्रे च सुपुत्रे च यत्क्षिप्तं नैव नश्यति ॥

This verse appears also in J. K. and L. under number 57. ३. Except A. and H. all others read तच्च विनश्यति for दत्तं न नश्यति. ४. Except A. and I. others read -कं महाफलप्रदमित्यर्थः; while H. reads -कं महाफलमित्यर्थः. ५. The text of Manu reads नवै, and substitutes वातिथि- for चातिथि-.

इति । आश्वमेधिके ऽपि—

'[१]पादाभ्यङ्गाम्बुदानैस्तु यो ऽतिथिं पूजयेन्नरः ।
पूजितस्तेन राजेन्द्र भवामीह न संशयः' ॥

(वृ. गौ. स्मृ. ६. ५७)

इति । शातातपो ऽपि—

'स्वाध्यायेनाग्निहोत्रेण यज्ञेन तपसा तथा ।
नाऽवाप्नोति गृही लोकान् यथा त्वतिथिपूजनात्' ॥

इति ॥ ४७ ॥

आतिथ्यकर्तुर्नियममाह—

न पृच्छेद्गोत्र-[२]चरणे [३]न स्वाध्यायं श्रुतं तथा ।
[४]हृदये कल्पयेद्देवं सर्वदेवमयो हि सः ॥ ४८ ॥

इति । श्राद्धे ह्यादावेव ब्राह्मणः परीक्षणीय इति मनुना दर्शितम्

'दूरादेव परीक्षेत ब्राह्मणं वेदपारगम् ।
तीर्थं तद्धव्य-कव्यानां [५]प्रदाने सो ऽतिथिः स्मृतः' ॥

(म. स्मृ. ३. १३०)

इति । यमेनाऽपि—

'पूर्वमेव परीक्षेत ब्राह्मणान् वेदपारगान् ।
शरीरप्रभवैर्दोषैर्विशुद्धांश्चरितव्रतान्' ॥

इति । अतः श्राद्धन्यायेनाऽऽतिथ्ये ऽपि कर्मणि गोत्रादिपरी-

---

१. B. C. and F. read पादाभ्यङ्गाम्बु-यानैस्तु, and D. E. G. and H. पादाभ्यङ्गाम्बु- पानैस्तु; while the text of Vriddha Gautama पादाभ्यङ्गोऽन्नपानैस्तु. २. M. reads -चरणं. ३. J K. and L. read स्वाध्यायं च व्रतानि च for न स्वाध्यायं श्रुतं तथा, and for the same M. reads न स्वाध्याय-व्रतानि च. ४. J. K. L. and M. read हृदयं कल्पयेत्तस्मिन for हृदये कल्पयेद्देवं. ५. B. C. D. E. F. and G. read प्राशने for प्रदाने.

क्षासङ्गो तन्निवार्यते। गोत्रं वंशप्रवर्त्तकमहर्षिसम्बन्धः। चरणमाचारः। शाखाविशेषः स्वाध्यायः। श्रुतं व्याकरण-मीमांसादि। एतद्देश-नामादीनामुपलक्षणम्। अत एव यमः—

'न पृच्छेद्गोत्र-चरणे देशं नाम कुलं श्रुतम्।
अध्वनोऽभ्यागतं विप्रं भोजनार्थमुपस्थितम्'॥

इति। न केवलं गोत्रप्रश्नादिवर्जनं किं तर्हि देवताबुद्धिरपि कर्त्तव्या। तदुक्तं शातातपेन—

'चित्ते विभावयेत्तस्मिन् व्यासः स्वयमुपागतः'[1]।

इति। विष्णुपुराणेऽपि—

'स्वाध्याय-गोत्र-चरणमपृष्ट्वा[2] च तथा कुलम्।
हिरण्यगर्भबुद्ध्या तं मन्येताऽभ्यागतं गृही'॥
(वि. पु. ३. ११. ६०)

इति। देवता-बुद्धिविषयत्वे हेतुः सर्वदेवमयत्वम्। तच्च पुराणसारे दर्शितम्—

'धाता प्रजापतिः शक्रो[3] वह्निर्वसुगणो यमः।
प्रविश्याऽतिथिमेते वै[4] भुञ्जते ऽन्नं द्विजोत्तम'॥

इति। गोत्रादिप्रश्ने बाधो यमेन दर्शितः[5]—

'देशं नाम कुलं विद्यां पृष्ट्वा यो ऽन्नं प्रयच्छति।
न स तत्फलमाप्नोति दत्त्वा स्वर्गं न गच्छति'॥

इति। यथाऽऽतिथ्यकर्त्ता गोत्रादीन् न पृच्छेत् तथाऽतिथिरपि

---

१. D. and G. read व्यासं स्वयमुपागतम्. २. B. C. D. E. F. G. and H. read अपृष्ट्वाऽपि. ३. All others except A. and I. read शुक्रो for शक्रो, but it seems to be a mistake. ४. A. reads -मन्नेन. ५. I. reads गोत्रादिप्रश्ने फलाभावो बौधायनेन दर्शितः, but the following quotation is not found in the text of Baudhāyana.

न ब्रूयात् । तदाह मनुः—

‘न भोजनार्थं स्वे[1] विप्रः कुल-गोत्रे निवेदयेत् ।
भोजनार्थं हि ते शंसन् वान्ताशीत्युच्यते बुधैः’ ॥
(म. स्मृ. ३. १०९)

इति ॥ ४८ ॥

अतिथिदृष्टान्तेन भिक्षुकयोर्यति-ब्रह्मचारिणोः पूज्यतामाह[2]-

अपूर्वः सुव्रती[3] विप्रो ह्यपूर्वश्चातिथिर्यथा ।
वेदाभ्यासरतो नित्यं तावपूर्वौ[4] दिने दिने ॥४९॥

सुष्ठु व्रतं सुव्रतं मोक्षहेतुर्यतिधर्मः सोऽस्यास्तीति सुव्रती यतिः । वेदाभ्यासरतो ब्रह्मचारी । तदर्थत्वात् तस्याऽऽश्रमस्य[5] । तावुभौ प्रतिदिनमपूर्वातिथिवत्[6] पूज्यावित्यर्थः । तथा च याज्ञवल्क्यः—

‘सत्कृत्य भिक्षवे भिक्षा दातव्या सुव्रताय च’ ।
(या. स्मृ. १.१०८)

इति । नृसिंहपुराणे[7]—

---

१. G. reads यो for स्वे. २. D. reads पूजामाह. ३. M. reads सुव्रतो विप्रो अपूर्वो वाऽतिथिस्तथा; while D. E. G. H. I. J. K. and L. read अपूर्वश्चातिथिस्तथा. ४. D. reads त्रयोऽपूर्वे दिनेदिने, E. G. and H. read त्रयोऽपूर्वे दिनेदिने, I. reads त्रयः पूज्या दिनेदिने and J. K. L. and M. read त्रयोऽपूर्वा दिनेदिने. The commentators follow none of these readings. ५. G. reads श्रमस्य for आश्रमस्य. ६. B. C. D. E. F. G. H. and I. read -मपूर्वा वातिथिवत्. ७. I. adds ऽपि to नृसिंहपुराणे.

'भिक्षां च भिक्षवे दद्यात् परिव्राड्-ब्रह्मचारिणे ।
अकल्पितान्नादुद्धृत्य सर्वव्यञ्जनसंयुताम्' ॥
(नृ. पु. ५८. १८-१९; ल. हा. स्मृ. ४. ५९)

इति । मनुरपि—

'भिक्षां च भिक्षवे दद्याद्विधिवद् ब्रह्मचारिणे । (१४)
यत्पुण्यफलमाप्नोति गां दत्त्वा विधिवद् गुरोः ।
तत्पुण्यफलमाप्नोति भिक्षां दत्त्वा द्विजो गृही' ॥
(म. स्मृ. ३. ९४-९५)

इति । यमः—

'सत्कृत्य भिक्षवे भिक्षां यः प्रयच्छति मानवः ।
गोप्रदानसमं पुण्यं तस्याह भगवान् यमः' ॥

इति । ब्रह्मचारिणं स्वस्तीति वाचयित्वा तद्धस्ते जलं प्रदाय भिक्षाप्रदानं कार्यम् । तदाह गौतमः—

'स्वस्तिवाच्य भिक्षादानमप्पूर्वम्' ।
(गौ. स्मृ. ५. ७)

इति ॥ ४९ ॥

---

१. I. has made a mistake here. It omits the following :—
'भिक्षां च भिक्षवे दद्यात् परिव्राड्-ब्रह्मचारिणे ।
अकल्पितान्नादुद्धृत्य सर्वव्यञ्जनसंयुताम्' ॥
इति । मनुरपि. २. B. C. and F. read यतिवद् ब्रह्मचारिणे. ३. D. omits this whole line through mistake. ४. The text of Nṛisinha Purâṇa reads आकल्पितान्नात्तु-; while H. reads कल्पितान्नात्समु- ५. D. substitutes -सत्कृतम् for -संयुताम्, and B. C. H. read सर्वव्यंजनसंयुतम्. ६. D. reads पुण्यं. ७. D. reads भिक्षादानपूर्वम्; while all others, except A. and E. read भिक्षादानमपूर्वम्. We have compared here five different manuscripts of the text of Gautama. Three of them follow our reading.

यति-ब्रह्मचारिणौ यदा वैश्वदेवान्ते समागच्छतस्तदाऽस्त्वेवं यदा तु वैश्वदेवात् पूर्वमागच्छतस्तदा कथमित्यत आह–

वैश्वदेवे तु सम्प्राप्ते भिक्षुके गृहमागते ।
उद्धृत्य वैश्वदेवार्थं भिक्षुकं तु विसर्जयेत् ॥ ५० ॥

सम्प्राप्ते प्रसक्ते अननुष्ठिते सतीति यावत् । तथा च नृसिंह-पुराणे–

'अकृते वैश्वदेवे तु भिक्षुके गृहमागते ।
अवश्यमेव दातव्यं स्वर्गसोपानकारकम् ।
उद्धृत्य वैश्वदेवान्नं भिक्षां दत्वा विसर्जयेत्' ॥
(नृ. पु. ५८. १००; ल. हा. स्मृ. ४. ६०)

यावद्वैश्वदेवाद्युपयुक्तमन्नं तावत् पृथक् कृत्वा अवशिष्टाद-न्नाद्भिक्षां दत्वा भिक्षुकं विसर्जयेत् ॥ ५० ॥

अकरणे प्रत्यवायमाह–

यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ ।
तयोरन्नमदत्वा तु भुक्त्वा चान्द्रायणं चरेत् ॥५१॥

चान्द्रायणस्य लक्षणं वक्ष्यामः प्रायश्चित्तप्रकरणे । प्राय-

---

१. Except A. and E. all others read यदि; while H. omits यदा. २. I. reads कथमित्याह. ३. L. reads वैश्वदेवान्ते for वैश्वदेवे तु. ४. M. reads भिक्षां दत्वा विसर्जयेत्; while J. K. and L. read भिक्षुकं तु विसर्जयेत. ५. The text of Nṛisinha Purâṇa reads भिक्षौ भिक्षार्थमागते. ६. Except A. and the text of N. P. all others omit this line. ७. I. omits उद्धृत्य वैश्वदेवान्नं through mistake, and B. C. D. E. F. G. and H. read वैश्वदेवार्थं. ८. M. substitutes च, for तु. ९. Except A. and E. all others omit प्रायश्चित्तप्रकरणे

श्चित्तविधानात् प्रत्यवायो ऽवगम्यते । तयोः पक्वान्नस्वामित्वाद-न्नादाने प्रत्यवाय उपपन्नः । अत एव पुराणे ऽपि—

'अहुत्वाऽग्निमसन्तर्प्य तपस्विनमुपस्थितम् ।
अशित्वा तु परे लोके स्वानि मांसानि खादयन्' ॥

इति ॥ ५१ ॥

बहुषु भिक्षुकेषु आगतेष्वशक्तेन किं कर्त्तव्यमित्या-शङ्क्याह—

दद्याच्च भिक्षात्रितयं परिव्राड्-ब्रह्मचारिणाम् ।
इच्छया च ततो दद्याद्विभवे सत्यवारितम् ॥ ५२ ॥

निगदव्याख्यानमेतत् । यथाविभवं भिक्षादानं कूर्मपु-राणे दर्शितम्—

'भिक्षां वै भिक्षवे दद्यात् विधिवद् ब्रह्मचारिणे ।
दद्यादन्नं यथाशक्ति ह्यर्थिभ्यो लोभवर्जितः' ॥
(कू. पु. १. २. १८. ११७)

इति ॥ ५२ ॥

यतिभिक्षाप्रदाने नियममाह—

यतिहस्ते जलं दद्याद्भैक्ष्यं दद्यात् पुनर्जलम् ।
तद्भैक्ष्यं मेरुणा तुल्यं तज्जलं सागरोपमम् ॥ ५३ ॥

---

१. I. reads ऽग्नीन्. २. B. C. D. E. F. and H. read खादति. and G. खादते. ३. M. omits the whole verse. ४. J. K. and L. read -चारिणां. ५. D. substitutes वा for च. ६. A. reads ततो विज्ञान्विभवे for ततो दद्याद्वि-भवे. ७. H. and I. read -व्याख्यात-. ८. Some manuscripts read भैक्ष. ९. D. omits the following portion:—

तद्भैक्ष्यं मेरुणा तुल्यं तज्जलं सागरोपमम ॥ ५३ ॥
स्पष्टमेतत् । तच्च भैक्ष्यं सति विभवे बहुलं दातव्यम ।

स्पष्टमेतत् । तच्च भैक्ष्यं सति विभवे बहुलं दातव्यम् । त-
दुक्तं ब्रह्मपुराणे—

‘ यः पात्रपूरणीं भिक्षां यतिभ्यः सम्प्रयच्छति ।
विमुक्तः सर्वपापेभ्यो नासौ दुर्गतिमाप्नुयात्’ ॥

इति ॥ ५३ ॥

यथा भिक्षुकस्य समागतस्यातिथ्यमवश्यं कर्त्तव्यं तद्वदै-
श्वर्योपेतस्यापि स्वगृहे समागतस्याऽतिथ्यमभ्युदयकामिना
कर्त्तव्यमित्याह—

यस्य[१] छत्रं हयश्चैव कुञ्जरारोहमृद्धिमत् ।
ऐन्द्रं स्थानमुपासीत तस्मात्तं न विचारयेत् ॥ ५४ ॥

यस्य छत्र-हयौ विद्येते तस्यातिथ्यं कुर्वन् ऐन्द्रं पदमवाप्नु-
यात् । एतस्माद्वचनात् पूर्वोत्तरवचनयोरातिथ्यविषयत्वात्
तत्प्रकरणान्तःपातित्वेनास्मिन् वचने ऽनुक्तमपि ‘ आतिथ्यं
कुर्वन्’—इति पदद्वयं सन्दंशन्यायेनात्र लभ्यते । कुञ्जर-
स्यारोहो यस्मिन्नैन्द्रे पदे तत्कुञ्जरारोहम् । ऋद्धिरमृतपानाप्स-
रःसेवादिरस्मिन्नस्तीत्यृद्धिमत् । छत्रादिमान् क्षत्रियादिरतिथि-
र्जाति-कुलाचारैर्यद्यपि हीनः तथापि तत्पूजायाः स्वर्गप्राप्ति-
हेतुत्वात् तमतिथिं हीनत्वबुद्ध्या—पूज्यो ऽयं न वा?— इति न
विचारयेत् न सन्दिह्यात् । किन्त्वीश्वरबुद्ध्या तं पूजयेत् ।

यद्यपि भिक्षुकवन्नायमस्मिन् जन्मनि तपस्वी तथाप्यतीते

१. This verse is omitted by J. K. L. and M. २. H. reads गृही तत्त्व-बुद्ध्या.

जन्मन्यनेन तपो ऽनुष्ठितम्। अन्यथेदृशस्यैश्वर्यस्य प्राप्त्यसम्भवात्। अत एव विभूतिमत ईश्वरांशत्वं भगवता दर्शितम्—

'यद्यद् विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवाऽवगच्छ त्वं मम तेजोंऽशसम्भवम्'॥
(भ. गी. १०. ४१)

इति। तस्माद्युक्तमैश्वर्योपेतस्यातिथ्यम्॥ ५४॥

यदुक्तं वैश्वदेवात् पूर्वमपि यति-ब्रह्मचारिभ्यां भिक्षा दातव्येति तत्रोपपत्तिमाह—

वैश्वदेवकृतं पापं शक्तो भिक्षुर्व्यपोहितुम्।
न हि भिक्षुकृतान्दोषान्वैश्वदेवो व्यपोहति॥५५॥

वैश्वदेवस्य पश्चात्करणेन प्रसक्तो यो दोषः स भिक्षादानेन निवर्त्तते। भिक्षापरिहारेण तु यो दोषः नासौ पूर्वकृतेनापि वैश्वदेवेन निवर्त्तते। अत्र भिक्षुशब्दो विद्यार्थ्यादीनामुपलक्षकः। तथा च तेषां भिक्षुकत्वं व्यासेनोक्तम्—

'यतिश्च ब्रह्मचारी च विद्यार्थी गुरुपोषकः।
अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः'॥

इति। पुराणेऽपि—

'व्याधितस्यार्थहीनस्य कुटुम्बात् प्रच्युतस्य च।
अध्वानं प्रतिपन्नस्य भिक्षाचर्या विधीयते'॥

इति॥ ५५॥

---

१. G. and H. read सर्वं. २. B. C. D. E. and H. read भिक्षुत्वं. ३. D. reads कुलास्स्वात् for कुटुम्बात्. ४. B. C. E. F. G. and H. वा प्रपन्नस्य for प्रतिपन्नस्य.

वैश्वदेव कृतमित्युक्त्वा बुद्धिस्थत्वाद्वैश्वदेवस्याऽकरणे प्रत्यवायमाह—

अकृत्वा वैश्वदेवं तु भुञ्जते ये द्विजाधमाः ।
सर्वे ते निष्फला ज्ञेयाः पतन्ति नरके ऽशुचौ ॥५६॥

निष्फला यथोक्तफलरहिताः । न केवलमिष्टप्राप्त्यभावः किन्त्वनिष्टप्राप्तिरपि दर्शिता 'पतन्ति नरकेऽशुचौ' इति ॥५६॥

वैश्वदेवदृष्टान्तेनातिथ्याकरणेऽपि प्रत्यवायमाह —

वैश्वदेवविहीना ये आतिथ्येन बहिष्कृताः ।
सर्वे ते नरकं यान्ति काकयोनिं व्रजन्ति च ॥५७॥

नरको रौरवादिः । तमनुभूय पश्चात्काकयोनिं व्रजन्ति ॥५७॥

अतिथित्वेन स्तुवन्नन्यानपि भोजनीयानाह—

पापो वा यदि चण्डालो विप्रघ्नः पितृघातकः ।
वैश्वदेवे तु सम्प्राप्तः सोऽतिथिः स्वर्गसङ्क्रमः ॥५८॥

पापो गोवधाद्युपपातकी । एतेषां भोजनीयत्वमेव । न तु अशेषातिथ्यसत्कारार्हत्वम् । एतदेवाभिप्रेत्याऽऽश्वमेधिके वर्णितम्

---

१. B. reads वैश्वदेवं कृतमित्युक्त्वा; while A. reads वैश्वदेवं कर्तव्य मित्युक्त्वा. २. J. K. and L. omit this verse. ३. M. reads द्विजातय ४. M. omits this verse. ५. J. K. and L. read विवर्जिताः. ६. J. K and L. substitute ते for च. ७ A. reads अतिथित्वेन प्राप्तस्य पापिष्ठस्याऽपि भोजनीयतामाह. ८. K. and L. read this as follows :—

चोरो वा यदि चण्डालः शत्रुर्वा पितृघातकः ।.

९. D. reads सम्प्राप्ते. १०. I. reads तदेवाभिप्रेत्य.

'चण्डालो वा श्वपाको वा काले यः कश्चिदागतः ।
अन्नेन पूजनीयश्च परत्र हितमिच्छता' ॥

इति । विष्णुधर्मोत्तरे—

'चण्डालो वाऽथ वा पापः शत्रुर्वा पितृघातकः ।
देश-कालाभ्युपगतो भरणीयो मतो मम' ॥

इति । उक्तान् पञ्च महायज्ञान् प्रशंसति हारीतः—

'देवानृषीन् पितृंश्चैव भूतानि ब्राह्मणांस्तथा ।
तर्पयन् विधिना विप्रो ब्रह्मभूयाय कल्पते' ॥

(हा. स्मृ. ४. २२)

इति । पुराणे ऽपि—

'यत्फलं सोमयागेन प्राप्नोति धनवान् द्विजः ।
सम्यक् पञ्च महायज्ञैर्दरिद्रस्तदवाप्नुयात्' ॥

इति । अकरणे प्रत्यवायमाह व्यासः—

'पञ्चयज्ञांस्तु यो मोहान्न करोति गृहाश्रमी ।
तस्य नायं न च परो लोको भवति धर्मतः' ॥

इति ॥ ५८ ॥

पञ्चमहायज्ञानन्तरं भोजनविधिमभिप्रेत्य तदनुवादेन तत्र वर्जनीयानाह—

**यो वेष्टितशिरा भुङ्क्ते यो भुङ्क्ते दक्षिणामुखः ।
वामपादे करं न्यस्य तद्वै रक्षांसि भुञ्जते ॥ ५९ ॥**

---

१. B. C. and F. read भोजनीयश्च २. B. C. E. F. G. and H. read कालेऽभ्युपगतो. ३. B. C. E. G. and H. read तर्पयेत्. ४. The text reads ब्रह्मलोकाय. ५ G. reads -यागेन. ६. D. and I. omit -महा-. ७. I. omits -विधि-. ८. B. C. E. F. G. and I. read वामपाद-कर-स्थित्वा, D. reads वामपादकरे स्थित्वा, H. वामपादे करं कृत्वा, J. and L. वामपादे करं न्यस्तं and K. वामपादकरं न्यस्तं.

भोजनविधिश्च मनुना दर्शितः—

'भुक्तवत्सु तु विप्रेषु स्वेषु भृत्येषु चैव हि ।
भुञ्जीयातां ततः पश्चादवशिष्टं तु दम्पती' ॥
(म. स्मृ. ३. ११६)

इति । विष्णुपुराणे—

'ततः सुवासिनी-दुःखि-गर्भिणी-वृद्ध-बालकान् ।
भोजयेत् संस्कृतान्नेन प्रथमं तु परं गृही ॥
अभुक्तवत्सु चैतेषु भुञ्जन् भुङ्क्ते सुदुष्कृतम् ।
मृतश्च गत्वा नरकं श्लेष्मभुग् जायते नृप' ॥
(वि. पु. ३. ११. ६८-६९)

इति । मार्कण्डेयपुराणे ऽपि—

'पूजयित्वाऽतिथीनिष्टान् ज्ञातीन् बन्धूंस्तथाऽर्थिनः ।
विकलान् बाल-वृद्धांश्च भोजयेदातुरांस्ततः ॥
वाञ्छेत् क्षुत्तृट्परीतात्मा यश्चान्योऽन्नमकिञ्चनः' ।
(मा. पु. २९. ३७-३८)

इति । भोजने इतिकर्त्तव्यतामाह बौधायनः—

'उपलिप्ते समे स्थाने शुचौ श्लक्ष्णाऽऽसनान्विते ।
चतुरस्रं त्रिकोणं वा वर्त्तुलं वाऽर्द्धचन्द्रकम् ॥

---

१. B. C. D. E. F. G. and H. insert इति । before भोजन-. २. The te[xt] of Manu reads भुक्तवत्स्वथ, and I. reads भुक्तवत्सु च. ३. The text [of] Vishṇu Purâṇa reads चरमं for तु परं. ४. The text of Vishṇu Purâ[ṇa] reads ऽति- for सु-. ५. The text of V. P. reads नरः for नृप. ६. I. om[its] ऽपि. ७. B. C. D. E. F. G. H. and I. read ऽतिथीन निःस्वान्. ८. T[he] text of Mârkaṇḍeya Purâṇa inserts च after भोजयेत्. ९. The text [of] M. P. वाञ्छते क्षुत्परीतात्मा. १०. All others except A. and the text [of] M. P. read यच्चान्नं रससंयुतम्. ११. I. reads through mistake श्ल[क्ष्णा]- समन्विते.

कर्त्तव्यमानुपूर्व्येण ब्राह्मणादिषु मण्डलम्' ॥

इति। शङ्खो ऽपि—

'आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः।
मण्डलान्युपजीवन्ति तस्मात् कुर्वीत मण्डलम्' ॥
(ल. आ. स्मृ. ९. २)

इति। कूर्मपुराणे ऽपि—

'उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वै करौ।
आचम्यार्द्राननो ऽक्रोधः पञ्चार्द्रो भोजनं चरेत्' ॥
(कू. पु. १. २. १९. ४)

इति। व्यासो ऽपि—

'पञ्चार्द्रो भोजनं कुर्यात् प्राङ्मुखो मौनमास्थितः।
हस्तौ पादौ तथैवास्यमेषु पञ्चार्द्रता मता' ॥
(ल. व्या. २. ७२)

इति। आश्वमेधिके ऽपि—

'आर्द्रपादस्तु भुञ्जीयात् प्राङ्मुखश्चासने शुचौ।
पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनः' ॥
(वृ. गौ. स्मृ. १३. ४)

इति। तत्र भोजनं शुद्धपात्रे कर्त्तव्यम्। तदुक्तं कूर्म-
राणे—

---

१. D. omits इति. २. This verse appears in the text of Laghu Vyâsa
nriti as follows:—

पञ्चार्द्रो भोजनं कुर्यात भूम्यां पादौ निधाय च।
उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वै करौ॥

B. C. D. E. F. G. and H. read तत्र for तत्र.

'प्रशस्त-शुद्धपात्रेषु भुञ्जीताऽकुपितो द्विजः' ॥

इति । प्रशस्तानि च पात्राणि पैठीनसिना दर्शितानि–

'सौवर्णे राजते ताम्रे पद्मपत्र-पलाशयोः ।
भाजने, भोजने चैवाऽतिरात्रफलमश्नुते ॥
एक एव तु यो भुङ्क्ते विमले कांस्यभाजने ।
चत्वारि तस्य वर्द्धन्ते आयुः प्रज्ञा यशो बलम्' ॥

इति । तत्र पद्मपत्र-पलाशपत्रभोजनं गृहिव्यतिरिक्त-विषयम् ।

'पलाश-पद्मपत्रेषु गृही भुक्त्वैन्दवं चरेत् ।
ब्रह्मचारि-यतीनां च चान्द्रायणफलं लभेत्' ॥
(व्या. स्मृ. ३. ६३)

इति व्यासस्मरणात् । कांस्यपात्रं तु गृहस्थैकविषय-म् । यत्यादीनां तन्निषेधात् । तदाह प्रचेताः–

'ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्' ॥

इति । तच्च पात्रं भूमौ स्थापनीयम् । यदुक्तं कूर्मपुराणे–

---

१. This line is not found in the text of Kûrma Purâṇa. २. I. reads ऽकुत्सितो. ३. A. reads पात्रे ताम्रे पद्म-पलाशयोः; while I. reads ताम्रे यम-पत्र-पलाशयोः for ताम्रे पद्मपत्र-पलाशयोः. ४. H. reads भोजने भाजने; while D. and I. read through mistake भोजने भोजने. ५. I. reads -यम- instead of -पद्म-. ६. The text reads this verse as follows:—

पलाश-पद्मपत्रेषु गृहस्थो भोक्तुमर्हति ।
ब्रह्मचारी यतिश्चैव श्रेयो यशोक्तुमर्हति ॥

७. I. reads भवेत्. ८. I. reads यत्यादीनां तु निषधात्. ९. H. substitutes तत्र for तच्च.

'पञ्चार्द्रो भोजनं कुर्याद्भूमौ पात्रं निधाय तु ।
उपवासेन तत्तुल्यं मनुराह प्रजापतिः' ॥

(कू. पु. १. २. १८. ३)

इति । तच्च स्थापनं प्राणाहुतिपर्यन्तम् । पश्चात्तु यन्त्रि-कामारोप्य भोक्तव्यम् । तदाह व्यासः—

'न्यस्य पात्रं तु भुञ्जीत पञ्च ग्रासान् महामुने ।
शेषमुद्धृत्य भोक्तव्यं श्रूयतामत्र कारणम् ॥
विप्रुषां पादसंस्पर्शः पाद-चैलरजस्तथा ।
सुखेन भुङ्क्ते विप्रो हि पित्रर्थं तु न लुप्यते' ॥

इति । पैतृकभोजने भूमिपात्रप्रतिष्ठापनं न लोपनीयमि-त्यर्थः । उक्तपात्रनिहितमन्नं नमस्कुर्यात् तदुक्तं ब्रह्मपुराणे—

'अन्नं दृष्ट्वा प्रणम्यादौ प्राञ्जलिः कथयेत्ततः ।
अस्माकं नित्यमस्त्वेतदिति भक्त्याऽथ वन्दयेत्' ॥

इति । वन्दनानन्तरकृत्यमाह गोभिलः—

'अथातः प्राणाहुतिकल्पो व्याहृतिभिर्गायत्र्या-ऽभिमन्त्र्य 'ऋतं त्वा सत्येन परिषिञ्चामि' इति सायं, 'सत्यं त्वर्तेन परिषिञ्चामि' इति प्रातः ।
'अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ।
त्वं यज्ञस्त्वं वषट्कार आपोज्योतीरसोऽमृतम्' ॥

---

१. The text of K. P. substitutes च for तु. २. B. C. and F. read न्यस्तपात्रे तु, and D. G. H. न्यस्तपात्रं तु. ३. All others except A. and I. read शेषसंस्पर्शः for पादसंस्पर्शः. ४. G. reads सुखेन भुङ्क्ते विप्रोऽपि; while H. reads सुखे भुंक्ते तु विप्रोऽपि. ५. D. and G. read चरति. ६. In the marginal reading of H there appears विश्वमूर्तिषु for विश्वतोमुख.

त्वं ब्रह्मा त्वं प्रजापतिः ब्रह्मभूर्भुवः स्वरोममृतोप-
स्तरणमसि'–इत्यपः पीत्वा दश होतारं मनसा-
नुद्रुत्य त्वरन् पञ्च ग्रासान् गृह्णीयात् । प्राणा-
य स्वाहेति गार्हपत्यमेव तेन जुहोति । अपा-
नाय स्वाहेत्यन्वाहार्यपचनमेव तेन जुहोति ।
व्यानाय स्वाहेत्याऽऽहवनीयमेव तेन जुहोति ।
उदानाय स्वाहेति सभ्यमेव तेन जुहोति ।
समानाय स्वाहेत्यावसथ्यमेव तेन जुहोति' ।

इति । एते पञ्च मन्त्राः प्रणवाद्याः कर्त्तव्याः । तथा च शौनकः–

'स्वाहाऽन्ताः प्रणवाद्याश्च नाम्ना मन्त्रास्तु वायवाः ।
जिह्वयैव ग्रसेदन्नं दशनैस्तु न संस्पृशेत्' ॥

इति । जिह्वाग्रसने विशेष आश्वमेधिके दर्शितः–

'यथा रसं न जानाति जिह्वा प्राणाहुतौ नृप ।
तथा समाहितः कुर्यात् प्राणाहुतिमतन्द्रितः' ॥
(वृ. गौ. स्मृ. १३. ९–१०)

इति । प्राणाहुतिष्वङ्गुलिनियममाह शौनकः–

'तर्जनी-मध्यमा-ऽङ्गुष्ठलग्ना प्राणाहुतिर्भवेत् ॥
मध्यमा-ऽनामिका-ऽङ्गुष्ठैरपाने जुहुयात्ततः ॥
कनिष्ठा-ऽनामिका-ऽङ्गुष्ठैर्व्याने तु जुहुयाद्धविः ।
तर्जनीं तु बहिः कृत्वा उदाने जुहुयात्ततः ॥
समाने सर्वहस्तेन समुदायाहुतिर्भवेत्' ।

१. All others except A. and I. omit त्वं ब्रह्मा. २. I. reads -नुद्धृत्यै-मद्रुतन. ३. D. and I. read सभ्यमेव. ४. Except A. all others read नायव. ५. B. C E. F. G. and H. read व्यानेन for व्याने तु.

इति। परिषेचनानन्तरभाविविशेषो भविष्यपुराणे दर्शितः—

'भोजनात् किञ्चिदन्नाग्रं धर्मराजाय वै बलिम्।
दत्त्वाऽथ चित्रगुप्ताय प्रेतेभ्यश्चेदमुच्चरेत्—॥
'यत्र क्वचन संस्थानां क्षुत्तृषोपहतात्मनाम्।
प्रेतानां तृप्तये ऽक्षय्यमिदमस्तु यथासुखम्'॥

इति। कूर्मपुराणे ऽपि—

'महाव्याहृतिभिस्त्वन्नं परिधायोदकेन तु।
अमृतोपस्तरणमसीत्यापोशानक्रियां चरेत्'॥

(कू. पु. १. ३. १९. २)

इति। बौधायनस्तु सर्वमेतत् संगृह्याह—

'सर्वावश्यकावसानेषु प्रक्षालितपाणि-पादो ऽप आचम्य। शुचौ संवृते देशे प्राङ्मुख उपविश्य उद्धृतमाह्रियमाणं भूर्भुवः स्वरोमित्युपस्थाय वाचं यच्छेत्। (२) न्यस्तमन्नं महाव्याहृतिभिः प्रदक्षिणमुदकं परिषिच्य सव्येन पाणिना ऽविमुञ्चन् अमृतोपस्तरणमसि—

१. D. reads दत्त्वा सचित्रगुप्ताय, while G. दत्त्वा च चित्रगुप्ताय. २. B. C. and F. read भूतानां. ३. H. reads यथासुखम्. ४. B. C. E. F. G. H. and I. read आपोशान-. ५. D. reads सर्वमसात. ६. The text of Baudhâyana सर्वावश्यकाऽवसाने सम्मृष्टोपलिप्ते देशे for सर्वावश्यकाऽवसानेषु प्रक्षालितपाणि-पादोऽप आचम्य शुचौ संवृते देशे. ७. The text of Baudhâyana reads उद्धृत-माह्रियमाणं. ८. I. reads अन्यत्र समानं for न्यस्तमन्नं. B. C. E. F. G. H. and I. drop the word अन्नं here, and insert it before उदकं

इति पुरस्तादपः पीत्वा पञ्चान्नेन प्राणाहुती-
र्जुहोति । श्रद्धायां प्राणे निविष्टोऽमृतं जुहो-
मि शिवो मा विशाप्रदाहाय प्राणाय स्वाहेति ।
(३)अपाने व्यान उदाने समाने निविष्ट
इत्यादिना यथालिङ्गमनुषङ्गः । एवं पञ्चा-
न्नेन प्राणाहुतीर्हुत्वा तूष्णीं भूयो व्रतयेत् ।
प्रजापतिं मनसा ध्यायन् नान्तरा वाचं
विसृजेत् । (४)

अथाप्युदाहरन्ति—

'आसीनः प्राङ्मुखोऽश्नीयात् वाग्यतोऽन्नमकुत्सयन् ।
अस्कन्दयंस्तन्मनाश्च भुक्त्वाऽग्निं समुपस्पृशेत्' ॥ (७)

इति । सर्वभक्ष्यापूप-कन्द-मूल-फल-मांसानि द-
न्तैर्नावद्येत् । (८) नातिसुहितः । (९) अमृ-
तापिधानमसि-इत्युपरिष्टादपः पीत्वाऽऽचान्तो
हृदयदेशमभिमृशति । प्राणानां ग्रन्थिरसि
रुद्रो मा विशान्तकस्तेनान्नेनाऽऽप्यायस्वेति ।

१. पुरस्तात् is omitted by all except A. and the text of Baudhâyana. २ From स्वर्गमिन्दु- (P. 419, L. 13) to पञ्चान्नेन the intermediate portion is omitted by E. ३. G. reads प्राणाहुतिभिः. ४. All others except A. and I. omit श्रद्धायां, also the text omits this word. ५. The text omits अपाने व्यान उदाने समाने निविष्ट इत्यादिना यथालिङ्गमनुषङ्गः. All the manuscripts show that this line belongs to Baudhâyana, but most probably this line belongs to Madhavâcharya. ६. All others except A. and the text of Baudhâyana omit प्राणाहुतीर्हुत्वा. ७. I. reads वर्त्तयेत Probably this is a mistake. ८ D. reads भुक्त्वा स-; while I. भुक्त्वान्नं. ९. B. E. and F. read -मांसानां दन्तैर्न विच्छिन्द्यात्, D reads मांसानां दन्तैर्नाद्यात, E. and H. मांसानां दन्तैर्नाऽवच्छेद्यात्, G. मांसानां दन्तैर्नच्छेद्यात and H. मांसानां दन्तैर्नावर्जयेत. १०. H. omits अन्नेन.

(१०) पुनराचम्य दक्षिणपादाङ्गुष्ठे पाणिं निःस्रावयति–

'अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ।
ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्' ॥(११)

इति । हुतान्नानुमन्त्रणमूर्ध्वहस्तः समाचरेत् । श्रद्धायां प्राणे निविश्यामृतम्[२] हुतं प्राणमन्त्रेनाप्यायस्वेति पञ्च । (१२) ब्रह्मणि म आत्मा ऽमृतत्वायेत्यात्मानमक्षरेण[३] योजयेत् । (१४) सर्वक्रतुयाजिनामात्मयाजी विशिष्यते' । (१५)

(बौ. स्मृ. २. ७. १२. २–१५)

इति । विष्णुपुराणे–

'अश्नीयात् तन्मना भूत्वा पूर्वं तु मधुरं रसम् ।
लवणाम्लौ तथा मध्ये कटु-तिक्तादिकांस्ततः ॥
प्राग् द्रवं पुरुषोऽश्नीयान्मध्ये च कठिनाशनः ।
अन्ते पुनर्द्रवाशी तु बलारोग्ये[४] न मुञ्चति' ॥

(वि. पु. ३. ११. ८३–८४)

इति । भोजने कवलसंख्यामाहाऽऽपस्तम्बः–

'अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशाऽरण्यवासिनः ।

१ G. reads प्रीणातु. २. B. C. E. F. G. and H. omit इति पञ्च, and read प्राणमन्त्रेनाप्यायस्व । श्रद्धायामपाने श्रद्धायां व्याने श्रद्धायामुदाने श्रद्धायां समाने निविश्येत्यादिर्यथालिङ्गमनुषङ्गः; while D. reads श्रद्धायामपाने निविश्यामृत २ हुतं अपानमन्त्रेनाप्यायस्व । श्रद्धायां व्याने निविश्यामृत २ हुतं व्यानमन्त्रेनाप्यायस्व । श्रद्धायामुदाने निविश्यामृतं२ हुतं उदानमन्त्रेनाप्यायस्व । श्रद्धायां समाने निविश्यामृत२ हुतं समानमन्त्रेनाप्यायस्वेति यथालिङ्गमनुषङ्गः. ३. I. omits अक्षरेण. ४. D. reads बलारोग्यं.

द्वात्रिंशत्तु गृहस्थस्य ह्यमितं ब्रह्मचारिणः' ॥
(आ. ध. सू. २.४.९.१३. बौ. स्मृ. २.७.१३.७.)

इति । आश्वमेधिके ऽपि—

'वक्त्रप्रमाणपिण्डांश्च ग्रसेदेकैकशः पुनः । (१२)
वक्त्राधिकं तु यत् पिण्डमात्मोच्छिष्टं तदुच्यते ।
पिण्डावशिष्टमन्नं च वक्त्रनिःसृतमेव च ॥ (१३)
अभोज्यं तद्विजानीयाद्भुक्त्वा चान्द्रायणं चरेत् । (१४)
सदा चात्यशनं नाद्यात् नातिहीनं च कर्हिचित् ।
यथा ऽन्नेन व्यथा न स्यात् तथा भुञ्जीत नित्यशः' ।
(वृ. गौ. स्मृ. १३. १२–१६)

इति । वृद्धमनुः—

'पीत्वा ऽपो ऽशनमश्नीयात् पात्रदत्तमगर्हितम् ।
भार्या-भृतक-दासेभ्य उच्छिष्टं शेषयेत् द्विजः' ॥

इति । उच्छिष्टशेषणं तु घृतादिव्यतिरिक्तविषयम् । तदाह पुलस्त्यः—

'भोजनं तु न निःशेषं कुर्यात् प्राज्ञः कथञ्चन ।
अन्यत्र दधि-सक्त्वाज्य-पैलल-क्षीर-मध्वपः' ॥

इति । एतच्च भोजनं सायं प्रातश्च कर्तव्यम् । तदुक्तं मनुना—

---

१. This verse appears both in the text of Âpastamba and Baudhâyana. They read द्वात्रिंशतं गृहस्थस्यापरिमितं ब्रह्मचारिणः. २. The text reads -पिण्डानि प्रासेनैकेन वा for पिण्डांश्च ग्रसेदेकैकशः. ३. B. C. E. F. G. and H. substitute य for यत्. ४. The text reads वृष्टा- for पिण्डा-. ५. B. C. E. F. G. and H. read अन्यच्च for अन्नं च. ६. B. C. and F. read पीत्वा वा ऽऽसनमश्नीयात. ७. I. reads -फलं क्षीरं च.

'सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम्।
नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः'[1][2] ॥
(म. स्मृ. २.५३. नृ. पु. ५८.१०७)

इति। गौतमः—

'सायं प्रातस्त्वन्नमभिपूजितमनिन्दन् भुञ्जीत'।
(गौ. स्मृ. ९.४)

इति। उदाहृतवचनसमूहेन प्रसिद्धं साङ्गभोजनं मूल-वचने 'यो भुङ्क्ते'—इत्यनूद्य वेष्टितशिरस्त्वादिकं प्रत्यवायाभि-धानेन निषेधयति। एतच्च वर्ज्यान्तराणामप्युपलक्षणम्। तानि च ब्रह्मपुराणे दर्शितानि—

'यस्तु पाणितले भुङ्क्ते यस्तु फूत्कारसंयुतम्[3]।
प्रसृताङ्गुलिभिर्यच्च[4] तस्य गोमांसवच्च तत्॥
नाजीर्णे भोजनं कुर्यात् कुर्यान्नातिबुभुक्षितः[5]॥
हस्त्यश्व-रथ-यानोष्ट्रमास्थितो नैव भक्षयेत्।
श्मशानाभ्यन्तरस्थो वा देवालयगतोऽथ वा॥
शयनस्थो न भुञ्जीत न पाणिस्थं न चासने।
नार्द्रवासा नार्द्रशिरा न चाऽयज्ञोपवीतवान्॥
न प्रसारितपादस्तु पादारोपितपाणिमान्।
न[6] बाहुसक्थिसंस्थश्च न च पर्यङ्कमास्थितः॥

---

१. This verse is inserted between verses 52 and 53 in the commentaries by Râmchandra. The oldest commentator Medhâtithi and others do not make commentaries on this verse. २. The text of Nṛsinha Purâṇa reads -समन्वितः for -समो विधिः. ३. A. reads फूत्कारवायुना; while B. reads फूत्कारसंमितम्. ४. B. C. F. and I. read यश्च. ५. I. reads कदन्नानि for कुर्यान्नाति-. ६. I. reads स्वबाहुसव्यसंस्थश्च through mistake.

न वेष्टितशिराश्चापि नोत्सङ्गकृतभाजनः ।
नैकवस्त्रो दुष्टमध्यो नोपानत्कः सपादुकः[1] ।
न चर्मोपरिसंस्थश्च चर्मावेष्टितपार्श्ववान् ॥
ग्रासशेषं न चाश्नीयात् पीतशेषं पिबेन्न च ।
शाक-मूल-फलेक्षूणां दन्तच्छेदैर्न भक्षयेत् ॥
बहूनां भुञ्जतां मध्ये न चाश्नीयात्त्वराऽन्वितः ।
वृथा न विसृजेदन्नं[2] नोच्छिष्टः[3] कुत्रचिद्व्रजेत्' ॥

इति । बृहस्पतिः–

'न स्पृशेद्वामहस्तेन भुञ्जानोऽन्नं कदाचन ।
न पादौ न शिरो बस्ति न पदा भाजनं स्पृशेत्' ॥

इति । उशनाः[4][5]–

' नाऽदत्त्वा[6] मिष्टमश्नीयाद्[7] बहूनां चैव पश्यताम् ।
नाश्नीयुर्बहवश्चैव तथा नैकस्य[8] पश्यतः' ॥

इति । आदित्यपुराणे–

' नोच्छिष्टो[9] ग्राहयेदाज्यं यज्ञोच्छिष्टं च सन्त्यजेत्[10] ।
शूद्रभुक्तावशिष्टं तु नाद्याद्भाण्डस्थितं त्वपि' ॥

इति । कूर्मपुराणे अपि[11]–

---

१. I. reads कृषन्मध्ये नोपानत्कृतपादक ; while G. and H. read the same but substitute दृष्टमध्यो for कृषन्मध्ये and D. reads दृष्टमध्यसोपानत्कः सपादुकः. २. B. C. E. F. G. and H. read विकिरेत् for विसृजेत्. ३. I. read नोच्छिष्टं. ४. I. omits this word. ५. B. C. and F. omit उशनाः. ६. H reads नाऽदत्त्वा. ७. A. and D. read मृष्टमश्नीयात्. ८. I. reads through mistake. ऽनैकस्य for नैकस्य. ९. I. reads नोच्छिष्टं. १०. B. C. and F. read यज्ञ शिष्टं न सन्त्यजेत. D. reads यथोच्छिष्टं तु न त्यजेत, E. and I. जग्ध शिष्टं च सन्त्यजेत् and H. जग्धशिष्टं न सन्त्यजेत. ११ I. omits अपि

'नार्द्धरात्रे न मध्याह्ने नाजीर्णे नार्द्रवस्त्रधृक्।
न भिन्नभाजने चैवं न भूम्यां न च पाणिषु॥
नोच्छिष्टो घृतमादद्यान्न मूर्द्धानं स्पृशन्नपि।
न ब्रह्म कीर्त्तयित्वाऽपि न निःशेषं न भार्यया॥
नाऽन्धकारे न सन्ध्यायां न च देवालयादिषु'॥
(कू. पु. १. २. १९. २०-२२)

इति। याज्ञवल्क्योऽपि-
'न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः'॥
(या. स्मृ. १. १३१)

इति। यत्तु-
'ब्राह्मण्या सह योऽश्नीयादुच्छिष्टं वा कदाचन।
न तस्य दोषमिच्छन्ति नित्यमेव मनीषिणः॥
उच्छिष्टमितरस्त्रीणां योऽश्नीयाद् ब्राह्मणः क्वचित्।
प्रायश्चित्ती स विज्ञेयः संकीर्णो मूढचेतनः'॥

इति। न तत्सर्वथा दोषाभावप्रतिपादनपरम्। कदाचनेति वचनात्। अत एवाऽऽदित्यपुराणम्-
'ब्राह्मण्या भार्यया सार्द्धं क्वचिद्भुञ्जीत चाध्वनि।
असवर्णस्त्रिया सार्द्धं भुक्त्वा पतति तत्क्षणात्'॥

इति। वृद्धमनुरपि-

१. I. reads चाद्यात्. २. B. C. and H. read कीर्त्तयन्वाऽपि. and the text of K. P. reads कीर्त्तयेद्वाऽपि. ३. B. C. E. F. and H. read नाङ्गारे च न चाऽऽकाशे, D. and G. नाऽगारे च न चाऽऽकाशे and I. reads नाऽन्यागारे न चाऽऽकाशे. ४. D. inserts अपि after मनीषिणः. ५. D. omits न. ६. D. reads प्रतिपादनं and omits परम्. ७. B. C. and F. read आदिपुराणम्. ८. All others except A. D. E. and I. read असवर्ण-. ९. A. reads मनुरपि for वृद्धमनुरपि.

‘ न पिबेन्न च भुञ्जीत द्विजः सव्येन पाणिना ।
नैकहस्तेन च जलं शूद्रेणाऽऽवर्जितं पिबेत् ॥
पिबतो यत् पतेत्तोयं भाजने मुखनिःसृतम् ।
अभोज्यं तद्भवेदन्नं भोक्ता भुञ्जीत किल्बिषम् ॥
पीतावशेषितं तोयं ब्राह्मणो न पुनः पिबेत् ।
पिबेद्यदि हि तन्मोहात् द्विजश्चान्द्रायणं चरेत्’ ॥

इति । अत्रिः–

‘ तोयं पाणिनखस्पृष्टं ब्राह्मणो न पिबेत् क्वचित् ।
सुरापानेन तत्तुल्यमित्येवं मनुरब्रवीत्’ ॥

इति । शातातपः–

‘ उद्धृत्य वामहस्तेन यत्तोयं पिबति द्विजः ।
सुरापानेन तत्तुल्यं मनुराह प्रजापतिः’ ॥

इति । आश्वमेधिके ऽपि–

‘ पानीयानि पिबेद्येन तत्पात्रं द्विजसत्तमः ।
अनुच्छिष्टं भवेत्तावद्यावद्भूमौ न निःक्षिपेत्’ ॥
(वृ. गौ. स्मृ. १३. ११.)

इति । शङ्खः–

‘ नानियुक्तो ऽप्यासनस्थः प्रथममश्नीयात् ।
नाधिकं दद्यात् । न प्रतिगृह्णीयात्’ ।

इति । शातातपो ऽपि–

‘ अप्यासनोपविष्टस्तु यो भुङ्क्ते प्रथमं द्विजः ।
बहूनां पश्यतां सोऽज्ञः पङ्क्त्या हरति किल्बिषम्’ ॥

---

१ Only I. reads भुक्त्वा. २. E. G. and I. read ब्राह्मणः पुनरापिबेत्. ३. B. C. D. E. F. and G. read -मत्स्यामेषु; while H. reads -मत्स्यामेण. ४. G. and H. read द्विजसत्तम. From this to बहूनां पश्यतां the intermediate portion is omitted by D. ५. D. reads सोऽज्ञः, and I. प्राज्ञः

इति। गोभिलः–

'एकपङ्क्त्युपविष्टानां विप्राणां सह भोजने।
यद्येकोऽपि त्यजेत् पात्रं नाश्नीयुरितरेऽप्यनु[1]।
मोहात्तु भुङ्क्ते यस्तत्र तत्रसान्तपनं चरेत्[2]॥
भुञ्जानेषु तु विप्रेषु यस्तु पात्रं परित्यजेत्।
भोजने विघ्नकर्त्तासौ ब्रह्महाऽपि तथोच्यते'॥

इति। वाग्यमनं प्रक्रम्य पुराणे–

'स्नास्यतो वरुणः शक्तिं जुह्वतोऽग्निः श्रियं हरेत्।
भुञ्जतो मृत्युरायुष्यं तस्मान्मौनं त्रिषु स्मृतम्'॥

इति। यत्त्वत्रिणोक्तम् –

'मौनव्रतं महाकष्टं हुंकारेणाऽपि नश्यति।
तथा सति महान् दोषः तस्मात्तन्नियतश्चरेत्'॥

इति। तदेतत् काष्ठ[3]मौनाभिप्रायम्[4]। एतच्च पञ्चग्रासादर्वाग्विषयम्। तथा च वृद्धमनुः–

'अनिन्दन् भक्षयेन्नित्यं वाग्यतोऽन्नमकुत्सयन्।
पञ्च ग्रासान्महामौनं प्राणाद्याप्यायनं महत्'॥

इति। आश्वमेधिके ऽपि–

'मौनी वाऽप्यथवाऽमौनी प्रहृष्टः संयतेन्द्रियः।
भुञ्जीत विधिवद्विप्रो न चोच्छिष्टानि चर्वयेत्[5]'॥

(वृ. गौ. स्मृ. १३. ११.)

इति। शातातपोऽपि–

---

१. I. reads -रितरे पुनः. २. I. reads स सान्तपनमाचरेत्. ३. H. reads काष्ठा- for काष्ठ-. ४. I. reads -प्रायेण. ५. B. C. and F. read श्रावयेत् for चर्वयेत्; while G. reads चावयेत् for the same.

'हस्तदत्तानि चान्नानि प्रत्यक्षलवणं तथा।
मृत्तिकाभक्षणं चैव गोमांसाशनवत् स्मृतम्' ॥

इति। पैठीनसिरपि–

'लवणं व्यञ्जनं चैव घृतं तैलं तथैव च।
लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत्।
[1]दर्व्या देयं घृतान्नं तु समस्तव्यञ्जनानि च॥
उदकं यच्च पक्वान्नं यो दर्व्या दातुमिच्छति।
स भ्रूणहा सुरापश्च [2]स्तेयी च गुरुतल्पगः' ॥

इति। आश्वमेधिके–

'उदक्यामपि चण्डालं श्वानं कुक्कुटमेव च।
भुञ्जानो यदि पश्येत्तु तदन्नं तु परित्यजेत्॥
[3]केश-कीटावपन्नं च मुखमारुतवीजितम्।
[4]अभोज्यं तद्विजानीयात् भुक्त्वा चान्द्रायणं चरेत्॥
(बृ. गौ. स्मृ. १३. १५–१७)

इति। कात्यायनः–

'चण्डाल-पतितोदक्या वाक्यं श्रुत्वा द्विजोत्तमः।
भुञ्जीत ग्रासमात्रं तु दिनमेकमभोजनम्' ॥

इति। [5]गौतमो ऽपि–

---

१. B. C. and F. read दर्व्याऽऽदेयं शृतान्नं तु; whilo D. reads दर्व्या देयं घृतान्नं तु. २. B. C. D. E. F. G. and H. read स स्तेनो गुरुतल्पगः for स्तेयी च गुरुतल्पगः. ३. G. reads केश-कीटादिदूषितं च. ४. Except A. and the text all others substitute for this line अन्नं तु राक्षसं विद्यात्तस्मात्तत् परिवर्जयेत्, but in the text this line is the latter half of the 18th verse. All others except A. and G. substitute तत् for तु. ५. D. reads this quotation with गौतमोऽपि after the next quotation from बृहस्पति.

'काहल-भ्रमण-ग्राव्णां चक्रस्योलूखलस्य च ।
एतेषां निनदं यावत्तावत्कालमभोजनम्' ॥
(श्लो. गौ. स्मृ. ९. ३१)

इति । बृहस्पतिरपि—

'अप्येकपङ्क्त्यां नाश्नीयाद्ब्राह्मणैः स्वजनैरपि ।
को हि जानाति किं कस्य प्रच्छन्नं पातकं भवेत् ॥
एकपङ्क्त्युपविष्टानां दुष्कृतं यद्दुरात्मनाम् ।
सर्वेषां तत्समं तावद्यावत् पङ्क्तिर्न भिद्यते' ॥

इति । पङ्क्तिभेदप्रकारमपि स एवाह—

'अग्निना भस्मना चैव स्तम्भेन सलिलेन च ।
द्वारेण चैव मार्गेण पङ्क्तिभेदो बुधैः स्मृतः' ॥

इति । यमोऽपि—

'उदकं च तृणं भस्म द्वारं पन्थास्तथैव च ।
एभिरन्तरितं कृत्वा पङ्क्तिदोषो न विद्यते' ॥

इति । तदेवं मूलवचनोक्तवेष्टितशिरस्त्वादिवर्जनोपलक्षिता नियमविशेषा दर्शिताः । दक्षिणामुखत्वनिषेधो नित्यभोजनविषयः । काम्ये तद्विधानात् । तथा च मनुः—

'आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः' ॥
(म. स्मृ. २. ५२; वृ. अ. ५. २५; अ. पु. १५३. ४१)

---

१. B. C. E. F. and H. read पङ्क्त्या नोऽश्नीयात्; while G. and I. read पङ्क्त्या नाऽश्नीयात्. २. D. reads पङ्क्तिभेदप्रकारमाह बृहस्पतिः. ३. G. reads -लक्षितो नियमविशेषो दर्शितः. ४. The text of Vriddha Atri reads श्रियः. ५. H. reads ऽमृतं. ६. The text of Manu adds हि before उदङ्मुखः.

इति । गोभिलस्तु दक्षिणामुखत्वं प्रतिषेधति–

‘प्राङ्मुखावस्थितो विप्रो प्रतीच्यां वा यथासुखम् ।
उत्तरं पितृकार्ये तु दक्षिणां तु विवर्जयेत्’ ॥

इति । ‘वामपादकरः’ वामपादे करो यस्यासौ वामपादकरः । यो वामपादकरो भुङ्क्ते यश्च स्थित्वा भुङ्क्ते तै सर्वैर्यद्भुक्तं तद्रक्षांसि भुञ्जते । न स्वयं प्राणाग्निहोत्रादिफलं प्राप्नोतीत्यर्थः । भुक्तस्य राक्षसगामित्वं कूर्मपुराणे ऽपि दर्शितम्–

‘यो भुङ्क्ते वेष्टितशिरा यश्च भुङ्क्ते विदिङ्मुखः ।
सोपानत्कश्च यो भुङ्क्ते सर्वं विद्यात्तदासुरम्’ ॥
(कू. पु. १.२.१९.१९; ल. व्या. स्मृ. २. ८१)

इति । अभिप्रेतस्य भोजनविधेरुदीच्याङ्गानि उच्छिष्टोदकदानादीनि कर्त्तव्यानि । तत्र देवलः–

‘भुक्त्वोच्छिष्टं समादाय सर्वस्मात् किञ्चिदाचमन् ।
उच्छिष्टभागदेयेभ्यः सोदकं निर्वपेद्भुवि’ ॥

इति । तत्र मन्त्रः–

‘रौरवे पूयनिलये पद्मार्बुदनिवासिनाम् ।
प्राणिनां सर्वभूतानामक्षय्यमुपतिष्ठताम्’ ॥

इति । गव्यव्यासो ऽपि–

---

१. B. C. E. F. G. H. and I. read गोभिलोऽपि. २. I. read निषेधयति. ३. I. reads स्थितो भुङ्क्ते while D. omits यश्च स्थित्वा भुङ्क्ते ४. The text of K. P. reads यम् for यो. ५. All others except A. an I. omit उच्छिष्टोदकदानादीनि, but this appears in the marginal reading of H. ६. D. reads -भागमान्. ७. D. omits तत्र मन्त्रः. ८. B. C. D. F. and I. read पुण्यनिलये, but it is a mistake. ९. D. omits गव्य-.

'ततस्तृप्तः सन्नमृतापिधानमसीत्यपः प्राश्य
तस्माद्देशान्मनागपसृत्य विधिवदाचामेत्' ।

इति। स चाचमनप्रकारो देवलेन दर्शितः—

'भुक्त्वाऽऽचामेद्यथोक्तेन विधानेन समाहितः।
शोधयेन्मुख-हस्तौ च मृदद्भिर्घर्षणैरपि' ॥

इति। तच्च घर्षणं तर्जन्या न कर्त्तव्यम्। तदाह गौतमः—

'गण्डूषस्याथ समये तर्जन्या वक्त्रशोधनम्।
कुर्वीत यदि मूढात्मा रौरवे नरके पतेत्' ॥
(श्री. गौ. स्मृ. ९.२९)

इति। व्यासः—

'हस्तं प्रक्षाल्य गण्डूषं यः पिबेदविचक्षणः।
स देवांश्च पितॄंश्चैव ह्यात्मानं चैव पातयेत्' ॥
तस्मिन् नाचमनं कुर्यात् यत्र भाण्डेऽथ भुक्तवान्।
यद्युत्तिष्ठत्यनाचान्तो भुक्तवानासनात्ततः ॥
स्नानं सद्यः प्रकुर्वीत सोऽन्यथाऽप्रयतो भवेत्' ॥

इति। कूर्मपुराणेऽपि—

'अमृतापिधानमसीत्युपरिष्टादपः पिबेत्।
आचान्तः पुनराचामेदायंगौरिति मन्त्रतः ॥
द्रुपदां वा त्रिरावृत्त्य सर्वपापप्रणाशिनीम्।
प्राणानां ग्रन्थिरसीत्यालभेत् हृदयं ततः ॥

---

१. H. and I. read पीत्वा for प्राश्य. २. B. C. D. E. F. G. and H. read -चालनम्. ३. A. reads रौरवं नरकं व्रजेत्. ४. All others except A. and I. read घातयेत् for पातयेत्. ५. Except A. and the text of K. P. all others omit उपरिष्टात् and read अमृतापिधानमसीत्यपः पिबेत्, but it is a mistake. ६. The text of K. P. reads उदरं for हृदयं.

आचम्याङ्गुष्ठमात्रेण[1] पादाङ्गुष्ठे तु दक्षिणे ।
निःस्रावयेद्धस्तजलमूर्ध्वहस्तः समाहितः ॥
हुतानुमन्त्रणं कुर्यात् श्रद्धायामिति मन्त्रतः ।
अथाक्षरेण[2] स्वात्मानं योजयेद्ब्रह्मणेति हि ॥
सर्वेषामेव योगानामात्मयागः[3] परः स्मृतः ।
योऽनेन विधिना कुर्यात् स याति ब्रह्मणः पदम्[4]' ॥
(कू. पु. १. २. १९. ९-१३)

इति । अत्रिः-

'आचान्तोऽप्यशुचिस्तावद्यावत्[5] पात्रमनुद्धृतम् ।
उद्धृतेऽप्यशुचिस्तावद्यावन्नोन्मृज्यते[6] मही ॥
भूमावपि हि लिप्तायां[7] तावत् स्यादशुचिः पुमान् ।
आसनादुत्थितस्तस्माद्यावन्न स्पृशते महीम्[8]' ॥
(वृ. अ. स्मृ. ५. १९-२०)

इति । शातातपोऽपि-

'आचम्य पात्रमुत्सृज्य किञ्चिदार्द्रेण पाणिना ।
मुख्यान् प्राणान् समालभ्य नाभिं पाणितलेन च ॥

---

१. All others except A. read अङ्गुष्ठमानीय for अङ्गुष्ठमात्रेण; while A. reads अङ्गुष्ठपानीयं. २. The text of K. P. reads—

अथ मन्त्रेण स्वात्मानं योजयेद् ब्राह्मणेति हि ;

while I. reads—

अष्टाक्षरेण ह्यात्मानं योजयेद् ब्रह्मणीति हि ।

३. The text of K. P. reads योगानामात्मयोगः; while I. reads सर्वेषामेवमङ्गानामात्मयागः. ४. D. reads अव्ययम्. ५. This quotation appears in Vriddhâtri, but not in Atri. ६. D. reads नो मृज्यते मही, and I. reads नो लिप्यते मही. For the same the text of Vriddhâtri reads मण्डलशोधनम्. ७. This verse is found neither in the text of Atri nor Vriddhâtri. ८. D. and G. read मही for महीम्.

भुक्त्वा नैवं प्रतिष्ठेत न चाप्यार्द्रेण पाणिना ।
पाणिं मूर्ध्नि समाधाय स्पृष्ट्वा चाग्निं समाहितः ॥
ज्ञातिश्रैष्ठ्यं समाप्नोति प्रयोगकुशलो नरः' ।

इति । विष्णुपुराणे ऽपि—

'स्वस्थः प्रशान्तचित्तस्तु कृतासनपरिग्रहः ।[२]
अभीष्टदेवतानां च कुर्वीत स्मरणं नरः[३] ॥
अग्निराप्याययत्वन्नं[४] पार्थिवं पवनेरितः ।
दत्तावकाशो नभसा जरयेदस्तु[५] मे सुखम् ॥
अन्नं बलाय मे भूमेरपामग्न्य-ऽनिलस्य च ।
भवत्वेतत् परिणतं ममास्त्वव्याहतं सुखम् ॥
प्राणा-ऽपान-समानानामुदान-व्यानयोस्तथा ।
अन्नं पुष्टिकरं चास्तु ममास्त्वव्याहतं सुखम् ॥

अगस्तिरग्निर्वडवानलश्च
भुक्तं मयाऽन्नं जरयत्वशेषम् ।
सुखं ममैतत् परिणामसम्भवं
यच्छत्वरोगो मम चास्तु देहः[६] ॥
विष्णुः समस्तेन्द्रिय-देह-देहि-[७]
प्रधानभूतो भगवान् यथैकः ।

१. D. and G. read चैव. २. D. reads -परिग्रहम्. ३. E. reads नरः. All others except A. and the text of Vishṇu Purâṇa read ४. -प्याययेच्चान्नं. ५. The text of Vishṇu Purâṇa reads जरयन्तु. ६. B. C. E. and F. read अरोगं मम चास्तु देहः, D. and G. read अरोगं मम चास्तु देहम्, H. and I. read अरोगं मम चास्तु देहे and for the same the text of V. P. reads अरोगो मम चास्तु देहे. ७. D. G. H. and I. read -देही.

सत्येन तेनान्नमशेषमेतत्[1]
आरोग्यदं मे[2] परिणाममेतु ॥
विष्णुरत्ता[3] तथैवान्नं परिणामश्च वै तथा ।
सत्येन तेन मे भुक्तं जीर्यत्वन्नमिदं तथा ॥
इत्युच्चार्य स्वहस्तेन परिमृज्य[4] तथोदरम् ।
अनायासप्रदायीनि कुर्यात् कर्माण्यतन्द्रितः' ॥
(वि. पु. ३. ११. ८७-९४)

इति । मार्कण्डेयो ऽपि–
'भूयोऽप्याचम्य कर्त्तव्यं ततस्ताम्बूलभक्षणम्' ।
(मा. पु. २९. ३१)

इति । अत्र[5] वसिष्ठः–
'सुपूगं[6] च सुपत्रं च चूर्णेन[7] च संमन्वितम्[8] ।
अदत्वा द्विजदेवेभ्यः ताम्बूलं वर्जयेद्बुधः ॥
एकपूगं सुखारोग्यं द्विपूगं निष्फलं भवेत् ।
अतिश्रेष्ठं त्रिपूगं च ह्यधिकं नैव दुष्यति ॥
पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः ।
शीर्णपर्णं[9] हरेदायुः शिरा बुद्धिविनाशिनी ॥
तस्मादग्रं च मूलं च शिरां चैव विशेषतः ।
शीर्णपर्णं[10] वर्जयित्वा ताम्बूलं खादयेद्बुधः' ॥

१. B. C. E. F. G. H. and I. read -मशेषमन्नम ; while D. reads -मशेषमन्यम. २. I. reads स्यात् for मे. ३. A. reads विष्णुरात्मा; while I. reads विष्णुर्यथा. ४. B. C. E. F. and G. read परिमृज्यात. ५. I. reads तत्र. ६. D. reads सपूगं च सपत्रं च ; while I. reads सुपूगं च सुपर्णं च. ७. H. and I. read सुचूर्णेन. ८. A. reads सुसंयुतम्. ९. All others except A. substitute चूर्ण- for शीर्ण-. १०. Here also all others except A. and I. read चूर्ण- for शीर्ण; but I. substitutes जीर्ण- for the same.

इति । यदिदं भोजनं निरूपितं तत् ग्रहणकाले प्रतिषिद्धम् । तदाह मनुः—

'चन्द्र-सूर्यग्रहे नाद्यादद्यात् स्नात्वा विमुक्तयोः ।
अमुक्तयोरस्तगयोर्दृष्ट्वा स्नात्वा परे ऽहनि ' ॥
(म. स्मृ. ४. २२४; वृ. अ. स्मृ. ९. ६७)

इति । ग्रहे ग्रहणकाले । स्पर्शमारभ्य मोक्षपर्यन्तो ग्रहकालः । तस्मिन् काले न भुञ्जीत । किन्तु राहुणा चन्द्र-सूर्ययोः मुक्तयोः सतोः पश्चात् स्नात्वा भुञ्जीत । यदा तु ग्रस्तास्तमयस्तदा परेद्युः विमुक्तौ तौ दृष्ट्वा भुञ्जीत । न केवलं ग्रहणकाल एव भोजनाभावः किन्तु ग्रहणात् प्रागपि । तदाह व्यासः—

'नाद्यात् सूर्यग्रहात् पूर्वमह्नि सायं शशिग्रहात् ।
ग्रहकाले च नाश्नीयात् स्नात्वाऽश्नीयाच्च मुक्तयोः ॥
मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा ।
अमुक्तयोरस्तगयोरथ दृष्ट्वा परे ऽहनि' ॥
(ल. व्या. स्मृ. २. ७७–७८)

इति । पूर्वकाले भोजननिषेधे विशेषमाह वृद्धवसिष्ठः—

'ग्रहणं तु भवेदिन्दोः प्रथमादधि यामतः ।
भुञ्जीतावर्त्तनात् पूर्वं पश्चिमे प्रथमादधः ॥
रवेस्त्वावर्त्तनादूर्ध्वमर्वागेव निशीथतः ।
चतुर्थे प्रहरे चेत् स्यात् चतुर्थप्रहरादधः ' ॥

इति । रात्रौ प्रथमात् यामादधि ऊर्ध्वं ग्रहणं चेत् आवर्त्तनान्मध्याह्नात् पूर्वं भुञ्जीत । रात्रिपश्चिमयामे चेत् रात्रि-

१. This verse is found in Râmchandrâ's commentary on Manu between verses No. 223 and 224. All other commentators except Râmchandra do not make remarks on this verse. २. E. G. and H. read प्रथमे प्रथमादधः; while I. reads पश्चिमे प्रहरादधः.

प्रथमयामादर्वाक् भुञ्जीत । अह्नश्चतुर्थप्रहरे रविग्रहश्चेत् रात्रेश्चतुर्थप्रहरादधो भुञ्जीतेत्यर्थः । निशीथो मध्यरात्रिः । मध्याह्नादूर्ध्वं रविग्रहणं चेत् मध्यरात्रादर्वागेव भुञ्जीतेत्यर्थः । शशिग्रहणे यामत्रयेण व्यवधानमपेक्षितम् । सूर्यग्रहे तु यामचतुष्टयेनेति तात्पर्यार्थः । तथा च वृद्धगौतमः—

'सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयम् ।
चन्द्रग्रहे तु यामांस्त्रीन् बाल-वृद्धातुरैर्विना' ॥

इति । बाल-वृद्धातुरविषये विशेषो मत्स्यपुराणे—

'अपराह्णे न मध्याह्ने मध्याह्ने चेन्न सङ्गवे ।
भुञ्जीत सङ्गवे चेत्स्यान्न पूर्वं भोजनं चरेत्' ॥

इति । समर्थस्य तु भोजने प्रायश्चित्तमुक्तं कात्यायनेन—

'चन्द्र-सूर्यग्रहे भुक्त्वा प्राजापत्येन शुद्ध्यति ।
तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुद्ध्यति' ॥

इति । शशिग्रहणे यामत्रयस्यापवादमाह वृद्धवसिष्ठः—

'ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत्' ॥

इति । ग्रस्तास्तमये विशेषमाह भृगुः—

'ग्रस्तावेवास्तमानं तु रवीन्दू प्राप्नुतो यदि ।
तयोः परेद्युरुदये स्नात्वा ऽभ्यवहरेन्नरः' ॥

इति । वृद्धगार्ग्योऽपि—

---

१. All others except A. and I. omit the following portion मध्याह्नादूर्ध्वं रविग्रहणं चेत् मध्यरात्रादर्वागेव भुञ्जीतेत्यर्थः. २. All others except A. and I omit -पुराणे and read मत्स्यः only. ३. Except A. and I. all others read न तु for चेन्न. ४. I. reads सङ्गवे ग्रहणं for भुञ्जीत सङ्गवे. ५. All others except A. and I. read भुक्तिमाचरेत्. ६. A. reads याज्ञवल्क्येन but we find this verse neither in Kâtyâyana nor Yâjnavalkya. ७. D. and G. read शशिग्रहे.

'सन्ध्याकाले यदा राहुर्ग्रसते शशि-भास्करौ।
तदहर्नैव भुञ्जीत रात्रावपि कदाचन'॥

इति। विष्णुधर्मोत्तरे ऽपि—

'अहोरात्रं न भोक्तव्यं चन्द्र-सूर्यग्रहो यदा।
मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परम्'॥

इति। ननु—मेघाद्यन्तर्धाने चाक्षुषं दर्शनं न सम्भवति—इति चेत्। न। दर्शनशब्देन शास्त्रविज्ञानस्य विवक्षितत्वात्। तदाह वृद्धगौतमः—

'चन्द्र-सूर्यग्रहे नाद्यात् तस्मिन्नहनि पूर्वतः।
राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनम्'॥

इति। एवं तर्हि—परेद्युरुदयात् प्रागपि शास्त्रविज्ञान-सम्भवाद् ग्रस्तास्तमयेऽपि[1] तत्रैव[2] भोजनं प्रसज्येत। तन्न।

'तयोः परेद्युरुदये स्नात्वाऽभ्यवहरेन्नरः'।
'अहोरात्रं न भोक्तव्यं चन्द्र-सूर्यग्रहो यदा'।

इति। वचनद्वयेन तदप्रसक्तेः। यत्तु स्कन्दपुराणे—

'यदा चन्द्रग्रहस्तात[3] निशीथात् परतो भवेत्।
भोक्तव्यं तत्र पूर्वाह्णे नापराह्णे कथञ्चन॥
पूर्वं निशीथात् ग्रहणं यदा चन्द्रस्य वै भवेत्।
तदा दिवा न कर्तव्यं भोजनं शिखिवाहन[4]'॥

इति। तदिदं यामत्रयाभिप्रायम्[5]। चन्द्रग्रहे तु 'यामांस्त्रीन्'—

---

१. All others except A. and I. omit ग्रस्तास्तमये ऽपि. २. B. C. E. F. G. and H. read तत्रैव; while D. reads तदैवं. ३. B. C. E. F. G. H. and I. read तात for तत्र. ४. D. reads शशिवाहन. ५. I. reads प्रायकम्.

इति विशेषस्य वृद्धगौतमेनाभिधानात्। पापक्षयकामो ग्रहणदिनमुपवसेत्। तदाह दक्षः—

'अयने विषुवे चैव चन्द्र-सूर्यग्रहे तथा।
अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यते' ॥

इति। पुत्री तु नोपवसेत्। तदाह नारदः—

'संक्रान्त्यामुपवासं च कृष्णैकादशिवासरे।
चन्द्र-सूर्यग्रहे चैव न कुर्यात् पुत्रवान् गृही' ॥

इति। ग्रस्तास्तमये तु पुत्रिणोऽप्युपवास एव। 'अहोरात्रं न भोक्तव्यम्'—इति भोजनप्रतिषेधात्। क्वचित्तु ग्रहणविशेषे स्नानादिकं न कर्त्तव्यम्। तदुक्तं षट्त्रिंशन्मते—

'सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा।
तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचित्' ॥

इति। एतच्च भूभागविशेषव्यवस्थितानां ग्रास-मोक्षदर्शनयोग्यत्वाभावे द्रष्टव्यम्।

॥ इति भोजनप्रकरणम् ॥

इत्थं निरूपितेन भोजनान्तेन कर्त्तव्यजातेनाह्नः पञ्चमभागमतिवाहयेत्। एतेन भागपञ्चककृत्याभिधानेनावशिष्टदिवसकर्त्तव्यजातमुपलक्षणीयम्। तच्च कर्त्तव्यजातं दक्षेण दर्शितम्—

'भुक्त्वा तु सुखमास्थाय तदन्नं परिणामयेत्।
इतिहास-पुराणाद्यैः षष्ठ-सप्तमकौ[1] नयेत् ॥
अष्टमे लोकयात्रा तु बहिः सन्ध्या[2] ततः पुनः'।
(द. स्मृ. २. ६२-६३)

---

१. The text of Daksha reads षष्ठं च सप्तमं नयेत. २. I. reads सन्ध्यां.

इति । अत्रिः—

'दिवास्वापं न कुर्वीत स्त्रियं चैव परित्यजेत् ।
आयुःक्षीणा[1] दिवा निद्रा दिवा स्त्री पुण्यनाशिनी ॥
इतिहास-पुराणानि धर्मशास्त्राणि चाऽभ्यसेत् ।
वृथा विवादवाक्यानि परीवादं च वर्जयेत्' ॥

इति । विष्णुपुराणेऽपि—

'अनायासप्रदायीनि कुर्यात् कर्माण्यतन्द्रितः ।
सच्छास्त्रादिविनोदेन[2] सन्मार्गाद्यविरोधिना[3] ॥
दिनं नयेत्ततः सन्ध्यामुपतिष्ठेत् समाहितः' ।
(वि. पु. ३. ११. ९४-९५)

इति । याज्ञवल्क्योऽपि—

'अहःशेषं समासीत शिष्टैरिष्टैश्च बन्धुभिः ॥ (११३)
उपास्य पश्चिमां सन्ध्यां हुत्वाऽग्नींस्तानुपास्य च ।
भृत्यैः परिवृतो भुक्त्वा नातितृप्तोऽथ[4] संविशेत्' ॥
(या. स्मृ. १. ११३-११४)

इति । 'उपास्य च' इति चकारेण वैश्वदेवादिकं समुच्चिनोति । सायंसन्ध्या-होमौ निरूपितौ । वैश्वदेवादौ कश्चिद्विशेषो विष्णुपुराणे दर्शितः—

'पुनः पाकमुपादाय सायमप्यवनीपते ।
वैश्वदेवनिमित्तं वै पत्न्या सार्धं बलिं हरेत्[5] ॥ (१०१)

१. All others except A. and I. read आयुःक्षीणं for आयुःक्षीणा.
२. A. reads this line as follows:—
नाऽसच्छास्त्रविनोदेन सन्मार्गार्थविरोधिना ॥.
३. B. C. F. and I. read सन्मार्गाद्यविरोधिना. ४. The text of Yâjnavalkya reads -तृप्याऽथ for -तृप्तोऽथ. ५. The text of Vishṇu Purâṇa reads पत्न्यमन्नं बलिं हरेत्.

तत्रापि श्वपचादिभ्यस्तथैवान्नं विसर्जयेत्[1] ।
अतिथिं चागतं तत्र स्वशक्त्या पूजयेद्बुधः ॥ (१०२)[2]
दिवा[3]ऽतिथौ तु विमुखे गते यत्पातकं नृप ।
तदेवाष्टगुणं पुंसां सूर्योढे[4] विमुखे गते ॥ (१०४)
तस्मात् स्वशक्त्या राजेन्द्र सूर्योढमतिथिं[5] नरः ।
पूजयेत् पूजिते तस्मिन् पूजिताः सर्वदेवताः ॥ (१०५)
कृतपादादिशौचश्च भुक्त्वा सायं ततो गृही ।
गच्छेदस्फुटितां[6] शय्यामपि दारुमयीं नृप ॥ (१०७)
(वि. पु. ३. ११. १०१–१०७)

इति ।

॥ इति अहःशेषादिकृत्यम् ॥

अथ शयनप्रकारमाह हारीतः—

'सुप्रक्षालितचरणतलो रक्षां कृत्वा उदकपूर्णघटादिमङ्गलोपेत आत्माभिरुचितामनुपहतां[7] सुत्रामाणमिति पठन्[8] शय्यामधिष्ठाय रात्रिसूक्तं जपित्वा विष्णुं नमस्कृत्य 'सर्पाऽपसर्प भद्रं

---

१. The text of V. P. reads तथैवान्नापवर्जनम् ; while B. C. D. E. F. G. and H. read तथैवान्नविसर्जनम्. २. After this verse D. and the text of V. P. add one verse more, which is—

'पादशौचाऽसन-प्रह्व-स्वागतोक्त्या च पूजनम् ।
ततश्चान्नप्रदानेन शयनेन च पार्थिव' ॥.

३. The text of V. P. reads दिनाऽतिथौ for दिवा ऽतिथौ. ४. I. reads सूर्योटे. ५. I. reads सूर्योटम्. ६. All others except A. and the text of V. P. read as follows:—

गच्छेच्छय्यामस्फुटितां ततो दारुमयीं नृप ।.

७. B. C. and F. read आत्माभिरूपां. ८. I. reads through mistake सुत्रामां पठम्.

ते'—इति श्लोकं जपित्वा इष्टदेवतास्मरणं कृत्वा समाधिमास्थाय अन्यांश्च वैदिकान् मंत्रान् सावित्रीं च जपित्वा मङ्गल्यं श्रुतं शङ्खं च शृण्वन् दक्षिणाशिराः स्वपेत्'।

(हा. स्मृ. ७. ३)

इति। दक्षिणाशिराः—इति प्रदर्शनार्थम्। तथा च विष्णुपुराणम्—

'प्राच्यां दिशि शिरः शस्तं याम्यायामथ वा नृप।
सदैव स्वपतः पुंसो विपरीतं तु रोगदम्'॥

(वि. पु. ३. ११. १०९)

इति। गार्ग्योऽपि—

'स्वगृहे प्राक्शिराः शेते ह्यायुष्यं दक्षिणाशिराः।
प्रत्यक्शिराः प्रवासे च न कदाचिदुदक्शिराः'॥

इति। पुराणेऽपि—

'रात्रिसूक्तं जपेत् स्मृत्वा सर्वांश्च सुखशायिनः'।
नमस्कृत्वाऽव्ययं विष्णुं समाधिस्थः स्वपेन्निशि'॥

इति। सुखशायिनोऽपि गोभिलेन दर्शिताः—

'अगस्तिर्माधवश्चैव मुचकुन्दो महामुनिः।
कपिलो मुनिरास्तीकः पञ्चैते सुखशायिनः'॥

इति। शयने वर्जनीयानाह मार्कण्डेयः—

१. I. reads -श्चैव. २. Except A. and I. all others read मङ्गल्यश्रुतं. ३. H. and I. read this line as follows:—

स्वगेहे प्राक्शिराः शेते आयुर्ये दक्षिणाशिराः।.

D. omits the whole verse. ४. A. reads विष्णुपुराणेऽपि; but we do not find the following verse in the said Purāṇa; while D. omitting पुराणेऽपि, and the preceding verse, shows that the verse belongs to Gārgya. ५. H. and I. read गालवेन. ६. I. reads through mistake मुचुकुन्दो

'शून्यालये श्मशाने च एकवृक्षे चतुष्पथे ।
महादेवगृहे वाऽपि मातृवेश्मनि न स्वपेत् ॥
न यक्ष-नागायतने स्कन्दस्यायतने तथा ।
कूलच्छायासु च तथा शर्करा-लोष्ट-पांसुषु ॥
न स्वपेच्च तथा गर्त्ते विना वीक्षां कथञ्चन ।
धान्य-गो-विप्र-देवानां गुरूणां च तथोपरि ॥
न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम् ।
नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः ॥
नाकाशे सर्वशून्ये च न च चैत्यद्रुमे तथा' ।

इति । विष्णुरपि—

'नार्द्रपादः स्वपेत् । नोत्तरापरा-ऽवाक्शिराः* ।
न नग्नः । नार्द्रवंशे । नाकाशे । न पलाश-
शयने । न पञ्चदारुकृते । न गजभग्नकृते ।

* प्राग्दक्षिणयोरभ्यनुज्ञानमनेन वाक्येन । गजेन भग्नस्य तरोः काष्ठेन कृते । विद्युता दग्धस्य तरोः काष्ठेन कृते । विद्युद्भिन्नेनाऽपि अग्निना दग्धे । घटैः आ सर्वदा सिक्तस्य तरोः काष्ठेन कृते । चपलो दुर्व्यसनी हस्त-पादादिविक्षेप्ता । गवादिशब्देन तच्छाला उच्यन्ते । धान्यवत् साक्षात् तदुपरि शयनासम्भवात् । उच्छिष्ट ऊर्ध्वाऽधरोच्छिष्टवान् । अशुचौ मूत्रविष्ठाद्युपहते देशे । इति व्याचकार नन्दपण्डितः ।

१. A. reads न स्वपेच्च तटाकाऽन्ते. २. D. reads ध्यायन् for धान्य-. ३. D. and I. read -स्थित-. ४. G. omits विष्णुरपि; while D. reads विष्णुपुराणे. ५. B C. D. F. G. H. and I. read नार्द्रवासाः for नार्द्रपादः. the text of Vishṇu Smriti reads सुप्यात for स्वपेत् and elsewhere स्वप्यात. ६. The text omits अवाक् and reads नोत्तरापरशिराः, but this is a mistake. B. C. D. E. F. G. H. and I. omit नोत्तरापराऽवाक्शिराः । न नग्नः । नार्द्रवंशे नाकाशे ।. ७. The text reads न पालाशे शयने. ८. I. reads न भग्नशयने in the place of न गजभग्नकृते.

न विद्युद्दग्धकृते[1] । न भिन्ने[2] । नाग्निप्लुष्टे[3] । न घटासिक्तद्रुमजे[4] । न श्मशान-शून्यालय-देवतायतनेषु । न चपलमध्ये[5] । न नारीमध्ये[6] । न धान्य[7]-गो-गुरु-हुताशन-सुराणामुपरि । नोच्छिष्टो[8] न दिवा सुप्यात् सन्ध्ययोर्न च भस्मनि । देशे न चाऽशुचौ नार्द्रे न च पर्वतमस्तके' ॥

(वि स्मृ. ७०. १–१७)

इति । विष्णुपुराणेऽपि–

'नाऽविशालां न वै भग्नां नाऽसमां[9] मलिनां न च ।
न च जन्तुमयीं[10] शय्यामधितिष्ठेदनास्तृताम्' ॥

(वि. पु. ३. ११. १०८)

इति । उशनाः–

'न चै[11] तैलाभ्यक्तशिराः स्वपेन्नादीक्षितः कृष्णचर्मणि' ।

इति । दक्षः–

---

१. All others except A. and the text omit -कृते and read -दग्धे. २. Except A. and the text all others omit न भिन्ने. ३. In other places the text reads नाग्निप्लुष्टे. ४. All others except A. and the text omit न घटासिक्तद्रुमजे । न श्मशान-शून्यालय-देवतायतनेषु. ५. All others except A. and the text read न बालमध्ये; but the commentator does not follow this reading. ६. B. C. D. and F. read नारिमध्ये; while E. G. H. and I. read न चारिमध्ये. ७. B. C. D. and F. omit धान्य-, and read न गोगेहे । न हुताश-, E. and G. read न धान्ये । न गोगेहे । न हुताश- and H. reads न धान्ये । न गो-गुरु-हुताशन-. All these readings are for न धान्य-गो-गुरु-हुताशन-. ८. B. C. D. E. F. G. and H. omit the latter portion of this verse and read नोच्छिष्टो न दिवा इति; while I. reads नोच्छिष्टे न दिवे इति, but this is a mistake. ९. D. and G. read न समां. १०. E. and G. read न वज्रं भ्रमरीं for न च जन्तुमयीं. ११. Except A. and D. all others omit च.

'प्रदोष-पश्चिमौ यामौ वेदाभ्यासरतो नयेत् ।
यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते' ॥
(द. स्मृ. २.६४)

इति । 'सन्ध्या स्नानम्'—इत्यारभ्य 'यो वेष्टितशिराः'—इत्यन्तेन ग्रन्थसन्दर्भेण श्रुत्युपलक्षणाभ्यामाह्निकं संक्षिप्य निरूपितम् । एतस्य करणे श्रेयः अकरणे तु प्रत्यवायः । तदुक्तं कूर्मपुराणे—

'इत्येतदखिलं प्रोक्तमहन्यहनि वै मया ।
ब्राह्मणानां कृत्यजातमपवर्गफलप्रदम् ॥
नास्तिक्यादथ वाऽऽलस्याद् ब्राह्मणो न करोति यः ।
स याति नरकान् घोरान् काकयोनौ प्रजायते ॥
नान्यो विमुक्तये पन्था मुक्त्वाऽऽश्रमविधिं स्वकम् ।
तस्मात् कर्माणि कुर्वीत तुष्टये परमेष्ठिनः' ॥
(कू. पु. १. २. १९. ३०-३२)

इति ॥ ६९ ॥

इत्थं च 'षट्कर्माभिरतः'—इत्यनेन ब्राह्मणस्याऽसाधारणधर्मान्निरूप्य तत्रत्याध्ययनादिसाधारणधर्मप्रसङ्गागतमाह्निकं परिसमाप्येदानीं प्रकृतानेव क्रमप्राप्तानभिषिक्तस्य क्षत्रियस्याऽसाधारणधर्मानाह—

---

१. The text of Daksha reads वेदाभ्यासेन तौ. २. The text of Daksha reads शयानो हि for शयानस्तु. ३. I. reads इत्थं तदखिलं; while the text of K. P. reads इत्येतदखिलंनोक्तं. ४. E. and G. read कालयोनौ; while B. C. and F. read व्यालयोनौ. ५. B. C. D. E. F. and G. omit च. ६. H. and I. substitute स्वकर्माभिरतः for षट्कर्माभिरतः. ७. I. reads स्य साधारण-. ८. . reads तत्राध्ययनादि-. ९. I. reads क्षत्रियस्य साधारण-.

अव्रता[1] ह्यनधीयाना यत्र भैक्ष्यचरा द्विजाः ।
तं ग्रामं दण्डयेद्राजा चोर-भक्तप्रदो हि सः ॥ ६० ॥

क्षत्रियो हि प्रजा रक्षन् शस्त्रपाणिः प्रदण्डवान्[2] ।
निर्जित्य[3] परसैन्यानि क्षितिं धर्मेण पालयेत्[4] ॥ ६१ ॥

पुष्पं[5] पुष्पं विचिनुयान्मूलच्छेदं न कारयेत् ।
मालाकार इवारामे[6] न यथाऽङ्गारकारकः ॥ ६२ ॥

इति । द्विविधो हि राजधर्मः दुष्टशिक्षा शिष्टपरिपालनं च । तत्राद्येन श्लोकेन दुष्टशिक्षा प्रतिपाद्यते । व्रतशब्देनात्र ब्रह्मचारिकर्तृकं मध्वादिवर्जनमभिप्रेतम् । तथा च याज्ञवल्क्यः 'व्रतमपीडयन्' (या. स्मृ. १. ३) इत्युक्त्वा विवक्षितं तद्व्रतं स्पष्टीचकार—

'मधु-मांसाञ्जनोच्छिष्ट-शुक्त[7]-स्त्री-प्राणिहिंसनम् ।
भास्करालोकनाश्लील-परिवादादि[8] वर्जयेत्' ॥
(या. स्मृ. १. ३३)

इति । यद्वा स्वगृह्यप्रसिद्धानि प्राजापत्यादीनि चत्वार्यत्र व्रतशब्दाभिधेयानि । तदुभयविधव्रतरहिताः स्वाध्यायमप्यनधीयाना ब्रह्मचारिणो यत्र ग्रामे भैक्ष्यमाचरन्ति तं

---

१. M. reads अनृता. २. M. reads प्रचण्डवत्. ३. M. reads विजित्य. ४. G. H. I. K. and M. read पालयन्. ५. J. and K. read पुष्पं फलं; while I. reads पुष्पमात्रं. ६. M. reads इवोद्याने. ७. B. C. and F. read -शुल्क-; while G. reads -शुक्र-. ८. All others except A. and the text of Yâjnavalkya read -वादांश्च, but the commentator of the text does not follow the reading.

ग्रामं दण्डयेत् । यतः स ग्रामश्चौरसदृशेभ्यो भक्तमन्नं प्रयच्छति । अनेन वचनेन विहितमननुतिष्ठतां प्रतिषिद्ध-मनुतिष्ठतां सर्वेषां राज्ञां दण्डनीयत्वमुपलक्ष्यते । अत एव नारदः—

'यो यो वर्णो ऽपहीयेत यो ये उद्रेकमाप्नुयात् ।
तं तं दृष्ट्वा स्वतो मार्गात् प्रच्युतं स्थापयेत्पथि ॥
अशास्त्रोक्तेषु चान्येषु पापयुक्तेषु कर्मसु ।
प्रसमीक्ष्याऽऽत्मना राजा दण्डं दण्ड्येषु पातयेत्' ॥
(ना. स्मृ. १७. ६७)

इति । याज्ञवल्क्यः—

'कुलानि जातीः श्रेणीश्च गणान् जानपदानपि ।
स्वधर्माच्चलितान् राजा विनीय स्थापयेत्पथि' ॥
(या. स्मृ. १. ३६१)

इति । मनुरपि—

'पिताऽऽचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः ।
नाऽदण्ड्यो नाम राज्ञोऽस्ति यस्त्वधर्मेण तिष्ठति' ॥
(म. भा. शां. रा. १२१. ६०)

इति । याज्ञवल्क्यो ऽपि—

---

१. I. reads ऽवहीयेत. २. All others except A. and the text of Nârad read यश्चोद्रेकमनुव्रजेत्. ३. I. inserts this verse in the quotation fro Yâjnavalkya, but it is a mistake. ४. D. reads च्चरितान्, and I. rea च्चकितान्. ५. B. C. F. and G. read यः स्वधर्मेण while D. omits th following—

..........यस्त्वधर्मेण तिष्ठति' ॥

इति । याज्ञवल्क्योऽपि—

'अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपि वा ।
नादण्ड्यो नाम राज्ञोऽस्ति.............................. ॥

'अपि भ्राता सुतोऽर्घ्यो[1] वा श्वशुरो मातुलोऽपि वा।
नाऽदण्ड्यो नाम राज्ञोऽस्ति धर्माद्विचलितः स्वकात्'॥
(या. स्मृ. १. ३५८)

इति। दण्ड्यदण्डनं प्रशंसति याज्ञवल्क्यः—

'यो दण्ड्यान् दण्डयेद्राजा सम्यग्वध्यांश्च घातयेत्।
इष्टं स्यात् क्रतुभिस्तेन समाप्तवरदक्षिणैः'॥
(या. स्मृ. १. ३५९)

इति।[2] अदण्ड्यदण्डनं निषेधयति मनुः—

'अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्।
अयशो महदाप्नोति नरकं चैव गच्छति'॥
(म. स्मृ. ८. १२८)

इति। दण्डश्च द्विविधः शारीरोऽर्थदण्डश्चेति। यथाऽऽह नारदः-

'शारीरश्चार्थदण्डश्च दण्डश्च द्विविधः स्मृतः। (५३)
[4]शारीरस्ताडनादिस्तु मरणान्तः प्रकीर्त्तितः॥ (५४)
[5]काकिण्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव च'॥
(ना. स्मृ. २१. ५३-५५)

इति। राज्ञो दण्डयितृत्वं महता प्रबन्धेन सम्भावयति मनुः—

'अराजके हि लोकेऽस्मिन्[6] सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः॥
इन्द्रा-ऽनिल-यमा-ऽर्काणामग्नेश्च वरुणस्य च।
चन्द्र-वित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः॥

१. I. reads भार्या for अर्घ्यो वा. २. G. reads अदण्ड्यान् दण्डयन्तं निषेधति. ३. I. reads शारीर आर्थिकश्चेति, while all others except B. C. and F. omit ति. ४ The text reads—शारीरः सन्निरोधादिर्जीवितान्तस्तथैव च. ५. A. reads कणादिस्त्वर्थदण्डस्तु. ६. A. reads लोकस्य.

यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥
तपत्यादित्यवच्चैव चक्षूंषि च मनांसि च ।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥
सो ऽग्निर्भवति वायुश्च सो ऽर्कः सोमः स धर्मराट् ।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥
बालो ऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशु-द्रव्यसञ्चयम् ॥
कार्यं सो ऽवेक्ष्य शक्तिं च देश-कालौ च तत्त्वतः ।
कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनःपुनः ॥
यस्य प्रसादे पद्मा ऽऽस्ते विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥
यस्तु तं द्वेष्टि सम्मोहात् स विनश्यत्यसंशयम् ।
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः ॥
तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् ॥

---

१. D. reads चैवं; while A. reads च तं. २. G. reads नरेन्दुरुपसर्पिणम्. ३. All others except A. and I. read यस्य प्रसादे पद्मा श्रीः; while G. reads तस्य प्रसादे पद्मा ऽऽस्ते. ४. The text of Manu reads तं यस्तु. ५. B. C. E. F. H. and I. read तस्माद्धर्ममभीष्टेषु; while G. reads तस्माद्धर्मपर्यष्टेषु. ६. I. reads सत्यं पश्येत् through mistake. ७. I. reads तद्धर्मं.

तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम्।
ब्रह्मतेजोमयं दण्डमसृजत् पूर्वमीश्वरः॥ (१४)
तं राजा प्रणयन्सम्यक् त्रिवर्गेणाभिवर्द्धते'। (२७)
(म. स्मृ. ७. ३-२७)

इति। महाभारते-
'परोक्षा देवताः सर्वा राजा प्रत्यक्षदेवता।
प्रसादश्च प्रकोपश्च प्रत्यक्षो यस्य दृश्यते॥
राजा माता पिता चैव राजा कुलवतां कुलम्।
राजा सत्यं च धर्मश्च राजा हितकरो नृणाम्॥
कालो वा कारणं राज्ञो राजा वा कालकारणम्।
इति ते संशयो माभूत् राजा कालस्य कारणम्॥
राजमूलो महाराज धर्मो लोकस्य लभ्यते।
प्रजा राजभयादेव न खादन्ति परस्परम्'॥
(म. भा. शां. रा. ६९. ७९.)

इति। ननु-'दण्डयेद्राजा'-इति भूपालस्यापि दण्डयितृत्वमुक्तम्। तत्कथं क्षत्रियस्याऽसाधारणधर्मः? मैवम्। राजशब्दस्य क्षत्रियविषयत्वेनावेष्ट्यधिकरणे निर्णीतत्वात्। तथा हि-द्वितीयाध्याये अवेष्ट्यधिकरणे श्रूयते-'आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा'- इत्यादिना राजकर्तृके राजसूये

१. D. reads तस्यांगे. २. All others except A. D. and the text of Manu read धर्ममात्मनः. ३. All others except A. and the text of Manu substitute दण्डं for सम्यक्. ४. G. reads -धर्मतः ५. A. reads यत्र. ६. H. reads राजमूलो राजधर्मो. ७. I. reads रक्ष्यते. ८. B. C. D. E. and F. read नन्दन्ति च for न खादन्ति. ९. From तथा हि to (P. 451, L. 17) एवमत्रापि राजशब्दः क्षत्रियपरः (both including) the intermediate portion is omitted by all others except A. and I.

अवेष्टिनामकेष्टिं प्रकृत्य–'यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये विधायाहुतिं हुत्वा तमभिघारयेत् । यदि राजन्य ऐन्द्रम् । यदि वैश्यो वैश्वदेवम्'–इति ।

तत्र संशयः । किं ब्राह्मणादीनामवेष्टौ प्राप्तानां वर्णानां राजसूये ऽधिकारः ? उत क्षत्रियस्यैव?–इति । तदर्थं च किं राजशब्दः त्रयाणामपि वर्णानां वाचकः ? किंवा क्षत्रियस्यैव ?–इति । ततोऽपि पुनर्विचारयितव्यम् । किं राजशब्दो राज्ययोगनिमित्तः? क्षत्रियत्वनिमित्तो वा ?–इति । तत्र राजशब्दो राज्ययोगनिमित्त एव । आर्यप्रसिद्धेः । सर्वलोकप्रसिद्धत्वादविगानाच्च । न तु क्षत्रियत्वनिमित्तः । अनार्यप्रसिद्धेरार्यप्रसिद्धापेक्षया दुर्बलत्वात् । द्रविडेषु विगानात् । तदन्येष्वप्रसिद्धश्च । तत्र स्यात् राज्ययोगात् राजानस्त्रयोऽपि भवन्ति । राज्यपदं तु रूढ्या जनपदरक्षणे वर्त्तते । न राजयोगमपेक्षते ।

ननु– 'कर्मणि '– इत्यधिकृत्य–

'पत्यन्तपुरोहितादिभ्यो यक् '।

(पा. सू. ५. १. १२८)

इति वचनात् राजशब्दस्य तत्र पाठादाचाराच्च स्मृतेर्बलीयस्त्वात् राजयोग एव राज्यपदप्रवृत्तिनिमित्तं–इति चेत् । लोकप्रयोगस्यैव शब्दार्थावधारणे प्रमाणत्वात् स्मृतेरपि स एव मू[लं] नान्यत् । प्रयोगाच्च राज्यशब्दस्यैव स्वातन्त्र्यं तन्निमित्त[त्वं] च राजशब्दस्यावगम्यते । ततस्तदनुसारेण स्मरणं शब्दापश[ब्द]

१. Here I. gives the reading अत्र तस्मात्. २. I. reads पत्यंश- throu[gh] mistake.

विभागमात्रपरं व्याख्येयम् । अतस्त्रयाणामपि राजपदाभिधेयत्वेन राजसूये प्राप्तानां निमित्तार्थानि श्रवणानि । 'यदि' शब्दोऽपि राजशब्दस्य राज्ययोगनिमित्तत्वे प्रमाणम् । अन्यथा प्राप्त्यभावात् 'यदि' शब्दोऽनुपपन्नः स्यात् । वैदिकश्च निर्देशः स्मृतेरपि बलीयान् । तस्मात् निमित्तार्थानि श्रवणानि—इति प्राप्ते ब्रूमः ।

न तावद्वैदिकनिर्देशादत्र निर्णयः शक्यते । अन्यथाऽपि तत्सद्भावात् । 'राजानमभिषेचयेत्'— इति ह्यभिषेकविधौ प्रागेव राज्ययोगाद्राजशब्दस्य क्षत्रियमात्र एव प्रयुक्तत्वात् । तेन रूढमेव राजपदं निर्णीयते । 'यदि' शब्दस्तु निपातत्वाद् 'यथा कथञ्चिदपि नियमे न दुष्यति'—इति स्मरणाच्च स्वतन्त्रमेव राजपदम् । न च तस्य निर्मूलत्वम् । द्रविडप्रयोगस्यैव मूलस्य सम्भवात् । अतो न यथार्थत्वे स्मरणस्य प्रमाणमस्तीति । तेनैवाभियुक्तप्रणीतेनाचारस्य सम्भवात् । गौण-भ्रान्त्यादिप्रयोगप्रसृतस्य बाधात् राज्ययोगेन राजशब्दः । स्वतन्त्रस्तु [रा]जशब्दः क्षत्रियवचन—इति ब्राह्मणादेरवेष्टौ प्राप्त्यभावात् [ज्ञा]पकानि वचनानि—इति । एवमत्रापि राजशब्दः क्षत्रियपरः ।

[4]ननु—जनरञ्जनाद्राजत्वं महाभारतेऽभिहितम्—

'रञ्जनात् खलु राजत्वं प्रजानां पालनादपि'।

इति । बाढम् । सम्भवत्येवं क्षत्रियस्यापि रञ्जकत्वम् । [']क्षत्रियो हि' इत्यनेन द्वितीयश्लोकेन शिष्ट[5]परिपालनरूपो धर्मो

१. I. reads प्रयुक्तः. २. I. reads नयने. ३. I. gives the correct [r]eading नायथार्थत्वे. ४. B, C. and F. read ननु च- for ननु -जन-. ५. I. [o]mits -परि-.

अभिधीयते[1]। राजधर्मेषु प्रजारक्षणस्य[2] प्राधान्येन विवक्षितत्वात् प्रथमं प्रजारक्षणमित्युक्तम्। अत एव याज्ञवल्क्यः-

'प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम्'[3]।

(या. स्मृ. १. ११९)

इति। मनुरपि तदेवादौ प्रदर्शयति-

'प्रजानां रक्षणं दानमिज्या ऽध्ययनमेव च।
विषयेष्वप्रसक्तिं च[4] क्षत्रियस्य समादिशत्'॥

(म. स्मृ. १. ८९)

इति। शान्तिपर्वण्यपि-

'नृपाणां परमो धर्मः प्रजानामेव पालनम्[5]।
निर्दिष्टफलभोक्ता हि राजा धर्मेण[6] युज्यते॥
वर्णानामाश्रमाणां च राजा भवति पालकः।
स्वे स्वे धर्मे नियुञ्जानः प्रजाः स्वाः पालयेत् सदा॥
पालनेनैव भूतानां कृतकृत्यो महीपतिः।
सम्यक् पालयिता भागं धर्मस्याप्नोति पुष्कलम्॥
यजते यदधीते च यद्ददाति यदर्चति।
राजा षड्भागभाक् तस्य प्रजा धर्मेण पालयन्[7]॥
सर्वाश्चैव प्रजा नित्यं राजा धर्मेण पालयेत्।
उत्थानेन[8] प्रमादेन पूजयेच्चापि धार्मिकान्॥

---

१. A. reads निरूप्यते, and I. विधीयते. २. A. reads प्रजारञ्जनस्य ३. I. reads प्रधानः क्षत्रियं धर्मः, but all other manuscripts, as wel as the text, do not follow this reading. ४. The text of Manu reads अप्रसक्तिश्च. ५. I. reads प्रजानां परिपालनम्. ६. B. C. D. E. and F. read राजधर्मेण for राजा धर्मेण. ७. After this word B. C. D. E. F. G. and H. add इति. ८. D. reads प्रयत्नेन.

राज्ञा हि पूजितो धर्मस्ततः सर्वत्र पूज्यते।
यद् यदा ऽऽचरते राजा तत् प्रजानां स्म रोचते' ॥

इति। मार्कण्डेयपुराणे—

'वत्स राज्याभिषिक्तेन प्रजारञ्जनमादितः।
कर्त्तव्यमविरोधेन स्वधर्मस्य महीभृता॥
पालनेनैव भूतानां कृतकृत्यो महीपतिः।
सम्यक् पालयिता भागं धर्मस्याप्नोति पुष्कलम्' ॥
(मा. पु. २७. ४–३१.)

इति। ब्रह्माण्डपुराणे—

'यदन्हा कुरुते धर्मं प्रजा धर्मेण पालयन्।
दशवर्षसहस्राणि तस्य भुङ्क्ते महत्फलम्' ॥
(म. भा. शां. रा. ७१. २९)

इति। मनुरपि—

'सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः।
अधर्मादपि षड्भागो भवत्येव ह्यरक्षतः॥
रक्षन् धर्मेण भूतानि राजा वध्यांश्च घातयन्।
यजते ऽहरहर्यज्ञैः सहस्र-शतदक्षिणैः॥
यो ऽरक्षन्बलिमादत्ते करं शुल्कं च पार्थिवः।
प्रीतिं भोगं च दण्डं च स सद्यो नरकं व्रजेत्'॥

इति। रक्षणीयाश्च प्रजा भयमापन्नाः। भयं च तासां द्वेधा सम्पद्यते। चोर-व्याघ्रादिभ्यः परसैन्येभ्यो वा। अतस्तदुभय-

१. I. reads च. २. The text of Mârkaṇḍeya Purâṇa reads राज्ये ऽभिषिक्ते च. ३. D. reads महीभृतः. ४. The text reads वत्सलः. ५. B. C. and F. read भागं च.

निवारणाय 'प्रदण्डवान्'—इति 'परसैन्यानि निर्जित्य'—इति चोक्तम्। एतच्च निवारणं क्षत्रियस्यैव कुतो ऽसाधारणमित्याशङ्क्य तद्धेतुत्वेन शस्त्रपाणित्वं वर्णितम्। तच्च क्षत्रियस्यैव। तथा च मनुः—

'शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्-पशु-कृषिर्विशः।
आजीवनार्थं धर्मस्तु दानमध्ययनं यजिः'॥

(म. स्मृ. १०. ७९)

इति। आनुशासनिकेऽपि क्षत्रियं प्रकृत्य पठ्यते—

'उत्साहः शस्त्रपाणित्वं तस्य धर्मः सनातनः'।

इति। शस्त्रपाणित्वेन च युद्धोपकरणानि सर्वाण्युपलक्ष्यन्ते। तानि च शान्तिपर्वणि दर्शितानि—

'यष्टयस्तोमराः खड्गा निशिताश्च परश्वधाः।
फलकान्यथ वर्माणि परिकल्प्यान्यनेकशः'॥

इति। 'प्रदण्डवान्' इत्यनेन चौरादिशिक्षा विवक्षिता। यद्यप्येषा पूर्ववचन एवोक्ता तथापि तत्र सा प्राधान्येन प्रतिपादिता। अत्र तु प्रजारक्षणसाधनत्वेनेति न पौनरुक्त्यम्। दण्डप्रकारमाह मनुः—

'अनुबन्धं परीक्ष्यार्थं देश-कालौ च तत्त्वतः।
सापराधमथालोच्य दण्डं दण्ड्येषु पातयेत्'॥

(म. स्मृ. ८. १२६)

इति। विष्णुः—

---

१. From तद्धेतुत्वेन to च युद्धोपकरणानि the intermediate portion is omitted by E. We do not think that this omission is a mistake of the writer. २. B. C. D. E. F. G. and H. read -कृषी. ३. I. reads अगुः; while D. reads यज्ञः through mistake. ४. I. omits सा. ५. The text of Manu reads परिज्ञाय for परीक्ष्यार्थं.

'आगःस्वपि[1] तथाऽन्येषु ज्ञात्वा जातिं धनं वयः।
दण्डं[2] प्रकल्पयेद्राजा सम्मन्त्र्य[3] ब्राह्मणैः सह' ॥
(वि. स्मृ. ९. १९४)

इति[4]। बृहस्पतिरपि—
'वाग्धिग्वधः स्वकं चैव चतुर्धा कल्पितो दमः।
पुरुषे दोषविभवं ज्ञात्वा सम्परिकल्पयेत् ॥
गुरून् पुरोहितान् विप्रान् वाग्दण्डेनैव दण्डयेत्।
विवादिनो नरांश्चान्यान् दोषिणोऽर्थेन दण्डयेत् ॥
महापराधयुक्तांश्च वधदण्डेन दण्डयेत्'।

इति। तथा च[5] कात्यायनः—
'मित्रादिषु प्रयुञ्जीत वाग्दण्डं धिक् तपस्विनाम्।
यथोक्तं तस्य तत्कुर्युरनुक्तं साधुकल्पितम् ॥
अधार्मिकं त्रिभिर्न्यायैर्निगृह्णीयात् प्रयत्नतः।
निरोधनेन बन्धेन विविधेन वधेन च' ॥

इति। मनुः—
'दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत्।
त्रिषु वर्णेषु तानि[6] स्युरक्षतो ब्राह्मणो व्रजेत् ॥
उपस्थमुदरं जिह्वा हस्तौ पादौ[7] च पञ्चमम्।
चक्षुर्नासे च कर्णौ च धनं देहस्तथैव च ॥

---

१. B. C. D. and F. read आप्तेष्वपि for आगःस्वपि. The text of Vishṇu reads अपराधिषु चाऽन्येषु for आगःस्वपि तथाऽन्येषु. २. I. reads दण्डं तु प्रणयेद्राजा. ३. Except A. and the text of Vishṇu all others read सामन्त- for सम्मन्त्र्य. ४. B. C. E. F. and G. omit इति। बृहस्पतिरपि. H. also omits this, but these words appear in the marginal correction. ५. I. omits च. ६. The text of Manu reads यानि. ७. B. C. and F. read पादं.

मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते ।
पुरुषाणां कुलीनानां नारीणां च विशेषतः ॥
(म. स्मृ. ८. १२४–१२८

इति । बृहस्पतिरपि—

'जगत् सर्वमिदं हन्यात् ब्राह्मणस्य न तत्समम् ।
तस्मात्तस्य वधं राजा मनसाऽपि न चिन्तयेत् ॥
अवध्यान् ब्राह्मणानाहुः सर्वपापेष्ववस्थितान् ।
येषाद्विप्रेषु कुशलं तत्तद्राजा समाचरेत् ।
राष्ट्रादेनं बहिः कुर्यात् समग्रधनमक्षतम्' ॥

इति । यमोऽपि—

'एवं धर्मप्रवृत्तस्य राज्ञो दण्डधरस्य च ।
यशोऽस्मिन् प्रथते लोके स्वर्गे वासस्तथाऽक्षयः' ॥

इति । परसैन्यनिर्जयस्तु शान्तिपर्वणि दर्शितः—

'चैत्रे वा मार्गशीर्षे वा सेनायोगः प्रशस्यते । (१०
पक्वसस्या हि पृथिवी भवत्यम्बुमती तदा ॥
नैवातिशीतो नात्युष्णः कालो भवति भारत । (११
तस्मात्तदा योजयीत परेषां व्यसनेषु वा ॥
एते हि योगाः सेनायाः प्रशस्ताः परबाधने । (१२
जलवांस्तृणवान्मार्गः समो गम्यः प्रशस्यते ॥
चारैः सुविदिताभ्यासः कुशलैर्वनगोचरैः । (१३)

---

१. यद्यद्धि कुशलं यस्मात् for यद्यद्विप्रेषु कुशलं. २. All others except I. omit यमोऽपि. ३. The text of Mahâbhârata reads चैत्र्यां वा मार्गशीर्ष्यां वा. ४. I. reads तथा. ५. B. C. D. E. F. G. and H. read गच्छति. ६. The text reads तथा योजयेत. ७. H. reads जनवान्.

सप्तर्षीन् पृष्ठतः कृत्वा युद्ध्येयुरचला इव । (१९)
यतो वायुर्यतः सूर्यो यतः शुक्रस्ततो जयः । (२०)
अकर्दमामनुदकाममर्यादामलोष्टकाम् ।
अश्वभूमिं प्रशंसन्ति ये युद्धकुशला जनाः ॥
समा निरुदका चैव रथभूमिः प्रशस्यते ।
नीचद्रुमा महाकक्षा सोदका हस्तियोधिनाम् ॥
बहुदुर्गा महावृक्षा वेणु-वेत्रतिरस्कृता ।
पदातीनां क्षमा भूमिः पर्वतोपवनानि च ॥
पदातिबहुला सेना दृढा भवति भारत ।
रथाऽश्वबहुला सेना सुदिनेषु प्रशस्यते ॥
पदाति-नागबहुला प्रावृट्काले प्रशस्यते ।
गुणानेतान् प्रसङ्ख्याय युद्धं शत्रुषु योजयेत्' ॥
(म. भा. शां. रा. १००. १०-२५)

इति । मनुरपि-

'यदा तु यानमातिष्ठेदरिराष्ट्रम्प्रति प्रभुः ।
तदाऽनेन विधानेन यायादरिपुरं शनैः ॥
मार्गशीर्षे शुभे मासे यायाद्यात्रां महीपतिः ।
फाल्गुनं वाऽथ चैत्रं वा मासौ प्रति यथाबलम् ॥
अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयम् ।
तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः ॥

१. The text reads सपङ्कगर्तरहिता. २. The text reads -समाकुला. ३. B. C. E. F. and H. read सर्वतोपवनानि च; while I. reads सर्वतो न नानि च. ४. I. reads तथाऽश्व-. ५. The text reads देश-कालौ प्रयोजयेत्. ६. The text of Manu reads मासि. ७. B. C. and F. read फाल्गुने वाऽथ चैत्रे वा. ८. I. reads अन्येष्वप्यृतु-.

कृत्वा विधानं मूले तु यात्रिकं च यथाविधि ।
उपगृह्यास्पदं चैव चारान् सम्यग्विधाय च ॥
संशोध्य त्रिविधं मार्गं षड्विधं च स्वकं बलम् ।
साम्परायिककल्पेन यायादरिपुरं शनैः ' ॥

(म. स्मृ. ७. १८१-१८५)

इति । बलस्य षड्विधता उशनसा दर्शिता—

'मूलबलं श्रेणीबलं मित्रबलं
भृतकबलं शत्रुबलमाटविकबलं च' ।

इति । युद्धार्थं सैन्यसन्नाहरचनामाह मनुः—

' दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ।
वराह-मकराभ्यां वा सूच्या वा गरुडेन वा ॥
यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम् ।
पद्मेन चैव व्यूहेन निविशेत तदा स्वयम् ॥
सेनापति-बलाध्यक्षौ सर्वदिक्षु निवेशयेत् ।
यतश्च भयमाशङ्केत्प्राचीं कल्पयेद्दिशम् ॥
गुल्मांश्च स्थापयेदाप्तान् कृतसंज्ञान् समन्ततः ।
स्थाने युद्धे च कुशलानभीरूनविकारिणः ॥
संहतान् योधयेदल्पान् कामं विस्तारयेद्बहून् ।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत् ॥

---

१. B. C. E. F. G. and H. read चारं. २. B. C. E. and F. read मदालसादर्शिता for उशनसा दर्शिता. ३. I. reads तथा; while the text reads यदा. ४. I. reads सेनापतीन् बलाध्यक्षान्. ५. B. C. D. E. F. G. and H. read दीप्तान् for आप्तान्. ६. B. C. D. E. F. and G. read स्थानयुद्धे. ७. A. reads विभजेरप्तान्.

स्यन्दनाश्वैः समे युद्ध्येदनूपे नौ-द्विपैस्तथा ।
वृक्ष-गुल्मावृते चापैरसि-चर्मायुधैः स्थले ॥
कौरुक्षेत्रांश्च मात्स्यांश्च पाञ्चालाञ्छूरसेनजान् ।
दीर्घान् लघूंश्चैव नरानग्रानीकेषु योजयेत् ॥
प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक् परीक्षयेत् ।
चेष्टाश्चैव विजानीयादरीन् योधयतामपि ॥
उपरुद्ध्यारिमासीत राष्ट्रं चास्योपपीडयेत् ।
दूषयेच्चास्य सततं यवसान्नोदकेन्धनम् ॥
भिन्द्याच्चैव तडागानि प्राकार-परिखास्तथा ।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा ॥
उपजप्यानुपजपेद्बुद्ध्येच्चैव हि तत्कृतम् ।
युक्ते च दैवे युद्ध्येत जयप्रेप्सुरपेतभीः ॥
साम्ना दानेन भेदेन समस्तैरथ वा पृथक् ।

---

१. B. C. E. and F. read—

युद्ध्येरन् स्यन्दनाश्वैश्च समेऽनूपे च नौ-द्विपैः ।,

and D. and G.—

युद्ध्येरन् स्यन्दनाश्चैव समेऽनूपे च नौ द्विपैः ।.

२. I. and the text of Manu read कुरुक्षेत्रांश्च मत्स्यांश्च. ३. B. C. D. E. F. and G. omit—

चेष्टाश्चैव विजानीयादरीन् योधयतामपि ।.

४. B. C. D. E. F. and G. omit the following three lines --

भिन्द्याच्चैव तडागानि प्राकारपरिखास्तथा ।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा ॥
उपजप्यानुपजपेद्बुध्येच्चैव हि तत्कृतम् ।

H. also omits these lines, but they appear in the marginal correction of the manuscript. ५. I. reads तटाकानि. ६. I. reads अपि for तथा. ७. I. reads उपजाप्या-. ८. The text of Manu reads युद्ध्येतैव च.

विजेतुं प्रयतेतारीन् न युद्धेन कदाचन ॥
अनित्यो विजयो यस्मात् दृश्यते युद्ध्यमानयोः।
पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत् ॥
त्रयाणामप्युपायानां पूर्वोक्तानामसम्भवे ।
तथा युद्ध्येत सम्पन्नो विजयेत रिपुं यथा ॥
जित्वा सम्पूजयेद्देवान् ब्राह्मणांश्चैव धार्मिकान् ।
प्रदद्यात् परिहारांश्च ख्यापयेदभयानि च ॥
सर्वेषां तु विदित्वैषां समासेन चिकीर्षितम् ।
स्थापयेत् तत्र तद्वंश्यं कुर्याच्च समयक्रियाम् ॥
प्रमाणानि च कुर्वीत तेषां धर्मान् यथोदितान्' ।
(म. स्मृ. ७. १८७-२०३)

इति। उक्तप्रकारेण परसैन्यानि निर्जित्य जितामेतां पूर्वां च स्वकीयां भुवं राजधर्मेण पालयेत् । तदेव धर्मेण पालनं 'पुष्पं पुष्पं' (६२)—इति *तृतीयश्लोकेन विशदीक्रियते । यथा मालाकार आरामे यदा यदा यत् यत्पुष्पं विकसति तदा तदा तं-त्तद्विचिनोति । न तु पुष्पलतामुन्मूलयति । तथा प्रजाभ्यः करमाददानो राजा यथोदयं षष्ठं भागं गृह्णीयात् । अंगारका-

* तृतीयश्लोकेन पूर्वमुदाहृते मूलस्थश्लोकत्रये अन्त्येन द्विपाठितमेनेति बोध्यम् ।

१. B. C. D. E. F. G. and H. read युद्ध्येत. २. G. reads संक्रामे. ३. B. C. E. and G. read सम्पत्तौ; while I. reads संयत्तो. ४. B. C. D. E. F. G. and H. read रिपूंस्तथा; while H. and the text of Manu read रिपून्यथा. ५. B. C. D. E. F. and G. read परिहारार्थं. ६. D. reads पक्षयेत. ७. The text of Manu reads धर्म्यान्. ८. I. reads पुष्पमात्रं. ९. I. reads तद्विचिनोति.

रकस्तु वृक्षमुन्मूल्य सर्वात्मना दहति । न तु तथा प्रजाः पीडयेत् । एतच्च शान्तिपर्वणि दर्शितम्—

'मधुदोहं दुहेद्राष्ट्रं भ्रमरान्न प्रवासयेत्[१] ।
वत्सापेक्षी दुहेच्चैव स्तनांश्चैव न कुट्टयेत्[२],[३] ॥
जलौकावत्[४] पिबेद्राष्ट्रं मृदुनैव नराधिपः ।
व्याघ्रीवदुद्धरेत्[५] पुत्रं न दशेन्न च पीडयेत् ॥
यथा च लेखकः पर्णमाखुः पादत्वचं यथा[६] ।
अतीक्ष्णेनाभ्युपायेन[७] तथा राष्ट्रं समापिबेत् ॥
अल्पेनाल्पेन देयेन वर्धमानं प्रदापयेत् ।
ततो भूयस्ततो भूयः क्रमाद्वृद्धिं[८] समाचरेत्' ॥
(म. भा. शां. रा. ८८. ४–७)

इति । मनुरपि—

'क्रय-विक्रयमध्वानं भक्तं च सपरिव्ययम् ।
योग[९]-क्षेमं च सम्प्रेक्ष्य वणिजो दापयेत् करान् ॥
यथा फलेन युज्येत[१०] राजा कर्त्ता च कर्मणाम् ।
यथाऽवेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान् ॥

१. The text of Mahâbhârata reads भ्रमर इव पादपम. २. All except A. and the text read न चक्षुवत्पीडयेत्. ३. I. reads स्तनांश्चैव विकुट्टयेत through mistake. ४. A. D. and G. read जलूकावत. ५. B. C. D. F and G. read व्याघ्री चापहरेत्, E. and H. read व्याघ्रीवापहरेत. A. reads व्याघ्रीवशाहरेत् and the text व्याघ्रीव च हरेत. ६. The text reads यथा शल्यकवानाखुः पदं धूनयते सदा ।. ७. Except A. and the text all read अतीक्ष्णेनाभ्युपायेन वर्धमानं प्रदापयेत् omitting तथा राष्ट्रं समापिबेत ॥ अल्पेनाल्पेन देयेन. ८. I. reads क्रमावृद्धिं. ९. I. reads योगं. १०. D. reads फले च युञ्जीत, and B. C. E. F. and G. read फलेन युञ्जीत.

यथाऽल्पाल्पमदन्त्याद्यं वार्योको-वत्स-षट्पदाः ।
तथाऽल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाऽऽब्दिकः करः' ॥
(म. स्मृ. ७. १२७–१२९; म. भा. श. ८७. १३)

इति । मार्कण्डेयो ऽपि–

'मासानष्टौ यथा सूर्यस्तोयं हरति रश्मिभिः ।
सूक्ष्मेणैवाभ्युपायेन तथा शुल्कादिकं नृपः' ॥
(मा. पु. २७. २३)

इति । एतच्च करादानं मालाकारदृष्टान्तेन प्रतिपादितमितरेषामपि सर्वेषां राजधर्माणामुपलक्षणम् । ते च धर्माः याज्ञवल्क्येन दर्शिताः–

'महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः ।
विनीतः सत्त्वसम्पन्नः कुलीनः सत्यवाक् शुचिः ॥
अदीर्घसूत्रः स्मृतिमानक्षुद्रो ऽपरुषस्तथा ।
धार्मिको ऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित् ॥
स्वरन्ध्रगोप्ताऽऽन्वीक्षिक्यां दण्डनीत्यां तथैव च ।
विनीतस्त्वथ वार्त्तायां त्रय्यां चैव नराधिपः' ॥
(या. स्मृ. १. ३०९–३११

इति । ते एतेऽन्तरङ्गा राजधर्माः । एत एव राजगुणा इत्यप्युच्यन्ते । अत एव–

'षट्त्रिंशद्गुणोपेतो राजा'–

---

१. This verse appears in the marginal correction of H. २. I omits मार्कण्डेयोऽपि and the following verse. ३. I. reads अक्षु for अक्षुद्रो. ४. I. reads य एते.

इत्यस्य सूत्रस्य व्याख्यानावसरे महोत्साहादयः उशनसा पठिताः । बहिरङ्गा अपि राजधर्मा याज्ञवल्क्येन दर्शिताः—

'सुमन्त्रिणः[1] प्रकुर्वीत प्राज्ञान्मौलान् स्थिरान् शुचीन् ।
तैः सार्द्धं चिन्तयेद्राज्यं विप्रेणाथ ततः स्वयम्' ॥
(या. स्मृ. १. ३१२)

इति । मनुरपि—

'मौलाञ्छास्त्रविदः[2] शूरान् लब्धलक्ष्यान्[3] कुलोद्गतान्[4] ।
सचिवान् सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान् ॥ (५४)
तैः सार्द्धं चिन्तयेन्नित्यं सामादीन्[6] सन्धि-विग्रहम्[5] ।
स्थानं समुदयं गुप्तिं लब्ध-प्रशमनानि च ॥ (५६)
तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक् ।
समस्तानां च कार्येषु विदध्याद्धितमात्मनः ॥
सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता ।
मन्त्रयेत् परमं मन्त्रं राजा षाड्गुण्यसंयुतम् ॥
नित्यं तस्मिन् समाश्वस्तः सर्वकार्याणि निःक्षिपेत् ।
तेन सार्द्धं विनिश्चित्य ततः कर्म समारभेत्' ॥
(म. स्मृ. ७. ५४-५९)

इति । आरम्भणीयं च कर्म देशविशेषेषु दुर्गसम्पादनम् । तच्च याज्ञवल्क्येन दर्शितम्—

---

१. All others except A. and I. read सन्मन्त्रिणः and the text of Yâjnavalkya reads स मन्त्रिणः. २. D. reads शास्त्रविदः. ३. G. reads बद्ध-लक्षान्. ४. D. reads कुलागतान्. ५. D. E. H. and I. read -विग्रहान्. ६. I. reads सामान्य-.

'रम्यं पशव्यमाजीव्यं जाङ्गलं देशमावसेत् ।
तत्र दुर्गाणि कुर्वीत जन-कोशात्मगुप्तये' ॥
(या. स्मृ. १. ३२१)

इति । दुर्गभेदा मनुना दर्शिताः—

'धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ।
नृदुर्गं गिरिदुर्गं च समावृत्य वसेत् पुरम् ॥
सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्' ।
(म. स्मृ. ७. ७०–७१)

इति । दुर्गसंविधानप्रकारः शान्तिपर्वणि दर्शितः—

'दृढप्राकार-परिखं हस्त्यश्व-रथसङ्कुलम् ।
ऊर्जस्विनर-नागाश्वं चत्वरापणशोभितम् ॥
प्रसिद्धव्यवहारं च प्रशान्तमकुतोभयम् ।
शूराढ्यं प्राज्ञसम्पूर्णं ब्रह्मघोषानुनादितम् ॥
समाजोत्सवसम्पन्नं सदा पूजितदैवतम् ।
वश्यामात्य-बलो राजा तत्पुरं स्वयमाविशेत्' ॥
(म. भा. शां. रा. ८६. ६–७)

इति । मनुरपि—

१. I. reads यशस्यम for पशव्यम. २. D. reads दुर्गभेदो मनुना दर्शित, and omits the following four lines, up to शान्तिपर्वणि दर्शितः. ३. The text धनुर्दुर्गं. The text समाश्रित्य. ४. The text reads शूराढ्यजनसम्पन्नं. Here except A. D. and the text of Mahâbhârata all others are mistaken. They omit the following portion—

.... ब्रह्मघोषानुनादितम् ॥
समाजोत्सवसम्पन्नं सदा पूजितदैवतम् ।
वश्यामात्यबलो राजा.................. ॥

and read शूराढ्यं प्राज्ञसम्पूर्णं तत्पुरं स्वयमाविशेत्.

'तत्स्यादायुधसम्पन्नं धन-धान्येन वाहनैः।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन्धनैः ॥
तस्य मध्ये तु पर्याप्तं कारयेद्गृहमात्मनः।
गुप्तं सर्वर्तुकं शुभ्रं जल-वृक्षसमन्वितम्' ॥
(म. स्मृ. ७. ७५–७६)

इति। दुर्गसंविधानमुक्त्वा यागादिधर्मानपि स एवाह–

'तदध्यास्योद्वहेद्भार्यां सवर्णां लक्षणान्विताम्।
कुले महति सम्भूतां हृद्यां रूपसमन्विताम् ॥
पुरोहितं च कुर्वीत वृणुयादेव चर्त्विजः।
तस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च ॥
यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः।
यज्ञार्थं चैव विप्रेभ्यो दद्याद्भोगान् धनानि च ॥
सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम्।
स्याच्चाम्नायपरो लोके वर्त्तेत पितृवन्नृपु' ॥
(म. स्मृ. ७. ७७–८०)

इति। याज्ञवल्क्योऽपि–

'पुरोहितं प्रकुर्वीत दैवज्ञमुदितोदितम्।
दण्डनीत्यां च कुशलमथर्वाङ्गिरसे तथा ॥

---

१. The text of Manu reads सं स्यात्. २. The text reads सु- for तु. ३. All except I. and the text read सार्वर्तुकं. ४. I. reads शुद्धं. ५. The text reads -गुणान्विताम्. ६. I. and the text read चर्त्विजम. ७. All others except A. I. and the text read तस्य. ८. The text reads धर्मार्थं. ९. B. C. E. F. and G. omit this whole line. १०. All except A. and the text read पुरोहितं च कुर्वीत. ११. I. reads दैवज्ञमपि चाधिक्रम, and G. omits the following portion:—

श्रौत-स्मार्त्तक्रियाहेतोर्वृणुयादेव चर्त्विजः ।
यज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणान् ॥
भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च ।
संदान-मान-सत्कारैर्वासयेत् श्रोत्रियान् सदा ' ॥
(या. स्मृ. १. ३१३-३१५)

इति । मनुरपि—

' म्रियमाणोऽप्याददीत न राजा श्रोत्रियात् करम् ।
न च क्षुधाऽस्य संसीदेत् श्रोत्रियो विषये वसन् ॥
यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा ।
तस्यापि तत् क्षुधा राष्ट्रमचिरादेव सीदति ॥
श्रुत-वृत्ते विदित्वास्य वृत्तिं धर्म्यां प्रकल्पयेत् ।
संरक्षेत् सर्वतश्चैनं पिता पुत्रमिवौरसम् ' ॥
(म. स्मृ. ७. १३३-१३५)

इति । आनुशासनिकेऽपि—

'शाला-प्रपा-तडागानि देवताऽऽयतनानि च ।
ब्राह्मणावसथांश्चैव कर्त्तव्यं नृपसत्तमैः ॥

.... दैवज्ञमुदितोदितम् ।
दण्डनीत्यां च कुशलमथर्वाङ्गिरसे तथा ॥
श्रौत-स्मार्तक्रियाहेतोर्वृणुयादेव चर्त्विजः ।
यज्ञांश्चैव प्रकुर्वीत... .... ॥

and reads पुरोहितं च कुर्वीत विधिवद्भूरिदक्षिणम् ॥. १. B. C. E. F. and G read प्रदान-मान-; while D. reads सदाऽन्न-मान-, but this whole line is not found in the text, which substitutes—

अक्षयोऽयं निधी राज्ञां यद्विप्रेषूपपादितम् ॥

for it. २. The text reads अप्यर्णेव. ३. B. C. D. E. F. and G. read सर्वतश्चैव. ४. D. reads -प्रपात-शाकानि. ५. B. C. D. E. F. H. and I read आवसथं

ब्राह्मणा नावमन्तव्या भस्मच्छन्ना इवाग्नयः ।
कुलमुत्पाटयेयुस्ते क्रोधाविष्टा द्विजातयः ॥
दुष्टानां शासनं धर्मः शिष्टानां परिपालनम् ।
कर्त्तव्यं भूमिपालेन नित्यं कार्येषु चार्जवम्' ॥

इति । शान्तिपर्वण्यपि—

'बालातुरेषु भूतेषु परित्राणं कुरूद्वह ।
शरणागतेषु कारुण्यं कुर्यात्तत्र समाहितः ॥
भरणं सर्वभूतानां रक्षणं चापि सर्वशः ।
यष्टव्यं क्रतुभिर्नित्यं दातव्यं चाप्यपीडया ॥
प्रजानां रक्षणं कार्यं न कार्यं कर्म गर्हितम् ।
आश्रमेषु यथाकालं चेलं भाजनभाजनम् ॥
स्वयं तूपहरेद्राजा सत्कृत्य विधिपूर्वकम् ।
आत्मानं सर्वकार्याणि तापसे राज्यमेव च ॥
निवेदयेत् प्रयत्नेन तिष्ठेत् प्रह्वश्च नित्यशः ।
विक्रमेण महीं लब्ध्वा प्रजा धर्मेण पालयन् ॥
आहवे निधनं कुर्याद्राजा धर्मपरायणः ।
आहवे च महीं लब्ध्वा श्रोत्रियायोपपादयेत्' ॥

(म. भा. शां. रा. ८६.२१.–२६)

इति । मनुः—

---

१. This and the following two lines do not appear in our edition of Mahâbhârata Ś. (Canto 86); but they may be found elsewhere in this book. २. The text reads धर्मबाधकम. ३. The text reads सत्कृत्याऽभ्यर्च्य मान्य च. ४. The text reads राष्ट्र-. ५. The text reads सर्वशा. ६. D. reads व्युत्क्रमेण. This and the following two lines are not found in the 86th Canto of Mahâbhârata S. ७. D. omits इति। मनुः—.

'मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया ।
सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः ॥
शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा ।
तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात्' ॥
(म. स्मृ. ७. १११-११२)

इति । दिनचर्या तु मनुना दर्शिता—

'उत्थाय पश्चिमे यामे कृतशौचः समाहितः ।
हुत्वाऽग्निं ब्राह्मणांश्चार्च्य प्रविशेच्च सभां शुभाम्' ॥
(म. स्मृ. ७. १४५)

इति । स्मृत्यन्तरेऽपि—

'प्रातरुत्थाय नृपतिः कुर्याद्दन्तस्य धावनम् ।
स्नानशालां समागत्य स्नात्वा पूतेन वारिणा ॥
अर्घ्यं दत्वा तु देवाय भास्कराय समाहितः ।
ततोऽलङ्कृतगात्रः सन् वक्त्रमालोक्य मन्त्रवत् ॥
घृतपात्रं तु विप्राय दद्यात् सकनकं नृपः' ।

इति । याज्ञवल्क्योऽपि—

'ऋत्विक्-पुरोहिताचार्यै राशीर्भिरभिनन्दितः । (३३२)
दृष्ट्वा ज्योतिर्विदो वैद्यान् दद्याद्गाः काञ्चनं महीम् ।
नैवेशिकानि च ततः श्रोत्रियेभ्यो गृहाणि च' ॥
(या. स्मृ. १. ३३२-३३३)

---

१. The text of Manu reads हुत्वाग्निं ब्राह्मणांश्चार्च्य प्रविशेत्स शुभां सभाम् ॥. २. B. C. D. E. F. and G. substitute स for तु. ३. I. reads मन्त्रवित्. ४. D. and the text reads दद्याद्गां. ५. B. C. and F. read तथा श्रोत्रियाय: while D E. G. H. and I. read तथा श्रोत्रियाणां.

इति । नैवेशिकानि विवाहोपयोगीनि कन्याऽलङ्कारादीनि।
दानानन्तरकृत्यं मनुराह—

'तत्र स्थितः[1] प्रजाः सर्वाः प्रतिनन्द्य विसर्जयेत् ।
विसृज्य च प्रजाः सर्वा मन्त्रयेत् सह मन्त्रिभिः ॥ (१४६)
गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः ।
अरण्ये निःशलाके वा मन्त्रयेता[2]ऽविभावितः ॥ (१४७)
मध्यन्दिनेऽर्द्धरात्रे वा विश्रान्तो विगतक्लमः ।
चिन्तयेत् धर्मकामार्थान् सार्धं तैरेक एव वा[3] ॥(१५१)
कन्यानां सम्प्रदानं च कुमाराणां च रक्षणम् ॥(१५२)
दूतसम्प्रेषणं चैव कार्यशेषं तथैव च ।
अन्तःपुरप्रचारं[4] च प्रणिधीनां च चेष्टितम् ॥ (१५३)
कृत्स्नं चाष्टविधं कर्म पञ्चवर्गं[5] च तत्त्वतः ।
अनुरागापरागौ च प्रचारं मण्डलस्य च ॥ (१५४)
[6]अनन्तरमरिं विद्यादरिसेविनमेव च ।
अरेरनन्तरं मित्रमुदासीनं तयोः परम् ॥ (१५८)
तान् सर्वानभिसन्दध्यात् सामादिभिरुपक्रमैः ।
व्यस्तैश्चैव समस्तैश्च पौरुषेण नयेन च ॥ (१५९)
सन्धिं च विग्रहं चैव यानमासनमेव च ।
द्वैधीभावं संश्रयं च षड्गुणांश्चिन्तयेत्सदा ॥ (१६०)

---

१. H. reads स्थिताः. २. The text of Manu reads मंत्रयेदविभावितः. ३. All others except A. and the text substitute च for वा. ४. B. C. D. E. F. and G. read -प्रसारं च; while I. reads -प्रजानां च. ५. B. C. E. F. G. and I. omit this line. ६. B. C. E. F. and G. omit this and the following three lines.

आसनं चैव यानं च सन्धिं[1] विग्रहमेव च ।
कार्यं वीक्ष्य प्रयुञ्जीत द्वैधं संश्रयमेव च ॥ (१६१)
उपेतारमुपेयं[2] च सर्वोपायांश्च कृत्स्नशः ।
एतत्त्रयं समाश्रित्य प्रयतेतार्थसिद्धये ' ॥ (२१५)
(म. स्मृ. ७. १४६-२१५)

इति । अष्टविधत्वं तु[3] कर्मण उशनसा प्रदर्शितम्—
'आदाने च विसर्गे च तथा प्रैष-निषेधयोः।
पञ्चमे चार्थवचने व्यवहारस्य चेक्षणे ॥
दण्ड-शुद्ध्योः समायुक्तस्तेनाष्टगतिको नृपः' ।
इति । शुद्धिः प्रायश्चित्तम् । पञ्चवर्गस्तु कार्पटिक[4]-दाम्भि-

---

१. B. C. E. F. G. and H. read सन्धाय च विगृह्य च for सन्धिं विग्रहमेव च; while D. adds the following verses:—

सन्धिं तु द्विविधं विद्याद्राजा विग्रहमेव च ।
उभे याना-ऽऽसने चैव द्वैधं संश्रयमेव च ॥
समानयानकर्मा च विपरीतस्तथैव च ।
तदा त्वायतिसंयुक्तः सन्धिर्ज्ञेयो द्विलक्षणः ॥
स्वयंकृतश्च कार्यार्थमकाले काल एव वा ।
मित्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः ॥
एकाकिनःस्यात्ययिके कार्ये प्राप्ते यदृच्छया ।
संहतस्य च मित्रेण द्विविधं यानमुच्यते ॥
क्षीणस्य चैव क्रमशो दैवात्पूर्वकृतेन वा ।
मित्रस्य चाऽनुरोधेन द्विविधं स्मृतमासनम् ॥
बलस्य स्वामिनश्चैव स्थितिः कार्यार्थसिद्धये ।
द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणदर्शिभिः ॥
अर्थसम्पादनार्थाय पीड्यमानस्य शत्रुभिः ।
साधुषु व्यपदेशार्थं द्विविधः संश्रयः स्मृतः ॥
(म. स्मृ. ७. १६२-१६८)

All these verses are found in the text of Manu with slight changes in reading. २. B reads उपायं च. ३. B. C. D. E. F. and G. omit the portion from अष्टविधत्वं तु to कार्यसिद्धिरिति वा पञ्चवर्गः (P. 471, L. 3). ४. I. reads कापटिक-.

क-गृहपति-वैदेहक-तापसव्यञ्जनाश्चराः । कर्मणामारम्भोपायः, पुरुष-द्रव्यसम्पत्, विनिपातप्रतीकारः, कार्यसिद्धिरिति वा पञ्चवर्गः।

'एवं सर्वमिदं राजा सह सम्मन्त्र्य मन्त्रिभिः ।
व्यायम्याऽऽप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं व्रजेत् ॥
तत्रात्मभूतैः कालज्ञैरहार्यैः परिचारकैः ।
सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः ॥
विषघ्नैरगदैश्चाऽस्य सर्वद्रव्याणि योजयेत् ।
विषघ्नानि च रत्नानि नियतो धारयेत्सदा ॥
परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः ।
वेषाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः ॥
एवं प्रयत्नं कुर्वीत यान-शय्या-ऽऽसना-ऽशने ।
स्नाने प्रसाधने चैव सर्वालङ्कारकेषु च ॥
भुक्तवान् विहरेच्चैव स्त्रीभिरन्तःपुरे सह ।
विहृत्य तु यथाकालं पुनः कार्याणि चिन्तयेत् ॥
अलङ्कृतश्च सम्पश्येदायुधीयं पुनर्जनम् ।
वाहनानि च सर्वाणि शस्त्राण्याभरणानि च ॥
सन्ध्यां चोपास्य शृणुयादन्तर्वेश्मनि शस्त्रभृत् ।
रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितम् ॥

१. H. reads व्यञ्जका-. २. From शुद्धिः प्रायश्चित्तम (P. 471, L. 10) to this A. omits the intermediate portion. ३. The text of Manu reads विशेत ४. B. C. E. F. G. and H. read रक्षार्थैः. ५. D. reads उदकैश्चैव, and B. C. E. F. G. read उदकैश्चास्य. ६. B. C. E. F. G. H. and I. read वेषाभरणसंयुक्ताः संस्पृशेयुः for वेषाभरणसंशुद्धाः स्पृशेयुः सु-; while D. substitutes विषाभरण- for वेषाभरण-. ७. All except A. and the text read च यथाकामं.

गत्वा कक्षाऽन्तरं सम्यक् समनुज्ञाप्य तं जनम् ।
प्रविशेद्भोजनार्थं तु स्त्रीवृतोऽन्तःपुरं पुनः ॥
तत्र भुक्त्वा पुनः किञ्चित्तूर्यघोषैः प्रहर्षितः ।
संविशेच्च यथाकालमुत्तिष्ठेच्च गतक्लमः ॥
एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः ।
अस्वस्थः सर्वमेवैतत् भृत्येषु विनिवेशयेत्' ॥
(म. स्मृ. ७. २१६–२२६)

इति । धर्मान्तरमाह मनुः–
'सङ्ग्रामेष्वनिवर्त्तित्वं प्रजानां चैव पालनम् ।
शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम् ॥(८८)
अलब्धं चैव लिप्सेत लब्धं रक्षेच्च यत्नतः ।
रक्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निःक्षिपेत् ॥ (९९)
अमाययैव वर्त्तेत न कथञ्चन मायया ।
बुद्ध्येतारिप्रयुक्तां तु मायां नित्यं सुसंवृतः॥ (१०४)
(म. स्मृ. ७. ८८–१०४)

इति । शान्तिपर्वण्यपि–
'व्यसनानि च सर्वाणि नृपतिः परिवर्जयेत् ।
लोकसङ्ग्रहणार्थाय कृतकव्यसनी भवेत्' ॥

इति । तानि व्यसनानि मनुना दर्शितानि–

---

१. The text of Manu reads स्वन्यत् ; while D. reads यावत. २. All others, except A. I. and the text, read स्त्रीभिरन्तःपुरं. ३. The text of Manu reads तु for च. ४. All except A. I. and the text of Manu read विगतक्लम. for च गतक्लमः. ५. All except A. I. and the text read एतद्विनं समातिष्ठेत. ६. The text of Manu reads सर्वमेतत्तु भृत्येषु विनियोजयेत. ७. H. and I. read राज्ञः. ८. The text reads च for तु. ९. The text substitutes स्वसंवृत for सुसंवृतः.

'दश कामसमुत्थानि तथाऽष्टौ क्रोधजानि च । (४५)
मृगयोऽक्षा दिवा स्वप्नः परीवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथा ऽटाट्या कामजो दशको गणः ॥ (४७)
पैशुन्यं साहसं द्रोह ईर्ष्या ऽसूयार्थदूषणम् ।
वाग्दण्डजं च पारुष्यं क्रोधजो ऽपि गणोऽष्टकः॥(४८)
कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः ।
वियुज्यतेऽर्थ-धर्माभ्यां क्रोधजे स्वात्मनैव तु ॥ (४६)
द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः ।
तं यत्नेन जयेल्लोभं तज्जौ ह्येतौ गणावुभौ ॥ (४९)
पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥ (५०)
दण्डस्य पातनं चैव वाक्पारुष्या-ऽर्थदूषणे ।
क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा ॥ (५१)
व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते ।
व्यसन्यधो हि व्रजति स्वर्यात्यव्यसनी मृतः'॥ (५३)
(म. स्मृ. ७. ४५–५३)

इति । मार्कण्डेयो ऽपि—

१. I. reads ऽक्षा. २. All others except A. I. and the text read श्रमः, or मद. ३. B. C. E. F. read वृथाऽटयाया, G. reads वृथा भाषा, I. वृथाऽटया and the text reads वृथा ऽटया च. ४. All except A. H. I. and the text read द्रोहं. ५. D. reads वाग्दण्डो दण्डपारुष्यं ६. D. and G. read गुणोऽष्टकः. ७. B. C. and F. read वियुज्येतार्थ-कामाभ्यां; while D. E. G. and H. read वियुज्यते ऽर्थ-कामाभ्यां. ८. I. reads क्रोधजे स्वात्मनैव तु; while D. reads क्रोधजेऽप्यात्मजेन तु. ९. I. reads त्यजेल्लोभं त्याज्यौ ह्येतौ, and the text reads जयेल्लोभं तज्जावेतौ. १०. B. C. F. read पानं मत्ता, D. reads पानमाक्षाः; while G. reads पानमत्ता. All are probably incorrect. ११. The text reads अधो ऽधो व्रजति.

'व्यसनानि परित्यज्य सप्त मूलहराणि वै[1] ।
आत्मा रिपुभ्यः संरक्ष्यो[2] बहिर्मन्त्रविनिर्गमात् ॥ (८)
स्थान-वृद्धि-क्षय-ज्ञान-षाड्गुण्यविजितात्मना[3] ।
भवितव्यं नरेन्द्रेण न कामवशवर्त्तिना ॥ (९)
प्रागात्मा मन्त्रिणश्चैव ततो भृत्या महीभृता ।
जेयाश्चानन्तरं[4] पौरा विरुद्धयेत ततोऽरिभिः ॥ (१०)
यस्त्वेतानविनिर्जित्य[5] वैरिणो विजिगीषते ।
सोऽजितात्माऽजितामात्यः शत्रुवर्गेण बाध्यते' ॥ (११)
(मा. पु. २७. ८-११)

इति । तदेवमुक्तधर्मकलापेन संयुक्तो राजा प्रजाः पालयेत् । तदुक्तं मनुना—

'एवं सर्वं विधायेदमितिकर्त्तव्यमात्मनः ।
युक्तश्चैवाऽप्रमत्तश्च परिरक्षेदिमाः प्रजाः' ॥
(म. स्मृ. ७. १४२)

इति । प्रजारक्षणे राज्ञः श्रेयोविशेष ऐहिक आमुष्मिकश्च शान्तिपर्वणि दर्शितः—

'स्त्रियश्चाऽपुरुषा[6] मार्गं सर्वालङ्कारभूषिताः ।
निर्भयाः प्रतिपद्यन्ते यदा रक्षति भूमिपः ॥
धर्ममेव प्रपन्द्यन्ते न हिंसन्ति परस्परम् ।
अनुगृह्णन्ति[7] चान्योन्यं यदा रक्षति भूमिपः ॥

१. The text substitutes वै for च. २. D. reads संरक्षन्. ३. The te[xt] reads -ज्ञनषाड्गुण्यगुणिनाऽत्मना. ४. Our reading follows A. and th[e] text of Mârkaṇḍeya, but all others read ज्ञेयाः. ५. B. C. and F. rea[d] -न्यविनिर्जित्य; while the text reads -न विजित्यैव. ६. All except A. an[d] the text read स्त्रियश्च पुरुषा. ७. I. reads अनुयुञ्जयन्ति through mistak[e] and corrects अनुरुञ्जयन्ति.

यजन्ते च महायज्ञैस्त्रयो[1] वर्णाः पृथग्विधैः ।
युक्ताश्चाधीयते वेदान् यदा रक्षति भूमिपः ॥
यदा[2] राजा धुरं श्रेष्ठामादाय वहति प्रजाः ।
महता बलयोगेन तदा लोकः प्रसीदति' ॥
(म. भा. शां. रा. ६८. ३२–३६)

इति । रामायणेऽपि–
'यः क्षत्रियः स्वधर्मेण पृथिवीमनुशास्ति वै ।
स लोके लभते वीरे[3] यशः प्रेत्येह[4] चैव हि' ॥

इति । अपालने दोषः शान्तिपर्वणि दर्शितः–
'यानं वस्त्राण्यलङ्कारान् रत्नानि विविधानि च ।
हरेयुः सहसा पापा यदि राजा न पालयेत् ॥
एतेद्बहुविधं[5] शस्त्रं बहुधा धर्मचारिषु ।
अधर्मः प्रगृहीतः स्यात् यदि राजा न पालयेत्' ॥
(म. भा. शां. रा. ६८. १६–१७)

इति ।

॥ इति राजधर्मप्रकरणम् ॥

---

१. The text reads त्रिधा. २. Except A. and the text all others read this verse as follows :—

यदा राजा ऽऽधुरं श्रेष्ठमादाय वहति प्रजा ।
महता बलयोगेन तदा लोकान् समश्नुते ॥.

३. I. reads वीर्यं for वीर. ४. H. and I. read प्रेत्य च सद्गतिम्. ५. Except A. and the text (Calcutta edition of the text reads एतद्बहुविधं शास्त्रं) all others read this verse as follows :—

एतद्बहुविधं शास्त्रं न कृषिर्न वणिक्पथः ।
मज्जेत् धर्मस्त्रयी न स्यात् यदि राजा न पालयेत् ॥;

while I. reads एतेद्बहुविधं शास्त्रं.

अथ वैश्यधर्मप्रकरणम् । क्रमप्राप्तान् वैश्यस्याऽसाधारण-धर्मानाह–

लेभकर्म तथा रत्नं गवां च परिपालनम् ।
कृषिकर्म च वाणिज्यं वैश्यवृत्तिरुदाहृता ॥ ६३ ॥

लाभार्थं कर्म लाभकर्म कुसीदाद्युपजीवनमित्यर्थः । रत्नं मणि-मुक्तादि । तेन च तत्परीक्षण-क्रय-विक्रया उपलक्ष्यन्ते । गवां पालनं तृणोदकप्रदान-बन्धन-मोचन-दोहनादि । कृषि कर्म भूमिकर्षण-बीजवापनादि । वाणिज्यं क्रमुक-धान्यादि क्रय-विक्रयौ । कुसीदादीनां वैश्यधर्मत्वमाह याज्ञवल्क्यः-

'कुसीद-कृषि-वाणिज्यं पाशुपाल्यं विशः स्मृतम्' ।
(या. स्मृ. १. ११९

इति । मनुरपि–

'पशूनां रक्षणं दानमिज्याऽध्ययनमेव च ।
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च' ॥
(म. स्मृ. १. ९०

इति । समादिशदिति शेषः । वराहपुराणेऽपि–

'स्वाध्यायं यजनं दानं कुसीद-पशुपालनम् ।
गोरक्षां कृषि-वाणिज्यं कुर्याद्वैश्यो यथाविधि' ॥

इति । पशुपालनं अजाश्वादिपालनम् । गोशब्दस्य पृथगुपात्तत्वात् । आनुशासनिके विक्रेयद्रव्याण्यपि निर्दिशितानि–

१. M. reads लोहकर्म, and L. reads लाभकार- for लाभकर्म. The former seems to be more correct. २. K. and L. read रत्न-गवां. ३. All others except A. and I. read कुसीदवृद्ध्युपजीवनम्. ४. I. reads क्रयिक- for क्रमुक- through mistake. ५. The text reads -वाणिज्य-. ६. All except A. and D. omit अपि, and read निर्दिष्टानि for निदर्शितानि.

'तिल-चर्म-रसाश्चैव विक्रेयाः पशु-वाजिनः ।
वणिक्पथमुपासीनैर्वैश्यैर्वैश्यपथि स्थितैः' ॥

(म. भा. आ. १४१. ६६)

इति । शान्तिपर्वणि जाजल्युपाख्यानप्रसङ्गेन वैश्यधर्मास्तुलाधारेणोदिताः—

यद्ददामि न तन्न्यूनं यद्गृह्णामि न चाधिकम् ।
विक्रीणामि रसांश्चाहं मद्यवर्ज्यममायया ॥
क्रीत्वा चैव प्रविक्रीणे परस्तात्तद्धनं बहु ।

(म. भा. शां. मो. २६१.७-८)

इति । पशुपालने विशेषमाहतुः शङ्ख-लिखितौ—

'गा रक्षेत् । तास्वपीतासु न पिबेत् । न तिष्ठत्सूपविशेत् । न स्वयमुत्थापयेत् । शनैरार्द्रशाखया सपलाशया पृष्ठतोऽभिहन्यात् । न तीर्थे न विषमे नाल्पोदके ऽवतारयेत् । बाल-वृद्ध-रोगार्तानां शक्तितः प्रतीकारं कुर्यात् । अन्यथा विप्लवः' ।

---

१. H. reads पशवस्तथा. २. I. reads जाबाल्युपाख्यान-, but neither the other manuscripts nor the text follows Jâbâli. ३. From तुलाधारेणोदिताः to लाभकर्माणीनि (P. 478, L. 1) the intermediate portion is omitted by I., but this is a mistake. ४. This line is not found in the text. ५. The text reads this verse as follows :—

रसांश्च तांस्तान् विप्रर्षे मद्यवर्ज्यान् बहूनहम् ।
क्रीत्वा वै प्रतिविक्रीणे परहस्तादमायया ॥.

६. D. reads—

क्रीत्वा वै प्रतिविक्रीणे परहस्ताद्धनं बहु ।,

G. reads—

क्रीत्वा चैव प्रविक्रीणे परस्ताद्धनवाहिभिः ।;

while H. reads—

क्रीत्वा चैवं प्रविक्रीणे परतस्तद्धनं बहु ।.

इति । यानि लाभकर्मादीनि वाणिज्यान्तानि तानि सर्वाणि वैश्यवृत्तिः वैश्यस्य जीवनहेतुरित्यर्थः । तदुक्तं मार्कण्डेये[1]–

'दानमध्ययनं यज्ञो वैश्यस्यापि त्रिधैव सः[2] ।
वाणिज्यं पाशुपाल्यं च कृषिश्चैवास्य जीविका'॥
(मा. पु. २८.६)

इति । अर्घ[3]विज्ञानादयोऽपि[4] वैश्यधर्मत्वेन द्रष्टव्याः । अतएव मनुना वैश्यधर्मेषु पठिताः–

'वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम् ।
वार्त्तायां नित्ययुक्तः स्यात् पशूनां चैव रक्षणे ॥ (३२६)
प्रजापतिर्हि[5] वैश्याय सृष्ट्वा परिददे पशून् । (३७२)
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति ॥
वैश्ये चेच्छति नान्येन रक्षितव्याः कथञ्चन । (३२८)
मणि-मुक्ता-प्रवालानां लोहानां[6] तान्तवस्य च ॥
गन्धानां च रसानां च विद्यादर्घ[7]बलाबलम् । (३२९)
बीजानामुप्तिविच्च स्यात् क्षेत्र[8]दोष-गुणस्य च ॥
मानयोगांश्च[9] जानीयात्तुलायोगांश्च सर्वतः । (३३०)
सारासारं च भाण्डानां देशानां च गुणागुणान्[10] ।
लाभालाभं च पण्यानां पशूनां च[11] विवर्धनम् ॥ (३३१)

---

१. D. reads मार्कण्डेयेन. २. D. reads सा. ३. All others except A. and I. read अर्थ- for अर्घ-. ४. अपि is omitted by all except A. ५. This and the following two lines appear in Mahâbhârata Śântiparva Râjadharma, Canto 60. ६. I. reads लौहानां. ७. All others except A and I. read -र्थ-. ८. B. C. F.E.D. and G. read क्षेत्र-बीज-गुणस्य while H. reads क्षेत्रवृद्धि-गुणस्य. ९. The text reads -योगं च for -योगांश्च and सर्वशः for सर्वतः. १०. All others except A. and the text read गुणागुणम्. ११. The text reads पशूनां परिवर्धनम्.

भृत्यानां च भृतिं विद्याद्भाषाश्च विविधा नृणाम्[1] ।
द्रव्याणां स्थानयोगांश्च क्रयं विक्रयमेव च ॥ (३३२)
धर्मेण च द्रव्यवृद्धावातिष्ठेद्यत्नमुत्तमम्[2] ।
दद्याच्च सर्वभूतानामन्नमेव प्रयत्नतः' ॥ (३३३)
(म. स्मृ. ९. ३२६–३३३)

इति। कृषि-वाणिज्य-गोरक्षाः वार्त्ताशब्देनोच्यन्ते। मानयोगा अञ्जलि-प्रस्थादिसाध्याः। मूलवचने 'लाभकर्म'–इत्यत्र 'लोहकर्म'–इति केचित् पठन्ति। लोहस्य सुवर्णरजतादेरर्घपरिज्ञानक्रयादिकं तत्कर्मेति व्याख्येयम्। लोहानां चेति मनुपठितत्वात्। यथोक्तधर्मानुष्ठाने फलमाश्वमेधिके वर्णितम्–

'वणिग्धर्ममनुश्चन् वै देव-ब्राह्मणपूजकः।
स वणिक् स्वर्गमाप्नोति पूज्यमानो ऽप्सरोगणैः' ॥

इति। वैपरीत्ये दोषः शान्तिपर्वणि दर्शितः–

'यः करोति जनान् साधून् वणिक्कर्मणि वञ्चितान्[3] ।
स याति नरकं घोरं धनं तस्यापि हीयते' ॥

इति ॥ ६३ ॥

॥ इति वैश्यधर्मप्रकरणम् ॥

क्रमप्राप्तान् शूद्रस्याऽसाधारणधर्मानाह–

---

१. B. C. F. G. and H. read भाषां च विविधां. २. B. C. D. E. F. G. and H. read द्रव्यवृद्धौ. ३. B. C. E. F. G. and H. read वणिक् कर्मणि वञ्चनम्; while I. reads वणिक्कर्मणि वञ्चनम्.

विभजेरन्। यतो धर्मार्थयोरस्वातन्त्र्याद्विभागकरणेऽनर्हाः। अर्थास्वातन्त्र्यम् नाम तदादानप्रदानयोरस्वातन्त्र्यम्—इति। तदाह हारीतः—

'जीवति पितरि पुत्राणां अर्थादानविसर्गाक्षेपेष्व-
स्वातन्त्र्यम्'।

(हा. स्मृ. १७. २१.)

इति। अर्थादानमर्थोपभोगः। विसर्गो व्ययः। आक्षेपो भृत्यादेः शिक्षार्थमधिक्षेपादिः। धर्मास्वातन्त्र्यं पृथगिष्टापूर्तादावप्रवृत्तिः। यत्तु देवलेनोक्तम्—

'पितर्युपरते पुत्रा विभजेरन् पितुर्धनम्।
अस्वाम्यं हि भवेत्तेषां निर्दोषे पितरि स्थिते'॥

इति। तदप्यस्वातन्त्र्यप्रतिपादनपरम्। पितृधने पुत्राणां जन्मना स्वाम्यस्य लोकसिद्धत्वात्। ननु शास्त्रैकसमधिगम्यस्य स्वत्वस्य कथं लोकसिद्धता। शास्त्रसिद्धत्वं च—

'स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु।
ब्राह्मणस्याधिकं लब्धम्।
क्षत्रियस्य विजितम्।
निर्विष्टं वैश्यशूद्रयोः'।

(गौ. स्मृ. १०. ३९–४२.)

---

१. B. C. read अस्वातंत्र्यम् for अर्थास्वातंत्र्यम्. २. D. reads तथा च for तदाह. ३. C. reads अर्थदान for अर्थादान. ४. B. reads धनम् for अधिक्षेपादिः. ५. C. D. read तत्र for पुत्राः. ६. C. reads विशेषे for निर्दोषे.

इति गौतमवचनादवगम्यते । अप्रतिबन्धो दायो ऋक्थं न[1] सप्रतिबन्धो दायः । संविभागः सप्रतिबन्धो दायः । अ[2]नन्यपूर्वस्य जलतृणकाष्ठादेः स्वीकारः परि[3]ग्रहः । निध्यादिप्राप्तिरधिगमः । एतेषु निमित्तेषु सत्सु स्वामी भवति । ब्राह्मणस्य प्रतिग्रहादिना यल्लब्धं तदधिकमसाधारणम् । क्षत्रियस्य विजयदण्डादिलब्धं य[4]त्तदसाधारणम् । वैश्यस्य कृषिगोरक्षादिलब्धं निर्विष्टं तदसाधारणम् । शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धं तदसाधारणम् । एवमनुलोमप्रतिलोमजानां स्वस्वविहि[5]ताश्वसारथ्यादिना यल्लब्धं तदधिकमित्यर्थः । अत्रैव सं[6]ग्रहकारो न्यायमाह—

'वर्तते यस्य यद्धस्ते तस्य स्वामी स एव तु[7]' ।
अ[8]न्यस्वमन्यहस्तेषु चौर्याद्यैः किं न वर्तते ।

इति । अन्य[9]स्वस्यान्यहस्ते स्थितस्य दर्शनेन तस्यैव स्वामित्वापत्तेः । अ[10]तः शास्त्रैकसमधिगम्यं स्वत्वस्वम्। किंच यदि यस्यान्तिके यद्धनं दृष्टं तस्य स एव स्वामी तर्हि अस्य स्वमनेनापहृतं इति न ब्रूयात्। यस्यैवान्तिके दृष्टं तस्य स्वामित्वात् । स्वत्वस्य लौकिकत्वे—

---

१. B. and C. omit न सप्रतिबन्धो दायः. २. C. reads अन्य° for अनन्य°. ३. C. reads पितृगृह for परिग्रहः. ४ B. and C. omit यत् तत्. ५. B. originally reads °विहितसूताद्यश्व° while C. omits °अश्व°. ६. D. substitutes तत्रैव for अत्रैव, while C. reads ग्रन्थकारो for संग्रहकारो. ७. D. substitutes न for तु. ८. C. D. omit this line अन्यस्वमन्यहस्तेषु चौर्याद्यैः किन्न वर्तते. ९. B. omits अन्यस्वस्यान्यहस्ते स्थितस्य दर्शनेन तस्यैव स्वामित्वापत्तेः. १०. C. reads तस्माच्छास्त्रत एव स्वत्वं स्यात् स्वाम्यंगानुरूपयीति अयमर्थः । यस्यहस्ते for अतः शास्त्रैकसमधिगम्यं स्वत्वस्वम् । किंच यदि यस्यान्तिके.

'योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम्।
याजनाध्यापनेनाऽपि यथा स्तेनस्तथैव सः' ॥

(म. स्मृ. ८. ३४०.)

इति। याजनादिना अदत्तादायिनः सकाशाद्द्रव्यमर्जयतो दण्डविधानमनुपपन्नं स्यात्। तस्माच्छास्त्रैकसमधिगम्यं स्वत्वम्। इति

मैवम्। लौकिकमेव स्वत्वं लौकिकार्थक्रियासाधनत्वात्। व्रीह्यादिवत्। आहवनीयादीनां वेदिकादीनामपि लौकिकपाकादिसाधनत्वमस्तीत्यनैकान्तिको हेतुः—इति चेत्। न। न हि तेषामाहवनीयादिरूपेण पाकादिसाधनत्वं किं तर्हि लौकिकाग्न्यादिरूपेणेत्यस्ति वैषम्यम्। किंच पामराणामपि स्वत्वव्यवहारदर्शनात् स्वत्वस्य लौकिकत्वमवगम्यते।

यत्तु गौतमवचनम्।

'स्वामी रिक्थक्रयसंविभागेषु'

(गौ. स्मृ. १०. ३९.)

इत्याद्यनुपपन्नमित्युक्तम्। तन्न। प्रतिग्रहाद्युपायकस्य स्वत्वस्य लौकिकत्वे स्थिते ब्राह्मणादीनां प्रतिग्रहाद्युपायनियमार्थत्वात् शास्त्रस्य। यदप्युक्तमन्यस्य स्वमन्येनापहृतम्—इति न ब्रूयादिति। तदसत्। स्वत्वहेतुभूतक्रयादिसदहोत स्वत्वसंदेहोपपत्तेः। यदपि चोक्तं। 'योऽदत्तादायिनः'—

इति अदत्तादायिनः सकाशाद्याजनादिना द्रव्यमर्जयितुर्दण्डविधानमनुपपन्नमिति। तदप्यसत्। प्रतिग्रहादिनियतोपायकस्यैव स्वत्वस्य लौकिकत्वात् नियमातिक्रमेण द्रव्यमर्जयतो दण्डविधानमुपपद्यते। एवं

'तस्योत्सर्गेण शुध्यन्ति' इति प्रायश्चित्तविधानमपि। एवं च स्वत्वस्य लौकिकत्वे असत्प्रतिग्रहादिलब्धं धनं तत्पुत्रादीनां दायत्वेन स्वमिति विभाज्यम्। न तेषां दोषसंबन्धश्च।

'सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः।
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च'॥

(म. स्मृ. १०. ११५.)

इति। मनुस्मरणात्—

इदमत्र चिन्तनीयम्। विभागात्स्वं[1] स्वस्य वा विभागः। इति। अत्रायं पूर्वपक्षः। विभागात्स्वं जन्मनैव स्वत्वे उत्पन्नमात्रस्य पुत्रस्याऽपि स्वं साधारणमिति द्रव्यसाध्येष्वाधानादिषु पितुरधिकारविधिर्न स्यात्। किंच।

'भर्त्रा† प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्।
सा यथाकाममश्नीयाद्दद्याद्वा[2] स्थावरादृते'॥

इति। प्रीतिदानवचनमप्यनुपपन्नं[3] स्यात्। यदपि—

† The Commentator in the next paragraph says, this verse is quoted from विष्णुस्मृति but in the printed edition of Dr. J. Jolly of विष्णुस्मृति it does not appear anywhere.

१. B. reads स्वत्वं स्वस्य सतो वा for स्वं स्वस्य वा; while C. स्वत्तस्य स्वस्य वा for the same. २. C. reads सावमाकाशमश्नीयात् यावद्वा—but it seems to be a mistake. ३. C. omits वचनम्.

'मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः ।
स्थावरस्य तु सर्वस्य न पिता न पितामहः ॥
पितृप्रसादाद्भुज्यन्ते वस्त्राण्याभरणानि च ।
स्थावरं तु न भुज्येत प्रसादे सति पैतृके' ॥

इति । तत्पितामहोपात्तस्थावरविषयम् । तस्मात्स्वामिनाशाद्विभागाद्वा स्वत्वं न जन्मनैव ।

राद्धान्तस्तु । जन्मनैव स्वत्वं लोके प्रसिद्धम् । विभागशब्दश्च बहुस्वामिकधनविषये लोके[१] प्रसिद्धो नान्यदीयधनविषयो न प्रहीणविषयः । किंच ।

'उत्पत्त्यैवार्थं[२] स्वामित्वाल्लभेतेत्याचार्याः'—

इति गौतमवचनाज्जन्मनैव स्वत्वमवगम्यते ।

यदुक्तम् मणिमुक्ताप्रवालानां—इत्यादिवचनं पितामहोपात्तस्थावरविषयमिति । तदयुक्तम् । न पिता न पितामह इति वचनात् पितामहस्य हि स्वार्जितमपि धनं पुत्रपौत्रयोः सतोरदेयमिति वचनम् जन्मना स्वत्वं गमयतीति ।

यदप्युक्तम् । अर्थसाध्येष्वाधानादिषु पितुरनधिकार इति । तदयुक्तम् । वचनादेवाधिकारावगमात् । यदपि चोक्तं जन्मनैव स्वत्वे भर्त्रा प्रीतेन यद्दत्तमित्यादि विष्णुवचनं नोपपद्यते । इति । तदप्ययुक्तम् । साधारण्येऽपि द्रव्यस्य वचनादेव

१. B. and C. omit लोके and read विषयः प्रसिद्धो. २. This सूत्र does not appear in the printed edtion of A. F. Stenzler of the गौतमधर्मशास्त्र.

प्रीतिदाने पितुरधिकारोपपत्तेः । स्थावरादौ तु स्वार्जितेऽपि पुत्रादिपारतन्त्र्यमेव—

'स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितम् ।
असंभूय सुतान् सर्वान्न दानं न च विक्रयः ॥
ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः ।
वृत्तिं च तेऽभिकाङ्क्षन्ति न दानं न च विक्रयः' ॥

इत्यादिवचनात् । आपदादौ तु स्वातन्त्र्यमस्त्येव—

'एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम् ।
आपत्काले कुटुम्बार्थे धर्मार्थेषु[1] विशेषतः' ॥

इति । स्मरणात्[2] । तस्मात्सुष्ठूक्तं[3] जन्मनैव स्वत्वमिति । प्रकृतमनुसरामः । अपरमपि विभागकालमाह याज्ञवल्क्यः—

'विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान् ।
ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः' ॥

(या. स्मृ. २. ११४.)

इति । यदा पिता विभागं कर्तुमिच्छति तदा पुत्रानात्मनः सकाशादिच्छया विभजेत् । इच्छया विभागप्रकारः ज्येष्ठं वा श्रेष्ठभागेनेति । श्रेष्ठभागः सोद्धारविभागः[4] । उद्धारप्रकारः स्मृत्यन्तरे दर्शितः—

---

१. B. originally reads धर्मार्थेषु but in margin धर्मार्थे च and C. reads the same. २. B. and C. omit स्मरणात्. ३. B. substitutes साधू° for सुष्ठू°. ४. B. C. do not insert श्रेष्ठभागः सोद्धारविभागः.

'[1]ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् ।
ततोऽर्धं मध्यमस्य स्यात्तुरीयं[2] तु यवीयसः' ॥[*][†]
(म. स्मृ. ९. ११२.)

इति । अथवा । सर्वे[3] ज्येष्ठादयः पुत्राः समांशभाजः कार्याः[4] स्युः । अथ च विषमो भागः स्वार्जितद्रव्यविषयः । क्रमागते तु[5] सर्वेषामपि समस्वाम्यात्[6] समांशः स्यात् । पितुरिच्छया विषमविभागस्यायुक्तत्वात् । नारदोऽपि कालान्तरमाह—

'अत[7] ऊर्ध्वं[§] पितुः पुत्रा विभजेयुर्धनं[8] समम् ।
मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च ॥
निवृत्ते वाऽपि रमणे पितर्युपरतस्पृहे' ॥
(ना. स्मृ. १३. २–३.)

---

* अयमर्थः । ज्येष्ठस्याविभक्तसाधारणधनादुद्धृत्य विंशतितमो भागः सर्वद्रव्येभ्यश्च यच्छ्रेष्ठं तद्दातव्यम् । मध्यमस्य चत्वारिंशत्तमो भागो देयः । कनिष्ठस्य पुनरशीतितमो भागो दातव्यः । अवशिष्टं धनं समं कृत्वा विभजनीयम् ।

§ अत्रायं प्रयोगः । विभागस्य त्रयः कालाः । तत्र यदा पितुर्विभागेच्छा स तावदेकः कालः । अपरोऽपि जीवत्यपि पितरि द्रव्यनिःस्पृहे निवृत्तरमणे मातरि च निवृत्तरजस्कायाम् पितुरनिच्छायामपि पुत्रेच्छयैव विभागो भवति । एष द्वितीयः कालः । पितरि जीवत्यपि विभागं कर्तुमिच्छति चेत् विभागो भवति । एष तृतीयः कालः ।

---

† The commentator माधवाचार्य does not mention particular name of the text from which this verse is quoted, but it appears in मनु.

१. A. reads ज्येष्ठस्य समुद्धवंशम् for ज्येष्ठस्य विंश उद्धारः. २. A. substitutes तृतीयम् for तुरीयम्. ३. B. omits सर्वे. ४. C. and D. do not insert कार्याः स्युः. ५. A. reads क्रमागतेऽपि and B. क्रमायाते तु, while C. क्रमात्यंतु. ६. D. omits समस्वाम्यात् while B. and C. omit समांशः स्यात्. ७. A. reads पितर्यूर्ध्वंगते for अत ऊर्ध्वं पितुः । ८. A. substitutes विभजेरन् and क्रमात् for विभजेयुः and समम् respectively.

इति । शङ्खोऽपि—

‘अकामे पितरि ऋक्थविभागो वृद्धे विपरीत-
चेतसि दीर्घरोगिणि च’ ॥

इति । अस्यार्थः । अकामे विभागमनिच्छति पितरि अतिवृद्धे विपरीतेचेतसि अप्रकृतिस्थे दीर्घरोगिणि अचिकित्स्यरोगग्रस्ते च पुत्राणामिच्छयैव विभागो भवतीत्यर्थः । दीर्घरोगग्रहणमतिकुपितादेरुपलक्षणम् । अत एव नारदः—

‘व्याधितः कुपितश्चैव विषयासक्तमानसः ।
अन्यथाशास्त्रकारी च न विभागे पिता प्रभुः’ ॥

(ना. स्मृ. १३. १६.)

इति । पित्रा समविभागकरणे विशेषमाह याज्ञवल्क्यः—

‘यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशिकाः ।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा’॥

(या. स्मृ. २. ११५.)

इति । यदि स्वेच्छया पिता पुत्रान् समभागिनः करोति तदा अदत्तस्त्रीधनाः पत्न्योऽपि पुत्रसमांशभाजः कार्याः । दत्ते तु स्त्री-धने—

‘दत्ते त्वर्धं प्रकल्पयेत्’ ।

(या. स्मृ. २. १४८.)

¶ पूर्वोक्तात् कालत्रयादन्योऽयं चतुर्थो विभागकालः ।

---

१. D. reads विपरीते चेतसि, for विपरीतचेतसि. २. C. and D. read विपरीतेऽप्रकृतिस्थे, while B. originally reads विपरीते अप्रकृतिस्थे चेतसि. ३. C. D. omit चेतसि. ४. D. reads अयथा° for अन्यथा°. ५. A. reads स्वधांशहारिणीम् while the text of याज्ञवल्क्य reads स्वर्धं प्रकीर्तितम्.

इति । पुत्रांशादर्धांशभाजो भवन्ति‡ । पितुरूर्ध्वं धर्मवि[1]वृद्ध्यर्थं विभागः कर्तव्य इत्याह प्रजापतिः—

'एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया ।
पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया' ।

(म. स्मृ. ९. १११.)

इति । बृहस्पतिरपि—

'एकपाकेन वसतां पितृदेवद्विजार्चनम् ।
एकं भवेद्विभक्तानां तदेव स्याद् गृहे गृहे' ॥

इति । पित्रोरूर्ध्वं विभागे प्रकारनि[2]यममाह याज्ञवल्क्यः—

---

‡ इदं असंगतमिव प्रतिभाति यतः भगवता योगीश्वरेण अधिविन्नस्त्रीविषयोऽयं निर्णयः कृतः । तथा च ।

अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समम् ।
न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्धं प्रकीर्तितम् ॥

(या. स्मृ. २-१४८.)

इति । व्याख्यातं चैतत् विज्ञानेश्वरेण । यथा—

"यस्या उपरि विवाहः साधिविन्ना सा चासौ स्त्री चेत्यधिविन्नस्त्री तस्यै अधिविन्नस्त्रियै आधिवेदनिकं अधिवेदननिमित्तं धनं समं यावदधिवेदनार्थं व्ययीकृतं तावद्दद्यात् । यस्यै श्वशुरेण भर्त्रा वा स्त्रीधनं न दत्तम् । दत्ते पुनः स्त्रीधने आधिवेदनिकद्रव्यस्यार्धं दद्यात् । अर्धशब्दश्चात्र समविभागवचनो न भवति । अतश्च यावता तत्पूर्वदत्तमाधिवेदनिकसमं भवति तावद्देयमित्यर्थः" ।

अतः 'दत्ते त्वर्धं प्रकल्पयेत्' इति नियमः आधिवेदनिकसमत्वार्थः न तु पुत्रांशन्यूनत्वार्थः ।

---

१. This verse does not appear in प्रजापति, but occurrs in मनु.
२. C. omits ˚नियम˚.

'विभजेयुः सुताः पित्रोरूर्ध्वमृक्थमृण समम्' ।
(या. स्मृ. २. ११७.)

इति । ननु पित्रोरूर्ध्वं विभागेऽपि विषमविभागो मनुना दर्शितः—

'ऊर्ध्वं पितुश्च मातुश्च'
(म. स्मृ. ९. १०४.)

इत्युपक्रम्य—

'ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः ।
शेषास्तमुपजीवेयुर्यथैव पितरं तथा ॥
ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् ।
ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः' ॥

इति । तथा—

'उद्धारेऽनुद्धृते[1] तेषामियं स्यादंशकल्पना ।
एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्धं ततोऽनुजः ।
अंशमंशं यवीयांस इति धर्मो व्यवस्थितः' ॥
(म. स्मृ. ९. १०५, ११२, ११६–११७.)

इति । गौतमोऽपि ।

'विंशतिभागो ज्येष्ठस्य मिथुनमुभयतोदद्युक्तो
रथो गोवृषः ।

---

* अस्यार्थः । एकाधिकमंशं द्वावंशाविति यावज्ज्येष्ठपुत्रो गृह्णीयात् । अधिकमर्धं यत्रांशे सार्धमंशं ज्येष्ठादनन्तरजातो गृह्णीयात् । कनिष्ठाः पुनरेकैकमंशं गृह्णीयुरिति व्यवस्थितो धर्मः । इदं तु ज्येष्ठतदनुजयोर्विद्यादिगुणवत्त्वापेक्षया कनिष्ठानां च निर्गुणवत्त्वे बोद्धव्यम् । ज्येष्ठतदनुजयोराधिकदानदर्शनात् ।

---

1. B. reads तद्धृते for ऽनुद्धृते.

काणः खोडः[1] कूटः वण्डो मध्यमस्यानेकश्चेत्[2]।
अविर्धान्यायसी[3] गृहमनोयुक्तं चतुष्पदां
चैकैकं यवीयसः।
समं चेतरत्[4] सर्वम्'।

(गौ. स्मृ. २८. ६–८.)

इति। अयमर्थः। सर्वस्मात् पितृधनाद्विंशतितमो भागो ज्येष्ठस्य। मिथुनं गोमिथुनं प्रसिद्धम्। उभयतोदतोऽश्वाश्वतरगर्दभाः तेषां यथासंभवं अन्यतराभ्यां युक्तो रथः। खोडो[5] वृद्धः। कूटः शृङ्गविकलः। वण्डो[6] विलोपितवालधिः। अविशेषितत्वाद्गवाश्वादीनां यथासंभवं अन्यतरस्योद्धारः कर्तव्यो मध्यमस्य। यवीयसस्तु धान्यं व्रीह्यादि अयो लोहम्। अनोयुक्तं शकटयुक्तम्। चतुष्पदां गवादीनामेकैकं पृथक् पृथगेव[7]ानुपूर्व्येण यवीयस उद्धारः।

बृहस्पतिरपि—

'जन्मविद्यागुणैर्ज्येष्ठो[8] व्यंशं दायादमाप्नुयात्'।

इति। कात्यायनोऽपि—

'यथा यथा विभागाप्तं[9] धनं यागार्थतामियात्।
तथा तथा विधातव्यं विद्वद्भिर्भागगौरवम्'॥

---

१. B. originally reads चौरः and in margin as खोरः while A. reads काणखोरकूटवण्टाः and B. and C. substitute षंडो for वण्डो. २. B. and C. read अनेकाश्चेत्. ३. B. reads originally हविर्धान्या° and gives in margin अहविर्धान्या°. ४. D. reads इतरतः while the text (Printed edition of A. F. Stenzler) reads समधेतरत्सर्वम्. ५. B. here also reads originally as चोरः and in margin श्चोरः, C. also reads श्चोरो for the same. ६. Here also B. reads शण्डो and C. शण्ठो. ७. B. C. and D. omit एव. ८. D. reads गुणश्रेष्ठो. ९. C. reads विभागास्तं. and D. reads विभागोत्थधनं.

इति । जीवद्विभागेऽपि विषमविभागो नारदेनोक्तः—

'पितैव वा स्वयं पुत्रान् विभजेद्वयसि स्थितः ।
ज्येष्ठं[1] श्रेष्ठविभागेन यथा वास्य मतिर्भवेत्[2] ॥
पित्रैव तु विभक्ता ये समन्यूनाधिकैर्धनैः ।
तेषां स एव धर्मः[3] स्यात्सर्वस्य हि पिता प्रभुः* ।
† द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता' ॥

(ना. स्मृ. १३. ४, १५, १२.)

---

§ अत्र जीमूतवाहनः—

ज्येष्ठस्य श्रेष्ठभागमभिदाय पुनर्यथा वास्य मतिर्भवेदित्यनेन यादृशो न्यूनाधिकविभागे पितुः पूर्वोक्तकारणात्कर्तव्यमतिर्भवेदिति पृथगभिधानात् श्रेष्ठभागादन्य एवायं न्यूनाधिकविभागः प्रतीयते ॥

* एतद्वचनम् अग्रे उक्तं 'समन्यूनाधिका भागाः' इत्यादि बृहस्पतिवचनं च—पुत्राविनिर्मोकेण पित्रार्जितपरं भ्रातॄणामिति मनुवचनं च सर्वपुत्रसहकारेण पित्रार्जितधनविषयकमतो न विरोध इति चण्डेश्वरादीनां मतम् ॥ पुत्राणां विभागप्रार्थनस्थले एव मनुवचनं नेयं पितुः स्वेच्छास्थल एव बृहस्पतिवचनमिति जीमूतवाहनादीनां मतम् । नारदः । पित्रैव तु....॥ इति नारदवचनम् ॥ न्यूनाधिकविभक्तानां धर्मः पितृकृतः स्मृत इति याज्ञवल्क्यवचनं च बृहस्पतिवचनसमानविषयकमेव मन्तव्यम् ॥

† अत्र केचित्तु परस्परतुल्यगुणयोगि किंचिन्न्यूनगुणकनिष्ठभ्रातृसमुदायस्यात्यल्पधनविभागविषयकमिदमेकद्रव्यरूपोद्धारदानासामर्थ्यात् । उत्कृष्टभागदानेनैव तत्संबन्धनं निर्गुणत्वेन न्यूनत्वाच्च निकृष्टभागदानं कनिष्ठायेत्याहुः । चण्डेश्वरस्तु आधिकोंऽशः विभागे योंऽशो लभ्यते

---

१. B. reads ज्येष्ठ° for श्रेष्ठ while A. reads वा श्रेष्ठभागेन for श्रेष्ठविभागेन. २. B. C. read स्वमतिः for °स्यमतिः. ३. D. reads धर्म्यः for धर्मः.

इति । बृहस्पतिरपि—

> ' समन्यूनाधिका भागाः पित्रा येषां प्रकल्पिताः ।
> तथैव ते पालनीया विनेयास्ते स्युरन्यथा[1] ' ॥

इति । तस्माज्जीवद्विभागे [2]अजीवद्विभागे च विषमवि-[3]भागोऽस्तीति कथं सुताः सममेव विभजेरन्निति नियम्यते । नैवम् । सत्यं शास्त्रतो विषमविभागोऽस्ति तथापि लोक-विद्विष्टत्वादनु[4]बन्ध्यादिवत् नानुष्ठीयते । उक्तं च संग्रहकारेण—

> ' यथा नियोग[5]धर्मोऽयं नानुब[6]न्ध्यावधोऽपि वा ।
> त[7]थोद्धारविभागोऽपि नैव संप्रति वर्तते ' ॥

तस्मादन्यः ज्येष्ठत्वनिबन्धनं देयः । कनिष्ठायावर इति तन्न्यूनः तत्पादोनस्तदर्धं तत्पादो वा । इदं च कनिष्ठस्य गुणवत्त्वे गुणं विविच्यैव देयमित्यभिप्रैति । शेषा मध्यमा निर्गुणाः समांशभागाः । समांशं गुणादिनिबन्धनाधिक्यरहितेंऽशे भागः भजनं स्वामित्वं येषाम् । अप्रदत्ता भगिनी अंशभागिनी न तु समांशभागिनी तस्याः समांशित्वनि-षेधस्य वक्ष्यमाणत्वात् । यद्वा समांशभागिनी आधिक्यरहितभागस्वा-मिनी यथा । समस्तत्र विभागः स्यादिति स चांशो वक्ष्यमाणश्चतुर्थभागः प्रकाशकारेण तु कनिष्ठायावर इति स्थाने श्रेष्ठाय च वर इति पठितं व्याख्यातं च प्रथमोत्पन्नस्यांशद्वयं श्रेष्ठः कुटुम्बकर्मण्युपयुक्तः तस्य वरं श्रेष्ठं किंचिद्देयमिति । औरसेषु यदुक्तं क्षेत्रजेष्वपि एष व्यवहारः अति-देश्य इत्याह । क्षेत्रजेष्विति । धर्मतो जातेषु क्षेत्रजेषु तद्वदौरसपुत्रवत् । तथा च या या व्यवस्था औरसपुत्रे उक्ता ज्येष्ठाद्यंशविषयेषु क्षेत्रजे-ष्वपि सति संभवे तास्ता माह्या इति भावः ।

---

१. B. reads ते तथान्यथा and C. स्युरतोन्यथा. २. C. and D. omit अजीवद्विभागे and read जीवद्विभागेन च. ३. C. reads °विभागे सति for °विभागोऽस्तीति. ४. C. reads अनुवद्ध्यादिवत्. ५. B. reads नियोगो धर्मो नो for नियोगधर्मोयम्. ६. D. reads °बन्ध्या° for °वन्ध्या°. ७. C. reads ततो° for तथो°.

इति। आपस्तम्बोऽपि—

'जीवन्[1] पुत्रेभ्यो दायं विभजेत्समम्'।

(आ. स्मृ. २. ६. १४. १.)

इति। स्वमतमुपन्यस्य—

'ज्येष्ठो[2] दायाद इत्येके'।

(आ. स्मृ. २. ६. १४. ६.)

इत्येकीयमतेन कृत्स्नधनग्रहणं ज्येष्ठस्योपन्यस्य—

'देशविशेषे सुवर्णं कृष्णा गावः कृष्णं भौमं ज्येष्ठस्य।
रथः पितुः परीभाण्डं[3] च गृहे[4]।
अलंकारो भार्याया ज्ञातिधनं चेत्येके'।

(आ. स्मृ. २. ६. १४. ७–९.)

इत्येकीयमतेनैवोद्धारविभागं दर्शयित्वा—

'तच्छास्त्रविप्रतिषिद्धम्[5]'।

(आ. स्मृ. २. ६. १४. १०.)

इति निराकृतवान्[6]। तं च[7] शास्त्रप्रतिषेधं स्वयमेव दर्शितवान्—

'मनुः पुत्रेभ्यो दायं व्यभजदित्यविशेषेण श्रूयते'।

(आ. स्मृ. २. ६. १४. ११.)

---

१. D. adds एव after जीवन्. २. B. and C. omit 'ज्येष्ठो दायाद इत्येके' इत्येकीयमतेन कृत्स्नधनग्रहणं ज्येष्ठस्योपन्यस्य. ३. Except A. all read as परि° for परी°. ४. D. intermixes both sûtras and reads as गृहेऽलंकारो. ५. A. reads शास्त्रैः for शास्त्र° and D. शास्त्रप्रति° for शास्त्रविप्रति° B. C. read आपस्तंबेनाऽपि. ६. B. C. read निराकृतम्. ७. B. C. omit तं च शास्त्रप्रतिषेधं स्वयमेव दर्शितवान्.

इति । तस्माद्विषमविभागः शास्त्रसिद्धोऽपि लोकविरोधाच्छ्रुतिविरोधाच्च नानुष्ठेयः । इति सममेव विभजेरन्निति नियमो घटते ।

स्वयं द्रव्यार्जनसमर्थतया पितृद्रव्यमनिच्छतोऽपि यत्किंचिद्दत्वा दायविभागः कर्तव्यः तत्पुत्रादीनां दायग्रहणेच्छानिवृत्त्यर्थमित्याह याज्ञवल्क्यः—

'शक्तस्यानीहमानस्य किंचिद्दत्वा पृथक् क्रिया'।

(या. स्मृ. २. ११६.)

इति । पुत्राणां मातृधनविभागो दुहित्रभावे द्रष्टव्यः तथाच स एव—

'मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः'।

(या. स्मृ. २. ११७.)

इति । मातृकृतर्णापाकरणावशिष्टं मातृधनं दुहितरो विभजेरन् । अतश्च मातृकृतर्णसमं न्यूनं च मातृधनं दुहितॄणां सद्भावेऽपि पुत्रा एव विभजेरन्—इत्यर्थादवगम्यते§ । अत्र गौतमेन विशेषो दर्शितः।

§ एतदुक्तं भवति । मातृकृतं ऋणं पुत्रैरेवापाकरणीयं न दुहितृभिः। ऋणावशिष्टं तु धनं दुहितरो गृह्णीयुः । युक्तं चैतत् ।

पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः'।

इति । स्त्र्यवयवानां दुहितृषु बाहुल्यात् स्त्रीधनं दुहितृगामि । पितृधनं पित्रवयवानां पुत्रेषु बाहुल्यात् पुत्रगामि इति ।

१. C. reads अयम्. २. C. reads ° करणवैशिष्ट्यम् for करणावशिष्टम्.

'स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां च'।

(गौ. स्मृ. २८. २४).

इति। ऊढाऽनूढदुहितृसमवाये मातृधनमनूढानामेव। ऊढास्वपि सधननिर्धनदुहितृसमवाये निर्धनानामेवेत्यर्थः। पैतामहे पौत्राणां विभागे विशेषमाह याज्ञवल्क्यः—

'अनेकपितृकाणां तु पितृतो भागकल्पना[1]'।

(या. स्मृ. २. १२०).

इति। यदा पितृतः अविभक्ता भ्रातरः पुत्रानुत्पाद्य मृताः तत्रैकस्य द्वौ पुत्रौ अन्यस्य त्रयः अपरस्य चत्वारः। तत्र पौत्राणां पैतामहे द्रव्ये यद्यपि जन्मनैव स्वत्वं पुत्रैरविशिष्टं तथापि पित्र्यंशं द्वावेकं त्रयोऽप्येकं चत्वारोऽप्येकं लभन्ते इत्यर्थः। एतदेवाभिप्रेत्य बृहस्पतिरपि—

'तत्पुत्रा विषमसमाः पितृभागहराः स्मृताः'।

इति। तत्पुत्राः प्रमीतपितृकाणामेकैकस्य पुत्राः विषमसमाः न्यूनाधिकसंख्याः स्वं स्वं पैतृकं भागमेव लभन्ते इत्यर्थः। यदा स्वसुतयोरविभक्तयोर्मध्ये कश्चिद्भ्राता मृतः तत्सुतस्तु पितामहादप्यप्राप्तांशः पितामहोऽपि नासीत् तदा त्वाह कात्यायनः—

'अविभक्तेऽनुजे प्रेते तत्सुतं ऋक्थभागिनम्।
कुर्वीत जीवनं[3] येन लब्धं नैव पितामहात्।

---

१. B. C. D. read भागकल्पना. २. B. originally reads तथा while in margin reads तदा. ३. B. reads originally भागिनं and gives in margin as जीवनं.

लभेतांशं स पित्र्यं तु पितृव्यात्तस्य वा सुतात् ।
स एवांशस्तु सर्वेषां भ्रातॄणां न्यायतो भवेत् ।
लभेत तत्सुतो वाऽपि निवृत्तिः परतो भवेत् ' ॥

इति । लभेत तत्सुतो वा इत्यस्य अयमर्थः । तस्यापि विभाज्य धनस्वामिपौत्रस्य सुतोऽपि पितुरभावे तद्भागं लभेत तत ऊर्ध्वं तत्सन्ततौ वृद्धप्रपितामहधनविभागकरणनिवृत्तिः– इति । तथा च देवलः—

' अविभक्तविभक्तानां कुल्यानां वसतां सह ।
भूयो दायविभागः स्यादा चतुर्थादिति स्थितिः ॥
तावत्कुल्याः सपिण्डाः स्युः पिण्डभेदस्ततः परम् ' ॥

इति । जीवत्पितृकस्य पुनः पित्रा सह कथं पैतामहधनविभाग इत्याकाङ्क्षायामाह बृहस्पतिः—

' द्रव्ये पितामहोपात्ते जङ्गमे स्थावरेऽपि वा ।
सममंशित्वमाख्यातं पितुः पुत्रस्य चैव हि ' ॥

इति । याज्ञवल्क्योऽपि—

' भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा ।
तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः ' ॥
(या. स्मृ. २. १२१).

इति । भूः शालिक्षेत्रादिका । निबन्धः एकस्य पर्णभारस्य इयन्ति पर्णानि तथैकस्य क्रमुकफलभारस्य इयन्ति

---

१. B. and C. add स before लभेतांशम् but it will then break the rules of meter. २. B. and C. add इत्यर्थः after °निवृत्तिः. ३. D. reads कुलानां while A. substitutes गृहे for सह. ४. C. reads क्रीत° for जीवत्°. ५. B. C. D. omit °फल° while C. substitutes °भावस्य for °भारस्य.

क्रमुकफलानीत्याद्युक्तलक्षणः । द्रव्यं सुवर्णरजतादि यत्पितामहेन प्रतिग्रहविजयादिलब्धं तत्र पितुः पुत्रस्य च स्वाम्यं लोकप्रसिद्धमिति विभागोऽस्ति । यस्मात्सदृशं समानं स्वाम्यं तस्मान्न पितुरिच्छयैव विभागो नापि पितुर्भागद्वयम् । ततश्च पितृतो भागकल्पनेत्येतत्स्वाम्ये समानेऽपि वांचनिकम् । अतः—

'द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता' ।

(ना. स्मृ. १३. १२).

इति । एवमादिकं युगान्तरे विषमविभागप्रतिपादनतया स्थापितम् । स्वार्जितद्रव्यविषयं वा । पैतामहधनविषये तु न क्वापि विषमविभागः । इति । तथा अविभक्तेन पित्रा पैतामहे द्रव्ये दीयमाने विक्रीयमाणे वा पौत्रस्य निषेधेऽप्यधिकारोऽस्तीति गम्यते ।

* अत्र विज्ञानेश्वरः—'विभागं चेत् पिता कुर्यात्' इत्येतत्स्वार्जितविषयम् । तथा 'द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता' इत्येतदपि स्वार्जितविषयम् । 'जीवतोरस्वतन्त्रः स्याज्जरयापि समन्वितः' इत्येतदपि पारतन्त्र्यं मातापित्रार्जितद्रव्यविषयम् । तथा 'अनीशास्ते हि जीवतोः' इत्येतदपि । तथा सरजस्कायां मातरि सस्पृहे च पितरि विभागमनिच्छत्यपि पुत्रेच्छया पैतामहद्रव्यविभागो भवति । तथाऽविभक्तेन पित्रा पैतामहे द्रव्ये दीयमाने विक्रीयमाणे वा पौत्रस्य निषेधेऽप्यधिकारः । पित्रार्जिते तु न निषेधाधिकारः । तत्परतन्त्रत्वात् । अनुमतिस्तु कर्तव्या । तथाहि । पैतृके पैतामहे च स्वाम्यं यद्यपि जन्मनैव तथापि पैतृके पितृपरतन्त्रत्वात् पितुः स्वार्जकत्वेन प्राधान्यात् पित्रा विनियुज्यमाने स्वार्जिते द्रव्ये पुत्रेणानुमतिः कर्तव्या । पैतामहे तु द्वयोः स्वाम्यमविशिष्टमिति निषेधाधिकारोऽप्यस्तीति विशेषः । अग्रे मनुवाक्ये प्रदर्श्यते ।

पैतामहोपात्तेऽपि क्वचित्पितुरिच्छयैव स्वार्जितवद्विभागो भवतीत्याह मनुः—

'पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात् ।
न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितम्' ॥

(म. स्मृ. ९. २०९.)

इति । यत्पितामहार्जितं केनाप्यपहृतं यदि पितोद्धरति तदा स्वार्जितमिव पुत्रैः सार्धमकामतः स्वयं न विभजेत् । इति । एवं च सति पितामहोपार्जिते न स्वेच्छया विभाग इत्युक्तं भवति । बृहस्पतिरपि—

'पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्जितम् ।
विद्याशौर्यादिना प्राप्तं तत्र स्वाम्यं पितुः स्मृतम्' ।

इति । कात्यायनोऽपि—

'स्वशक्त्यापहृतं द्रव्यं स्वयमाप्तं च यद्भवेत् ।
एतत्सर्वं पिता पुत्रैर्विभागं नैव दाप्यते' ॥

इति । यत्परैरपहृतं क्रमायातं स्वशक्त्यैवोद्धृतं यन्नष्टं क्रमायातं यच्च विद्याशौर्यादिना स्वयमेवार्जितं तत्सर्वं पिता विभागे पुत्रैर्न दाप्य इत्यर्थः । विभागोत्तरकालोत्पन्नस्य पुत्रस्य भागकल्पनाप्रकारमाह याज्ञवल्क्यः—

---

१. C. reads उपहृतम्. २. C. adds °विषयं वा । पैतामहधनविषये तु क्वापि विषमविभाग इति । तथापि । अविभक्तेन पितृपैतामहे द्रव्येऽपि व्यादीयमाने विक्रीयमाणे वा and omits इव only. ३. C. omits च. ४. C. reads तत्प्राप्तम् for °ना प्राप्तम्. ५. B. reads नष्टम्. ६. B. reads विभागे. ७. C. reads क्रमागतम्. ८. B. C. read यदि for यत्. ९. D. reads विभागम्. १०. D. omits पुत्रस्य.

'विभक्तेषु सुतो जातः सवर्णायां विभागभाक्' ।

(या. स्मृ. २. १२२.)

इति । अयमर्थः । विभक्तेषु पुत्रेषु सवर्णायां भार्याया जातः पुत्रः पित्रोर्विभागं भजते इति विभागभाक्–इति । मातृभागं चासत्यां दुहितरि—

'ताभ्य ऋतेऽन्वयः' ।

(या. स्मृ. २. ११७.)

इत्युक्तत्वात् । असवर्णायां जातस्तु स्वांशमेव पित्र्याल्लभते मातृकं तु सर्वमेव । अतएव मनुः—

'ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम्' ।

(म. स्मृ. ९. २१६.)

इति । पित्रोरिदं पित्र्यम् ।

'अनीशाः[१] पूर्वजाः पित्रोः भ्रातृभागे विभक्तजाः' ।

इति । स्मरणात् । मातापित्रोर्भागे विभागात्पूर्वमुत्पन्नो न स्वामी पित्रा सह पूर्वं विभक्तत्वात् । विभक्तजश्च भ्रातुर्धने[२] न स्वामीत्यर्थः । विभागोत्तरकालं पित्रा स्वयमर्जितं विभागोत्तरकालमुत्पन्नस्यैव । तथा च मनुः—

"पुत्रैः सह विभक्तेन पित्रा यत् स्वयमर्जितम् ।

विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः[३] स्मृताः ।

इति । ये च विभक्ताः पुनः पित्रा सह संसृष्टास्तेषां विभागोत्तरकालमुत्पन्नेन[४] सह विभागोऽस्तीत्याह मनुः—

१. C. reads in singular form अनीशः पूर्वजः and विभक्तजः. २. B. substitutes भागे for धने, and C. reads विभक्तजस्तु तद्धनःस्वामी. ३. B. originally reads पूर्वं एवच and in margin पूर्वजा स्मृता. ४. B. reads उत्पन्नो यस्तेन सह.

'संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह' ।
(म. स्मृ. ९. २१६.)

इति । अजीवद्विभागोत्तरकालं जातस्य पुत्रस्य भागकल्पनामाह याज्ञवल्क्यः—

' दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्' ।
(या. स्मृ. २. १२२.)

इति । पितरि मृते भ्रातृविभागसमयेऽस्पष्टगर्भायां मातरि भ्रातृविभागोत्तरकालमुत्पन्नस्य विभागः दृश्याद्भ्रातृभिर्गृहीतादायव्ययविशोधितात् उपचयापचयाभ्यां अवधारितपरिमाणात् शोधिताद्धनात्किंचिदुद्धृत्य स्वांशसमो दातव्यः स्यादित्यर्थः ।

* अत्र मेधातिथिः—विभागोत्तरकालं पित्रा यद्विभागे द्रव्यं गृहीतं द्वावंशौ प्रतिपद्येते तदेव सत्यां पितुरिच्छायां ग्रहीतव्यम्। पितुरूर्ध्वं वा न तत्र भ्रातृभिर्वाच्यं किमित्ययं द्वावंशौ गृह्णातीति अथ च नास्ति पितुरिच्छा तदा समं च स्वसमोऽस्य भाग उद्धर्तव्यः पितुरूर्ध्वं संसृष्टास्तेषामेव स पैतृकोंशस्तदुत्थं दद्यादपरेषां स्वांशं जातस्य च मृतस्य चेति जातस्य संसृष्टिन एव दद्युः पितुरूर्ध्वं तदीयमंशं च त एवमेव विभक्ताः सह इत्यनयानुबुद्ध्या भगिन्या आप्रसवान्नैव विभागोऽस्तीति वसिष्ठेन दर्शितम् ।

† आयः प्रतिदिवसं प्रतिमासं प्रत्यब्दं वा यदुत्पद्यते । व्ययः पितृकृतर्णापाकरणं ताभ्यां आयव्ययाभ्यां यच्छोधितं तस्माद्धनात् उद्धृत्य विभागानन्तरजातस्य भ्रातुः भागो दातव्यः । एतदुक्तं भवति । प्रातिस्विकेषु भागेषु तदुत्थमायं प्रवेश्य पितृकृतं च ऋणमपनीय अवशिष्टेभ्यः स्वेभ्यः स्वेभ्यो भागेभ्यः किंचित् किंचित् उद्धृत्य विभागानन्तरजस्य स्वसमानभागः कार्यः इति ।

१. C. reads संबन्धादि तत्परिमाणात् and does not repeat किंचित् while D. omits अवधारितपरिमाणात.

एतच्च मृतभ्रातृभार्यायामपि विभागसमये अस्पष्टगर्भायां विभागादूर्ध्वमुत्पन्नस्यापि वेदितव्यम्। स्पष्टगर्भायां तु प्रसवं प्रतीक्ष्यैव विभागः कर्तव्यः।

'अथ भ्रातॄणां दायविभागो याश्चानपत्याः स्त्रियस्तासामा-पुत्रलाभात्'।

(व. स्मृ. १७. ४०-४१.)

इति वसिष्ठस्मरणात्। विभक्तेभ्यः पितृभ्यामर्थदाने विभक्तजस्य पुत्रस्य निषेधाधिकारो नास्ति दत्तं च तेन न प्रत्याहर्तव्यमित्याह याज्ञवल्क्यः—

'पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत्' §।

(या. स्मृ. २. १२३.)

इति। अजीवद्विभागे मातुरंशकल्पनामाह याज्ञवल्क्यः—

'पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत्'।

(या. स्मृ. २. १२३.)

इति। एतच्च स्त्रीधनस्य अप्रदाने वेदितव्यम्। दत्ते त्वर्धमेव।

§ विभक्ताभ्यां मातापितृभ्यां पूर्वं विभक्तस्य पुत्रस्य यद् अलंकारादि दत्तं भवेत् तत्तस्यैव पुत्रस्य स्यात् न विभक्तजस्य स्वं भवति। न्यायसाम्यात् विभागात् प्रागपि यस्य यद्दत्तं तत्तस्यैव। तथा सति विभक्तजे विभक्तयोः पित्रोरंशं तदूर्ध्वं विभजतां यस्य यद्दत्तं तत्तस्यैव नान्यस्य इति वेदितव्यम्।

१. A. omits स्त्रियः. २. B. reads भरणादि° for अर्थ°. ३. C. substitutes वेतनम् for दत्तं च तेन.

'दत्ते स्वेर्धांशहारिणी'

(या. स्मृ. २. १४८.)

इति स्मरणात्। अत एव स्मृत्यन्तरम्

'जनन्यस्वधना पुत्रैर्विभागेंशं समं हरेत्'।

इति। अस्वधना प्रातिस्विकस्त्रीधनशून्या जननी पुत्रैर्विभागे क्रियमाणे पुत्रांशसममंशं हरेदित्यर्थः। जननीग्रहणं सापत्न्यादेरुपलक्षणार्थम् तथाच व्यासः—

'असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्तिताः।
पितामह्यश्च सर्वास्ता मातृतुल्याः प्रकीर्तिताः'।

इति। यत्तु कैश्चिदुक्तं माताप्यंशं समं हरेदिति जीवनोपयुक्तमेव धनं माता स्वीकरोति इति। तन्न। अंशसमशब्दयोरानर्थक्यप्रसङ्गात्। अथोच्येत बहुधने जीवनोपयुक्तं गृह्णाति स्वल्पधने पुत्रसमांशमिति। तदपि न। विधिवैषम्यप्रसङ्गात्। भिन्नमातृकाणां सवर्णानां समसंख्यानां विभागप्रकारमाह व्यासः—

१. The text of याज्ञवल्क्य reads अर्धं प्रकीर्तितम् for अर्धांशहारिणी; our commentator does not mention the name of the text from which he quoted this sentence, but it appears in the text of याज्ञवल्क्य, and elsewhere he also mentions the same name. २. D reads अपधना for अस्वधना. ३. B. reads अनन्यस्वधना while D reads अपधना. ४. B. omits अंशम्. ५. C. reads तनयांशसमशब्दयोरमाद्य?.

समानजातिसंख्या ये जातास्त्वेकेन सूनवः ।
विभिन्नमातृकास्तेषां मातृभागः ¶प्रशस्यते ।

इति । बृहस्पतिरपि—

'[1]येद्येकजाता बहवः समाना जातिसंख्यया ।
[2]स्वैधनैस्तैर्विभक्तव्यं मातृभागेन धर्मतः' ॥

इति । विषमसंख्यानां तु विभागं स एवाह—

'सवर्णलि[3]ङ्गसंख्या ये वि[4]भागस्तेषु शस्यते' ।

इति । वि[5]भिन्नजातीनां पुत्राणां विभागप्रकारमाह याज्ञवल्क्यः—

'*चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः ।
क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः' ।
(या. स्मृ. २. १२५.)

¶ अयमाशयः—एकस्यां स्त्रियां यावन्तः पुत्रा जाताः तावन्त एव अपरस्यामपि जाताश्चेत् तदा मातुरेवायं विभाग इति कृत्वा तैः मातृभागं पृथक्कृत्य स्वविभागाः कर्तव्याः ।

* अस्यायमर्थः—तिस्रो वर्णानुपूर्व्येणेति ब्राह्मणस्य चतस्रः क्षत्रियस्य तिस्रो वैश्यस्य द्वे शूद्रस्यैकेति भार्या दर्शितास्तत्र ब्राह्मणात्मजा ब्राह्मणोत्पन्ना वर्णशः वर्णशब्देन ब्राह्मणादिवर्णाः स्त्रिय उच्यन्ते संख्यैकवचनाच्च वीप्सायामित्यधिकरणकारकादेकवचनाद्वीप्सायां शस् । अतश्च वर्णे वर्णे ब्राह्मणोत्पन्ना यथाक्रमं चतुस्त्रिद्व्येकभागाः स्युर्भवेयुः । एतदुक्तं

१. B. originally reads यथैकजाता and gives in margin as यद्येकजाता. २. B. originally साधनैः and in margin स्वधनैः; C. and D. read सधनैः. ३. B. reads °भिन्न° for °लिङ्ग°. ४. B. originally reads पुंसांशस्तेषु and corrects पुंभागस्तेषु. ५. C. and D. read भिन्न° for विभिन्न° and omit प्रकारम्.

इति । वर्णशो ब्राह्मणात्मजाः ब्राह्मणादिवर्णस्त्रीषु ब्राह्मणेनोत्पन्ना ब्राह्मणमूर्धावसिक्ताम्बष्ठनिषादाः । यथाक्रमं प्रत्येकं चतुस्त्रिद्व्येकभागा भवेयुः । क्षत्रियादिवर्णस्त्रीषु क्षत्रियेणोत्पन्नाः क्षत्रियमाहिष्योग्रास्त्रिद्व्येकभागाः वैश्येन वैश्याशूद्रोत्पन्नौ[1] वैश्यकरणौ द्व्येकभागिनौ शूद्रस्यैकैव[2] भार्येति भिन्नजातीयपुत्राभावात् तत्पुत्राणां पूर्वोक्त एक एव विभागः । मनुरपि-

' ब्राह्मणस्यानुपूर्व्येण चतस्रस्तु यदि स्त्रियः ।
तासां[§] पुत्रेषु जातेषु विभागेऽयं विधिः स्मृतः ' ॥

भवति । ब्राह्मणेन ब्राह्मण्यामुत्पन्ना एकैकशश्चतुरश्चतुरो भागांल्लभन्ते । तेनैव क्षत्रियायामुत्पन्नाः प्रत्येकं त्रींस्त्रीन् भागान् लभन्ते । वैश्यायां द्वौ द्वौ शूद्रायामेकमेकमिति । क्षत्रजाः क्षत्रियेणोत्पन्नाः वर्णशः इत्यनुवर्तते । यथाक्रमं त्रिद्व्येकभागाः क्षत्रियेण क्षत्रियायामुत्पन्नाः प्रत्येकं त्रीन् त्रीन् भागान् लभन्ते । वैश्यायां द्वौ द्वौ शूद्रायामेकमेकम् । विड्जाः वैश्येनोत्पन्नाः अत्रापि वर्णश इत्यनुवर्तते यथाक्रमं द्व्येकभागिनः वैश्येन वैश्यायामुत्पन्नाः प्रत्येकं द्वौ द्वौ भागौ लभन्ते । शूद्रायामेकमेकम् । शूद्रस्यैकैवभार्येति भिन्नजातीयपुत्राभावात्तत्पुत्राणां पूर्वोक्त एव विभागः । यद्यपि चतुस्त्रिद्व्येक इत्यविशेषेणोक्तं तथापि प्रतिग्रहप्राप्तभूम्यतिरिक्तविषयमिदं द्रष्टव्यम् ।

§ सार्धसप्तधा विभक्तस्य धनस्य त्रीनंशान् ब्राह्मणीपुत्रः द्वौ क्षत्रियासुतः सार्धं वैश्यापुत्रः एकं शूद्रासुतः अनया रीत्या पितृद्रव्यं विभजेयुः । एवंच सति यत्र ब्राह्मणीक्षत्रियापुत्रौ द्वावेव विद्येते तत्र पञ्चधा कृते धने त्रयोभागा ब्राह्मणस्य द्वौ क्षत्रियापुत्रस्य । तथाच यत्र ब्राह्मणीवैश्यापुत्रौ तत्र सार्धचतुर्धा विभक्तस्य धनस्य भागत्रयं ब्राह्मणीपुत्रः सार्धभागं वैश्यापुत्रः । अनयैव दिशा ब्राह्मणीशूद्रापुत्रादौ क्षत्रियाशूद्रापुत्रादौ यथायथं विभागनियमः अनुसंधेयः ।

१. D. वैश्यायामुत्पन्नौ. २. Except A. all others omit this.

'त्र्यंशं दायाद्धरेद्विप्रो द्वावंशौ क्षत्रियासुतः।
वैश्याजः सार्धमेवांशमंशं शूद्रासुतो हरेत्'॥
'सर्वं वा रिक्थजातं तद्दशधा प्रविभज्य तु।
धर्म्यं विभागं कुर्वीत विधिनाऽनेन धर्मवित्'॥
'†चतुरोंऽशान् हरेद्विप्रः त्रीनंशान् क्षत्रियासुतः।
वैश्यापुत्रो हरेद् द्व्यंशं एकं शूद्रासुतो हरेत्'॥
(म. स्मृ. ९. १४९, १५१–१५३.)

इति। एतच्च प्रतिग्रहप्राप्तभूम्यतिरिक्तविषयम्। अत एव बृहस्पतिः—

'न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै।
यद्यप्येषां पिता दद्यान्मृते विप्रासुतो हरेत्'।

इति। प्रतिग्रहविशेषणसामर्थ्यात् क्रयादिलब्धा भूः क्षत्रियादिसुतानामपि भवत्येव। शूद्रापुत्रस्य विशेषप्रतिषेधाच्च।

† चतसृणां विषमानेकपुत्रत्वे विप्रापुत्रलभ्यभागात्पादहीनः प्रत्येकः क्षत्रियासुतानामेवं वैश्यासुतानामर्धं शूद्रासुतानां पाद इति यथाविधि भागः पतति तथा विभजनीयमित्यर्थाल्लभ्यते। यदा तु ब्राह्मणीक्षत्रिययोरेवापत्यानि तदा सप्तांशतां कृत्वा चतुरोंशानित्यादि। यदा तु ब्रह्मविजातीयभार्यात्रयपुत्रास्तदा नवांशान्कल्पयित्वा। एवं ब्राह्मणीवैश्याशूद्रापुत्रेषु सत्सु सप्तांशान्। विप्राशूद्रापुत्रेषु सत्सु पञ्चेत्याद्यूह्यम्। एवं क्षत्रियस्य क्षत्रविट्शूद्रजातिभार्यात्रयपुत्रेषु सत्सु त्रयो द्वावेकांश इति षडंशा इत्यादि व्यवस्थोहनीया।

१. Except A. all others do not insert this verse. २. B. C. and D. substitute तु for तत्. ३. A. reads परिकल्प्य च for प्रविभज्य तु. ४. B. and C. read अंशम् for एकम्.

'शूद्रायां द्विजातिभिर्जातो न भूमेर्भागमर्हति'।

इति । यत्तु मनुवचनम्—

'ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक् ।
यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत्' ॥

(म. स्मृ. ९. १५५.)

¶ अत्र मेधातिथिः—न रिक्थभाग् द्विजातीनां शूद्रापुत्रः किं सदा नेत्याह । यदेवास्य पिता दद्यात्तदास्य पित्रा दशमांशकल्पना कृता तदेव तत्तस्य तदधिकं पैतृकं नान्यल्लभते । तत्रापि शंखेनोक्तं न शूद्रापुत्रोऽर्थभागी । यदेवास्य पिता दद्यात् स एव तस्य भागो गोमिथुनं त्वपरं दद्युर्विभागकाले भ्रातर इति वाक्यशेषः। अन्ये त्वनूढायाः शूद्रायाः पुत्रस्येमं विधिमिच्छन्ति । न ह्यत्र विवाहलिङ्गं किंचिदस्तीति । जातिविशेषवचनः शूद्राशब्दोऽतो यदेवास्य पिता दद्यात् अतो यदस्य प्रजीवनं पित्रा दत्तं तदेव दातव्यम्। अथ तेन का विभागकल्पना कृता यावज्जीवं जीवनाय तदा तदेवास्य धनं न भ्रातृभिः किंचिद्दातव्यम् । यथा गौतमः शूद्रापुत्रप्रकरण एवाह। अपरिगृहीतास्वपि शुश्रूषा चेल्लभेत वृत्तिमूलमन्तेवासिविधिनेति । तेषां मते क्षत्रियवैश्ययोरनूढयोर्जाता रिक्थहराः प्राप्नुवन्ति तत्र च कियानंश इति न ज्ञायते यावानंश ऊढयोरिति चेत्तत्रापि नोढाग्रहणं न लिङ्गं वचनं वास्ति। एक एवौरसः पुत्र इति धर्मपत्नीष्वौरसो न चानूढयोर्जातानामौरसलक्षणमस्ति उक्तं च अनियुक्तासुतश्चैवेत्यादि अभ्रातृजायाविषयमेतत् । तत्र किल नियोगे विहितेऽनियुक्तासुत इति प्रतिषेधेऽपि तद्विषया बुद्धिरुपजायते अत्राप्यस्ति तर्हि जातमात्रेष्विति तस्मात्परस्त्रीषु नियोगेन विनाऽनियुक्तासुताः सर्वेषां च तेषां प्रजीवनमुक्तम् ।

---

१. The commentator does not mention the name of the work from which he quoted this but the व्यवहारमयूख says this line is from देवल.

इति । तत्प्रीतिदत्तधनसद्भावविषयं इत्यविरुद्धम् । आनुलोम्येन जातस्यैकपुत्रस्य ऋक्थग्रहणप्रकारमाह देवलः[2]—

'आनुलोम्यैकपुत्रस्तु[3] पितुः सर्वस्वभाग्भवेत्' ।

इति । एतच्च निषादव्यतिरिक्तविषयम् । अतएवोक्तं तेनैव—

'निषाद एकपुत्रस्तु विप्रस्वस्य तृतीयभाक् ।
द्वौ सपिण्डः सकुल्यो वा स्वधादाता तु स्वं हरेत्[4]' ।

इति । यत्तु मनुवचनम्—

'यद्यपि स्यात्तु सत्पुत्रो यद्यपुत्रोऽपि[5] वा भवेत् ।
नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः' ॥

(म. स्मृ. ९. १५४.)

इति । *तदशुश्रूषुशूद्रापुत्रविषयम् । क्षत्रियेण वैश्येन वा शूद्रायामुत्पन्नः एकः पुत्रः अर्धमेव हरेत् न निषादवत्तृतीयमंशम् । तथाच[6] विष्णुः—

* मेधातिथिस्तु एवं न मन्यते । यथा—

सत्पुत्रो विद्यमानपुत्रः ब्राह्मणीपुत्र एव वा विद्यमानो विवक्षितो न द्विजातिपुत्रमात्रमतश्चासति ब्राह्मणपुत्रे क्षत्रियवैश्ययोः सतोरप्यष्टमांशं लभते केवले च वैश्यपुत्रे तृतीयं अन्ये त्वविशेषेण द्विजातिपुत्राभावे पुत्रपदेनोक्त इत्याहुः अस्मिन्पक्षे सपिण्डगामिदशमांशशेषं धनं इयंतु द्रष्ट्रव्यवस्था बहुवचनं योगक्षेमे तदा दशमांशं हरेच्छौद्रः । अथ कतिपयजनजीवनपर्याप्तं तदा शूद्रपुत्रस्यैव क्षत्रियादीनां समानभाव-

१. B. originally reads तदपि पितृदत्त° and gives in margin तत्प्रतिदत्त°. २. B. originally reads नारदः and gives in margin देवलः. ३. D. reads आनुलोम्येन for आनुलोम्यैक°. ४. D. reads संहरेत् for स्वं हरेत्. ५. The text (Mandlik's edition) reads दसत्पुत्रो but it seems incorrect; it may be असत्पुत्रो (ऽप्यसत्पुत्रो Nirṇayasâgara edition.) ६. D. omits च and C. and D. read बृहद्विष्णुः.

'द्विजातीनां शौद्रस्त्वेकः[1] पुत्रोऽर्धहरः[2] ।
अपुत्रस्य[3] ऋक्थस्य या गतिः सा[4] भागार्धस्य' ।

(वि. स्मृ. १८. ३२-३३.)

इति । प्रत्यासन्नसपिण्डस्यान्यदर्धं भवतीत्यर्थः । अजीवद्विभागे केषुचित् भ्रातृष्वसंस्कृतेषु भगिनीषु वाऽसंस्कृतासु तत्संस्कारः पूर्वसंस्कृतैर्भ्रातृभिः कर्तव्य इत्याह व्यासः—

'असंस्कृतास्तु ये तत्र पैतृकादेव ते धनात् ।
संस्कार्या भ्रातृभिः ज्येष्ठैः कन्यकाश्च यथाविधि' ।

जातीयास्त्रीजातानां स्मृत्यन्तरे विधिर्दर्शितः ।। क्षत्रजास्त्रिद्व्येकभागा विड्जाः स्युर्द्व्येकभागिनः ।। क्षत्रियाजातास्वजातीयविजातीयासु शूद्रपर्यन्तासु वर्णक्रमेण त्र्यादिभागहराः तदा तेन स्वधनं क्षत्रियस्य शूद्राः षष्ठमंशं लभन्ते विशश्च तृतीयम् । अन्येत्वस्य श्लोकस्य सामर्थ्यमाहुः । शूद्रपुत्राय यदा ददाति तदानेन धनं संकलय्य दशांशो दातव्यो न तदधिकः सत्यपि स्वातन्त्र्ये । यथा वक्ष्यति यदेवास्य पिता दद्यादिति अस्मिन्पक्षे सपुत्रो दद्यादिति समानाधिकरणे पदे उपपन्नतरे इतरथा यस्य सदसत्पुत्रः। पिता स दद्यादिति संबन्धो दुःश्लिष्टः स्यात् । सपुत्रपदेनास्य पुत्रादेरभिधानं दद्यादिति जीवतः पुत्रसपिण्डादेः । ततश्च यदि क्षत्रियवैश्यापुत्रौ न स्तः केवलौ ब्राह्मणशूद्रौ तदा न शूद्रस्य दशम एवांशः किं तर्ह्यल्पं नाधिकतरं धनं लभते यत्र दश गावः सन्ति तत्र चतस्रो ब्राह्मणस्यैका शूद्रस्य पञ्च क्षत्रियवैश्ययोः। यदा तौ न स्तः तदा पञ्च गावस्तथैव कल्पनया ब्राह्मणशूद्राभ्यां विभजनीयाः। यदि सर्वा ब्राह्मण आदद्यान्न चांशहरः स्यान्न चतुरंशहरस्तस्माच्चतुरोंशान्हरेदिति चतुर्षु भ्रातृषु सत्सु कल्पना । शूद्रस्यापि दशमांशहरत्वं चतुर्ष्वेव द्वयोस्त्रिषु चतुर्षूभयोर्भागाधिक्यम् ।।

---

१. D. reads शूद्रः for शौद्रः. २. B. reads अर्धं हरेत for अर्धहरः. ३. B. reads पुत्रस्य, while C. omits this. ४. B. originally reads सभागस्यास्य and gives in margin सा भागार्धस्य.

इति । भगिनीसंस्कारे तु[1] विशेषमाह याज्ञवल्क्यः—

'असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः ।
भगिन्यश्च निजादंशाद्दत्त्वा त्वंशं तुरीयकम्' ॥

(या. स्मृ. २. १२४.)

इति । पितुरूर्ध्वं विभजद्भिर्भ्रातृभिरसंस्कृता भ्रातरः समुदायद्रव्येण संस्कर्तव्याः । भगिन्यश्चासंस्कृताः निजादंशाद्यज्ज्ञातीया कन्यका तज्ज्ञातीयपुत्रभागात्तुरीयं चतुर्थं भागं दत्वा संस्कर्तव्याः । अनेन पितुरूर्ध्वं दुहितरोऽप्यंशभागिन्य इति गम्यते । अत एव मनुः—

'स्वेभ्यो[2]ऽंशेभ्यस्तु कन्याभ्यः स्वं दद्युर्भ्रातरः पृथक् ।
स्वात् स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः' ।

(म. स्मृ. ९. ११८).

इति । ब्राह्मणादयो भ्रातरः ब्राह्मण्यादिभ्यो भगिनीभ्यो स्वजाति[3]विहितेभ्योंऽशेभ्यः स्वात् स्वादंशादात्मीयाद्भागाच्चतुर्थं[4] चतुर्थं भागं दद्युः ।

एतदुक्तं भवति । यदि कस्यचिद्ब्राह्मण्येव पत्नी पुत्रश्चैकः कन्या चैका तत्र पित्र्यं द्रव्यं द्वेधा विभज्य तत्रैकं भागं चतुर्धा विभज्य तुरीयांशं कन्यायै दत्वा शेषं पुत्रो गृह्णीयात् । अथ द्वौ पुत्रौ कन्या चैका तदा पितृधनं त्रेधा विभज्य तत्रैकं भागं चतुर्धा विभज्य तुरीयांशं कन्यायै दत्वा शेषं द्वौ पुत्रौ विभज्य गृह्णीतः । अथ त्वेकः पुत्रः द्वे कन्ये तदा पित्र्यं

१. B. and C. omit तु. २. C. and D. read तेभ्यः for स्वेभ्यः. ३. D. reads द्विजाति° for स्वजाति°. ४. D. reads चतुर्थभागं दद्युः.

धनं त्रिधा विभज्य तत्रैकं भागं चतुर्धा विभज्य द्वौ भागौ द्वाभ्यां कन्याभ्यां दत्वाऽवशिष्टं सर्वं पुत्रो गृह्णाति । एवं समानजातीयेषु समविषमेषु भ्रातृषु भगिनीषु च समविषमासु योजनीयम् ।

यदा तु ब्राह्मणीपुत्र एकः क्षत्रियाकन्या चैका तत्र पित्र्यं द्रव्यं सप्तधा विभज्य क्षत्रियापुत्रभागान् त्रीन् चतुर्धा विभज्य तुरीयांशं क्षत्रियाकन्यायै दत्वा शेषं ब्राह्मणीपुत्रो गृह्णाति । यदा तु द्वौ ब्राह्मणीपुत्रौ क्षत्रियाकन्यैका तत्र पित्र्यं धनमेकादशधा विभज्य तेषु त्रीन् भागान् चतुर्धा विभज्य चतुर्थमंशं क्षत्रियाकन्यायै दत्वा शेषं सर्वं ब्राह्मणीपुत्रौ विभज्य गृह्णीयाताम् ।

एवं जातिवैषम्ये भ्रातॄणां भगिनीनां च संख्यया वैषम्ये च सर्वत्रायं नियम इति मेधातिथेर्व्याख्यानम् । एतदेव विज्ञानेश्वरयोगिनोऽप्यभिप्रेतम् । भारुचिस्तु । चतुर्भागपदेन विवाहसंस्कारमात्रोपयोगि द्रव्यं विवक्षितम् । अतो दायभाक्त्वमसंस्कृतकन्यानां नास्तीति मन्यते । एतदेव चन्द्रिकाकारस्याप्यभिप्रेतम् तदाह । 'यत एव न दायभागार्थमंशहरणं किन्तु विवाहसंस्कारार्थम्' । अत एव देवलेनोक्तम्—

'कन्याभ्यश्च पितृद्रव्यं देयं वैवाहिकं वसु' ।

---

१. B. and C. read ऊहनीयम् for अयं नियमः. २. B. and C. read अभिमतम् for अभिप्रेतम्. ३. B. gives marginal reading तथाहि for तदाह. ४. B. and C. substitute अ° for य°.

इति । अत्र यद्युक्तियुक्तं तद्ग्राह्यम् । जीवद्विभागे तु यत्किञ्चित्पिता ददाति तदेव लभते कन्या विशेषाश्रवणात् । पित्र्यधनाभावे नारदः—

'अविद्यमाने पित्र्येऽर्थे स्वांशादुद्धृत्य वा पुनः ।
अवश्यकार्याः संस्काराः सङ्कोचोऽत्र विवक्षितः' ॥

(ना. स्मृ. १३–३४.)

इति । भ्रातॄणां भगिनीनां च संस्काराः जातकर्माद्याः पूर्वसंस्कृतैः भ्रातृभिः पितृधनाभावेऽपि सावश्यकत्वेन कर्तव्याः। पैतृकद्रव्यविभागकाले स्वैधृतालंकारादिकमपि कन्यका प्राप्नोतीत्याह शङ्खः—

'विभज्यमाने दाये कन्यालंकारमेव हि' ।
वैवाहिकं स्त्रीधनं च लभते ।

इति । मुख्यगौणपुत्राणां स्वरूपं दायग्रहणक्रमं चाह याज्ञवल्क्यः—

* पित्र्यधनाभावे स्वार्जितेन भिक्षादिलब्धेन च अवश्यं संस्कारं कुर्यादिति न वाच्यम् । जीमूतवाहनेन तथा नाङ्गीकारात् । तथा हि तस्याशयः । येषां तु न कृताः..........॥ इति येषां तेषामिति पुल्लिंगपदघटितवचनेन भ्रातृसंस्कारस्यावश्यकत्वमुक्त्वा पैतृकधनाभावे भ्रातृसंस्कारनिर्वाहार्थमुपायकथनं नारदस्य । तथाच भ्रातृसंस्कारोपक्रमत्वात् उपसंहारेऽपि भ्रातृसंस्कार एव विषयः । न तु भगिनीसंस्कारः। इति नारदीयवचनयोर्भावः ॥

१. The text of Jolly reads भ्रातॄणां पूर्वसंस्कृतैः. २. D. reads °वृत्ता°, for °धृता°, while C. °वृता° for the same. ३. D. reads विभज्यमाने वै दाये कन्यालंकारमेव हि giving it the form of a verse, and omitting वैवाहिकं reads किंचित्स्त्रीधनं च लभते, separately from the above quotation. ४. C. reads वैरूपम् for स्वरूपम्.

§ 'औरसो धर्मपत्नीजः तत्सम[1]ः पुत्रिकासुतः।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥
गृहे प्रच्छन्न उत्पन्नो गूढजस्तु मतः स्मृतः।
कानीनः कन्यकाजातो मातामहसुतो मतः॥

---

§ अस्यायमर्थः—उरसो जात औरसः पुत्रः स च धर्मपत्नीजः धर्मविवाहोढा धर्मपत्नी तस्यां जात औरसः पुत्रो मुख्यः। तत्समः पुत्रिकासुतः तत्सम औरससमः पुत्रिकायाः सुतः पुत्रिकासुतः। अत एव औरससमः। यथाह वसिष्ठः—

'अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्।
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति'॥
(व. स्मृ. १७, १७.)

अथवा पुत्रिकेव सुतः पुत्रिकासुतः सोऽप्यौरससम एव पित्रवयवानामल्पत्वात् मात्रवयवानां बाहुल्याच्च। यथाह वसिष्ठः—

'तृतीयः* पुत्रिकैवेति।

तृतीयः पुत्रः पुत्रिकैवेत्यर्थः। द्व्यामुष्यायणस्तु जनकस्य औरसादपकृष्टोऽन्यक्षेत्रोत्पन्नत्वात्। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा। इतरेण असपिण्डेन देवरेण वा उत्पन्नः पुत्रः क्षेत्रजः॥

गूढजः पुत्रो भर्तृगृहे प्रच्छन्न उत्पन्नो हीनाधिकजातीयपुरुषजत्वपरिहारेण पुरुषविशेषजत्वनिश्चयाभावेऽपि सवर्णजत्वनिश्चये सति बोद्धव्यः। कानीनस्तु कन्यकायामुत्पन्नः पूर्ववत्सवर्णात्स मातामहस्य पुत्रः। यद्यनूढा सा भवेत्तथा पितृगृह एव संस्थिता। अथोढा तदा वोढुरेव पुत्रः। यथाह मनुः—

---

१. B. originally reads तस्सुतः but in margin तत्समः.

* विज्ञानेश्वर reads द्वितीयः पुत्रिकैवेति but the text तृतीयः पुत्रिका विज्ञायते. This must therefore have been the correct form.

अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः ।
दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् ॥
क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः ।
दत्तात्मा तु स्वयंदत्तो गर्भे विन्नः[1] सहोढजः ॥
उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः ।
पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः ' ॥

(या. स्मृ. २. १२८–१३२.)

' पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ' ॥

(म. स्मृ. ९. १७२.)

पौनर्भवस्तु पुत्रोऽक्षतायां क्षतायां वा पुनर्भ्वां सवर्णादुत्पन्नः । मात्रा भर्त्रनुज्ञया प्रोषिते प्रेते वा भर्तरि पित्रा वोभाभ्यां वा सवर्णाय यस्मै दीयते स तस्य दत्तकः पुत्रः । यथाह मनुः—

' माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः ' ॥

(म. स्मृ. ९. १६८.)

इति । आपद्ग्रहणादनापदि न देयः । दातुरयं प्रतिषेधः । तथा एकपुत्रो न देयः । न त्वेवैकं पुत्रं दद्यात प्रतिगृह्णीयाद्वेति वसिष्ठस्मरणात् । तथानेकपुत्रसद्भावेऽपि ज्येष्ठो न देयः ।

' ज्येष्ठेन जातमात्रेण पुत्रीभवति मानवः ' ।

(म. स्मृ. ९. १०६.)

इति । तस्यैव पुत्रकार्यकरणे मुख्यत्वात् । पुत्रप्रतिग्रहप्रकारश्च ' पुत्रं प्रतिग्रहीष्यन्बन्धूनाहूय राजनि चावेद्य निवेशनमध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवं बन्धुसंनिकृष्ट एव प्रतिगृह्णीयात् ' इति वसिष्ठेनोक्तः । अदूरबान्धवमित्यत्यन्तदेशभाषाविप्रकृष्टस्य प्रतिषेधः । एवं क्रीतस्वयंदत्तकृत्रिमेष्वपि योजनीयम् । समानन्यायत्वात् ।

१. A. and the text of याज्ञवल्क्य read भिन्नः for विन्नः.

इति । एषां पुत्राणां द्वादशानां पूर्वस्य[1] पूर्वस्याभावे उत्तर उत्तरः[2] पिण्डदः श्राद्धदः अंशहरो धनहर इत्यर्थः । औरस-पुत्रिकयोः[3] समवाये औरसस्यैव धनग्रहणे प्राप्ते अपवाद-माह मनुः—

'पुत्रिकायां कृतायां तु यदि पुत्रोऽनु[4] जायते ।
समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः' ॥
(म. स्मृ. ९. १३४.)

इति । वसिष्ठोऽपि क्वचिदपवादमाह—

क्रीतस्तु पुत्रस्ताभ्यां मातापितृभ्यां मात्रा पित्रा वा विक्रीतः पूर्ववत् तथैकं ज्येष्ठं च पुत्रं वर्जयित्वा आपदि सवर्ण इत्येव । यत्तु मनुनोक्तम्—

'क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा' ॥
(म. स्मृ. ९. १७४.)

इति । तद्गुणैः सदृशोऽसदृशो वेति व्याख्येयम् । न जात्या । 'सजा-तीयेष्वयं प्रोक्तस्तनयेषु' इत्युपसंहारात् । कृत्रिमः स्यात्स्वयंकृतः । कृत्रिमस्तु पुत्रः स्वयं पुत्रार्थिना धनक्षेत्रप्रदर्शनादिप्रलोभेनैव पुत्रीकृतो मातापितृविहीनः । तत्सद्भावे तत्परतन्त्रत्वात् । दत्तात्मा तु पुत्रो यो मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्रो भवामीति स्वयं दत्तत्व-मुपगतः । सहोढजस्तु गर्भे स्थितो गर्भिण्यां परिणीतायां यः परिणीतः स वोढुः पुत्रः ।

अपविद्धो मातापितृभ्यामुत्सृष्टो यो गृह्यते स ग्रहीतुः पुत्रः सर्वत्र सवर्ण इत्येव ॥

---

१. B. originally reads पुत्रस्य and gives in margin पूर्वस्य, but does not repeat this word. २. C. does not repeat this word. ३. B. and C. read पौत्रिकयोः for पुत्रिकयोः ४. C. substitutes न for ऽनु.

'तस्मिंश्चेत्प्रतिगृहीते औरस उत्पद्येत ।
चतुर्थभागभागी स्याद्दत्तकः' ।

(व. स्मृ. १५. ९.)

इति ।

कात्यायनोऽपि—

'उत्पन्ने त्वौरसे पुत्रे[1] चतुर्थांशहराः सुताः ।
सवर्णा असवर्णा वा ग्रासाच्छादनभाजनाः' ॥

इति । सवर्णाः क्षेत्रजदत्तकादयः । ते औरसे सत्यपि चतुर्थांशहराः । असवर्णाः कानीनगूढोत्पन्नसहोढपौनर्भवाः औरसे सति न चतुर्थांशहराः अपि तु ग्रासाच्छादनमेव लभन्त इत्यर्थः । यत्तु विष्णुनोक्तम्—

'अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः ।
पौनर्भवश्च ते नैव[2] पिण्डरिक्थांशभागिनः' ।

इति । तदौरसे सति चतुर्थांशनिषेधनपरमेव । यच्च मनुनोक्तम्—

*'एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः ।
शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम्[3]' ॥

(म. स्मृ. ९. १६३.)

* व्याध्यादिना प्रथमौरसपुत्राभावे क्षेत्रजादिषु कृतेषु पश्चादौषधादिना विगतव्याधेरौरस उत्पन्ने सतीदमुच्यते औरस एवैकः पुत्रः पितृधनस्वामी शेषाणां क्षेत्रजव्यतिरिक्तानां तस्य षष्ठांशादेर्वक्ष्यमाणत्वात्पापसंबन्धपरिहारार्थं ग्रासाच्छादनं दद्यात् ।

१. A. and the text of वसिष्ठ add पुत्रः after this word. २. B. reads नैवैते and C. reads नैतेपि for ते नैव. ३. B. reads तूपजीवनम् for त्तु प्रजीवनम्.

इति । तदौरसप्रशंसापरमेव न चतुर्थांशभागनिषेध-परम् । अन्यथा चतुर्थांशभाक्त्वप्रतिपादकवसिष्ठकात्यायन-वचनयोरानर्थक्यप्रसङ्गात् । यदपि च तेनैवोक्तम्—

'षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् ।
औरसो विभजन् दायं पित्र्यं पञ्चममेव वा ' ॥

(म. स्मृ. ९. १६४.)

इति । तत्रेयं व्यवस्था । अत्यन्तगुणवत्त्वे चतुर्थांश-भागित्वं प्रतिकूलत्वनिर्गुणत्वयोः षष्ठांशभागित्वं प्रतिकूल-त्वमात्रे निर्गुणत्वमात्रे च पञ्चमांशभागित्वमिति । यदपि हारीतेनोक्तम्—

§ अत्रायमभिसंधिः । द्विभार्यस्य बहुभार्यस्य वा एकस्यां भार्यायां अज्ञातगर्भायां भर्ता मृतः अनन्तरम् अन्या च भार्या पुत्रार्थं देवरे नियुक्ता सती पुत्रमलभत पूर्वस्यां सगर्भायां चौरसः पुत्रो जातः तदा कथं विभागः कार्य इत्याकाङ्क्षायां षष्ठन्तु क्षेत्रजस्य इत्यादिना अंशकल्पना उक्ता भवति ।

† एतत्तु बीजिनः धनस्य अप्राप्तौ विभागभाक्त्वम् । तद्धनप्राप्तौ तु नांशभाक् इति उक्तं भवति । उक्तं च मनुना—

यद्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ ।
यस्य यत्पैतृकं रिक्थं स तद्गृह्णीत नेतरः ' ॥

(म. स्मृ. ९. १६२.)

इति । अयमर्थः । यस्य विधितः क्षेत्रजादूर्ध्वमौरसो जातः तस्य धन-मौरस एव प्राप्नोति न इतरः क्षेत्रजादिः । एवं सति

१. B. originally reads °भाग° and in margin °भाक्त्व°, while C. reads °भाग°. २. B. reads औरसा विभजेद्दायम्. and C. औरसो वि च तं दायम् for औरसो विभजन् दायम्. ३. B. originally reads पंचक ·

'विभजिष्यमाण एकविंशं कानीनाय दद्यात् । विंशं पौनर्भवाय । एकोनविंशं द्व्यामुष्यायणाय । अष्टादशांशं च क्षेत्रजाय । सप्तदशांशं पुत्रिका[1]पुत्राय । इतरदौरसाय पुत्राय दद्यात्' । इति । एतदसवर्णनिर्गुणपुत्रविषयम् ।

(हा. स्मृ. २१. १३-१८)

यत्तु मनुना—

'औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः' ॥

(म. स्मृ. ९. १५९-१६०.)

इति । षट्कद्वयमभिधाय पूर्वषट्कस्य दायादबान्धवत्वं उत्तरषट्कस्यादायादबान्धवत्वम[2]भिहितं तदपि स्वपितृसापिण्ड्ये समानोदकानां संनिहितरिक्थहरान्तराभावे पूर्वषट्कस्य तद्रिक्थभागहरत्वम् उत्तरषट्कस्य तु तन्नास्ति बान्धवत्वं पुन[3]ः

अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥

(या. स्मृ. २. १२७.)

इत्यादियाज्ञवल्क्यवचनविरोधः स्यादिति न शङ्कनीयम् । तद्वचनं तु औरसाभावविषयम् । औरससत्त्वे तु क्षेत्रिणः स्वं औरसो हरेत् बीजिनः स्व क्षेत्रजो हरेदिति व्यवस्था ।

---

१. D. omits पुत्रिका°. २. This portion does not appear in C. D.—°मभिहितं तदपि स्वपितृसापिण्ड्ये समानोदकानां संनिहितरिक्थहरान्तराभावे पूर्वषट्कस्य तद्रिक्थभागहरत्वम् उत्तरषट्कस्य तु तन्नास्ति बान्धवत्वं पुनः; D has °मुक्तं for °मभिहितं. ३. D. adds तत् before पनः.

समानगोत्रत्वेन सपिण्डत्वेन वा उदकप्रदानादिकार्यकरत्वं षट्कद्वयस्यापि सममेवेति व्याख्येयम्। पितृधनग्रहणं तु पूर्वस्य[१] पूर्वस्याभावे सर्वेषामस्त्येव।

'न भ्रातरो न पितरः पुत्रा ऋक्थहराः पितुः'।

(म. स्मृ. ९. १८५.)

इति। औरसव्यतिरिक्तानां पुत्रप्रतिनिधीनां सर्वेषां ऋक्थहारित्वस्य मनुनैव प्रतिपादितत्वात्। द्व्यामुष्यायणस्तु जनयितुरपि ऋक्थं भजते। तथा च याज्ञवल्क्यः—

'अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः।
उभयोरप्यसौ ऋक्थी पिण्डदाता च धर्मतः।

(या. स्मृ. २. १२७.)

इति। यदा गुर्वादिना नियुक्तो देवरादिः स्वयमप्यपुत्रः सन्नपुत्रस्य क्षेत्रे स्वपरपुत्रार्थं प्रवृत्तो यं जनयति स द्विपितृको द्व्यामुष्यायणो द्वयोरपि ऋक्थहारी पिण्डदश्च। यदा स्वयं पुत्रवान् परपुत्रार्थमेव परक्षेत्रे पुत्रमुत्पादयति तदुत्पन्नः क्षेत्रिण एव पुत्रो भवति न बीजिनः। यथोक्तं मनुना—

'क्रियाभ्युपगमात्क्षेत्रं बीजार्थं यत्प्रदीयते।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च।
फलं त्वनभिसंधाय क्षेत्रिणा बीजिना तथा।
प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्बलीयसी'॥

(म. स्मृ. ९. ५३, ५२.)

---

१. C. D. do not repeat पूर्वस्य.

इति । अस्यार्थः । अत्रोत्पन्नमपत्यमुभयोरपि भवतु — इति संविदं कृत्वा यत्क्षेत्रं स्वामिना बीजावापार्थं बीजिने दीयते तस्मिन् क्षेत्रे उत्पन्नस्यापत्यस्य बीजिक्षेत्रिणौ स्वामिनौ । यदा तु तत्रोत्पन्नमपत्यमावयोरस्त्विति संविदमकृत्वा परक्षेत्रे बीजिना यदपत्यमुत्पाद्यते तदपत्यं क्षेत्रिण एव न बीजिनः । यतो बीजाद्योनिर्बलीयसी । गवाश्वादिषु दृष्टत्वादित्यर्थः । गुर्वादिनियोगोऽपि वाग्दत्ताविषय एव । अन्यस्य नियोगस्य मनुना निषिद्धत्वात् ।

'देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्[1]नियुक्तया ।
प्रजे[2]प्सिताधिगन्[3]तव्या सन्तानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत्पुत्रं न द्वितीयं कथंचन ॥

(म. स्मृ. ९. ५९–६०.)

पुत्रे नियोगादुत्पन्ने यथावद्विधवैव सा' ।

इ[4]ति । एवं नियोगमुपन्यस्य मनुः स्वयमेव निषेधति—

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम् ॥
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवावेदनं पुनः ॥
अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः ।
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ॥

---

१. C. D. read सद्भिः for सम्यक्. २. D. reads बीजे° for प्रजे°, while B. originally reads यथे° and in margin प्रजे°. ३. C. substitutes °भि° for °धि°. ४. D. omits इति । नियोगमुपन्यस्य मनुः स्वयमेव निषेधति.

स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा ।
वर्णानां संकरं चक्रे कामोपहतचेतनः ॥
* ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् ।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ' ॥
(म. स्मृ. ९. ६४–६८.)

* ततः किं तत्राह तदेति । प्रमीतपतिकां प्रमीतो हिंसितः पतिर्यस्यास्तां पुत्रवतीमिति शेषः। यो नियोजयत्यपत्यार्थेऽपत्योत्पादनाय तं विगर्हयन्तीत्यन्वयः । अपत्यार्थे विद्यमानपुत्रे सतीति । एषु वेदनश्रुत्यनुरोधेन यस्या म्रियेत इत्युत्तरस्वरसात् सकृत्प्रदीयते कन्या इत्यादिवचनबलात्पुनर्विवाहो निषिद्धो न त्वपत्यार्थे नियोग इति । यत्तु बृहस्पतिः ।

उक्तो नियोगो मनुना निषिद्धः स्वयमेव तु ।
युगह्रासादशक्योयं कर्तुमन्यैर्विधानतः ॥
तपोज्ञानसमायुक्ताः कृतत्रेतायुगे नराः ।
द्वापरे च कलौ नृणां शक्तिहानिर्हि निर्मिता ॥
अनेकधा कृताः पुत्रा ऋषिभिश्च पुरातनैः ।
न शक्यन्तेऽधुना कर्तुं शक्तिहीनैश्चिरंतनैः ॥

इति । तदन्यथासिद्धं निषेधस्य पुनर्विवाहविषयत्वात् । पुत्रप्रयोजना भार्येति तात्पर्यम् । शास्त्रतात्पर्यादग्नीषोमीयपशोरिव क्वचिदननुष्ठानस्य शास्त्रासंकोचकत्वाद्धोलाकाद्यननुष्ठानवदेकमुत्पादयेत्पुत्रमिति नियोगविधेः प्राधान्येनार्थवादस्य न हिंस्यात्सर्वभूतानीतिवत् । स्तनाद्युपमर्दरागनिवर्तनेनान्यथासिद्धेर्गोविन्दराजव्याख्या गरीयसी । अन्यथा संतानकृतेर्दोषापत्तिः । यत्तु ।

अग्निहोत्रं गवालभं संन्यासं पलपैतृकम् ।
देवरेण सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥

इति । तदमूलम् । समूलत्वे वा लाभाख्यात्यादिरागिनां निवृत्तितात्पर्यकम् । अन्यथा यदहरेव विरजेत्तदहरेव प्रव्रजेत् ॥ यावज्जीवमग्निहोत्रं

१. D. reads तदा for तत'.

इति । नन्वत्र विकल्पोऽस्तु विधिप्रतिषेधयोरुभयोर्दर्शनात् । अतो विनियोगस्य वाग्दत्तादिविषयत्वमनुपपन्नमितिचेत् । न । मनुनैव नियोगस्य तद्विषयत्वप्रतिपादनात् ।

§ 'यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ॥
तामनेन विधानेन निजो विन्देत देवरः ॥
† यथाविध्य्येधिगम्यैनां[2] शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ' ॥

(म. स्मृ. ९. ६९–७०.)

इति । दत्तकादीनां न बीजिऋक्थभाक्त्वम् । तथाच मनुः—

जुहोतीत्यादिश्रुतिविरोधश्चेति दिक् । अतएव मेधातिथिर्देवराद्वेत्यादिसाधव इत्यन्ते ग्रन्थे षोडशिग्रहणादिवद्विकल्पः नियोगतदभावयोः पित्राद्युद्धरणं फलं गन्तुश्च परमोपकारः तदाप्रभृत्ययं श्लोकोऽर्थवाद एवेति ॥

§ अत्र मेधातिथिः । नियोगरूपत्वात् कन्यागतोऽयं धर्म उच्यते वाचा सत्ये कृते वाग्दाने निवृत्त एकेन दत्ता अपरेण प्रतिगृहीता तामनेन वक्ष्यमाणेन विधानेन निजसोदरो देवरो विन्देत विवाहयेत् । एतेन वाग्दत्तायाः कन्यायाः देवरेण सह विवाहो भवतीति सिद्ध्यते तथापि तेन देवरेण केवल पुत्रोत्पत्त्यर्थमेव तया सह आप्रसवाद्व्यवायः कार्यः पुत्रोत्पत्त्यनन्तरं यथाकामं व्यवायादीनां निषिद्धत्वात् ।

† अत्र मेधातिथिः । यथाविधि यथाशास्त्रं वैवाह्यो विधिस्तथा विवाह्य वाचनिकोऽयं विवाहः । पुनर्भूश्च तथोच्यते नवाभ्यूढापि सती [भार्या] भवति केवलं परार्थोऽस्या वाचनिको विवाहः । तथाच दर्शयति न दत्त्वा कस्यचित्कन्यां पुनरन्यस्य दीयत इति नासौ देवराय दीयत इत्यर्थः । अदत्ता चास्वभूता कथमिव भार्या भवेत् शुक्लवस्त्रां नियमो गमनेऽन्यस्मिन्नपि नियोगे धर्मोऽयमिष्यते ।

---

१. D. reads अभि° for अधि°. २. B. C. and D. read एताम् for एनाम्.

¶ ' गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ' ॥

(म. स्मृ. ९. १४२.)

इति । दत्रिमग्रहणं क्रीतोपलक्षणार्थम् । दत्तव्यतिरिक्तानां गौणपुत्राणां रिक्थभाक्त्वप्रतिपादकानि वाक्यानि युगान्तर-विषयाणि । कलौ युगे तेषां पुत्रत्वेन परिग्रहणस्य स्मृत्य-न्तरे निषिद्धत्वात्—

' दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ।
देवरेण सुतोत्पत्तिः वानप्रस्थाश्रमग्रहः ।
कलौ युगे त्विमान् धर्मान् वर्ज्यानाहुर्मनीषिणः ' ॥

इति । शूद्रधनविभागे विशेषमाह याज्ञवल्क्यः—

' जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत् ।
मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिकम् ॥
अभ्रातृको हरेत्सर्वं दुहितॄणां सुतादृते ' ।

(या. स्मृ. २. १३३–१३४.)

¶ गोत्ररिक्थे गोत्रं रिक्थं धनं च जनकसंबन्धिनी दत्तको न कदाचि-त्प्राप्नुयात् । पिण्डश्च गोत्ररिक्थानुगामी यस्य गोत्ररिक्थे भजते तस्यैव स पिण्डो दीयते तस्मात् पुत्रं ददतः जनकस्य स्वधापिण्डश्राद्धादि तत्पुत्रकर्तृकं निवर्तते । अतएव नासौ दत्तको द्व्यामुष्यायणः प्रति-ग्रहीतृगोत्रत्वात् । जनकगोत्रसंबन्धाभावाच्चेति दिक् ।

---

१. D. reads कृत्रिम° for दत्रिम. २. D. reads वोपलक्षणार्थम् for क्रीतोप-लक्षणार्थम्. ३. B. reads दाय° for रिक्थ°. ४. D. reads °भागिनम् for भागिकम्.

इति । कामतः पितुरिच्छया भागं लभते । मृते पितरि यदि परिणीतापुत्रा भ्रातरः सन्ति तदा ते दासीपुत्रं स्वभागादर्धभागिकं कुर्युः । अथ परिणीतापुत्रा दुहितरो वा तत्पुत्रा वा न सन्ति तदा तद्धनं दासीपुत्रो लभते । तत्सद्भावे अर्धमेव । द्विजातीनां दास्यामुत्पन्नस्तु पितुरिच्छयाऽप्यंशं न लभते नाप्यर्धं दूरत एव कृत्स्नं[1] जातोऽपि दास्यां शूद्रेणेति विशेषणात् । किन्त्वनुकूलश्चेज्जीवनमात्रं लभते इत्यभिप्रायः । अपुत्रदायग्रहणक्रममाह याज्ञवल्क्यः—

'पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः' ॥
'एषामभावे पूर्वस्य धनभागुत्तरोत्तरः ।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः' ॥

(या. स्मृ. २. १३५–१३६.)

इति । औरसादयो द्वादशविधपुत्रा यस्य न सन्त्यसावपुत्रः । तस्य मृतस्य धनं पत्न्यादीनां पूर्वस्य पूर्वस्याभावे उत्तरोत्तरो गृह्णाति । अयं दायग्रहणक्रमः सर्वेषु मूर्धावसिक्तादिष्वनुलोमजेषु वर्णेषु च ब्राह्मणादिषु वेदितव्य इत्यर्थः । पत्नी विवाहादिसंस्कृता नारी । सा प्रथमं पत्युर्धनं गृह्णाति । तदाह बृहस्पतिः—

'कुल्येषु[2] विद्यमानेषु पितृभ्रातृसनाभिषु ।
असुतस्य प्रमीतस्य पत्नी तद्धनहारिणी' ॥

इति । अत्र विशेषमाह वृद्धमनुः—

---

१. D. omits दूरत एव कृत्स्नम्. २. D. reads कुलेषु for कुल्येषु.

'अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च ' ॥

इति । कृत्स्नमंशं जंगमस्थावरात्मकम्[1] । तदयं अपुत्रदाय-ग्रहणक्रमः । द्वादशविधपुत्रशून्यस्य मृतस्य धनं पत्नी गृह्णाति । तथाच प्रजापतिः—

'जङ्गमं स्थावरं हेम कुप्यं धान्यमथाम्बरम् ।
आदाय दापयेच्छ्राद्धं माससंवत्सरादिकम् ' ॥
'पितृव्यगुरुदौहित्रान् भर्तृश्वशुरमातुलान् ।
पूजयेत्कव्यपूर्ताभ्यां वृद्धानप्यतिथींस्तथा ' ॥

इति । तदभावे दुहितरः समानजातीया असमानजातीयाश्च यथाभागं गृह्णीयुः । तथाच बृहस्पतिः—

'भर्तुर्धनहरी पत्नी तां विना दुहिता स्मृता ।
अङ्गादङ्गात्संभवति पुत्रवद्दुहिता नृणाम् ' ॥
'सदृशी सदृशेनोढा साध्वी शुश्रूषणे रता ।
तस्मात्पितृधनं त्वन्यः कथं गृह्णीत मानवः' ॥

इति । ऊढानूढदुहितृसमवाये कात्यायन आह—

'पत्नी पत्युर्धनहरी या स्यादव्यभिचारिणी ।
तदभावे तु दुहिता यद्यनूढा भवेत्तदा[2] ' ॥

---

१. C. and D. omit in their text कृत्स्नमंशं जङ्गमस्थावरात्मकं and the portion from तथाच प्रजापतिः to 'स्तत्पुत्राश्चेति about 70 lines, and for this insert only as follows :—तदभावे दुहिता । तदभावे दौहित्रः । तदभावे माता । तदभावे पिता । तदभावे भ्राता । तदभावे तत्पुत्रः । तदभावे पितामही । तदभावे तद्धनं पितामहो गृह्णाति तत्पुत्रास्तत्पुत्राश्च ।. २. B. reads तथा for तदा.

इति । ऊढास्वपि प्रतिष्ठिताप्रतिष्ठितदुहितृसमवाये अप्रतिष्ठितैव गृह्णाति । तदाह गौतमः—

'स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां च' ।

(गौ. स्मृ. २८. २४.)

इति । न चैतद्गौतमवचनं मातृधनविषयमेवेति मन्तव्यम् । पितृधनेऽप्यस्य समानत्वात् । दुहित्रभावे दौहित्रो धनहारी । तथाच विष्णुः—

'अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः ।
पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रिका मता' ॥

(वि. स्मृ.)

इति । मनुरपि—

† 'अकृता वा कृता वापि यं विन्देत्सदृशात्सुतम् ।
पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम्' ॥

(म. स्मृ. ९. १३६.)

† अकृता वा कृता वेति पुत्रिकाया एव द्वैविध्यम् । तत्र
'यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम्' ।
इत्यभिधाय कन्यादानकाले वरानुमत्या या क्रियते सा कृताभिसंधिमात्रकृता वाग्व्यवहारेण न कृता । तथाच गौतमः—
'अभिसंधिमात्रात्पुत्रिकेत्येकेषाम्' ।

(गौ. स्मृ. २८. १९.)

१. This quotation does not appear in the printed edition of Vishṇu Smriti (See Bibliotheca edition). २. B. reads this verse as :—

अक्षता वा क्षता वापि यं विन्देत्सदृशात्सुतम् ।
पौत्री पितामहस्तेन दद्यात्पिण्डं हरेद्धनम् ॥

३. A. reads सदृशम्.

इति। नच दुहित्रनन्तरं पितराविस्युपादानमनुपपन्नम्। दौहित्रस्य धनहारित्वेन वक्तव्यत्वादिति मन्तव्यम्। दुहितरश्चेति चशब्देन दौहित्रस्य समुच्चयात् दौहित्राभावे पितरौ धनभाजौ। यद्यप्यत्र पित्रोर्धनग्रहणे क्रमो न श्रूयते तथापि पितराविस्यस्य विग्रहवाक्ये मातृशब्दस्य पूर्वनिपातात् प्रत्यासत्त्यतिशयाच्च मातुरेव पूर्वं धनग्रहणं युक्तमिति केचिदाहुः। अपरे त्वपुत्रधनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे पितृगामि तदभावे मातृगामि । इति । वृद्धविष्णुवचनात्--

'अपुत्रस्याथ कुलजा पत्नी दुहितरोपि च।
तदभावे पिता माता भ्राता पुत्रश्च कीर्तिता' ॥

इति। कात्यायनवचनाच्च।

'पितैव पूर्वधनहारीत्याहुः'। 'अत्र यद्युक्तं तद्ग्राह्यम्। पित्रोरभावे भ्रातरो धनभाजः'। तथाच मनुः

'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव चेति'।

(म. स्मृ. ९. १८५.)

इति। अतएव पुत्रिकाधर्मशङ्कयेति प्रागविवाह्यत्वमुक्तम्। पुत्रिकेव कृता अकृता वा पुत्रं समानजातीयाद् वोढुरुत्पादयेत् तेन दौहित्रेण पौत्रकार्यकारणात् पौत्रिकेयवान् मातामहः पौत्री। तथा त्वासौ तस्मै पिण्डं दद्यात्। एतेन पौत्रिकेयविषयमेतद्वचनं इति तात्पर्यम्। गोविन्दराजस्तु अकृता वेत्यपुत्रिकैव दुहिता तत्पुत्रोऽपि मातामहधने पौत्रिकेय इव मातामह्यादिसत्त्वेप्यधिकारी भवतीत्याह। तदयुक्तम्। पुत्रिकायाः पुत्रतुल्यत्वात् अपुत्रिकातत्पुत्रयोरतुल्यत्वेन तत्पुत्रयोस्तुल्यत्वायोग्यत्वादित्यलं पल्लवितेन।

भ्रातृष्वपि सोदर्याः प्रथमं धनभाजः तेषां प्रत्यासन्नत्वात्-अतएव मनुः—

'अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्'[1]

(म. स्मृ. ९. १८७.)

इति । भ्रातॄणामभावे भ्रातृपुत्रा इति पूर्ववदवगन्तव्यम् । भ्रातृभ्रातृपुत्रसमवायेऽपि भ्रातृपुत्राणां धनसंबन्धो नास्ति । भ्रात्रभावे भ्रातृपुत्राणामधिकारश्रवणात् । यदा त्वपुत्रे भ्रातरि मृते तद्भ्रातॄणामविशेषेण धनसंबन्धे प्राप्ते भ्रातृधनविभागात् प्रागेव यदि कश्चिद्भ्राता म्रियेत तत्पुत्राश्च सन्ति तदा तत्पुत्राणां पितृतोऽधिकारे प्राप्ते तेषां भ्रातॄणां च विभागो युक्तः । भ्रातृपुत्राणामभावे गोत्रजा धनं गृह्णन्ति । गोत्रजाश्च पितामही सपिण्डाः समानोदकाश्च अतः प्रथमं पितामही धनं गृह्णाति । यत्तु—

'मातर्यपि च वृत्तायां पितुर्माता धनं हरेत्' ।

(म. स्मृ. ९. २१७.)

इति । मात्रनन्तरं पितामह्या धनग्रहणे प्रापकं वचनम् । तदनपत्यस्य[2] स्वर्यातस्य धनं पत्न्यभिगामि तदभावे मातृगामि तदभावे भ्रातृपुत्रगामि तदभावे सकुल्यगामि तदभावे बन्धुगामि सहाध्यायिगामि तदभावे ब्राह्मणधनवर्जं राजगामि ब्राह्मणधनं ब्राह्मण एव गृह्णीयादिति । तथाच ।

(वि. स्मृ. १७. ४–१३.)

---

१. B. reads सपिण्डं यः for सपिण्डाद्यः. २. This quotation appears in विष्णुस्मृति but some Sûtras are omitted here.

अपुत्रस्याथ कुलजा पत्नी दुहितरोऽपि वा ।
तदभावे पिता माता भ्राता पुत्राश्च कीर्तिता ॥

इत्यादि। क्रमप्रतिपादकबहुवचनविरोधात् पितामह्या धन-संबन्धमात्रप्रापकं न क्रमपरमित्यवगम्यते। पितामह्या अभावे पितामहः पितृव्यास्तत्पुत्राश्च यथाक्रमं धनं गृह्णन्ति। पितामह-सन्तानाभावे प्रपितामही प्रपितामहस्तत्पुत्रास्तत्पुत्राश्चेति सप्तम-पर्यन्तं गोत्रजा धनं गृह्णन्ति। सपिण्डानामभावे समानोदका धनं गृह्णन्ति। समानोदकाश्च सपिण्डानामुपरि सप्त पुरुषाः जन्मनामज्ञानपर्यन्ता वा। तदुक्तं बृहन्मनुना—

'सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ।
समानोदकभावस्तु निवर्तेताचतुर्दशात् ॥
जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यते' ॥

इति। गोत्रजानामभावे बान्धवा धनं गृह्णन्ति बान्धवाश्च त्रिविधा[१] बौधायनेन दर्शिताः—

'आत्मपितृष्वसुः पुत्राः आत्ममातृष्वसुः सुताः ।
आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ॥
पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः ।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥
मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः ।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः' ॥

---

१. C. reads विविधा for त्रिविधा.

इति। बन्धुष्वपि यस्त्वासन्नतरः स एव पूर्वं गृह्णाति। अत एव बृहस्पतिः—

'बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा।
यस्त्वासन्नतरस्तेषां सोऽनपत्यधनं हरेत' ॥

इति। बन्धूनामभावे आचार्यः। आचार्याभावे शिष्यः। तदाह मनुः—

'यो यो ह्यनन्तरः पिण्डात्तस्य तस्य धनं भवेत्।
अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव च' ॥

(म. स्मृ. ९. १८७.)

इति। आपस्तम्बोऽपि—

'सपिण्डाभावे आचार्यः आचार्याभावे अन्तेवासी'—

(आ. ध. २. ६. १४. ३.)

इति। शिष्याभावे सब्रह्मचारी तस्याभावे यः कश्चिच्छ्रोत्रियो गृह्णाति। तदाह गौतमः—

'श्रोत्रिया ब्राह्मणस्यानपत्यस्य ऋक्थं भजेरन्'—

(गौ. स्मृ. २८. ४१.)

इति। तदभावे ब्राह्मणः। तदाह मनुः—

'सर्वेषामप्यभावे तु ब्राह्मणा ऋक्थभागिनः।
त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते' ॥

(म. स्मृ. ९. १८८.)

---

१. The text of मनु reads अनन्तरः सपिण्डाद्यः for यो यो ह्यनन्तरः पिण्डा°. २. B. reads तेषु for तथा.

इति। ब्राह्मणधनं न कदाचिदपि राजगामि। क्षत्रियादिधनं तु सब्रह्मचारिपर्यन्तानामभावे राजगामि। तदुक्तं मनुना—

'अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः।
इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः'॥

(म. स्मृ. ९. १८९.)

इति। नारदेनापि—

'ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन।
ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथा'॥

इति। संग्रहकारेणापि—

'पितर्यविद्यमानेऽपि धनं तत्पितृसन्ततेः।
तस्यामविद्यमानायां तत्पितामहसन्ततेः॥
असत्यामपि तस्यां तु प्रपितामहसन्ततेः।
एवमेवोपरितनां[1] सपिण्डा ऋक्थभागिनः॥
तदभावेऽसपिण्डाः स्युराचार्यः शिष्य एव वा।
सब्रह्मचारी सद्विप्रः पूर्वाभावे परः परः॥
शूद्रस्यैकोदकाभावे राजा धनमवाप्नुयात्।
आचार्यस्याप्यभावे तु तथा क्षत्रियवैश्ययोः'॥

इति। नन्वनपत्यस्य धनं प्रथममेव पत्नी गृह्णातीत्येतदनुपपन्नम्। पत्नीसद्भावेऽपि भ्रातॄणां धनग्रहणस्य पत्नीनां वा भरणमात्रस्य नारदेनोक्तत्वात्—

१. C. and D. read एवमेवोपपत्नीनां for एवमेवोपरितनाम्.

'भ्रातॄणामप्रजाः प्रेयात् कश्चिच्चेत्प्रव्रजेत वा ।
विभजेरन् धनं तस्य शेषास्ते स्त्रीधनं विना ॥
भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात् ।
रक्षन्ति शय्यां भर्तुश्चेदाछिन्द्युरितरासु तत्' ॥

(ना. स्मृ. १३. २५–२६.)

इति । तत्र—

'संसृष्टानां तु यो भागस्तेषामेव स इष्यते' ।

इति प्रक्रम्य "भ्रातॄणामप्रजाः प्रेयात्" इत्यादिवचनस्य पठितत्वेन संसृष्टभ्रातृभार्याणामनपत्यानां भरणमात्रम् संसृष्टभ्रातॄणां च तद्धनहारित्वम्[1] अनेन वचनेन प्रतिपाद्यत इत्यवगमनात् । अथवा 'भ्रातॄणामप्रजाः प्रेयात्' इत्यादिवचनस्य संसृष्टित्वेन

'संसृष्टानां तु यो भागस्तेषामेव स इष्यते ।
अनपत्यांऽशभाग्योऽपि[2] निर्बीजेष्वितरानियात्' ॥

(ना. स्मृ. १३. २४.)

इत्यनेन पौनरुक्त्यप्रसङ्गात् । अथ वा अविभक्तविषयत्वमस्तु याज्ञवल्क्यवचनं तु विभक्तस्यासंसृष्टिनो भर्तुर्धनं पत्न्येव प्रथमं गृह्णातीत्येवंपरमित्यविरोधः । यत्तु मनुनोक्तम्—

'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा' ।

(म. स्मृ. ९. १८५.)

इति । यदपि कात्यायनेनोक्तम्—

---

१. D. reads धनग्रहणम् for तद्धनहारित्वम् and omits the portion up to इत्यादि वचनस्य संसृष्टित्वेन. २. D. reads अनपत्यांशभागो हि.

'विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत्।
भ्राता वा जननी वाऽथ माता वा तत्पितुः क्रमात्' ॥

इति। मनुवचनं तावत् न क्रमप्रतिपादनपरम् भ्रातर एव वेति विकल्पश्रवणात्। कात्यायनवचनं तु पत्न्यां व्यभिचारिण्यां पित्रादेरनपत्यधनग्राहित्वप्रतिपादनपरम्।

'भर्तुर्धनहरी पत्नी या स्यादव्यभिचारिणी।
अपचारक्रियायुक्ता निर्लज्जा वार्थनाशिका ॥
व्यभिचाररता या च स्त्री धनं सा न चार्हति'।

इति तेनैवोक्तत्वात्। धनं जीवनायोपक्लृप्तं क्षेत्रांशं नार्हतीत्यर्थः। धारेश्वरस्तु अनपत्यधनं पत्नी गृह्णातीत्येवमादिवचनजातस्य प्रकारान्तरेण विषयव्यवस्थामाह। नियोगार्थिनी पत्नी अनपत्यस्य विभक्तस्य पत्युर्धनं गृह्णाति। तथा च मनुः—

'धनं यो बिभृयाद्भ्रातुर्मृतस्य स्त्रियमेव वा।
सोऽपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनम्।
कनीयाञ् ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि।
समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः' ॥

(म. स्मृ. ९. १४६, १२०).

इति। विभक्तधने भ्रातरि मृते अपत्यद्वारेणैव पत्न्या धनसंबन्धः। नान्यथा। अविभक्तधनेऽपि तथेत्यभिप्रायः। गौतमोऽपि—

१. C. reads धीरेश्वरस्तु for धारेश्वरस्तु. २. C. and D. read °संजातस्य for °जातस्य.

'पिण्डगोत्रर्षिसंबन्धा ऋक्थं भजेरन् स्त्री चानपत्यस्य। बीजं वा लिप्सेत'

(गौ. स्मृ. २८. २१-२२.)

इति। अयमर्थः—अनपत्यस्य ऋक्थं पिण्डगोत्रऋषिसंबन्धा भजेरन् स्त्री वा यदि बीजं लिप्स्यते॥

इति। संग्रहकारोऽपि—

'भ्रातृषु प्रविभक्तेषु संसृष्टेष्वप्यसत्सु वा।
गुर्वादेशनियोगस्था पत्नी धनमवाप्नुयात्'॥

इति। तदनुपपन्नं पत्नी दुहितर इत्यत्र नियोगाश्रवणात्। अश्रुतोऽपि नियोगो गौतमादिवचनबलात्कल्प्यते इति युक्तमिति चेत्। तन्न। गौतमादिवचनानामर्थान्तरपरत्वात्[1]। तथा हि। तत्र यद्गौतमवचनं—

'पिण्डगोत्रर्षिसंबन्धा ऋक्थं भजेरन् स्त्री चानपत्यस्य। बीजं वा लिप्सेत'—

(गौ. स्मृ. २८. २१-२२.)

इति। तस्य नायमर्थः यदि बीजं लिप्सेत तदा पत्नी अनपत्यधनं गृह्णातीति। अपि तर्ह्यनपत्यस्य धनं पिण्डगोत्रर्षिसंबन्धा गृह्णीयुः। स्त्री[2] वा गृह्णीयात्। सा स्त्री बीजं वा लिप्सेत सयंता वा भवेदिति। वाशब्दस्य पक्षान्तरवचनत्वेन यद्यर्थे प्रयोगाभावात्। यदपि धनं यो

१. B. reads °विषयत्वात् for °परत्वात्. २. D. substitutes जाया न for स्त्री वा ह्णायात.

विभृयादित्यादि मनुवचनं तदपि क्षेत्रजस्यैव धनसंबन्धं वक्ति न पत्न्या इति । संग्रहवचनमपि[1] संयताया एव धन-संबन्धं वक्ति न तु देवरादिनियुक्तायाः ।
अन्यथा—

'अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च' ॥

इति । तथा—

'अपुत्रा शयनं भर्तुः पालयन्ती गुरौ[2] स्थिता ।
भुञ्जीतामरणात्क्षान्ता दायादा ऊर्ध्वमाप्नुयुः' ॥

इति मनुकात्यायनवचनविरोधप्रसङ्गात् । तस्मा-दनपत्यस्य विभक्तस्यासंसृष्टिनो मृतस्य धनं पत्नी गृह्णाती-त्येषैव व्यवस्था ज्यायसी । यत्तु स्त्रीणां धनसंबन्धाभावप्रति-पादकवचनम्—

'यज्ञार्थं द्रव्यमुत्पन्नं तत्रानधिकृतास्तु ये ।
अरिक्थभाजस्ते[3] सर्वे ग्रासाच्छादनभाजनाः ॥
यज्ञार्थं विहितं वित्तं तस्मात्तद्विनियोजयेत् ।
स्थानेषु धर्मजुष्टेषु[4] न स्त्रीमूर्खविधर्मिषु' ॥

इति । तद्यज्ञार्थमेव संपादितधनविषयम् । यदपि का-त्यायनेनोक्तम्—

---

१. C. reads संरब्धवचनम् and D. शंखवचनम् for संग्रहवचनम्. २. D. reads व्रते for गुरौ. ३. D. and C. read तद्रिक्थभाजः for अरिक्थभाजः. ४. D. reads स्वेषु for धर्म.

' अदायिकं राजगामि योषिद्भृत्यौर्ध्वदेहिकम् ।
[1]अपास्य श्रोत्रियद्रव्यं श्रोत्रियेभ्यस्तदर्पयेत् ' ॥

इति । अय[2]मर्थः—स्त्रीणामशनाच्छादनोपयुक्तं धनिन[3]ः श्राद्धाद्युपयुक्तं च मुक्त्वा [4]अदायिकधनं राजगामि भवति । श्रोत्रियद्रव्यं तु योषिद्[5]भृत्यौर्ध्वदैहिकमपास्य श्रोत्रियस्य न राज्ञ इत्यर्थः । यदपि नारदेनोक्तम्—

' अन्यत्र ब्राह्मणात्किंचिद्राजा धर्मपरायणः ।
तत्स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृतः ' ॥

(ना. स्मृ. १३. ५२.)

इति । तदुभयमप्यवरुद्धस्त्रीविषयं पत्नीशब्द[6]श्रवणात् । यदपि च[7] हारीतेनोक्तम्—

' विधवा यौवनस्था चेत्पत्नी भवति कर्कशा ।
आयुषो रक्षणार्थं तु दातव्यं जीवनं तदा ' ॥

इति । तदपि शङ्कितव्यभिचारस्त्रीविषयम् । यदपि प्रजापतिवचनम्—

' आढकं भर्तृहीनायाः दद्यादामरणान्तिक[8]म् ' ॥

---

१. A. reads आदाय for अपास्य. २. A. reads अर्पणम् for अयमर्थः and omits स्त्रीणाम् while B. for the same reads आमयणम् for अयमर्थः omitting the word स्त्रीणाम्. ३. A. reads धनम् for धनिनः. ४. B. reads अदायि वान्यत् for अदायिकमन्यत् and substitutes the word भुक्त्वा for मुक्त्वा. ५. A. reads °वृत्यौर्ध्वदैहिकम् for °भृत्यौर्ध्वदैहिकम्. ६. A. reads °शब्दश्रवणात् while B. reads अविरुद्ध° for अवरुद्ध°. ७. D. omits च. ८. C. and D. read आमरणात् स्त्रियाः for आमरणान्तिकम्.

इति । यदपि स्मृत्यन्तरे[1]—

'अन्नार्थं तण्डुलप्रस्थमपराह्णे तु सेन्धनम्' ।

इति । तदेतद्वचनद्वयं हारीतवचनेन समानार्थम् । या च श्रुतिः ।

'तस्मात्स्त्रियो निरिन्द्रिया अदायादाः[2]' ।

इति । सा पत्नीव[3]तग्रहे तत्पत्न्या अंशो नास्तीत्येवंपरा । इन्द्रियशब्दस्य 'इन्द्रियं वै सोमपीथः' इति सोमे प्रयोगदर्शनात् । यत्तु पत्न्याः स्थावरग्रहणनिषेधकं बृहस्पतिवचनम्—

'यद्विभक्ते[4] धने किंचिदाध्यादिविधिसंस्मृतम् ।
तज्जाया स्थावरं मुक्त्वा लभेत गतभर्तृका' ॥

इति । तदितरदायादानुमतिमन्तरेण स्थावरविक्रयनिषेधपरम् । अन्यथा—

'जङ्गमं स्थावरं हेम रूप्यं धान्यरसाम्बरम्[5] ।
आदाय दापयेच्छ्राद्धं माससंवत्सरादिकम् ।
पितृव्यगुरुदौहित्रान् भर्तृ[6]स्वस्रीयमातुलान् ।
पूजयेत्कव्यपूर्ताभ्यां वृद्धानाथातिथींस्तथा[7]' ॥

इति । अनेन विरोधप्रसङ्गात् । संसृष्टिनां विभाग[8]प्रकारमाह मनुः—

१. C. B. and D. read स्मृत्यन्तरम्. २. B. and C. read अदाया-हाः and D. अदायादीः. ३. B. C. and D. read सपत्नीव for सा पत्नीव. ४. B. reads विभक्तं धनम् for विभक्ते धने while C. reads संभृतम् for संस्मृतम्. ५. B. and C. read रसान्तरम् for रसाम्बरम्. ६. B. and D. read भर्तुः° for भर्तृ°. ७. A. and B. read वृद्धानप्यतिथीन् for वृद्धानाथातिथीन्. ८. D. reads संसृष्टिविभाग° for संसृष्टिनां विभाग°.

'विभक्ताः सह जीवन्तो विभजेरन् पुनर्यदि ।
समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते' ।
(म. स्मृ. ९-२१०.)

इति । समानविभागविधानादेव विषमविभागनिराकरणसिद्धेः ज्यैष्ठ्यं तत्र न विद्यते इति पुनर्विषमविभागनिराकरणं विषमधनेन[१] संसृष्टानां धनानुसारेण विषमविभागप्राप्त्यर्थम् । संसर्गः कैरित्यपेक्षिते बृहस्पतिः—

'विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र[२] संस्थितः ।
पितृव्येणाथवा प्रीत्या तत्संसृष्टः स उच्यते' ॥

इति । यः पूर्वं पित्रादिना विभक्तः पुत्रादिः पुनः प्रीत्या तेन सह[३] समापन्नः स संसृष्ट उच्यते । येन[४] केनापि सहवाससमापन्न इत्यर्थः । क्वचित्संसृष्टिनां विषमविभागकारण[५]माह बृहस्पतिः—

'संसृष्टानां तु यः कश्चिद्विद्याशौर्यादिनाधिकम् ।
प्राप्नोति तत्र दातव्यो व्द्यंशः शेषाः समांशिनः' ॥

इति । विद्यादिना प्राप्ते अधिके धने अंशद्वयं दातव्यं न सर्वस्मिन्निति । एतत्संसृष्टद्रव्यानुपरोधेनार्जितेऽपि विभाज्यत्वप्राप्त्यर्थम् । अपुत्रस्य संसृष्टिनः ऋक्थग्राहिणं दर्शयति याज्ञवल्क्यः—

---

१. C. reads अधनेन for विषमधनेन. २. A. in marginal reading substitutes वा for च. ३. B. C. and D. read सहवासमापन्नः for सह. समापन्नः. ४. D. adds न before येन. ५. A. B. and C. omit °कारण° while D. substitutes पुनः for क्वचित् and omits संसृष्टिनाम्.

'संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः।
दद्याच्चापहरेच्चांशं जातस्य च मृतस्य च'॥
(या. स्मृ. २. १३८.)

इति। अयमर्थः। संसृष्टिनो मृतस्यांशं विभागकालेऽविज्ञातगर्भायां भार्यायां पश्चादुत्पन्नस्य पुत्रस्य इतरः संसृष्टी दद्यात् पुत्राभावे संसृष्ट्येवापहरेत्। न पत्न्यादिः। पत्नीनामप्रत्तदुहितॄणां च भरणमात्रम्। तदाह नारदः —

'भरणं चास्य कुर्वीरन् स्त्रीणामा जीवनक्षयात्।
रक्षन्ति शय्यां भर्तुश्चेदाछिन्द्युरितरासु तत्॥
यदा दुहितरस्तस्याः[1] पित्र्योऽंशो भरणे मतः।
आ संस्काराद्धरेद्भागं परतो बिभृयात्पतिः'॥
(ना. स्मृ. १३. २६–२७.)

इति। सोदरस्य तु सोदर इति सोदरस्य संसृष्टिनो मृतस्यांशं[2] सोदरः संसृष्टिपश्चादुत्पन्नस्य पुत्रस्य दद्यात्। तदभावे स्वयमेवापहरेत् न भिन्नोदरः। संसृष्टीति पूर्वोक्तस्यापवादः। संसृष्टिनो भिन्नोदरस्य सोदरस्यासंसृष्टिनः सद्भावे उभयोरपि विभज्य धनग्रहणमित्याह स एव —

'अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत्।
असंसृष्ट्यपि वादद्यात्संसृष्टो[3] नान्यमातृजः'।
(या. स्मृ. २. १३९.)

इति। सापत्नभ्राता संसृष्टो[4] अन्योदर्यधनं हरेत् न

---

१. B. C. and D. read तु दुहिता तस्याः for दुहितरस्तस्याः. २ A. reads संसृष्टिनः तस्यांशम् for संसृष्टिनो (S.) मृतस्यांशम्. ३. B. C. and D. read सोदरो for संसृष्टो. ४. B. C. and D. omit संसृष्टो.

त्वसंसृष्टी । असंसृष्टयपि सोदरः सोदरस्य धनमाददीत । न पुनरन्योदर्यः संसृष्टयेव । अतएव मनुः —

येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः ।
म्रियेतान्यतरो[1] वाऽपि तस्य भागो न लुप्यते ।
सोदर्या विभजेयुस्तं समेत्य सहिताः समम् ।
भ्रातरो ये च संसृष्टा भगिन्यश्च[2] सनाभयः' ॥

(म. स्मृ. ९. २११–२१२.)

इति । अयमर्थः । येषां संसृष्टिनां भिन्नोदराणां भ्रातॄणां मध्ये यः[3] कोऽपि ज्येष्ठः कनिष्ठो मध्यमो वा विभागकाले देशान्तरगमनादिना स्वांशाद्धीयेत तस्य भागो न लुप्यते– पृथगुद्धरणीयः । न संसृष्टिन एव गृह्णीयुः । किन्तु तमुद्धृतं भागमसंसृष्टिनः सोदराः संसृष्टिनश्च भिन्नोदराः सनाभयो भगिन्यश्च देशान्तरगता अपि समागम्य संभूय न्यूनाधिकभावमन्तरेण विभजेयुः । अन्ये मन्यन्ते ।

'असंसृष्ट्यपि वा[4] दद्यात्संसृष्टो नान्यमातृजः' ।

(या. स्मृ. २. १३९.)

इत्यस्यायमर्थः । यत्र संसृष्टा भिन्नोदराः असंसृष्टाश्च सोदराः तत्रासंसृष्टा[5] अपि सोदरा एव धनं गृह्णीयुः न तु

१. D. originally reads अन्यः परो and corrects अन्यतरो, while C. reads युज्यते for लुप्यते. २. D. reads भगिन्याः for भगिन्यः. ३. A. and D. omit यः while B. reads यः after कोऽपि. ४. B. and C. read चा for वा and substitute सोदरो for संसृष्टो. ५. B. and D. read असंसृष्टा for संसृष्टाः.

भिन्नोदराः संसृष्टा अपीति । यत्तु 'येषां ज्येष्ठ' इत्यादिमनुवचनं संसृष्टानां भिन्नोदराणामसंसृष्टानामेकोदराणां च सर्वेषां धनग्रहणप्रतिपादकम् । तज्जङ्गमस्थावरात्मकोभयद्रव्यसद्भावविषयम् । अतएव प्रजापतिः—

'अन्तर्धनं तु यद्द्रव्यं संसृष्टानां च तद्भवेत् ।
भूमिं गृहं त्वसंसृष्टाः प्रगृह्णीयुर्यथांशतः' ॥

इति । अयमर्थः । संसृष्टानां भिन्नोदरभ्रातॄणामन्तर्धनं गूढधनं द्रव्यं वा जङ्गमात्मकं यथांऽशतो भवेत् । सोदराणामसंसृष्टानां गृहक्षेत्रादिकं स्थावररूपं यथांऽशतो भवेत् । इति । याज्ञवल्क्यवचनं तु जङ्गमस्थावरयोरन्यतरसद्भावविषयमिति । तत्र यद्युक्तं तद्ग्राह्यम् ।

यदा तु संसृष्टभिन्नोदराभावः तदा पिता पितृव्यो वा यः संसृष्टः स एव गृह्णीयात् । तथा च गौतमः ।

'संसृष्टिनि प्रेते संसृष्टो ऋक्थभाक्'—इति ।

(गौ. स्मृ. २८. २८.)

यदा पिता पितृव्यो वा संसृष्टो न विद्यते तदा त्वसंसृष्टभिन्नोदरो भ्राता गृह्णीयात् । तदभावे त्वसंसृष्टपिता । तदभावे माता । तदभावे पत्नी । तदाह शङ्खः—

'स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि द्रव्यं तदभावे पितरौ हरेयातां तदभावे त्वसंसृष्टः पिता तदभावे माता तदभावे ज्येष्ठा पत्नी' । इति ।

---

१. D. reads तेषां for येषाम्. २. B. and D. read च for तु. ३. B. C. D. substitute च for तु. ४. A. reads संभव° for °सद्भाव°.

ज्येष्ठा गुणज्येष्ठा संमता न तु पूर्वोढा । संसृष्टभ्रातृपुत्राणां पत्न्याश्च समवाये धनग्रहणप्रकारमाह नारदः—

'मृते पत्यौ तु भार्यास्स्युर्भ्रातृपितृमातृकाः ।
सर्वे सपिण्डाः स्वधनं विभजेयुर्यथांशतः' ॥

इति । पत्युः भ्रातृपितृमातृभावविशिष्टा अभ्रातृपितृमातृभार्याः सर्वे सपिण्डाः भ्रातृपुत्रादयः । तत्र भ्रातृपुत्राणां स्वपित्रंशतः भार्याणां भर्त्रंशतः संसृष्टधनस्य विभाग इत्यर्थः । पत्नीनामभावे संसृष्टपुत्रांशं तद्भ्रातृभगिनी गृह्णाति । तथा च बृहस्पतिः—

'या तस्य भगिनी सा तु ततोऽंशं लब्धुमर्हति ।
अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च' ॥

इति । चशब्दो भ्रातृमातृभावसमुच्चयार्थः । केचित्तु
'या तस्य दुहिता'

इति पठित्वा पत्नीनामभावे दुहिता गृह्णीतेत्याहुः । दुहितृभगिन्योरभावे—

'अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्' ।

---

१. A. omits गुणज्येष्ठा and reads संयता for संमता. २. A. reads °स्तु स्वभ्रातृ° for °स्युरभ्रातृ°. ३. A. and C. read पत्नी for पत्युः. ४. B. C. and D. do not insert the word °भ्रातृ° while A. originally does not add भ्रातृ but it appears in correction.

इति । उक्तप्रत्यासत्तिक्रमेण सर्वे सपिण्डादयो धनं गृह्णीयुः । प्रतिपक्षे दोषाणामभावात् । अत एव बृहस्पतिः—

'मृतोऽनपत्योऽभार्यश्चेदभ्रातृपितृमातृकः ।
सर्वे सपिण्डास्तद्दायं विभजेयुर्यथांशतः' ॥

इति । वानप्रस्थयतिनैष्ठिकब्रह्मचारिणां धनं को वा गृह्णातीत्यपेक्षिते आह याज्ञवल्क्यः—

'वानप्रस्थयतिब्रह्मचारिणां ऋक्थभागिनः ।
क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः' ॥

(या. स्मृ. २. १३७.)

इति । अत्र प्रातिलोम्यक्रमेण नैष्ठिकब्रह्मचारिणां धनं आचार्यो गृह्णाति न पित्रादिः । उपकुर्वाणकस्य धनं पित्रादय एव गृह्णन्ति । यतेस्तु धनमध्यात्मशास्त्रश्रवणधारणतदनुष्ठानक्षमः सच्छिष्यो गृह्णाति । दुर्वृत्तस्य भागानर्हत्वात् । वानप्रस्थस्य धनं धर्मभ्रात्रेकतीर्थी गृह्णाति । धर्मभ्राता समानाचार्यकः । एकतीर्थी एकाश्रमी । धर्मभ्राता चासावेकतीर्थी च धर्मभ्रात्रेकतीर्थी ।

---

१. D. reads प्रतिपक्षोक्तानां for प्रतिपक्षे दोषाणाम्. २. B. C. and D. read विभजेरन् for विभजेयुः. ३. B. and C. read के च and D. के वा for को वा. ४. C. and D. also A. drop °क°. ५. B. and C. do not insert एव. ६. D. reads °धारणानुष्ठान° for धारणतदनुष्ठान. ७. A. reads वानप्रस्थधनं for वानप्रस्थस्य धनं. ८. C. and D. read °भ्रात्रेक° for भ्रात्रैक.

अथवा । वानप्रस्थयतिब्रह्मचारिणां धनमाचार्यसच्छिष्य-धर्मभ्रात्रेकतीर्थिनः क्रमेणैव गृह्णन्ति । पूर्वपूर्वा[1]भावे उत्तरोत्तरो गृह्णातीत्यर्थः । यत्तु वसिष्ठेनोक्तम्—

'अनंशा[2]स्त्वाश्रमान्तरगताः' ।

(व. स्मृ. १७. ५२.)

इति । तदन्याश्रमिणामन्याश्रमिधनग्रहणनिषेधपरम् । न तु समानाश्रमिणां परस्परऋक्थग्रहणनिषेधपरम् ।

नन्वेतेषां धनसंबन्ध एव नास्ति कुतस्तद्विभागः । प्रतिग्रहादेर्धनार्जनोपायस्य निषिद्धत्वात् ।

'अनर्थ[3]निचयो भिक्षुः' ।

(गौ. स्मृ. ३. ११.)

इति गौतमस्मरणाच्च । तत्र—

'अह्नो मासस्य षण्णां वा तथा संवत्सरस्य च ।
अर्थस्य निचयं कुर्यात्कृतमाश्वयुजे त्यजेत्' ॥

इति । वानप्रस्थस्य धनसंयोगोऽस्ति ।

'कौपीनाच्छादनार्थं तु वासोऽपि बिभृयाद्यतिः ।
योगसंभारभेदांश्च गृह्णीयात्पादुके तथा' ॥

इत्येवं[4]मादिवचनाद्यतेरपि वस्त्रपुस्तकादिकं विद्यत एव ।—

---

१. B. C. and D. read पूर्वस्य पूर्वस्य. २. D. originally reads अन्यांशाः and in margin reads अनंशाः. ३. B. C. and D. read अनिचयीं for अनर्थनिचयीं. ४. A. reads इति वचनात् and B. and C. इत्यादिवचनात् for इत्येवमादिवचनात्.

नैष्ठिकस्यापि शरीरयात्रार्थं वस्त्रादि[1]परिग्रहोऽस्त्येवेति तद्विभागो घटत एव। दाया[2]नर्हानाह मनुः—

'अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः'॥

(म. स्मृ. ९. २०१.)

इति। निरिन्द्रियाः व्याधिनः विकलेन्द्रियाः। नारदोऽपि—

'पितृद्विट् पतितः षण्ढो यश्च स्यादौपपाति[3]कः।
औरसा अपि नैतेंऽशं लभेरन् क्षेत्रजाः कुतः'॥

(ना. स्मृ. १३. २१.)

इति। वसिष्ठोऽपि—

'अनंशास्त्वाश्रमान्तरगताः'।

(व. स्मृ. १७. ५२.)

इति। याज्ञवल्क्यः—

'क्लीबोऽ[4]थ पतितस्तज्जः पङ्गुरुन्मत्तको जडः।
अन्धोऽचिकित्स्यरोगा[5]द्या भर्तव्याः स्युर्निरंशकाः'॥

(या. स्मृ. २. १४०.)

इति। तज्जः पतितोत्पन्नः। आदिशब्देन मूकादयो गृह्यन्ते। एते निरंश[6]काः ऋक्थभाजो न भवन्ति। केवलम-

---

१. A. does not insert °आदि°. २. A. reads दायादानर्हा° for दायानर्हा°. ३. A. reads °पातिकः. ४. B. C. and D. read क्लीबोऽन्धः for क्लीबोऽथ, while B. and C. स्तब्धः for तज्जः. ५. B. and C. read °रोगार्ताः for °रोगाद्याः. ६. C. and D. read निरंशाः for निरंशकाः.

शनाच्छादनदानेन भर्तव्याः पोषणीयाः । अभरणे तु प्रत्यवाय-
माह मनुः--

' सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा ।
ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत् ' ॥
(म. स्मृ. ९. २०२.)

इति । अत्यन्तं यावज्जीवमित्यर्थः । पतितस्य भर्तव्यत्वा-
मपि नास्तीत्याह देवलः--

' तेषां पतितवर्ज्येभ्यो भक्तं वस्त्रं प्रदीयते ' ।

इति । पतितशब्देन तज्जातोऽप्युपलक्ष्यते । ' पतितं-
तज्जवर्ज्यं बिभृयुः' इति बौधायनस्मरणात् । आश्रमान्तरगता
अपि ते भर्तव्याः । अतएव वसिष्ठः ।

' अनंशास्त्वाश्रमान्तरगताः ।
क्लीबोन्मत्तपतिताश्च भरणं क्लीबोन्मत्तानाम् ' ॥
(व. स्मृ. १७. ५२-५४.)

इति । अंशानर्हाणां पुत्रास्त्वंशभाजः । तदाह देवलः--

तत्पुत्राः पितृदायांशं लभेरन् दोषवर्जिताः ।

इति । निरंशकानां पुत्रा औरसाः क्षेत्रजाश्च क्लैब्यादिदोष-
वर्जिता भागहारिणो न दत्तकादयः । अत एव याज्ञवल्क्यः
परिसंचष्टे--

---

१. D. substitutes the word अन्न for अशन while A. omits °दानेन and reads अशनाच्छादनेन. २. D. originally reads अकरणे and in margin अभरणे. ३. A. reads मनीषिणः. ४. B. and C. read भर्तव्यमपि and D. भर्तव्यत्वमपि. ५. A. and C. read भुक्तं and B. reads भक्तं but substitutes वस्तु for वस्त्रं. ६. A. omits this quotation and इति बौधायनस्मरणात् ।

'औरसाः क्षेत्रजास्तेषां निर्दोषा भागहारिणः'।

इति। निरंशकानां दुहितरो यावद्विवाहं भर्तव्याः संस्कर्तव्याश्च पत्न्यश्च साधुवृत्तयो यावज्जीवं भर्तव्याः। तथाच स एव-

'सुताश्चैषां च[1] भर्तव्या यावद्वै भर्तृसात्कृताः[2]॥
अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः[3]।
निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च'॥

(या. स्मृ. २. १४१-१४२.)

इति। अन्यानपि भागानर्हान् दर्शयति कात्यायनः[4]—

'अक्रमोढासुतश्चैव सगोत्राद्यश्च जायते।
प्रव्रज्यावसितश्चैव न रक्थं तेषु चार्हति'॥

इति। मनुरपि—

'अनियुक्तासुतश्चैव पुत्रिण्याप्तश्च देवरात्।
उभौ तौ नार्हतो भागं जारजातककामजौ'॥

(म. स्मृ. ९. १४३.)

इति। स्त्रीधनविभागमाह याज्ञवल्क्यः—

'पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्[5]।
आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितम्॥

१. A. omits च. B. and C. substitute तु for च while D. प्र° for the same. २. B. and C. read °संस्कृताः. ३. B. and C. read सानुवृत्तयः for साधुवृत्तयः. ४. B. reads याज्ञवल्क्यः for कात्यायनः but the following quoted verse does not occur in the texts of याज्ञवल्क्य. ५. A. reads पितृदत्तं भ्रातृमातृदत्तम् for पितृमातृपतिभ्रातृदत्तम्.

बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च ।
अप्रजायामतीतायां बान्धवास्तदवाप्नुयुः' ॥

(या. स्मृ. २. १४३–१४४.)

इति । अध्यग्न्युपागतं विवाहकालेऽग्निसंनिधौ मातुलादिभिर्दत्तम् । तथा च कात्यायनः—

'विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसंनिधौ ।
तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितम्' ॥

इति । आधिवेदनिकमधिवेदननिमित्तमधिविन्नस्त्रियै दत्तम् । आद्यशब्देन अध्यावाहनिकऋक्थक्रयादिप्राप्तं च ।
तथाच मनुः—

'अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि ।
भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्' ॥

(म. स्मृ. ९. १९४.)

इति । षड्विधमिति न्यूनसङ्ख्याव्यवच्छेदार्थम् । नाधिकसङ्ख्याव्यवच्छेदाय । अध्यावाहनिकप्रीतिदत्तयोः स्वरूपं कात्यायनेनोक्तम्—

यत्पुनर्लभते नारी नीयमाना पितुर्गृहात् ।

---

७. B. and C. read अतीतायामप्रजसि for अप्रजायामतीतायाम्. ८. B. reads अध्यग्न्युपावहम् for अध्यग्न्युपागतम्. ९. B. C. and D. read अध्यावहनिकम् for अध्यावाहनिकम् and omit च. १०. B. and C. read तु पैतृकात् for पितुर्गृहात्.

अध्यावाहनिकं नाम स्त्रीधनं तदुदाहृतम्[1] ।
प्रीत्या दत्तं तु[2] यत्किंचित् श्वश्र्वा वा श्वशुरेण वा ।
पादवन्दनिकं[3] चैव प्रीतिदत्तं तदुच्यते' ॥

इति । बन्धुदत्तं कन्याया मातृपितृभिर्दत्तम् । शुल्कं यद्गृहीत्वा कन्या दीयते । अन्वाधेयकं[4] परिणयनादनु पश्चाद्दत्तम् । तदुक्तं कात्यायनेन:—

'गृहोपस्करवाह्यानां दोह्याभरणकर्मिणाम्[5] ।
मूल्यं लब्धं तु यत्किंचित् शुल्कं तत्परिकीर्तितम् ॥
विवाहात्परतो यत्तु लब्धं भर्तुः कुलात्स्त्रिया ।
अन्वाधेयं तु तद्द्रव्यं लब्धं पितृकुलात्तथा' ॥

इति । पित्रादिभिः स्त्रीभ्यो धनदाने विशेषमाह कात्यायनः—
'पितृमातृपतिभ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै ।
यथाशक्त्या द्विसाहस्राद्[6] दातव्यं स्थावरादृते' ।

इति । यथाशक्ति स्थावरव्यतिरिक्तं धनं द्विसहस्र-कार्षापणपर्यन्तं दातव्यमित्यर्थः । अयं च नियमः प्रत्यब्दा दाने वेदितव्यः । अनेकाब्देषु तूपजीवनार्थं सकृदेव दाने नायमवधिनियमः । नापि स्थावरपर्युदासः । तथा[7] च बृहस्पतिः—

---

१. B. reads तत्स्त्रीधनमुदाहृतम्. २. A. substitutes च for तु and reads अन्येन for श्वश्र्वा. ३. A. reads अधिवेदनिकम् for पादवन्दनिकम्. ४. B. C. and D. read °अन्वाधेयिकम् for अन्वाधेयकम्. ५. D. originally reads कर्मिणाम् but corrects °कर्मणाम्. ६. A. reads °साहस्रम् for साहस्राद्. ७. तथाच बृहस्पतिः—'दद्याद्धनं च पर्याप्तं क्षेत्रांशं वा यदिच्छति is omitted by B. C. and D.

'दद्याद्धनं च पर्याप्तं क्षेत्रांशं वा यदिच्छति' ।

इति । अत एव सौदायिके स्थावरेऽपि यथेष्टविनियोगार्हत्वमुक्तं तेनैव—

'ऊढया कन्यया वापि भर्तुः पितृगृहेऽपि वा ।
भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतम् ॥
सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते ।
यस्मात्तदानृशंस्यार्थं तैर्दत्तम्[1]उपजीवनम् ।
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि' ।

इति । पतिदत्तस्थावरे तु[2] विशेषमाह नारदः—

'भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्[3] ।
सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते' ।

इति । पित्रादिभिरुपाध्यादिना दत्तं स्त्रीधनं न भवतीत्याह कात्यायनः—

'तत्र सोपाधि यद्दत्तं यच्च योगवशेन वा ।
पित्रा भ्रात्राथवा पत्या न तत्स्त्रीधनमिष्यते' ।

इति । उत्सवादौ धारणार्थं दत्तमलंकारादिकं सोपाधिदत्तम्[4] । योगवशेन वञ्चनादिना[5]इत्यर्थः । शिल्पादि[6]प्राप्तमपि स्त्रीधनं न भवतीत्याह स एव—

---

१. A. reads तदैतत् for तैर्दत्तम्. २. A. reads अपि for तु and C. and D. read °षु for the same. ३. A. substitutes च and B. यत् for तत्. ४. D. reads सोपाधिना दत्तम् for सोपाधिदत्तम्. ५. A. reads वचनादिना for वञ्चनादिना. ६. B. and C. read wrongly शिक्यादि° for शिल्पादि°.

'प्राप्तं शिल्पैस्तु यद्वित्तं प्रीत्या[1] चैव यदन्यतः।
भर्तुः स्वाम्यं तदा तत्र शेषं तु स्त्रीधनं स्मृतम्'।

इति। अन्यतः सख्यादित इति यावत्। तदेतत्स्त्रीधनं दुहितृदौहित्र[2]तद्दुहितृपुत्ररहितायां स्त्रियामतीतायां बान्धवा भर्त्रादयो गृह्णन्ति। अत्रैवं क्रमः। मातरि वृत्तायां[3] प्रथमं दुहिता गृह्णाति। अत एवोक्तम् याज्ञवल्क्येन[4]—

'मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः'।

(या. स्मृ. २. ११७.)

इति। गौतमोऽपि—

'स्त्रीधनं दुहितॄणां अप्रत्तानां अप्रतिष्ठितानां च'

(गौ. स्मृ. २८. २४.)

इति। दुहितॄणामभावे दुहितुर्दुहितरो गृह्णन्ति। तद्दुहितॄणां प्रसूता चेदिति याज्ञवल्क्यस्मरणात्—

'भिन्नमातृकाणां दौहित्राणां विषमाणां समवाये मातृतो भागकल्पना॥

तथाच गौतमः—

'पितृमातृष्वसृवर्गे भागविशेषः'।

(गौ. स्मृ. २८. १७.)

इति। दुहितृदौहित्रीणां समवाये मनुः—

---

१. B. and C. read प्राप्तम् for प्रीत्या. २. B. and C. read दुहितृदौहित्र-दौहित्रपुत्र° and D. originally दुहितृपुत्र° and in the margin दुहितृदौहित्र-तद्दुहित्रपुत्र° for दुहित्रदौहित्रपुत्र°. ३. B. C. and D. read प्रेतायाम् for वृत्तायाम्. ४. B. C. and D. read तेनैव for याज्ञवल्क्येन but it seems incorrect.

' यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः ।
मातामह्या धनात्किंचित्प्रदेयं प्रीतिपूर्वकम् ' ॥

(म. स्मृ. ९. १९३.)

इति । दौहित्रीणामप्यभावे दौहित्रा धनहारिणः । तथाच नारदः—

' मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः ' ।

(ना. स्मृ. १३. २.)

इति । दुहितृदुहितॄणामभावे तदन्वयो दौहित्रो गृह्णातीत्यर्थः । दौहित्राणामभावे तु—

' विभजेरन् सुताः पित्रोरूर्ध्वं ऋक्थमृणं समम् ' ।

(या. स्मृ. २. ११७.)

इत्यादियाज्ञवल्क्यवचनतः मातृऋणापाकरणतोऽवशिष्टं मातृधनं पुत्रा गृह्णन्ति । यत्तु मनुनोक्तम्—

' जनन्यां संस्थितायां तु समं सर्वे सहोदराः ।
भजेरन् मातृकं ऋक्थं भगिन्यश्च सनाभयः ' ॥

(म. स्मृ. ९. १९२.)

इति । एतत् पुत्राणां दुहितॄणां च संभूय मातृऋक्थग्राहित्वपरं न भवति । किंतु तेषां धनसंबन्धे प्राप्ते समविभागप्राप्त्यर्थं समशब्दश्रवणात् । यदपि शङ्खलिखिताभ्यामुक्तम्—

' समं सर्वे सहोदरा मातृकं ऋक्थमर्हन्ति कुमार्यश्च ' ।

१. This portion is omitted in A.

इति। तदपि मनुवचनेन समानार्थम्। अथवा एतद्वचनद्वयं भर्तुः कुललब्धस्त्रीधनविषयम्। अस्मिन्नेव विषये बृहस्पतिः—

'स्त्रीधनं तदपत्यानां दुहिता च तदंशिनी।
अप्रत्ता चेत्समूढा तु लभते सा न मातृकम्'।

इति। अपत्यानां पुमपत्यानाम्। यत्तु पारस्करेणोक्तम्।

अप्रत्तायास्तु दुहितुः स्त्रीधनं परिकीर्तितम्।
पुत्रैस्तु[1] नैव लभते प्रत्तायां तु समांशभाक्[2]'।

इति। तदप्रतिष्ठितोढदुहितृविषयम्। अत एव मनुः—

'मातुस्तु यौतकं यत्स्यात्कुमारीभाग एव सः'।
(म. स्मृ. ९. १३१.)

इति। यौतकं पितृकुललब्धम्। अनपत्यहीनजाति-स्त्रीधनं उत्तमजातीय[3]सपत्नीदुहिता गृह्णाति। तदभावे तदपत्यम्। तदुक्तं मनुना —

'स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन।
ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत्'॥
(म. स्मृ. ९. १९८.)

इति। ब्राह्मणी जात्युत्तम[4]जात्युपलक्षणार्थम्। पुत्राणामभावे पौत्रा गृह्णन्ति पौत्राणामपि पितामह्यृणापाकरणे। पुत्रपौत्रै ऋणं देयमिति अधिकारश्रवणात्। अस्तु ऋणापाकरणेऽधिकारः। ऋक्थभाक्त्वं कुत इति चेत्। तन्न।

---

१. B. C. and D. read पुत्रैस्तु for पुत्रस्तु. २. D. reads समांशता for समांशभाक्. ३. A. B. and C. read °जाति° for °जातीय°. ४. A. reads जात्यधम° for जात्युत्तम°.

'ऋक्थभाजः ऋणं प्रतिकुर्युः'—

इति गौतमवचनेन ऋक्थभाजामेव ऋणापाकरणाधिकारश्रवणात् । पौत्राणामप्यभावे भर्त्रादयोऽपि ऋक्थभाजः । अत्रैव विवाहभेदेन विशेषमाह मनुः—

'ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्धनम् ।
अप्रजायामतीतायां भर्तुरेव तदिष्यते' ॥
येत्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु ।
अप्रजायामतीतायां मातापित्रोस्तदिष्यते ॥

(म. स्मृ. ९. १९६–१९७.)

इति । ब्राह्मदैवार्षगान्धर्वप्राजापत्यविवाहेषु संस्कृताया भार्याया यद्धनं तद्दुहित्रादिपौत्रान्ततद्धनहारिसन्ततेरभावे सति भर्तृगामि न पुनर्मात्रादिगामि इत्यर्थः । आसुरराक्षसपैशाचविवाहसंस्कृताया भार्याया धनं मातापित्रोर्भवतीत्यर्थः ।

यत्तु कात्यायनेनोक्तम —

'बन्धुदत्तं तु बन्धूनामभावे भर्तृगामि तत्' ।

इति । तदासुरादिविवाहसंस्कृतस्त्रीधनविषयम् । अतएवोक्तं तेनैव—

---

१. C. reads वसु for धनम्. २. A. does not insert this whole verse. ३. B. C. and D. omit तन्°. ४. A. reads मात्रादीनाम् for मात्रादिगामि. ५. A. omits this whole portion—आसुरराक्षसपैशाचविवाहसंस्कृताया भार्याया धनं मातापित्रोर्भवतीत्यर्थः. ६. A. omits °धन°.

'आसुरादिषु यल्लब्धं स्त्रीधनं पैतृकं स्त्रियां[1]।
अभावे तदपत्यानां मातापित्रोस्तदिष्यते'।

इति। भर्त्रादिभिर्दत्तमपि शुल्काख्यं स्त्रीधनं सोदरा एव गृह्णन्ति[2] तथाच गौतमः—

'भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुः'।

(गौ. स्मृ. २८. २५.)

इति। सोदर्याणामभावे मातुर्भवतीत्यर्थः। यत्पुनस्तेनैवोक्तम्।

'स्वं च शुल्कं वोढाऽर्हति'।

इति। तच्छुल्कग्रहणानन्तरं संस्कारात्प्राक्मृतायां द्रष्टव्यम्। अतएव याज्ञवल्क्यः—

'मृतायां दत्तमादद्यात्परिशोध्योभयव्ययम्[3]'॥

(या. स्मृ. २. १४६.)

इति। यत्तु कन्यायै मातामहादिभिर्दत्तं[4] भूषणादि तदपि सोदरा एव गृह्णीयुः। तथाच बौधायनः—

'रिक्थं मृताया गृह्णीयुः कन्यायाः सोदराः समम्।
तदभावे भवेन्मातुस्तदभावे पितुर्भवेत्'॥

इति। अनपत्यपुत्रिकाधनमपि सोदरो गृह्णाति। तथाच पैठीनसिः—

१. A. reads स्त्रियाः and B. and D. स्त्रियम् for स्त्रिया. २. A. reads सोदर एव गृह्णाति for सोदरा एव गृह्णन्ति. ३. B. and C. read भवस्ययम् for उभयव्ययम्. ४ D. reads पितामहादिभिः for मातामहादिभि.

'प्रेतायां पुत्रिकायां तु न भर्ता द्रव्यमर्हति[1] ।
अपुत्रायां कुमार्यां च भ्रात्रा तद्ग्राह्यमित्यपि[2]' ।

इति । पुत्रिकायां[3] पितुः पश्चादौरससद्भावे स एव गृह्णीयान्न भर्ता । यत्तु मनुवचनम्—

'अपुत्रायां मृतायां तु पुत्रिकायां कथंचन ।
धनं तत्[4] पुत्रिकाभर्ता हरेचैवाविचारयन्' ॥
(म. स्मृ. ९. १३५.

इति । तत्पश्चादुत्पन्नभ्रात्रभावे वेदितव्यम् । यत्तु क्वचिदनपत्यं स्त्रीधनं स्वस्रीयादीनां[5] भवतीत्युक्तं बृहस्पतिना —

' मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा ।
श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिताः ॥
यदाऽऽसामौरसो न स्यात्सुतो[6] दौहित्र एव वा ।
तत्सुतो वा धनं तासां स्वस्रीयाद्याः समाप्नुयुः' ॥

इति । अस्यायमर्थः । ब्राह्मादिविवाहेषु भर्तुरभावे आसुरादिषु मातापित्रोरभावे मातृष्वस्रादीनां धनं यथाक्रमं मातृष्वस्रीयाद्याः[7] गृह्णीयुः । क्वचिज्जीवन्त्याः सप्रजाया अपि पत्न्या धनं भर्ता गृह्णीयादित्याह याज्ञवल्क्यः—

' दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके ।
गृहीतं स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति' ॥
(या. स्मृ. २. १४७.)

---

१. A. reads दायम् for द्रव्यम्. २. B. C. and D. read ग्राह्यमिति for ग्राह्यमित्यपि. ३. B. originally reads तस्य द्रव्यं for पुत्रिकायाम्. ४. A. B. and C. substitute तु for तत्. ५. B. and C. read बन्ध्वादीनां and D. originally स्वस्रीयादीनां and in margin बन्ध्वादीनां for स्वस्रीयादीनाम्. ६. D. reads पुत्रो for सुतो while A. substitutes च for वा. ७. D. omits °द्या°.

इति । संप्रतिरोधके बन्दिग्रहादौ स्वकीयद्रव्याभावे स्त्रीधनं गृहीत्वा पुनस्तस्यै न दद्यात् । प्रकारान्तरेण गृहीतं पुनर्दद्यादेव । तथाच कात्यायनः—

'न भर्ता नैव च सुतो न पिता भ्रातरो न च ।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः ॥
यदि चैकतरोऽप्येषां स्त्रीधनं भक्षयेद्बलात् ।
सवृद्धिकं प्रदाप्यः स्याद्दण्डं चैव समाप्नुयात् ॥
तदेव यद्यनुज्ञाप्य भक्षयेत्प्रीतिपूर्वकम् ।
मूलमेव स दाप्यः स्याद्यद्यसौ धनवान् भवेत्'

इति । देवलोऽपि—

वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत् ।
भोक्त्री तत्स्वयमेवेदं पतिर्नार्हत्यनापदि ॥
वृथा मोक्षे च भोगे च स्त्रियै दद्यात्सवृद्धिकम्' ।

इति । विभाज्यद्रव्यमाह कात्यायनः—

'पैतामहं च पित्र्यं च यच्चान्यत्स्वयमार्जितम् ।
दायादानां विभागे तु सर्वमेव विभज्यते' ॥

इति । पितृद्रव्योपजीवनेन स्वयमर्जितं यत्तदेव विभजेत्
तदनुपजीवनेनार्जितस्याविभाज्यत्वात् । एतत्त्रितयमपि ऋणावशिष्टं विभजेत् । तथा च स एव—

---

१. B. and C. substitute हि and D. तु for च. २. B. and C read भोक्ता तत्स्त्रीधने च्वेदम् for भोक्त्री तत्स्वयमेवेदम्. ३. D. reads यद् स्यात् for यच्चान्यत्. ४. B. C. and D. omit यत्तदेव विभजेत्.

'ऋणं प्रीतिप्रदानं च दत्वा शेषं विभाजयेत्' ॥

इति । ऋणप्रदानार्थं धनाभावे पितृऋणमपि विभजेत् ।

'ऋक्थं ऋणं सममिति वचनात्' ।

ऋक्थं ऋणमितिवचनादिनिवृत्त्यर्थं शोध्यमित्याह स एवः—

'ऋणमेवंविधं शोध्यं विभागे बन्धुभिः सह[1] ।
गृहोपस्करवाह्याश्च दोह्या[2]भरणकर्मिणः ॥
दृश्यमाना विभज्यन्ते कोशं[3] गूढमब्रवीद्भृगुः' ।

इति । अत्र कोशग्रहणमितरदिव्य[4]प्रतिषेधार्थम् । तथा च स एव—

'शङ्काविश्वाससंधाने विभागे ऋक्थिनां सदा ।
क्रियासमूहकर्तृत्वे कोशमेवं[5] प्रदापयेत्' ।

इति । अविभाज्यद्रव्यमाह याज्ञवल्क्यः—

'पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितम् ।
मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत् ।
क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः ।
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च' ॥

(या. स्मृ. २. ११८–११९.)

---

१. A. reads सदा for सह. २. D. reads वोह्या° for दोह्या°. ३. D. originally reads शोकं मूढे and in margin शोकं गूढे for कोशं गूढम्. ४. D. reads °द्रव्य° for °दिव्य°. ५. D. reads originally शोकमोहम् and in the margin कोशमेव, while A. कोशमेवम्.

इति। पितृद्रव्याविनाशेन यत्स्वयं कृष्यादिना उपार्जितं यच्च विद्यादिना लब्धं विवाहाच्च यल्लब्धं तद्भ्रात्रादीनां न भवेत्। यत्तु[1] पित्रादिक्रमायातं चोरादिभिरपहृतं[2] पित्रादिभि[3]रनुद्धृतं द्रव्यं पुत्राणां मध्ये यः कश्चि[4]दितराभ्यनुज्ञयोद्धरति तत्तस्यैव भवति। क्षेत्रं[5] तु तुरीयांशमेवोद्धर्ता गृह्णाति शेषं तु[6] सर्वेषां सममेव। तथाच शङ्खः—

'पूर्वनष्टां[7] तु यो भूमिं यः कश्चिदुद्धरेत् श्रमात्[8]।
यथा[9]भागं लभन्त्यन्ये दत्त्वांशं तु तुरीयकम्'।

इति। तथा विद्ययाध्यापनादिना लब्धमपि स्वस्यैव भवति। पितृद्रव्याविरोधेनेति सर्वत्र शेषः। अत एव मनुः—

अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत्।
(दायादेभ्यो न तद्द्याद्विद्यया लब्धमेव च।)
स्वयमीहितलब्धं तन्नाकामो दातुमर्हति॥

(म. स्मृ. ९. २०८.)

इति। श्रमेण कृष्यादिना। पितृग्रहणमविभक्तोपलक्षणार्थम्। व्यासोऽपि—

---

१. A. and D.. omit तु. २ B. and C. read अनुध्दृतम् omitting अपहृतम् पित्रादिभिः. ३. A. reads अन्यैः for पित्रादिभिः. ४. B. C. and D. omit कश्चित्. ५. B. C. and D. read क्षेत्रे for क्षेत्रं. ६. A. omits तु and also च after तथा. ७. A. reads पुनः. B. पूर्वं, and C. पूर्णम् for पूर्व°. ८. B. C. and D. read क्रमात् for श्रमात. ९. A. and C. read °भागेन लभते for °भागं लभन्ति.

'विद्याप्राप्तं शौर्यधनं यच्च सौदायिकं भवेत् ।
विभागकाले तत्तस्य नान्वेष्टव्यं च[1] ऋक्थिभिः' ॥

इति । अविभाज्यविद्याधनस्य लक्षणमाह कात्यायनः—

'परभक्तोपयोगेन प्राप्ता विद्यान्यतस्तु या ।
तया प्राप्तं धनं यत्तु विद्याप्राप्तं तदुच्यते ।
उपन्यस्तेषु[2] यल्लब्धं विद्यया पणपूर्वकम्[3] ।
विद्याधनं तु तद्विद्याद्विभागे न नियोज्यते ।
शिष्यादार्त्विज्यतः प्रश्नात् संदिग्धप्रश्ननिर्णयात् ।
स्वज्ञानशासनाद्वादात्[4] लब्धं प्राध्यापनाच्च यत् ॥
परं निरस्य यल्लब्धं विद्यातोऽद्भुतपूर्वकम्[5] ।
विद्याधनं तु तद्विद्यान्न विभाज्यं बृहस्पतिः ॥
शिल्पिश्चापि[6] हि धर्मोऽयं स्वस्थाद्यच्चाधिकं भवेत् ।
विद्याबलकृतं चैव याज्यतः शिष्यतस्तथा[7] ॥
एतद्विद्याधनं प्राहुः सामान्यं यदतोऽन्यथा' ।

इति । अनेन[8] विद्याधनादन्यथाभूतमविभक्तपित्रादिद्रव्योपयोगप्राप्तं तदविभक्तानां सामान्यं साधारणमिति यावत् । क्वचिद्विद्याप्राप्तमपि धनं विभाज्यमित्याह नारदः—

---

१. B. C. and D. read स्वऋक्थिभिः for च ऋक्थिभिः. २. B. and C. read उपायस्तेषु while D. originally reads उपलब्धेषु and in the margin उपन्यस्तेषु for उपन्यस्तेषु. ३. B. reads रणपूर्वकम् for पणपूर्वकम्. ४. A. reads °शंसनात् for शासनात् and substit tes वाऽपि for वादात् while B. and C. read सज्ञान° for स्वज्ञान and प्राधान्यतो ब्रूयात् for प्राध्यापनाच्च यत् while A. reads प्राधान्यतश्च यत् for प्राध्यापनाच्च यत्. ५. A. and D. originally read द्यूतपूर्वकम् for °द्भुतपूर्वकम्. ६. A. reads संनिविष्टे for शिल्पिश्चापि and D. originally reads मूल्याद्यत्राधिकम् for स्वस्थाद्यच्चाधिकम्. ७. A. reads यान्यत्तच्छिष्यतः तथा and B. and C. read यान्यतो मिश्रितस्तथा for याज्यतः शिष्यस्ततथा. ८. A. and D. originally read अतो for अनेन.

'कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः ।
भागं विद्याधनात्तस्मात्स लभेताश्रुतोऽपि सन्' ॥
(ना. स्मृ. १३. १०.)

इति । कात्यायनोऽपि—
'कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा ।
शौर्यप्राप्तं तु यद्वित्तं विभाज्यं तद्बृहस्पतिः' ॥

इति । अविभक्तस्य कुले पितृव्यादेः पितृतोऽपि वा प्राप्तविद्यानां यद्धनं शौर्यादिनोऽप्राप्तं विद्ययैव प्राप्तं तद्विद्याधनं विभाज्यमिति । पितृद्रव्यार्जितेनार्जिते विद्याधने भागद्वयमर्जकस्याह वसिष्ठः—
'येन चैषां यदुपार्जितं स्याद्द्व्यंशमेव लभेत' ।
(व. स्मृ. १७. ९१.)

इति । यत्तु—
'सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः' ॥

इति । तद्विद्येतरकृष्याद्युपार्जितधनविषयम् । अविभाज्यविद्याधने अर्जकेच्छया अंशमाह गौतमः—
'स्वयमर्जितं चैव वैद्येभ्यो वैद्यः कामं दद्यात्'

इति । इच्छाभावेत्वाह नारदः—
वैद्यो वैद्याय नाकामो दद्यादंशं स्वतो धनात् ।

---

१. B. and C. read °ऽसुतोऽपि for °श्रुतोऽपि. २. D. originally reads कुलतोवाप्तविद्यानाम् for कुले विनीतविद्यानाम्. ३. D. reads शौर्यादिभिः प्राप्तं तद्विद्याधनम्. ४. D. reads पितृव्याविरोधेन. ५. B. and C. read एकस्य for अर्जकस्य. ६. B. C. and D. read स्वयमुपार्जितम् for यदुपार्जितम्. ७. B. and C. read विद्येतरतया for विद्येतरकृष्यादि. ८. B. reads अंशविभागम् and B. and C. read अंशान् for अंशम्. ९. B. and C. add तत् to इच्छा.

पितृद्रव्यं समाश्रित्य न चेत्तेन तदाहृतम् ' ॥

(ना. स्मृ. १३. ११.)

अवैद्याय सकामोऽपि न दद्यात् । तदाह कात्यायनः—

' नाविद्यानां तु वैद्येन देयं विद्याधनं क्वचित् ।

समविद्याधिकानां तु देयं वैद्येन तद्धनम् ' ॥

इति । विद्याप्राप्तधनवत् शौर्यादिप्राप्तमपि धनमविभाज्यमित्याह स एव—

' शौर्यप्राप्तं विद्यया च स्त्रीधनं चैव यत्स्मृतम् ।

एतत्सर्वं विभागे तु विभाज्यं नैव ऋक्थिभिः ॥

ध्वजाहृतं भवेद्यत्तु विभाज्यं नैव तत्स्मृतम् ' ।

इति । ध्वजाहृतस्य लक्षणं तेनैवोक्तम् —

' संग्रामादाहृतं यत्तु विद्राव्य द्विषतां बलम् ।

स्वाम्यर्थे जीवितं त्यक्त्वा तद्ध्वजाहृतमुच्यते ' ॥

इति । बृहस्पतिरपि—

' पितामहपितृभ्यां च दत्तं मात्रा च यद्भवेत् ।

तस्य तन्नापहर्तव्यं शौर्यभार्याधनं तथा ' ॥

इति । शौर्यप्राप्तधनस्वरूपं च कात्यायनेन दर्शितम्—

' आरुह्य संशयं यत्र प्रसभं कर्म कुर्वते ।

तस्मिन् कर्मणि तुष्टेन प्रसादः स्वामिना कृतः ॥

तत्र लब्धं तु यत्किंचित् धनं शौर्येण तद्भवेत् ' ।

---

१. A. B. and C. reads तद्धनमा° for तेन तदा°. २. D. reads अविद्याय. ३. D. originally reads अविद्यायाम् for नाविद्यानाम् while A. substitutes °धनं for °धनात्.

इति । पित्रादिद्रव्योपजीवनेन विद्याप्राप्तधनवत्[१] शौर्य-प्राप्तधनेऽप्यर्जकस्य भागद्वयमाह व्यासः—

'साधारणं समाश्रित्य यत्किंचिद्वाहनायुधम् ।
शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः ॥
तस्य भागद्वयं देयं शेषास्तु समभागिनः ।[२]

इति । अन्यदप्यविभाज्यमाह मनुः—

'वस्त्रं पत्रमलंकारं कृतान्नमुदकं स्त्रियः ।
योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते' ।

(म. स्मृ. ९. २१९.)

इति । वस्त्रं पितृ[४]धृतं वस्त्रम् । पितृधृतं वस्त्रं पितुरूर्ध्वं विभागे श्राद्धभोक्त्रे दातव्यम् । तथाच बृहस्पतिः—

'वस्त्रालंकारशय्यादि पितुर्यद्वाहनादिकम् ।
गन्धमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे तदर्पयेत्' ॥

इति । अन्यानि तु वस्त्राणि विभाज्यान्येव । प[५]त्रमश्वशिबिकादिवाहनं तदपि येनारूढं तत्तस्यैव । अनारूढं तु सर्वैर्विभाज्यम् । अलंकारोऽपि यो येन धृतः स तस्यैव । अधृतः साधारणो विभाज्य एव—

'पत्यौ जीवति यस्त्रीभिरलंकारो धृतो भवेत् ।
न तं भजेरन् दायादा भजमानाः पतन्ति ते' ॥

(म. स्मृ. ९. २००.)

---

१. B. C. and D. substitute इव for °वत्. २. A. does not insert this line. ३. B. and C. do not insert this whole verse and also इति. ४. A. and D. omit पितृ. ५. A. B. C. and D. originally read पत्रं वाहनं before पत्रमश्वशिबिकादि°.

इति । तेनैव धृत इति विशेषेनोपादानात् । कृतान्नं तण्डुलमोदकादि । तदपि यथासंभवं भोक्तव्यं न विभाज्यम् । उदकं तदाधारः कूपादिः । सोऽपि विषमः पर्यायेण भोक्तव्यो न मूल्यद्वारेण विभाज्यः । स्त्रियश्च दास्यो विषमाः पर्यायेण कर्म कारयितव्याः ।

तथा च बृहस्पतिः—

'एकां स्त्रीं कारयेत्कर्म यथांशेन गृहे गृहे ।
बह्व्यः समांशतो देया दासानामप्ययं विधिः' ॥

इति । पित्रावरुद्धास्तु समा अपि न विभाज्याः । तथाच गौतमः—

'स्त्रीषु संयुतास्वविभागः' ॥

(गौ. स्मृ. २८. ४७.)

इति । योग इति श्रौतस्मार्ताग्निसाध्यमिष्टं कर्म लक्ष्यते । क्षेमः इति लब्धपरीक्षणहेतुभूतं बहिर्वेदिदानतडागाराम-निर्माणादि पूर्तं कर्म लक्ष्यते । तदुभयं पितृद्रव्यविरोधेनार्जितमप्यविभाज्यम् । तदुक्तं लौगाक्षिणा—

'क्षेमं पूर्तं यागमिष्टमित्याहुस्तत्त्वदर्शिनः ।
अविभाज्ये च ते प्रोक्ते शयनासनमेव च' ॥

---

१. A. reads विशेषणोपादानात् and B. and C. विशेषेणोपादानात् for विशेषेनोपादानात्. २. D. reads मोदकतन्दुलादि and for यथासंभवं originally reads यथासंभूय. ३. D. reads विषमपर्यायेण for विषमः पर्यायेण. ४. B. and C. read युक्तासु for संयुतासु. ५. A. B. and C. read °विरोधार्जितम् for °विरोधेनार्जितम्.

इति। अथवा योगक्षेमशब्देन छत्र[१]चामरशस्त्रवाहनादि-प्रभृतय उच्यन्ते। प्रचारो गृहारामादिषु प्रवेशनिर्गममार्गः। सोऽप्यविभाज्यः। यत्तु उशनसा क्षेत्रस्याप्यविभाज्यत्व-मुक्तम्—

'अविभाज्यं सगोत्राणामासहस्रकुलादपि।
या[२]ज्यं क्षेत्रं च पत्रं च कृतान्नमुदकं स्त्रियः' ॥

इति। तत्प्रतिग्रहलब्धक्षेत्रं क्षत्रियासुतेन सार्धं ब्राह्मणी-सुतेन अविभाज्यमित्येवं परम्।

'न प्रतिग्रहभूर्देया क्षत्रियादिसुताय च'।

इति स्मरणात्। अन्ये मन्यन्ते। वस्त्रादयोऽपि विभा-ज्या एव।

तथाच बृहस्पतिः—

'वस्त्रादयोऽविभज्यायैरुक्तं तैर्न विचारितम्।
धनं भवेत्समृद्धानां वस्त्रालङ्कारसंश्रि[३]तम् ॥
मध्यस्थितमनाजीव्यं दातुं नैक[४]स्य शक्यते।
युक्त्या विभजनीयं तदन्यथानर्थकं भवेत् ॥
विक्रीय वस्त्राभरणमृणमुद्धाह्य लेखितम्।
कृतान्नं वा[५] कृतान्नेन परिवर्त्य विभज्यते ॥
उद्धृत्य कूपवाप्यम्भस्त्व[६]नुसारेण गृह्यते।

१. A. B. C. and D. read शस्त्रचामरछत्रोपानत्प्रभृतयः. २. A. B. and C. read वाप्यम् for याज्यम्. ३. D. reads °संस्थितम्. ४. A. reads तैः कस्य for नैकस्य. ५. D. substitutes च for वा. ६. B. C. and D. read तदनुसारेण for स्त्वनुसारेण.

एकां स्त्रीं कारयेत्कर्म यथांशेन गृहे गृहे ॥
बह्व्यः समांशतो देया दासानामप्ययं विधिः ।
योगक्षेमवतो लाभः समत्वेन विभज्यते[1] ।
प्रचारश्च यथांशेन कर्तव्यो ऋक्थिभिः सह ’ ॥

इति । तेन[2] वस्त्रादीनाम[3]विभाज्यत्वप्रतिपादकं मनुवचनमुशनोवचनं चानादरणीयम्[4] । तदनुपपन्नम् । विरोधे हि वचनानां विषयव्यवस्थाश्रयणं युक्तं न चान्यथाकरणम्[5] । बृहस्पतिवचनानां तु अधृतवस्त्रादिविषयत्वम् । मन्वादिवचनस्य तु धृतवस्त्रादिविषयत्वं पूर्वमेवोक्तमिति विषयव्यवस्था घटते ।

विभागकाले केनचिद्वञ्चितं[6] पश्चादुद्भावितं चेत् तत्सर्वं[7] समं विभजेयुः । तथाच याज्ञवल्क्यः—

‘ अन्योन्यापहृतं द्रव्यं विभक्ते[8] यत्तु दृश्यते ।
तत्पुनस्ते समैरंशैः विभजेरन्निति स्थितिः ’ ॥
(या. स्मृ. २. १२६.)

इति । समशब्दो विषमवि[9]भागनिरासार्थः । विभजेरन्निति बहुवचनेन येन दृष्टं तेनैव न ग्राह्यमिति दर्शयति[10] ।

---

१. D corrects विभाज्यते. २. B. and C. read नव° for तेन. ३. B. and C. read °मपि for °मवि. ४. B. and C. substitute only वा° for चाना.° ५. B. C. and D. read बाधाश्रयणम् for चान्यथाकरणम्. ६. D. originally reads अपहृतम् and in the margin वञ्चितम् and adds a word वित्तम् after वञ्चितम्. ७. A. reads सर्वम् for सर्वे. ८. B. and C. read विभक्तम् for विभक्ते. ९. B. reads °भाग° for °विभाग°. १०. B. C. and D. read दर्शयितुम् for दर्शयति.

मनुरपि—

'ऋणे धने च सर्वस्मिन् प्रविभक्ते यथाविधि।
पश्चाद्दृश्येत यत्किंचित् तत्सर्वं समतां नयेत्' ॥
(म. स्मृ. ९. २१८.)

इति। अपहृतद्रव्यवच्छास्त्रोक्तानतिक्रमेण विषमभागतया विभक्तमपि समतां नयेत्। तथाच कात्यायनः—

'अन्योन्यापहृतं द्रव्यं दुर्विभक्तं च यद्भवेत्।
पश्चात्प्राप्तं विभज्येत समभागेन तद्गुरुः' ॥

इति। एवं च सति वञ्चितद्रव्यस्य पश्चाद्दृष्टस्यैव विभागविधानात् पूर्वं विभक्तस्य पुनर्[1]विभागो नास्तीत्यवगम्यते। यत्तु मनुनोक्तम्—

'विभागे तु कृते किंचित्सामान्यं यत्र दृश्यते।
नासौ विभागो विज्ञेयः कर्तव्यः पुनरेव हि' ॥

इति। तद्विभक्तद्रव्येष्वायव्ययकरणाद्[2]र्वाग्वेदितव्यम्। अन्योन्यापहृतमित्यादिवचनानां निर्विषयतापत्तेः। अत्रान्योन्यवञ्चने[3] दोषोऽप्यस्ति। तथाच श्रुतिः—

'यो वै भागिनं भागान्नुदते चयते वैनं स यदि
वैनं न चयतेऽथ पुत्रमथ पौत्रं चयते'।

इति। अयमर्थः। यो भागिनं भागार्हं भागान्नुदते भागादपाकरोति[4] भागं तस्मै न प्रयच्छतीति यावत्। अथ[5] भागाच्च्युतः एनमपहारकं चयते[6] नाशयति पापिनं करोतीति

१. B. and C. read पश्चात् for पुनः. २. A. reads °द्रव्यार्जनव्यय° for °द्रव्येष्वायव्यय°. ३. B. and C. read °वचने for °वञ्चने. ४. B. and C. read अप्रकरोति for अपाकरोति. ५. B. C. and D. do not insert अथ. ६. B. and C. read पर्यते for चयते and substitute याथिकम् for पापिनम्.

यावत् । यदि तं न नाशयति तदा तस्य पुत्रं पौत्रं वा नाशयतीति । यत्तु मनुनोक्तम्[1]—

> 'यो ज्येष्ठो विनिकुर्वीत लोभाद् भ्रातॄन् यवीयसः ।
> सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिः' ॥
>
> (म. स्मृ. ९. २१३.)

इति । तत्स्वतन्त्रस्यापि ज्येष्ठस्य समुदायद्रव्यापहारे दोषोऽस्ति किमुतास्वतन्त्राणां यवीयसामित्येवं प्रतिपादन-परम् । न तु ज्येष्ठस्यैव दोष[2]प्रतिपादनपरम् । अन्यथा स्मृत्या श्रुतेः सङ्कोचापत्तेः । विभक्तानां कर्तव्यमाह नारदः—

> 'यद्येकजाता बहवः पृथग्धर्माः पृथक्क्रियाः ।
> पृथक्कर्मगुणोपेता न चेत्कार्येषु संमताः ॥
> स्वभोगान्[3]यदि दद्युस्ते विक्रीणीयुरथापि वा ।
> कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य च' ॥
>
> (ना. स्मृ. १३. ४२-४३.)

इति । एकस्माज्जाता विभक्ता भ्रातरः परस्परानुमतिमन्त-रेण धनसाध्येष्टापूर्तादिधर्मकारिणो भवेयुः । तथा धन[4]साध्य-कृष्यादि[5]कर्मकारिणो भवेयुः । तथा विभिन्नोलूखलमुसलादि-कर्मोपसर्जनद्रव्योपेताः स्युः । तथा च[6] कार्येषु भ्रातरो यदि न संमताः तदाताननादृत्य कार्यं कुर्युः । तथा विभक्ता

---

१. B. and C. read °वचनम् for मनुनोक्तम्. २. B. and C. read शेष° for दोष°. ३. B. and C. read स्वभावात् for स्वभागान्. ४. B. C. read द्रव्यव्यय° for धन° while D. reads द्रव्य but omits व्यय. ५. A. omits कर्म. ६. B. C. and D. do not insert च while D. reads originally संगताः.

भ्रातरः स्वभागान्[1]यदि दद्युर्विक्रीणीयुर्वा[2] न दद्युर्वा तत्सर्वं यथेष्टं कुर्युः। यस्मात्[3]ते विभक्ताः स्वधनस्येशाः स्वतन्त्राः स्वामिन इत्यर्थः। यत्तु बृहस्पतिवचनम्—

'विभक्ता वाऽविभक्ता वा दायादाः स्थावरे समाः।
एको ह्यनीशः सर्वत्र दानाधमनविक्रये'॥

इति। तदेवं व्याख्येयम्। अविभक्तेषु द्रव्येषु[4] साधारणत्वादेकस्यानीश्वरत्वात् सर्वैरनुज्ञाऽवश्यं[5] कार्या। विभक्तेषु तूत्तरकालं विभक्ताविभक्त[6]संशयव्युदासनसौकर्याय सर्वाभ्यनुज्ञा। न पुनरेकस्यानीश्वरत्वेन। अतो विभक्तानुमतिव्यतिरेकेणापि व्यवहारः सिध्यत्येवेति। यत्तु स्मृत्यन्तरम्—

'स्वग्रामज्ञातिसामन्तदायादानुमतेन च।
हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी'॥

इति। तस्यायमभिप्रायः। तत्र ग्रामानुमतिः 'प्रतिग्रहः प्रकाशः स्यात्स्थावरस्य विशेषतः' इति स्मरणात्। व्यवहारप्रकाशनार्थमेवापेक्ष्यते। न पुनर्ग्रामानुमतिमन्तरेण व्यवहारो न सिध्यतीति। सामन्तानुमतिरपि सीमाविप्रतिपत्तिनिरासार्थमेव। दायादानुमतिरपि विभक्ताविभक्तसंशयव्युदासेन व्यवहारसौकर्यार्थमेव। हिरण्योदकदानमपि विक्रये कर्तव्ये सहिरण्योदकं दत्वा दानरूपेण स्थावरविक्रयं कुर्यादित्येवमर्थम्।

---

१. B. C. and D. read स्वभावात् for स्वभागान्. २. B. and C. read विक्रीणीयुः तानादद्यो वा for विक्रीणीयुर्वा न दद्युर्वा. ३. B. C. and D. read तस्मात् for यस्मात् while B. and C. add न before विभक्ताः. ४. B. C. and D. read द्रव्यस्य for द्रव्येषु. ५. B. C. and D. read सर्वाभ्यनुज्ञा अवश्यं कार्या for सर्वैरनुज्ञाऽवश्यं कार्या. ६. A. omits °अविभक्त°.

'स्थावरे विक्रयो नास्ति कुर्यादाधिमनुज्ञया' ।

इति स्थावरविक्रयस्य निषिद्धत्वात् ।

'भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
तावुभौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ' ॥

इति दानप्रतिग्रहयोः प्रशस्तत्वाच्च[1] । विभागापलापे निर्णयकारणमाह याज्ञवल्क्यः—

'विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेखितैः[2] ।
विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः' ॥

(या. स्मृ. २. १४९.)

इति । ज्ञातयः पितृबन्धवः । बन्धवस्तु[3] मातुलादयः । लेख्यं विभागपत्रम् । एभिर्विभागनिर्णयो ज्ञातव्यः । यौतकैः[4] पृथक्कृतैर्गृहक्षेत्रैः । अन्यदपि विभागलिङ्गमाह नारदः—

'विभागधर्मसंदेहे दायादानां विनिर्णयः ।
ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्तनात् ॥
भ्रातृणामविभक्तानामेको धर्मः प्रवर्तते ।
विभागे सति धर्मोऽपि भवेत्तेषां पृथक् पृथक् ॥
साक्षित्वं प्रातिभाव्यं[5] च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परम् ॥
दानग्रहणपश्वन्नगृहक्षेत्रप्रतिग्रहाः ।
विभक्तानां पृथक् ज्ञेया[6] दानधर्मागमव्ययाः ॥

१. B. and C. read प्राशस्त्यात्. २. B. and C. read बन्धुभिश्च विलेखितैः for बन्धुसाक्ष्यभिलेखितैः. ३. B. and C. read बान्धवेषु for बन्धवस्तु. ४. A. reads यौतके पृथक्कृतैर्गृहक्षेत्रे. ५. A. and D. read प्रति° for प्राति°. ६. B. reads नेया for ज्ञेया.

येषामेताः क्रिया लोके प्रवर्तन्ते स्वरिक्थिषु।
विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेण तान्' ॥

(ना. स्मृ. १३. ३९–४०.)

इति। बृहस्पतिरपि—

'पृथगायव्ययधनाः कुसीदं च परस्परम्।
वणिक्पथं च ये कुर्युर्विभक्तास्ते न संशयः' ॥

इति। कुसीदवाणिज्यादिभिर्लिङ्गैर्विभागनिर्णयः साक्ष्याद्यभावे वेदितव्यः। तथा च स एव—

'साहसं स्थावरस्वाम्यं[1] प्राग्विभागश्च रिक्थिनाम्।
अनुमानेन विज्ञेयं न स्युर्यत्र[2] च साक्षिणः' ॥

इति। साहसादिसाधकलिङ्गान्यपि स एवाह—

'कुलानुबन्धव्याघातहोढं साहससाधकम्[3]।
स्वस्वभोगस्थावरस्य विभागस्य पृथग्धनम्' ॥

इति। कुलानुबन्धः पूर्वपुरुषवैरानुबन्धः। व्याघातः परस्परस्य होढं बलादपहृतं[4] द्रव्यं तस्य दर्शनं स्वस्यात्मनो भोगः परस्परं पृथग् ग्रहणादेर्विभागलिङ्गत्वमविभक्तेषु निषिद्धत्वेनावगन्तव्यम्। तथाच याज्ञवल्क्यः—

---

१. B. and C. read स्थावरं स्वाम्यम् for स्थावरस्वाम्यम्. २. D. originally reads यस्य and in the margin यत्र. ३. B. reads साधकौ for साधकम् and also B. and C. read स्वस्य भौमस्थावरस्य for स्वस्वभोगस्थावरस्य. ४. B. and C. read बान्धवस्यादपहृतद्रव्यतोंशदर्शनम् for बलादपहृतं द्रव्यं तस्य दर्शनम्.

'भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि ।
प्रातिभाव्यमृणं साक्ष्यम्[1]विभक्तेन तु स्मृतम्' ॥

(या. स्मृ. २. ५२.)

इति । साक्षिलेख्ययुक्तिभिर्निर्णयस्याशक्यत्वे ।

'युक्तिष्वप्यसमर्थासु शपथैरेवं[2] मर्दयेत्' ।

इति प्राप्तं दिव्यं निषेधति वृद्धयाज्ञवल्क्यः—

'विभागधर्मसंदेहे बन्धुसाक्ष्यभिलेखितैः ।
विभागभावना कार्या न भवेद्दैविकी क्रिया' ॥

(या. स्मृ. २. १४९.)

इति । कथं तर्हि[3] तत्र निर्णय इत्याकाङ्क्षायामाह मनुः—

'[4]विभागे यत्र संदेहो दायादानां परस्परम् ।
पुनर्विभागः कर्तव्यः पृथक् स्थानस्थितैरपि' ॥

इति । यत्र संदेहो युक्तिभिरपि नापैति तत्र पुनर्विभागः कर्तव्य इत्यर्थः । यत्तु तेनैवोक्तम्—

'सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददामीति[5] त्रीण्येतानि सकृत्सकृत्' ॥

इति । तद्युक्त्यादिभिर्निर्णेतुं शक्तौ सत्यां वेदितव्यम् ।

---

१. B. and C. read शाप्यम् for साक्ष्यम्. २. B. originally reads एनमर्हयेत् and in the margin एनमर्दयेत्. ३. B. and C. omit तर्हि. ४. This verse does not appear in the several printed editions of the मनु but it has, in a manuscript, been commented upon by मेधातिथि a wellknown commentator. ५. B. reads ददातीति and C. ददानीति.

स्वयं कृतस्य संदिग्धस्य[१] विभागस्य पुनः प्रवर्तको राज्ञा दण्डनीय इत्याह बृहस्पतिः—

'स्वेच्छाकृतविभागो यः पुनरेव विसंवदेत् ।
स राज्ञां शक्यते[२] स्थाप्यः शासनीयोऽनुबन्धतः' ॥

इति । अनुबन्धतो निर्बन्धतः[३] ।

॥ इति दायविभागः ॥

। अथ द्यूतसमाह्वयाख्ये विवादपदे निरूप्येते ।

तयोः स्वरूपमाह मनुः—

'अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते ।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः' ॥

(म. स्मृ. ९. २२३.)

इति । अप्राणिभिरक्षव[४]ध्रशलाकादिभिः । प्राणिभिः[५] कुक्कुटादिभिः । तथाच नारदः—

'अक्षवध्रशलाकाद्यैर्देवनं जिह्मकारितम् ।
पणक्रीडा वयोभिश्च पदं द्यूत[६]समाह्वयम्' ॥

(ना. स्मृ. १६. १.)

---

१. B. C. and D. read असंदिग्धस्य while B. and C. omit विभागस्य. २ B. and C. read राज्ञांशे स्वके while D. राज्ञांशे क के. Both seem to be incorrect. ३. A. B. and C. read निबन्धतः. ४. B. and C. read °वध° and D. originally reads वद्ध for वध्र. ५. B. and C. omit प्राणिभिः. ६. B. and C. read पदद्यूत°, D. also the same.

इति । अक्षाः पाशकाः । वध्राश्चर्मपट्टिकाः । शलाका दन्तादिमयाः दीर्घचतुरस्राः । आद्यशब्देन कपर्दिकादयो गृह्यन्ते । तैः पणपूर्वकं यद्देवनं क्रीडनं[1] क्रियते तद्द्यूतं वयोभिः पक्षिभिः कुक्कुटादिभिः च कारान् मल्लमेषादिभिश्च प्राणिभिर्या पणपूर्विका क्रीडा क्रियते स समाह्वय इत्यर्थः । बृहस्पतिरपि—

'अन्योन्यै[2]परिगृहीताः पक्षिमेषवृषादयः ।
प्रहरन्ते कृतपणास्तं वदन्ति समाह्वयम्'

इति । द्यूतस्थानं समिकेनाधिष्ठितं कार्यमित्याह स एव—

'साभिका[3]धिष्ठितं कार्यं तस्करज्ञानहेतुना[4]' ।

इति । त[5]त्र पक्षान्तरमाह नारदः—

'अथवा कितवो राज्ञे दत्त्वा भागं यथोदितम् ।
प्रकाशं देवनं कुर्यादेवं दोषो न विद्यते' ॥

(ना. स्मृ. १६. ८.)

इति । द्यूतसभा[6]धिकारिणो वृत्तिमाह याज्ञवल्क्यः—

'ग्लहे[7] शतिकवृद्धेस्तु सभिकः पञ्चकं शतम् ।
गृह्णीयाद्धूर्त[8]कितवादितराद्दशकं शतम्' ॥

(या. स्मृ. २. १९९.)

---

१. B. and C. omit क्रीडनम्. २. B. and C. read अन्योन्यम्. ३. A. B. C. and D. originally read सविका° for साभिका°. ४. B. C. read °हेतुना; D. °हैतवे. ५. B. and C. read अत्र for तत्र. ६. B. originally reads °शलाका° and in the margin °सभा°. ७. B. and C. read गृहे and D. also originally the same. ८. B. C. and D. originally read द्यूत° for धूर्त°.

इति । परस्परसंप्रतिपत्त्या कितवपरिकल्पितपणो ग्लहः । तत्र तदाश्रया शतिका शतपरिमिता तदधिकपरिमाणा वा वृद्धिर्यस्यासौ शतिकवृद्धिः । तस्मात्कितवात्पञ्चकं शतं सभिकः आत्मवृत्त्यर्थं गृह्णीयात् । पञ्चपणा आयो यस्मिन् शते तच्छतपञ्चकम् जितग्लहस्य विंशतितमं भागं गृह्णीयादिति यावत् । कितवनिवासार्थं शाला सभा तत्राधिष्ठितः सभिकः। सभापतिस्तु कल्पिताक्षादिनिखिलक्रीडोपकरणः तदुपचितद्रव्योपजीवी । इतरस्मादपूर्णशतवृद्धेः कितवाद्दशकं शतं जितद्रव्यस्य दशमं भागं गृह्णीयादित्यर्थः । एवं स्थापितस्य सभिकस्य कृत्यमाह स एव—

'स[1] सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतम् ।
जितं तद्ग्राहयेत्[2] जेत्रे[3] दद्यात् सत्यं[4] वचः क्षमी ' ॥

(या. स्मृ. २. २००.)

इति । यः क्लृप्तवृत्तिर्द्यूताधिकारी राज्ञा धूर्तकितवेभ्यो रक्षितः स राज्ञे यथाप्रतिपन्नमंशं दद्यात् । जितं द्रव्यं पराजितसकाशादासेधादिना उद्धृत्य जेत्रे[3] दद्यात् । तथा क्षमी भूत्वा द्यूतकारिणां विश्वासार्थं सत्यं[4] वचो दद्यात् । बृहस्पतिरपि[5]—

'सभिको ग्राहकस्तत्र दद्याज्जेत्रे[6] नृपाय च ' ।

---

१. D. originally reads असम्यक् for स सम्यक् and substitutes originally °क्रमम्. for °कृतम्. २. D. originally reads उद्ग्राहयेत् for तद्ग्राहयेत् while B. and C. and D. in the margin read क्षेत्रे for जेत्रे. ३. B. and C. read क्षेत्रे. D. also originally the same for जेत्रे. ४. B. and C. add स before सत्यम्. ५. D. reads इति for अपि. ६. B. and C. read क्षेत्रे for जेत्रे.

इति। पराजितकितवानां बन्धनादिना पणग्राहको भवेत्। पणग्रहणादर्वागेव स्वकीयं पणं[1] राज्ञे[2] जेत्रे च यथाभागं दद्यादित्यर्थः। तथा च कात्यायनः—

'जेतुर्दद्यात्स्वकं द्रव्यं जितं ग्राह्यं[3] त्रिपक्षकम्।
सद्यो वा[4] सभिकेनैव कितवात्तु न संशयः'॥

इति। यदा सभिको जेत्रे जितं द्रव्यं दापयितुं न शक्तः तदा राजा दापयेदित्याह याज्ञवल्क्यः—

'प्राप्ते नृपतिना भागे[5] प्रसिद्धे धूर्तमण्डले।
जितं ससभिके स्थाने दापयेदन्यथा न तु'॥

(या. स्मृ. २. २०१.)

इति। अन्यथा प्रच्छन्ने सभिकरहिते अदत्त[6]राजभागे द्यूते जितं पणं जेत्रे न दापयेदित्यर्थः। अत्र जयपराजयविप्रतिपत्तौ निर्णयकारणमाह स एव—

'द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हि'।

(या. स्मृ. २. २०२.)

इति। द्यूताख्यव्यवहाराणां द्रष्टारः कितवा एव राज्ञा नियोक्तव्याः न तु श्रुताध्ययनसंपन्ना इत्युक्तलक्षणाः। साक्षिणश्च त एव द्यूतकारा एव। विष्णुरपि—

---

१. B. C. and D. do not insert पणम्. २. A. omits राज्ञे and also च. ३. D. originally reads वाह्यम् for ग्राह्यम्. ४. D. originally reads सद्योवसतिकेनैव. ५. B. originally reads भावेप्रसिद्धद्यूतमण्डले while A. B. and C. substitute °द्यूत° for °धूर्त°. ६. A. reads अतीत for अदत्त.

'कितवेष्वेव[1] तिष्ठेरन् कितवाः संशयं प्रति ।
य एव तत्र द्रष्टारस्त एवैषां तु साक्षिणः' ॥

इति । साक्षिणां परस्परविरोधे राजा विचारयेदित्याह बृहस्पतिः—

'उभयोरपि संदिग्धौ कितवाः स्युः परीक्षकाः ।
यदा विद्वेषिणस्ते[2] तु तदा राजा विचारयेत्' ॥

इति । कूटद्यूतकारिणो दण्डमाह याज्ञवल्क्यः—

'राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपाधिदेविनः' ॥

(या. स्मृ. २. २०२.)

इति । कूटैरक्षादिभिरुपाधिभिर्मणिमन्त्रादि नामतिवञ्चनेन ये दिव्यन्ति तान् श्वपदेनाङ्कयित्वा स्वराष्ट्रान्निर्वासयेदित्यर्थः । निर्वासने विशेषमाह नारदः—

'कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत् ।
कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृतः' ॥

(ना. स्मृ. १६. ६.)

इति । दण्डने[3] विशेषमाह विष्णुः—

'द्यूते कूटाक्षदेविनां करच्छेदः ।
उपाधिदेविनां सन्दंशच्छेदः[4]' ॥

(वि. स्मृ. ५. १३५–१३६.)

इति । अनियुक्त[5]द्यूतकारिणो दण्डमाह नारदः—

१. D. reads कितवा एव. २. D. originally reads विप्रेक्षिण: for विद्वेषिण:. ३. D. reads दण्डे for दण्डने. ४. D. reads संदेश°. ५. B. and C. read अनियुक्ता: and D. originally अनियुक्ते and in the margin अनियुक्ता: for अनियुक्त°.

'अनिर्दिष्टस्तु यो राज्ञा द्यूतं कुर्वीत मानवः।
न सतं प्राप्नुयात् कामं विनयं चैव सोऽर्हति'॥

(ना. स्मृ. १६. ७.)

इति। द्यूते[1] विहितं कर्मजातं समाह्वये अतिदिशति याज्ञवल्क्यः—

'एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये'।

(या. स्मृ. २. २०३.)

इति। सभिकवृत्तिकल्पनादिलक्षणो धर्मः समाह्वयेऽपि विज्ञेय इत्यर्थः। प्राणिद्यूते प्राणिनां जयपराजयौ तत्स्वामिनोरित्याह बृहस्पतिः—

'द्वन्द्वयुद्धेन यः कश्चिदवसादमवाप्नुयात्।
तत्स्वामिना पणो देयो यस्तत्र परिकल्पितः'॥

इति। पणपरिकल्पनमपि कृताकृतमित्याह नारदः—

'परिहासकृतं यच्च यच्चाप्यविदितं नृपे।
तत्रापि नाप्नुयात् काम्यमथवाऽनुमतं[2] तयोः'॥

इति। काम्यः[3] कामः पणः। यत्तु मनुनोक्तम्—

'द्यूतं समाह्वयं चैव यः कुर्यात्कारयेत वा।
तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः॥

(म. स्मृ. ९. २२४.)

---

१. B. and C. read द्यूतं विहितं कर्मजातम् while D. विहितकर्मजातम्. २. D. reads originally कामं यथा and in the margin काम्यं यथा; while B. and C. काममथ all for काम्यम् अथ. ३. D. reads काम्यकामपणः.

प्रकाशमेतत् तास्कर्यं यद्देवनसमाह्वयौ ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत् ॥

(म. स्मृ. ९. २२२.)

द्यूतं समाह्वयं चैव राजा राष्ट्रान्निवारयेत् ।
राजान्तकारिणावेतौ द्वौ दोषौ पृथिवीक्षिताम् ॥

(म. स्मृ. ९. २२१.)

कितवान् कुशीलवान् कौलान् पाषण्डानपि मानवान्।
विकर्मस्थान् शौण्डिकांश्च क्षिप्रं निर्वासयेत्पुरात् ' ॥

(म. स्मृ. ९. २२५.)

इत्यादि। तत्सर्वं कूटाक्षदेवनविषयतया राज्ञामध्यक्षसभिकरहितविषयतया वा योज्यम् । अत एव बृहस्पतिः—

' द्यूतं निषिद्धं मनुना सत्यशौचधनापहम् ।
अभ्यनुज्ञातमन्यैस्तु राजभागसमन्वितम् ।
सभिकाधिष्ठितं कार्यं तस्करज्ञानहेतुना ' ॥

इति ।

द्यूतसमाह्वयाख्ये विवादपदे निरूपिते ।

प्रसंक्तोद्देशक्रमानुरोधेन ऋणादानादिसमाह्वयान्तान्यष्टादश व्यवहारपदानि निरूपितानि ।

---

१. D. reads कुत्सितकलान् पाखण्डांश्चैव while B. कूशीलवान् क्रूरान् पाषण्डस्थांश्च for कुशीलवान् कौलान् पाषण्डानपि. २. A. reads °सुखापहम् while D. originally reads तत्रैव for मनुना. ३. B. and C. read मनूक्तोद्देश° and D. मनुनोक्तोद्देश°.

अथ बृहस्पतिना निरूपितं प्रकीर्णकाख्यं विवादपदमभिधीयते ।

तस्य च[1] लक्षणभेदौ नारदेन निरूपितौ[2]—

'प्रकीर्णकेषु[3] विज्ञेया व्यवहारा नृपाश्रयाः ।
राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणं तथा ॥
पुनः प्रमाणसंभेदः प्रकृतीनां तथैव च ।
पाषण्डनैगमश्रेणीगणधर्मविपर्ययाः ॥
पितापुत्रविवादश्च प्रायश्चित्तव्यतिक्रमः ।
प्रतिग्रहविलोपश्च लोप आश्रमिणामपि[4] ॥
वर्णसंकरदोषश्च तद्वृत्तिनियमस्तथा ।
न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात् प्रकीर्णकम्' ॥

(ना. स्मृ. १७. १–४.)

इति । प्रकीर्णके विवादे ये विवादा राजाज्ञोल्लङ्घन–तदाज्ञाकरण–तत्कर्मकरणादि[5]विषयास्ते नृपसमवायिन एव । तत्र स्मृत्याचारव्यपेते मार्गे वर्तमानानां प्रतिकूलतामाज्ञाय व्यवहारनिर्णयं नृप एव कुर्यात् । एवं वदता यो नृपाश्रयो व्यवहारस्तत्प्रकीर्णकमित्युक्तं भवति । तत्र राजाज्ञाप्रतिघाते विशेषदण्डमाह याज्ञवल्क्यः—

---

१. A. and D. omit च. २. D. reads दर्शितौ. ३. D. reads पुनर्ज्ञेया for °षु विज्ञेया while B. and C. तैर्ज्ञेयाः for विज्ञेयाः. ४. D. reads लोपश्चाश्रमिणामपि. ५. A. B. and C. read °रक्षणादि° for °करणादि°.

'न्यूनं वाभ्यधिकं वापि लिखेद्यो राजशासनम् ।
पारदारिकचोरं वा मुञ्चतो दण्ड उत्तमः' ॥

(य स्मृ. २. २९९.)

इति । राजदत्तभूमेर्निबन्धनस्य वा परिमाणन्यूनत्वमाधिक्यं वा प्रकाशयन्राजशासनं यो विलिखति यश्च पारदारिकं चोरं वा गृहीत्वा राज्ञेऽनिवेद्य मुञ्चति तावुभावुत्तमसाहसं दण्डनीयौ । व्यासोऽपि—

'न्यायस्थाने गृहीत्वार्थं अधर्मेण विनिर्णयम् ।
करोत्युत्तरकार्याणि राजद्रव्यविनाशकः ॥
उत्कोचजीविनो द्रव्यहीनान् कृत्वा विवासयेत्' ।

इति । तत्कर्मकरणे दण्डमाह याज्ञवल्क्यः—

'राजयानासनारोढुर्दण्ड उत्तमसाहसः' ।

(या. स्मृ. २. ३०३.)

इति । कात्यायनोऽपि—

'राजक्रीडासु ये सक्ता राजवृत्त्युपजीविनः ।
अप्रियं चास्य यो वक्ता वधं तेषां प्रकल्पयेत्' ॥

इति । राज्ञः कोशापहरणादौ दण्डमाह मनुः—

---

१. D. originally reads प्रकाशयेद्राज° and in the margin प्रकाशयन् राज°. २. D. originally reads कुर्वन्त्युत्कोचकास्ते तु and in the margin कुर्वन्त्युत्तरकार्याणि and कुर्वन्ति साहसं कार्यम् for करोत्युत्तरकार्याणि. ३. B. and C. read °विनाशके while D. originally विनाशकाः and in the margin विनाशके. ४. B. C. and D. originally राजयानासनारोहे दण्डो मध्यमसाहसः and in the margin D. reads समारोहे for °सनारोहे. ५. A. B. read बलं while D. reads बन्धम् for वधम्°.

'राज्ञः कोशापहर्तॄंश्च प्रतिकूलेषु च स्थितान् ।
घातयेद् विविधैर्दण्डैर्हरेत् सर्वस्वमेव च' ॥

(म. स्मृ. ९. २७९.)

इति । सर्वस्वापहारेऽपि यद्यस्य जीवनोपकरणं तत्तस्य नापहर्तव्यमित्याह नारदः—

'आयुधान्यायुधीयानां बीजानि कृषिजीविनाम् ।
वेश्यास्त्रीणामलंकारान् वाद्यातोद्यानि तद्विदाम् ॥
यच्च यस्योपकरणं येन जीवन्ति कारुकाः ।
सर्वस्वहरणेऽप्येतन्न राजा हर्तुमर्हति' ॥

(ना. स्मृ. १७. १०–११.)

इति । ब्राह्मणस्य वधस्थाने मौण्ड्यमाह मनुः—

'ब्राह्मणस्य वधो मौण्ड्यं पुरान्निर्वासनाङ्कने ।
ललाटे चाभिशस्ताङ्कः प्रयाणं गर्दभेन तु' ॥

इति । कोपात्परस्परभेदनादौ दण्डमाह याज्ञवल्क्यः—

'द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा ।
विप्रचिह्नेन शूद्रस्य जीवतोऽष्टशतो दमः' ॥

(या. स्मृ. २. ३०४.)

इति । यत्तु स्मृत्यन्तरेऽभिहितम्—

'द्विजातिलिङ्गिनः शूद्रान् चित्रदण्डेन घातयेत्' ॥

---

१. C. reads भरीणां चोपजीविकाम्. Printed texts of the मनु also follow this reading but it appears from the following line that the author माधवाचार्य does not agree with it. २. D. reads प्रमाणम् for प्रयाणम्. ३. D. in margin and printed texts of the याज्ञवल्क्य read विप्रत्वेन च for विप्रचिह्नेन.

इति। तद् वृत्त्यर्थं ब्राह्मणलिङ्गधारणे[1] वेदितव्यम्। ब्राह्मणपीडाकारिणो दण्डमाह मनुः—

‘ब्राह्मणान् बाधमानं तु कामादवरवर्णजम्।
हन्याच्चित्रैर्वधोपायैस्तमुद्वेगकरैर्नृपः’ ॥

(म. स्मृ. ९. २४८.)

इति। शूद्राणां प्रव्रज्यादौ दण्डमाह कात्यायनः—

‘प्रव्रज्यावसितं[2] शूद्रं जपहोमपरं तथा।
वधेन शासयेत् पापं दण्ड्यो वा द्विगुणं दमम्’ ॥
तीरितं[3] चानुशिष्टं च यत्र क्वचन विद्यते।
कृतं तद्धर्मतो ज्ञेयं न तत्प्राज्ञो निवर्तयेत् ॥

(म. स्मृ. ९. २३३.)

इति। तदर्थिप्रत्यर्थिनोरन्यतरवचनादव्यवहारस्य अधर्मतो वृत्तत्वाशङ्कायां पुनर्द्विगुणदण्डप्रतिज्ञापूर्वकं व्यवहारं प्रवर्तयेत्। न पुनर्धर्मतो वृत्तत्वनिश्चयेऽपि राज्ञा लोभादिना प्रवर्तनीय इत्येवंपरम्। यत्पुनर्नृपान्तरेणापि न्यायापेतं कार्यं निवर्तितं तदपि सम्यक्परीक्षणेन धर्म्ये पथि स्थापनीयम्।

‘न्यायापेतं यदन्येन राज्ञाऽज्ञानकृतं भवेत्।
तदप्यन्यायविहितं पुनर्न्याये निवेशयेत्’ ॥

इति स्मरणात्। अन्यायप्रगृहीतदण्डधनस्य गतिमाह—

‘राज्ञान्यायेन यो दण्डो गृहीतो वरुणाय तम्।
निवेद्य दद्याद् विप्रेभ्यः स्वयं त्रिंशद् गुणीकृतम्’ ॥

---

१. D. reads धारिणः for धारणे. २. A. reads वासितम् and B. and D. भ्रासिनम् for वसितम्. ३. A. B. and C. omit the portion तीरितं etc. to सत्त्वविच्छेदापत्तेः.

इति । अन्यायेन यो दण्डो राज्ञा लोभादिना गृहीतः तं त्रिंशद् गुणीकृतं वरुणायेदं इति संकल्प्य ब्राह्मणेभ्यः स्वयं दद्यात् । यच्च दण्डरूपेण यावद् गृहीतमन्यायेन तत्तस्मै प्रतिदेयम् । अपहारदोषप्रसङ्गात् । इतरथा अन्यायदण्डग्रहणे पूर्वस्वामिनः सत्त्वविच्छेदापत्तेः ।

इति । एवं शास्त्रोक्तमार्गेण व्यवहारदर्शिनो राज्ञः फलमाह यमः—

'एवं धर्मप्रवृत्तस्य राज्ञो दण्डधरस्य च ।
यशोऽस्मिन् प्रथते लोके स्वर्गे वासस्तथाऽक्षयः' ॥

इति । मनुरपि—

'एवं सर्वानिमान्राजा व्यवहारान् समापयन् ।
व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम्' ॥

(म. स्मृ. ८. ४२०.)

इति श्रीमहाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपाल-
साम्राज्यधुरंधरस्य माधवामात्यस्य कृतौ पराशरस्मृति-
व्याख्यायां माधवीयायां तृतीयं व्यवहारकाण्डम्
समाप्तम् ॥

॥ समाप्तं चेदं व्यवहारकाण्डम् ॥

॥ समाप्ता चेयं पराशरस्मृतिस्तस्या व्याख्या च ॥

१. A. B. and C. read °मार्गमाह यमः. २. B. and C. re[ad] वासो for यशो.

पराशरधर्मसंहितायास्तृतीयस्य व्यवहारकाण्डस्य
विषयानुक्रमणिका ।

विषयाः — पृष्ठं

इति प्रतिज्ञापादविवरणम्।

अथोत्तरपादनिरूपणम्।

विषयाः — पृष्ठं

अथ घटविधिः।

अथाग्निविधिः।

इति निर्णयपादः।

अथाष्टादशपदानुक्रमः।

इति वृद्धिविषयः ।

अथाधिकथनम् ।

इति आधिविषयः।

अथाधिमोचनम्।

इत्याधिविधिः।

विषयाः पृष्ठं

अथ प्रतिभूकथनम्।

इति संभूयसमुत्थानपदम् ।

अथ दत्ताप्रदानिकं व्यवहारपदम् ।

इति दत्ताप्रदानिकम् ।

अथ वेतनस्यानपाकर्माख्यं विवादपदम् ।

इति वेतनस्यानपाकर्माख्यं विवादपदम् ।

अथाभ्युपेत्याशुश्रूषाख्यं विवादपदम् ।

इति सत्यभ्युपेत्याशुश्रूषाविवादपदम् ।

अथ संविद्व्यतिक्रमाख्यं विवादपदम् ।

अथ क्रीतानुशयः ।

अथ विक्रीयासंप्रदानम् ।

इति स्वामिपालविवादपदम्।

अथ सीमाविवादनिर्णयः।

इति सीमाविवादनिर्णयः ।

अथ दण्डपारुष्यम् ।

इति दण्डपारुष्यम् ।

अथ वाक्पारुष्यम् ।

इति वाक्पारुष्यम् ।

विषयाः	पृष्ठं

अथ दायभागाख्यं विवादपदम् ।

विषयाः	पृष्ठं

इति दायविभागः।

अथ द्यूतसमाह्वयाख्यं विवादपदम्।

इति पराशरधर्मसंहिताया व्यवहारकाण्डस्य विषयानुक्रमणिका।

A list of the names of authors and works etc., occurring in Mâdhavâchârya's Commentary on the Parâśara-Dharma-Saṃhitâ, Vyavahârakâṇḍa.

In the following Indexes the first number refers to the page, the second to the line on that page.

13. 49, 12. 50, 11. 53,
9. 54, 3. 54, 10. 58, 10.
59, 5. 63, 13. 63, 17.
64, 10. 65, 19. 66, 10.
67, 6. 70, 1. 70, 6.
71, 3, 72, 4. 81, 8.
81, 16. 83, 10. 92, 4.
93, 20. 96, 8. 97, 8.
100, 8. 101, 5. 101, 13.
104, 1. 104, 5. 104,
12. 107, 5. 108, 7. 109,
6. 116, 16. 118, 10.
127, 12. 128, 20. 129,
8. 130, 12. 131, 13.
133, 13. 135, 5. 135,
16. 139, 3. 139, 15.
140, 3. 140, 8. 140,
12. 143, 8. 143, 12.
145, 7. 145, 19. 146,
11. 152, 5. 152, 18.
158, 11. 159, 5. 159,
13. 162, 6. 163, 9.
163. 18. 166, 16.
168, 9, 168, 21. 169,
17. 170. 18. 172, 5.
172, 12. 173, 16.
174, 5. 176, 3. 177,
3. 177, 13. 178,
11. 179, 6. 179, 17.
181, 2. 182, 7. 183, 13.
184, 9. 186, 5. 187, 10.
187, 14. 188, 2. 188,
6. 188, 18. 190, 13.
191, 2. 191, 18. 193,
5. 193, 12. 199, 17.
200, 11. 203, 2. 204,
10. 204, 13. 210, 4.
210, 18 (व्या°). 211,
3. 211, 6. 213, 11.
214, 8. 215, 9. 215,
17. 216, 12. 217, 8.
217, 13. 218, 16. 219,
19. 222, 17. 224, 7.
227, 6. 230, 6. 232,
12. 233, 6. 236, 16.
248, 5. 248, 10. 248,
14. 252, 16. 254, 14.
257, 18. 260, 16. 261,
5. 261, 10. 261, 17.
262, 11. 263, 4. 264,
9. 265, 4. 267, 11.
268, 12. 270, 2. 271,
2. 274, 3. 275, 6. 275,
13. 276, 13. 277, 5.
279, 2. 279, 12. 280,
14. 282, 5. 284, 2.
284, 7. 287, 5. 287,
13. 290, 13. 291, 6.

* Also found in Manu.

Index of Quotations arranged according to the authors and works. Vol. III, Parts I and II.

१. अनिर्दिष्ट.

२. आपस्तंब.

३. उशनाः.

४. कात्यायन.

* Sâyaṇa Mâdhavâchârya does not refer this vers to anybody, but the व्यवहारमयूख refers it to देवल.

५. गीता.

६. गौतम.

* Referred toin the text as कात्यायन's, but is found in नारदस्मृति.

* Referred to in the text as मनु's, but not found in मनुस्मृति. (Nirṇayasâgar edition).

† Referred to in the text at हारीत's, but also found in नारदस्मृति.

¶ Referrəd to in the text as मनु's but not found in मनुस्मृति (Nirṇayasāgar edition).

§ Referred to as बृहस्पति's in the text.

* Referred to as a quotation from महाभारत but also found in नारदस्मृति.

* Referred to as a quotation from महाभारत.

* Referred to in the text as being मनु's but not found मनुस्मृति.

† Not found in नारद's दायभागप्रकरण.

* This half only is not found in the Institutes of Nârada edited by Jolly.

† Referred to as being हारीत's but found also in नारद.

* Referred to in the text as कात्यायन's.

† Referred to in the text as हारीत's, but also found in नारद.

* Referred to in the text as occurring in the महाभारत, but found in नारद too.

† Referred to in the text as हारीत's, but also found in नारद.

* Referred to as मनु's in the text, but not found as his in the मनुस्मृति (Nirṇayasāgar edition).

* Referred to as बृहस्पति's in the text. Jolly's edition of नारद reads संपश्यमानो for समीक्षमाणो.

१०. पाणिनि.

११. पारस्कर.

१२. पितामह.

† Referred to in the text as हारीत's but also found in नारद.

१३. पुराण.

१४. पैठीनसि.

१५. प्रजापति.

* Referred to as प्रजापति's but not found in his work. The quotation, however, is in मनु IX. 111.

१६. बृहन्मनु.

१७. बृहस्पति.

* Also found in ना. स्मृ. (१·३७.)

१८. बौधायन.

१९. भ(भा)रद्वाज.

२०. भृगु.

२१. मनु.

† Given as Baudhāyana's but not identified as his.

* Cited as Manu's, but not found in the printed editions of Manu.

† Referred to as मनु's, but not found in the printed editions of मनुस्मृति.

* Referred to in the text as कात्यायन's but also found in मनु (IX. 233).

* Referred to in the text as कात्यायन's but also found in Manu (IX. 233).

---

* Referred to as Manu's but not found in the printed editions of Manusmriti.

† Cited as Manu's but not found in the printed editions of Manu.

* Not found in the printed editions of Manu.

† Not found in the printed editions of Manu.

* Not found in the printed editions of Manu.

† Not found in the printed editions of Manu.

* Referred to as Manu's but not found in the Nirnayasāgar edition of the Manusmriti.

२२. मरीचि.

२३. महाभारत.

२४. यम.

२५. याज्ञवल्क्य.

---

* Cited in the text as Manu's, but not found in Manusmriti.

* Cited in the text as Manu's, but not found in Manusmriti.

† Cited in the text as Manu's but not found in Manusmriti.

* Cited in the text as Manu's but not found in Manusmriti.

२६. लौगाक्षि.

२७. वसिष्ठ.

२८. विषतन्त्र.

२९. विष्णु.

३०. वृद्धमनु.

३१. वृद्धयाज्ञवल्क्य.

३२. वृद्धविष्णु.

† Referred to as विष्णुवचनं (P. 484, L. 18) but not found in the विष्णुस्मृति edited by Jolly.

३५. शङ्ख.

३६. शङ्खलिखितौ.

३७. श्रुति.

३८. संग्रहकार.

३९. संवर्त.

४१. हारीत.

* Those marked with an asterisk are given as Hārita's by Mādhavāchārya but they are also found in Nārada.

* Those marked with an asterisk are given as Hārita's by Mādhavāchārya but they are also found in Nārada.

THE GENERAL INDEX OF QUOTATIONS
VOL. III, PARTS I AND II.

आ

घ

च

त

प

भ

म

र

ष

ह

APPENDIX

BEING

BṚIHAT PARÂŚARA SAMHITÂ

BY

SUVRATA MUNI

WITH

VARIOUS READINGS, TABLE OF CONTENTS, &c.

पूरणिका ।

बृहत्पराशरसंहिता

सुव्रतमुनिप्रोक्ता ।

भूमिका, पाठान्तराणि, विषयानुक्रमणिकेत्येतैः सहिता।

PREFATORY REMARKS ON BRIHAT-PARÂŚARA DHARMA SAṂHITÂ.

A.—This is an old manuscript of the Bṛihat-Parâśara Saṃhitâ. It belongs to the Government of Bengal, and is deposited in the library of the Asiatic Society of Bengal, at Calcutta. It was placed at my disposal by the order of the Government of Bengal. It contains 170 folios. There are 10 lines on a page, and each line contains about 35 letters. The last page is lost; in the absence of which the date and other particulars of the manuscript cannot be known. Its appearance is very old. Possibly it was written at least some 400 years ago. It is in old Devanâgarî character and is generally correct.

B.—This manuscript belongs to the Elphinstone College Library, Bombay. It is written on thick Portuguese paper. It consists of 65 folios, broad in size, with 18 lines on each side, and 45 letters in each line. It has no date; it has a neat appearance, and the copying is tolerably correct. It was placed at my disposal by Mr. Nârâyanrâv Dâsô Banahatti, B.A., then Fellow and Librarian of the said College.

C.—This is a lithograph compilation of 28 different Smṛitis, under the name of Dharmaśâstra Saṃgraha, published in the year 1805 of Śalivâhana era, by Mahâdeva Śâstri Amrâpurkar and Hariprasâda Bhagiratha. It is very incorrect, faulty, and carelessly printed.

D.—This is also an old manuscript, belonging to the Deccan College Collection of 1887-88, No. 251. It was written in Vikrama Samvat 1779 and Śaka 1655. Either the Samvat or the Śaka year, here, is not correct, but it is difficult to state positively which one is so. The colophon to this manuscript runs thus :—इति बृहत्पाराशरे धर्मशास्त्रे सुव्रतप्रोक्तायां धर्मसंहितायां द्वादशमोऽध्याय। स्वस्ति. संवत् १७७८ शके १६५५ प्रवर्तमाने मासोत्तम मास कार्तिक शुक्लपक्षे चतुर्थां गुरुवासरे ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितंमया। यदिसुद्धमशुद्धं वा मम दोषो न दीयते ॥.

The manuscript contains 105 pages. The first five pages appear to have been written at a later date, for the size of the paper and the writing also differ from the size of the rest of the pages and the writing on them. The first five pages have six lines on each side and in each line 35 letters. While from the sixth page to the end there are 10 lines on each side and 51 letters in each line. The characters are Devanâgarî of the North India style. This book came to me through Dr. R. G. Bhandarkar. Its appearance is old, and it is very incorrect.

E.—This book belongs to the Ânandâśrama collection of Poona. It was lent to me by my friend, the late Mr. Mahâdev Chimnâji Âpte, the founder of that institution. It consists of 126 pages. Each page has 10 lines, and each line 31 letters. It is written in Kâyastha Devanâgarî character, is very incorrect, and its age is unknown.

F.—This book belongs to the Government of Bengal, and was kindly lent to me by the order of the Government of Bengal from the library of the Asiatic Society. It consists of 89 pages. On each side of the page there are 10 lines, and each line contains 56 letters. Its colophon reads ॥ इतिश्री वृद्धपराशरे धर्मशास्त्रे सुव्रतप्रोक्त संहितायां योगापदेशो नाम द्वादशोध्यायः ॥ ६९ ॥ संवत १८६३. The characters are Devanâgarì, and the paper, white-colored country paper. From the above colophon it is clear that the manuscript is a copy of वृद्धपराशर.

VÂMAN ŚÂSTRI ISLÂMPURKAR.

Girgaum, Bombay, 15th March, 1911.

NAMES OF THE AUTHORS AND OTHERS OCCURRING IN THE TEXT OF THE BRIHATPARÂŚARA-SAMHITÂ.

श्री

TABLE OF CONTENTS OF BRIHÂTPARÂSARA.

अथ बृहत्पराशरसंहितायाः विषयानुक्रमणिका ।

॥ अथ षष्ठोऽध्यायः ॥

॥ अष्टमोऽध्यायः ॥

॥ अथ नवमोऽध्यायः ॥

॥ अथ दशमोऽध्यायः ॥

॥ अथ एकादशोऽध्यायः ॥

॥ अथ द्वादशोऽध्यायः ॥

समाप्तेयमनुक्रमणिका.

ओं नमः श्रीगणेशाय ।

अथ बृहत्पराशरसंहिता प्रारभ्यते ।

॥ प्रथमोऽध्यायः ॥

व्यक्ताव्यक्ताय देवाय वेधसेऽनन्ततेजसे ।
नमस्कृत्य[1] प्रवक्ष्यामि धर्मान् पाराशरोदितान् ॥ १ ॥
अथातो हिमशैलाग्रे देववदारुवनाश्रये[2] ।
व्यासमेकाग्रमासीनं पर्यपृच्छन्मुनीश्वराः[3] ॥ २ ॥
मनुष्याणां[4] हितं धर्मं वर्तमाने कलौ युगे ।
वर्णानामाश्रमाणां च किञ्चित्[5] साधारणं वद ॥ ३ ॥
युगेषु त्रिषु[6] ये प्रोक्ता धर्मा मन्वादिभिर्मुने ।
शक्यन्ते नैव ते कर्तुं वर्णैराश्रमवासिभिः[7] ॥ ४ ॥
स पृष्टो मुनिभिर्व्यासो बहुभिः[8] परिवारितः ।
प्रष्टुं जगाम पितरं धर्मान्पराशरं ततः ॥ ५ ॥
सर्वेषामाश्रमाणां च वरे बदरिकाश्रमे ।
स विवेश[9] आश्रमे तस्मिन् तनुं योगीव वेधसः[10] ॥ ६ ॥
नानापुष्पलताकीर्णे फल-पुष्पैरलङ्कृते[11] ।
नदी-प्रस्रवणानेक[12]पुण्यैतीर्थोपशोभिते ॥ ७ ॥

---

१. A. C. and D. read नमस्कृत्वा for नमस्कृत्य. २. C. and D. read °वनाश्रमे for °वनाश्रये. ३. C. and D. read ऋषयः प्रष्टुमागताः, B. E. and F. द्विजाः पृच्छन्ति धार्मिकाः both for पर्यपृच्छन्मुनीश्वराः. ४. A. C. and D. read मानुषाणां for मनुष्याणां. ५. B. reads काञ्चित् for किञ्चित्. ६. D. reads युगे-युगेषु for युगेषु त्रिषु. ७. F. reads आश्रमचारिभिः for आश्रमवासिभिः. ८. A. C. and D. substitute मुनिभिः for बहुभिः; while A. C. D. E. and F. substitute परिवेष्टितः for परिवारितः. ९. B. C. E. and F. read संविवेश for स विवेश. १०. B. E. and F. read योगीव वेधसस्तनुम् and C. महायोगी च वेधसः both for तनुं योगीव वेधसः. ११. F. reads अलङ्कृतैः; while B. and E. फलैः पुष्पैः for अलङ्कृते and फल-पुष्पैः respectively. १२. B. C. D. E. and F. read प्रस्रवणानेकैः for °प्रस्रवणानेक°.

मृग-पक्षिभिरासेव्ये देवतायतनावृते ।
यक्ष-गन्धर्व-सिद्धानां नृत्य-गीतसमाकुले ॥ ८ ॥
तस्मिन्नृषिसभामध्ये शक्तिपुत्रं पराशरः ।
सुखासीनो महातेजा मुनिमुख्यगणावृतः ॥ ९ ॥
कृताञ्जलिपुटो भूत्वा व्यासस्तु मुनिभिः सह ।
प्रदक्षिणाभिवादैश्च मुनिभिः प्रतिपूजितः ॥ १० ॥
ततः सन्तुष्टमनसा पराशरमहामुनिः ।
व्यासस्य स्वागतं ब्रूयादासीनो मुनिपुङ्गवः ॥ ११ ॥
वत्स सुस्वागतं तेऽस्तु महर्षीणां समन्ततः ।
कुशलं कुशलेत्युक्त्वा व्यासोऽपृच्छदतःपरम् ॥ १२ ॥
यदि जानासि मां भक्तं स्नेहोऽस्ति यदि वा मयि ।
धर्मं कथय मे तात अनुग्राह्योऽस्म्यहं यदि ॥ १३ ॥
श्रुतास्ते मानवा धर्मा गार्गेया गौतमास्तथा ।
वासिष्ठाः काश्यपाश्चैव तथा गोपालकस्य च ॥ १४ ॥
अत्रेर्विष्णोश्च सांवर्ता दाक्षाश्चाङ्गिरसास्तथा ।

१. We follow here only A.; while all others substitute आकीर्णे for आसेव्ये. २. C. D. and F. read °सिद्धैश्च for °सिद्धानां. ३. E. reads सक्थिपुत्रः for शक्तिपुत्रः, but it seems incorrect. ४. A. B. and E. read °ऽभिवाद्यैश्च for °ऽभिवादैश्च; while B. and E. परिपूजितः for प्रतिपूजितः. ५. A. and D. substitute पाराशर° for पराशर°. ६. A. reads मुनिसत्तमः for मुनिपुङ्गवः. ७. B. E. and F. read वत्साद्य स्वागतं. C. वत्सस्य स्वागतं and D. वशस्य स्वागतं all for वत्स सुस्वागतं. ८. A. C. D. and F. substitute आसीनानां समन्ततः; while A. adds हि before आसीनानां and C. and D. substitute तेन for तेऽस्तु. ९. A. reads कुशलेन for कुशले इति १०. A. B. and E. read पृच्छत्यत : परम्, D. and F. पृच्छत्ततः परम् both for ऽपृच्छत : परम्. ११. A. reads स्नेहो वा यदि वा मयि, C. D. and F. स्नेहो वा यदि वत्सल both for स्नेहोऽस्ति यदि वा मयि. १२. E. reads ब्रूहय for कथय. १३. A. reads अनुग्राह्योस्तु, C. and D. अनुग्राह्योऽहि both for अनुग्राह्योऽस्मि; while F. कुरुष्वानुग्रहं मम for अनुग्राह्योऽस्म्यहं यदि. १४. A. and D. substitute तु and F. च both for ते. १५. A. C. D. and F. read आत्रेया विष्णुसांवर्ता; while C. and D. substitute °संवर्ताः for °सांवर्ताः. १६. C. substitutes दक्षा for दाक्षाः and A. C. D. and F. आङ्गिरसः for आङ्गिरसाः.

शातातपाश्च हारीता याज्ञवल्क्यकृतास्तथा ॥ १५ ॥
आपस्तम्बकृता धर्माः शङ्खस्य लिखितस्य च ।
कात्यायनकृताश्चैव प्रचेतोगदितास्तथा ॥ १६ ॥
श्रुतिरात्मोद्भवा तात श्रुत्यर्था मानवाः स्मृताः ।
मन्वर्थः सर्वधर्माणां कृतादित्रियुगेषु च ॥ १७ ॥
धर्मं तु त्रियुगाचारं न शक्यं हि कलौ युगे ।
वर्णानामाश्रमाणां च किंचित्साधारणं वद ॥ १८ ॥
व्यासवाक्यावसाने तु मुनिमुख्यः पराशरः ।
सुखासीनो महातेजा इदं वचनमब्रवीत् ॥ १९ ॥
म्रियन्ते नैव वेदाश्च न चापि प्रभवन्ति ते ।
न कश्चिद्वेदकर्ताऽस्ति वेदस्मर्ता चतुर्मुखः ॥ २० ॥
तथा स धर्मं स्मरति मनुः कल्पान्तरान्तरे ।
अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे ॥ २१ ॥
अन्ये कलियुगे नृणां युगह्रासानुरूपतः ।
तपः परं कृतयुगे त्रेतायां ज्ञानमेव च ॥ २२ ॥

---

१. D. reads हारीत-याज्ञवल्क्यकृताः for हारीता याज्ञवल्क्यकृताः. २. A. reads शङ्खा लैखितिकाः, D. सशङ्खलिखिताः; while F. reads this line.—

आपस्तम्बाश्च ते धर्माः शंख-लिखितकास्तथा ।.

३. C. प्राचेतसकृताः, D. प्रचेतसकृताः and F. प्रचेतःकृतकाः all for प्रचेतोगदिताः. ४. B. reads श्रुतेरात्मोद्भवाः for श्रुतिरात्मोद्भवा. ५. C. reads श्रुत्यर्थाः, but corrects श्रुत्यर्थमानवाः; while B. E. and F. substitute तथा for स्मृताः. ६. C. and D. read मन्वर्थसर्वधर्माणां for मन्वर्थः सर्वधर्माणां. ७. D. reads स शक्यं for न शक्यं; while C. D. A. F. substitute तु for हि. ८. F. reads °ऽवसानेषु for °ऽवसाने तु. ९. D. reads नैवाति° for न चापि. १०. E. reads वेदकर्ता for वेदस्मर्ता. ११. B. and E. read स्मरन्ति ते धर्मं कल्पे and A. and D. स धर्मं स्मरति कल्पे both for स धर्मं स्मरति मनुः; while F. reads नित्यं स्मरति तद्धर्मं कल्पे for तथा स धर्मं स्मरति मनुः. १२. C. reads कल्पान्तरे ततः for कल्पान्तरान्तरे. १३. B. reads युगभासानुरूपतः, C. युगमासानुरूपतः and E. युगहासानुरूपतः all for युगह्रासानुरूपतः; while F. substitutes °ऽनुसारतः for °ऽनुरूपतः. १४. B. and E. read ज्ञानमुत्तमम्, C. D. and F. ज्ञानमुच्यते for ज्ञानमेव च.

द्वापरे यज्ञमेवाहुर्दानमेकं[1] कलौ युगे ।
कृते तु मानवा धर्मास्त्रेतायां गौतमस्य च[2] ॥ २३ ॥
द्वापरे शाङ्ख-लिखिताः[3] कलौ पाराशराः स्मृताः ।
त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ॥ २४ ॥
द्वापरे कुलमेकं तु कर्तारं च[4] कलौ युगे ।
कृते[5] तु लिप्यते देशस्त्रेतायां ग्राम एव च ॥
द्वापरे कुलमेकं तु कलौ कर्ता विलिप्यते ॥ २५ ॥
कृते[6] सम्भाष्य पतति त्रेतायां स्पर्शनेन च[7] ।
द्वापरे भक्षणेऽन्नस्य[8] कलौ पतति कर्मणा ॥ २६ ॥
अभिगम्य कृते दानं त्रेतायामभिमन्त्र्य च[9] ।
द्वापरे याच्यमानं[10] तु सेवया[11] दीयते कलौ ॥ २७ ॥
अभिगम्योत्तमं दानं मध्यमं[12] साभिमन्त्रणम् ।
अधमं याच्यमानं स्यात्सेवादानं[13] तु निष्फलम् ॥ २८ ॥
कृते त्वस्थिगताः[14] प्राणास्त्रेतायां मांससंश्रिताः[15] ।

---

१. B. reads दानमेव and C. दानमेव for दानमेकं. २. F. reads गौतमाः स्मृताः for गौतमस्य च. ३. B. D. and F. read शंख-लिखिताः and C. शंख-लिखितौ both for शाङ्ख-लिखिताः. ४. A. and F. substitute तु for च. ५. This and the following one line are omitted by A. D. and F.; C. also omits the same, but it appears in marginal correction. ६. B. reads कृते पतति सम्भाष्य, C. and D. कृते सम्भाष्य पतितेः and E. कृते पतति सङ्गतात् all for कृते सम्भाष्य पतति. ७. B. E. and F. substitute तु for च. ८. E. substitutes तस्य for ऽन्नस्य; while C. reads पतितकर्मणा for पततिकर्मणा. ९. A. C. and E. read साभिमन्त्रणं and B. अभिमन्त्रणम् for अभिमन्त्र्य च; while D. त्रेतामाहूय दीयते for त्रेतायामभिमन्त्र्य च. १०. A. reads याच्यमानस्य and F. याच्यमानस्य for याच्यमान तु. ११. A. reads कलौ सेवाय दीयते, B. and E. कलौ दीयेत सेवया and F. सेवकाय कलौ युगे all for सेवया दीयते कलौ. १२. A. C. D. and F. read आहूतं चैव मध्यमम् for मध्यमं साभिमन्त्रणम्. १३. A. reads दानं सेवाय निःफलम् and F. सेवायां निष्फलं स्मृतम् both for सेवादानं तु निष्फलम्; while C. and D. substitute च for तु. १४. A. B. and C. read धातुगताः for त्वस्थिगताः. १५. A. and D. read मांसमेव च and F. मांसमाश्रिताः for मांससंश्रिताः

द्वापरे रुधिरं यावत् कलावन्नाद्यमेव च ॥ २९ ॥
कृते तात्क्षणिकः शापस्त्रेतायां दशभिर्दिनैः ।
मासेन द्वापरे ज्ञेयः कलौ संवत्सरेण तु ॥ ३० ॥
युगेयुगेषु ये धर्मास्तेषु धर्मेषु ये द्विजाः ।
तेषां निन्दा न कर्तव्या युगरूपा द्विजोत्तमाः ॥ ३१ ॥
धर्मश्च सत्यमायुश्च तुर्यांशेन कलौ युगे ।
अन्नादस्तदनाद्यस्य तुच्छमायुरकार्यतः ॥ ३२ ॥
धर्मश्च लोकदम्भार्थं पाषण्डार्थं तपस्विता ।
विविधा वाग्वञ्चनार्थं कलौ सत्यानुकारिणी ॥ ३३ ॥
अल्पक्षीर-घृता गावो ह्यल्पसस्या च मेदिनी ।
स्त्रीजनन्यः स्त्रियः सर्वाः सुखार्थं कृतमैथुनाः ॥ ३४ ॥
पुरुषाश्च जिताः स्त्रीभी राजानो दस्युभिर्जिताः ।
जितो धर्मश्च पापेन अनृतेन तथा ऋतम् ॥ ३५ ॥
शूद्राश्च ब्राह्मणाचाराः शूद्राचारास्तथा द्विजाः ।
अन्त्यानुयायिनश्चाद्या वर्णास्तदुपजीविनः ॥ ३६ ॥
कृतं तु ब्राह्मणयुगं त्रेता तु क्षत्रियं युगम् ।

---

१. B. and C. read कलावन्ननिषेविणः, D. कलौ स्वन्नाद्यमेव च, and F. लौ चान्नाद्यमेव च all for कलावन्नाद्यमेव च. E. also follows to B. and ., but adds तु before अन्न°. २. B. C. and F. read तत्क्षणिकः for त्क्षणिकः. ३. A. and F. read °युगे च for °युगेषु. ४. F. substitutes for ये. ५. A. D. and F. read ते द्विजा नावमन्तव्याः for तेषां निन्दा न र्तव्या. ६. B. reads धर्मः सत्यं सत्यसायुश्चतुर्थांशे for धर्मश्च सत्यमायुश्च र्यांशेन. ७. B. and E. read स्थितः for युगे. ८. D. reads this line—

अशनात्तश्नाद्यस्य तुच्छमायुरकार्यतः ॥;

ile C. अशनात्तदनाद्यत्वं and B. अदनात्तद्नाद्यत्वं for अदनात्तदनाद्यस्य D. reads तपस्विनः for तपस्विता. १०. B. C. E. and F. read धनार्थं ात् for वञ्चनार्थं. ११. C. and D. read सत्यानुसारिणी for सत्यानुकारिणी. . B. substitutes °क्षीरास्तथा and E. °क्षीरकृता for °क्षीर-घृताः. १३. B. d D. substitute स्वल्प° for ह्यल्प°. १४. C. and D. read रत्यर्थं for सुखार्थं. . B. and E. read निर्जिताः स्त्रीभिर्भूपाला for च जिताः स्त्रीभी राजानो. . B. and E. read सत्यं च वितथैर्जितम्; while A. adds हि before ऋतम्. . D. reads आद्या for आद्या and F. आद्यवर्णाः for आद्या वर्णाः.

वैश्यं तु द्वापरयुगं कलिः[1] शूद्रयुगं स्मृतम् ॥ ३७ ॥
चातुर्वर्णिकनारीणां तथा तुरीयजन्मनाम्[2] ।
पति-द्विजात्युपास्त्यापि[3]-धर्मोऽधर्मो महती कलौ ॥ ३८ ॥
[4]शतेन या कृते वर्षे फलाप्तिः पुरुषस्य च[5] ।
स्याद्दत्तैर्दशभिर्नृणां फलाप्तिः सा[6] कलौ युगे ॥ ३९ ॥
[7]कृते यन् कोटिदस्य स्यात् त्रेतायां लक्षदस्य तत् ।
द्वापरेऽयुतदस्य स्यात् शतदस्य कलौ फलम् ॥ ४० ॥
[8]युगस्वरूपमाख्यातमन्यच्च[9] गदतः शृणु ।
वर्णानामाश्रमाणां च सर्वेषां धर्मसाधनम् ॥ ४१ ॥
मृगः कृष्णश्चरे[10]द्यत्र स्वभावेन महीतले ।
वसेत्तत्र द्विजातिस्तु शूद्रो यत्र तु[11] तत्र तु ॥ ४२ ॥
हिमपर्वत-विन्ध्याद्र्योर्विनशन-प्रयागयोः[12] ।
मध्ये तु पावनो देशो म्लेच्छदेशस्ततः परम् ॥ ४३ ॥
देशेष्वन्येषु या नद्यो धन्याः सागरगाः शुभाः ।
तीर्थानि यानि पुण्यानि मुनिभिः[13] सेवितानि च ॥ ४४ ॥
वसेयुस्तदु[14]पान्तेऽपि शमिच्छन्तो द्विजातयः ।

---

१. B. reads कलि for कलिः. २. D. reads °जन्मनी for °जन्मनाम्; while C reads चातुर्वर्णक° for चातुर्वर्णिक°. ३. C. substitutes उपास्त्यादि for उपास्त्यापि; while D. reads यति-द्विजाभ्युपास्त्यादि for पति-द्विजात्युपास्त्यापि. ४. This verse does not appear in B. and E. ५. C. and D. substitute सा for च. ६. C. and D. read दत्तेषु दशभिर्नृणां फलाप्तिः स्यात् for स्याद्दत्तैर्दशभिर्नृणां फलाप्तिः सा. ७. This verse does not appear in A. and D., C. also omits it, but gives in marginal correction and interchanges the place and puts before शतेन या कृते, &c. ८. This and the following two lines are omitted in A., but they appear in marginal correction. ९. A. C. and D. read अन्यद्विगदतः शृणु for अन्यच्च गदतः शृणु. १० B. reads कृष्णो मृगो and E. कृष्णा मृगा both for मृगः कृष्णः. ११. B. reads तु तत्र नु for तु तत्र तु. १२. A. reads हिमवान् प्रयागयोः, C. हिमांशेन प्रयागयोः, F. कुरुक्षेत्र-प्रयागयोः all for विनशन-प्रयागयोः; while D. °विन्ध्याद्रौ विनाशेन प्रयागयोः for °विन्ध्याद्र्योर्विनशन-प्रयागयोः through mistake. १३. A. reads पुण्यान्याश्रितानि for मुनिभिः सेवितानि. १४. A. omits this whole line; while B. C. E. and F. read तदुपान्तेषु for तदुपान्तेऽपि; while D. शमिच्छन्ताः for शमिच्छन्तो.

मुनिभिः सेवितत्वाच्च पुण्यदेशः प्रकीर्तितः ॥ ४५ ॥
यत्र पानमपेयस्य देशेऽभक्ष्यस्य भक्षणम् ।
अगम्यागामिता यत्र तं देशं परिवर्जयेत् ॥ ४६ ॥
एवं देशः समाख्यातो यज्ञियस्तु द्विजन्मनाम् ।
एवमेवानुवर्त्तेरन् देशं धर्माभिकाङ्क्षिणः[5] ॥ ४७ ॥
वसन्[6] वा यत्र तत्रापि स्वाचारं न विवर्जयेत् ।
षट्कर्माणि च कुर्वीरन्निति धर्मस्य निश्चयः ॥ ४८ ॥
पराशरश्च यत् प्राह शास्त्रं पुत्रस्य वत्सलः ।
अथ[10] तत्सम्प्रवक्ष्यामि द्विजकर्मादिकं द्विजाः ॥ ४९ ॥
षट्कर्म-वर्णधर्माश्च प्रशंसा गोवृषस्य च ।
अदोह्य-वाह्यौ यौ तत्र[11] सीरं सीरप्रयोगिणाम् ॥ ५० ॥
अमावास्यानिषिद्धानि ततश्च[12] पशुपालनम् ।
अन्न-तोयप्रशंसा च वाह्या[13]ऽवाह्या वसुन्धरा ॥ ५१ ॥
अयथार्थ[14]कृषौ पापं तदघस्यापि शोधनम् ।
बलिं[15] सीतामखं चापि विवाहाः कन्यकावराः ॥ ५२ ॥
स्त्री-पुन्धर्मौ[16] मखाः पञ्च द्विजातिस्वर्गसाधनाः ।
विधिः प्राणाऽग्निहोत्रस्य आधानादिकसंस्कृतिः[17] ॥ ५३ ॥

---

१. B. and F. read सेवितत्वेन for सेवितत्वाच्च. २. A. adds तु before अपेयस्य. ३. A. reads अगम्यागामिनो, B. and E. अगम्यागमनं both for अगम्यागामिता. ४. A. B. and E. read याज्ञिको हि for यज्ञियस्तु. ५. B. C. D. E. and F. read धर्मानुकाङ्क्षिणः for धर्माभिकाङ्क्षिणः. ६. A. B. E. and F. read उषित्वा for वसन् वा. ७. B. and E. read प्रकुर्वीरन् for च कुर्वीरन्. ८. C. and D. read स्वयं प्राह for च यत् प्राह. ९. B. reads स्वसुतवत्सलः for पुत्रस्य वत्सलः. १०. C. and D. read अयातः for अथ तत्. ११. A. B. E. and F. substitute तौ तु for तत्र and B. अदोह्य-वाह्यो for अदोह्य-वाह्यौ; while C. क्षीरं क्षीरप्रयोक्तृणः and D. क्षीरं क्षीरप्रयोक्तृणा both for सीरं सीरप्रयोगिणाम्. १२. B. substitutes तपश्च for ततश्च. १३. C. reads वाह्या वा स्वा for वाह्याऽवाह्या. १४. C. and D. read अयार्थकृषतो पापं तदस्यापि for अयथार्थकृषौ पापं तदघस्यापि. १५. D. reads बर्हि for बलिं and विवाहः for विवाहाः. १६. D. reads स्त्रीषु धर्मौ for स्त्री-पुन्धर्मौ; while F. स्त्री-पुन्धर्मौ. १७. B. E. and F. read निषेकादिकसंस्कृतिः for आधानादिकसंस्कृतिः.

व्रतचर्यादितद्धर्मः प्रशंसा पुत्रजन्मनः ।
कृत्स्नो गृहस्थधर्मश्च भक्ष्याऽभक्ष्यं तथैव च ॥ ५४ ॥
निषिद्धवस्तुकथनं पाकशुद्धिस्ततः परम् ।
द्रव्याणां च तथा शुद्धिरुपाकर्मादिकर्म च ॥ ५५ ॥
अनध्यायास्तथा श्राद्धं विप्र-काल-हविर्युतम् ।
बलिर्नारायणीयश्च सूतकाशौचमेव च ॥ ५६ ॥
परिषत्प्रायश्चित्तानि तद्व्रतानि द्विजोत्तमाः ।
विधिवत्सर्वदानानि तेषां चैव फलानि च ॥ ५७ ॥
भूमिदानप्रशंसा च विशेषो विप्र-कालयोः ।
इष्टापूर्त्तौ तथा विद्वन् तयोर्भिन्नफलानि च ॥ ५८ ॥
प्रतिग्रहविधिस्तद्वद्यथा यस्य प्रतिग्रहः ।
विनायकादिशान्तीनां विधयोऽथ द्विजोत्तमाः ॥ ५९ ॥
वानप्रस्थस्य धर्मोऽथ तथा धर्मो यतेरपि ।
चतुराश्रमभेदोऽपि वपुर्निन्दा तथैव च ॥ ६० ॥
योगोऽर्चिर्धूममार्गौ च कालं रुद्रान्तमेव च ।
दृष्ट्यातीतं परं ध्येयं सर्वमेतत्पराशरः ॥ ६१ ॥

---

१. B. reads °व्रतधर्मः for °दितद्धर्मः; while A. and E. substitute च for °दि°; F. reads ब्रह्मचर्या च for व्रतचर्यादि° ; while D. substitutes °तद्धर्माः for °तद्धर्मः. २. C. reads कृत्स्ना गृहस्थधर्माः. ३. E. reads भक्ष्याऽभक्ष्या तथैव for भक्ष्याऽभक्ष्यं तथैव. ४. A. C. D. and F. read तथा पुनः for ततः परम्. ५. C. reads द्रव्याणि for द्रव्याणां. ६. D. reads उपाकर्माणि for उपाकर्मादि°; while F. substitutes वा for the latter च. ७. D. reads विप्राः for विप्र°. ८. E. reads स्नातकाशौचम् for सूतकाशौचम्. ९. C. reads यथा द्विज and A. and D. यथा द्विजाः for द्विजोत्तमाः. १०. C. reads तयोः पृथक्, D. and F. पृथक् तयोः for तयोर्भिन्न°. ११. A. reads परिग्रह° and परिग्रहः for प्रतिग्रह° and प्रतिग्रहः respectively. १२. D. substitutes तस्य for यस्य; while B. and E. तत्र for तद्वत्. १३. C. and D. read विधयश्च for विधयोऽथ. १४. This verse is omitted in B.; while C. D. and F. substitute ऽपि for ऽथ. १५. B. and E. read विधूममार्गौ for ऽर्चिर्धूममार्गौ. १६. B. and E. read भद्रान्तमेव and C. भद्रान्तमेव both for रुद्रान्तमेव; while A. कलिरुद्रान्तमेव for कालं रुद्रान्तमेव and F. कालरुद्रान्त° for कालं रुद्रान्त°. १७. B. and E. दिष्टातीतं परं, C. and D. दृष्टं च तत्परं and F. दिष्टातीतपरं all for दिष्ट्यातीतं परं.

प्रोक्तवान् व्याससुख्यानां शेषं मुनिविभाषितम् ।
नियुक्तः सुव्रतः शेषख्यापनाय द्विजन्मनाम्[1] ॥ ६२ ॥

पराशरो व्यासवचो निशम्य[2]
यदाह शास्त्रं चतुराश्रमार्थम् ।
युगानुरूपं च समस्तवर्ण-[3]
हिताय वक्ष्यत्यथ सुव्रतस्तत् ॥ ६३ ॥

शक्तिसूनोरनुज्ञातः सुतपाः सुव्रतस्त्विदम् ।
चतुर्वर्णाश्रमाणां[4] च हितं शास्त्रमथाब्रवीत् ॥ ६४ ॥

इति श्रीबृहत्पाराशरीये[5] धर्मशास्त्रे व्यासप्रश्ने[6] सुव्रतप्रोक्तायां संहितायां शास्त्रसङ्ग्रहोद्देशकथनं[7] नाम प्रथमोऽध्यायः ॥ १ ॥

---

१. A. C. D. and F. read शेषं विप्राणां ख्यापनाय च for शेषख्यापनाय द्विजन्मनाम्; while B. शेषं ख्यापनाय द्विजन्मनाम् for the same. २. B. reads ऽवगम्य and C. ऽधिगम्य for निशम्य. ३. D. °वर्णा हिताय for °वर्ण-हिताय. ४. A. B. C. E. and F. read चतुर्णामाश्रमाणां for चतुर्वर्णाश्रमाणां. ५. A. and F. read पाराशरे for पाराशरीये. ६. A. omits व्यासप्रश्ने; while A. C. D. E. and F. omit सुव्रतप्रोक्तायां संहितायां. ७. A. omits शास्त्र°; while B. reads शास्त्रे for the same.

बृहत्पराशरसंहिता ।

द्वितीयोऽध्यायः ।

[1]पराशरमतं पुण्यं पवित्रं पापनाशनम् ।
वि[2]हितं ब्राह्मणार्थाय धर्मसंस्थापनाय च ॥ १ ॥
चतुर्णामपि वर्णानामाचारो धर्मपालनम् ।
आचारभ्रष्ट[3]देहानां भवेद्धर्मः पराङ्मुखः ॥ २ ॥
षट्कर्माभिरतो नित्यं देवताऽतिथिपूजकः ।
हुतशेषं च[4] भुञ्जानो ब्राह्मणो नावसीदति ॥ ३ ॥

([5]व्यास उवाच) ।

कर्माणि कानीह कथं च तानि
कार्याणि वर्णैश्च किमाद्य[6]कानि ।
तेषामनेहा[7]करणे विधिश्च
सर्वं प्रसादात् प्रतनुष्व मह्यम् ॥ ४ ॥

([8]पराशर उवाच) ।

कर्मषट्कं[9] प्रवक्ष्यामि यत् कुर्वन्तो द्विजातयः ।
गृहस्था अपि मुच्यन्ते संसारै[10]र्बन्धहेतुभिः ॥ ५ ॥
[11]अथोद्देशक्रमं शास्त्रं यच्छ्रुतं [12]श्रुतिदृष्टिकृत् ॥
तदुक्तं क[13]र्म यत् पुंसां शृणुध्वं पापनाशनम् ॥ ६ ॥

---

१. C. adds श्री before पराशरमतं. २. A. C. and D. read चिन्तितं for विहितं. ३. B. E. and F. read आचारहीन° for आचारभ्रष्ट°. ४. B. C. D. E. substitute तु for च. ५. व्यास उवाच does not appear in any of the manuscripts, but the following verse plainly contains questions, and as the preceding verses belong to Parâśara, these questions must be of Vyâsa. ६. E. and. F. read किमादिकानि for किमाद्यकानि; while B. कर्माणि कानि च कथं हि for कर्माणि कानीह कथं च. ७. F. reads अनेहाः for अनेहा°. ८. This also does not appear in any of the MS., but the nature of following verses seems to be of Parâśara. ९. B. E. and F. read तत्षट्कर्म for कर्मषट्कं. १०. B. and. E. read °र्दृढबन्धनैः, F. °र्गृहबन्धनः both for °र्बन्धहेतुभिः. ११. D. reads यथो° for अथो°. १२. D. reads श्रुतिहर्षकृत् for श्रुतिदृष्टिकृत्. १३. B. C. E. and F. read तदुक्तकर्मकृत् for तदुक्तं कर्म यत्; while D. substitutes तत् for यत्.

संध्या स्नानं जपश्चैव देवतानां च पूजनम् ।
वैश्वदेवं[1] तथाऽऽतिथ्यं षट्कर्माणि दिने दिने ॥ ७ ॥
प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डित एव वा ।
वैश्वदेवे तु सम्प्राप्तः सो ऽतिथिः स्वर्गसङ्क्रमः ॥ ८ ॥
सन्ध्यामथ[2] प्रवक्ष्यामि देवता-काल-नामभिः ।
वर्णर्षि-च्छदन्सा युक्ता यद्विधा[3] च प्रकीर्तिता ॥ ९ ॥
यावन्मन्त्रा[4] यथोपास्तिरुपस्पर्शनमेव च ।
आवाहनं विसर्गं च यावन्मन्त्र[5]क्रमेण तु ॥ १० ॥
दिवसस्य च रात्रेश्च सन्धिः[6] सन्ध्येति कीर्तिता ।
सोपास्या सद्विजैर्[7]यत्नात् स्यात्तैर्विश्वमुपासितम् ॥११ ॥
मध्याह्ने[8] ऽपि च सन्धिः स्यात् पूर्वस्याह्नः परस्य च ।
पूर्वाह्नो[9] ह्यपराह्नस्तु क्षपा[10] चेति श्रुतिक्रमः ॥ १२ ॥
पूर्वा[11] सन्ध्या तु गायत्री ब्रह्माणी[12] हंसवाहना ।
रक्तपद्मारुणा देवी रक्तपद्मासनास्थिता ॥ १३ ॥
रक्ताभरणभासाङ्गा[13] रक्तमाल्याम्बरा तथा ।

---

१. C. reads वैश्वदेवस् for वैश्वदेवं. २. B. C. and E. read अथ सन्ध्यां for सन्ध्यामथ. ३. A. reads यावद्विचार्य यथार्चनम्, but gives the marginal reading यद्विधा च प्रकीर्तिता. B. reads युक्ता याद्विधा च यथोचिता, C. and D. युक्तं याद्विधानं यथार्चनम्; F. also reads the same, but differs युक्तां for युक्तं and E. युक्तां यद्विधां च यथार्चिताम् all for युक्ता यद्विधा च प्रकीर्तिता. ४. B. and. C. read यावन्मंत्रं for यावन्मंत्रा, E. यावन्मन्त्रान्यथोपास्ति° for यावन्मन्त्रा यथोपास्ति°; while A. B. E. and. F. read °रूपंस्पर्शनं for °रुपस्पर्शन°. ५. B. C. E. and F. read यावन्मात्रं, D. यावन्मानं both for यावन्मन्त्र°. ६. D. reads सन्ध्यः for सन्धिः; while B. substitutes गीयते for कीर्तिता. ७. C. and F. read स द्विजैः for सद्विजैः. ८. C. reads मध्याह्नोऽपि for मध्याह्नेऽपि; while A. B. C. and F. read पूर्वस्याह्नोऽपरस्य and D. पूर्वस्याऽह्नः परस्परम् both for पूर्वस्याह्नः परस्य च. ९. A. B. C. and E. पूर्वाह्णोऽ पराह्णः for पूर्वाह्णो ह्यपराह्णः; while B. and E. substitute च for तु. १०. C. reads क्षिपा चेति श्रुतिक्रमात्, E. क्षिया चेति श्रुतिक्रमः and D. क्षये चेति श्रुतिक्रमात् all for क्षपा चेति श्रुतिक्रमः. ११. D. and F. read पूर्वसन्ध्या for पूर्वा सन्ध्या. १२. A. C ब्राह्मणी and D. reads ब्रह्मणः for ब्रह्माणी; while C. हंसवाहिनी for हंसवाहना. १३. A. reads °भारसाङ्गा for °भासाङ्गा; while B. रक्ताभरणरक्ताङ्गी for रक्ताभरणभासाङ्गा and E. रक्ताभरणभराङ्गा for the same.

अक्षमाला स्रग्धरा च वरहस्ता ऽमरार्चिता ॥ १४ ॥
प्रागादित्योदयाद् विद्वान् मुहूर्ते वैधसे सति ।
उत्थायोपासयेत् सन्ध्यां यावत् स्यादर्कदर्शनम् ॥ १५ ॥
'विश्वमातः सुराभ्यर्च्ये पुण्ये गायत्रि वैधसि ।
आवाहयाम्युपास्त्यर्थं एह्येनोघ्नि पुनीहि माम्' ॥ १६ ॥
सन्ध्या माध्याह्निकी श्वेता सावित्री रुद्रदेवता ।
वृषेन्द्रवाहना देवी ज्वलत्रिशिखधारिणी ॥ १७ ॥
श्वेताम्बरधरा श्वेता नागाभरणभूषिता ।
श्वेतस्रगक्षमाला च कृतानुरक्तिशङ्करा ॥ १८ ॥
जलाधारा धरा धात्री धरेन्द्राङ्कभवा तथा ।
स्वैभाविभातभूराद्या सुरौघनुतपाद्कया ॥ १९ ॥
'मातर्भवानि विश्वेशि विश्वे विश्वजनार्चिते ।
शुभे वरे वरेण्यैहि आहूतासि पुनीहि माम्' ॥ २० ॥

---

१. A. reads स्रग्वरा for स्रग्धरा and C. and D. ध्रुवाधारा चाऽहस्ता for स्रग्धरा च वरहस्ता. २. Before this verse B. inserts the following verse:—

प्रातः सन्ध्यां सनक्षत्रामुपासीत यथाविधि ।
सादित्यां पश्चिमां सन्ध्यामर्धास्तमितभास्कराम् ॥.

३. B. reads वैधसि स्थिते and D. वैधत्रे सति for वैधसे सति. ४. A. reads अंहो जहि, D. एनोऽस्ति, and F. अंहोघ्नि for एनोघ्नि. ५. A. B. E. and F. read शम्भुदेवता for रुद्रदेवता. ६. A. reads° त्रिशूल° for °त्रिशिख°; while D. बालत्रिशिख° for ज्वलत्रिशिख°. ७. D. reads नानाभरणभूषिता for नागाभरणभूषिता. ८. F. reads °माल्या च for °माला च; while A. C. and D. substitute ऽपि for च. ९. A. C. and D. read °रक्तशङ्करा for °रक्तिशङ्करा; while B. E. °रक्तिशाङ्करा for the same. १०. B. C. E. and F. read जलाधारधरा धात्री for जलाधारा धरा धात्री; while A. जलाधारा वीरजटा for the same. ११. A. B. E. and F. read धरेन्द्राद्रिभवा for धरेन्द्राङ्कभवा; while D. substitutes ऽभवा for तथा. १२. B. reads this line thus :—

स्वभावभूरिभूषाढ्या स्वराढ्याऽनुत्तमाऽद्वया ।
स्वभावभावभूराद्या स्वराद्यनुतपाद्कया ॥.

A. E. स्वराद्यनुत° and F. स्वरादिनुत°. for सुरौघनुत°. १३. A. E. and F. read विश्वेशी for विश्वेशि. १४. A. reads ऽद्य्हि आहूतैः B. E. and F. एहि आहूतैः for एहि आहूतासि; while D. reads वरेण्याहि आहूता हि for वरेण्यैहि आहूतासि.

सन्ध्या सायन्तनी कृष्णा विष्णुदैवी सरस्वती ।
खगगा कृष्णवस्त्रा तु शङ्खचक्रगदाधरा ॥ २१ ॥
कृष्णस्रग्भूषणैर्युक्ता सर्वज्ञानमया वरा ।
सर्ववाग्देवता सर्वा ब्रह्मादिवचसि स्थिता ॥ २२ ॥
वीणा-ऽक्षमालिका-चापहस्ता स्मितवरानना ।
चतुर्दशजनाभ्यर्च्या कल्याणी शुभवाक्प्रदा ॥ २३ ॥
मातर्वाग्देवि वरदे वरेण्ये वचनप्रदे ।
सर्वामरगणस्तुत्ये आहूतैहि पुनीहि माम् ॥ २४ ॥
ब्रह्मेशार्क-हरीणां तु संगमस्तूभयोर्भवेत् ।
माध्याह्निकायां सन्ध्यायां सर्वदेवसमागमः ॥ २५ ॥
पूजाभिकाङ्क्षिणो ये च ये च केचिज्जलार्थिनः ।
श्राद्धान्नभागधेया ये ये चाग्निहुतभागिनः ॥ २६ ॥
अन्यान्युच्चावचानीह स्थावराणि चराणि च ।
माध्याह्निकीमपेक्षन्ते तेषामाप्यायनी हि सा ॥ २७ ॥
यस्तस्यां नार्चयेद्देवांस्तर्पयेन्न पितॄंस्तथा ।
भूतान्युच्चावचानीह सोऽन्धतामिस्रमृच्छति ॥ २८ ॥
ईशान्याभिमुखो भूत्वा द्विजः पूर्वमुखोऽपि वा ।

१. A. and D. read विष्णुदेवा for विष्णुदेवी. २. D. स्वर्गगा and F. खे माया. for खगगा. ३. B. and E. substitute च for तु. ४. D. reads कृष्णभूभूषणैर् for कृष्णस्रग्भूषणैर्. ५. B. and E. read °मया च सा, F. °मया ऽभया, and C. °मयि परा all for °मया वरा. ६. B. and E. read °देवताः for °देवता. ७. We follow here only A.; while B. reads °चार° and C. D. °चारु° for° चाप°; and E. and F. quite mistaken. ८. A. reads °हस्ता स्मितचारुजनानना for °चापहस्ता स्मितवरानना; while D. reads स्मिता for स्मित°. ९. D. reads शुभकप्रदा for शुभवाक्प्रदा. १०. A. C. D. and F. read मातर्वाग्देवते देवि for मातर्वाग्देवि वरदे. ११. D. reads च वरप्रदे for वचनप्रदे. १२. D. सर्वमहद्गणस्तुत्ये for सर्वामरगणस्तुत्ये. १३. D. reads आहूते हि पुनाहि for आहूतैहि पुनीहि. १४. D. reads सङ्गमोऽस्तूभयोः for सङ्गमस्तूभयोः. १५. B. C. and E. read सर्वे देवाः समागताः for सर्वदेवसमागमः. १६. D. reads किंचित् for केचित्. १७. D. substitutes आज्य° for श्राद्ध°. १८. B. C. D. E. and F. read माध्याह्निकाम् and आप्यायना for माध्याह्निकीम् and आप्यायनी, but C. and D. read आप्यायिका for आप्यायनी. १९. D. reads तर्पयेत for तर्पयेन्न. २०. B. reads ईशानाभिमुखः C. and D. ईशान्यभिमुखो for ईशान्याभिमुखो.

सन्ध्यामुपासयेद्विद्वान्यथावत्तन्निबोधत ॥ २९ ॥
आ मणेर्बन्धनाद्धस्तौ पादौ चाऽऽजानुतः शुचिः ।
प्रक्षाल्याऽऽचामयेद्विद्वानन्तर्जानुकरो द्विजः ॥ ३० ॥
निर्मलाफेनपूताभिर्मनोज्ञाभिः प्रयत्नवान् ।
आचामेद्ब्रह्मतीर्थेन पुनराचमनाच्छुचिः ॥ ३१ ॥
मुखनिर्मार्जनं कृत्वा द्विस्तेनैवाधरान् यथा ।
अद्भिश्च संस्पृशेत् खानि सर्वाण्यपि विशुद्धये ॥ ३२ ॥
अङ्गुष्ठेन प्रदेशिन्या सव्यपाणिस्थवारिणा ।
घ्राणं संस्पृश्य नेत्रे च तेनानामिकया श्रुती ॥ ३३ ॥
नाभिं च तत्कनिष्ठाभ्यां वक्षः करतलेन च ।
शिरः सर्वाभिरंसौ च ह्यङ्गुल्यग्रैश्च संस्पृशेत् ॥ ३४ ॥
आचम्य प्राणसंरोधं कृत्वा चोपस्पृशेत् पुनः ।
अत्रोपस्पर्शने मन्त्रं प्रातः केचित् पठन्ति हि ॥ ३५ ॥
सूर्यश्चमेति मन्त्रेण प्रातराचमनं स्मृतम् ।
'आपः पुनन्तु' मध्याह्ने सायमग्निश्चमेति च ॥ ३६ ॥
मन्त्राभिमन्त्रितं कृत्वा कुशपूतं च तज्जलम् ।
आचम्य विधिवद्धीमान् सन्ध्योपासनमाचरेत् ॥ ३७ ॥

---

१. B. C. D. and E. read यद्वत्तथावत् for विद्वान्यथावत् ; while C. substitutes उपासते for उपासयेत्. २. B. and E. read आमणिबन्धनात् for आ मणेर्बन्धनात्. ३. A. B. C. read आचमयेत् for आचामयेत् ; while D. ह्याचमेत् for the same. ४. D. reads निर्मलात् for निर्मला°. ५. C. D. read आचमेत् for आचामेत्. ६. A. C. D. and F. read वस्त्र° for मुख°. ७. A. ऽपरानया, B. and E. ऽपराण्यपि, C. and F. ऽपराण्यथ and D. ऽपराण्यथा for ऽधरान् यथा ; while F. substitutes तथैव for तेनैव. ८. D. reads नासिकया for ऽनामिकया. ९. B. C. D. and E. omit हि. १०. D. reads अनम्य for आचम्य. ११. B. and E. read उपसर्जने for उपस्पर्शने. १२. A. and D. read मध्याह्ने पुनन्त्वापो विपर्ययम् and omit the following whole line—

मन्त्राभिमन्त्रितं कृत्वा कुशपूतं च तज्जलम् ।,

but D. reads मध्याह्नं पुनन्त्वापो ; while F. does not insert the whole verse. १३. B. reads जलं तथा and A. C. E. and F. तथा जलम् both for च तज्जलम्. १४. A. C. and F. read आरभेत् for आचरेत् ; while F. substitutes धर्मात् for धीमान्.

सोङ्कारां चैव गायत्रीं जप्त्वा व्याहृतिपूर्विकाम्[1] ।
आपोहिष्ठादि जल्पन्ति च्छन्दो-देवर्षिपूर्वकम्[2] ॥ ३८ ॥
छन्दोभिर्विनियोगैश्च मन्त्र-ब्राह्मणसंयुतम् ।
एतद्धीनं न कुर्वीत कुर्याच्चेत् स्यात्[3] सदासुरम् ॥ ३९ ॥
मृत्युभीतैः पुरा देवैरात्मनश्छादनाय च ।
छन्दांसि संस्मृतानीह च्छादितास्तैस्ततो[4] ऽमराः ॥ ४० ॥
छादनाच्छन्द उद्दिष्टं वाससीवाथ[5] वाऽऽकृतेः ।
छन्दोभिरावृतं सर्वं विद्यात् सर्वत्र नान्यथा[6] ॥ ४१ ॥
यस्मिन्मन्त्रे[7] तु यो देवस्तेन देवेन चिह्नितम् ।
मन्त्रं तद्दैवतं[8] विद्यात् सैव[9] तस्य तु देवता ॥ ४२ ॥
येन यदृषिणा दृष्टं सिद्धिः प्राप्ता तु येन वै ।
मन्त्रेण तस्य स प्रोक्तो[10] मुनेर्भावस्तदात्मकः ॥ ४३ ॥
यत्र कर्मणि चारब्धे जप-होमार्चनादिके[11] ।
क्रियते येन मन्त्रेण विनियोगस्तु[12] स स्मृतः ॥ ४४ ॥
अस्य मन्त्रस्य चाऽर्थो ऽयमयं[13] मन्त्रोऽत्र वर्तते ।
तत्तस्य ब्राह्मणं[14] ज्ञेयं मन्त्रस्येति श्रुतिक्रमः ॥ ४५ ॥
एतद्धि पञ्चकं ज्ञात्वा क्रियते कर्म यद्विजैः ।
तदनन्तफलं तेषां भवेद्वेद[15]निदर्शनात् ॥ ४६ ॥
एकांशेनापि[16] यन्न्यूनं कुर्यात् कर्म द्विजोत्तमाः[17] ।

---

१. C. and F. read °पूर्वकाम् and D. °पूर्वकम्. २. B. E. and F. read °देवता-ऋषिपूर्वकम् for °देवर्षिपूर्वकम्. ३. D. reads ह्येतत् for चेत् स्यात् ४. D. reads अतः for ततः. ५. A. and F. वाससी कृतिरेव वा, B. C. E. वाससी वाथ वा कृते and D. वाससी कृतिरेव च all for वाससी वाथ वा ऽऽकृतेः. ६. B. C. D. and E. read नान्यतः for नान्यथा. ७. B. substitutes सत्रे for मन्त्रे; while E. substitutes च for तु and D. ये देवास्तेन मन्त्रेण for यो देवस्तेन देवेन. ८. B. and E. read नद्दैवतं for तद्दैवतं; while D. substitutes यत् for तत्. ९. B. and E. substitute सेति for सैव; while C. reads सन्ति तत्र तु देवता and D. सन्तितस्तत्र देवता for सैव तत्र तु देवता. १०. D. reads संप्रोक्ते for स प्रोक्तो. ११. B. reads °दिकैः for °दिके. १२. B. and E. read नियोगस्तस्य संस्मृतः A. also reads the same, but corrects स स्मृतः for संस्मृतः ; while F. विनियोगश्च तस्य सः for विनियोगस्तु स स्मृतः १३. D. reads अधः for अर्थः and ऽनुवर्तते for ऽत्र वर्तते. १४. D. reads ब्रह्मणा for ब्राह्मणो. १५. F. reads वेदे for वेद.° १६. D. reads अकामेनापि for एकांशेनापि. १७. A. E. and F. read ऽद्विजो मतिः, C. and D. द्विजोऽपि यः for द्विजोत्तमाः.

तेनासौ हन्यते कर्ताऽमृतो गर्ह्यत्वमृच्छति[1] ॥ ४७ ॥
कुर्वन्नज्ञो द्विजः कर्म जप-होमादि किञ्चन[2] ।
नासौऽ तस्य फलं विन्देत् क्लेशमात्रं[3] हि तस्य तत् ॥ ४९ ॥
आपद्यते स्थाणु गर्तं स्वयं वाऽपि[4] प्रलीयते ।
यातयामानि च्छन्दांसि भवन्त्यफलदान्यपि[5] ॥ ५० ॥
सिन्धुद्वीप[6] ऋषिश्छन्दो गायत्री ऋक्षु तिसृषु ।
आपो हि दैवतं प्राहुरापोहिष्ठादिषु द्विजाः ॥ ५१ ॥
गाधिजो[7] राजपुत्रस्तु द्रुपदायामृषिर्भवेत्[8] ।
आनुष्टुभं भवेच्छन्द आपश्चैव तु दैवतम् ॥ ५२ ॥
अघमर्षणसूक्तस्य ऋषिरेवाघमर्षणः[10] ।
छन्दोस्यानुष्टुभं प्राहुरापश्चैव तु दैवतम् ॥ ५३ ॥
सौत्रामण्यावभृतके विनियोगोऽस्य कल्पितः ।
उदुत्यमृषिः[11] प्रस्कण्वो गायत्रं सूर्यदेवता ॥ ५४ ॥
चित्रमित्यत्र कुत्सस्तु शक्वरी सूर्यदैवतम्[12] ।
प्रणवो भूर्भुवः स्वश्च गायत्र्यापो ऋचां[13] त्रयम् ॥ ५५ ॥
द्रुपदाघमर्षणं सूक्तं मार्जने व्याहरेदिति ।
स्मृतिभिः परिशिष्टैश्च विशेषस्तोयसेचने[14] । ५६ ॥
उक्तोऽधोर्ध्वविभागेन[15] कर्तव्यः सोऽपि सद्द्विजैः[16] ।
आपोहिष्ठेति च ऋचामष्टाक्षरपदेन[17] च ॥ ५७ ॥

---

१. A. B. and E. read गर्तत्वम्, D. गन्ताऽन्धम् for गर्ह्यत्वम्, C. also reads the same as D., but corrects गर्ह्यत्वम्. २. D. reads कञ्चन for किञ्चन. ३. A. reads कर्मफलाप्तः स्यात् तस्य for फलं विन्देत्; while D. substitutes कर्ममात्रं for क्लेशमात्रं. ४. A. substitutes च for वा. ५. B. and E. read फलदानि for ऽफलदानि. ६. B. and E. read °द्वीपर्षिश्च्छन्दो वै for °द्वीप ऋषिश्छन्दो. C. also follows this, but adds वै in the marginal correction after च्छन्दो. ७. A. B. E. and F. read कोकिलो and D. गोभिलो for गाधिजो. ८. B. and E. read द्रुपदायामर्षं उच्यते, A. द्रुपदायार्षमुच्यते and F. द्रुपदा ऋषिरुच्यते all for द्रुपदायामृषिर्भवेत्. ९. D. gives this verse after प्रणवो भूर्भुवः स्वश्च, &c. C. also omits it, but gives in marginal correction. १०. A. E. and F. read अघमर्षणम् for अघमर्षणः. ११. B. C. E. read उदुत्यमिति for उदुत्यमृषिः. १२. C. D. E. and F. read सूर्यदेवता for सूर्यदैवतम्. १३. A. reads गायत्र्यापो ह्यृचां, D. गायत्र्याप ऋचा both for गायत्र्यापो ऋचां. १४ A. and E. read °संवने for °सेचने. १५. D. reads उल्का ऽधोर्द्ध° for उक्तोऽधोऽर्ध्व°. १६. B. C. D. F. read स for सद्. १७. A. and D. read ऽयृचमष्टाक्षरपदं न च for ऋचामष्टाक्षरपदेन च. E. also reads the same; while C. substitutes त्रिऋचा° for च ऋचा°.

पादान्ते तु क्षिपेद्वारि पादमध्ये न च क्षिपेत् ।
भूमौ मूर्ध्नि तथाऽकाशे मूर्ध्न्याकाशे पुनर्भुवि ॥ ५८ ॥
एवं वारि द्विजः सिञ्चन् तर्पयेत् सर्वदेवताः ।
ऋगन्ते मार्जनं कुर्यात् पादान्ते वा समाहितः ॥ ५९ ॥
ऋगर्धे वा प्रकुर्वीत शिष्टानां मतमीदृशम् ।
उदुत्यं, चित्रं देवानामुपस्थाने नियोजयेत् ।
हंसः शुचि षदित्यादि केचिदिच्छन्ति सूरयः ॥ ६० ॥
अव्याकृतमिदं ह्यासीत् सदेवासुर-मानुषम् ।
संक्षोभायासृजद्ब्रह्मा सप्तेमा व्याहृतीः पुरा ॥ ६१ ॥
भूर्भुवः स्वर्महर्जनस्तपः सत्यं तथैव च ।
आद्यास्तिस्रो महाप्रोक्ताः सर्वत्रैव नियोजनात् ॥ ६२ ॥
अग्निर्वायुस्तथा सूर्यो बृहस्पत्याप एव च ।
इन्द्रश्च विश्वेदेवाश्च देवताः समुदाहृताः ॥ ६३ ॥
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ।
त्रिष्टुप् च जगती चैव च्छन्दांस्येतान्यनुक्रमात् ॥ ६४ ॥
भरद्वाजः कश्यपश्च गौतमोऽत्रिस्तथैव च ।
विश्वामित्रो जमदग्निर्वसिष्ठश्चर्षयः क्रमात् ॥ ६५ ॥
एताभिः सकलं व्याप्तमेताभ्यो नास्ति चापरम् ।
सप्तैते स्वर्गलोका वै सत्यादूर्ध्वं न विद्यते ॥ ६६ ॥

---

१. A. B. C. E. and F. read this line thus :—

पदान्ते प्रक्षिपेद्वापि पदमध्ये तु न क्षिपेत् ।.

२. C. and D. substitute तथा for पुनः. ३. A. C. and D. omit this verse :—

एवं वारि द्विजः सिञ्चन् तर्पयेत् सर्वदेवताः ।
ऋगन्ते मार्जनं कुर्यात् पादान्ते वा समाहितः ॥;

while C. gives in the marginal correction the following one line which is an additional one :—

पुनर्मूर्ध्नि पुनर्मूर्ध्नि आकाशे च पुनर्भुवि ।.

४. B. and C. read संक्षेपेण and E. F. संक्षेपाय for संक्षोभाय; while C. reads सृजन् for ऽसृजद्. ५ D. readc सप्तमा for सप्तेमाः. ६. A. सर्वत्र तानि योजयेत्, B. E. and F. तासां सर्वत्र योजना, both for सर्वत्रैव नियोजनात्. ७. A. B. E. and F. read आदित्यो for सूर्यो. ८. B. and E. omit च; while C. D. substitute ऋषिः for ऋषयः. ९. A. सत्यस्योर्ध्वं च for सत्यादूर्ध्वं न.

तस्माल्लोकात् परा मुक्तिरर्वाचीनादपेक्षया[1] ।
प्राणसंयमनेष्वेता अभ्यस्या[2]: पूरकादिभिः ॥ ६७ ॥
ओमापोज्योतिरित्येतच्छिरः पश्चात् प्रयुज्यते[3] ।
प्रत्योङ्कारसमायुक्तो मन्त्रोऽयं तैत्तिरीयके ॥ ६८ ॥
अत्रोङ्कारवदार्षादि विदुर्ब्रह्मविदो जनाः ।
प्रणवाद्यन्तगायत्री प्राणायामेष्वयं विधिः ॥ ७० ॥
गायत्र्यादिकचित्रान्तैर्मन्त्रैश्च प्रागुदीरितैः ।
उपासीरन्द्विजास्तावद्यावन्नो[4]देति भास्करः ॥ ७१ ॥
गवां वालपवित्रेण यस्तु[5] सन्ध्यामुपासते ।
सर्वतीर्थाभिषेकं तु लभंते[6] नात्र संशयः ॥ ७२ ॥
गोवालं[7] दर्भसारं च खड्गं कनकमेव च ।
दर्भ-ताम्र[8]-तिलैर्वापि एतैस्तर्पणकृद्[9]- द्विजाः ॥ ७३ ॥
स सन्तर्प्य पितृन्देवानात्मानं त्रिदिवं नयेत् ।
त्रिंशत्कोट्यस्तु[10] विख्याता मन्देहा नाम राक्षसाः ॥ ७४ ॥
उद्यन्तं[11] ते विवस्वन्तं बलादिच्छन्ति खादितुम् ।
दिने दिने सहस्रांशुरलक्ष्यैस्तैरभिद्रुतः ॥ ७५ ॥
भानुर्हीनः[12] कृतस्तूर्णं तद्वश्यत्वमिवागतः ।
अतस्तस्य च तेषां च ह्यभूद्युद्धं[13] सुदारुणम् ॥ ७६ ॥
किं भविष्यति युद्धेऽस्मिन्नित्यभूत्सुरविस्मयः ।
अरुणस्य च ये बाणा ज्वलन्तो[14] ये च भास्वतः ॥ ७७ ॥
विलक्ष्यास्[15]ते निवर्तन्ते मन्देहानामदर्शनात् ॥ ७८ ॥

---

१. A. reads °ह्यपेक्षया and D. °पेक्षया both for °दपेक्षया. २. A. B. and E. read अभ्यस्ता for अभ्यस्याः. ३. F. omits ओम्. ४. B. C. and E. substitute च for न. ५. A. and B. read ये तु for यस्तु. ६ A. reads लभन्ते. for लभते ७. D. and E. read गोवालदर्भसारं च. for गोवालं दर्भसारं च. ८. C. दर्भं ताम्र-तिलम् and D. दर्भ-ताम्र-तिलं both for दर्भ-ताम्र-तिलैः. ९. A. reads तर्पणकैः. for तर्पणकृद् ; while A. and B. substitute एभिः for एतैः. १०. B. reads अशक्तो यस्तु for त्रिंशत्कोट्यस्तु. ११. B. reads उत्पतन्ते for उद्यन्तं ते. १२. B. C. D. E. read भानुर्हीनः for भानुर्हीनः; while B. and E. substitute नित्यं for तूर्णं. १३. B. and E. read भवेद् for ह्यभूद्. १४. A. C. and F. read ये ज्वलन्तो विवस्वतः for ज्वलन्तो ये च भास्वतः. १५. C. reads विलक्षाः for विलक्ष्याः and F. विलक्षणाः for the same.

रवेरप्यंशवो ह्यस्माद्यातायोता[1] ह्यशक्तितः ।
अप्राप्य[2] च शरीराणां स्वामिन्येव[3] लयं गताः ॥ ७९ ॥
हेषाशब्दमकुर्वाणाः शफ[4]स्फुरणवर्जिताः ।
स्तब्धाङ्गा निर्जवा जाताः[5] सूर्यस्यन्दनवाजिनः ॥ ८० ॥
ततो देवगणाः सर्वे ऋषयश्च[6] तपोधनाः ।
यत् सन्ध्यां ते उपासन्तः[7] क्षिपन्त्येतज्जलं महत् ॥ ८१ ॥
ओङ्कारब्रह्मसंयुक्तं गायत्र्याचाभिमन्त्रितम् ।
दह्यन्ते[8] तेन ते दैत्या वज्रीभूतेन वारिणा ॥ ८२ ॥
सहस्रांशो[9] रथे तिष्ठन् योऽधीयान[10]श्चतुः श्रुतीः ।
याज्ञवल्क्यः समास्यैतत्त्रिदशा[11]नुक्तवांस्तथा ॥ ८३ ॥
मत्वेत्य[12]नुदितादित्ये सन्ध्योपास्तिकरो भवेत् ।
उदिते[13] सति या सन्ध्या बालक्रीडोपमा हि[14] सा ॥ ८४ ॥
सन्ध्या येन न विज्ञाता ज्ञात्वा[15] नैव ह्युपासिता ।
स जीवन्नेव[16] शूद्रत्वमवगच्छति सान्वयः ॥ ८५ ॥

---

१. B. and E. read °यातो for °याता.; while A. °व्यशक्तितः and B. स्वश-क्तितः for ह्यशक्तितः. २. B. and C. आप्राप्ताश्च and E. and D. अप्राप्तान्° for अप्राप्या च. ३. B. reads स्वात्मन्येव and D. स्वामिनैव both for स्वा-मिन्येव. ४. B. substitutes शब्द° for शफ°. ५. C. reads निर्जया जाताः, D. निर्जयाज्जाता both for निर्जवा जाताः. ६. B. and E. read मुनयः for ऋषयः. ७. B. and E. read this line as follows:—

ते सन्ध्यां यदुपासन्तः क्षिपन्ति तज्जलं महत् ।;

while C. D. read उपासीत and C. D. and F. substitute प्रक्षिपन्ति for क्षिपन्त्येतत्. ८. C. and D. read दह्येरन् for दह्यन्ते. ९. D. reads सहस्रांशुरथे for सहस्रांशो रथे. १०. B. E. read ऽधीयाय for ऽधीयानः. ११. A. reads विबुधान्, B. तद्दशान् and C. ऋषीशान् all for त्रिदशान्; while E. and F. are quite mistaken. D. reads ततः for तथा. १२. B. reads मत्वेति, C. and D. सत्वे तु for मत्वेति; while D. substitutes अनुदिशा° for अनुदिता° and E. अनुदिना° for the same. १३. Before this line C. inserts in the marginal correction the following verse :—

सन्ध्याहीनो शुचिर्नित्यमनर्हः सर्वकर्मसु ।
यत्किञ्चित्कुरुते कर्म न तस्य फलभाग्भवेत् ॥.

It appears to occur in other Smritis. १४. C. and D. substitute च for हि. १५. A. सन्ध्यायैर्न, B. and E. नच सन्ध्या both for ज्ञात्वा नैव. १६. A. B. E. and F. read जीवन्नपि for जीवन्नेव. A. and F. शूद्रःस्यान्महापा-तकसंयुतः, B. and E. शूद्रःस्यात्सदापातकसंयुतः and D. शूद्रश्च ह्याशु गच्छति सान्वयः all for शूद्रत्वमवगच्छति सान्वयः.

मान्त्रं पार्थिवमाग्नेयं वायव्यं दिव्यमेव च ।
वारुणं मानसं चेति सप्त स्नानान्यनुक्रमात् ॥ ८६ ॥
शं न आपस्तु वै मान्त्रं मृदालम्भं तु पार्थिवम् ।
भस्मना स्नानमाग्नेयं गवां रेणुभिरानिलम् ॥ ८७ ॥
आतपे सति या वृष्टिर्दिव्यं स्नानं तदुच्यते ।
बहिर्नद्यादिके स्नानं वारुणं प्रोच्यते बुधैः ॥ ८८ ॥
यद्ध्यानं मनसा विष्णोर्मानसं तत् प्रकीर्तितम् ।
असामर्थ्येन कायस्य कालशक्त्याद्यपेक्षया ॥ ८९ ॥
तुल्यफलानि सर्वाणि स्युरित्याह पराशरः ।
स्नानानां मानसं स्नानं मन्वाद्यैः परमं स्मृतम् ॥ ९० ॥
कृतेन येन मुच्यन्ते गृहस्था अपि तु द्विजाः ।
दिव्यादीनां त्रयाणां तु स्नानानामौषसं परम् ॥ ९१ ॥
सर्वैः पापहरं प्राहुः प्राजापत्यव्रताधिकम् ।
उषस्युषसि यत् स्नानं क्रियतेऽनुदिते रवौ ।
प्राजापत्येन तत्तुल्यं महापातकनाशनम् ॥ ९२ ॥
प्रातरुत्थाय यो विप्रः प्रातःस्नायी सदा भवेत् ।
सर्वपापविनिर्मुक्तः परं ब्रह्माधिगच्छति ॥ ९३ ॥
अस्नातो नाचरेत् कर्म जप-होमादि किंचन ।
क्लिद्यन्ते हि सुगुप्तानि इन्द्रियाणि क्षरन्ति च ॥ ९४ ॥
अङ्गानि समतां यान्ति उत्तमान्यधमैः सह ।
अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः ॥ ९५ ॥

---

१. A. D. and F. read गोरेणुनाऽऽनिलं स्मृतम् for गवां रेणुभिरानिलम्. २. I. reads आदित्ये for आतपे. ३. B. and E. read तद्दिव्यं स्नानमेकधा for दिव्यं स्नानं तदुच्यते. B. and E. read °नैद्योदकम् for °नैद्यादिके. ५. B. and E. read तत् कीर्तितम् for प्रोच्यते बुधैः. ६. B. and E. read कथ्यते बुधैः and A. प्रोच्यते बुधैः for तत् कीर्तितम्. ७. B. and E. read सर्वाणि फलतुल्यानि, C. and D. तुल्यफलानि सर्वाणि. ८. B. omits this line. ९. C. reads सदाद्विजाः for तु द्विजाः. १०. E. omits this line. ११. C. reads °शताधिकम् for °व्रताधिकम्. १२. A. omits this and the following six lines. १३. B. E. and F. read अस्नात्वा for अस्नातो. १४. D. wrongly reads this line thus :—

विद्यन्ते च सुदमानि द्रविणानि क्षरन्ति च ।

स्रवत्येष दिवा रात्रौ प्रातःस्नानेन शुद्ध्यति ।
उषःस्नानं प्रशंसन्ति सर्वे च पितरोऽमराः ॥ ९६ ॥

दृष्टादृष्टकरं पुण्यं शंसन्ति ऋषयोऽपि हि ।
प्रातःस्नायी हि यो विप्रः सोऽर्हः स्यात्सर्वकर्मसु ॥ ९७ ॥
तत्कृतं कर्म यत्किञ्चित्तत्सर्वं स्याद्यथार्थवत् ।
अविद्वान् स्नानकाले तु यः कुर्याद्दन्तधावनम् ॥ ९८ ॥
पापीयान् रौरवं याति पितृशापहतो ध्रुवम् ।
यश्च श्मश्रुषु केशेषु यज्जलं देहलोमसु ॥ ९९ ॥
हस्ताभ्यां न तु वस्त्रेण जलं विद्वान् प्रमार्जयेत् ।
मार्जिते पितरः सर्वे सर्वा अपि हि देवताः ॥ १०० ॥
तथा सर्वे मनुष्याश्च त्यजन्त्यह्नाय तं द्विजम् ।
स्नातृसंचिन्तितं सर्वे तीर्थं पितृदिवौकसः ॥ १०१ ॥
ततोऽन्यद्यद्यसौ गच्छेन्निराशास्ते शपन्ति हि ।
यांतु स्नानार्थिनस्तीर्थं चिन्तितं तज्जलाश्रयम् ॥ १०२ ॥

---

१. C. and D. read स्रवते च for स्रवत्येष. २. B. E. F. and D. read स्नानं विशोधनम् for °स्नानेन शुद्ध्यति. ३. A. B. C. E. and F. read ऽपि for च. ४. D. reads पितरः, B. and E. मुनयः both for ऋषयः. ५. B. and E. read प्राप्नोति तत्कृतं पुण्यं सर्वं च for तत्कृतं कर्म यत्किञ्चित्तत्सर्वं; while A. omits तत्. ६. B. C. E. D. and F. read °पादहतो for °शापहतः; while B. E. and F. substitute द्विजः for ध्रुवम्. ७. D. reads यावा देहे च for यज्जलं देह°. ८. B. and D. substitute हि मार्जयेत् for प्रमार्जयेत्. ९. D. reads च for हि; while E. and F. read तोये for सर्वे. १०. D. reads त्यजेरन्नियतं for त्यजन्त्यह्नाय तं. ११. B. and E. read स्नातुः स्रवन्ति तत्सर्वं, C. स्नानं सेचन्ति ते सर्वे, D. स्नानं सञ्चिततं सर्वे and F. स्नातुः सिञ्चति तत्सर्वं all for स्नातृसंचिन्तितं सर्वे. १२. C. reads ऽन्यद्यद्यधो, D. नद्याद्यसौ for ऽन्यद्यद्यसौ; while D. reads गच्छन् for गच्छेत्. १३. D. reads this line thus :—

ये तु स्नानार्थिनस्तीर्थं सञ्चिन्तन्ति जलाश्रयान् ॥ १०२ ॥.

१४. B. and E. read °जलाशयम् for °जलाश्रयम्.

तद्देहमुपतिष्ठन्ति [१]तृप्त्यै पितृ-दिवौकसः ।
अतो न चिन्तयेत्तीर्थं [२]व्रजेदेव त्वचिन्तितम् ॥ १०३ ॥
देवखात-नदी-स्रोतस्-सरस्सु स्नानमाचरेत् ।
स्नानं नद्यादिबन्धेषु सद्भिः कार्यं सदम्बुषु ॥ १०४ ॥
कृत्रिमं [३]तोयकूपस्थं तोयं तत्र त्वकृत्रिमम् ।
न तीर्थे [४]रुयाकुले स्नायान्नासज्जनसमा[५]वृते ॥ १०५ ॥
दर्भहीनोऽन्यचि[६]त्तश्च न नग्नो न शिरोविना ।
कदाचिद्विदुषा [७]मत्या न स्नातव्यं पराम्भसा ॥ १०६ ॥
[८]अम्भःकृद्दुष्कृतांशेन स्नानकर्तापि लि[९]प्यते ।
पञ्च वा सप्त वा पिण्डान् [१०]स्नायादुद्धृत्य तत्र तु ॥ १०७ ॥
[११]वृथास्नानादिकानीह विशेषेण विवर्जयेत् ।
वृथा [१२]ह्युष्णोदकस्नानं वृथा [१३]जप्यमवैदिकम् ॥ १०८ ॥
वृथा चाश्रोत्रिये दानं वृथा भुक्तम[१४]साक्षिकम् ।
मासे नभसि न स्नायात् कदाचिन्निम्न[१५]गासु च ॥ १०९ ॥
रजस्वला भवन्त्येता वर्जयित्वा समुद्रगाः ।
नापो मूत्र-पुरीषाभ्यां नाग्निर्दहति कर्मणा ॥ ११० ॥
न स्त्री दुष्यति जारेण [१६]न विप्रो वेदकर्मणा ।
न स्नायात् क्षोभितास्व[१७]प्सु स्वयं न क्षोभयेच्च ताः ॥ १११ ॥

---

१. A. and C. read तृप्तये पितृ-देवताः, E. तृप्ता ये पितृ-देवताः for तृप्त्यै पितृ-दिवौकसः. २. B. व्रजेदेवं न चिन्तितम्, C. D. and F. व्रजेदेव तु चिन्तितम् for व्रजेदेव त्वचिन्तितम्. ३. A. B. and E. read तोयबन्धस्थम् for तोयकूपस्थं and B. and E. च कृत्रिमम् and D. तु कृत्रिमम् for त्वकृत्रिमम्. ४. B. reads आकरे for रुयाकुले. ५. B. and E. read समाकुले and D. समाश्रिते for समावृते. ६. B. and E. read ऽन्यचित्तस्तु; while A. substitutes तु for च. ७. D. reads मिथ्या for मत्या. ८. A. B. E. and F. read अम्बुकृत्° for अम्भःकृत्°. ९. A. B. E. read विलिप्यते for ऽपि लिप्यते. १०. B. and E. read स्नानात् and C. यावत् both for स्नायात्. ११. A. क्रिया° for वृथा°. १२. B. and E. substitute एव and C. and D. च for हि. १३. B. C. E. read जाप्यम् for जप्यम्. १४. F. reads असाक्षिके for असाक्षिकम्. १५. H. reads निम्नगाजले for निम्नगासु च. १६. A. B. E. and F. read ब्राह्मणो for न विप्रो. १७. D. reads आसु for अप्सु.

न निर्गतासु तीर्थाम्बु पतन्तीष्वाहृतासु च ।
रविसंक्रान्तिवारेषु ग्रहणेषु शशिक्षये ॥ ११२ ॥
व्रतेषु चैव षष्ठीषु न स्नायादुष्णवारिणा ।
न स्नायाच्छुभ्रहस्तेन नैकहस्तेन वा पुनः ॥ ११३
उद्धृताभिरपि स्नायादाहृताभिर्द्विजातिभिः ।
स्वभावाभिरनुष्णाभिरद्भिः सहेमभिर्द्विजः ॥ ११४ ॥
नवाभिर्निर्दशाहाभिरसंस्पृष्टाभिरन्त्यजैः ।
यः स्नानमाचरेन्नित्यं तं प्रशंसन्ति देवताः ॥ ११५ ॥
तस्माद्बहुगुणं स्नानं सदा कार्यं द्विजातिभिः ।
उत्साहाप्यायनं स्वान्तप्रशान्ति-शक्ति-वृद्धिदम् ॥ ११६ ॥
कीर्ति-कान्ति-वपुःपुष्टि-सौभाग्या-ऽऽयुःप्रवर्धनम् ।
स्वर्ग्यं च दशभिर्युक्तं गुणैः स्नानं प्रशस्यते ॥ ११७ ॥
सूर्यादिदिनवारोक्ततैलाभ्यञ्जनपूर्वकम् ।
हृत्ताप-कीर्ति-मरण-लक्ष्मी-स्थानाप्ति-मृत्यवः ॥ ११८ ॥
आयुश्चार्कादिवारेषु तैलाभ्यङ्गे फलं क्रमात् ।
जलावगाहनं नित्यं स्नानं सर्वेषु वर्णिषु ॥ ११९ ॥

---

१. B. reads तीर्थासु for तीर्थाम्बु, but it seems incorrect. २. F. omits this verse. ३. B. and E. read ग्रहणे च or ग्रहणेषु. ४. A. F. C. and D. read तथा for पुनः. ५. A. and F. read °स्सहेमभिस्तथा द्विजाः, D. °स्सहसाभिस्तथा द्विजः for °रद्भिः सहेमभिर्द्विजः; while C. reads °स्सहैमाभिः and B. द्विजाः for सहेमाभिः and द्विजः respectively. ६. F. reads नैर्दशाहोभिः for निर्दशाहाभिः. ७. F. does not insert this verse. ८. A. and F. read स्वान्तप्रसत्ति° B. शान्तप्रसक्ति° and E. स्वान्तप्रसत्ति° for स्वान्तप्रशान्ति°; while B. C. and E. °वृद्धिकम् for °वृद्धिदम्. ९. B. and C. कीर्तिः कान्तिर्वपुःपुष्टिः for कीर्ति-कान्ति-वपुःपुष्टि°; while E. and F. °वपुः पुष्टि or °वपुः पुष्टि°. १०. C. reads द्वादशभिः for च दशभिः. ११. B. C. E. D. and F. read दिनवारोक्तं for दिनवारोक्त°. १२. A. reads °मरणसुतास्थानाप्ति° and D. °मरण-सुत-स्थानाप्ति° for °मरण-लक्ष्मी-स्थानाप्ति°. E. follows this ending, but reads °स्थानाप्तमृत्यवम् for °स्थानाप्ति-मृत्यवः; while B. °सुतःस्थानाप्ति° and C. °सुतैः स्थानाप्त° for °लक्ष्मी-स्थानाप्ति°.

शक्तैरहरहः कार्यं तस्याथ विधिरुच्यते ।
गोशकृन्मृत्कुशांश्चैव पुष्पाणि पत्रिकां तथा ।
स्नानार्थी प्रयतो नित्यं स्नानकाले समाहरेत् ॥ ११९ ॥
स्वमनोऽभिमतं तीर्थं गत्वा प्रक्षाल्य पद्द्वयम् ।
हस्तौ चाचम्य विधिवच्छिखां बद्धैकचेतसा ॥ १२० ॥
मृदम्बुभिः स्वगात्राणि क्रमात् प्रक्षालयेद्यथा ।
पादौ जङ्घे कटिं चैव क्रमात् प्रागम्बुभिः त्रिभिः ॥ १२१ ॥
प्रक्षाल्य हस्तावाचम्य नमस्कृत्य च तज्जलम् ।
गुह्याय गुह्यमित्येतद्यजुषा प्रयताञ्जलिः ॥ १२२ ॥
ऊरुं हीति च मन्त्रेण कुर्यादापोभिमन्त्रणम् ।
विधिज्ञाः कवयः केचिमन्त्रतत्त्वार्थवेदिनः ॥ १२३ ॥
यत्र स्थाने तु यत्तीर्थं नदी पुण्यतमा तथा ।
तद्ध्यायेन्मनसा नित्यमन्यतीर्थं न चिन्तयेत् ॥ १२४ ॥
गङ्गादिपुण्यतीर्थानि कृत्रिमादिषु संस्मरेत् ।
महाव्याहृतिभिः पश्चादाचामेत् प्रयतोऽपि सन् ॥ १२५ ॥
उदुत्तममिति ह्यप्सु मन्त्रेण प्राङ्मुखो विशेत् ।
ये ऽग्नयो दिवि चेत्येतत्कुर्यादालम्भनं ततः ॥ १२६ ॥
सूर्यं पश्यञ्जलं मुक्त्वा समुत्तीर्य ततः स्थलम् ।
आचम्याथ हरेन्मृत्स्नां तथा कायं समालभेत् ॥ १२७ ॥

---

१. C. substitutes अयं for अथ and E. अर्थं° for the same. २. A. reads पत्रकं for पत्रिकां. ३. C. and D. read सदा° for समा°. ४. A. reads °ऽभिहितं and F. °ऽभिहतं. for °ऽभिमतं. ५. E. and F. read पादयम् and C. and E. पदयोः both for पद्द्वयम्. ६. B. and D. substitute च for स्व°. ७. A. B. and D. read अथ for यथा. ८. D. reads प्राणं for प्राक्°. ९. C. and D. read गुह्योपगुह्य° for गुह्याय गुह्य°. १०. D. reads अभिमन्त्रिताः for अभिमन्त्रणम्. ११. B. C. D. and E. read स्थानेषु for स्थाने तु. १२. A. reads पुण्यतदा for पुण्यतमा, C. नदीं पुण्यतरां and D. नदी पुण्यतरा all for नदी पुण्यतमा. १३. A. D. E. and F. interchange this line for the next one; while D. reads ताम् for तत्. १४. Before this line D. inserts the following line which is the same as the preceding one; but reads चापि for नित्यं. १५. B. C. E. and F. read आचमेत् for आचामेत्. १६. A. and F. read जले for जलं. १७. B. स च, C. तु तत् for ततः.

अश्वक्रान्ते रथक्रान्ते इत्याद्यपि पठन्ति हि ।
मृत्तिके हर मे पापं यन्मया पूर्वसञ्चितम् ॥ १२८ ॥

मृत्तिकाहरणे मन्त्रमिति वासिष्ठजोऽब्रवीत् ।
समालभेत्त्रिभिर्मन्त्रैरिदं विष्ण्वादिभिर्द्विजः ॥ १२९ ॥

शिरश्चांसावुरश्चोरू पादौ जङ्घे क्रमेण तु ।
भास्कराभिमुखो मज्जेदापो ह्यस्मानिति त्रिभिः ॥ १३० ॥

- उन्मृज्य सर्वगात्राणि निमज्जेच्च पुनः पुनः ।
उत्तीर्याऽऽचम्य गात्राणि गोमयेनाथ लेपयेत् ॥ १३१ ॥

मानस्तोक इति ह्युक्त्वा प्राग्वदङ्गक्रमेण तु ।
इमं मे वरुण, त्वन्नः, सत्यं नय, उदुत्तमम् ॥ १३२ ॥

मुञ्चन्त्ववभृथेत्येतैरात्मानमभिषेचयेत् ।
निमज्ज्याऽऽचम्य चाऽऽत्मानं दर्भैर्मन्त्रैश्च पावयेत् ॥ १३३ ॥

सर्वपापापनोदार्थं प्राग्वदङ्गक्रमेण तु ।
आपोहिष्ठादिकैर्मन्त्रैस्त्रिभिरन्यैश्च पावयेत् ॥ १३४ ॥

हविष्मतीरिमा आप, इदमापस्तथैव च ।
देवीराप इति द्वाभ्यामापो देवीरिति त्र्यृचा ॥ १३५ ॥

संस्मृत्य द्रुपदां देवीं शन्नो देवीरपां रसम् ।
प्रत्यङ्गं मन्त्रनवकमापोदेवी पुनन्तु माम् ॥ १३६ ॥

चित्पतिं मां पुनात्वेतन्मन्त्रेणापि च पावयेत् ।
हिरण्यवर्णा इति च पावमान्यस्तथा परम् ॥ १३७ ॥

तरत्समन्दीधावति पवित्राण्यपि शक्तितः ।
स्नानकर्मात्मकैर्मन्त्रैरन्यैरप्यम्बुदैवतैः ॥ १३८ ॥

---

१. B. and E. read विष्णुक्रान्ते वसुन्धरे for इत्याद्यपि पठन्ति हि. २. A. D. and F. do not insert this line. ३. C. and D. substitute चैत्रम् for मन्त्रम्. ४. A. reads समालंभादिभिर् for समालभेत्त्रिभिर्. ५. A. reads तिसृभिः for त्रिभिः. ६. C. and E. read उद्घृष्य and D. उद्धृत्य both for उन्मृज्य. ७. C. reads निमज्ज्य for निमज्जेत् and D. निमज्ज्याथ for निमज्जेच्च. ८. A. B. C. and E. read उपलेपयेत् for ऽथ लेपयेत्. ९. B. E. and F. read प्राग्वोदग्वा for प्राग्वदङ्ग°. १०. D. omits this and the following one line. A. also omits the same, but gives in the marginal correction. ११. A. reads त्र्यृचा and C. इत्यृचम् both for त्र्यृचा. १२. B. C. E. and F. read प्रत्येकं for प्रत्यङ्गं.

4

प्लाव्य[1]आत्मानं निमज्ज्याथ आचान्तस्त्वन्यदाचरेत्[2]।
काल-काय-प्रदेशानां तथा चैवोदकस्य च ॥ १३९ ॥
प्राकृत्ये[3] सति चैवायं विधिरन्यौ विपर्यये।
सोंकारां चैव गायत्रीं महाव्याहृतिभिः सह ॥ १४० ॥
त्रिषण्णवैकधाऽऽवर्त्य[4] स्नायाद्विद्वानपि द्विजः।
च्छन्दो-मुन्यमै[5]र्युक्तं स्वशाखास्वर[6]संयुतम् ॥ १४१ ॥
आवर्त्य प्रणवं स्नायाच्छतमर्धशतं[7] दश।
चिद्रूपं[8] परमं ज्योतिर्निरालम्बमनामयम् ॥ १४२ ॥
अव्यक्तमव्ययं शान्तं स्नायाद्वापि हरिं स्मरन्[9]।
गायत्रीवारिसंस्नातः प्रणवैर्निर्मलीकृतः ॥ १४३ ॥
विष्णुस्मरणसंशुद्धो योग्यः[10] सर्वेषु कर्मसु।
योऽधीत[11]वेदवेदार्थः स स्नातः सर्ववारिषु ॥ १४४ ॥
शुद्धयेद[12]शुचिनः स्वान्तस्तेच्छुद्धस्तु शुचिर्यतः।
मन्त्रैश्च मनसा स्नानं न गोमय[13]-मृदम्बुभिः ॥ १४५ ॥

---

१. H. substitutes पाव्य for प्लाव्य. २. A. and F. read आरभेत् for आचरेत्. ३. C. corrects प्राकृते for प्राकृत्ये; while F. प्राकृत्या सति्ते for प्राकृत्ये सति. ४. B. reads त्रिषवणं चैकधावृत्त्या स्नाति, C. त्रिषद् चैकधावर्त्य स्नायात्, E. त्रिषवणैकधावृत्त्या स्नायेत् and D. त्रिसप्ते वैकधावर्त्मा स्नानात् all for त्रिषण्णवैकधा ऽऽवर्त्य स्नायात्; while F. substitutes मर्त्यः for °वर्त्य. ५. B. and E. read °परैर् for °मरैर् and D. °मन्त्रं परैर् for °मुन्यमरैर्. ६. D. reads °क्षर° for °स्वर°. ७. B. reads शतशोर्धशतं for शतमर्धशतं; while E. शतसार्धशतं for the same. ८. E. and F. read विद्रूपं for चिद्रूपं. ९. C. and D. स्मरेत् for स्मरन्. १०. A. and F. read अर्हः for योग्यः; while D. reads °संशुद्धिस्त्वयहं for °संशुद्धो योग्यः. ११. This and the following two lines do not appear in E., and D. reads योऽधीते वेदवेदार्थं सुस्नातः for योऽधीतवेदवेदार्थः स स्नातः; while A. स्नातः सन् for स स्नातः. १२. A. B. and F. read न शुद्धेदशुचिः for शुद्धयेदशुचिनः. C. follows our reading, but corrects न शुद्धेदशुचिः. १३. C. reads गोमयं मृदमम्बुभिः for न गोमय-मृदम्बुभिः; while A. B. D. E. and F. substitute नो for न.

तैश्चेन्द्रो-खर-मत्स्याश्च स्नानस्य फलमाप्नुयुः ।
भावपूतः पवित्रः स्यान्मन्त्रपूतस्तथा नरः ॥१४६॥
उभयेन पवित्रस्तु नित्यस्नायी शुचिर्नरः ।
विधिदृष्टं तु यत् कर्म करोत्यविधिना तु यः ॥ १४७ ॥
न किंचित् फलमाप्नोति क्लेशमात्रं हि तस्य तत् ।
उत्पद्यन्ते जले मत्स्या विपद्यन्ते तु तत्र च ॥ १४८ ॥
तिष्ठन्तोऽपि च ते स्नानफलं नैवाप्नुयुर्यतः ।
विधिहीनं भावदुष्टं कृतमश्रद्धयापि च ॥ १४९ ॥
तद्धरन्त्यसुरास्तस्य मूढत्वादकृतात्मनः ।
श्रद्धा-विधिसमायुक्तं यत् कर्म क्रियते नृभिः ।
शुचिभीरेकचित्तैश्च तदानन्त्याय कल्पते ॥ १५० ॥
उदात्तमनुदात्तं च स्वरितं प्लुतमेव च ।
द्रुतं च स्वरितोदात्तं स्वरं विद्यात्तथा प्लुतम् ॥ १५१ ॥
स्वरान्तं व्यञ्जनान्तं च विसर्गान्तं तथैव च ।
सानुस्वारं पृथक्त्वं च ज्ञातव्यमपरं च यत् ॥ १५२ ॥
वृत्रं शतक्रतुर्हन्ति वज्रेण शतपर्वणा ।
यथा तथा प्रवक्तारं मन्त्रो हीनः स्वरादिभिः ॥ १५३ ॥
स्वरतो वर्णतः सम्यक् सन्ध्या-ध्यान-जपादिषु ।
सर्वे मन्त्राः प्रयोक्तव्या हीनाः स्युरफला नृणाम् ॥ १५४ ॥
नाभेरधस्तादङ्गानि क्षालयित्वा मृदम्भसा ।
उपरिष्टात् सिक्तवस्त्रो मन्त्रैः प्रोक्ष्य शुचिर्भवेत् ॥ १५५ ॥

---

१. B. C. and E. read तैर्हीनाः for तैश्चेन्द्रो°. २. B. and E. read स्नातात्, A. स्नाने and F. स्नाताः all for स्नानस्य and अवाप्नुयुः for आप्नुयुः. ३. C. reads भावपूतं पवित्रं for भावपूतः पवित्रः. ४. B. E. and F. substitute मृताः, A. हताः for यतः. ५. D. reads भवेद्दुष्ट for भावदुष्टं; while C. follows our reading, bu the correction of the same rectifies दुष्टं कृतमश्रद्धया and strikes off पि च. ६. E. substitutes यत् for च. ७. D. reads °र्यैकचित्तै : for °रेकचित्तैः; while A. and D. substitute तु for च. ८. D. reads विसर्गान्तं तथैव च for स्वरितं प्लुतमेव च. ९. B. C. and F. read ज्ञातव्यं परमं ; while E. ज्ञातव्यपरमं and D. ज्ञातमन्यपरं all for ज्ञातव्यमपरं. १०. B. C. D. E. and F. read मन्त्रहीनं for मंत्रो हीनः. ११. B. reads °स्नान° for °ध्यान°. १२. B. reads तु तन्मंत्रैस्तन्मोक्ष्याथ, A. सिक्तवस्त्रमन्त्रैर्वापि, C. सिक्तवस्त्रैर्मन्त्रैः प्रोक्ष्य, and E. सिक्तं मंत्रैः प्रोक्ष्य all for सिक्तवस्त्रो मन्त्रैः प्रोक्ष्य; while D. reads उपविष्टः; for उपरिष्टात्.

चतुरश्चतुरस्त्वंङ्घ्र्योर्द्वौद्वौ च अङ्घयोस्तथा ।
द्वौद्वौ च जानुनोर्न्यस्य ऊर्वोः पञ्च च पञ्च च ॥ १५६ ॥
द्वावप्येवं तथा गुह्ये दशद्.ोदर-वक्षसोः ।
द्वौद्वौ गले च बाह्वोश्च द्वौद्वावंस मुखेषु च ॥ १५७ ॥
द्वौद्वौ च चक्षुषोः श्रुत्योः सप्तोङ्काराश्च मूर्धनि ।
न्यस्तप्रणवसर्वाङ्गः स्नातः स्यात् सर्ववारिषु ॥ १५८ ॥
अकारं मूर्ध्नि विन्यस्य उकारं नेत्रमध्यतः ।
मकारं कण्ठदेशे तु ब्रह्मीभवति वै द्विजः ॥ १५९ ॥
अव्यङ्गाक्लिष्टधौते तु विद्वाञ्छुक्ले च वाससी ।
परिधाय मृदम्बुभ्यां करौ पादौ च मार्जयेत् ॥ १६० ॥
तद्वाससोरसम्पत्तौ शाण-क्षौमा-ऽऽविकानि च ।
कुतपं योगपट्टं वा द्विवासास्तु यथा भवेत् ॥ १६१ ॥
न जीर्ण-नीले-काषाय-माञ्जिष्ठेन तु वाससा ।
मूत्राद्युपगतेनैव शुचिः स्यान्नैकवाससा ॥ १६२ ॥
एकं वासो यथाप्राप्तं परिधाय मनःशुचिः ।
अन्यत् कृत्वोत्तरासङ्गमाचम्य प्राङ्मुखः स्थितः ॥ १६३ ॥

द्वौद्वौ च गलबाहुभ्यां द्वौद्वावंसे मुखेऽपि च ।
* समानार्थकमिदं श्लोकार्धं सर्वेष्वप्यादर्शपुस्तकेषूपलभ्यते। अतोप-रिसप्तपञ्चाशत्तमश्लोकोत्तरार्धस्य पाठान्तरभूतमिदं स्यादिति प्रतिभाति।

१. F. reads पङ्क्त्यो for अंघ्र्योर् and C. स्वङ्के for the same. २. E. reads द्वौद्वौ च गल-बाहुभ्यां; which is proper in the next third line. ३. A. B. E. F. read द्वावपि च for द्वावप्येवं. ४. A. reads दशदशोर° and D. दश द्वादश° both for °दशदशोदर°. ५. D. reads सुमुखेषु for अंसे मुखे. ६. B. reads ससोङ्काराश्च for सप्तोङ्काराश्च. ७. D. reads न रक्तवासी for शुक्ले च वाससी. ८. B. and E. read ऊरू for करौ. ९. B. and E. substitute तु. for च. १०. C. and D. read कुन्तपं for कुतपं, but it seems incorrect. ११. A. substitutes°मल° for °नील°. १२. C. and D. read तु for च. १३. B. omits this line; while A. substitutes शूद्राद्यु° for मूत्राद्यु°. १४. B. and E. substitute एवं for एकं. १५. D. reads अन्ये for अन्यत्.

प्रत्योङ्कारसमायुक्ताः प्रणवाद्यन्तकास्तथा ।[1]
महाव्याहृतयः सप्त दैवतार्षादिसंयुताः ॥ १६४ ॥[2]
प्रणवान्ता च गायत्री शिरस्तस्यास्तथैव च ।[3]
त्रिरावर्तनमेतस्याः प्राणायामो विधीयते ॥ १६५ ॥
शक्त्याऽसुसंयमं कृत्वा तथाचम्य विधानतः ।[4]
उपास्य विधिवत् सन्ध्यामुपस्थाय च भास्करम् ॥ १६६ ॥
गायत्रीं शक्तितो जप्त्वा तर्पयेद्देवताः पितॄन् ।
अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु ॥ १६७ ॥[5][6]
तृप्यतामिति सेक्तव्यं नाम्ना तु प्रणवादिना ।[7]
ब्रह्मेश-केशवान् पूर्वं प्रजापतिमथो श्रुतीः ॥ १६८ ॥[8]
छन्दो यज्ञानृषीन् सिद्धानाचार्यांस्तनयानपि ।[9][10]
गन्धर्व-वत्सरर्तूंश्च मासान् दिन-निशास्तथा ॥ १६९ ॥[11]
देवान् देवानुगांश्चैव नागान्नागकुलानि च ।[12]
सरितः सागरांस्तीर्थान् पर्वतान् कुलपर्वतान् ॥ १७० ॥
किन्नरान् खेचरान् यक्षान् मनुष्यानथ तर्पयेत् ।[13]
सनकश्च सनन्दश्च तृतीयश्च सनातनः ॥ १७१ ॥
आसुरिः कपिलश्चैव वोढुः पञ्चशिखस्तथा ।[14]
मानुषान् यातुधानांश्च तेषां चैव कुलान्यपि ॥ १७२ ॥[15]
सुपर्णांश्च पिशाचांश्च भूतान्यथ पशूंस्तथा ।
वनस्पतीनोषधींश्च भूतग्रामं चतुर्विधम् ॥ १७३ ॥[16]

---

१. D. reads प्रणवाद्युतका : for प्रणवाद्यन्तकाः. २. A. C. and D. read देवतार्षादि°, B. and E. दैवतर्ष्यादि° for दैवतार्षादि°. ३. C. and D. read गायत्र्याः for गायत्री. ४. B. reads शक्त्याऽप्सु for शक्त्याऽसु°. ५. A. omits this and the following one line. ५. D. substitutes तोयेन for सव्येन. ६. D. reads वक्तव्यं for सेक्तव्यं. ७. A. and D. substitute अथ for अथो. C. and D. श्रुतिग for श्रुतीः; while B. and E. read अथाब्रवीत् for अथ श्रुतीः. ८. B. E. and F. substitute यक्षान् for यज्ञान्, but the name appears in the fifth line next including this. ९. D. reads स्तनपायिनः for तनयानपि. १०. F. substitutes पुनः for तथा. ११. C. substitutes अपि for एव. १२. B. and E. read अप्यतर्पयेत् for अथ तर्पयेत्, but it seems incorrect. १३. B. and E. read ततः पश्चात्सनन्दकसनातनः for सनन्दश्च तृतीयश्च सनातनः. १४. E. and D. substitute वोढः for वोढुः; while C. वोढ° for the same. D. reads °शिखिः for °शिखः. १५. B. and E. read मनुष्यान् for मानुषान्. १६. D. adds च after वनस्पतीन्.

ब्रह्मादयो मयाहूता आगच्छन्त्वाददन्त्वपः[1] ।
अनृणं मां प्रकुर्वन्तु प्रसीदन्तु ममोपरि ॥ १७४ ॥
ततः पूर्वाग्रदर्भेषु साग्रेषु सकुशेषु[2] च ।
प्रादेशिकेषु[3] शुद्धेषु ब्रह्मादिभ्योऽम्बु सेचयेत्[4] ॥ १७५ ॥
अन्वारब्धापसव्येन[5] पाणिना दक्षिणे न तु ।
भूस्थदक्षिणजानुः सन् देवेभ्यः सेचयेज्जलम् ॥ १७६ ॥
देवेभ्यश्च नमः स्वाहा पितृभ्यश्च नमः स्वधा ।
मन्यन्ते कवयः केचिदित्ययं तर्पणक्रमः ॥ १७७ ॥
तर्प्यमाणेषु कर्मत्वं णिजन्तं च क्रियापदम् ।
तर्पयामि पितॄन् देवानित्याहुरपरे पुनः ॥ १७८ ॥
सिच्यमानेन तोयेन मन्यन्ते मुनयो परे ।
देवास्तृप्यन्तु पितरस्तृप्यन्त्विति निदर्शनम् ॥ १७९ ॥
उदीरतामाङ्गिरस आयन्तु नोर्जमित्यपि ।
पितृभ्यश्च स्वधायिभ्यो ये चेह पितरस्तथा ॥ १८० ॥
अग्निष्वात्तोपहूताश्च तथा बर्हिषदोऽपि च ।
येन पूर्वे च पितरः सोमपानामुदीरयेत् ॥ १८१ ॥
आवाह्य च पितॄन्नेतैरपसव्योपवीतिना ।
दक्षिणाभिमुखो द्वाभ्यां कराभ्यामम्बु सेचयेत् ॥ १८२ ॥

---

१. D. reads आगत्य ददतु स्वपः for आगच्छन्त्वाददन्त्वपः. २. A. reads च कुशेषु for सकुशेषु; while F. substitutes सकुलेषु for the same ३. B. and E. read प्रादेशकेषु for प्रादेशिकेषु. ४. C. and D. read निःक्षिपेत् for सेचयेत्. ५. A. reads अथातश्चापसव्येन, D. अन्वारभ्यापसव्येन both for अन्वारब्धापसव्येन. ६. C. reads दक्षिणो जानु भूलग्नो, D. दक्षिणे जानु भूलग्नो and B. E. F. दक्षिणजानु भूलग्नो भूस्थदक्षिणजानुः सन्; while C. सिञ्चयेत् for सेचयेत्. ७ B. reads इत्येव तर्पणे क्रमम्, E. इत्येवं तर्पणे क्रमम् and D. इत्येव तर्पणक्रमः all for इत्ययं तर्पणक्रमः. ८. B. and E. read त्यजन्तं and C. and D. निजत्वं for णिजन्तं; while F. त्यजतं for the same. ९. D. reads सिञ्चमानेन for सिच्यमानेन. १०. D. reads नियताः for पितरः. ११. D. reads अपहूताः for उपहूताः. १२. F. substitutes वा for च. १३. F. does not insert this and the following one line. १४. A. omits च. C. reads पितॄनथ तैरपसव्योपवीतिनः, E. पितॄन् तैर्मन्त्रैरपसव्योपवीतिनः, D. पितॄनेतैरथ सव्योपवीतिना, all for पितॄनेतैरपसव्योपवीतिना.

भूलग्नसव्यजानुश्च दक्षिणाग्रकुशेषु[1] च।
रुक्म-रौप्य-तिलैस्ताम्र-दर्भ-मन्त्रैः क्षिपेत् पयः॥ १८३॥
विना रौप्य-सुवर्णाभ्यां विना ताम्र-तिलैरपि।
विना दर्भैश्च मन्त्रैश्च पितॄणां नोपतिष्ठति॥ १८४॥
दर्भैर्लोहितदर्भैश्च काश-वीरण-बल्वजैः[2]।
शूकधान्य-तृणैर्वापि दर्भकार्यं श्रयेद् द्विजः॥ १८५॥
न तर्पयेत् पतन्तीभिर्विद्धानाद्भिः कथंचन[3]।
पात्रस्थाभिः सदर्भाभिः सतिलाभिश्च तर्पयेत्॥ १८६॥
वसून् रुद्रांस्तथाऽऽदित्यान्नमस्कारसमन्वितान्[4]।
एते च दिव्याः पितर एतद्दायत्तमानुषाः[5]॥ १८७॥
ध्रुवो धरश्च[6] सोमश्च आपश्चैवानलोऽनिलः।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः॥ १८८॥
अजैकपादहिर्बुध्न्यो[7] विरूपाक्षोऽथ रैवतः।
हरश्च बहुरूपश्च त्र्यम्बकश्च[8] सुरेश्वरः॥ १८९॥
सावित्रश्च जयन्तश्च[9] पिनाकी चापराजितः।
एते रुद्राः समाख्याता एकादश सुरोत्तमाः[10]॥ १९०॥
इन्द्रो धाता भगः पूषा मित्रोऽथ वरुणोऽर्यमा।
अंशुर्विवस्वांस्त्वष्टा च सविता विष्णुरेव च॥ १९१॥
एते वै द्वादशादित्या देवानां परमाः[11] स्मृताः।
एवं हि[12] दिव्याः[13] पितरः पूज्याः सर्वे प्रयत्नतः॥ १९२॥
कव्यवाहो[14] नलः सोमो यमश्चैव तथार्यमा।
अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदोऽपि च॥ १९३॥

---

१. A. substitutes °कुशेन for °कुशेषु. २. F reads °बिल्वजैः for °बल्वजैः. ३. C. reads कदाचन for कथंचन. ४. D. substitutes स्वधा° for सम°. ५. B. and E. read एतद्दायान्तु मानुषम् and C. एते दायात्तु मानुषम् both for एतद्दायत्तमानुषाः. ६. A. B. C. and D. read ऽध्वरश्च for धरश्च, but the name धर appears, in several Purâṇâs. ७. A. B. E. and F. substitute अजैकपादो for अजैकपाद् and except A. C. and D. others read अहिर्बुध्नो. ८. C. and E. interchange places of त्र्यंबकः and रैवतः. ९. G. reads जयन्त्यश्च for जयन्तश्च; while C. D. °त्यप°, E. वाप° and F. द्यप° all for चाप°. १०. G. reads सुरोत्तम for सुरोत्तमाः. ११. C. reads परमं for परमाः. १२. C. and D. read च for हि. १३. B. E. and G. read दिव्यपितरः for दिव्याः पितरः. १४. A. B. D. E. F. and G. read कव्यवालो for कव्यवाहो.

एते चान्ये च पितरः पूज्याः सर्वे प्रयत्नतः ।
एतैस्तु तर्पितैः सर्वैः पुरुषाम्नार्पिता नृभिः ॥ १९४ ॥
यमश्च धर्मराजश्च मृत्युश्चैव तथान्तकः ।
वैवस्वतश्च कालश्च सर्वभूतक्षयस्तथा ॥ १९५ ॥
औदुम्बरश्च नीलश्च दध्नश्च परमेष्ठ्यपि ।
चित्रश्च चित्रगुप्तश्च वृकोदरस्तथार्यमाः ॥ १९६ ॥
एतैस्तु तर्पितैः सद्भिर्विश्वं स्यात्तर्पितं नृभिः ।
तस्मात् प्राक्तर्पयित्वैतान् पित्रादीन् तर्पयेत्ततः ॥ १९७ ॥
मातामहान् मातुलांश्च सखि-सम्बन्धि-बान्धवान् ।
स्वजनान् ज्ञातिवर्गीयानुपाध्यायान् गुरूनपि ॥ १९८ ॥
मित्रान् भृत्यानपत्यांश्च ये भवन्ति तदाश्रिताः ।
तान् सर्वांस्तर्पयेद्विद्वानोहन्ते ते यतो जलम् ॥ १९९ ॥
जलस्थश्च जले सिंचेत् स्थलस्थश्च तथा स्थले ।
पादौ स्थाप्योऽभयोश्चैव प्रक्षाल्योभयतः शुचिः ॥ २०० ॥
यज्जले शुष्कवस्त्रेण स्थले चैवार्द्रवाससा ।
कुर्याद्धोमं जपं दानं तत्सर्वं निष्फलं भवेत् ॥ २०१ ॥
नार्द्रवासाःस्थलस्थस्तु बुधस्तर्पणमाचरेत् ।
जानुदघ्नजलस्थो वा विगलत्स्नानवस्त्रकः ॥ २०२ ॥

---

१. D. reads अभ्रश्च for दध्नश्च; while C. बुध्नश्च for the same. २. D. and others read परमेष्ठिना or परमेष्ठिनः for परमेष्ठ्यपि. ३. D. reads विवस्वांस्तर्पितो for विश्वं स्यात्तर्पितं. ४. D. reads पित्रातीन् for पित्रादीन्. ५. A. reads पितृ-भृत्यान् for मित्रान् भृत्यान्. ६. B. E. and G. read सिञ्चन् for सिञ्चेत्. ७. B. E. F. and G. read उभयत्रापि and C. उभयत्रैव for उभयोश्चैव; while B. reads भवेत्तूभयतः and C. शुची for प्रक्षाल्योभयतः and शुचिः respectively. ८. A. and D. do not insert these two s'lokâs:—

यज्जले शुष्कवस्त्रेण स्थले चैवार्द्रवाससा ।
कुर्याद्धोमं जपं दानं तत्सर्वं निष्फलं भवेत् ॥ २०१ ॥
नार्द्रवासाः स्थलस्थस्तु बुधस्तर्पणमाचरेत् ।
जानुदघ्नजलस्थो वा विगलत्स्नानवस्त्रकः ॥ २०२ ॥

९. B. and E. read जानुदघ्नः स्थल° and C. and G. जानुदघ्नस्थल°. १०. B. C. and F. read विगत° for विगलत्°.

गोशृङ्गमात्रमुद्धृत्य करौ विप्रो जले स्थितः ।
अम्बरे तु क्षिपेद्वारि पितॄणां तृप्तिमावहन् ॥ २०३ ॥

उभाभ्यां सेचयेद्वारि आकाशे दक्षिणामुखः ।
पितॄणां स्थानमाकाशं दक्षिणा दिक् तथैव च ॥ २०४ ॥

स्थलगो नार्द्रवासास्तु कुर्याद्वै तर्पणादिकम् ।
प्रेतादृते नार्द्रवासा नैकवासा समाचरेत् ॥ २०५ ॥

एवं हि तर्पणं कृत्वा सर्वेषां विधिवद्द्विजाः ।
निष्पीडयेत् स्नानवस्त्रं येन स्नातो भवेद्द्विजः ॥ २०६ ॥

निष्पीडयति यः पूर्वं स्नानवस्त्रमबुद्धिमान् ।
निराशाः पितरस्तस्य यान्ति देवाः सहर्षिभिः ॥ २०७ ॥

निष्पीडयेत् स्नानवस्त्रं तिल-दर्भसमन्वितम् ।
न पूर्वं तर्पणाद्वस्त्रं नैवाम्भसि न पादयोः ॥ २०८ ॥

एषु चेत् पीडयेत् वस्त्रं राक्षसं तदतिक्रमात् ।
वस्त्रनिष्पीडने विप्र इमं श्लोकमुदाहरेत् ॥ २०९ ॥

'ये मे कुले लुप्तपिण्डा पुत्र-दार-विवर्जिताः ।
तेषां प्रदत्तमक्षय्यमिदमस्तु तिलोदकम्' ॥ २१० ॥

---

१. A. C. and D. read °मुत्क्षिप्य for °मुद्धृत्य. २. D. omits the following portion :—

- - - - - - - - - पितॄणां तृप्तिमावहन् ॥ २०३ ॥

उभाभ्यां सेचयेद्वारि - - - - - - - - - ।.

३. B. C. E. F. and G. read कराभ्यां for उभाभ्यां. ४. Except D. all others read प्रता° for प्रेता°. ५. C. reads द्विज for द्विजाः. ६. A. and C. read अज्ञानतः and D. अज्ञानत्त for अबुद्धिमान्. ७. A. reads नचा° for नैवा° and B. E. and G. नचा° for the same. ८. B. C. E. F. and G. read राक्षसानां फलं भवेत् for राक्षसं तदतिक्रमात्. ९. C. D. and F. read मन्त्रं for विप्र. १०. B. E. and G. read उदीरयेत् for उदाहरेत्; while D. and F. insert the following line after this śloka :—

तिलदर्भसमायुक्तं कुमृत्युर्नहरेद्दिमाम् ॥.

In A. this line is visible in the marginal correction and reads कुमृत्योः for कुमृत्युः.

पितृवंशे मृता ये च मातृवंशे कुमृत्युना।
तेषां तृप्तिर्भवत्वेषा तिलमिश्रेण वारिणा ॥ २११ ॥
जलमध्ये च यः कश्चित् ब्राह्मणो ज्ञानदुर्बलः।
निष्पीडयति चेद् वस्त्रं स्नानं तस्य वृथा भवेत् ॥ २१२ ॥
यदप्सु मलनिक्षेपः शौच-स्नानादिकुर्वताम्।
तत्पापस्य व्यपोहार्थमिमं मन्त्रमुदीरयेत् ॥ २१३ ॥
'यन्मया दूषितं तोयं मलैः शारीरसम्भवैः।
तस्य पापस्य निष्कृत्यै यक्ष्मणस्तव तर्पणम् ॥ २१४ ॥
अस्रुपेभ्यो ऽथ यक्ष्मभ्यो ददामीदं जलाञ्जलिम्।
अन्यथा घ्नन्ति ते सर्वे सुकृतं पूर्वसञ्चितम् ॥ २१५ ॥
अपुत्रा ये मृताः केचित् पुमांसो योषितो ऽपि वा।
अस्मद्वंशेऽपि तेभ्यो वै दत्तं वस्त्रजलं मया' ॥ २१६ ॥
नास्तिक्येनापि यो विप्रस्तर्पयेत् पितृ-देवताः।
स तत्त्वाक्षिकृतो धर्मान् प्राप्नुयात् परमां गतिम् ॥ २१७ ॥
नास्तिक्यावस्थितो यस्तु तर्पयेन्न पितॄन् द्विजः।
पिबन्ति देहनिःस्रावं पितरस्तज्जलार्थिनः ॥ २१८ ॥
पितॄणां पितृतीर्थेन देवानां दैविकेन तु।
इति मत्वा प्रकुर्वाणा मुच्यन्ते गृहमेधिनः ॥ २१९ ॥

---

१. A. C. D. and F. read तथैव च for कुमृत्युना. २. A. reads this line:—

एषा तृप्तिर्भवेत्तेषां तिलैस्तु सह वारिणा ॥

and F. reads:—

एवं तृप्तिर्भवेत्तेषां तिलैस्तु सह वारिभिः ॥.

३. C. and D. do not insert this śloka. ४. B. reads तस्य पाप° for तत्पापस्य. ५. A. reads यक्ष्माणं तर्पयाम्यहम् for यक्ष्मणस्तव तर्पणम्. ६. G. reads उष्मपेभ्यो and E. युष्मणेभ्यो both for ऽथ यक्ष्मभ्यो; while A. B. E. F. and G. read दद्याद्देवाञ्जलाञ्जलीन्. A. differs from °देवा° for °देता°. ७. D. reads सर्वै for सर्वे. ८. C. and D. read अस्मिन् for अस्मद्°. ९. D. reads °करो for °कृतो. १०. C. reads नास्तिक्ये, D. नास्तिक्याद्वस्तुतो for नास्तिक्या° and नास्तिक्यावस्थितो respectively. ११. A. reads देहिनः°; for देहनि°; while B. also reads the same. १२. Except A. all others read दैवकेन; while D. देवकेन for दैविकेन. १३. A. substitutes मत्या for मत्वा; while C. and D. read तु for प्र°.

पञ्च तीर्थानि विप्रस्य करे तिष्ठन्ति[1] दक्षिणे ।
ब्राह्मं दैवं तथा पित्र्यं प्राजापत्यं तु सौमिकम् ॥ २२० ॥
ब्राह्मं पश्चिमलेखायां दैवं ह्यङ्गुलिमूर्धनि[2] ।
प्राजापत्यं कनिष्ठादौ मध्ये सौम्यं विजानतः[3] ॥ २२१ ॥
अङ्गुष्ठस्य प्रदेशिन्या मध्ये पित्र्यं प्रतिष्ठितम् ।
कुर्याद्यो ऽहरहश्चैवं[4] सम्यग्ज्ञात्वा विधानतः ॥ २२२ ॥
स प्राप्नुयाद्गृहस्थो ऽपि ब्रह्मणः पदमव्ययम् ।
स्नात्वा जप्त्वा च हुत्वा च दत्वा[5] चैव तु योऽश्नुते ॥ २२३ ॥
सो ऽमृतं[6] नित्यमश्नाति तस्य स्थानमनामयम् ।
अस्नात्वाऽश्नन्[7] मलं भुङ्क्ते अजप्त्वा पूय-शोणितम् ।
अजुह्वंश्च कृमीन् कीटानदत्वांश्च शकृत्तथा ॥ २२४ ॥
आह्लादकारणं[8] स्नानं दुःख-शोकापहं तथा ।
दुःस्वप्ननाशनं चैव कार्यं स्नानमतः सदा ॥ २२५ ॥
चित्तप्रसाद-बल-रूप-तपांसि-मेधाम्
आयुष्य-शौच[9]-सुभगत्वमरोगितां च ।
ओजस्वितां[10] त्विषमदात् पुरुषस्य चोर्णं
स्नानं यशो-विभव-सौख्य[11]मलोलुपत्वम् ॥ २२६ ॥

---

१. A. reads सन्ति च for तिष्ठन्ति and D. समाथ for the same. २. B. and G. do not insert हि. ३. B. E. read विजानता and F. न जानता both for विजानतः. ४. A. C. D. E. and F. read अहरहश्चैवं for योऽहरहश्चैवं ; while B. and G. read धर्मतः for विधानतः. ५. B. E. F. and G. read शक्त्या दत्वा च for दत्वा चैव तु. ६. A. and F. read अमृतं सोऽश्नुयान्नित्यं, C. and D. अमृतं सोऽश्नुते नित्यं both for सोऽमृतं नित्यमश्नाति. ७. C. अस्नातासि and D. अस्नात्वा भु° both for अस्नात्वाऽश्नन्. ८. C. and D. read °करणं for °कारणं. ९. B. and G. read °सौख्य° for °शौच°. १०. A. E. F. G. read ऊर्जस्वितां ; while C. substitutes ऊ° for ओ°. ११. B. E. and G. read °पुण्य° for °सौख्य°.

गोर्वाणवृन्दद्विजसत्तमस्तुतः[1]
प्राप्तो मया यस्तु वसिष्ठपौत्रतः ।
पापप्रणाशं वितनोति कः श्रुतः
प्रोदीरितः[2] स्नानविधिः स लेशतः ॥ २२७ ॥

उद्देशतो मया प्रोक्तः स्नानस्य परमो विधिः
द्विजन्मनां हितार्थं तु[3] जपस्यातः परो विधिः ॥ २२८ ॥

इति श्रीबृहत्पराशरीये धर्मशास्त्रे सुव्रतप्रोक्तायां संहितायां[4]
स्नानविधिर्नाम[5] द्वितीयोऽध्यायः ॥ २ ॥[6]

---

१. B. E. and G. read °मः स्तुतः for °मस्तुतः and F. °मस्ततत: for the same.
२. D. reads प्रचोदितः for प्रोदीरितः. ३. B. and G. read च for तु; while D. परं for परो and F. अथ for अतः. ४. A. adds धर्म° before संहितायां
५. B. reads षट्कर्माणि, C. E. F. and G. षट्कर्मणि and D. षट्कर्म°. before स्नान°. ६. A. C. E. and F. omit नाम द्वितीयो ऽध्यायः; while D. wrongly reads तृतीयोऽध्यायः.

वृहत्पराशरसंहिता ।

अथ तृतीयोऽध्यायः ।

जपस्यार्थं प्रवक्ष्यामि विधिं पाराशरोदितम् ।
यावद्विधो जपो यस्तु यथा कार्यो द्विजातिभिः ॥ १ ॥
जप्यानि ब्रह्मसूक्तानि शिवसूक्तानि चैव हि ।
वैष्णवानि च सूक्तानि तथा सौराण्यनेकधा ॥ २ ॥
सारस्वतानि दौर्गाणि वारुणान्यानिलानि च ।
पौराणिकानि चान्यानि तथा सिद्धान्तिकानि च ॥ ३ ॥
सर्वेषां जैप्यसूक्तानामृचां च यजुषां तथा ।
साम्नां वैकाक्षरादीनां गायत्री परमो जपः ॥ ४ ॥
तस्याश्चैव तु ॐकारो ब्राह्मणा यमुपासते ।
आभ्यां तु परमं जप्यं त्रैलोक्येऽपि न विद्यते ॥ ५ ॥
तयोस्तु देवतार्षादि समासेनाभिधीयते ।
येन विज्ञातमात्रेण द्विजो ब्रह्मत्वमाप्नुयात् ॥ ६ ॥
आसीन्नैव यदा किंचित् सदेवाऽसुर-मानुषम् ।
तदैकाक्षर एवासीदात्मविन्यस्तविश्वकः ॥ ७ ॥
गतभीरद्वितीयोऽपि एकाकी सं न मोदते ।
चिन्तयामास गायत्रीं प्रत्यक्षा साऽभवत्तदा ॥ ८ ॥

---

१. C. and D. read ऽत: for ऽथ. २. B. C. D. E. F. and G. read वारुण्या° for वारुणा°. ३. D. reads जप° for जप्य°. ४. A. substitutes तु- and D. च for वा. ५. A. C. D. and F. read °ध उपासित:, B. E. and G. °यमुपासित: for °यमुपासते. ६. A. C. and D. read च for तु. ७. B. C. D. and G. read विज्ञान° for विज्ञात°; while D. अप्नुते for आप्नुयात्. ८. D. reads च for एव. ९. C. D. and F. read एव for एक°. and B. D. E. and G. °क्षरं for °क्षर. १०. C. and D. read दिवि for स न.

गायत्री साऽभवत् पत्नी प्रणवोऽभूत् पतिस्तदा[1]।
पुनरन्यौ च दम्पत्याविति ताभ्यामभूज्जगत्[2] ॥ ९ ॥

प्रणवो हि परं तत्त्वं त्रिवेदं त्रिगुणात्मकम्।
त्रिदैवतं त्रिधामं च त्रिप्रज्ञं त्रिरवस्थितम्[3] ॥ १० ॥

त्रिमात्रं[4] च त्रिकालं च त्रिलिङ्गं कवयो विदुः।
सर्वमेतत्त्रिरूपेण व्याप्तं तु प्रणवेन हि[5] ॥ ११ ॥

ऋग्यजुः-सामवेदाश्च त्रिवेद इति कीर्तितः[6]।
सत्त्वं रजस्तमश्चैव त्रिगुणस्तेन चोच्यते[7] ॥ १२ ॥

ब्रह्मा विष्णुस्तथेशानस्त्रिदैवत[8] इतीष्यते।
अग्निः सोमश्च सूर्यश्च त्रिधामेति प्रकीर्तितः[9] ॥ १३ ॥

अन्तःप्रज्ञं बहिःप्रज्ञं घनप्रज्ञमुदाहृतम्।
हृत्कण्ठ-तालुकं चेति त्रिस्थान इति कीर्त्यते ॥ १४ ॥

अकारोकारौ[10] मश्चेति त्रिमात्रः प्रोच्यते बुधैः।
भूतं भव्यं भविष्यं च त्रिकाल इति स स्मृतः ॥ १५ ॥

स्त्री-पुंनपुंसकं चेति त्रिलिङ्ग इति कीर्तितः[11]।
त्रिस्वभावः स्थितो देवो[12] मन्तव्यो ब्रह्मवादिभिः ॥ १६ ॥

पर्यवस्यति यत्रैतद्[13] विश्वमुत्पद्यते यतः।
निर्मात्रकः समात्रोऽपि सादिरेवं[14] निरादिकः ॥ १७ ॥

---

१. A. C. and D. read तथा for तदा. २. B. F. and G. read पुनरन्योन्यदाम्पत्यात् for पुनरन्यौ च दम्पत्यौ. ३. A. reads च त्र्यव॰ स्थितम् for त्रिरवस्थितम्. ४. D. reads त्रिमानं and E. त्रैमात्रं both for त्रिमात्रं. ५. D. reads नु for हि; while A. reads ह for the same. ६. A. C. E. read त्रिवेदीति निगद्यते and D. substitutes °वेदश्च for °वेदाश्च. ७. B. E. and G. read परिकीर्तिते for तेन चोच्यते. ८. Some MSS. read °दैवतं for °दैवतः. ९. B. E. and G. read प्रकीर्त्यते and D. प्रकीर्तिता for प्रकीर्तितः. १० We follow here only A.; while all others read अकारोकारमश्चेति for अकारोकारौ मश्चेति. B. reads त्रिमात्र उच्यते स इ and D. त्रिमात्रा उच्यते स्तुत for त्रिमात्रः प्रोच्यते बुधैः. ११. B. E. and G. read संस्मृतः for कीर्तितः. १२. D. reads देवो for देवो. १३. A. B. E. F. and G. read एव for एतद्. १४. A. and D. read अपि for एव.

स जप्यः सर्वदा सद्भिर्ध्यातव्यश्च विधानतः।
वेदेषु चैव शास्त्रेषु बहुधा स व्यवस्थितः॥ १८॥
तथा सत्यपि चैकोऽयं घंटाकाश इव स्थितः।
कर्मारम्भेषु सर्वेषु त्रिमात्रः सम्प्रकीर्तितः॥ १९॥
स्थितो यत्र यथोक्तश्च स्मर्तव्यः स तथैव हि।
ऋग्वेदे स्वरितोदात्त उदात्तस्तु यजुःश्रुतौ॥ २०॥
सामवेदे स विज्ञेयो दीर्घः स प्लुत एव च।
सनत्कुमारसिद्धान्ते प्रणवो विष्णुरुच्यते॥ २१॥
यस्मिंस्तस्य च विश्रान्तिस्तत् परं ब्रह्मसंज्ञितम्।
उच्चारितस्य तस्याथ विश्रान्तौ च यदक्षरम्॥ २२॥
तदक्षरं सदा ध्यायेद्यस्तत्रैवं प्रलीयते।
घण्टास्वनितवत्तस्य विश्रान्तिः शब्दवेधसः॥ २३॥
कुर्वीत ब्रह्मविद्विप्रो यदीच्छेद्योगमात्मनः॥
सर्वस्यापि च शब्दस्य ह्यन्त उच्चारितस्य यत्॥ २४॥
तद्ध्यायेद्यस्तु स ज्ञानी शब्दब्रह्मविदुच्यते।
याज्ञवल्क्यो मुनीनां प्रागब्रवीज्जनकस्य च॥ २५॥
वासिष्ठजो ऽपि तं ब्रूयात् स्वभावं शब्दवेधसः।
तैलधारामिवाच्छिन्नं दीर्घं घण्टानिनादवत्॥ २६॥

---

१. A. and F. read प्रकीर्त्यते, C. and D. प्रकीर्तितः for व्यवस्थितः, but in the margin of C. there appears the reading व्यवस्थितः. २. E. reads घटकोश इव स्थितः, C घटाकाशवदास्थितः and D. षट्काराद्यस्तदास्थितः all for घटाकाश इव स्थितः. ३. C. reads त्रिमात्रं सत् प्रकीर्तितम् for त्रिमात्रः सम्प्रकीर्तितः; while D. त्रिमात्रं and A. B. E. F. and G. स for त्रिमात्रः and सम् respectively. ४. D. and F. read तथोङ्कारः for यथोक्तश्च. ५. Except C. and D. all others read च for हि. ६. C. reads यजुः स्मृतः for यजुःश्रुतौ; while A. B. E. F. and G. substitute च for तु; and C. and D. read ऋग्वेदः for ऋग्वेदे. ७. C. and D. read सामवेदः for सामवेदे. ८. A. and F. read यस्मिन्तस्य for यस्मिंस्तस्य. ९. C. and D. read विश्रान्तं for विश्रान्तौ. १०. B. E. and G. substitute यत् for यः. ११. A. and D. read स for प्र०. १२. C. D. and F. read °स्तनित° for °स्वनित°. १३. C. F. A. and D. read अन्ते for ह्यन्ते and C. and D. substitute च for यत्. १४. D. B. substitute स and C. तं for तत्. १५. D. reads वसिष्ठ° for वासिष्ठ°; while A. reads तत् for तं. १६. C. and D. read °छन्न° for छिन्नं.

अवाग्जं[1] प्रणवस्यार्थं यस्तं वेद स वेदवित्।
स्थित्वा सर्वेषु शब्देषु सर्वं व्याप्तमनेन हि[2]।
न तेन हि विना किंचिद्वक्तुं याति गिरा यतः[3] ॥ २७ ॥
उद्गीथ[4]मक्षरं ह्येतदुद्गीथं च उपासते[5]।
उपास्यो मध्यतस्त्वेष नादं विश्रामयेद्धृदि[6] ॥ २८ ॥
प्रणवाद्याः स्मृता वेदाः प्रणवे पर्यव[7]स्थिताः।
वाङ्मयं प्रणवे सर्वं तस्मात् प्रणवमभ्यसेत् ॥ २९ ॥
ब्रह्मार्षं[8] तत्र विज्ञेयमग्निश्च दैवतं महत्।
आद्यं छन्दः स्मरेत्तत्र नियोगो ह्यादिकर्मणि ॥ ३० ॥
उत्पन्नमेतत्तु यतः समस्तं व्यावृत्य तिष्ठेत् प्रलयेऽपि यत्र।
एकाक्षरेणापि जगन्ति येन व्याप्तानि कोऽन्यः परमोऽस्ति तस्मात् ॥ ३१ ॥
ध्येयं[9] न जप्यं नच पूजनीयं तस्मान्न देवाद्वरणीयमन्यत्[10]।
दुस्तारसंसारपयोधिमग्नताराय विष्णुः प्रणवः स पूज्यः ॥ ३२ ॥
उक्तमुद्देशतो ह्येतद् रूपमेकाक्षरस्य च।
जप्या च सततं देवी गायत्री साऽधुनोच्यते ॥ ३३ ॥

इति श्रीबृहत्पराशरीये धर्मशास्त्रे सुव्रतप्रोक्तायां संहितायां[11] षट्कर्मनिरूपणे प्रणवस्वरूपवर्णनं नाम तृतीयोऽध्यायः ॥३॥

---

१. A. and F. read अवार्त्तं, B. E. and G. अपास्तं all for अवाग्जं. २. B. E. and G. substitute वै for हि. ३. B. E. and G. read गिरापि यत् for गिरा यतः. ४. B. C. and D. read उद्गीत° for उद्गीथ°. ५. B. E. and G. read उद्गीथः स उपास्यते for उद्गीथं च उपासते. ६. B. E. and G. read विश्रामयेद्यदि for विश्रामयेद्धृदि. ७. D. reads तर्पणे for पर्यव°. ८. C. reads ब्रह्मर्षिः for ब्रह्मार्षं and विज्ञेय; for विज्ञेयं; while B. E. G. substitute तत् for च. ९. B. C. and G. read ध्यानं for ध्येयं. १०. F. reads एतद् for अन्यत्. ११. A. D. and F. omit धर्मशास्त्रे सुव्रतप्रोक्तायां संहितायां Except B. and D. all others omit तृतीयोऽध्यायः; while D. omits प्रणव°.

बृहत्पराशरसंहिता ।

अथ चतुर्थोऽध्यायः ।

गायत्र्याः संप्रवक्ष्यामि देवर्ष्यादि क्रमेण तु ।
अक्षराणां च विन्यासं तेषां चैव तु देवताः ॥ १ ॥
जप्ये यथाविधा कार्या यथारूपा[1] च साऽर्चने ।
होमे यथा च कर्तव्या यथा वा[2] चाऽऽभिचारिके ॥ २ ॥
यत् फलं जपहोमादौ यदर्थं[3] जप्यते तु सा ।
ध्यातव्या च यथा देवी यथावत्तन्निबोधत ॥ ३ ॥
गायत्री तु परं तत्त्वं गायत्री परमा गतिः ।
सर्वोऽमरैरियं ध्याता सर्वं[4] व्याप्तं तया जगत् ॥ ४ ॥
उत्पद्यते त्रिपादायाः पुनस्तस्यां विशेदिदम्[5] ।
गायत्री प्रकृतिर्ज्ञेया ओंकारः पुरुषः स्मृतः ॥ ५ ॥
एतयोरेव[6] संयोगाज्जगत् सर्वं प्रवर्तते ।
पादास्त्रयस्त्रयो वेदास्तेषु तैस्त्वाक्षराणि च ॥ ६ ॥
चतुर्विंशतिरेवास्यां तैर्हि[7] व्याप्तमिदं[8] जगत् ।
आदाय चैकं प्रथमं तु पादमृग्भ्यो द्वितीयं तु तथा यजुर्भ्यः ।
साम्नस्तृतीयं तु ततोऽभवत् सा सावित्रिदेवी स्वयमेव सर्गे[9] ॥ ७ ॥

---

१. A. C. D. and F. read यथाविधा for यथारूपा; while D. B. C. E. and G. जपे and A. जाप्ये for जप्ये and D. अर्चयेत् for अर्चने. २. A. B. E. and G. read यथार्थं चा° for यथा वा चा°. ३. B. E. D. C. and G. read यथावत् for यदर्थं; while C. and D. substitute च for तु. ४. D. reads सत्यं for सर्वं. ५. A. substitutes वसेत् for विशेत्; while D. reads नितशिम् for विशेदिदम्. ६. A. reads तस्यां पुरुष°, C. and D. ताभ्यामुभय° for एतयोरेव. ७. B. E. and G. read वस्या for तस्या°. ८. C. and D. read व्याप्तमखिलं जगत् for हि व्याप्तमिदं जगत्. ९. Except A. and D. others read स्वर्गे for सर्गे.

दैवत्यमस्यां सविता सुरार्च्यश्छन्दोऽपि गायत्रमभूच्च[1] तस्याः ।
विश्वस्य मित्रो द्विजराज[2]पूज्यो मुनिर्नियोगस्तु जपादिकेषु[3] ॥ ८ ॥
अस्यां तु तत्त्वाक्षरविंशतिस्तु चत्वारि पादत्रितयं तु देव्याम्[4] ।
भूरादिभिस्तिसृभिः संप्रयुक्तं सोङ्कारमेतद्वदनं च तस्याः[5] ॥ ९ ॥
केचिद्धुताशं वदनं वदन्ति सावित्रिदेव्योः श्रुतितत्त्वविज्ञाः ।
इदं[6] च वक्त्रं सकलामराणामित्येतया व्याप्तमशेषमेतत् ॥ १० ॥
भूरादिकेन त्रितयेन पादं पादं च वेदत्रितयेन चास्याः ।
प्राणादिकेन त्रितयेन पादं पादैस्त्रिभिर्व्याप्तमशेषमस्याः ॥ ११ ॥
यस्तुर्यमस्या द्विज वेत्ति पादं स वेत्ति विद्वन् परमं पदं तु ।
व्याप्तिःपराऽस्याः[7]सकलापि चैषा यो वेत्ति चैनां स तु वित्तमःस्यात् ॥१२॥
गायत्रीं यो न जानाति ज्ञात्वा नैव उपासयेत्[8] ।
नामधारकमात्रोऽसौ न विप्रो वृषलो हि सः ॥ १३ ॥
किं वेदैः पठितैः सर्वैः सेतिहास-पुराणकैः ।
साङ्गैः सावित्रिहीनेन न विप्रत्वमवाप्यते ॥ १४ ॥
गायत्रीमेव यो ज्ञात्वा सम्यगभ्यसते[9] पुनः ।
इहामुत्र च पूज्योऽसौ ब्रह्मलोकमवाप्नुयात् ॥ १५ ॥
गायत्री च[10] तथा वेदा ब्रह्मणा तुलिताः[11] पुरा ।
वेदेभ्योऽपि षडङ्गेभ्यो[12] गायत्र्यतिगरीयसी ॥ १६ ॥
यदक्षरेषु[13] दैवत्यं चतुर्विंशतिषूच्यते ।
संन्यासं यद्विबोधेन कुर्वन् ब्रह्मत्वमाप्नुयात् ॥ १७ ॥

---

१. B. E. and G. read परस्याः and A. परस्यां for च तस्याः. २. C. substitutes °वृन्द° for °राज°. ३. A. substitutes तु for °षु. ४. B. and G. read च तस्याम्, D. तु तस्याम् for तु देव्याम् and C. तु यस्याम् for the same. ५. B. E. and G. read परस्याः and A. परस्याम्. ६. B. D. E. and G. read इमां for इदं and D. वक्तुं for वक्त्रं. ७. A. C. and D. read परस्याः for पराऽस्याः. ८. B. E. and G. read ज्ञात्वोपास्ते न यो द्विजः for ज्ञात्वा नैव उपासयेत्; while A. substitutes उपासते for उपासयेत्. ९. B. E. G. read °भ्यर्च्यते for °भ्यसते. १०. D. reads गायत्री चैव वेदाश्च for गायत्री च तथा वेदाः. ११. Some manuscripts read तोलिताः for तुलिताः. १२. D. reads सहाङ्गेभ्यो and C. and F. सशाखेभ्यो for षडङ्गेभ्यो; while D. substitutes च for ऽपि. १३. D. reads तद° for यद° and चतुर्विंशतिर् for चतुर्विंशतिषु.

जानीयादक्षरं देव्याः प्रथमं त्वाशुशुक्षणम् ।
प्राभञ्जनं द्वितीयं तु तृतीयं शशिदैवतम् ॥ १८ ॥
विद्युतश्च[1] तुरीयं तु पञ्चमं तु यमस्य च ।
षष्ठं तु वारुणं तत्त्वं सप्तमं तु बृहस्पतेः ॥ १९ ॥
पार्जन्यमष्टमं तत्त्वं नवमं चेन्द्रदैवतम् ।
गान्धर्वं दशमं विद्यात्त्वाष्ट्रमेकादशं तथा ॥ २० ॥
मैत्रावरुणमन्यद्वै तथा पूष्णस्त्रयोदशम् ।
चतुर्दशं सुरेशस्य प्रागिदं ब्रह्मणः[2] स्मृतम् ॥ २१ ॥
मरुद्दैवतकं ज्ञेयं पञ्चदशं यदक्षरम् ।
सौम्यं च षोडशं तत्त्वं तथा चाङ्गिरसं परम्[3] ॥ २२ ॥
विश्वेषां चैव देवानामष्टादशमथाक्षरम् ।
अश्विनोश्चोनविंशं तु विंशं प्रजापतेर्विदुः ॥ २३ ॥
एकविंशं कुबेरस्य द्वाविंशं शंकरस्य च ।
त्रयोविंशं तथा ब्राह्मं चतुर्विंशं तु[4] वैष्णवम् ॥ २४ ॥
इति ज्ञात्वा द्विजः सम्यक्सर्वाश्चाक्षरदेवताः[5] ।
कुर्वन् जपादिकं विप्रः[6] परं श्रेयोऽधिगच्छति ॥ २५ ॥
पादाङ्गुष्ठादिमूर्द्धान्तमात्मनो वपुषि न्यसेत् ।
अक्षराणि च सर्वाणि वाञ्छन्[7] ब्रह्मत्वमात्मनः ॥ २६ ॥
पादाङ्गुष्ठयुगे त्वेकमेकैकं गुल्फयोर्द्वयोः ।
जानुनोश्च द्वयोरेकमेकमूरुकयोर्द्वयोः[8] ॥ २७ ॥
गुह्ये कट्यां तथैकैकमेकैकं जठरोरसोः ।
स्तनद्वये तथैकं तु न्यसेदेकं गले तथा ॥ २८ ॥
वक्त्रे तालुनि दृक्-श्रुत्योश्चतुर्ष्वेकैकमेव च[9] ।
भ्रुवोर्मध्ये तथैकं तु[10] ललाटे चैकमेव हि ॥ २९ ॥

---

१. A. reads वैद्युतं for विद्युतः. २. A. and C. read ब्रह्मणा for ब्रह्मणः. ३. A. अङ्गिरसस्तथा परं, C. and D. आङ्गिरसमथापरम्, E. तत्तु अ-ङ्गिरसं परम् and F. तत् आङ्गिरसः परम् all for तथा चाङ्गिरसं परम्. ४. B. E. and G. read च for तु. ५. B. E. and G. do not insert च; while C. and D. read स सर्वाक्षर° for सर्वाश्चाक्षर°. ६. C. and D. read कर्म for विप्रः. ७. A. reads प्रेच्छन्, D. पृच्छन् both for वांच्छन्. ८. B. E. and G. read °मूरुद्वयोर्द्वयोः, C. मूरुद्वये द्वयोः for °मूरुकयोर्द्वयो:. ९. A. substitutes तु for च. १०. A. and F. read तथैकैकं for तथैकं तु; while B. E. G. तथैवैकं for the same and A. substitutes च for हि.

याम्य-पश्चिम-सौम्येषु एकैकमेकमूर्धनि ।
गायत्रीन्यस्तसर्वाङ्गो गायत्रो विप्र उच्यते ॥ ३० ॥
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ।
प्रोक्तः प्रणवविन्यासो व्याहृतीनामथोच्यते ॥ ३१ ॥
सप्तापि व्याहृतीर्न्यस्याः[१] सर्वदेहे जपादिषु ।
भूर्लोकं पादयोर्न्यस्य भुवर्लोकं तु जानुनोः ॥ ३२ ॥
स्वर्लोकं कटिदेशे तु नाभिदेशे महस्तथा ।
जनलोकं तु हृदये कण्ठदेशे तपस्तथा ॥ ३३ ॥
भ्रुवोर्ल्ललाटसन्ध्योस्तु सत्यलोकः प्रतिष्ठितः ।
हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् ॥ ३४ ॥
तच्छुद्धं[२] ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ।
देवस्य सवितुर्भर्गो वरेण्यं[३] चैव धीमहि ॥ ३९ ॥
तदस्माकं धियो यस्तु ब्रह्मत्वे च प्रचोदयात् ।
च्छन्दोदैवतमार्षं[४] च विनियोगं च ब्राह्मणम् ॥ ४० ॥
मन्त्रं पञ्चविधं ज्ञात्वा द्विजः कर्म समाचरेत्[५] ।
स्वरतो वर्णतश्चैव परिपूर्णं भवेद्यथा ॥ ४१ ॥
हीनं न विनियुञ्जीत मन्त्रं तु मात्रयापि च ।
देवतायतने कुर्याज्जपं नद्यादिकेषु च ॥ ४२ ॥
आश्रमेषु यतीनां वा गोष्ठे वा स्वगृहेऽपि वा ।
चतुर्ष्वन्तिमपूर्वेषु[६] हुत्तमादिक्रमेण[७] तु ॥ ४३ ॥
दशगुणं सहस्रं स्यात् फलं विष्णावनन्तकम्[८] ।
अप्समीपे[९] जपं कुर्यात् ससङ्ख्यं तद्भवेद्यथा ॥ ४४ ॥

---

१. B. C. E. G. read सप्तभिर्व्याहृतीर्न्यस्य भवेदहो, D. and F. follow this reading, but differ in सप्तापि for सप्तभि°. २. D. reads शुभं for शुद्धं. ३. A B. and G. वरेणीयं च, D. and E. वरणीयं च all for वरेण्यं चैव. ४. D. reads °दैवं तर्पणं for °दैवतमार्षं. ५. A. C. and F. read समारभेत् for समाचरेत्. ६. B. and G. read चतुर्ष्वन्त्यमपूर्वेषु, C. चतुर्षूत्तमपूर्वेषु, D. चतर्षु मतिपूर्वेषु, E. चतुर्थन्त्यमपूर्वेषु, and F. चतुर्ष्वन्तमपूर्वेषु all for चतुर्ष्वन्तिमपूर्वेषु. ७. A. ह्यन्ति वा°, C. शुक्तमा°, D. ह्येनमा° all for हुत्तमा°. ८. D. reads निष्काममनन्तकम् for विष्णावनन्तकम्. ९. A. reads अप्सु तीरे and D. असमीपे both for अप्समीपे.

असङ्ख्यमासुरं यस्मात्तस्मात्तद्गणयेद्ध्रुवम् ।
[1]स्फाटिकेन्द्राक्ष-रुद्राक्षैः पुत्रजीवसमुद्भवैः ॥ ४५ ॥
अक्षमाला प्रकर्तव्या प्रशस्ता चोत्तरोत्तरा ।
अभावे त्वक्षमालाया कुशग्रन्थ्याऽथ पाणिना ॥ ४६ ॥
यथा कथंचिद्गणयेत् ससङ्ख्यं तद्भवेद्यथा ।
प्रणवो भूर्भुवः स्वश्च पुनः प्रणवसंयुतम् ॥ ४७ ॥
[2]अन्त्योऽङ्कारसमायुक्तां मन्यन्ते मु[3]नयोऽपरे ।
प्रणवोऽन्ते तथा चाद्यावाहुरन्ये जपे [4]क्रमम् ॥ ४८ ॥
आद्यावेव तु चोङ्कार आवृत्तावादिकोऽन्ततः ।
त[5]दाद्यं च तदन्तं च कुर्यात् प्रवणसम्पुटम् ॥ ४९ ॥
आद्यन्तरक्षितां कुर्यादिति पाराशरोऽब्रवीत् ।
[6]यो न वाञ्छति सन्तानं मोक्षमिच्छति केवलम् ॥ ५० ॥
प्रत्योङ्कारमसौ कुर्वन्नक्षरं मोक्षमाप्नुयात् ।
अक्षरप्रातिलोम्येन सोङ्कारेण क्रमेण तु ॥ ५१ ॥
फट्कारान्तां च कुर्वीत प्रेच्छन्नरिवधं बुधः ।
होमे चापि प[7]ठन् कुर्यात् प्रणवाव[8]र्तनं द्विजः ।
अभिप्रेतार्थ[9]होमादौ स्वाहान्तां तामुदीरयेत् ॥ ५२ ॥
संकीर्णतां यदा पश्येद्रोगा[10]द्वा द्विषतोऽपि वा ।
तदा जपेच्च गायत्रीं सर्वदोषापनुत्तये ॥ ५३ ॥
रुद्रजाप्यानि कार्याणि सूक्तं च पुरुषस्य च ।
शिवसंकल्पजाप्यं च सर्वं कुर्याद्विधानतः ॥ ५४ ॥

---

१. C. E. and G. read स्फाटिकाब्जाक्ष°, D. स्फाटिकैर्द्राक्ष° for स्फाटिकेन्द्राक्ष°. २. A. reads अथोङ्कार°. for अन्त्योङ्कार°. ३. A. C. and D. read कवयो for मुनयो. ४. A. B. E. F. and G. read जपक्रमम् for जपे क्रमम्. ५. A. reads तदाद्यां च तदन्तां च कुर्यात् प्रणवसम्पुटाम् and F. also reads the same. E. too follows this reading, but differs in तदाद्यं for तदाद्य. ६. D. does not insert the following two lines:—

यो न वाञ्छति सन्तानं मोक्षमिच्छति केवलम् ॥ ५० ॥
प्रत्योंऽकारमसौ कुर्वन्नक्षरं मोक्षमाप्नुयात् ।.

७. B. C. D. E. F. and G. read जपन् for पठन्. ८. C. and D. read °वर्जनं for °वर्तनं, but C. reads in the margin °वर्तनं. ९. B. E. and G. read °प्रेताय, F. °प्रेताद्य° both for °प्रेतार्थ°. १. C. and D. read रागात् for रोगात्.

जप्यानि[1] घ्नन्ति पापानि श्रेयो दद्युस्तदर्थिनाम् ।
अतो जपं सदा कुर्याद्यदीच्छेच्छुभमात्मनः ॥ ५५ ॥
द्रुपदां वा जपेद्देवीमजपा जम्बुकां[2] तथा ।
प्रणवं च सदाभ्यस्येद्यदि[3] ब्रह्मत्वमिच्छति ॥ ५६ ॥
प्राणानाम[4]युताभ्यां च तथा षोडशभिः शतैः ।
पुंसो गच्छत्यहोरात्रं तत्संख्यामजपां विदुः ॥ ५७ ॥
रविमण्डलमध्यस्थे पुरुषे लोकसाक्षिणि[5] ।
समर्पितं मया चेदं सूर्याख्ये ब्रह्मणः पदे ॥ ५८ ॥
न जप्यं[6] प्रसभं कुर्यात् प्रसभं घ्नन्ति राक्षसाः ।
ब्राह्मणा[7] भागधेयास्तु तेषां दैवो[8] विधिक्रमः ॥ ५९ ॥
उपांशु तु जपं कुर्यात् ब्राह्मणो[9] वाथ मानसम् ।
विवृतोष्ठमुपांशुः स्यादचलोष्ठं तु मानसम् ॥ ६० ॥
द्विविधस्तु जपः प्रोक्तः[10] उपांशुर्मानसस्तथा ।
उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ॥ ६१ ॥
उपांशुजपयुक्तस्तु[11] मानसे च रतस्तथा ।
इहैव याति वैधस्त्वमिति[12] पाराशरोऽब्रवीत्[13] ॥ ६२ ॥
विधियज्ञाः पाकयज्ञा ये चान्ये बहवो मखाः ।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ॥ ६३ ॥
जप्येनैकेन सिद्धेन किं न[14] सिद्धं भवेदिह ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥ ६४ ॥

---

१. A. and D. read घ्नन्ति जप्तानि° and तदर्थिनः for जप्यानि घ्नन्ति and तदर्थिनाम् respectively. २. B. reads जम्बुकं for जम्बुकां and E. जम्बुकीं for the same. ३. D. reads यातिः for यदि. ४. B. and D. read प्रणवा° for प्राणाना°. ५. A. reads °विश्रुते for °साक्षिणि. ६. B. C. D. E. and G. read जपं and F. जपे for जप्यं. ७. A. reads ब्रह्मणे भागधेयस्तु, B. E. and G. read ब्रह्मणा भागधेयस्तु and F. and D. ब्राह्मणा भागधेयस्तु, all for ब्राह्मणा भागधेयास्तु. ८ B. C. E. and G. read चैव विधिः कृतः, D. reads चैवावधीकृताः and F. चैवावधिः कृतः all for दैवो विधिक्रमः. ९. A. and C. read कुर्याच्चैव तु, D. reads कार्यं चैव तु for ब्राह्मणो वाथ. १०. D reads कुर्यात् for प्रोक्तः and उपांशुं मानसं and द्विविधं तु जपं. ११. A. C. and D. read °यज्ञस्य and रतस्य च for °युक्तस्तु And रतस्तथा. १२. B. and G. read विविध° for वैधस्त्व°. १३. B. E. G. and F. read ऽब्रवत् for ऽब्रवीत्. १४. D. reads जपे for जप्ये and किल for किं न.

शतेन जन्मजनितं सहस्रेण पुराकृतम् ।
अयुतेन त्रिजन्मोत्थं गायत्री हन्ति पातकम् ॥ ६५ ॥
दशभिर्जन्मजनितं शतेन तु पुराकृतम् ।
सहस्रेण त्रिजन्मोत्थं गायत्री हन्ति पातकम् ॥ ६६ ॥
अस्मिन् कलौ च विदुषा विधिवत् कर्म यत् कृतम् ।
भवेद्दशगुणं तद्धि कृतादेर्युगतो ध्रुवम् ॥ ६७ ॥
नच तच्छक्यते कर्तुं मन्त्राम्नायेऽस्य दूषणात् ।
अयथार्थकृतात् पाठात् मन्त्रसिद्धिर्गरीयसी ॥ ६८ ॥
न च क्रमन्न च हसन्न पार्श्वमवलोयन् ।
नान्यसक्तो न जल्पंश्च न चैवोर्ध्वशिरास्तथा ॥ ६९ ॥
नाङ्घ्रिणा पीडयेत् पादं न चैव हि तथा करम् ।
नैवंविधं जपं कुर्यान्न च संचालयेत् करम् ॥ ७० ॥
प्रच्छन्नानि च दानानि ज्ञानं च निरहंकृतम् ।
जप्यानि च सुगुप्तानि तेषां फलमनन्तकम् ॥ ७१ ॥
य एवमभ्यसेन्नित्यं ब्राह्मणः संयतेन्द्रियः ॥
स ब्रह्मलोकमाप्नोति तथा ध्यानार्चनादपि ॥ ७२ ॥
अथान्यत् सम्प्रवक्ष्यामि यथा तातं पितामहः ।
लब्धवान् वेधसः पृष्टाद्गायत्रीध्यानमुत्तमम् ॥ ७३ ॥
यदक्षरेषु यद्वर्णं यत्र यत्र च यः स्मरेत् ॥
यत्फलं लभते कृत्वा यथा तस्याः समर्चनम् ॥ ७४ ॥
तत् प्रकृतिः स स्यातं विकारो बुद्धिरेव च ।
तुरित्येतदहंकारं वशब्दं विद्धि पापहम् ॥ ७५ ॥

---

१. A. reads अतः for अस्मिन्; while C. कलौ युगे विद्वान् and D. लियुगे विद्वान् for कलौ च विदुषा. २. D. reads भूषणात् for दूषणात्. xcept F. all read मन्त्राम्नायस्य. ३. F. and G. read पापात् for पाठात्. C. and D. read मन्त्रोपहसनं for क्रमन्न च हसन्. ५. C. reads प्रावृत° चैवोर्ध्व° and D. चैवार्द्ध° for the same. ६. B. E. F. G. read ध्यानार्हेर्चना° for तथा ध्यानार्चना°. ७. A. reads यथामाऽऽह पितामहः and D. तोषन्तु पितामहे both for यथा तात पितामहः. ८. A. C. and F. read तदक्षु, B. and G. अक्षरेषु च and D. तदक्षरे तु all for यदक्षरेषु. ९. D. reads द्वेषा° for विद्धि पा°.

रे स्पर्शं तु णि रूपं च यं रसं गधमत्र भम् ।
गों श्रोत्रं दे त्वचं वा व चक्षुः स्य रसना तथा ॥ ७६ ॥
धी नासा च म वाचा च हि हस्तौ धि च पादूयम् ।
यो उपस्थं मुखं यो ऽन्यो नः खं प्रकारमारुतम् ॥ ७७ ॥
चो तेजो द् जलं यात् क्ष्मा गायत्र्यास्तत्त्वचिंतनम् ।
चतुर्विंशतितत्त्वानि प्रत्येकमक्षरेषु यः ॥ ७८ ॥
गायत्र्याः संस्मरेद्योगी स याति ब्रह्मणः पदम् ।
तत्कारं पादयोर्न्यस्य ब्रह्म-विष्णु-शिवाकृतिम् ॥ ७९ ॥
शान्तं पद्मासनारूढं ध्यानाद्दहति किल्विषम् ।
सकारं गुल्फयोर्न्यस्येदतसीपुष्पसन्निभम् ॥ ८० ॥
पद्ममध्यस्थितं सौम्यं दहते चोपपातकम् ।
विकारं जङ्घयोर्दीप्तं ध्यायेदेतद्विचक्षणः ॥ ८१ ॥
ब्रह्महत्याकृतं पापं हन्यात्तद्वि स्मृतं क्षणात् ।
तुर्कारं जानुदेशे तु इन्द्रनीलसमप्रभम् ॥ ८२ ॥
निर्दहेत् सर्वपापानि ग्रहंरोगमुपद्रवम् ।
ऊर्वोर्वं विमलं ध्यायेच्छुद्धस्फटिकविद्युतिम् ॥ ८३ ॥
विज्ञातं हन्ति तत्पापमगम्यागमनात् कृतम् ।
रेकारं वृषणे प्रोक्तं विद्युत्स्फुरिततैजसम् ॥ ८४ ॥
मित्रद्रोहकृतं पापं स्मरणादेव नाशयेत् ।
णि गुह्यं श्वेतवर्णं तु जातिपुष्पसमद्युतिम् ॥ ८५ ॥

---

१. D. reads पादयोर्न्यस्त्वा for गुल्फयोर्न्यस्य. २. G. omits the following verse :—

पद्ममध्यस्थितं सौम्यं दहते चोपपातकम् ।
विकारं जङ्घयोर्दीप्तं ध्यायेदेतद्विचक्षणः ॥ ८० ॥.

३. B. E. and F. read द्विजोत्तमः for विचक्षणः. ४. B. C. E. F. and G. read °देतत् for °त्तद्वि. ५. B. E. F. and G. read °शोषानुपद्रवं for °रोगमुपद्रवम्. ६. B. E. F. G. read °स° A. °व° for °वि° and C. °सन्निभम् for °विद्युतिम्. ७. B. E. F. and G. read संस्मरणाच्चायेद् द्विज.

गुरुहत्याकृतं पापं शोधयेद्ध्यानचिन्तनात् ॥ ८५ ॥
शं कट्यां तारकावर्णं चन्द्रवह्निरण्यभूषितम् ।
योगिनां वरदं प्राहुर्ब्रह्महत्याविशोधनम् ॥ ८६ ॥
भं नभोवलिवर्णाभं मेघोऽतिसमद्युतिम् ।
ध्यात्वा कमलमध्यस्थं महद्दहति पातकम् ॥ ८७ ॥
जठरे रक्तवर्णं तु मात्राद्वयविभूषितम् ।
गोहत्यादिकृतं पापं गोंकारस्तु विशोधयेत् ॥ ८८ ॥
श्यामरक्तं च देकारं ध्यानं तद्देशयेद्धृदि ।
हिमकुन्देन्दुवर्णाभं वकारममृतं स्रवत् ॥ ८९ ॥
पितृ-मातृ-वधोद्भूतं मित्रावरुणदैवतम् ।
गुरुहत्याकृतं पापं वकारेण प्रणश्यति ॥ ९० ॥
स्य कारं विन्यसेत् कण्ठे त्वाद्यं स्फटिकसन्निभम् ।
मनसोपार्जितं पापं स्यकारेण प्रणश्यति ॥ ९१ ॥
धीकारं वसुदैवत्यं वदन्ति स्वर्णसन्निभम् ।

---

१. B. E. and G. read नाशयेच्चिन्तनादपि for शोधयेद्ध्यानचिन्तनात्. F. reads the same, but differs in शोधयेद् for नाशयेत्. २. B. and G. read °दिव्य° and D. °वर्णात् for °वर्णं; while A. °ह्रिण्य° for ह्रिण्य°. ३. B. and C. read भकारं चालि°, G. भकारं चारु°, E. भकारं वारि°, F. भकारं भालि° all for भं नभोवलि;° while D. omits this and the following two lines. ४. B. °ऽतमहाद्युतिम्, C. °ऽतमहद्दुः द्युतिम्, E. F. and G. °ऽतमहद्युति. ५. A. B. . F. and G. substitute भृङ्ग° for रक्त°. ६. C. and D. read °विहितं for °दिकृतं. ७. B. reads दिशयेत् or देशयेत्, and D. ध्यानकृद्देशमाश्रयेत् and C. ध्यानकृद्दर्शयेत् for ध्यानं तद्देशयेत् ; while A. ध्यातं for ध्यानं. ८. B. C. D. F. and G. read हृदि, E. हृदि both for हिम°. ९. B. reads स्रवन्, D. स्रवेत् and F. स्रुवन् all for स्रवत्. १०. D. does not insert this line :—

पितृ-मातृवधोऽद्भूतं मित्रावरुणदैवतम् ॥.

११. C. and D. read प्रशाम्यति for प्रणश्यति. १२. C. and D. read वदनं for वदन्ति.

प्रतिग्रहकृतं[1] पापं तत्क्षणादेव नश्यति ॥९२॥

मकारं पद्मरागाभं[2] शिरस्थं दीप्ततेजसम् ।

पूर्वजन्मकृतं पापं मकारेण प्रणश्यति[3] ॥ ९३ ॥

ह्रिकारं नासिकाग्रे तु पूर्णचन्द्रसमप्रभम् ।

पूर्वात्पूर्वतरं पापं स्मरणादेव नश्यति ॥ ९४ ॥

धिकारं[4] शान्तमक्ष्णोश्च पीतवर्णं सुधांशुवत् ।

मनो-वाक्कायजं पापं चिन्तनादेव[5] नश्यति ॥ ९५॥

योकारौ[6] द्वौ धूम्र-नीलौ भ्रू-ललाटे च संस्थितौ ।

---

१. A. reads प्रतिशब्द° for प्रतिग्रह°. B. E. F. G. read this line thus:—

प्राणिहत्याकृतं पापं धीकारेण प्रणश्यति ।

and C. धीकारेण विनश्यति for तत्क्षणादेव नश्यति. २. A. B. E. F. and G. read पद्मनाभं तं स्फुरन्तं for पद्मरागाभं शिरस्थं. ३. C. reads प्रशाम्यति. ४. E. and F. omit this verse:—

धिकारं शान्तमक्ष्णोश्च पीतवर्णं सुधांशुवत् ।
मनो-वाक्कायजं पापं चिन्तनादेव नश्यति ॥;

while A. reads:—

धिकारं चन्द्र-सूर्याभं नेत्रयोर्विन्यसेद्बुधः ।,

C. and D. follow the reading of A., but read धिकारं तमाङ्गिरसं. ५. A. reads चिन्तितं संप्रणश्यति for चिन्तनादेव नश्यति. C. and D. °कायिकं for °कायजं and C. स्मरणात् for चिन्तनात्. ६. I am unable to find out the original reading here. A. reads:—

योकारौ द्वौ दक्षिणे वक्त्रे ध्यायन्पापैर्न लिप्यते ।;

for the whole verse. E. F. and G. read:—

योकारौ वह्निघ्रिणे वक्त्रे कालानलसमद्युति ।

for the first line of this verse, and C. and D. read the following four lines for this one verse:—

योकारं रक्तवर्णाभमिन्द्रनीलसमप्रभम् ।
प्राणिहत्याकृतं पापं योकारेण विनश्यति ।
द्वितीयस्तु तथा प्रोक्तो योकारो रुक्मसन्निभः ।
निर्दहेदुष्टपापानि अपेयापेयका(ज्ञा)नि च ॥.

ध्यायन्नित्यं द्विजो नूनं सर्वपापैः प्रमुच्यते ॥ ९६ ॥
नकारं तु मुखे पूर्वं द्वादशादित्यसन्निभम् ।
सकृद्ध्यात्वा द्विजश्रेष्ठः प्राप्नोति ब्रह्मणःपदम् ॥ ९७ ॥
प्रकारं दक्षिणे वक्त्रे कालाग्नि-रुद्रसन्निभम् ।
सकृद्ध्यात्वा द्विजश्रेष्ठ ऐश्वरं पदमाप्नुयात् ॥ ९८ ॥
चोकारं पश्चिमे वक्त्रे विद्युद्दीप्तिसमप्रभम् ।
एकवारं द्विजो ध्यात्वा वैष्णवं पदमाप्नुयात् ॥ ९९ ॥
दकारमुत्तरे वक्त्रे शुक्लवर्णसमद्युतिम् ।
सकृद्ध्यानात् द्विजश्रेष्ठ प्राप्नुयात् पदमव्ययम् ॥ १०० ॥
याकारस्तु शिरः प्रोक्तं चतुर्वदनसंयुतम् ।
स एष त्रिगुणः प्रोक्तश्चतुर्विंशतिमः स्मृतः ॥ १०१ ॥
यं यं पश्यति चक्षुर्भ्यां यं यं स्पृशति पाणिना ।
यं यं च भाषते किञ्चित्तत्सर्वं पूतमेव च ॥ १०२ ॥

---

१. C. reads नकारस्तु मुखे पूर्वं आदित्योदयसन्निभम्. D. also follows this reading, but differs in नकारे सुमुखे; while A. F. substitute पूर्वे for पूर्वं. २. A. C. and D. read स गच्छेत् for प्राप्नोति; while C. and D. substitute ऐन्द्रं for ब्रह्मणः. ३. C. and D. read this and the following five lines:—

नीलोत्पलदलश्यामं प्रकारं दक्षिणामुखम् ।
सकृद्ध्यात्वा द्विजश्रेष्ठ स गच्छेद्वैष्णवं पदम् ॥
सौम्यं गोरोचनापीतं चोकारं पश्चिमामुखम् ।
सकृद्ध्यात्वा द्विजश्रेष्ठ सगच्छेद्ब्रह्मणः पदम् ॥
शङ्ख-कुन्देन्दुधवलं दकारं चोत्तरामुखम् ।
सकृद्ध्यात्वा द्विजश्रेष्ठ स गच्छेद् ब्रह्म शाश्वतम् ॥.

४. A. reads:—

·········दीप्तस्वर्णस्य भिन्नसम् ॥.
सकृद्ध्यात्वा द्विजश्रेष्ठः स गच्छेद् ब्रह्मणः पदम् ॥

५. A. reads ध्यात्वा द्विजश्रेष्ठः स गच्छेद् ब्रह्मणः पदम्. ६. A. reads याकारं त्रिगुणं प्रोक्तं चतुर्विंशतिमं स्मृतम्, C. and D. follow this reading, but D. differs in सगुणं and both in संस्मृतम् for त्रिगुणं and °मं स्मृतम्; while B. E. F. and G. स्फुटम् for स्मृतः. ७. C. and D. read चित्ते for किञ्चित्.

जाप्ये तु त्रिपदा ज्ञेया पूजने तु चतुष्पदा ।
न्यासे जप्ये तथा ध्याने अग्निकार्ये तथार्चने ॥ १०३ ॥
सर्वत्र त्रिपदा ज्ञेया ब्राह्मणैस्तत्त्वचिन्तकैः ।
जम्बुका नाम सा देवी यजुर्वेदे प्रतिष्ठिता ॥ १०४ ॥
सा देवी द्रुपदा नाम मन्त्रे वाजसनेयके ।
अन्तर्जले त्रिरावर्त्य मुच्यते ब्रह्महत्यया ॥ १०५ ॥
सोऽपनीय समस्तानि महैनांसि द्विजोत्तमः ।
ब्रह्मणः पदमाप्नोति यद्गत्वा न निवर्तते ॥ १०६ ॥
विना श्रद्धां प्रमादाद्वा जपं कुर्वंश्च्यवेद्यदि ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति स्मृतिः ॥ १०७ ॥
तद्विष्णोरिति मन्त्रोयं स्मर्तव्यः सर्वकर्मसु ।
आवर्त्यः प्रणवो वापि सर्वस्यादिर्यतो हि सः ॥ १०८ ॥
अभ्यसेत् प्रणवं नित्यमेकचित्तः समाहितः ।
गायत्रीं च तथा देवीमभ्यस्यन् मुक्तिमाप्नुयात् ॥ १०९ ॥
वैदिकं तु जपं कुर्यात् पौराणं पाञ्चरात्रिकम् ।
यो वेदस्तानि चैतानि याम्येतानि च सा श्रुतिः ॥ ११० ॥

---

१. D. omits the following portion:—

. . . . पूजने तु चतुष्पदा ।
न्यासे जप्ये तथा ध्याने अग्निकार्ये तथार्चने ॥
सर्वत्र त्रिपदा ज्ञेया . . . . ।.

C. also omits the same, but it appears in the marginal correction and reads सा ज्ञाने for पूजने. २. D. reads यज्ञवेद° for यजुर्वेदे. ३. C. and D. read वेदे for मंत्रे. ४. A. reads मलिमानि, B. E. and G. read महीनां स and C. and D. महतां स all for महैनांसि. ५. C. and D. read for this verse the following line:—

प्रमादेन कथञ्चिद्वा जपं कुर्वन् भवेद्यदि ।.

A. reads प्रमादेन कथंचिद्वा for विना श्रद्धां प्रमादाद्वा; while B. E. and G. substitute श्राद्धं for श्रद्धां and कुर्वेरिमं यदि for कुर्वंश्च्यवेद्यदि. ६. D. reads समावृतः for समाहितः. ७. C. and D. read:—

. . . . वैदिकं तु जपं हि वन् ।
पौराणं पाञ्चरात्रं च ह्यभ्यस्यन् मुक्तिमाप्नुयात् ॥.

Here D. differs from C. in having तु for हि and योऽभ्यसेत् for ह्यभ्यस्यन्.
८. B. C. E. F. and G. read वेत्ति for वेदस.

जपेन येनेह कृतेन पुंसो ददाति मार्गं सवितापि कर्तुः ।
अयं हि सर्वेष्टिकृतां वरिष्ठो विधेः पदं यास्यति निर्विकल्पम् ॥ १११ ॥

यदुक्तं सर्वशास्त्रेषु तथा सर्वश्रुतिष्वपि ।
उपनिषन्मतं तद्धो विप्रा ह्येतत् प्रकीर्तितम् ॥ ११२ ॥

न्यासं तनुत्रं न बबन्ध देहे जग्राह नोङ्कारमसिं च तीक्ष्णम् ।
विप्रो वशे यश्चिपदां न चक्रे लोके स रुष्टः किमु कस्य कुर्यात् ॥ ११३ ॥

उद्देशेन मया प्रोक्तो विधिर्जप्यस्य पावनः ।
देवार्चनविधानं तु सम्प्रवक्ष्याम्यतःपरम् ॥ ११४ ॥

इति श्रीबृहत्पराशरीये धर्मशास्त्रे जपनिर्णयः ।

देवार्चनं प्रवक्ष्यामि यदुक्तमृषिभिः पुरा ।
वैदिकैरेव तन्मन्त्रैर्यस्य ये तस्य तैरिति ॥ ११५ ॥

अर्चयन् वैदिकैर्मन्त्रैर्नानुग्रहमपेक्षते ।
वैदिकोऽनुग्रहस्तस्य वेदस्वीकरणेन तु ॥ ११६ ॥

ब्रह्माणं वैधसैर्मन्त्रैर्विष्णुं स्वैः शंकरं स्वकैः ।
अन्यानपि तथा देवानर्चयेत् स्वीयमन्त्रकैः ॥ ११७ ॥

---

१. C. and D. read सर्वेष्ट° for सर्वेष्टि°; while D. निर्विकल्पः for निर्विकल्पम्. २. A . and D. read धर्म°. for सर्व° ३. A. reads °समं for °मतं and हितं for ह्येतत्; while C. and D. are mistaken here. ४. B. E. F. and G. read सु° for च; while C. and D. are mistaken throughout in this verse. ५. D. and F. omit this whole verse; while A. B. C. E. read तस्योद्देशो for उद्देशेन. ६. Some manuscripts read °विधिः for °निर्णयः. ७. Before this line C. has the following two verses in the margin :—

समित्-पुष्प-कुशादीनि श्रोत्रियात् स्वयमाहरेत् ।
शूद्रानीतैः स्वयंक्रीतैः कर्म कुर्वन् व्रजत्यधः ॥
तुलसी-बिल्वपत्राणि सुवर्णकुसुमानि च ।
प्रक्षाल्य सर्वदेवानां पुनः पूजां समाचरेत् ॥;

while B. E. F. and G. read °नमहं वक्ष्ये for °नं प्रवक्ष्यामि and substitute मुनिभिः for ऋषिभिः. ८. B. C. F and G. substitute यैः for ये and अपि for इति; while F. omits the following :—

वैदिकैरेव तन्मन्त्रैर्यस्य ये तस्य तैरिति ॥
अर्चयन् वैदिकैर्मन्त्रैर्नानुग्रहमपेक्षते ।.

९. B. E. F. and G. read किं वेदादधिकं परम्. १०. B. E. and G. read निज°, and F. द्विज for स्वीय°.

मन्त्रन्यासं पुरा कृत्वा स्वदेहे देवतासु च ।
गायत्र्योंकारन्यस्ताङ्गः[1] पूजयेद्विष्णुमव्ययम् ॥ ११८ ॥
न्यस्त्वा[2] तु व्याहृतीः सर्वाः प्रोक्तस्थानक्रमेण तु ।
ब्रह्मभूतः[3] शुचिः शान्तो देवयागमुपक्रमेत्[4] ॥ ११९ ॥
विष्णुरादिरयं देवः सर्वामरगणार्चितः ।
नामग्रहणमात्रेण पापपाशं[5] छिनत्ति यः ॥ १२० ॥
तदर्चनं प्रवक्ष्यामि विष्णोरमिततेजसः ।
यत् कृत्वा[6] मुनयः सर्वे परं सायुज्यमाप्नुयुः ॥ १२१ ॥
षट्स्वेतेषु[7] हरेः सम्यगर्चनं मुनिभिः स्मृतम् ।
अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ॥ १२२ ॥
अग्नौ क्रियावतां देवो[8] दिवि देवो मनीषिणाम् ।
प्रतिमास्वल्पबुद्धीनां योगिनां हृदये हरिः ॥ १२३ ॥
आपो ह्यायतनं तस्य तस्मात्तासु सदा हरिः ।
सर्वगत्वेन विष्णोस्तु स्थण्डिले भावितात्मनाम् ॥ १२४ ॥
दद्यात् पुरुषसूक्तेन आपः पुष्पाणि[9] चैव हि ।
अर्चितं स्यादिदं तेन नित्यं[10] भुवनसप्तकम् ॥ १२५ ॥
आनुष्टुभस्य सूक्तस्य त्रैष्टुभस्य च[11] दैवतम् ।
पुरुषो यो[12] जगद्बीजमृषिर्नारायणः स्मृतः ॥ १२६ ॥
तस्य[13] सूक्तस्य सर्वस्य ऋचां[14] न्यासं यथाक्रमम् ।
देवे चैवात्मनि[15] तथा सम्प्रवक्ष्याम्यतः परम् ॥ १२७ ॥

---

१. A. reads °न्यस्ताङ्गं for °न्यस्ताङ्गः. २. A. reads न्यस्य, B. E. F. and G. read विन्यस्य for न्यस्त्वा; while A. °स्थाने for °स्थान°. ३. Except A. others read ब्रह्मी° for ब्रह्म°. ४. D. F. and G. read उपाचरेत् for उपक्रमेत्. ५. C. and E. read °राशिं, D. °योगं, G. °शङ्कां for °पाशं. ६. A. and D. read यज्ज्ञात्वा, B. तज्ज्ञात्वा, E. संज्ञानात्, F. यं ज्ञात्वा and G. स संज्ञा all for यत् कृत्वा; while some substitute विष्णोः for परं. ७. B. E. F. and G. read °स्वमेषु for °स्वेतेषु; while, except A., all others read कृतम् for स्मृतम्. ८. D. substitutes येषां for देवो. ९. B. reads पुण्यानि for पुष्पाणि. १०. Except C. and D. all read विश्वं for नित्यं. ११. A. B. E. F. and G. read त्रिष्टुभं तस्य and C. and D. त्रिविधं तस्य for त्रैष्टुभस्य च. १२. C. substitutes हि for यो. १३. D. reads अस्य for तस्य. १४. B. and D. read ऋचा for ऋचां and B. E. and G. read °विधिम् for °क्रमम्. १५. A. reads °ध्यात्मनि for चैवात्म°.

हस्तन्यासं पुरा[1] कृत्वा स्मृत्वा विष्णुं तथाऽव्ययम् ।
शिखाबन्धं च दिग्बन्धं संश्चिन्त्य[2] विष्णुमात्मनि ॥ १२८ ॥
प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे ।
तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत् ॥ १२९ ॥
पञ्चमीं वामजानौ तु षष्ठीं च दक्षिणे[3] न्यसेत् ।
सप्तमीं वामकट्यां च दक्षिणायां तथाष्टमीम् ॥ १३० ॥
नवमीं नाभिमध्ये तु दशमीं हृदि विन्यसेत् ।
एकादशीं वामपादे द्वादशीं दक्षिणे न्यसेत् ॥ १३१ ॥
कण्ठे त्रयोदशीं न्यस्य तथा वक्त्रे चतुर्दशीम् ।
अक्ष्णोः पञ्चदशीं न्यस्य षोडशीं मूर्ध्नि विन्यसेत् ॥ १३२ ॥
एवं न्यासविधिं कृत्वा पश्चाद्यागं समाचरेत् ।
आसनं[4] चिन्तयेन्मेरुमष्टपत्रं[5] सकर्णिकम् ॥ १३३ ॥
व्याहृतीनामथ न्यासं कुर्याच्च[6] विधिवद् द्विजः ।
भूर्लोकं पादयोर्न्यस्य[7] भुवर्लोकं तु जानुनोः ॥ १३४ ॥
स्वर्लोकं कटिदेशे तु नाभिदेशे महस्तथा ।
जनोलोकं तु हृदये कण्ठदेशे तपस्तथा ॥ १३५ ॥
भ्रुवोर्ल्ललाटसन्ध्योस्तु सत्यलोकः प्रतिष्ठितः ।
हिरण्मये परे कोशे[8] विरजं ब्रह्म निष्कलम् ॥ १३६ ॥
तच्छुभ्रं[9] ज्योतिषां ज्योतिस्तद्यद[10]ात्मविदो विदुः ।
आवाहनमथ प्राहुर्[11]विष्णोरमिततेजसः ॥ १३७ ॥
यथार्चा[12] क्रियते तस्य स्वदेहे चिन्तयेत्तथा ।
आद्ययाऽऽवाहयेद्देवमृचा तु[13] पुरुषोत्तमम् ॥ १३८ ॥

---

१. B. E. and G. read तथा for पुरा. २. D. reads °न्धशोऽर्चयेत् for °न्धं सञ्चिन्त्य. ३. B. E. F. and G. read दक्षिणतो for दक्षिणे. ४. D. reads आसने for आसनं. ५. Except A. all others substitute °दलं for °पत्रं. ६. B. E. F. and G. omit च and add तं before कुर्यात्. C. reads the same, but adds तं after कुर्यात्; while D. substitutes तत् for the same. ७. D. reads न्यस्त्वा for न्यस्य. ८. B. and G. read निलये for कोशे. ९. A. reads शुभं for शुभ्रं. १०. D. reads सत् for यत्. ११. Except B. all read प्राह for प्राहुर्. १२. C. and D. read यदर्चाकृतये, E. यथा वा क्रियते both for यथार्चा क्रियते and A. B. E. F. and G. substitute तत्र for तस्य; while D. substitutes यथा for तथा. १३. B. E. F. and G. substitute ऽत्र, C. and D. च for तु.

यथा देवे तथा देहे न्यासं कुर्याद्विधानतः ।
द्वितीययाऽऽसनं दद्यात् पाद्यं चैव तृतीयया ॥ १३९ ॥
चतुर्थ्यार्घ्यः प्रदातव्यः पञ्चम्याऽऽचमनं तथा ।
षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वसनं तथा ॥ १४० ॥
यज्ञोपवीतं चाष्टम्या नवम्या गन्धमेव च ।
पुष्पं देयं दशम्या तु एकादश्या च धूपकम् ॥ १४१ ॥
द्वादश्या दीपकं दद्यात्त्रयोदश्या नैवेद्यकम् ।
चतुर्दश्याञ्जलिं कुर्यात् पञ्चदश्या प्रदक्षिणम् ॥ १४२ ॥
षोडश्योद्वासनं कुर्याच्छेषकर्माणि पूर्ववत् ।
स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनं हरेः ।
षण्मासात् सिद्धिमाप्नोति एवमेव हि योऽर्चयेत् ॥ १४३ ॥
आदित्यमण्डले देवं ध्यात्वा विष्णुं मनोमयम् ।
स याति ब्रह्मणः स्थानं नात्र कार्या विचारणा ॥ १४४ ॥
ध्येयो दिनेशपरिमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्ख-चक्रः ॥ १४५ ॥

---

१. B. reads देहे तथा देवे for देवे तथा देहे and A. C. and D. substitute कृत्वा for कुर्यात्; while G. reads this line :—

यथा देहं तथा न्यासं कुर्याद्विभो विधानतः ।

and E.—

यथा देहं तथा न्यासं सर्वं कुर्याद्विधानतः ।.

२. C. and D. read वस्त्रधौतकम् for वसनं तथा. ३. B. C. and G. read निवेद्यकं, E. निवेधकं, D. निवेदनम् and F. निष्पेष्टकाम् all for नैवेद्यकम्. ४. B. E. and G. read °कार्याणि for °कर्माणि. ५. Before this line C. has the following three lines in the margin, *viz.*:—

पुनः षोडशभिर्मन्त्रैर्दद्यात् पुष्पाणि षोडश ।
तच सर्वं जपेत्सूयः पौरुषं सूक्तमुत्तमम् ॥
ततः षोडशभिर्मन्त्रैर्जुहुयादाज्यआहुतीः ।.

६. A. C. D. read °मुपैति यः for °मनोमयम्, but C. gives in the margin °मनोमयम्. ७. Some read ध्येयः सदा सवितृ° for ध्येयो दिनेशपरि°. ८. D. reads हरिर्मुनिजनैः for हिरण्मयवपुः.

सूक्तेन विष्णुविधिना समुदीरितेन
योऽनेन नित्यमजमादिमनन्तमूर्तिम्।
भक्त्याऽर्चयेत् पठति यश्च स विष्णुदेहं
विप्रो विशेद्धरिवरेण कृतार्थदेहः॥ १४६॥
पञ्चरात्रविधानेन स्थण्डिले वापि पूजयेत्।
जलमध्यगतो वापि पूजयेज्जलमध्यतः॥ १४७॥
द्वादशारं नवव्यूहं पञ्चरात्रक्रमेण तु।
अभावे धौतवस्त्रस्य पत्रिकायास्तथा द्विजः॥ १४८॥
जलेऽपि हि जलेनैव मन्त्रैरेवार्चयेद्धरिम्।
विष्णुर्विष्णुरित्यजस्रं चिन्तयेद्धरिमेव तु॥ १४९॥
तिष्ठन् व्रजंस्तथाऽऽसीनः शयानोऽपि हरिं सदा।
संस्मरन्ना ऽशुभं पश्येदिहाऽमुत्र च वै द्विजः॥ १५०॥
रुद्रं रुद्रविधानेन ब्रह्माणं च विधानतः।
सूर्यं संहितमन्त्रैश्च तदीरितविधानतः॥ १५१॥
दुर्गां कात्यायनीं चैव तथा वाग्देवतामपि।
स्कन्दं विनायकं चैव योगिनीं क्षेत्रपालकान्॥ १५२॥
विधिवदर्चयेत् सर्वान्यो विप्रो भक्तितत्परः।
विष्णुना सुप्रसन्नेन विष्णुलोकमवाप्नुयात्॥ १५३॥
ग्रहांश्च पूजयेद्विद्वान् ब्राह्मणः शान्तितत्परः।
आरोग्य-पुष्टिसंयुक्तो दीर्घमायुरवाप्नुयात्॥ १५४॥
गुरवो गावो नृपा विप्राः सद्भिः पूज्याः सदा नरैः।
पूजिताः पूजयन्त्येते निर्दहन्त्यपमानिताः॥ १५५॥
यो हितः सर्वसत्त्वेषु नृप-गो-ब्राह्मणेषु च।
इहाऽमुत्र च पूज्योऽसौ विष्णुलोकमवाप्नुयात्॥ १५६॥

---

१. D. substitutes योगेन for योऽनेन. २. A. substitutes ऽथ for ऽपि. ३. B. E. F. and G. substitute °तत्त्व° for °रात्र° and D. reads द्वादशारान्नैनव्यूहपञ्चतत्त्व° for द्वादशारं नवव्यूहं पञ्चरात्र°. ४. Except C. all are mistaken here. ५. B. omits this line; while E. F. and G. read किञ्चिदिहामुत्र भवेन्नृणाम् for पश्येदिहामुत्र च वै द्विजः and संस्मरेत् for संस्मरन्. ६. D. reads विधानेन for विधिवत् and B. C. E. F. and G. पूजयेत् for अर्चयेत्. ७. Except A., all others read सु° for स. ८. B. E. and G. read पश्चात् for विद्वान्. ९. A. C. and D. substitute द्विजैः for नरैः. १०. C. reads °र्दहन्ति चाव° and D. °र्दहन्ति चाप° for °निर्दहन्त्यप°.

उक्तो गृहस्थस्य सुरार्चनस्य धन्यो विधिर्विष्णुपदोपलब्ध्यै ।
कार्यो द्विजातेः प्रतिवासरं यो वेदोक्तमन्त्रैः स मया हिताय ॥ १५७ ॥

देवपूजाविधिः प्रोक्त एष उद्देशतो यथा ।
वैश्वदेवस्य वक्तव्यो विधिर्विप्रा मयाधुना ॥ ५१८ ॥

इति देवपूजाविधिः ।

वैश्वदेवं प्रवक्ष्यामि यथाकार्यं द्विजातिभिः ।
स्वगृह्योक्तविधानेन जुहुयाद्वैश्वदैविकम् ॥ १५९ ॥
हविष्यस्य द्विजोऽभावे यथालाभं शृतं हविः ।
जुहुयाद्विधिवद्भक्त्या यथा स्याच्चित्तनिर्वृतिः ॥ १६० ॥
यद्वा तत्रापि होतव्यमग्नौ किंचिद् द्विजातिभिः ।
फलं वा यदि वा मूलं घासं वा यदि वा पयः ॥ १६१ ॥
अहुत्वा च द्विजोऽश्नीयाद्यत्किंचित् स्वयमश्नुते ।
अश्नीयाच्चेदहुत्वापि नरकं स समाविशेत् ॥ १६२ ॥
जुहुयाद्व्यञ्जन-क्षारवर्ज्यमन्नं हुताशने ।
अनुज्ञातो द्विजैस्तैस्तु त्रिःकृत्वा पुरुषर्षभः ॥ १६३ ॥
यैस्त्वग्नौ हूयते नैव यस्य चाऽग्रं न दीयते ।
अभोज्यं तद् द्विजातीनां भुक्त्वा चान्द्रायणं चरेत् ॥ १६४ ॥
लौकिके वैदिके चैव वैश्वदेवो हि नित्यशः ।
लौकिके पापनाशाय वैदिके स्वर्गमाप्नुयात् ॥ १६५ ॥
अभावादग्निहोत्रस्य आवसथ्यस्य वा तथा ।
यस्मिन्नग्नौ पचेदन्नं तत्र होमो विधीयते ॥ १६६ ॥

---

१. B. C. and G. read °लब्धौ for °लब्ध्यै and D. °जनस्य for °पदोप°. २. D. reads समये हि° for स मया हि°; while E. and G. substitute याम् for °य at the end of this verse. ३. B. E. and G. read पुण्यो विधिर्मे° and F. पुरुषो विधिर्मे° for विधिर्विप्रा म°. ४. B. E. F. G. read दारु तथा for वा यदि वा; while C. substitutes मासं for घासं. ५. B. E. F. G. read प्रतिपद्यते for स समाविशेत्. C. also reads the same in the margin. ६. B. G. and F. read °क्षीर° for °क्षार°, but it is useless here. ७. C. and D. read यश्च and यश्चा° for यस्तु; while C. मासं, D. मासः B. E. and G. वान्नं all for चाऽग्रं. ८. B. E. F. and G. read वापि and D. नैव for चैव. ९. A. B. C. F. and G. तथा त्वावसथस्य च for आवसथ्यस्य वा तथा, but it seems incorrect.

अग्निःसोमस्समस्तौ तौ विश्वेदेवास्तथैव च ।
धन्वन्तरिः कुहूस्तद्वदनुमतिः प्रजापतिः ॥ १६७ ॥
द्यावाभूभ्योः स्विष्टकृते हुत्वैतेभ्यः पुनस्ततः[1] ।
कुर्याद्बलिहृतिं पश्चात् सर्वदिक्षु प्रदक्षिणम् ॥ १६८ ॥
सुत्राम्णे तस्य पुंभ्यश्च यमाय च सहानुगैः ।
[2]वरुणाय सहैतैश्च सोमाय च सहानुगैः ॥ १६९ ॥
मरुद्भिश्च क्षिपेद्वारि अश्विभ्यां च तथा हरेत्[3] ।
वनस्पतिभ्यः सर्वेभ्यो मुसलोलूखले हरेत् ॥ १७० ॥
श्रियै च भद्रकाल्यै च उच्छीर्षे[4] पादयोः क्रमात् ।
ब्रह्मणे सानुगायेति मध्ये चैव बलिं हरेत् ॥ १७१ ॥
वास्तवे सानुगायेति वास्तुमध्ये बलिं हरेत् ।
विश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत्[5] ॥ १७२ ॥
द्युचरेभ्यश्च भूतेभ्यो नक्तंचारिभ्य एव च ।
वास्तोः पृष्ठे च कुर्वीत बलिं[6] सर्वानुतृप्तये ॥ १७३ ॥
पितृभ्यो बलिशेषं तु सर्वं दक्षिणतो हरेत् ।
पतितेभ्यः श्वपाकेभ्यः पापानां पापरोगिणाम् ॥ १७४ ॥
कृमि-कीट-पतङ्गानां सर्वेभ्योऽपि बलिं हरेत् ।
एवं सर्वाणि भूतानि यो विप्रो नित्यमर्चयेत् ॥ १७५ ॥
तत् स्थानं परमाप्नोति यज्ज्योतिः परवेधसः ।
गृह्ये ऽग्नौ वैश्वदेवं तु प्रोक्तमेतन्मनीषिभिः ॥ १७६ ॥
अनग्निकस्तु कुर्वीत वैश्वदेवं कथं त्विति[7] ? ।
महाव्याहृतिभिस्तिस्रः समस्ताभिस्तथाऽपरा[8] ॥ १७७ ॥
इत्याहुतीश्चतस्रस्तु तथा देवकृते ऽपि च ।
त्रियम्बकं यजामह इत्यादि चाहुतिद्वयम् ॥ १७८ ॥

---

१. A. B. E. and G. read पुनस्त्वतः, C. and D. पुनः पुनः both for पुनस्ततः. २. D. omits this line ३. C. and D. read अप्सरेभ्यः and हरे for अश्विभ्यां च and हरेत् respectively. ४. D. meaninglessly reads उष्णीषे for उच्छीर्षे. ५. A. reads आकाशतो हरेत्, D. आकाशमुत्क्षिपेत् both for आकाश उत्क्षिपेत्. ६. B. E. G. read बलिः and C. बलीन् for बलिं. ७. C. reads इह for इति. ८. A. B. and F. read ऽपरे, C. and G. ऽपराः for ऽपरा; while G. सूर्या चैव for समस्ताभिस्.

वैश्वदेवेन जुहुयाद्विशेषोऽन्यत्र वै पुनः ।
अपमृत्युनिवृत्त्यर्थमायुःपुष्टिविवृद्धये ॥ १७९ ॥
जुहुयात् त्र्यम्बकं देवं बिल्वपत्रैस्तिलैस्तथा ।
विनायकाय होतव्या घृतस्याहुतयस्तथा ॥ १८० ॥
सर्वविघ्नोपशान्त्यर्थं पूजयेद्यत्नतस्तु तम् ॥
गणानां त्वेति मन्त्रेण स्वाहाकारान्तमावृतः ॥ १८१ ॥
चतस्रो जुहुयात्तस्मै गणेशाय तथाऽऽहुतीः ।
तद्विष्णोरिति जुहुयाद्विधिसम्पूर्णताकृते ॥ १८२ ॥
प्रणवेन च गायत्र्यां केचिज्जुह्वति तद् द्विजाः ।
एतौ वै सर्वदैवत्यौ एतत्परं न किंचन ॥ १८३ ॥
एताभ्यां तु हुतेनैव सर्वेभ्योऽपि हुतं भवेत् ।
जुहुयात् सर्पिषाऽभ्यक्तं गव्येन पयसाऽथ वा ॥ १८४ ॥
क्षीतेन गोविकारेण तिलैस्तैलेन वा पुनः ।
सम्प्रोक्ष्य पायसा वाऽन्नं नाभ्यक्तं चाद्नुयादपि ॥ १८५ ॥
अस्नेहा यव-गोधूमाः शालयो हवनीयकाः ।
हविस्तु हविरभ्यक्तमहविस्तु हविर्यतः ॥ १८६ ॥
अभ्यक्तमेव होतव्यमतो रूक्षं विवर्जयेत् ।
दारिद्र्यं [13] श्विचित्रतामेके रूक्षान्नहवने विदुः ॥ १८७॥
जठराग्नेः [14] क्षयं चैके रूक्षमन्नं न हूयते ।
ओंकारपूर्विकाः सर्वाः स्वाहाकारान्तिकास्तथा ॥१८८॥

१. A. reads °देवं च, B. D. E. F. and G. च. २. B. D. E. and G. read अल्प° for अप°. ३. A. reads तथाष्टौ तस्य चाहुतीः, D. तथा घृतस्य चाहुतिः for घृतस्याहुतयस्तथा. ४. B. reads च ततस्तु, C. यत्र तंस्तु, D. सन्ततस्तु and E. यत्ततस्तु° all for यत्नतस्तु°. ५. A. D. and E. read पावृतः for °मावृतः. ६. B. E. F. and G. read विधे for विधि°. ७. A. B. E. read गायत्र्याः for गायत्र्या; while C. A. D. and F. read स द्विजाः for तद्द्विजाः. ८. B. E. F. and G. read तत्परस्न तु for एतत्परं न. ९. B. reads हुतेनैव सर्वेभ्योऽपि हुतं for हुतेनैव सर्वेभ्योऽपि हुतं. १०. B. E. and G. read सर्षपाभक्तं and D. सर्पिषा युक्तं for सर्पिषाभ्यक्तं, but the former reading is an incorrect one. ११. Except A. all others read पयसा for पायसा; while B. E. and G. read म for च. १२. B. E. F. and G. read निःस्नेहाः and D. चापि गोधूमाः for अस्नेहाः and यवगोधूमाः. १३. All others except A. read श्वित्रताम् for श्विचित्रताम्. १४. B. E. F. and G. read जठराग्नौ for जठराग्नेः. १५. A. रूक्षासनं न हूयते, C. रूक्षान्नं सम्प्रदीयते for रूक्षमन्नं न हूयते.

जुहुयादग्निको विप्रो गृहमेधी हि[1] नित्यशः ।
बलिं चोपान्तभूतेभ्यः सर्वेभ्यो ऽ[2]विशेषतः ॥ १८९ ॥
हुत्वाऽथ[3] कृष्णवर्त्मानं कृताञ्जलिः प्रसादयेत् ।
त्वमग्ने द्युभिरेतेन मन्त्रेण भक्तिमान् द्विजः ॥ १९० ॥
आब्रह्मन्निति मन्त्रं[4] तु जपेद्वै सार्वकामिकम् ।
आहाव्यग्न इति ह्येनं मन्त्रं च प्रयतो जपेत्[5] ॥ १९१ ॥
[6]अन्यं हौताशनं मन्त्रं जपित्वाथ क्षमापयेत् ।
अन्यानि चैव सू[7]क्तानि पवित्राणि ततो जपेत् ।
[8]सर्वशान्तिककृत्यर्थं तथाग्निर्देवतेति च ॥ १९२ ॥
ज्ञानं धनमरोगित्वं गतिमिच्छं[9]स्तथा द्विजः ।
शम्भुमग्निं रविं विष्णुमर्चयेद्भक्तितः क्रमात् ॥ १९३ ॥
अजानन् यो द्विजो नित्यमहुत्वाऽत्ति शृतं हविः ।
पितृ-देव-मनुष्याणामृणयुक्तः स यात्य[10]धः ॥ १९४ ॥
शाकं वा[11]ऽपि तृणं वापि हुत्वाग्नावश्नुते द्विजः ।
सर्वकामसमायुक्तः सोऽत्रै[12]व सुखमश्नुते ॥ १९५ ॥
स्वरेण वर्णेन च यद्विहीनं तथैव हीनं क्रि[13]ययापि यच्च ।
तथातिरिक्तं मम तत् क्षमस्व तदस्तु चा[14]ग्ने परिपूर्णमेतत् ॥ १९६ ॥
सर्वपापापनोदाय स[15]र्वकामाय वै द्विजाः ।
द्विजन्मनां हितार्थाय वैश्वदेव उदाहृतः ॥ १९७ ॥

---

१. A. substitutes तु for हि and B. and G. read गृहमेधो for गृहमेधी. २. B. C. and E. read विशेषतः for अविशेषतः. ३. B. E. and F. read तु for ऽथ. ४. A. reads मन्त्रे for मन्त्रं. ५. A. reads यतः for जपेत्. ६. D. does not insert the following line :—

अन्यानि चैव सूक्तानि पवित्राणि ततो जपेत् ।.

C. also omits the same, but gives in the margin. ७. A. and F. read मन्त्राणि for सूक्तानि. ८. F. inserts this line before the two preceding lines. ९. C. reads इच्छं for इच्छन्. १०. C. and D. read प्रयात्यधः for स यात्यधः. ११. D. substitutes च for वा. १२. B. E. F. and G. read ऽपि for एव. १३. D. reads कृपया for क्रियया. १४. B. E. and G. read चास्ते and C. and D. चाग्नेः for चाग्ने. १५. B. E. F. and G. read सर्वकामफलाय च for सर्वकामाय वै द्विजाः; while C. and D. read °प्रणोदाय for °पनोदाय.

इति वैश्वदेवविधिः ।

आतिथ्यं सम्प्रवक्ष्यामि चातुर्वर्ण्यफलप्रदम् ।
चातुर्वर्ण्योऽतिथिः प्रोक्तः काले प्राप्तोऽध्वगोऽश्रुतः ॥ १९८ ॥
अदृष्टोऽपृष्टगोत्रादिरज्ञाताचार-विग्रहः ।
सन्ध्यामात्रकृताचारस्तज्ज्ञैः प्रोक्तोऽतिथिरुच्यते ॥ १९९ ॥
क्षुत्तृष्णा-ऽध्वश्रमश्रान्तः प्राणत्राणाभयाचकः ।
गृहीतपात्रमात्रः सन् गृहद्वारमुपागतः ॥ २०० ॥
विष्णुरूपोऽतिथिः सोयमुत्तरार्थमुपागतः ।
इति मत्त्वा महाभक्त्या वृणुयाद्भोजनाय तम् ॥ २०१ ॥
एष स्वर्ग्यः समायातः सर्वदेवमयोऽतिथिः ।
निर्दह्य सर्वपापानि ममायं सम्प्रयास्यति ॥ २०२ ॥
ब्राह्मणैः सह भोक्तव्यो भक्त्या प्रक्षाल्य पाद्वयम् ।
आसनार्घ्यादिकं दत्वा कृत्वा स्रक्-चन्दनादिकम् ॥ २०३ ॥
योगिनो विविधै रूपैर्भ्रमन्ति धरणीतले ।
नराणामुपकाराय ते चाज्ञातस्वरूपिणः ॥ २०४ ॥
तस्मादभ्यर्चयेत् प्राप्तं श्राद्धकालेऽतिथिं द्विजः ।
श्राद्धक्रियाफलं हन्ति तत्रैवापूजितोऽतिथिः ॥ २०५ ॥
तस्मादपूर्वमेवात्र पूजयेदागताऽतिथिम् ।
कदाचित् कश्चिदागच्छेत्तारयेद्यस्तु पूर्वजान् ॥ २०६ ॥
यतिर्ब्रत्यग्निहोत्री च तथा च मखकृद् द्विजः ।
सदैतेऽतिथयः प्रोक्ता अपूर्वाश्च दिने दिने ॥ २०७ ॥

---

१. B. E. F. and G. read अथातिथ्यं for आतिथ्यं सं०. २. D. reads बहुश्रुतः for ऽध्वगोऽश्रुतः. ३. B. E. and G. read ऽश्रुतपूर्वादि°, F. ऽदृष्टगोत्रादि° for ऽपृष्टगोत्रादि°. ४. B. E. and G. read °परि° for °श्रम°; while B. substitutes °च° for °ऽध्व°. ५. B. E. F. and G. read गृहीतयात्रामात्रः सन् and C. and D. गृहिणो वैश्वदेवान्ते. ६. B. reads °म्प्रद्वारार्थं°, C. D. E. F. and G. read °म्प्रस्तारार्थं° for °मुत्तरार्थं°; while C. and D. इहा° for उपा°. ७. A. reads च भक्त्या च, D. च भक्त्या च both for महाभक्त्या. ८ B. C. E. F. and G. read स्वं पुण्येन म°, D. स्वं शुभने म° for एषः स्वर्ग्यः स.° ९. B. E. F. and G. read भोज्योऽसौ for भोक्तव्यो. १०. B. C. D. and G. read °र्घादिकं for °र्घ्यादिकं. ११. C. and D. read वेषै° for रूपै°. १२. B. E. F. and G. read कापि कदाचिदागच्छेत् for कदाचित् कश्चिदागच्छेत्. १३. B. reads ब्रह्माग्निहोत्री and D. बाह्याग्निहोत्री for ब्रत्यग्निहोत्री.

अतिथेऽमरदेहस्त्वं मत्तारार्थमिहागतः।
संसारपङ्कमग्नं मामुद्धरस्वाऽघनाशन ॥ २०८ ॥
नैकाश्रमे[१] वसन् विप्रो मुनीन्द्रैरुच्यतेऽतिथिः।
अन्यत्र दृष्टपूर्वो यो[२] नासावतिथिरुच्यते ॥ २०९ ॥
क्षत्रियो यदि वा[३] गच्छेदातिथित्वेन[४] वेश्मनि।
भुक्तेषु सत्सु विप्रेषु कामतस्तु तमाशयेत् ॥ २१० ॥
वैश्यो वा यदि वा शूद्रो विप्रगेहं समाव्रजेत् ॥
तौ[५] भृत्यैः सह भोक्तव्याविति पाराशरोऽब्रवीत्[६] ॥ २११ ॥
क्लीबो वा यदि वा काणः कुष्ठी वा व्याधितो ऽपि वा।
आगतो वैश्वदेवान्ते द्रष्टव्यः सर्वदेववत्[७] ॥ २१२ ॥
क्षत्रियेणापि वैश्येन तथैव वृषलेन च।
आतिथ्यं सर्ववर्णानां कर्तव्यं स्यादसंशयम् ॥ २१३ ॥
योऽतिथिं पूजयेद्भक्त्या अन्याभ्यागतमेव च[८]।
बाल-वृद्धादिकं चैव तस्य विष्णुः प्रसीदति ॥ २१४ ॥
देवा मनुष्याः पितरश्च सर्वे स्युर्येन तृप्तेन च भूरि दिष्टम्।
तस्यान्नदातुस्त्वमराङ्गनाभिस्तस्यातिथेः[९] केन समत्वमस्ति ॥ २१५ ॥

इति आतिथ्यविधिः।

वर्णधर्मान् प्रवक्ष्यामि यत् कृत्यं ब्राह्मणादिभिः।
निबोधध्वं[१०] द्विजास्तद्वै संक्षेपेण पृथक् पृथक् ॥ २१६ ॥
यजनं याजनं विप्रे तथा दान-प्रतिग्रहौ।
अध्यापनमध्ययनं कर्माण्येतानि षट् तथा ॥ २१७ ॥
प्रजानां रक्षणं दानमरीणां निग्रहस्तथा।
यजना-ऽध्ययने राज्ञि विषयासक्तिवर्जनम् ॥ २१८ ॥

---

१. D. reads नैकग्रामे for नैकाश्रमे. २. D. reads ऽपि for यो. ३. B. ऽपि यथा for यदि वा. E. and G. also read the same; while F. reads ऽपि यदा for the same. ४. D. reads अतिथिस्तस्य for अतिथित्वेन. ५. B. C. E. F. and G. read ते and भोक्तव्या इति for तौ and भोक्तव्याविति respectively. ६. B. C. F. and G. read ऽवदत् for ऽब्रवीत्. ७. C. reads °दैवतः and D. °दैवताः both for °देववत्. ८. B. E. F. and G. read पूर्वमभ्यागतं तथा for अन्याभ्यागतमेव च; while C. substitutes तथा° for अन्या°. ९. B. and D. read तस्मा° for तस्या°. F. also reads the same. १०. D. reads निबोद्धव्यं for निबोधध्वं.

यजना-ऽध्ययने दानं पाशुपाल्यं तथा विशि[1] ।
वाणिज्यं च कुसीदं च कर्मषट्कं प्रकीर्तितम् ॥ २१९ ॥
शुश्रूषा ब्राह्मणादीनां तदाज्ञापालनं तथा ।
एष धर्मः स्मृतः शूद्रे वाणिज्येन च जीवनम् ॥ २२० ॥
सर्वेषां जीवनं प्रोक्तं धर्मेणैव च कर्षणम् ।
भिन्नवृत्तिर्यथा न स्यात् कुर्याद्विप्रस्तथा च तत् ॥ २२१ ॥
कुर्वन्नुक्तानि कर्माणि वृत्त्या वा क्षत्रियस्य च ।
वृत्त्यभावे द्विजो जीवेन्न्द्विजवृत्तिं विवर्जयेत्[2] ॥ २२२ ॥
प्रजानां पालनं दानं शस्त्रभृत्त्वं[3] प्रचण्डता ।
निर्जयः परसैन्यानामेष धर्मः स्मृतो नृपे[4] ॥ २२३ ॥
पुष्पं पुष्पं विचिनुयान्[5] मूलच्छेदं न कारयेत् ।
मालाकार इवाऽऽरामे प्रजासु स्यात्तथा नृपः ॥ २२४ ॥
लोहकर्मरथानां च गवां च प्रतिपालनम्[6] ।
गोरक्षा कृषि-वाणिज्यं वैश्यवृत्तिरुदाहृता ॥ २२५ ॥
शूद्रस्य द्विजशुश्रूषा परो धर्मः प्रकीर्तितः ।
अन्यथा[7] कुरुते यत्तु तद्भवेत्तस्य निष्फलम् ॥ २२६ ॥
लवणं मधु तैलं च दधि तक्रं घृतं पयः ।
न दुष्येच्छूद्रजातीनां कुर्यात् सर्वस्य विक्रयम् ॥ २२७ ॥
विक्रयं मद्य-मांसानामभक्ष्यस्य च भक्षणम् ।
अगम्यागामिता चौर्यं शूद्रे स्युः पातहेतवः[8] ॥ २२८ ॥
कापिलाक्षीरपानेन ब्राह्मणीगमनेन च ।
वेदाक्षरविचारेण शूद्रस्य नरको[9] ध्रुवम् ॥ २२९ ॥

इति श्रीबृहत्पराशरीये धर्मशास्त्रे सुव्रतप्रोक्तायां संहितायां चतुर्थो ऽध्यायः[10] ॥ ४ ॥

---

१. D. reads कृषिः for विशि. २. G. reads जीवेत् for विवर्जयेत्. ३. B. C. D. E. and G. read °वृत्ति and F. °वृत्तं for °भृत्त्वं. ४. D. reads प्रकीर्तितः for स्मृतो नृपे. ५. B. C. F. and G. read विचिन्वीत for विचिनुयात्. ६. B. E. F. and G. read परि° for प्रति°. ७. B. E. F. and G. read यद्न्यत् कुरुते पुण्यं. C. also reads the same, but substitutes अथ for यत्. ८. A. C. and D. read पाप° for पात°. ९. A. C. and D. read नरकं for नरको. १०. C. does not insert धर्मशास्त्रे सुव्रतप्रोक्तायां संहितायां चतुर्थोऽध्यायः for it, it substitutes only वर्णधर्मविधिः; while D. omits संहितायां others read द्वितीयो for चतुर्थो.

बृहत्पराशरसंहिता.

पंचमोऽध्यायः ।

अतः परं गृहस्थस्य कर्मा[1]चारं कलौ युगे ।
वर्ण[2]साधारणं साक्षाच्चातुर्वर्ण्यक्रमेण तु[3] ॥ १ ॥
युष्माकं सम्प्रवक्ष्यामि पराशरवचोदितम्[4] ।
षट्कर्मसहितो विप्रः कृषिवृत्तिं समाश्रयेत् ॥
हीनाङ्गं व्याधिसंयुक्तं प्राणहीनं च दुर्बलम् ।
क्षुद्युक्तं तृषितं श्रान्तमनड्वाहं न वाहयेत् ॥ ३ ॥
स्थिराङ्गं नीरुजं तृप्तं साण्डं षण्ढविवर्जितम् ।
अधृष्यं[5] सबलप्राणमनड्वाहं तु वाहयेत् ॥ ४ ॥
वाहयेद् दिवसस्यार्धं ततः[6] स्नानं समाचरेत् ।
कुगवैर्न कृषिं कुर्यात् सर्वथा धेनुसंग्रहम् ॥ ५ ॥
बन्धनं पालनं रक्षां द्विजः कुर्याद्गृही गवाम् ।
वत्साश्च यत्नतो रक्ष्या वर्धन्ते[7] ते यथा क्रमात् ॥ ६ ॥
न दूरे तास्तु नेतव्याश्[8]चारणाय कदाचन ।
दूरे[9] गावश्चरन्त्यो हि न भवन्ति शुभावहाः ॥ ७ ॥
प्रातरेव हि दोग्धव्या दुह्यात् सायं न ता[10] गृही ।
दोग्धुर्द्धिः[11]पयसो नैव वर्धन्ते ताः कदाचन ॥ ८ ॥

---

१. B. E. F. and G. substitute धर्मा° for कर्मा°. २. B. C. F. G. धर्मं and D. and E. धर्म° for वर्ण°. ३. B. C. and G. °मागमम् E. D. and F. °मागतम् for °मेण तु. ४. B. E. F. and G. read °मुखाच्छ्रुतम्, C. °प्रचोदितम् for °वचोदितम्. ५. B. E. and C. read this line as follows :—

शान्तं च सबलं दृप्तं वाहयेद्वृषभं कृषी ॥.

F. also reads the same, but it differs in having दृप्तं for दृप्तं and कृषो for कृषी. ६. C. and D. read पश्चात् for ततः. ७. B. E. F. and G. read वर्धनीया यथाक्रमम् and C. वर्धन्त्येते यथाक्रमम्: while D. reads यथाक्रमम् for यथा क्रमात्. ८. C. and D. read मोक्तव्या° for नेतव्या°. ९. A. reads दूरे गावो विचरन्त्यो, B. E. F. and G. गावो दूरेण चरन्त्यो for दूरे गावश्चरन्त्यो हि. C. omits this and the following two lines, but they appear in the margin; while D. reads शुभायनाः and others except A. शुभा यतः for शुभावहाः. १०. A. B. read ततो, E. and G. °तना and C. °तने and D. तथा all for न ता. ११. B. C. E. F. and G. substitute हि for द्धिः; while D. reads वि:पर्ययेणैव for द्धिः पयसो नैव.

अनादेयतृणान्यत्त्वा[1] स्रवन्त्यनुदिनं पयः ।
तुष्टिदा[2] देवतादीनां पूज्या गावः कथं न ताः ॥ ९ ॥

स्पृष्टाश्च[3] गावः शमयन्ति पापं
संसेविताश्चोपनयन्ति वित्तम्[4] ।
ता एव दत्तास्त्रिदिवं नयन्ति
गोभिर्न तुल्यं धनमास्ति किंचित् ॥ १० ॥

यस्याः शिरसि ब्रह्माऽऽस्ते स्कन्धदेशे शिवःस्थितः[5] ।
पृष्ठे नारायणस्तस्थौ[6] श्रुतयश्चरणेषु च ॥ ११ ॥
या अन्या देवताः काश्चित्तस्या लोमसु ताः स्थिताः ।
सर्वदेवमया गावस्तुष्येत्तद्भक्तितो हरिः ॥ १२ ॥
हरन्ति[7] स्पर्शनात् पापं पयसा पोषयन्ति याः ।
प्रापयन्ति दिवं दत्ताः पूज्या गावः कथं न ताः ॥ १३ ॥
यत्खुराहतभूमेर्ये[8] उत्पद्यन्ते रजःकणाः ।
प्रलीनं[9] पातकं तैस्तु पूज्या गावः कथं न ताः ॥ १४ ॥
शकृन्मूत्रं हि यस्यास्तु पीतं[10] दहति पातकम् ।
किमपूज्यं हि तस्या गोरिति पाराशरोऽब्रवीत् ॥ १५ ॥
गौरवत्सा न दोग्धव्या न चैवं[11] गर्भसन्धिनी ।
प्रसूता च दशाहार्वाग्दोग्धि चेन्नरकं व्रजेत् ॥ १६ ॥

---

१. B. reads °तृणान्त्यक्त्वा, C. °तृणास्त्यक्त्वा, D. °तृणस्त्यक्त्वा, E. °तृणा त्यक्त्वा, F. °तृणान्यथा and G. °तृणास्त्यक्त्वा all for तृणान्यत्त्वा. २. D. reads तुष्टिकृत् for तुष्टिदा. ३. C. and D. do not insert this whole verse, but it appears in the margin of C. ४. B. reads चित्तम् and G. चित्रम् both for वित्तम्. ५. C. and D. read स्मृतः for स्थितः. ६. A. C. and D. read विष्णुस्तथा for नारायणः. ७. B. reads दहति and E. F. and G. read दहन्ति, D. हरति all for हरन्ति. ८. D. reads °च्छपा° for °त्खुरा° and B. E. F. and G. substitute तु for ये and C. and D. उद्यताः पांसुसंस्पृशः for उत्पद्यन्ते रजःकणाः; while A. omits this and the following one line, namely:—

यत्खुराहतभूमेर्ये उत्पद्यन्ते रजःकणाः ।
प्रलीनं पातकं तैस्तु पूज्या गावः कथं न ताः ॥.

९. D. reads प्रीणयेत् पुरुषस्येनो वन्ध्या for प्रलीनं पातकं तैस्तु पूज्या. १०. A. reads पीतं पुनाति पातकात् for पीतं दहति पातकम्; while E. reads सकृत् for शकृत्. ११. B. C. E. F. and G. read तथा for चैवं.

दुर्बला व्याधिसंयुक्ता पुष्पिता या द्विवत्सका[1]।
साधुभिर्न च दोग्धव्या धार्मिकैर्धनमीप्सुभिः[2] ॥ १७ ॥
कुलान्ते पुष्पिता गावः कुलान्ते बहवस्तिलाः।
कुलान्ते चलचित्ता स्त्री कुलान्ते बन्धुविग्रहः ॥ १८ ॥
एकत्र पृथिवी सर्वा सशैल-वन-कानना।
तस्या[3] गौर्ज्यायसी साक्षादेकत्रोभयतोमुखी ॥ १९ ॥
यथोक्तविधिना चैता वर्णैः पाल्याः सुपूजिताः।
पालयन् पूजयन्नेताः स प्रेत्येह च मोदते ॥ २० ॥
दक्षिणाभिमुखा गाव उत्तराभिमुखा अपि।
बन्धनीयास्तथैताः स्युर्न प्राक्-पश्चिमतोमुखाः ॥ २१ ॥
वाजि-गो-वृषशालायां[4] सुतीक्ष्णं लोहदात्रकम्[5]।
स्थाप्यं तु सर्वदा तत्[6] स्यादवलुप्तविमोक्षकृत् ॥ २२ ॥
गावो देयाः सदा रक्ष्याः पाल्याः पोष्याश्च सर्वदा।
ताडयन्ति च ये पापा ये चाक्रोशन्ति[7] ता नराः ॥ २३ ॥
नरकाग्नौ प्रपच्यन्ते[8] गोनिःश्वासप्रपीडिताः।
सपलाशेन[9] शुष्केण ता दण्डेन निर्वर्तयेत् ॥ २४ ॥
गच्छ गच्छेति तां ब्रूयान् मा मा भैरिति वारयेत्।
संस्पृशन्[10] गां नमस्कृत्य कुर्यात्तां च प्रदक्षिणम् ॥ २५ ॥
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा।
तृणोदकादिसंयुक्तं यः प्रदद्याद्गवाह्निकम् ॥ २६ ॥

---

१. Except A. all others read °भूः for °का. २. A. and D. read वर्णिभिर् for धार्मिकैर्; while D. substitutes सुख° for धन°. ३. D. reads तथा for तस्या. ४. A. and D. read गो-वृषा-वाजि° and C. गो-वृष-वाजि° for वाजि-गो-वृष°. ५. B. and G. read °यन्त्रकम् for °दात्रकम्. ६. B. C. and G. read तस्या and D. तस्यां for तत् स्यात्; while B. and G. दुःखलब्ध-विमोक्षकृत्, C. अविलुप्तविमोक्षणात् and D. गवि लुप्तविमोक्षणात् all for अवलुप्तविमोक्षकृत्. ७. D. reads °कर्ष° for °क्रोश°. ८. B. and G. substitute च for प्र°. B. and G. read गोभिः श्वासप्र°, C. गोभिः श्वासेन for गोनिःश्वासप्र°; while D. reads this whole line as follows:—

नरके पच्यते ऽङ्गानि श्वासेन च प्रपीडिताः।.

९. C. reads स पशुश्चर्मदण्डेन मृदुनैनां, D. स पशुश्चर्मदण्डेन मृदु तासां for सपलाशेन शुष्केण ता दण्डेन; while B. ताडणेन for ता दण्डेन. १०. A. reads संस्पृश्य गां, B. E. F. and G. यां संस्पृश्य for संस्पृशन् गां.

सोऽश्वमेधसमं पुण्यं लभते नात्र संशयः ।
गवां कण्डूयनं स्नानं गवां दानसमं भवेत् ॥ २७ ॥
तुल्यं गोशतदानस्य भयतो गां प्रपाति यः ।
पृथिव्यां यानि तीर्थानि आसमुद्रं सरांसि च ॥ २८ ॥
गवां शृङ्गोदकस्नानकलां नार्हन्ति षोडशीम् ।
पातकानि कुतस्तेषां येषां गृहमलंकृतम् ॥ २९ ॥
सततं बालवत्साभिर्गोभिः श्रीभिरिव स्वयम् ।
ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् ॥ ३० ॥
तिष्ठन्त्येकत्र मन्त्रास्तु हविरेकत्र तिष्ठति ।
गोभिर्यज्ञाः प्रवर्तन्ते गोभिर्देवाः प्रतिष्ठिताः ॥ ३१ ॥
गोभिर्वेदाः समुत्तीर्णाः षडङ्गाः सपद-क्रमाः ।
सौरभेयास्तु यस्याग्रे पृष्ठतो यस्य ताः स्थिताः ॥ ३२ ॥
वसन्ति हृदये नित्यं तासां मध्ये वसन्ति ये ।
ते पुण्यपुरुषाः क्षोण्यां नाकेऽपि दुर्लभाश्च ते ॥ ३३ ॥
ये गोभक्तिकरा नित्यं भवन्ते ये च गोप्रदाः ।
शृङ्गमूले स्थितो ब्रह्मा शृङ्गमध्ये तु केशवः ।
शृङ्गाग्रे शंकरं विद्यात्त्रयो देवाः प्रतिष्ठिताः ॥ ३४ ॥
शृङ्गाग्रे सर्वतीर्थानि स्थावराणि चराणि च ।

---

१. A. and B. read धूमं, E. धर्मं and F. धूम° for स्नानं; while A. B. E. F. and G. read गोप्रदानसमं for गवां दानसमं and D. omits this whole verse. २. This and the preceding one line is omitted in C., but they appear in the marginal correction. ३. D. reads समुद्राश्च for आसमुद्रं. ४. B. F. and G. read °स्यापि for °स्नाने. ५. B. E. F. and G. read गोभिस्तु बालवत्साभिः सदा. C. also reads the same, but differs in सततं for गोभिस्तु; while D. substitutes स्त्रीभिः for श्रीभिः. ६. B. E. F. and G. read ब्राह्मणानां गवां चैव. ७. B. E. and G. read यत्र मन्त्राश्च यत्र सन्ति हवींषि च for एकत्र मन्त्रास्तु हविरेकत्र तिष्ठति; while D. substitutes हरि° for हवि.° ८. B. E. and G. read वेदाः प्रवर्तिताः for देवाः प्रतिष्ठिताः; while C. वसन्ति ते and F. प्रवर्तिताः for प्रतिष्ठिताः. ९. A. reads सौरभेयस्य, B. सौरभ्यो यस्य and E. F. G. स्युरेता यस्य for सौरभेयास्तु; while D. तस्याग्रे for यस्याग्रे. १०. C. and D. do not insert this line; while B. E. F. and G. वर्धन्ते for भवन्ते. ११. F. omits the following :—

शृङ्गाग्रे सर्वतीर्थानि स्थावराणि चराणि च ।
सर्वे देवाः स्थिता देहे सर्वदेवमयी हि गौः ॥

सर्वे देवाःस्थिता देहे सर्वदेवमयी हि गौः ॥ ३५ ॥
ललाटाग्रे स्थिता देवी नासामध्ये तु षण्मुखः ।
कम्बलाऽश्वतरौ नागौ तत्कर्णाभ्यां व्यवस्थितौ ॥ ३६ ॥
स्थितौ तस्याश्च सौरभ्याश्चक्षुषोः शशि-भास्करौ ।
दन्तेषु वसवश्चाष्टौ जिह्वायां वरुणः स्थितः ॥ ३७ ॥
सरस्वती च हुंकारे यम-यक्षौ[1] च गण्डयोः ।
ऋषयो रोमकूपेषु प्रस्रावे जाह्नवीजलम् ॥ ३८ ॥
कालिन्दी गोमये तस्या अपरा देवतास्तथा ।
अष्टाविंशतिदेवानां कोट्यो लोमसु ताः स्थिताः ॥ ३९ ॥
उदरे गार्हपत्योऽग्निर्हृदये दक्षिणस्तथा ।
मुखे चाहवनीयस्तु सभ्याऽऽवसथ्यौ[2] च कुक्षिषु ॥ ४० ॥
एवं यो वर्तते गोषु ताडन-क्रोधवर्जितः ।
महतीं श्रियमाप्नोति स्वर्गलोके महीयते ॥ ४१ ॥
कुलं[3] तस्या न शङ्केत पूतिगन्धं न वर्जयेत् ।
यावत् पिबति तद्दुग्धं[4] तावत् पुण्यं प्रवर्धते ॥ ४२ ॥
यो[5] गां पयस्विनीं दद्यात्तरुणां वत्ससंयुताम् ।
शिवस्यायतने दत्वा दत्तं तेन तु विश्वकम् ॥ ४३ ॥

इति[6] गोमहिमा ।

उक्षाणो[7] वेधसा सृष्टाः सस्यस्योत्पादनाय च ।
तैरुत्पादितसस्येन सर्वमेतद्विधार्यते[8] ॥ ४४ ॥
यश्चैतान् पालयेद्यत्नाद्धर्धयेच्चैव यत्नतः ।
जगन्ति तेन सर्वाणि साक्षात् स्युः पालितानि[9] च ॥ ४५ ॥
यावद्गोपालने पुण्यमुक्तं[10] पूर्वमनोषिभिः ।

---

१. A. reads यमौ कुक्षौ for यम-यक्षौ. २. B. E. F. and G. read कुक्षौ ...ऽयावसथ्यकौ, and D. चावसथ्यौ च कुक्षिषु. ३. A. reads कुल्यं तस्य for कुलं तस्या ; while B. C. D. E. G. read लङ्घेत for शङ्केत. ४. Except A. all others read °दुग्धं for °गन्धं. ५. B. E. F. and G. read thus :—

पयस्विनीं सवत्सां यः सुशीलां तरुणीं तथा ।
गां शिवस्यालये दद्यात्तेन दत्तं जगत्त्रयम् ॥.

६. A. and D. do not insert this line. ७. D. reads thus :—

उक्षा गौर्वेधसा सृष्टा तस्य ह्युत्पादनाय च ।.

८. D. reads हि for वि°. ९. B. E. F. and G. read पालितानि न संशयः for साक्षात् स्युः पालितानि च. १०. B. and G. read पूर्वं for पूर्व°; while C. ...ण्यं ह्युक्तं, E. and F. °ण्यं प्रोक्तं for °ण्यमुक्तं.

उक्ष्णोऽपि पालने तेषां फलं दशगुणं भवेत् ।
जगदेतद्धृतं सर्वमनडुद्भिश्चराचरम् ॥ ४७ ॥
वृषं एव ततो रक्ष्यः पालनीयश्च सर्वदा ।
धर्मोऽयं भूतले साक्षाद् ब्रह्मणा ह्यवतारितः ॥ ४८ ॥
त्रैलोक्यधारणायालमक्षाणां च प्रसूतये ।
अनादेयानि घासानि विघसन्ति स्वकामतः ॥ ४९ ॥
भ्रमित्वा भूतलं दूरमुक्षाणं को न पूजयेत् ।
उत्पादयन्ति सस्यानि मर्दयन्ति वहन्ति च ।
आनयन्ति दवीयस्तदुक्षतः कोऽधिको भुवि ॥ ५० ॥
स्कन्धेन दूराद्य वहन्ति भारमाख्याति पत्युर्न च भारयुक्ताः ।
स्वीयेन देहेन परस्य जीवान्पुष्यन्ति रक्षन्ति च वर्धयन्ति ॥५१॥
पुण्यास्तु गावो वसुधातले या बिभ्रत्यमुं गोवृषगर्भभारम् ।
भारःपृथिव्यां दशताडिताया एकस्य चोक्ष्णो ह्यपि साधुवाचः॥५२॥
एकेन दत्तेन वृषेण येन भवन्ति दत्ता दश सौरभेय्यः ।
माहेय्यपीयं धरणीसमाना तस्माद्वृषात् पूज्यतमोऽस्ति नान्यः॥५३॥
उत्पाद्य सस्यानि तृणं चरन्ति तदेव भूयः सततं वहन्ति ।
न भारखिन्नाः प्रवदन्ति किंचिदहो वृषैर्जीवति जीवलोकः ॥ ५४ ॥

---

१. B. E. F. and G. read पुंसां for तेषां and उक्ष्णां च for उक्ष्णोऽपि. २. E. F. and G. read वृषा एव ततो रक्ष्याः पालनीयाः प्रयत्नतः. B. also reads the same, but it differs in स्वतो for ततो. ३. E. F. and G. अनायत्तानि for अनादेयानि and B. C. E. F. and G. भक्षयन्ति, D. विध्वंसन्ति for विघसन्ति; while C. स° for स्व°. ४. B. E. F. and G. read कैर्न पूजिताः. ५. From the letters वहं G. omits the following:—

. . . . ति च ।

आनयन्ति दवीयस्तदुक्षतः कोऽधिको भुवि ॥
स्कन्धेन दूराद्य वहन्ति भारं नार्शन्ति किं . . . . . . ॥.

६. C. reads दवीयस्थमुक्षाणं and F. दवीयस्तात् for दवीयस्तदुक्षतः and दवीयस्तत् respectively. F. substitutes ऽवनौ for भुवि. ७. B. C. E. and G. read नाश्नन्ति किञ्चिद्धनिकस्य दुःखम्. F. reads also the same, but it differs in माख्याति for नाश्नन्ति; while E. and F. substitute दृष्ट्या च for दूराद्य. ८. A. and D. read जीवेन for देहेन. ९. B. C. E. F. and G. read धन्याः for पुण्याः and except A. and F. others read ऽस्मिन् for या. १०. A. and B. read पृथिव्यां. ११. A. reads वाऽथ for °वाचः. १२. E. F. and G. read तृणान्यशन्ति तान्येव for तृणं चरन्ति तदेव; while A. C. and D. read सकलं for सततं. १३. C. and D. read धार्यते for जीवति.

तृतीयेऽब्दे चतुर्थे वा यदा वत्सो दृढो भवेत्।
तदा नासाऽस्य[1] भेत्तव्या नैव प्राग्, दुर्बलस्य च ॥ ५५ ॥
नासावेधनकीलं[2] तु खादिरं वाथ शैंशपम्।
द्वादशाङ्गुलकं कार्यं तज्ज्ञैस्तैश्च[3] समं च वा ॥ ५६ ॥
शालां[4] द्विजेन्द्रा वृष-गो- हयानां
तां याम्यदिग्द्वारवतीं विदध्यात्।
सौम्याककुब्द्वारवतीं सुशोभां
[5]तेषां शमिच्छन् ध्रुवमात्मनश्च ॥ ५७ ॥
गावो वृषा वा हय-हस्तिनो वा
अन्येऽपि सर्वे पशवो द्विजेन्द्राः।
[6]याम्यामुखा वोत्तरदिङ्मुखा वा
नान्याशकास्ते खलु बन्धनीयाः ॥ ५८ ॥
शालाप्रवेशे वृष-गो-पशूनां
राजा ऽपि यत्नाद्धय-कुञ्जराणाम्।
होमं च सप्तार्चिषि शास्त्रयुक्तं[7]
कुर्याद्विधिज्ञो द्विजपूजनं च ॥ ५९ ॥

इति वृषभप्रशंसा।[8]

लाङ्गलं [9]संप्रवक्ष्यामि यत्काष्ठं यत्प्रमाणतः।
हलेषायोंस्[10]तथोन्मानं प्रतोदस्य युगस्य च ॥ ६० ॥

---

१. A. B. C. and D. read तु for ऽस्य; while E. substitutes न for च. २. B. E. F. and G. read °भेदनकील·, C. °वेधनकालः for °वेधनकीलं and B. G. शैशवः, C. सैशियं, D. सैशिवं, E. सैशवः and F. सैंशयः all for शैंशपम्. ३. B. E. and G. स्त्रैणस एव स, C. D. स्त्रीणि समे च वा, F. स्त्रैणं तमेव सः for °स्तैश्च समं च वा. ४. B. C. D. E. and G. read शाला for शालां and F. सोलों (?) for the same. ५. D. reads धृत° for ध्रुव°. ६. D. reads दिङ्मुखमुत्तरादिङ्मुखाशकाः. ७. B. C. F. and G. read शास्त्रयुक्त्या for शास्त्रयुक्तं. ८. A. and D. do not insert this. ९. B. E. F. and G. substitute च and C. and D. यत् for सं°. १०. A. and G. read हलीषा° and some read हलीशा° for हलेषा.°

चत्वारिंशत्तथा चाष्टावङ्गुलानि कुथः[1] स्मृतः।
अर्धार्धमङ्गुलैर्भाज्यो[2] हलेषावेधतश्च यः ॥ ६१ ॥
षोडशैव तु तस्याधः षड्विंशति[3] तथोपरि।
वेधस्तस्याश्च कर्तव्यः प्रमाणेन षडङ्गुलः ॥ ६२ ॥
अङ्गुलैश्चाष्टभिस्तस्माद्वेधःस्यात् प्रातिहारिकः[4]।
तस्याधस्ताच्च चत्वारि वेधश्च[5] चतुरङ्गुलः ॥ ६३ ॥
अष्टाङ्गुलमुर[6]स्तस्य वेधादूर्ध्वं प्रकल्पयेत्।
ग्रीवा दशाङ्गुला[7] चोर्ध्वं हस्तग्राही ततः स्मृता ॥ ६४ ॥
साऽपि[8] तज्ज्ञैः शुभा कार्या तद्वेधस्त्र्यङ्गुलो भवेत्।
पञ्चाङ्गुलं पुर[9]स्तस्य शिरसोऽपि विभावनम् ॥ ६५ ॥
पृथुत्वं शिरसो धार्यं हस्त[10]तलप्रमाणकम्।
अङ्गुलानि तथा चाष्टौ उरसः पृथुता भवेत्[11] ॥ ६६ ॥
वेधा[12]द्बहिः प्रतीकारी षट्[13]त्रिंशदङ्गुला भवेत्।
[14]सुतीक्ष्णलोहफलका मृत्काष्ठादिविदारकृत् ॥ ६७ ॥
न सीरं क्षीरवृक्षस्य न बिल्व-पिचुमन्दयोः।
इत्यादीनां हि कुर्वाणो न नन्दाति चिरं गृही ॥ ६८ ॥

---

१. B. and F. read कुठः, C. कुहः and D. कुहुः all for कुथः. २. B. and G. read ऊर्ध्वोऽर्धमङ्गुलैर्भेषा, E. and F. अर्धार्धमङ्गुलैर्भेषा, A. अर्धोऽर्धमङ्गुलीर्भाज्या and D. अयार्द्धामङ्गुलैर्भोज्यः for अर्धार्धमङ्गुलैर्भाज्यो and here some read हलीषा and हलीशा for हलेषा. ३. B. F. and G. read षट्त्रिंशति for षड्विंशति. ४. B. and G. read स्यान्मानि° for स्यात्प्राति°; while D. interchanges place of this verse for the next one. ५. Except A. all others omit this च and read स वेधः for वेधश्च. ६. A. reads °गुलः मुर° for °गुलमुर°. ७. B. E. and G. read देशगुणा for दशाङ्गुला. C. दशाङ्गुली for the same and B. स्मृताः, C. and E. स्मृतः for स्मृता; while G. reads ऊर्ध्वं हस्तग्राही for ऊर्ध्वं हस्तग्राही. ८. D. reads सार्वज्ञैः for साऽपि तज्ज्ञैः. ९. B. E. F. and G. read पुरस्तस्य शिरसीति. C. reads the same, but substitutes शिरस्येति for शिरसीति; while D. reads तस्याः for तस्य. १०. A. reads °ताल° for °तल°. ११. D. reads स्मृता for भवेत्. १२. D. reads बन्धाद्बहिः प्रतीहारी for वेधाद्बहिः प्रतीकारी. १३. A. reads षड्विंशत्यं for षट्त्रिंशं.° १४. B. reads सुतीक्ष्णो लोहफला स्यात्, C. E. and F. सुतीक्ष्णा लोहफाला स्यात्, G. सुतीक्ष्णे लोहफला स्यात् for सुतीक्ष्णलोहफलका and B. E. and G. substitute °विकार° for °विदार°; while D. reads this line as follows:—

सुतीक्ष्णे लोहपाल्यस्य मृत्काष्ठादिविदारकृत् ॥.

प्लक्षाक्षयोर्न तत् कुर्यात् कीर्तिघ्नौ तौ प्रकीर्तितौ ॥
तयोः काष्ठस्य तत् कुर्वन्ससस्यो नश्यति ध्रुवम् ॥ ६९ ॥
प्राञ्जला सप्तहस्ता च चतुरस्राऽग्रवर्तुला ॥
सालादिशुभकाष्ठानां हलीषा विदुषां मता ॥ ७० ॥
अस्या वेधः सकर्णायाः कार्यो नववितस्तिभिः ॥
नीचोच्चवृषमानेन तद्ज्ञा एवं वदन्ति हि ॥ ७१ ॥
चतुर्हस्तं युगं कार्यं स्कन्धस्थानेऽर्द्धचन्द्रवत् ॥
मेषशृंग्याः कदम्बस्य सालाद्यन्यतमस्य वा ॥ ७२ ॥
शम्या वेधाद्बहिः कार्या दशाङ्गुलप्रमाणिका ॥
तन्मानेन प्रणाली च तदन्तरदशाङ्गुलम् ॥ ७३ ॥
प्रतोदश्च समग्रन्थिर्वैणवश्च चतुष्करः ॥
तदग्रे चापि कर्तव्यो यवाकारस्तु लोहजः ॥ ७४ ॥
हीनातिरिक्तं कर्तव्यं नैव किञ्चित् प्रमाणतः ॥
कुर्यादनडुहोऽदैन्यांद्दैन्यात्तु नरकं व्रजेत् ॥ ७५ ॥
यथा दृढं यथाशोभं वाहकस्य प्रमाणतः ॥
भूमेश्च कर्षणायालं तज्ज्ञाः सीरं वदन्ति हि ॥ ७६ ॥
योजनं तु हलस्याथ प्रवक्ष्यामि यथा तथा ॥
ज्येष्ठानक्षत्रसंयुक्ते पुण्येऽन्हि तद्विधीयते ॥ ७७ ॥
अन्यत्र वा शुभे भे च तत्र कार्यं विपश्चिता ॥
यत्तु कृत्यं हितं वापि पुण्यं वा मनसि स्फुरेत् ॥ ७८ ॥
मातृश्राद्धं द्विजः कुर्याद्यथोक्तविधिना गृही ॥

---

* तत्र विद्वान् द्विजश्रेष्ठः पुण्येऽन्हि तद्विधीयते ॥

उपलभ्यत इदमर्धं सर्वेष्वप्यादर्शपुस्तकेषु । तथापीदं प्रक्षिप्तमिव प्रतिभाति । न कमप्यर्थविशेषं दर्शयति । अत उपेक्षितमिति सुधियो विदां कुर्वन्तु ।

१. B. D. E. F. read राक्षसौ, २. C. प्रमादतस्तु तत्कुर्वन् ३. A. B. C. D. and F. read °ते गृही. ४. B. D. and F. शालादि°. ५. E. हलीषा. ६. B. D. E. °चन्द्रकम्. ७. B. C. D. E. F. read शालाद्य°. ८. B. C. D. E. F. read प्रवाली. ९. All others except A. read यवाकारा तु लोहवत्. १०. A. reads अनडुहां दैन्याद्दैन्यात्तु for अनडुहोऽदैन्याद्दैन्यात्तु. ११. C. reads सर्वं for सीरं. १२. only C. reads श्रेष्ठनक्षत्र° for ज्येष्ठानक्षत्र°. १३. All others except A. and C. read पुण्येऽहनि for पुण्येऽन्हि. १४. C. reads कृत्वा for कुर्यात्.

द्रव्य-कालानुसारेण कुर्वाणो धर्मतः कृषिम् ॥ ७९ ॥
प्रोल्लिख्य मण्डलं पुष्प-धूप-दीपैः समर्च्य तत् ॥
इन्द्राय च तथाऽश्विभ्यां मरुद्भ्यश्च तथा द्विजः ॥ ८० ॥
कुर्याद्बलिंहृतिं विद्वान् उदग्वै कश्यपाय च ॥
तथा कुमार्यै सीतायै अनुमत्यै तथा बलिः ॥ ८१ ॥
नमःस्वाहेति मन्त्रेण स चेच्छन्नात्मनो हितम् ॥
दधि-गन्धा-ऽक्षतैः पुष्पैः शमीपत्रैस्तिलैस्तथा ॥ ८२ ॥
दद्याद्बलिं वृषाणां च मध्वाज्यप्राशनं तथा ॥
सङ्कृष्य सीरफालाग्रं हेम्ना वा रजतेन वा ॥ ८३ ॥
प्रलिप्य मधु-सर्पिभ्यां कुर्याच्च तत्प्रदक्षिणम् ॥
अग्न्युक्षणोर्मण्डलं कृत्वा कुर्यात्सीरप्रवाहणम् ॥ ८४ ॥
पुण्य लाङ्गल कल्याण कल्याणाय नमोऽस्त्विति ॥
सीतायाः स्थापनं कृत्वा पराशरमृषिं स्मरन् ॥ ८५ ॥
सीरा युञ्जन्ति इत्याद्यैर्मन्त्रैः सीरं प्रवाहयेत् ॥
दधि-दूर्वा-ऽक्षतैः पुष्पैः शमीपत्रैश्च पुण्यदैः ॥ ८६ ॥
सीतां पूज्य वृषौ भक्त्या रक्तवस्त्रविषाणकौ ॥
सप्तधान्यानि चादाय प्रोक्ष्य पूर्वामुखो हली ॥
तानि कृत्वोक्ष्णोः क्षेत्रे च किरन् भूमिं कृषेद्विजः ॥ ८७ ॥
न तिलैर्न यवैर्हीनं द्विजः कुर्वीत कर्षणम् ॥
तद्विहीनं तु कुर्वाणं न प्रशंसन्ति देवताः ॥ ८८ ॥
तिलपात्रच्युतं तोयं दक्षिणस्यां पतेद्दिशि ॥
तेन तृप्यन्ति पितरो यावच्च तिलविक्रयः ॥ ८९ ॥

---

१. A. C. and F. read °कालानुरोधेन; while B. E. read °कालानुमानेन for °कालानुसारेण. २. Only B. reads बालिहार्तिं for बलिहर्तिं. ३. Except A. and F. all others read वुग्धाग्नं for उदग्वै. ४. In all others except A. शुभम् is substituted for हितम्. ५. C. only substitutes प्रलेप्य. for प्रलिप्य. ६. B. D. and E. read कुर्वीत. ७. A. reads उक्ष्णोश्च; while B. reads मंगलं and F. reads मण्डनं. ८. A. B. and F. read दत्वा for कृत्वा.

विक्रीणीते तिलाम्यस्तु मुक्त्वाऽन्यद्धान्यसामकान्[1] ॥
विमुच्य पितरस्तं तु प्रयान्ति हि तिलैः सह ॥ ९० ॥
तुषाज्जलं यवस्थं च पत्रेभ्यो भूतले पतत् ॥
पयो-दधि-घृताद्यैस्तु तर्पयेत्सर्वदेवताः ॥ ९१ ॥
दैव-पर्जन्य-भू-सीरयोगात् कृषिः प्रजायते ॥
व्यापारात् पुरुषस्यापि तस्मात्तत्रोद्यतो भवेत् ॥ ९२ ॥
शालीक्षु-शण-कार्पास-वार्ताकप्रभृतीनि च ॥
वापयेत् सस्यबीजानि सर्वं वापि न सीदति ॥ ९३ ॥
चन्द्रक्षये ऽमतिर्[2]विप्रो यो युनक्ति वृषं क्वचित् ॥
तं पञ्चदशवर्षाणि त्यजन्ति पितरो हितम् ॥ ९४ ॥
चन्द्रक्षये तु योऽविद्वान् द्विजो भुङ्क्ते पराशनम् ॥
भोक्तुर्मासार्जितं पुण्यं भवेदशनदस्य वै ॥ ९५ ॥
चन्द्रार्कयोस्तु संयोगे कुर्याद्यः स्त्रीनिषेवणम् ॥
स्यूरेतोभोजनास्तस्य तन्मासं पितरो हताः ॥ ९६ ॥
चन्द्रक्षये तु यः कुर्यात्तरु[3]स्तम्भनिकृन्तनम् ॥
तत्पर्णसंख्यया तस्य भवन्ति[4] भ्रूणहत्यकाः ॥ ९७ ॥
वनस्पतिगते सोमे योऽध्वानं तु व्रजे[5]द्द्विजः ॥
प्रभ्रष्टद्विजकर्माणं तं त्यजन्त्यमरादयः ॥ ९८ ॥
वासांसीन्दुप्रणाशे यो[6] रजकस्याग्रतः क्षिपेत् ॥
पिबन्ति पितरस्तस्य मासं वस्त्रमलाम्बु तत् ॥ ९९ ॥
सोमक्षये द्विजो याति त्यक्त्वा[7] यस्तु हुताशनम् ॥
स देव-पितृशापाग्निदग्धो नरकमा[8]विशेत् ॥ १०० ॥

---

१. A. reads °स्तोमकान ; and all others except C. read °वामकान्; while C. substitutes तर्पयेत्सार्वदेवताः for मुक्त्वान्यद्धान्यसामकान्. २. Except A. all others read तिथौ for ऽमतिः. ३. C. reads नरस्तरुनिकृन्तनम्; and F. reads तरुस्तम्बनिकृन्तनम्. ४ B. E. F read भ्रूणहत्या न संशयः; while A. and C. read °हत्यजाः. ५. B. D. and E. substitute गच्छति for व्रजेत्. and F. reads गच्छतं. ६. B. C. and E. substitute तु for यो. ७. D. reads त्यक्त्वान्यं यस्तु वाशनम् for त्यक्त्वा यस्तु हुताशनम्. ८. A. and C. read भाविशेत्; while others read आवसेत् for आविशेत्.

अष्टमी कामभोगेन षष्ठी तैलोपभोगतः ॥
कुहूश्च दन्तकाष्ठेन हिनस्त्यासप्तमं कुलम् ॥ १०१ ॥
चन्द्राप्रतीतौ पुरुषस्तु दैवादथाप्रमत्या यदि दन्तकाष्ठम् ॥
ताराधिराजः स्वदितस्तु तेन घातः कृतः स्यात्पितृ-देवतानाम् ॥१०२॥
तत्राभ्यर्च्य विषाणानि गावश्चैव तथा वृषाः ॥
चरणाय विसृज्यन्ते आगतान् निशि भोजयेत् ॥ १०३ ॥
य उत्पाद्येह सस्यानि सर्वाणि तृणचारिणः ॥
जगत् सर्वं धृतं यैस्तु पुज्यन्ते किंन ते वृषाः ॥ १०४॥
चरणाय विसृष्टं तु यस्य गोदशकं भवेत् ॥
यद्रूपेण स्थितो धर्मः पूज्यन्ते किं न ते वृषाः ॥ १०५ ॥
स्युः पाल्या यत्नतस्ते वै वाहनीया यथाविधि ॥
स याति नरकं घोरं यो वाहयत्यपालयन् ॥ १०६ ॥
नाऽधिकाङ्गो न हीनाङ्गः पुष्पिताङ्गो न दूषितः ॥
वाहनीयो हि[३] शूद्रेण वाहयन्क्षयमश्नुते ॥ १०७ ॥
वर्जयेद्दृष्टदोषांश्च वाहने दोहने नरः ॥
पाल्या वै यत्नतः सर्वे पालयञ्छुभमाप्नुयात् ॥ १०८ ॥
अन्नार्थमेतानुक्षाणः ससर्ज परमेश्वरः ॥
अन्नेनाप्यायते सर्वं त्रैलोक्यं सचराचरम् ॥ १०९ ॥
अग्निर्ज्वलति चान्नार्थं वाति चान्नाय मारुतः ॥
गृह्णाति चाम्भसां सूर्यो रसानन्नाय रश्मिभिः ॥ ११० ॥
अन्नं प्राणो बलं चान्नमन्नाज्जीवितमुच्यते ॥
अन्नं च जगदाधारं सर्वमन्ने प्रतिष्ठितम् ॥ १११ ॥
सर्वेषां देवतादीनामन्नं जीवः प्रकीर्तितः ॥
तस्मादन्नात्परं तत्वं न भूतं न भविष्यति ॥ ११२ ॥

---

१. All others except A. read येनैकेन प्रदत्तेन for चरणाय विसृष्टं तु. २. only F. reads वाहयेत् for वाहयति. ३. A. C. F. read हि; while B. D. E. read न. ४. C. only reads आप्नुयात् for अश्नुते. ५. A. B. and C. substitute ते for वै. ६. B. reads अन्नार्थमृषभान्सृष्ट्वा; while F. reads अन्नार्थं वृषभान्सृष्ट्वा for अन्नार्थमेतानुक्षाणः. ७. C. reads आनीय for अन्नाय. ८. A. reads अन्नं सर्वस्य धातारः and C. reads अन्नं सर्वस्य चाऽऽधारः for अन्नं च जगदाधारं. ९. A. reads the whole line thus भूतादीनां हि सर्वेषामन्नं बीजं परं स्थितः, and C. reads सुरादीनां हि सर्वेषामन्नं बीजं परं स्मृतम्.

द्यौः पुमान्धरणी नारी अम्भो बीजं द्रिवच्च्युतम् ॥
द्यु-धात्री-तोयसंयोगादन्नादीनां हि सम्भवः ॥ ११३ ॥
आपो मूलं हि सर्वस्य सर्वमप्सु प्रतिष्ठितम् ॥
आपोऽमृतरसो ह्याप आपः शुक्रं बलं महः ॥ ११४ ॥
सर्वस्य बीजमापो हि सर्वमद्भिः समावृतम् ॥
सद्य आप्यायना ह्याप आपो ज्येष्ठतरा ह्यतः ॥ ११५ ॥
किञ्चित्कालं विनाऽन्नाद्यैर्जीवन्ति मनुजादयः ॥
न जीवन्ति विना ताभिस्तस्मादापोऽमृतं स्मृताः ॥ ११६ ॥
दत्ताभिरद्भिरेतस्यां किं न दत्तं कलौ युगे ॥
यथान्नेन प्रदत्तेन सर्वं दत्तं भवेदिह ॥ ११७ ॥
अतोऽप्यन्नार्थभावेन कर्तव्यं कर्षणं द्विजैः ॥
यथोक्तेन विधानेन लाङ्गलादि प्रयोजनम् ॥ ११८ ॥
सीते सौम्ये कुमारि त्वं देवि देवार्चिते श्रिये ॥
शक्तिसूनोर्यथा सिद्धा तथा मे सिद्धिदा भव ॥ ११९ ॥
शक्तिसूनोर्विना नाम्ना सीतायाः स्थापनं विना ॥
विनाऽभ्युक्षणरक्षार्थं सर्वं हरति राक्षसः ॥ १२० ॥
वापने लवने क्षेत्रे खले गन्त्रीप्रवाहणे ॥
एष एव विधिर्ज्ञेयो धान्यानां च प्रवेशने ॥ १२१ ॥
देवतायतनोद्यान-निपातस्थान-गोव्रजान् ॥
सीमा-स्मशान-भूमिं च वृक्षच्छायां क्षितिं तथा ॥ १२२ ॥
भूमिं निखातं यूपांश्च अयनस्थानमेव च ॥
अन्यामपि हि चाऽवाह्यां न कृषेत्कृषिकृद्धराम् ॥ १२३ ॥
नोषरां वाहयेद्भूमीं न चाऽश्म-शर्करावृताम् ॥

---

१. C. reads पिता for पुमान्. २. A. reads सर्व° and F. आद्य for सद्य. ३. C. reads यस्य for ह्यापः. ४. A. reads स्वद्भिः for ताभिः. ५. A. and C. read एतस्मात् for एतस्यां. ६. C. reads क्षितौ for कलौ. ७. A. and B. read सत्कृता हि for शक्तिसूनोः. ८. B. reads मर्दे. ९. except A. all read धान्य° for गन्त्री°. १०. A. यवन°, C. यजन°, and B. D. E. read त्र्ययन° for अयन°. ११. B. D. and E. read निर्वाह्यां and C. reads निर्वाह्यां for चावाह्यां.

न[1] गोचरां न प्रदत्तां न नदीपुलिनां तथा ॥१२४॥
यद्यसौ वाहयेल्लोभाद्वेषाद्वापि हि मानवः ॥
क्षीयतेऽसौ चिरात्पापात् सपुत्र-पशु-बान्धवः ॥१२५॥
नरकं घोरतामिस्रं पापीयान् याति निश्चितम् ॥
योऽपहृत्य परकीयां कृषेद्वा वाहयेद्धराम् ॥ १२६ ॥
स भूमिस्तेयपापेन सुचिरं नरके वसेत् ॥
एकसङ्ख्यमपि स्वर्णं भूमिमङ्गुलमात्रिकाम् ॥ १२७ ॥
तथैकामपि गां हृत्वा सृष्टयन्तं नरकं वसेत् ॥
न दूरे वाहयेत् क्षेत्रं न चैवात्यन्तिके तथा ॥ १२८ ॥
वाहयेन्न पथि क्षेत्रं वाहयन्दुःखभाग्भवेत् ॥
क्षेत्रेष्वेवं वृतिं कुर्याद्यामुष्ट्रो नावलोकयेत् ॥ १२९ ॥
न लङ्घयेत्पशुर्नाश्वो नभिन्द्याद्यां च शूकरः ॥
बन्धाश्च यत्नतः कार्या मृगादित्रासनाय च ॥ १३० ॥
अत्राप्युपद्रवं राजा तस्करादिसमुद्भवम् ॥
संरक्षेत्सर्वतो यत्नाद्यस्मात् गृह्णात्यसौ करान् ॥ १३१ ॥
कृषिकृन्मानवस्त्वेवं मत्वा धर्मं कृषेद्धराम् ॥
अनवद्यां शुभां स्निग्धां जलावगाहनक्षमाम् ॥ १३२ ॥
निम्नां हि वाहयेद्भूमिं यत्र विश्रमते जलम् ॥
वाहयेत्तु जलाभ्यर्णमवृष्टौ सेकसम्भवः ॥ १३३ ॥
शारद्यमुख्यकैर्भूमौ कङ्ग्वाद्यं वापयेद्धली ॥
अधित्यकासु कार्पासं वदन्त्यन्यत्र हैमकम् ॥ १३४ ॥
वासन्तं ग्रीष्मकालीयं वाप्यं स्निग्धेषु तद्विदा ॥

---

१. A. reads वाहयेन्नाप्रदत्तां च for न गोचरां न प्रदत्तां, B. also वाहयन्नाप्रमत्तश्च. २. B. D. E F. read मत्सरतोऽपि च for वा पि हि मानवः. ३. B. and C. read पापात्; while D. and E. read पापैः. ४. A. reads चेतसा and C. चैनसः for निश्चितम्. ५. B. D. E. F. read भुवम् for धराम्. ६. A. and C. read भूमिस्थेन for भूमिस्तेय°. ७. A. reads ह्यनन्तं for सुचिरं and B. substitutes स चिरं. D. E. also the same. ८. only E. reads हत्वा for हृत्वा. ९. A. and C. read भुवम् for धराम्. १०. except A. and C. all read मोघं स्थिरीभवेत्. ११. A. only substitutes स्थाने for भूमौ. १२. only C. reads सुधीः for हली. १३. A. B. C. read हैमतम्, D. हैमनम्, E. हैमजम् and F. हैवनम् for हैमकम्. १४. C. reads उप्यं.

केदारेषु तथा शालीञ्जलोपान्तेषु चेक्षवः ॥१३५॥
वृन्ताक-शाकमूलानि कन्दानि च जलान्तिके ॥
वृष्टिविश्रान्तपानीयक्षेत्रेषु च यथादिकान् ॥१३६॥

गोधूमाश्च मसूराश्च खल्याः[1] खलकुशास्तथा ॥
समस्निग्धेषु वाप्याश्च भूमिजीवान्विजानता ॥ १३७ ॥

तिला बहुविधाश्चोप्या अतसी-शणमेव च ॥
समस्निग्धेषु वाप्यानि धान्यान्यन्यानि योगतः ॥ १३८ ॥
कुलत्थामुद्गमाषाश्च राजमाषादिकास्तथा ॥
वाप्या भूमिविशेषे तु भूमिजीवं विजानता ॥ १३९ ॥

मृदम्बुयोगजं सर्वं वापयेत्कृषिकृत्नरः ॥
सम्पश्येच्चरतः सर्वान् गोवृषादीन् स्वयं गृही ॥ १४० ॥

चिन्तयेत्सर्वमात्मीयं स्वयमेव कृषिं व्रजेत् ॥
प्रथमं कृषिवाणिज्यं द्वितीयं पशुपोषणम्[2] ॥ १४१ ॥

तृतीयं क्रीत[3]विक्रीतं चतुर्थं राजसेवनम् ॥
नखैर्विलिखने यस्याः पापमाहुर्मनीषिणः ॥ १४२ ॥

तस्याः सीरविदारेण किं न पापं क्षितेर्भवेत् ॥
तृणैकच्छेदमात्रेण प्रोच्यते क्षय आयुषः ॥ १४३ ॥

असङ्ख्यकन्दनिर्नाशा[4]दसङ्ख्यातं भवेदघम् ॥
यद्वर्षे मत्स्यबन्धानां तथा सङ्करिणाम[5]पि ॥ १४४ ॥

अंहः कुक्कुटिकानां च तद्दिने कृषिकारिणाम् ॥
वधकानां[6] च यत् पापं यत् पापं मृगयोरपि ॥
कदर्याणां च यत् पापं तद्दिने कृषिकारिणाम्[7] ॥ १४५ ॥

वर्णानां च गृहस्थानां कृषिवृत्त्युपजीविनाम् ॥
तदेनसो विशुद्ध्यर्थं प्राह सत्यवतीपतिः ॥ १४६ ॥

---

१. A. reads चलकुला: B. reads चलकुशा: and C. reads खलकुला:.
२. B. reads °पालनम् for °पोषणम्. C. D. and E. too read the same.
३. A. reads क्रयविक्रयी for क्रीतविक्रीतं. ४. C. reads °निर्वासात् for निर्नाशात्. ५. A. reads शूकरिणाम् for सङ्करिणाम्. ६. A. बन्धकानां for वधकानां. ७. Only A. reads कृषिजीविनाम् for कृषिकारिणाम्.

द्वादशो नवमो वापि सप्तमः पञ्चमोऽपि वा
धान्यभागः प्रदातव्यो सीरिणा खलके ध्रुवम् ॥ ॥ १४७ ॥

अश्मर्यव्यूढभूमौ च विंशांशी क्षेत्रभुग्भवेत्
*एकैकांशाय कर्षः स्याद्यावद्दशम-सप्तमौ ॥ ॥ १४८ ॥

ग्रामेशस्य नृपस्यापि वर्णिभिः कृषिजीविभिः ॥ १४९ ॥
सस्यभागः प्रदातव्यो यतस्तौ कृषिभागिनौ ॥
ब्राह्मणस्तु कृषिं कुर्वन्वाहयेदिच्छया धराम् ॥ १५० ॥

न किञ्चित् कस्यचिद्दद्यात्स सर्वस्य प्रभुर्यतः ॥
ब्रह्मा वै ब्राह्मणं चास्यात्प्रभुस्त्वसृजदादितः ॥ १५१ ॥

तद्रक्षणाय बाहुभ्यामसृजत् क्षत्रियानपि ॥
पशुपाल्याशनोत्पत्त्यै ऊरुभ्यां च तथा विशः ॥ १५२ ॥

द्विजदास्याय पण्याय पद्भ्यां शूद्रमकल्पयत् ॥
यत्किञ्चिज्जगतीहात्र भू-गेहाश्वं गजादिकम् ॥ १५३ ॥

स्वभावेन हि विप्राणां ब्रह्मा स्वयमकल्पयत् ॥
ब्राह्मणश्चैव राजा च द्वावप्येतौ धृतव्रतौ ॥ १५४ ॥

न तयोरन्तरं किञ्चित् प्रजाधर्माभिरक्षणे ॥
तस्मान्न ब्राह्मणो दद्यात् कुर्वाणो धर्मतः कृषिम् ॥ १५५ ॥

ग्रामेशस्य नृपस्यापि कियन्तमप्यसौ बलिम्
अथान्यत् सम्प्रवक्ष्यामि कृषिकृच्छुद्धिकारणम् ॥॥ १५६ ॥

संशुद्धः कर्षको येन स्वर्गलोकमवाप्नुयात् ॥

---

* दृश्यत्यायं क्षेपकः श्लोकः केषुचित् आदर्शपुस्तकेषु ।

१. E. and F. read हेलिनः for सीरिणा. २. B. C. D. E. and F. read क्षेत्रिणः for खलके. ३. A. B. D. E. and F. read बलिभागिनौ for कृषिभागिनौ. ४. A. substitutes ब्राह्मणोऽस्यास्यात्. ५. except A. and F. all read पुण्याय for पण्याय. ६. B. D. and F. substitute °हेम च for °गेहाश्व. ७. A. and B. read नैतयोः for न तयोः. D. the same but E. read नैनयोः. ८. Only C. reads. कृषिकौ for कर्षको. ९. B. D. E. and F. substitute °के महीयते for °कमवाप्नुयात्.

सर्वसत्वोपकाराय सर्वयज्ञोपसिद्धये ॥ १५७ ॥

नृपस्य कोशवृद्ध्यर्थं जायते कृषिकृन्नरः ॥
कुर्यात्कृषिं प्रयत्नेन सर्वसत्वोपजीविनीम् ॥ १५८ ॥

पितृ-देव-मनुष्याणां पुष्ट्यै स्यात् कृषीवलः ॥
वयांसि चान्यसत्वानि क्षुत्तृष्णापीडिताः प्रजाः ॥ १५९ ॥

उपयुञ्जन्ति सस्यानि क्षेत्रजातानि नित्यशः ॥
पुष्ट्यर्थं मुष्टिमेकां वा ददत्पापं व्यपोहति ॥ १६० ॥

यस्य क्षेत्रस्य यावन्ति सस्यान्यदन्ति प्राणिनः ॥
तावन्तोऽपि विमुच्यन्ते पातकात् कृषिकारकाः ॥ १६१ ॥

कृताग्निकार्यदेहोऽपि ब्राह्मणोऽन्यतमोऽपि वा ॥
आददानः परक्षेत्रात् पथि गच्छन्न लिप्यते ॥ १६२ ॥

क्षेत्री विमुच्यते दोषात् नियतं कृषिसम्भवात् ॥
गृहीतं क्षेत्रिणो धान्यं निवेदयति वाण्वपि ॥ १६३ ॥

अनिवेदिते तदर्धं स्यात् पातकं कर्षुकस्य च ॥
भावशुद्धावतो धर्मो ह्यनेन तद्विशोधयेत् ॥ १६४ ॥

मुष्टिं तु कल्पयन्धान्यं सर्वपापं व्यपोहति ॥
यत्किञ्चिदर्थिने दद्याद्भिक्षामात्रं च भिक्षवे ॥ १६५ ॥

अन्नं सुसंस्कृतं वापि तेन सीरी विशुद्ध्यति ॥
सीतायज्ञं च यः कुर्यात् सिद्धसस्ये खलागते ॥ १६६ ॥

अनन्तकृतपापोऽपि मुक्तो भवति कर्षुकः ॥
खलयज्ञं प्रवक्ष्यामि तत्कुर्वाणा द्विजातयः ॥ १६७ ॥

विमुक्ताः सर्वपापेभ्यः स्वर्गौकस्त्वमवाप्नुयुः

---

१. Tho verses 152. 153, 155 are found in A. in different versions, as—

सर्वसत्वोपकाराय सर्वत्र कृषिकृन्नरः ॥
कुर्यात् कृषिं प्रयत्नेन स्वर्गलोकमवाप्नुयात् ॥ १५२ ॥
सर्वसत्वोपजीव्यः स्यात् कृषिकृद्धर्मतो नरः ॥
सर्वस्य स्थितिकारुण्यात् सदेव-पितृभिः पुनः ॥ १५३ ॥
मानुषाणां तु पोषाय कृषिं कुर्यात् कृषीवलः ॥
वयांसि यानि सत्वानि क्षुत्तृष्णापीडितानि च ॥१५४ ॥

२. This verse is not in A., and the following seven verses are also not given in A. B. and F.

चतुर्दिक्षु खले कुर्यात्प्राच्यमतिघनावृतिम् ॥ १६८ ॥

सेकद्वारं पिधानं च विदध्याच्चैव सर्वतः ॥
खरोष्ट्राजोरणांस्तत्र विशतस्तु निवारयेत् ॥ १६९ ॥

श्व-शूकर-शृगालादिकाकोलूक-कपोतकान् ॥
त्रिसन्ध्यं प्रोक्षणं कुर्यादानीताभ्युक्षणाम्बुभिः ॥ १७० ॥

रक्षां च भस्मना कुर्याज्जलधाराभिरक्षणम् ॥
त्रिसन्ध्यमर्चयेत्सीतां पाराशरमृषिं स्मरन् ॥ १७१ ॥

प्रेत-भूतादिनामानि न वदेच्च तदग्रतः ॥
सूतिकागृहवत्तत्र कर्तव्यं परिरक्षणम् ॥ १७२ ॥

हरन्त्यरक्षितं यस्माद्रक्षांसि सर्वमेव हि ॥
प्रशस्तदिनपूर्वाह्णे नाऽपराह्णे न सन्ध्ययोः ॥ १७३ ॥

धान्योन्मानं सदा कुर्यात् सीतापूजनपूर्वकम् ॥
यजेत खलाभिक्षाभिः काले रोहिण एव हि ॥ १७४ ॥

भक्त्या सर्वं प्रदत्तं हि तत्समस्तमिहाक्षयम् ॥
खलयज्ञे दक्षिणैषा ब्रह्मणा निर्मिता पुरा ॥ १७५ ॥

भागधेयमयीं कृत्वा तां गृह्णन्त्विह मामिकाम् ॥
शतक्रत्वादयो देवाः पितरः सोमपादयः ॥ १७६ ॥

सनकादिमनुष्याश्च ये चान्ये दक्षिणाशनाः ॥
एतानुद्दिश्य विप्रेभ्यो प्रदद्यात् प्रथमं हली ॥ १७७ ॥

विवाहे खलयज्ञे च सङ्क्रान्तौ ग्रहणेषु च ॥
पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम् ॥ १७८ ॥

अन्येषामर्थिनां पश्चात्कारुकाणां ततः परम् ॥
दीनानामप्यनाथानां कुष्ठिनां कुशरीरिणाम् ॥ १७९ ॥

क्लीबा-ऽन्ध-बधिरादीनां सर्वेषामपि दीयते ॥

---

१. F. Reads पिदध्यात् for विदध्यात्. २. A. reads दिनान्ताभ्युक्षणाम्बुभिः, B. आनीतान्युक्षणाम्बुभिः and C. reads महीताभ्युक्षणाम्बुभिः; while in F. this verse is omitted. ३. A. reads खलमध्यतः and B. खलमध्यगः. ४. Except A. and C., all substitute प्रकुर्वीत for सदा कुर्यात्. ५. This half is read in A. thus—भागधेयाय आहूता अनुगृण्हन्तु मामिति; while B. reads भागधेयमयां for भागधेयमयीं. ६. B. C. D. E. and F. read दक्षिणाशिनः for दक्षिणाशनाः. ७. This verse is only found in C. and F. ८. A. reads सततं for कुष्ठिनां.

वर्णानां पतितानां च ददन्नुक्तानि तर्पयेत् ॥ १८० ॥
चाण्डालांश्च श्वपाकांश्च प्रीणात्युश्चावचांस्तथा ॥
ये केचिदागतास्तत्र पूज्यास्तेऽतिथिवद्द्विजाः ॥ १८१ ॥
स्तोकशः सीरिभिः सर्वैर्वर्णिभिर्गृहमेधिभिः ॥
दत्वा सूनृतया वाचा क्रमेणाथ विसर्जयेत् ॥ १८२ ॥
तत्कृत्वा स्वगृहं गत्वा श्राद्धमाभ्युदयं चरेत् ॥
शरद्धेमन्त-वासन्त-नवान्नैः श्राद्धमाचरेत् ॥ १८३ ॥
यो ऽदत्वान्नं तदश्नीयादभंश्चेदघमश्नुते ॥
कृषावुत्पाद्य धान्यानि खलयज्ञं समाप्य च ॥ १८४ ॥
सर्वसत्वहिते युक्त इहामुत्र सुखी भवेत् ॥
कृषेरन्यत्र नो धर्मो न लाभः कृषितोऽन्यतः ॥ १८५ ॥
सुखं न कृषितोऽन्यत्र यदि धर्मेण वर्तते ॥
अवस्त्रत्वं निरन्नत्वं कृषितो नैव जायते ॥ १८६ ॥
अनातिथ्यं च दुःखित्वं गोमतो न कदाचन ॥
निर्धनत्वमसत्यत्वं विद्यायुक्तस्य कर्हिचित् ॥ १८७ ॥
अस्थानित्वमभाग्यत्वं न सुशीलस्य कर्हिचित् ॥
वदन्ति मुनयः केचित् कृष्यादीनां विशुद्धये ॥ १८८ ॥
लाभस्यांशप्रदानं च सर्वेषां शुद्धिकृद्भवेत् ॥
प्रतिग्रहात् चतुर्थांशं वणिग् लाभात् तृतीयकम् ॥ १८९ ॥
कृषितो विंशतिं चैव ददतो नास्ति पातकम् ॥

---

१. A. and F. read प्रीणात्युश्चावचान्ददत्, B. D. and E. read प्रीत्यात्युश्चावचानि च. २. This verse is not found in D.; while in F. mention half of it. ३. A. reads सर्वै for सर्वैः. ४. A. reads च प्रियया for सूनृतया; while B. and others read च मधुरां वाचं ५ A. reads कृषेः for कृषौ. ६. A. and C. read कर्षति for वर्तते. ७. A. reads अवसुत्वं for अवस्त्रत्वं. ८. B. C. D. E. and F. read गोमता for गोमतः. ९. A. reads निर्धर्मत्व°, for निर्धनत्व°. १०. C. reads असभ्यत्वं for असत्यत्वं. ११. A. reads अनिष्टत्वं for अभाग्यत्वं. and B. D. F. read अभाव्यत्वं. १२. A. and C. read प्रतिग्रहे for प्रतिग्रहात्. १३. B. D. and E. read वणिग्लाभः, for वणिग्लाभात्. १४. B. D. E. and F. read विंशकं and C. विंशतिः for विंशतिं.

राज्ञो दत्वा च षड्भागं देवतानां च विंशकम् ॥ १९० ॥
त्रयस्त्रिंशंच विप्राणां कृषिकर्मा न लिप्यते ॥

कृष्या यथोत्पाद्य यवादिकानि
धान्यानि भूयांसि मखान्विधाय ॥
मुक्तो गृहस्थोऽपि परा..रः प्राक्
तस्या मया कश्चिदवादि शेषः ॥ १९१ ॥

देवा मनुष्याः पितरश्च सर्वे
साध्याश्च यक्षाश्च सकिन्नराश्च ॥
गावो द्विजेन्द्राः सह सर्वसत्वैः
कृष्यन्नतृप्तानि मनाक् करोति ॥ १९२ ॥

यश्चैतदालोच्य कृषिं विदध्यात्
लिप्येन्न पापेन स भूभवेन ॥
सीरेण तस्यातिविदारितापि
स्याद्भूतधात्री वरदानदात्री ॥ १९३ ॥

षट्कर्माणि कृषिं ये तु कुर्युर्ज्ञात्वा विधिं द्विजाः ॥
तेऽमरादिवरप्राप्ताः स्वर्गलोकमवाप्नुयुः ॥ १९४ ॥

षट्कर्मभिः कृषिः प्रोक्ता द्विजानां गृहमेधिनाम् ॥
गृहं च गृहिणीमाहुस्तद्विवाहो मयोच्यते ॥ १९५ ॥

इति श्रीबृहत्पराशरीये धर्मशास्त्रे सुव्रतप्रोक्तायां संहितायां कृषिकर्मसीतायज्ञोपधर्मो नाम पञ्चमोऽध्यायः समाप्तः ॥ ५ ॥

---

१. B. E. and F. read देवानां चैकाविंशकम् for देवतानां च विंशकम्.
२. B. substitutes य उत्पाद्य for यथोत्पाद्य; while C. reads ऽथ चोत्पाद्य.
३. A. D. E. and F. read कृष्यान्न°. ४. A. reads नरः for मनाक्.
५. B. C. D. and E. read आलोक्य for आलोच्य. ६. B. C. D. E. and F. read कूटं विसीरेण, कुटुंबसीरेण, कुटुंबिसीरेण. ७. B. reads विदारिता for विदारिता. ८. A reads धात्री for दात्री. ९. C. reads सुरादि° for ऽमरादि°.
१०. C. reads विवाहमथोच्यते. B. D. E. and F. read विवाहस्तथोच्यते.

बृहत्पराशरसंहिता ।

अथ षष्ठोऽध्यायः

स्तम्बं च वाहितैः क्षेत्रैर्धान्यैश्च स्वयमर्जितैः ॥
कुर्याद्विवाहयोगादि पञ्चयज्ञांश्च नित्यशः ॥ १ ॥

अष्टौ विवाहा नारीणां संस्कारार्थं प्रकीर्तिताः ॥
ब्राह्मादिकक्रमेणैतान्सम्प्रवक्ष्याम्यतः पृथक् ॥ २ ॥

जात्यादिगुणयुक्ताय पुंस्त्वे सति वराय च ॥
कन्याऽलङ्कृत्य दीयेत विवाहो वैधसः स्मृतः ॥ ३ ॥

रेतो मज्जति यस्याप्सु मूत्रं च ह्लादि फेनिलम् ॥
स्यात् पुमाँल्लक्षणैरेतैर्विपरीतस्तु षण्ढकः ॥ ४ ॥

यो यज्ञे वर्तमाने तु ऋत्विजे कर्म कुर्वते ॥
कन्याऽलङ्कृत्य दीयेत विवाहः स तु दैविकः ॥ ५ ॥

वराय गुणयुक्ताय विदुषे सदृशाय च ॥
कन्या गोद्वयमादाय दीयेताऽऽर्षः स उच्यते ॥ ६ ॥

कन्या चैव वरश्चोभौ स्वेच्छया धर्मचारिणौ ॥
स्यातामिति च यत्रोक्त्वा दानं कायविधिस्त्वयम् ॥ ७ ॥

एतावद्देहि मे द्रव्यमित्युक्त्वा प्राग्वराय च ॥
यत्र कन्या प्रदीयेत स वै दैत्यविधिः स्मृतः ॥ ८ ॥

यत्रान्योन्याभिलाषेण उभयोर्वर-कन्ययोः ॥
तयोस्तु यो विवाहः स्याद्गान्धर्वः प्रथितः स तु ॥ ९ ॥

युद्धे हत्वा बलात् कन्या यत्राऽऽच्छिद्याऽपहृत्य च ॥
उह्यते स तु विद्वद्भिर्विवाहो राक्षसः स्मृतः ॥ १० ॥

---

१. Only C. reads वाहयेत्क्षेत्रै for वाहितैः क्षेत्रैः. २. A. reads स तु for स्मृतः; while F. reads °स्तु सः. ३. Except A. and F. read या for यो. ४. A. reads युद्धृत्वा for युद्धे.

सुप्ता वापि प्रमत्ता वा छलात् कन्या प्रगृह्यते ॥
सर्वेभ्यः स तु पापिष्ठः पैशाचः प्रथितोऽष्टमः ॥ ११ ॥

आद्या आद्यस्य षट् प्रोक्ता धर्म्याश्चत्वार एव हि ॥
चत्वारोऽन्ये द्वितीयस्य आद्यस्य च द्वयस्य च ॥ १२ ॥

पञ्चमश्च तथा षष्ठः स्मृतौ तौ त्रि-चतुर्थयोः ॥
द्वितीयस्यापि ये प्रोक्ता एतयोस्ते न चाष्टमः ॥ १३ ॥

वैधसाद्यनुरूपेण द्वितीयः परयोः स्मृतः ॥
सर्वे सप्तममेकस्य द्वितीयस्यैवं कीर्तिताः ॥ १४ ॥

अन्त्यावत्यधमौ चोक्तावुद्वाहौ शक्तिसूनुना ॥
तथा युगस्वरूपेण प्रोक्तो दैत्यस्तु मानुषः ॥ १५ ॥

तार्यन्ते प्राकृतोऽधस्ताश्चतुरोऽऽद्यविवाहजैः ॥
स्वात्मना द्विगुणान्वंश्यान् दश-सप्त-त्रयश्च षट् ॥ १६ ॥

स्त्रीणामाजन्मशर्मार्थं वंशशुद्धौ प्रयत्नवान् ॥
वरं हि वरयेद्विद्वाञ्जात्यादिगुणसंयुतम् ॥ १७ ॥

जाति-विद्या-वयः-शक्तिरारोग्यं बहुपक्षता ॥
अर्थित्वं वित्तसम्पत्तिरष्टावेते वरे गुणाः ॥ १८ ॥

जातिर्विद्या च रूपं च शीलं चैव नवं वयः ॥
अरोगित्वं विशेषेण पुंस्त्वे सत्यपि लक्षयेत् ॥ १९ ॥

जातिं रूपं च शीलं च वयो नवमरोगिताम् ॥
स्वाचारत्वं विशेषेण संलक्ष्य वरमाश्रयेत् ॥ २० ॥

सज्जातिं रूप-वित्तं च तथाऽग्रवयसं दृढम् ॥
सन्तोषजननं स्त्रीणां प्रज्ञावानाश्रयेद्वरम् ॥ २१ ॥

न जातिं न च विद्यां च वित्तं नाऽचरणं स्त्रियः ॥
किन्तु ताः प्रीतिमिच्छन्ति तस्मात् प्रीतिकरं श्रयेत् ॥ २२ ॥

---

१. A. reads बाल्याद्वालेन भुज्यते:; while C. reads कन्या छलेन भुज्यते. २. B. and E. read धर्माः for धर्म्याः. ३. A. and F. read द्वितीयः परमः स्मृतः, ४. A. reads द्वितीयश्चैव and B. reads द्वितीयस्तस्य. ५. B. C. and F. read शक्रसूनुना for शक्तिसूनुना. ६. B. D. E. F. read मानवः for मानुषः. ७. A. reads विवाहजाः for विवाहजैः. ८. C. only substitutes °शुद्धये for °शुद्धौ. ९. B. D. and F. read शीलं च for अर्थित्वं. १०. A. reads °स्यभि° for °स्वापि.

पित्रा यत्र सगोत्रत्वं मात्रा यत्र सपिण्डता ॥
न च तामुद्वहेत्कन्यां दारकर्मण्यनादृताम् ॥ २३ ॥
कन्यायाश्च वरस्यापि यत्रोभयोर्भवेद्रतिः ॥
तथा कन्यां वरो[2] धीमान्वरयेद्वंशशुद्धये ॥ २४ ॥
नाना मतानि सर्वेषां सतां सन्ति[3] वरम्प्रति ॥
सन्तानस्य विशुध्यर्थं जात्यादिषु च नाऽन्यतः[4] ॥ २५ ॥
दूरस्थानामविद्यानां मोक्ष[5]धर्मानुयायिनाम् ॥
शूराणां निर्धनानां च न देया कन्यका बुधैः ॥ २६ ॥
नाऽतिदूरे न चाऽसन्न अत्याढ्ये चाऽतिदुर्बले ॥
वृत्तिहीने च मूर्खे[7] च षट्सु कन्या न दीयते ॥ २७ ॥
वर्जयेदतिरिक्ताङ्गीं कन्यां हीनाङ्गरोगिणीम् ॥
अति[8]लोम्नीं हीनलोम्नीमवाच[9]मतिवाग्युताम् ॥ २८ ॥
पिता पितामहो भ्राता माता मातामहोऽपि वा ॥
[10]कन्यादाः स्युः क्रमेणैते पूर्वाऽभावे परः परः ॥ २९ ॥
अधिकारी यदा न स्यात्तदाऽऽख्याय नृपस्य सा ॥
तद्गिरा च स्वयं गम्यं कन्यापि वरयेद्वरम् ॥ ३० ॥
पिङ्गलां कपिलां[11] कृष्णां दुष्ट[12]वाक्काकनिःस्वनाम् ॥
स्थूलाङ्ग-जङ्घ[13]-पादां च सदा चाऽप्रियवादिनीम् ॥ ३१ ॥
त्यजेन्नग-नदीनाम्नीं पक्षि-वृक्षर्क्षनाभिकाम् ॥
अहि-प्रेष्या-ऽन्त्य[14]नाम्नीं च तथा भीषणनामिकाम्[15] ॥ ३२ ॥
[16]स्वजातिमुद्वहेत् कन्यां सुरूपां लक्षणान्विताम् ॥
अरोगिणीं सुशीलां च तथा भ्रातृमतीमपि ॥ ३३ ॥

---

१. A. reads मैथुने for अनादृताम्. २. A. reads वरं for वरो. ३. A. reads कन्यां for सन्ति. ४. A. substitutes तान्युत for नाऽन्यतः. ५. B. D. E. and F. read मुमुक्षूणां गरीयसाम् for मोक्षमार्गानुयायिनाम्. ६. In A. and F. this verse is not found. ७. C. reads वृद्धे for मूर्खे. ८. A. reads सलोमां लोमहीनां च for अतिलोम्नीं हीनलोम्नीं. ९. B. reads निर्वाचम for अवाचम्. १०. C. reads कन्यां दद्युः for कन्यादाः स्युः. ११. B. reads कृष्णपिंगाक्षीं. १२. A. reads श्रुतिहीनां विनिःस्वनाम् for दुष्टवाक् काकनिःस्वनाम्. १३. B. D. E. and F. read °जानु° for °जङ्घ°. १४. B. D. E. read °मनाम्नीं for °ऽन्त्यनाम्नीं. १५. A. reads °नासिकाम् for °नामिकाम्, C. too the same. १६. C. reads सुजाति° for स्वजाति°.

सर्वावयवसम्पूर्णामसगोत्रां[1] कुलोद्भवाम् ॥
हंसमातङ्गगमनां सुमृद्वङ्गीं सुलोचनाम् ॥ ३४ ॥
सलज्जां [2]शुभनासां च पतिप्रीतिकरी[3]मपि ॥
श्वश्रू-श्वशुर-गुर्वादिशुश्रूषाकारिणीं प्रियाम् ॥ ३५ ॥
अव्यङ्गां कुलजातां तामनभिशस्तवंशजाम् ॥
प्रस्वेदशुभगन्धां [4]च शुभमिच्छन्समुद्वहेत् ॥ ३६ ॥
विप्रः स्वामपरे द्वे तु राजा स्वामपरे तथा ॥
वैश्यः स्वाश्च चतुर्थीं च क्रमेणैवं समुद्वहेत् ॥ ३७ ॥
पितृतः सप्तमीमेके मातृतः पञ्चमीमपि ॥
उद्वहेदिति मन्यन्ते कुलधर्मान् समाश्रिताः ॥ ३८ ॥
उक्तलक्षणकन्यायाः कृत्वा पाणिग्रहं द्विजः ॥
[5]धर्म्योद्वाहेन केनापि [6]समाऽऽदध्याद्धुताशनम् ॥ ३९ ॥
दायाद्यकाले वा दद्यात्तदुक्तं कर्मकृद्द्विजैः ॥
यदा वापि भवेत् भक्तिः सम्पत्तिर्वा [7]यदा भवेत् ॥ ४० ॥
ऋतावृतौ स्त्रियं गच्छेत्स्त्रीच्छया च वरं स्मरन् ॥
सर्वं तदिच्छया कुर्याद्यथोभयोर्भवेद्धृतिः ॥ ४१ ॥
भोज्याऽलङ्कार-वासोभिः पूज्याः स्युः सर्वदा स्त्रियः ॥
यथा ता नैव शोचन्ति नित्यं कार्यं तथा नृभिः ॥ ४२ ॥
आयुर्वित्तं यशः पुत्राः स्त्रीप्रीत्या स्युर्नृणां सदा ॥
नश्यन्ते ते तदप्रीतौ तासां शापादसंशयम् ॥ ४३ ॥
स्त्रियश्च यत्र पूज्यन्ते सर्वदा भूषणादिभिः ॥
देवाः पितृ-मनुष्याश्च मोदन्ते तत्र वेश्मनि ॥ ४४ ॥
स्त्रियस्तुष्टाः श्रियः साक्षाद्रुष्टाश्च दुष्टदेवताः ॥
वर्धयन्ति कुलं तुष्टा नाशयन्त्यपमानिताः ॥ ४५ ॥
नाऽपमान्याः स्त्रियः सद्भिः पति-श्वशुर-देवरैः ॥
भ्रात्रा पित्रा च मात्रा च तथा बन्धुभिरेव च ॥ ४६ ॥

---

१. A. reads समशीलां for असगोत्रां. २. A. B. and C. read °शुभनाशां. ३. D. E. read °कराम् for °करीम्. ४. A. reads तु. ५. A. C. and F. read धर्मो° for धर्म्यो°; while in E. this whole verse is not found. ६. C. and F. तदाऽऽदध्यात् for समाऽऽदध्यात्. ७. A. B. C. and F. read तदा for यदा. ८. A. reads °नाम्बरैः for °नादिभिः.

स्त्रियाश्च पुरुषस्यापि यत्रोभयोर्भवेद्धृतिः ॥
तत्र धर्मो-ऽर्थऽकामाः स्युस्तदधीना यतस्त्वमी ॥ ४७
षट्कर्माणि नृणां तेषां येषां भार्या पतिव्रता ॥
पतिलोकं तु ता यान्ति तपसा येन योगवित् ॥ ४८ ॥
पतिव्रता तु साध्वी स्त्री अपि दुष्कृतकारिणम् ॥
पतिमुद्धृत्य याति द्यां केकीव पतितोरुगाम् ॥ ४९ ॥
जीवन्वापि मृतो वापि पतिरेव प्रभुःस्त्रियाः ॥
नान्यच्च दैवतं तासां तमेव प्रभुमर्चयेत् ॥ ५० ॥
मनसापि हि दुष्टा स्त्री यान्यभावा प्रियं पतिम् ॥
सा याति नरकं घोरं तद्द्रोहादणुतोऽपि च ॥ ५१ ॥
नियोज्य गृहकृत्येषु सर्वदा ता नृभिः स्त्रियः ॥
गृहार्थासक्तचित्तास्तास्तदेवार्हन्ति शोचितुम् ॥ ५२ ॥
स्त्रीणामष्टगुणः कामो व्यवसायश्च षड्गुणः ॥
लज्जा चतुर्गुणा तासामाहारश्च तदर्धकः ॥ ५३ ॥
न वित्तं नैव जातिश्च नाऽपि रूपमपेक्षते ॥
किन्तु ताभिः पुमानेष इति मत्वैव भुज्यते ॥ ५४ ॥
विकुर्वाणाः स्त्रियो भर्तुरायुष्य-धननाशकाः ॥
अनायासेन तास्तस्य परासक्ता भवन्ति हि ॥ ५५ ॥
नारीणां च नदीनां च गतिर्न ज्ञायते बुधैः ॥
कुलं कूलप्रपाते च कालक्षेपो न विद्यते ॥ ५६ ॥
चेष्टा-चारित्र-चित्राणि देवा नैव विदुः स्त्रियाम् ॥
किं पुनः प्राणिमात्रास्तु सर्वथा नष्टबुद्धयः ॥ ५७ ॥
तस्मात्ताः सर्वथा रक्ष्याः सर्वोपायैर्नृभिः सदा ॥
श्वशुरैर्देवराद्यैस्ताः पितृ-भ्रात्रादिभिस्तथा ॥ ५८ ॥
विवाहात् प्राक् पिता रक्षेद्यौवने तु पतिस्ततः ॥
रक्षेयुर्वार्धके पुत्रा नास्ति स्त्रीणां स्वतन्त्रता ॥ ५९ ॥
स्वातन्त्र्येण विनश्यन्ति कुलजा अपि योषितः ॥
अस्वातन्त्र्यमतः स्त्रीणां प्रजापतिरकल्पयत् ॥ ६० ॥

१. C. and F. read रतिः for धृतिः. २. B. D. E. F. read पतिरेवप्रभुर्यतः for तमेव प्रभुमर्चयेत्. ३. A. E. and F. read नृपैः for बुधैः. ४. A. reads सर्वे ते नष्टबुद्धयः for सर्वथा नष्टबुद्धयः.

अशौचाश्च सशौचाश्च अमेध्या अपि पावनाः ॥
दुर्वाचोऽपि सुवाचस्तास्तस्मादन्वेषयेन्न ताः ॥ ६१ ॥
शौचं वाचं च मेध्यत्वं सोम-गन्धर्व-पावकाः ॥
ददुस्तासां वरानेतांस्तस्मान्मेध्यतराः स्त्रियः ॥ ६२ ॥
भर्तारो वो भविष्यन्ति युष्मच्चित्तानुसारिणः ॥
यथेच्छाकामिनः सर्वे तासामिन्द्रो वरं ददौ ॥ ६३ ॥
तस्मात्तादिच्छया प्रीतिं पुमानिच्छेत्तथा स्त्रियः ॥
रक्षणीयास्ततस्तास्तु सर्वभावेन योषितः ॥ ६४ ॥
सामाह मृकुथमित्याद्यैर्वेदैर्यस्ता नृणां तनौ ॥
अर्धकाया नराणां ताः स्त्रिणां नातः पृथक् व्रतम् ॥ ६५ ॥
न दिवापि स्त्रियं गच्छेदिच्छंस्तदिच्छयापि च ॥
न पर्वसु न सन्ध्यासु नाऽऽद्यर्त्तुचतुरात्रिषु ॥ ६६ ॥
वन्ध्याष्टमे ऽधिवेत्तव्या नवमे च मृतप्रजा ॥
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥ ६७ ॥
नोदक्यां न दिवा गच्छेत् सगर्भां च व्रतस्थिताम् ॥
अधिगच्छेद्यदि ह्यन्यस्तदायुः क्षयमेति च ॥ ६८ ॥
न वक्त्रेऽभिगमं कुर्यात् पाणिग्राही स्वयोषितः ॥
कुर्याच्चेत्पितरस्तस्य पतन्ति नरकेऽशुचौ ॥ ६९ ॥
भार्याधीनं सुखं पुंसां भार्याधीनं गृहं धनम् ॥
भार्याधीना सुखोत्पत्तिर्भार्याधीनः शुभोदयः ॥ ७० ॥
यत्र भार्या गृहं तत्र भार्याहीनं गृहं वनम् ॥
न गृहेण गृहस्थः स्याद्भार्यया कथ्यते गृही ॥ ७१ ॥
गृही स्याद्गृहधर्मेण स वै पञ्चमखादिकः ॥

---

१. This whole line is read in B. D. E. and F. thus—अर्धकाया नृणां तास्ताःपृथक् धर्मादि न स्त्रियाम्; while A. substitutes पृथग्विमोहिनीं स्त्रियम् for स्त्रीणां नातः पृथक् व्रतम्. २. A. substitutes नाद्यासु चतुरात्रिषु for नाद्यर्तुचतुरात्रिषु; while B. reads नर्त्तौ रात्रिचतुष्टये and C. नर्तुरात्रिचतुष्टये. ३. A. B. and F. read परित्याज्या for अधिवेत्तव्या. ४. C. reads this whole line thus—न दिवापि स्त्रियं गच्छेन्न सगर्भां व्यवस्थिताम्. ५. C. reads अभिगच्छे° for अधिगच्छे.° ६. A. and C. read पाणिगृहीतयोषितः for पाणिग्राही स्वयोषितः.

तद्धीनो न गृहस्थःस्यात्कुर्यात्तं यत्नतस्ततः ॥ ७२ ॥
पञ्चयज्ञविधानेन कुर्यात्पञ्च महामखान् ॥
[2]श्रौते वा यदि वा स्मार्ते पञ्चयज्ञान्न हापयेत् ॥ ७३ ॥
[3]कुर्युः पञ्चमहायज्ञान् सूनादोषापनुत्तये ॥
पञ्चसूना भवन्त्य[4]त्र सर्वेषां गृहमेधिनाम् ॥ ७४ ॥
कण्डन्युदककुम्भी च चुल्ली पेषण्युपस्करः ॥
यदाऽऽदौ वेदमारभ्य स्नात्वा भक्त्या द्विजोत्तमः ॥ ७५ ॥
अध्यापयेद्द्विजांच्छिष्यान्स वै ब्रह्ममखः स्मृतः ॥
यत् स्नात्वाऽहरहः सर्वान्देवांश्च मनुजान्पितॄन् ॥ ७६ ॥
तर्पयेदम्भसा भक्त्या पितृयज्ञः स वै मतः ॥
श्रौते वा यदि वा स्मार्ते यज्जुहोति हुताशने ॥ ७७ ॥
विधिवन्नित्यशो विप्रः स तु देवमखः स्मृतः ॥
दशस्वाशासु यः कु[6]र्याद्धुतशेषाद्बलिं द्विजः ॥ ७८ ॥
इन्द्रादिभ्यस्तथाऽन्येभ्यः स वै भूतमखो मतः ॥
समायातातिथिं भक्त्या यं[8]द्भोजयति नित्यशः ॥ ७९ ॥
अन्यानभ्यागतांश्चैव सा मनुष्येष्टिरुच्यते ॥
[9]एवं पञ्चमखान् कुर्वन्मधु-मांसाऽऽज्य-पायसैः ॥ ८० ॥
स सन्तर्प्य पितॄन्देवान्मनुष्यान् स्वर्गमाप्नुयात् ॥
गृहस्था य उपासीरन् वाचं धेनुं चतुस्तनीम् ॥ ८१ ॥
स्वर्गौकसां पितॄणां च पूज्यास्तेऽतिथिवद्दिवि ॥
चत्वारस्तु स्तना एते ये चतुर्वेदसंज्ञिताः ॥ ८२ ॥
स्वाहाकारो वषट्कारो हन्तकारस्तथा स्वधा ॥
देवानां भागधेयौ द्वौ अन्ये च मनुजन्मनाम् ॥ ८३ ॥

---

१. C.and F. do not insert this line. २. D. E. and F. read श्रौतो वा यदि वा स्मार्तो. ३. Only A. substitutes कुर्यात् for कुर्युः. ४. A. reads भवन्ति for वहन्ति. ५. B. D. and. E. read श्रौतो. for श्रौते and स्मार्तो for स्मार्ते respectively. ६. A. reads क्षिपेत् for कुर्यात्. ७. B. reads यो for यत्. ८. B. reads पूजयति for भोजयति, also D. and E. substitute the same. ९. A. and C. read पञ्चमखस्त्वं स्यात्. १०. B. D. E. and F. read स्वर्गौकोभ्यः पितृभ्यस्तु पूज्यास्तेऽतिथयो द्विजैः.

पितॄणां च चतुर्थस्तु इति वेदनिदर्शनम् ॥
इति निर्वर्त्य विधिवत्सकलं कर्म नैत्यकम् ॥ ८४ ॥
प्राणाग्निहोत्रविधिना भुञ्जीतान्नमघापहम् ॥
अदत्वा पोष्यवर्गस्य ह्यकृत्वाऽध्यापनादिकम् ॥ ८५ ॥
असाक्षिकं च योऽश्नीयात्सोऽश्नीयात्किल्बिषं द्विजः ॥
प्राङ्मुखादिक्रमेणाऽश्नन्नायुः कीर्तिं श्रियो ऋतम् ॥ ८६ ॥
अविधिर्विधिगत्यासु यत्तदश्नन्ति राक्षसाः ॥
अथ प्राणाग्निहोत्रस्य श्रूयतां द्विजसत्तमाः ॥ ८७ ॥
वक्ष्यमाणो विधिः पुण्यः प्रेत्य चेह च पावनः ॥
यो विधिर्देवताभ्यस्तः संसारबन्धनाशकृत् ॥ ८८ ॥
तद्विदस्तु दिवं यान्ति मुक्ता दैवादृणादपि ॥
उद्धरेद्यद्विदित्वाऽन्पुरुषानेकविंशतिम् ॥ ८९ ॥
सर्वेष्टिफलभाग्यायाद्वैधसं क्षयमक्षयम् ॥
यः कालाकालविद्विप्रो नैनःस्पर्शी स कर्हिचित् ॥ ९० ॥
सोऽस्पृष्टैना विशेत्तत्र यद्गत्वा नैति संसृतौ ॥
दश पञ्चाङ्गुलव्यासं नासिकाया बहिः स्थितम् ॥ ९१ ॥
जीवो यत्र विशुद्ध्येत सा कला षोडशी स्मृता ॥
सर्वमेतत्तया व्याप्तं त्रैलोक्यं सचराचरम् ॥ ९२ ॥
ब्रह्मविद्येति विख्याता वेदान्ते च प्रतिष्ठिता ॥
न वेदं वेदमित्याहुर्वेद्यं नाम परं पदम् ॥ ९३ ॥
तत्पदं विदितं येन स विप्रो वेदपारगः ॥
आहुतिः सा परा ज्ञेया सा च शान्तिः प्रकीर्तिता ॥ ९४ ॥
गायत्री सा च विज्ञेया सा च सन्ध्या प्रकीर्तिता ॥

---

१. B. D. E. and F. read वेदो निदर्शनम् for वेदनिदर्शनम्; while C. reads वेदे निदर्शनम्. २. A. and F. read निर्वृत्य for निर्वर्त्य. ३. B. D. E. and F. read पैतृकम् for नैत्यकम्. ४. B. D. C. and E. read यात्यसौ for सोऽश्नीयात्. ५. F. reads कल्मषं for किल्बिषं. ६. C. reads वदङ्मुखाननश्नायात्. ७. C. reads °न्यस्तः for °भ्यस्तः. ८. D. C. and E. read देवऋणेन च and F. reads देवऋणेन तु. ९. A. reads वसेत् for विशेत्. १०. A. B. C. D. and F. read विशुद्ध्येत for विशुद्ध्येत. ११. B. D. and E. read प्रदर्शिता for प्रतिष्ठिता. १२. B. D. E. and F. read वेदानां परमं. १३. B. D. E. and F. read परं for पदं.

तज्जाप्यं तच्च वै ज्ञेयं तद्[1]रुतं तदुपासितम् ॥ ९५ ॥
तां कलां यो विजानाति स कलाज्ञो द्विजः स्मृतः ॥
तत्तुरीयपदं शान्तं यस्मिँल्लीनमिदं जगत् ॥ ९६ ॥
तज्ज्ञात्वा परमं तत्वं न भूयः पुरुषो भवेत् ॥
प्राणमार्गास्त्रयः प्रोक्तास्तिस्रो नाड्यः प्रकीर्तिताः ॥ ९७ ॥
ईडा च पिङ्गला चैव सुषुम्ना च तृतीयका ॥
ईडा च वैष्णवी नाडी ब्रह्माणी पिङ्गला स्मृता ॥ ९८ ॥
सुषुम्ना चेश्वरी नाडी त्रिधा प्राणवहाः स्मृताः ॥
उत्तरं दक्षिणं ज्ञेयं दक्षिणोत्तरसंज्ञितम् ॥ ९९ ॥
मध्ये तु विषुवं ज्ञेयं पु[2]टद्वयविनिःसृतम् ॥
सं[3]क्रांति-विषुवे चैव यो विजानाति विग्रहे ॥ १०० ॥
नित्य[4]मुक्तः स योगी च ब्रह्मवादिभिरुच्यते ॥
मध्याह्ने चार्धरात्रे च प्रभातेऽस्त[5]मये तथा ॥ १०१ ॥
विषुवन्तं विजानीयात्पुटद्वयविनिः[6]सृतम् ॥
हृत्पुण्डरीकमरणीं मनो मन्थानमेव च ॥ १०२ ॥
प्रा[7]णरज्वा न्य[8]सेदग्निमात्माध्वर्युः प्रतिष्ठितः ॥
ज्वालयेत्पूरकेणाऽग्निं स्थापयेत्कुम्भकेन तु ॥ १०३ ॥
रेचकेणो[9]र्ध्ववक्त्रेण ततो होमं करोति यः ॥
यत्तद्धृदि स्थितं पद्ममधोनालं व्यवस्थितम् ॥ १०४ ॥
[10]तस्मिन्विकसिते पद्मे प्राणो वायुर्विसर्पति ॥
वामहस्तधृते पात्रे दक्षिणे चाम्भसि स्थि[11]ते ॥ १०५ ॥
सनादमु[12]च्चरेद्विप्रो अच्छिन्नाग्रं तु पूरयेत् ॥

---

१. All except C. read तद्धुतं for तद्रुतं. २. B. D. and E. read पुरद्वय° for पुटद्वय°. ३. A reads this line in the following manner:—संक्रांतौ विषुवे चैव यो विजानाति विग्रहम. ४. B. D. and E. read नित्ययुक्तः for नित्यमुक्तः. ५. B. D. E. and F. read ऽस्तमने for ऽस्तमये. ६. B. D. E. and F. read °विनिर्गतम् for °विनिःसृतम्. ७. Except A. and C. the rest read प्राणायामो for प्राणरज्वा. ८. A. B. D. and E. read ऽभ्यसेत् for न्यसेत्. ९. B. D. and E. substitute °णाऽर्ध्ववक्त्रेण for °णोर्ध्ववक्त्रेण. १०. A. substitutes here तद्वैविकसते पद्मं प्रणवं च विसर्पति, for the whole line. ११. B. C. D. and F. read स्थितः for स्थिते. १२. A. and F. read उद्धरेत् for उच्चरेत्.

पूरणात् पूरकं प्राहुर्निश्चलं कुम्भकं भवेत् ॥ १०६ ॥
निर्गच्छति शनैर्वायू रेचकं तं विनिर्दिशेत् ॥

स्वाहान्तैः प्रणवाद्यैश्च स्वैस्स्वनाम्ना च वायुभिः ॥ १०७ ॥
जीवात्मा योजितः षष्ठः षडाहुत्या हुतं भवेत् ॥

जिह्वादत्तं ग्रसेदन्नं दन्तैश्चैव न तत् स्पृशेत् ॥ १०८ ॥
दशनैः स्पृष्टमात्रेण पुनराचमनं चरेत् ॥

मुख आहवनीयोऽग्निर्गार्हपत्यस्तथोदरे ॥ १०९ ॥
हृदये दाक्षिणाग्निश्च गृह्याग्निश्चापि दक्षिणे ॥

सभ्यश्चोत्तरतश्चिन्त्य इत्यग्निस्मरणक्रमः ॥ ११० ॥
प्राणाद्येवाग्निहोत्रादि चिन्तयेत्तद्वदेव तु ॥

होतारं प्राणमित्याहुरुद्गातारमपानकम् ॥ १११ ॥
ब्रह्माणं व्यानमित्येके उदानोऽध्वर्युमित्यपि ॥

समानं चेह यज्वानमिति ऋत्विक्क्रमं बुधः ॥ ११२ ॥
अहङ्कारं पशुं कृत्वा प्रणवं यूपमित्यपि ॥

बुद्धिरित्यरणिः पृथ्वी लोमानि च कुशाः स्मृताः ॥ ११३ ॥
मनो विभक्ता त्वग्जिह्वा इति तत्ज्ञाः प्रचक्षते ॥

कृत्वा त्रिमात्रमोङ्कारं हुङ्कारं च तथा पुनः ॥ ११४ ॥
उत्तिष्ठ जननाथाऽग्ने हरिलोहितपिङ्गल ॥

सप्तपरिधये तुभ्यं क्षुद्वह्निदैवतं च यत् ॥ ११५ ॥
विजिह्व जाठरायाऽग्ने स्वाहाप्राणाय व्यत्ययः ॥

इन्द्रगोपकवर्णाय त्रिजिह्वायाग्निदैवतम् ॥ ११६ ॥
ॐ स्वाहेति अपानाय स्वाहाकारान्तमुच्चरेत् ॥

गोक्षीरसमवर्णाय पर्जन्यं वह्निदैवतम् ॥ ११७ ॥
स्वाहोदानाय सोङ्कारमनलाय परार्चिषे ॥

---

१. C. reads पूरयेत् and B. पूरयन् for पूरणात्. २. A and C. read विनिःसृत्य for निर्गच्छति. ३. A. B. D. E. and F. read पुमान् for स्वस्व°. ४. B. C. D. E. and F. read जितात्मा for जीवात्मा. ५. C. reads प्राणैः षडाहुतिर्भवेत् for षडाहुत्याहुतं भवेत्. ६. A. reads पृथिव् for पृथ्वी; while B. C. and F. read सृष्टिः for पृथ्वी. ७. A. reads परास्विषे for परार्चिषे.

तडित्समानवर्णाय वाय्वग्निदैवताय ते ॥ ११८ ॥
ॐ स्वाहा च समानाय ॐ स्वाहा चाह वेधसे ॥
तर्जनी-मध्यमा-ऽङ्गुष्ठैर्लग्ना प्राणस्य चाहुतिः ॥ ११९ ॥
कनिष्ठा-ऽनामिका-ऽङ्गुष्ठैर्व्यानस्य परिकीर्तिता ॥
मध्यमा-ऽनामिका-ऽङ्गुष्ठैरपानायाहुतिः स्मृता ॥ १२० ॥
मध्यमा-ऽनामिकास्त्वन्त्यामुदाने जुहुयाद्बुधः ॥
समाने सर्वैरुद्धृत्य आहुतिः स्यात्समानतः ॥ १२१ ॥
जलं पीत्वा तु तृप्यन्ति रेचयेच्च शनैः शनैः ॥
ततोऽन्यद्द्रव्यमश्नीयात्पूरणायोदरस्य च ॥ १२२ ॥
विधिं प्राणाग्निहोत्रस्य ये द्विजा नैव जानते ॥
अपानेन तु भुञ्जन्ति तेषां मुखमपानवत् ॥ १२३ ॥
यो ज्ञात्वा तु विधिं भुङ्क्ते यथोक्तमिदमाचरेत् ॥
इहामुत्र च पूज्यत्वं ब्रह्मभूयाय कल्पते ॥ १२४ ॥
त्रिःसप्तकुलमुद्धृत्य दातुरप्यक्षयं भवेत् ॥
दातुरपि हि यत्पुण्यं भोक्तुश्चैव हि तत्फलम् ॥ १२५ ॥
दाता चैव तु भोक्ता च तावुभौ स्वर्गगामिनौ ॥
यो जानाति विधिं चेमं सभवेद्ब्रह्मवित्तमः ॥ १२६ ॥
एकं पिबति गण्डूषं त्यजेदर्धं धरातले ॥
स हतः पितृ-दैवत्यमात्मानं नरकं व्रजेत् ॥ १२७ ॥
रहस्यं सर्वशास्त्रेषु सर्वशास्त्रेषु दुर्लभम् ॥
ज्ञानानामुत्तमं ज्ञानं न कस्यचित् प्रकाशयेत् ॥ १२८ ॥
विप्राणानामग्निहोत्रस्य ये द्विजा नैव जानते ॥

---

१. This verse is given in B. and F. as—

पद्मकिंजल्कवर्णाय वसुरूपाय चाग्नये ।
परानलाय व्यानाय ॐ स्वाहेति चोच्चरेत् ॥.

२. A. reads °कांगुष्ठैरुदाने for °कास्त्वन्त्यामुदाने. ३. A. reads this line thus—समानं सर्वैरुद्धृत्यदातुरप्यक्षयं भवेत्. ४. B. reads आहुतेः स्यात्समानता. ५. A. B. E. and F. read °हृष्ट° for °तृप्य°. ६. B. reads ब्राह्मणो ज्ञानदुर्बलः. ७. B. reads पीतेन पितृदानैः स्याद्भूष्यन्के भूमिदेवता ।. and C. reads पिबेद्द्वितीयं गंडूषं. ८. C. substitutes हत्वा for हतः. ९. C. reads नयेत् for व्रजेत्. १०. B. E. and F. read क्षितावस्यन्तदुर्लभम् for सर्वशास्त्रेषु दुर्लभम्.

ज्ञानानि योऽप्रकाश्यानि पुंसामविदुषां वदेत् ॥ १२९ ॥
स प्रणाश्य फलं तेषामात्मानं नरकं नयेत् ॥

योऽज्ञात्वा ह्यप्रकाश्यानि पुंसामाविदुषां वदेत् ॥ १३० ॥
प्राणायामफलं हत्वा ऽऽत्मानं नरकं नयेत् ॥

योऽश्नीयाद्विधिवद्विप्रः कृतपात्रपरिग्रहः ॥ १३१ ॥
पूजितान्नमवाग् जुष्टं सापोशानं ससाक्षिकम् ॥

वाग्यतो न्यस्तपात्रे च विप्र-क्षत्र-विशां क्रमात् ॥ १३२ ॥
वाग्यतो न्यस्तपात्र[2]स्त्रीन् ग्रासामष्टावपि द्विजः ॥
तस्य त्रिरात्रं[3] पुण्याभिर्दानेऽपि कवयो[4] विदुः ॥ १३३ ॥

चतुस्त्रिकोणं वृत्तं च विप्र-क्षत्र-विशां क्रमात् ॥
प्राहुः परिहृतं[5] सन्तस्तद्धीनान्नं तु राक्षसम् ॥ १३४ ॥

गृह्णीयात्प्रागपोशानं तथा भुक्त्वा सकृत्त्वपः ॥
अनन्नममृतं तत्स्याद्भुक्तमन्नं द्विजन्मनाम् ॥ १३५ ॥

काले भुक्त्वा समुत्थाय प्रेक्ष्य विप्रं समीक्ष्य च ॥
अहःपतिं तत्र[6] स्थित्वा चिन्तयेज्ज्दह्नु कृत्यकम् ॥ १३६ ॥

भार्या भोजनवेलायां भिक्षां सताऽथ पञ्च वा ॥
दत्वा शेषं समश्नीयात्सापत्य-भृत्यकैः सह ॥ १३७ ॥

निर्वर्त्य सकलं सापि किंचित्स्थित्वा सुखेन तु ॥
[7]स्वस्त्रोयरतिकार्येषु सापि स्यात्तत्परा पुनः ॥ १३८ ॥

उपास्य पश्चिमां सन्ध्यां हुत्वा चैव हुताशनम् ॥
किञ्चित्पश्चात्[8]समश्नीयात्सायंप्रातरिति श्रुतिः ॥ १३९ ॥

स्वाध्यायमभ्यसेत्किञ्चिद्यामद्वयं शयीत च ॥
शयानो मध्यमौ यामौ ब्रह्मभूयाय कल्पते ॥ १४० ॥

---

१. F. reads य एव for वाग्यतो. २. B. reads °पात्रो ऽमन्मासान् for °पात्रः स्त्रीन् मासान्. ३. B. C. D. E. and F. read त्रिरात्रिपुण्याभिः, C. त्रिरात्रपुण्यानि for त्रिरात्रं पुण्याभिः. ४. B. D. E. F. read मुनयः for कवयः. ५. B. reads परिहृतं, D. also the same. ६. D. E. and F. read सुखं for तत्र. ७. B. D. E. F. read—

स्वस्त्रीयकृत्यकार्येषु सापि सान्त्वपरा पुनः ।

८. B. reads सायं for पश्चात्.

सु[1]शयने शयीताथ एकान्ते च स्त्रियासह ॥
गो[2]पनं मैथुनादीनां वदन्ति मुनिपुङ्गवाः ॥ १४१ ॥

ऋतुक्षपासु पुत्रार्थी आधानविधिना द्विजः ॥
प्रसाद्य भस्मना योनिमिति मन्त्रनिदर्शनात् ॥ १४२ ॥

कृत्वाऽऽधानविधानं तु स्त्रीयोगमभ्यसेत्पुनः ॥
[3]मन्थेदविकृतो योनौ विकाराद्विकृताः प्रजाः ॥ १४३ ॥

ब्राह्मे मुहूर्ते उत्थाय प्रातः सन्ध्यामुपक्रमेत् ॥
आसूर्यदर्शनाद्[4] प्रा[5]तः सायं चैवर्क्षदर्शनात् ॥ १४४ ॥

बहिःसन्ध्यामुपासीत सम्प्राप्ताव[6]म्भसः सदा ॥
उपासिता बहिःसन्ध्या विशिष्टफलदा भवेत् ॥ १४५ ॥

अनृतं मद्यगन्धं च दिवा मैथुनमेव च ॥
पुनाति वृषलस्यान्नं सन्ध्या बहिरुपासिता ॥ १४६ ॥

सिन्दूरारुणभं भाति नभो यावद्वितारकम् ॥
उदयेऽस्तमये भानोस्तावत्सन्ध्येति शक्तिजैः[7] ॥ १४७ ॥

आधानतो द्वितीये तु मासे पुंसवनं भवेत् ॥
सीमन्तोन्नयनं षष्ठे कार्यं मासेऽष्टमे ऽपि वा ॥ १४८ ॥

जातस्य जातकर्म स्याद्विधिव[8]च्छ्राद्धपूर्वकम् ॥
दिने चैकादशे नामकर्म स्यात्[9] च द्विजन्मनाम् ॥ १४९ ॥

तुर्ये निष्क्रमणं मासे षष्ठेऽन्नप्राशनं तथा[10] ॥
चूडाकर्म तृतीयेऽब्दे कार्यं वा कुलधर्मतः ॥ १५० ॥

सर्वे क्रियां विमन्त्रं तु कार्यं कायविशुद्धये ॥
यस्य नस्युर्द्विजस्यैताः क्रियाश्चैव कथंचन ॥ १५१ ॥

स व्रात्यःसन् परित्याज्यो द्विजो यस्माद्विजन्मनाम् ॥
मुञ्जमौर्ण-शणानां तु त्रिवृता रशना स्मृता ॥ १५२ ॥

---

१. A. reads स्वशयने for सुशयने and B. reads शयीत शयने पश्चात् for सुशयने शयीताथ. २. B. reads सेवनं for गोपनं. ३. A. reads यथा ह्यविकृतो योगी, E. यथाह्यविकृतौ योनि°, F. न वेद विकृतो योनौ for मन्थेदविकृतो योनौ. ४. A. reads °उदयात् for °दर्शनात्. ५. B. reads सन्ध्यां for प्रातः. ६. A. reads ऽसम्भ्रमः for अम्भसः. ७. B. reads सक्रिया and C. शक्तितः for शक्तिजः. ८. A. reads द्वैववत्. ९. A. B. C. and F. read °कर्मादि स्यात् for °कर्म स्यात् च. १०. B. reads स्मृतम् for तथा.

कार्पास-शण-मेषौर्णान्युपवीतानि वर्णशः ॥
पलाश-वट-पीलूनां दण्डाश्च क्रमशः स्मृताः ॥ १५३ ॥
कार्ष्णं च रौरवं बास्तमजिनानि द्विजन्मनाम् ॥
शिरो-ललाट-नासान्ताः क्रमाद्दण्डाः प्रकीर्तिताः ॥ १५४ ॥
अव्रणाः सत्वचोऽदग्धा उक्ताः शुभकरा नृणाम् ॥
गायत्र्या त्रिष्टुप्-जगत्या त्रयाणामुपनायनम् ॥ १५५ ॥
गायत्र्यामविशेषो वा मुञ्जादिष्वपरेषु च ॥
तत्सवितुस्तां सवितुर्विश्वा रूपाणि वा क्रमात् ॥ १५६ ॥
औपनायनिका मन्त्रा विप्रादीनामुदाहृताः ॥
ब्राम्हणो विप्रगेहेषु नृपस्तेषूत्तमेषु च ॥ १५७ ॥
वैश्यो विप्र-नृपेष्वेषु कुर्याद्भिक्षां स्ववृत्तये ॥
एकान्नं न द्विजोऽश्नीयाद्ब्रह्मचारिव्रते स्थितः ॥ १५८ ॥
भिक्षाव्रतं द्विजातीनामुपवाससमं स्मृतम् ॥
प्रतिग्रहो न भिक्षा स्या न्न तस्याःपरपाकता ॥ १५९ ॥
सोमपानसमा भिक्षा अतोऽश्नीत स भिक्षया ॥
भिक्षया यस्तु भुञ्जीत निराहारः स उच्यते ॥ १६० ॥
भिक्षामनभिशस्तेषु स्वाचारेषु द्विजेषु च ॥
भिक्षेत नित्यं क्रमशो गुरोः कुलं विवर्जयेत् ॥ १६१ ॥
स्वसारं मातरं चापि मातृष्वसारमेव च ॥
भिक्षेत प्रथमां भिक्षां या चान्या न विमानयेत् ॥ १६२ ॥
' भवति भिक्षां मे देहि ' ' भिक्षां भवति देहि मे ' ॥
' भिक्षां मे देहि भवति ' क्रमेणैवमुदाहरेत् ॥ १६३ ॥
द्वादशाब्दं व्रतं धार्यं षट्त्र्यब्दं तु श्रुतिम्प्रति ॥
आदित्याब्दे त्यजेत्तद्वै दत्त्वा तु गुरवे वरम् ॥ १६४ ॥
त्रयस्तु स्नातकाः प्रोक्ताः विद्याव्रतोपसेविनः ॥
विद्यां समाप्य यःस्नायाद्विद्यास्नातक उच्यते ॥ १६५ ॥

---

१. C. reads °बिल्वानां for °पिलूनां. २. A. reads °नाशान्ताः for °नासान्ताः. ३. E. and F. read स्वेषु for तेषु. ४. A. reads पितृष्वसारम् for मातृष्वसारम्. ५. A. reads this line, as—भवतीति क्रमेणैतद् द्विजो नित्यमुदाहरेत्. ६. D. reads षडब्दं for षट्त्र्यब्दं. ७. B. C. D. E. and F. substitute अर्धीत्यायोत्सृजेत्तद्वै for आदित्याब्दे त्यजेत्तद्वै.

समाप्य च व्रतं यस्तु व्रतस्नातक उच्यते ॥
यज्ञं समाप्य यः स्नाति सद्विनामाऽभिधीयते ॥ १६६ ॥
द्वयं समाप्य यःस्नायात्स द्विनामाऽभिधीयते ॥
अष्टक-द्वादशाब्दानि सगर्भाणि द्विजन्मनाम् ॥ १६७ ॥
मुख्यकालो व्रतस्यैष ह्यन्य उक्तो विपर्यये ॥
द्विगुणाब्देषु कर्तव्या क्रमादुपनतिर्द्विजैः ॥ १६८ ॥
हीनगायत्रिका व्रात्या उक्तकालादनन्तरम् ॥
नाध्याप्या[१] नैव चोद्वाह्या व्यवहारविवर्जिताः ॥ १६९ ॥
न याज्या नार्यकार्येषु प्रयोज्यास्त इति श्रुतिः ॥
स्त्रीवन्निर्लोम वक्त्रा ये निर्लोमदेह-वक्षसः ॥ १७० ॥
उच्चोरस्काऽनपत्याश्च अदेश्यास्तेऽपि गर्हिताः ॥
येऽजस्रं विहितं कुर्युः प्राप्नुयुस्ते सदा शुभम् ॥ १७१ ॥
दीर्घायुष्यमदारिद्र्यं सुप्रजास्त्वमरोगिता ॥
अगर्हितत्वं लोकेऽत्र विदुरनिषिद्धकारिणः ॥ १७२ ॥
क्षीणायुस्त्वं दरिद्रत्वमप्रजास्त्वं च रोगिता ॥
गर्हितत्वं च लोकेषु विदुर्निषिद्धकारिणः ॥ १७३ ॥
प्रातर्वा यदि वा सायं नाद्यादन्नमनर्चितम् ॥
नानाद्यमनपोशानं शुभप्रेप्सुर्द्विजन्मना ॥ १७४ ॥
आपोशानं[३] विना नाद्यान्नाद्यादन्नमनर्चितम् ॥
अनाद्यं न दिवा सायं शुभमिच्छन् समश्नुते[२][४] ॥ १७५ ॥
षोडशाब्दानि विप्रस्य द्वाविंशतिर्नृपस्य च ॥
चतुर्विंशतिरन्यस्य व्रात्यास्ते स्युरतःपरम् ॥ १७६ ॥
उपनेया न ते विप्रैर्नाध्याप्याः शूद्रधर्मिणः ॥
व्यवहार्या नैव याज्या इति धर्मविदो विदुः ॥ १७७ ॥
स्त्रीणामुद्वाह एको वै वेदोक्तः पावनो विधिः ॥
स्त्री-पुंसोर्यत्र विन्यासस्तयोरन्योन्यमुच्यते[५] ॥ १७८ ॥

---

१. E. and F. read नाध्येयाः for नाध्याप्याः. २. B. reads this line in the following manner—

अनाद्यं न दिवासायं शुभमिच्छन्नचाश्नुते ।

३. In B. this verse is omitted. ४. D. and E. read नचाश्नुते for समश्नुते.
५. C. reads सून्वोः for तयोः.

स्वस्मिन्यस्माद्विभर्त्येषा पतिं, बिभर्ति सोऽपि ताम् ॥
अतो भार्या च भर्ता चेत्यत्र वेदो निदर्शनम् ॥ १७९ ॥

पतिर्विशति यज्जायां गर्भो भूत्वेह मातरम् ॥
तस्यां पुनर्नवो भूत्वा दशमे मासि जायते ॥ १८० ॥

जायोक्ता तेन भर्ता धै यदस्यां जायते पुनः ॥ १८१ ॥

इयमाभवनं भार्या बीजमस्यां निषिच्यते ॥
देवा ऊचुर्मनुष्यांश्च स्वभार्या जननो तु वः ॥ १८२ ॥

आत्मना जायते ह्यात्मा सा चैव पतितारिणी ॥
भार्या जाया जनन्येषा इति वेदे प्रतिष्ठिता ॥ १८३ ॥

यस्मात्स त्राति पुन्नाम्नो नरकात् पुत्र उच्यते ॥
सर्वां संसृतिमाहृत्य स याति ब्रह्मणैकताम् ॥ १८४ ॥

पिता जातस्य पुत्रस्य पश्येच्चेज्जीवतो मुखम् ॥
सर्वं तेन फलं प्राप्तमैहिकामुष्मिकं च यत् ॥ १८५ ॥

किं दण्डैरजिनैस्तीर्थैस्तपोभिः किं समाधिभिः ॥
पुमांसः पुत्रमिच्छध्वं स वै लोके वदावदः ॥ १८६ ॥

प्राणोऽन्नमस्मिन् शरणं हि वासो रूप्यं हिरण्यं पशवो विवाहाः ॥
सखा च यज्वा कृपणश्च पुत्री ज्योतिः परं पुत्र इहाप्यमुत्र ॥१८७॥

स पुण्यकृत्तमो लोके यस्य पुत्राश्चिरायुषः ॥
विशेषेण हि धर्मज्ञाः स परं ब्रह्म विन्दति ॥ १८८ ॥

पुत्रेण प्राप्यते स्वर्गो जातमात्रेण तु ध्रुवम् ॥
तस्मादिच्छन्ति सर्वे हि पशवोऽपि वयांसि च ॥ १८९ ॥

---

१. B. C. D. E. and F. read यदिदं भवनं for इयमाभवनं. २. B. C. D. E. F. read सैषापरस्य विधारिणी for सा चैव पतितारिणी. ३. A. reads ब्रह्मलोकताम् ; while B. reads ब्रह्मणः परम्. ४. B. D. E. and F. read °आमुत्रिकं for °आमुष्मिकं. ५. In this line the reading differs much, as— A. reads स वै लोको विशांवरः and C. substitutes ते वै लोकेश्वराद्वराः But while B. reads पुत्रमिच्छंति ते वै लोकेश्वराद्वराः and F. reads पुत्रानिच्छन्तु ते वै लोकवरान्वराः. ६. B. C. D. E. read रूपं for रूप्यं. ७. A. B. E. and F. read जाया for यज्वा. ८. B. D. and E. read धर्मस्वात् for धर्मज्ञाः; while F. reads धर्मज्ञ. ९. B. D. E. and F. read निश्चितं for ध्रुवम्.

जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥
पुत्रस्यापि च पुत्रत्वं यत्त्राति नरकार्णवात् ॥ १९० ॥

यः पिता स तु पुत्रः स्यात् जायैव हि जनन्यपि ॥
न पृथक्त्वं विदुस्तज्ज्ञास्तयोश्चाऽपरयोरपि ॥ १९१ ॥

अयं हि पन्थाः पुरुषस्य तस्य ध्रुवं भवेत्पुत्रजन्मेह यस्य ॥
तद्वीक्ष्य चोर्ध्वं पशवो वयांसि पुत्रार्थिनो मातरमारुहन्ति ॥ १९२ ।

जनिष्यमाणानिच्छन्ति पितरः स्वकुले सुतान् ॥
कश्चिद्गत्वा गयायां नोऽवश्यं पिण्डान् प्रदास्यति ॥ १९३ ॥

यक्ष्यत्यन्योऽश्वमेधेन नीलं मोक्ष्यति गोवृषम् ॥
एष्टव्यं पितृभिः सर्वं पुत्रेभ्यः सकलं फलम् ॥१९४॥

शुद्धः शौर्यैकचित्तो वा प्राणान्मोक्ष्यति संयुगे ॥
दानदो वा कुरुक्षेत्रे ज्ञानी वाथ भविष्यति ॥ १९५ ॥

जीवतो वाक्यकरणात् क्षयाहे भूरि भोजनात् ॥
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥ १९६ ॥

पुच्छे शिरसि यः शुक्लः शुक्लायाल्लोहितं वपुः ॥
देवाद्यभीष्टो नीलोऽयमुत्सृष्टः पावनो वृषः ॥ १९७ ॥

रक्तो वा यदि वा शुक्लः सुविषाणः शुभेक्षणः ॥
यो न हीनातिरिक्ताङ्गस्तं गोसहितमुत्सृजेत् ॥ १९८ ॥

दुहितापि तथा साध्वी श्वशुरयोरुपास्तिकृत् ॥
पतिव्रता च धर्मज्ञा पित्रोर्द्युगतिकृद्भवेत् ॥ १९९ ॥

यः पिता स च वै पुत्रस्तत्समा दुहिताऽपि च ॥
पुत्रश्च दुहिता चोभौ पितुः सन्तानकारकौ ॥ २०० ॥

तत्सुतः पावयेद्वंशान्वीन्वै मातामहादिकान् ॥
दौहित्रः पुत्रवत्स्वर्गे उक्तौ शास्त्रैश्चतौ समौ ॥ २०१ ॥

---

१. B. D. E. read त्रायते for यत्त्राति. २. B. reads वंशे and C. D. E. वंश्यः for ऽवश्यं. ३. C. reads यष्टव्यं for एष्टव्यं. ४. C. substitutes वेदाद्यभीष्टो for देवाद्यभीष्टो. ५. B. D. E. and F. read

रक्तःकृष्णोऽपि तच्छुक्लः भूविषाणः शुभेक्षणः। .

६. A. reads °शा भवेत् for °कृत् भवेत्. ७. A. reads तन्माता for तत्समा. ८. A. B. and F. read स्वर्ग्यः for स्वर्गे.

आधानादिकसंस्काराः प्रोक्ता ये वै द्विजन्मनः ॥
कर्तव्याश्च स्वशाखोक्ताः केचित्कुलक्रमेण च ॥ २०२ ॥
चत्वारिंशच्च ते सर्वे निषेकाद्याः प्रकीर्तिताः ॥
मखदीक्षा च विविधा तथैवान्त्येष्टिकर्म च ॥ २०३ ॥
कुलाचारोऽपि कर्तव्य इति शास्त्रविदो विदुः ॥
देशाचारस्तथा धर्म इति प्राह पराशरः ॥ २०४ ॥
अयं[1] हि परमो धर्मः सर्वेषामिति निश्चयः ॥
हीनाचारश्च पुरुषो निन्द्यो भवति सर्वशः[2] ॥ २०५ ॥
क्लेशभागी च सततं व्याधितोऽल्पायुरेव च ॥
आचारे[3] व्यवहारे च दुराचारो विपर्ययः ॥ २०६ ॥
नृणामान्तरतो धर्मः स्याद्धर्मो विपर्ययात् ॥
तस्माद्राद्ये ऽनुवर्तेत व्यत्ययं तु[4] विवर्जयेत् ॥ २०७ ॥

आचारवन्तो मनुजा लभन्ते
आयुश्च वित्तं च सुतांश्च सौख्यम् ॥
धर्मं तथा शाश्वतमीशलोकम्
अत्रापि विद्वज्जनपूज्यतां च ॥ २०८ ॥

वेदाः सहाङ्गैस्सपुराणविद्याः
शास्त्राणि वेद्यानि[5] च तद्विहीनम् ॥
कुर्युर्न[6] वै तान्यपि संस्मृतानि
नरं पवित्रं प्रवदन्ति वेदाः ॥ २०९ ॥

येऽधीतवेदाः क्रियया विहीनाः
जीवन्ति वेदैर्मनुजाधमास्तान् ॥
वेदास्त्यजेयुर्निधनस्य काले
नीडं शकुन्ता इव जातपक्षाः ॥ २१० ॥

---

१. All except A. read आचारः for अयं हि. २. D. E. and F. read प्रेत्य चेह विनश्यति for निन्द्यो भवति सर्वशः. ३. B. and F. read this line thus:—

आचारो व्यवहारश्च दुराचारो विपर्ययः ।

and C. reads—

आचारं व्यवहारेश्च दुराचारविपर्ययः ।;

while F. reads simply अनाचारो for दुराचारो.

४. अु° for तु. ५. A. B. D. E. and F. substitute सर्वाणि for वेद्यानि. ६. Except A. all read thus—कुर्युः स्वधीतान्यपि न स्मृतानि for कुर्युर्न वै तान्यपि संस्मृतानि.

आचारहीननरदेहगताश्च वेदाः
शोचन्ति किं नु कृतवन्त इतिस्म चित्ते ॥
यन्नोऽभवद्वपुषि चास्य[1] शुभप्रहीणे
स्थानं तदत्र भगवान् विधिरेव शोच्यः[2] ॥ २११ ॥

कर्तव्यं यत्नतः शौचं शौचमूला द्विजातयः[3] ॥
शौचाचारविहीनानां सर्वाः स्युर्निष्फलाः क्रियाः ॥ २१२ ॥

तत्सद्भिर्द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा ॥
विण्मूत्रशोधनं बाह्यं चित्तशुद्धिस्तथाऽऽन्तरम् ॥ २१३ ॥

मृद्भिरद्भिरनालस्यं तत्कर्तव्यं द्विजातिभिः ॥
भावशुद्धिः परं शौचमाहुराभ्यन्तरं बुधाः ॥ २१४ ॥

गन्धलेपापहं बाह्यं शौचमाहुर्मनीषिणः ॥
यस्य पुंसस्तु तच्छौचं शौचैस्तस्य किमन्यकैः ॥ २१५ ॥

वाङ्-मनो-जलशौचानि सदा येषां द्विजन्मनाम् ॥
त्रिभिः शौचैरुपेतो यः स स्वर्ग्यो नात्र संशयः ॥ २१६ ॥

स्त्रियं रिरंसुर्द्रविणं जिहीर्षुर्वधं चिकीर्षुर्मनुजः परस्य ॥
विवक्षुरत्यन्तमवाच्यवाचं[4] कथं स शुद्धिं समुपैति शौचात् ?॥२१७॥

किं निष्कामस्य नारीभिः किं गतासोश्च भेषजैः[5] ॥
जितेंद्रियस्य किं शौचैर्निष्फलं[6] मूर्खदानवत्[7] ॥ २१८ ॥

न गतिर्मूर्खदानेन न तारोऽम्बुनि चाश्मनः ॥
तस्मात्तस्य न दातव्यं सह दात्रा स मज्जति ॥ २१९ ॥

यथा भस्म तथा मूर्खो विद्वान्प्रज्वलिताग्निवत् ॥
होतव्यं च समिद्धेऽग्नौ जुहुयात् को नु भस्मनि ॥ २२० ॥

यथा शूद्रस्तथा मूर्खो शूद्रश्च भस्मवत्तथा ॥
शूद्रेण सह संवासं मूर्खे दानं विवर्जयेत् ॥ २२१ ॥

ग्रहीता यो न चेद्विद्वान् तं दाता रोहिको यथा ॥
आत्मानं तारयेत्तं च [illegible]दीं वैतरणीं द्विजः ॥ २२२ ॥

---

१. B. D. E. and F. read पुण्य° for चास्य. २. A. reads कर्ता for शोच्यः. ३. D. and E. read द्विजाः स्मृताः for द्विजातयः ४. A. reads °वाच्यं for °वाचं. ५. A. and F. read सद्द्विजैः for भेषजैः. ६. B. and F. read निष्फलैः for निष्फलं. ७. Except A. and C. all read मूर्खवत्तवत्.

यो मूर्खो विशदाचारः षट्कर्माभिरतः सदा ॥
स नयन् स्वर्गमात्मानं वृद्धांश्चैव न पीडयेत् ॥ २२३ ॥
न विद्या[1] न तपो यस्य ह्यादत्ते च प्रतिग्रहम् ॥
निपातयन्[2] स दातारमात्मानमप्यधो नयेत् ॥ २२४ ॥
हेम-भूमि-तिलान् गाश्च अविद्वानाददाति यः ॥
भस्मीभवति सोऽह्नाय दातुःस्यान्निष्फलं च तत् ॥ २२५ ॥
तस्मादविद्वान्नादद्यादल्पशोऽपि प्रतिग्रहम् ॥
विषतत्वापरिज्ञानो विषेणाल्पेन नश्यति ॥ २२६ ॥
सर्वं गवादिकं दानं पात्रे दातव्यमर्चितम् ॥
विद्वद्भिर्न त्वपात्रे तु गतिमिच्छद्भिरात्मनः ॥ २२७ ॥
हस्ति-कृष्णाजिनाद्यास्तु गर्हिता ये प्रतिग्रहाः ॥
सद्विप्रास्तान्न गृह्णीयुर्गृह्णानास्तु पतन्ति ते ॥ २२८ ॥
कृष्णाजिनप्रतिग्राही हयानां शुक्तविक्रयी ॥
नवश्राद्धस्य यो भोक्ता न भूयः पुरुषो भवेत् ॥ २२९ ॥
यो गृह्णाति कुरुक्षेत्रे ग्रामं[3] गां द्विमुखीं गजम्[4] ॥
नवश्राद्धान्नभुग्यश्च वर्ज्या निर्माल्यवह्निजाः ॥ २३० ॥
एते यान्त्यन्धतामिस्रं यावन्मनुसहस्रकम् ॥ २३१ ॥
विष्णोश्च[5] वह्नेश्च रवेश्च जाता पृथ्वी च राज्ञश्च मुनीश गौश्च ॥
काले सुपात्रे विधिना प्रदत्ताः प्राप्नोति लोकत्रयमेतदुक्तम् ॥२३२॥
वेदविद्वान्सदाचारः सदा वसति सन्निधौ ॥
भोजने चैव दाने च वर्जनीयो न सत्तमैः ॥ २३३ ॥
अत्यासन्नानधीयानान्ब्राह्मणान्यो व्यतिक्रमेत् ॥
भोजने चैव दाने च हिनस्त्यासप्तमं कुलम् ॥ २३४ ॥
अनृचोऽपि निराचाराः प्रतिवास[6]निवासिनः ॥
अन्यत्र हव्य-कव्याभ्यां भोज्याःस्युरुत्सवादिषु ॥ २३५ ॥

---

१. C. only reads विद्यते for विद्या न. २. This whole line is read in B. C. D. E. and F. thus—आददानस्त्वनाचारो दातारमपि वर्जयेत्. ३. A. reads मार्गं for ग्रामं. ४. B. E. and F. read हयम् instead of गजम्. ५. A. reads this verse as—

पृथ्वी च वेदाश्च मुनीश गौश्च कालेच पात्रे विधिना प्रदत्ताः ।
नरेण येनेह शुभेप्सुना चेत् स प्राप्नोति लोकत्रयमेतदुक्तम् ॥.

६. B. D. E. and F. read °वेश्म° for °वास°.

प्रोक्तप्रतिग्रहाभावे प्राप्तायां बृहदापदि ॥
विप्रोऽश्नन्प्रतिगृह्णन्वा यतस्ततोऽपि नाघभाक् ॥ २३६ ॥
गुर्वादिपोष्यवर्गार्थं देवाद्यर्थं च सर्वतः ॥
प्रत्याददद्याद्द्विजाग्र्यस्तु भृत्यर्थमात्मनोऽपि च ॥ २३७ ॥
दधि-क्षीरा-ऽऽज्य-मांसानि गन्ध-पुष्पा-ऽम्बु-मत्स्यकान् ॥
शय्या-ऽऽसनाशनं शाकं प्रत्याख्येयं न कर्हिचित् ॥ २३८ ॥
अपि दुष्कृतकर्मभ्यः समादद्यादयाचितम् ॥
पतितादिस्तदन्येभ्यः प्रतिग्राह्यमसंशयम् ॥ २३९ ॥
शक्तः प्रतिग्रहीतुं यो वेदवृत्तस्सु[1]संवृतम् ॥
लभ्य[2]मानं न गृह्णाति स्वर्गस्तस्याल्पकं[3] फलम् ॥ २४० ॥
प्रतिग्रहमृणं वापि याचितं यो न यच्छति ॥
त[4]त्कोटिगुणग्रस्तोऽसौ मृतो दासत्वमृच्छति ॥ २४१ ॥
दाता च न स्मरेद्दानं प्रतिग्राही न याचते ॥
उभौ तौ नरकं यातौ दाता चापि प्रतिग्रही ॥ २४२ ॥
अपात्रस्य हि यद्दत्तं दानं स्वल्पमपि द्विजाः ॥
ग्रहीता तत्क्षणाद्याति भस्मत्वं चाप्यवारितः[5] ॥ २४३ ॥
वदन्ति कवयः[6] केचिद्दान-प्रतिग्रहौप्रति ॥
प्र[7]त्यक्षलिङ्गमेवेह दातृ-याचकयोरतः ॥ २४४ ॥
दातृहस्तो भवेदूर्ध्वं ग्रहीतुश्च भवेदधः[8] ॥
दातृ-याचकयोर्भेदो हस्ताभ्यामेव सूचितः ॥ २४५ ॥
सून्यादीनां चतुर्णां च तथा निन्दितभूपतेः ॥
न विद्वान् प्रतिगृह्णीयात्प्रतिगृह्णन्व्रजत्यधः ॥ २४६ ॥
दुष्टा दशगुणं पूर्वात् सूनि-चक्र्यथ मद्यकृत् ॥
वेश्या निषिद्धनृपतिः प्रतिग्रहे परः क्रमात् ॥ २४७ ॥

---

१. B. D. E. and F. read तु संवृतम् for सु संवृतम्. २. B. D. E. and F. read दीयमानं for लभ्यमानं. ३. A. substitutes सुनिश्चितम् for अल्पकं फलम्. ४. Except E. and F. read स कोटिगुणितग्रस्तो for तत्कोटिगुणग्रस्तोऽसौ. ५. E. and F. read अविचारतः for चाप्यवारितः. ६. A. E. and F. read मुनयः for कवयः. ७. B. reads this line thus—

प्रत्यक्षलिङ्गमेवैकं स्याद्दातृ-याचकयोरिह ।.

८. A. and C. read अधस्तिष्ठेत्प्रतिगृही for ग्रहीतुश्च भवेदधः.

परपाकं वृथा मांसं देवानामपि दूषितम् ॥
अनुपाकृतमांसं च नाद्यं च लशुनादिकम् ॥ २४८ ॥
न भोक्तव्यमभोज्यान्नं कन्द-मूलादिकं च यत् ॥
न पातव्यमपेयं च द्विजैरत्यन्तगर्हितम् ॥ २४९ ॥
सत्यं युक्तं सदा ब्रूयाच्छनैर्धर्मं समाचरेत् ॥
यमान्सनियमान्कुर्याद्गार्हस्थ्यं व्रतमाचरन् ॥ २५० ॥
मातृ-पितॄनुपाध्यायान् गुरून्विप्रान्सदाऽर्चयेत् ॥
एतांच्छ्रेष्ठांस्तथा चान्यान्नित्यं विप्राभिवन्दनम् ॥ २५१ ॥
दमं सेवेत सततं दानं दद्याच्च[1] सर्वदा ॥
दयां च सर्वदा[2] कुर्यात्तद्विना नरकाश्रयः ॥ २५२ ॥
दाम्यन्त[3] सर्वदाऽऽत्मानं मनो दाम्यं सदा द्विजैः ॥
दयध्वमिति चैवैषां श्रुतिर्वाजसनेयिकी ॥ २५३ ॥
यन्विदं कारकं कुर्यात्स्तनयित्नुर्ध्वनिं दिवि ॥
ददेद्वेति[4] दमं दानं दयामिति च शिक्षयेत्[5] ॥ २५४ ॥
रसा रसैः समा ग्राह्या देया अपि च नान्यथा ॥
न रसैर्लवणं ग्राह्यं समतो हीनतोऽपि वा ॥ २५५ ॥
तिला अपि समा देया धान्यैरन्यैर्द्विजातिभिः ॥
प्रपीड्या[6] नैव यंत्रेषु ब्रुयुरेतन्मनीषिणः ॥ २५६ ॥
तिलवत्[7]सर्ववस्तूनि सस्नेहानि द्विजातिभिः ॥
अप्रपीड्यानि यंत्रेषु ब्रुयुरेतन्मनीषिणः ॥ २५७ ॥
विक्रयव्यपदेशेन दुग्ध-दध्यादिसर्पिषाम् ॥
शुश्रूष्यान्न तिरस्कुर्यादुपास्यान्नावधीरयेत् ॥ २५८ ॥

---

१. B. D. E. and F. read शक्त्या च instead of दद्याच्च. २. B. D. E. and F. omit सर्वदा. and read जंतुषु In its place. ३. in B. E. and F. the reading of this whole line is thus—

सद्विजाः सर्वदात्मानं दाम्यदत्तं सदा जनाः ।,

and D.

सद्विजानां च सन्मानं दानं दत्तं सदाजनाः ।.

४. A. reads दद्यात् for ददेत्. ५. A. reads रक्षयन्. ६. A. and F. read this whole line, as—

न ते यंत्रेण निष्पीड्याः पातयन्ति निपीडिताः ।.

७. This verse is omitted by all except A.

लोभात्कुर्याद्द्विजन्मा यः स तु शूद्रसमक्रयहात् ॥
न निन्द्यांश्च समभ्यर्च्यांश्च विक्रीणीत गर्हितान् ॥ २५९ ॥

अदेयानि न वै दद्यादत्याज्यानि न वै त्यजेत् ॥
अभाष्यांश्चैव भाषेच्च हीनाङ्गाद्यांश्च न क्षिपेत् ॥ २६० ॥

न संवदेच्च पित्राद्यैः पतिताद्यैर्न संविशेत्[1] ॥
न मतिं नीचवर्णाय दद्यादुच्छिष्टमेव च ॥ २६१ ॥

मतिं शूद्रस्य यो दद्याद्यश्चैनं पर्युपासते[2] ॥
न किञ्चित्तस्य चाख्येयं व्रतादि नियमादिकम् ॥ २६२ ॥

आचक्षाणस्तु तद्धर्मं नरकाग्नौ प्रपच्यते ॥
नाद्यादन्नं निषिद्धस्थं स्वप्याद्[3]वा नार्द्धरात्रिषु ॥ २६३ ॥

वेदविद्यावितानानि[4] विक्रीणीत न कर्हिचित् ॥
नापत्यानि रसाद्यानि[5] भूवृत्तिं चान्वये सति ॥ २६४ ॥

नापः पिबेत् स्वपाणिभ्यां न च कण्डूतिकृद्भवेत्[6] ॥
विदिक्-प्रत्यगुदग्रस्तु शयीताह्नि न सन्ध्ययोः ॥ २६५ ॥

पादुकादि न पालाशं न वृक्षादिनिकृन्तनम् ॥
नोत्सृज्यं[7] ष्ठीवनाद्यं च कदाचिद्वै गवादिषु ॥ २६६ ॥

पद्भ्यां स्पृश्यं गवाद्यं नो नोच्छिष्टं न च तद्गतिः ॥
न लंघ्यं वत्स-तन्त्र्यादि वाय्वग्न्यो[8]र्नान्तरा गतिः ॥ २६७ ॥

न द्वयोर्विप्रयोर्नाम्न्योः सौरभेय्योः पति-स्त्रियोः ॥
विप्राग्न्योर्विप्रपिण्डानां नोग्रोक्ष्णोर्विष्णु-तार्क्ष्ययोः ॥ २६८ ॥

सौरभेयोर्जलाग्न्योश्च माहेयी-जलयोरपि ॥
भानु-व्योमादिकानां तु न कुर्यादन्तरा गतिम् ॥ २६९ ॥

---

१. B. reads संवदेत and F. संश्रयेत् for संविशेत्. २. B. D. E. F. read नरकं प्रतिपद्यते for यश्चैनं पर्युपासते ३. A. B. D. E. F. read सन्ध्या-शय्यार्धरात्रिषु for स्वप्याद्वा नार्धरात्रिषु. ४. A. reads निपानानि; while B. D. E. and F. read न यानानि for °वितानानि. ५. D. E. and F. read समघ्राणि for रसाद्यानि. ६. A. reads कण्डूयति क्वचित् for कण्डूतिकृद्भवेत्; while F. reads कण्डूप्रतिकृद्भवेत्. ७. B. D. E. and F. substitute नोत्सार्यं for नोत्सृज्यं. ८. B. D. E. read वा स्वर्गौ for वाय्वग्न्योः.

भोजनादिषु नासक्तां पश्येन्न विगतांशुकाम् ॥
न गच्छेत्स्त्रीं रजोयुक्तां न चाभीयात्तया सह ॥
नगच्छेत्स्त्रीं रोगयुक्तां प्रसुप्यान्न तया सह ॥ २७० ॥

उत्तरीयं विना नैव ॰. नग्नो ऽध्रः शयीत च ॥
न गेहे चैव मार्गादौ न निषिद्धककुब्मुखः ॥ २७१ ॥

नोपगन्तुं सुरार्चादि न च विष्ठागृहान्तिके ॥
अतिकालातियाने च शुभमिच्छन्विवर्जयेत् ॥ २७२ ॥

ज्येष्ठेन्द्रचाप-भद्राद्या मूलनाम्ना न निर्दिशेत् ॥
इन्द्रचापं धयन्तीं गौनं ख्यातव्ये परस्य ते ॥ २७३ ॥

वर्जयेद्धावनं चैव पादयोः कांस्यभाजने ॥
पैशुन्यं मर्मभेदं च न वदेन्म्लेच्छभाषितम् ॥ २७४ ॥

प्राकृतं च कुशास्त्राणि पापण्डं हैतुकानि च ॥
न श्रोतव्यानि विप्रेण यातनाकारणानि च ॥ २७५ ॥

न करं मस्तके दद्यान्मस्तकं न करे तथा ॥
न जानुनोः शिरो धार्यं नाऽप्रावृतशिरा भ्रमेत् ॥ २७६ ॥

वैणाश्च वन्ध्याश्च कदर्यचोराः
क्लीबाभिशस्ता गणिका तु या च ॥
यो वृद्धजीवी गणदीक्षका ये
तेषां न भोज्यं ह्यशनं द्विजातैः ॥ २७७ ॥

क्रूरातुरा वृद्ध-चिकित्सकाश्च
या पुंश्चली यौ च विरोधि-शत्रू ॥
व्रात्योग्रमत्ता अबलाजिताश्च
अग्राह्यमेषामशनं द्विजस्य ॥ २७८ ॥

---

१. A. reads भोजनाशिपानासक्तां for भोजनादिषु नासक्तां. २. B. D. E. read जनैर्युक्तां for रजोयुक्तां. ३. A. omits this line; while F. reads नावहेचैव मार्गादौ for न गेहे चैव मार्गादौ. ४. A. reads अतिकालानि यामेन. for अतिकालातियाने च. ५. B. D. E. F. substitute °हद्रा° for °भद्रा°. ६. D. and E. read नराः for °तुराः. ७. A. D. and F. read कुद्ध° for वृद्ध°. ८. A. D. E. and F. substitute स्यामाद्यम् for अमाद्यम्.

ये दाम्भिका ये च सुवर्णकारा
उच्छिष्टभोजी पतितश्च यश्च ॥
ये पुत्रभार्या[1] बहुयाजका ये
विप्रेण चैषां न हि भोज्यमन्नम्[2] ॥ २७९ ॥

ये सोम-शस्त्रास्त्र-कृताम्बु-तक्र-
क्षीराज्य-मांसं लवणाजिनानि ॥
क्षौमानि लाक्षा[3] च तिलान्फलानि
विक्रेयुरेषामशनं न भोज्यम्[4] ॥ २८० ॥

जीवन्ति वृत्या-रसदानपानां[5]
कर्मारका येऽपि च तन्तुवायाः[6] ॥
राजा नृशंसो रजकः कृतघ्नो
भोज्याशना नैव विहिंसकाश्च ॥ २८१ ॥

ये चैलधावाश्च[7] सुराकृतो ये
पैशून्यवाचो ह्यनृतंवदाश्च[8] ॥
ये बन्दिनो येऽपि च चाक्रिकाश्च
विप्रस्य[9] चैतेऽपि न भोज्यसस्याः ॥ २८२ ॥

मध्वासव-मधूच्छिष्ट-दधि-क्षीर-रसौ दनान् ॥
मनुष्योपल-धूपांश्च कुश-मृत्पुष्प-वीरुधः ॥ २८३ ॥

कौशेय-केश-कुतपान्नीरं विषरसांस्तथा ॥
शाकैकशफ[10]-पिण्याक-गन्धानौषधिमूलकाः ॥ २८४ ॥

विक्रीणन्ति य एतानि वस्तूनि मनुजाधमाः ॥
तेषामन्नं न भोक्तव्यं तथोपपतिवेश्मनः ॥ २८५ ॥

---

१. B. D. and E. substitute विप्र° for पुत्र°. २. A. reads this, thus—विप्रस्य चैतेऽपि न भोज्यधान्याः; while B. D. and E. read विप्राश्च नैते ऽपि न भोज्यधान्याः. ३. B. D. E. and F. read भिक्षा instead of लाक्षा. ४. In A. the reading of this line is thus – एषां न विक्रीतकृतस्नमाद्यम्. ५. A. reads रसमायया वा for रसदानपानां. ६. B. and F. read तन्तुवायाः for तन्तुवायाः. ७. B. and E. read तैलधाराः for चैलधावाः. ८. B. D. E. and F. read वितथं° for ह्यनृतं°. ९. Only F. reads विप्रेण for विप्रस्य. १०. E. and F. read °शिफ° for °शफ°.

योऽपचस्य कदर्यस्य भुञ्जीतान्नं द्विजाधमः ॥
तत्क्षणाच्छूद्रवत्स स्यान्मृतो विट्शूकरो भवेत् ॥ २८६ ॥

योऽन्नं वार्द्धुषिकस्याद्यादजापालादिकस्य च ॥
अन्यस्यापि निषिद्धस्य सोऽनन्तं नरकं व्रजेत् ॥ २८७ ॥

पाणिगृहीतभार्यायां सत्यां यस्तु नराधमः ॥
शूद्रीहस्तेन भुञ्जीत पतितः स सदैव तु ॥ २८८ ॥

त्यक्ता येनोढभार्या तु त्यक्तः स पितृ-दैवतैः ॥
त्यक्तो देवैः स पापीयांच्छूद्रादप्यधमः स्मृतः ॥ २८९ ॥

यः शूद्रीं भजते नित्यं शूद्री तु गृहमेधिनी ॥
वर्जितः पितृदेवैस्तु रौरवं यात्यसौ द्विजः ॥ २९० ॥

यः शूद्र्यां च स्वयं जातो ह्यन्यस्यां सोऽपि वै पुनः ॥
अन्यस्यां च पुनः सोऽपि किमस्य प्रेत्य चिन्तनम् ॥ २९१ ॥

सर्वान् भुञ्जीत नरकान्विंशतिं त्वेकवर्जितान् ॥
रौरवादीन्क्रमेणैव पापिष्ठो यावदम्बरम् ॥ २९२ ॥

हेमन्तशिशिरर्त्वोश्च प्रोष्ठपद्याः परस्य च ॥
पञ्चस्वपरपक्षेषु कार्याः साग्निभिरष्टकाः ॥ २९३ ॥

हेमन्ते शिशिरे चैका एकैकाथ तथा परा ॥
प्रोष्ठपद्यां द्विजास्तिस्रो ह्यष्टका इति केचन ॥ २९४ ॥

दर्शश्च पौर्णमासश्च तथैवाऽऽग्रयणद्वयम् ॥
चातुर्मास्यव्रतान्येव कार्याणि साग्निकैर्द्विजैः ॥ २९५ ॥

अनूचानकृतं कुर्युः सदैव व्रतचारिणः ॥
अनूचानकुले जाताः सदैव व्रतचारिणः ॥
अग्निहोत्ररता नित्यं माता-पित्रादिपूजकाः ॥ २९६ ॥

प्रतिग्रहनिवृत्ताश्च जप-होमपरायणाः ॥
वृत्तवन्तश्च ये विप्राः स्नातकास्ते प्रकीर्तिताः ॥ २९७ ॥

---

१. B. D. E. and F. read ऽपञ्चस्य for ऽपचस्य. २. B. D. and E. subsitute ह्यन्ते for ऽनन्तं. ३. B. E. and F. read वसेत for व्रजेत्. ४. A. reads स्यात्तदैव; while B. F. read तथैव. for सदैव. ५. Only F. reads आसकैः for साग्निकैः.

सङ्क्रान्तिरर्कवारश्च व्यतीपातो युगादयः ॥
शुभर्क्ष-दिन-योगेषु[1] कार्याः साग्निभिरष्टकाः ॥ २९८ ॥
न शूद्राद्भिक्षितेनैतत्कर्तव्यं कर्म सद्द्विजैः ॥
चण्डालत्वमवाप्नोति यज्ञार्थं शूद्रयाचकः ॥ २९९ ॥
लब्धं यज्ञाय यो विप्रो न दद्याद्यज्ञकर्मणि ॥
स वायसोऽथ वा गृध्रः[2] काको वाऽथ प्रजायते ॥ ३०० ॥
शिलोञ्छवृत्तिर्विप्रः स्यादथ वैकाहिकाशनः ॥
त्र्यहाहिकाशनो वा[3] स्यात् कुम्भीकुशूलधान्यकः ॥ ३०१ ॥
पूर्वपूर्वतरः श्रेयान् तेषां साग्निः प्रकीर्तितः ॥
सोमपः स्यात् त्रिवर्षान्[4]स्तत्पूर्वकृतसमाशनः ॥ ३०२ ॥
सोमेष्टिं पशुयज्ञं च कुर्वीत प्रतिवासरम् ॥
इष्टिर्वैश्वानरी या तु कर्तव्यैतदसम्भवे ॥ ३०३ ॥
सत्यामर्थस्य सम्पत्तौ न कुर्याद्धीनदक्षिणम् ॥
तत्कृतं च भवेद्व्यर्थं प्राप्नुयात्पशुयोनिताम् ॥ ३०४ ॥
श्रद्धापूतं प्रदातव्यं पात्रे दानं समर्चितम् ॥
याचितेऽपि हि[5] दातव्यं पूतं च श्रद्धया धनम् ॥ ३०५ ॥
शूद्रान्नं ब्राह्मणोऽश्नन्वै मासं मासार्धमेव च ॥
तद्योनावेव जायेत सत्यमेतद्विदुर्बुधाः ॥ ३०६ ॥
आशूदरस्थशूद्रान्नो[6] मृतः श्वाचोपजायते ॥
द्वादशं दश वाष्टौ च गृध्र-शूकर-पुल्कसाः ॥ ३०७ ॥
उदरस्थितशूद्रान्नो ह्यधीयानोऽपि नित्यशः ॥
जुह्वन्वापि जपन्वापि गतिमूर्ध्वां न विन्दति ॥ ३०८ ॥
अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम् ॥
वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम् ॥ ३०९ ॥

---

१. F. reads °यामाश्च for °योगेषु. २. B. D. E. and F. read this whole line thus—

सभासः काको गृध्रो वा श्मशाने निर्जले भवेत् ।;

while A. substitutes भासोऽप्यथ वा for वायसोऽथ वा. ३. B. E. and F. read द्विघ्याहिकाशनो वा for त्र्यहाहिकाशनो वा and D. reads त्र्यहाहिकाशनो वा पि. ४. B. reads त्रिवर्षान्तः. ५. B. D. E. F. read—

याचितेनाऽपि दातव्यं श्रद्धापूत धनं नरैः ।.

६. मासाद्विप्रस्तु शूद्रान्नो is the reading in A.

आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते ॥
तस्मादामं च पक्वं च शूद्रस्य परिवर्जयेत् ॥ ३१० ॥
तस्माच्छूद्रं न भिक्षेरन्यज्ञार्थं सद्द्विजातयः ॥
स्मशानमेव यच्छूद्रस्तस्मात्तं परिवर्जयेत् ॥ ३११ ॥
कणानामथ वा भिक्षां कुर्याच्चेद्वृत्तिकर्शितः ॥
सच्छूद्राणां गृहे कुर्वन्न तत्पापेन लिप्यते ॥ ३१२ ॥
विशुद्धान्वयसञ्जातो निवृत्तो मांस-मद्यतः ॥
द्विजभक्तिर्वणिग्वृत्तिस्सच्छूद्रः सम्प्रकीर्तितः ॥ ३१३ ॥
उदक्यास्पृष्ट-सङ्घुष्टं वाङ्क्तिं वाप्युदक्यया ॥
श्वस्पृष्टं शकुनोत्सृष्टं प्रयत्नेन विवर्जयेत् ॥ ३१४ ॥
उच्छिष्टं च पदास्पृष्टं शुक्तं च पतितेक्षितम् ॥
पर्युषितं चिरस्थं च केश-कीटाद्युपाहतम् ॥ ३१५ ॥
पङ्क्त्युच्छिष्टं गवाघ्रातं प्रयत्नेन विवर्जयेत् ॥
नाश्नीरन्नेतदशनं शमिच्छन्तो द्विजातयः ॥ ३१६ ॥
शूद्राणामपि भोज्यान्नाःस्युःसीरि-नापितादयः ॥
सस्नेहमशनं भोज्यं चिरस्थमपि यद्भवेत् ॥ ३१७ ॥
अनाक्ता अपि भोज्याः स्युः सद्यःश्रितयवादयः ॥
गर्भिण्यवत्ससूतिक्या गवादेर्वर्जयेत्पयः ॥ ३१८ ॥
स्त्रीणामेकशफोष्ट्रीणां तथारण्यकमाविकम् ॥
प्रसूता ब्राह्मणी गौश्च महिष्योजास्तथैव च ॥ ३१९ ॥
दशरात्रेण शुद्ध्यन्ति भूमिसस्थं नवं पयः ॥
शाकादिकं च विट्जातं कवकानि च वर्जयेत् ॥ ३२० ॥
मांसं कीटादिभिर्जुष्टं प्रयत्नेन विवर्जयेत् ॥
ये वयः क्रव्यमश्नन्ति तथा विष्ठाभुजश्च ये ॥ ३२१ ॥

१. In B. D. E. this verse is omitted. २. In B. D. E. this line is altered as,—
कणभिक्षां निराकुर्याद्यदि कुर्याद्वृत्तिकः।
३. All except A. read उच्छिष्टं for °उत्सृष्टं. ४. C. reads सामिषं ते for शमिच्छन्तो. ५. B. C. E. and F. read कवचानि for कवकानि; while D. reads कवक्यानि. ६. The following 34 lines are omitted in A.
७. B. reads एवं ये कव्यमश्नंति for ये वयः क्रव्यमश्नन्ति.

शुक-टिट्टिभ-दात्यूहाः कपोत-पिक-सरिकाः ॥
सेधाद्यांश्च पञ्चनखान् सिंहाद्यान्मत्स्यकांस्तथा ॥ ३२२ ॥
धर्मशास्त्रोदितानद्यात्सर्वांकारांश्च[१] वर्जयेत् ॥
भक्ष्यं प्राणात्यये मांसं श्राद्ध-यज्ञोत्सवेष्वपि ॥ ३२३ ॥
कृत्वा च विधिवच्छ्राद्धं पश्चात्तत् स्वयमश्नुते ॥
नाद्यादविधिना मांसं मृत्युकालेऽपि धर्मवित् ॥ ३२४ ॥
यदैवाव्ययसम्पत्तिस्तदैवामन्त्रयेद् द्विजान् ॥
यत्र वा तत्र वा काले नाद्यं त्वविधिनाऽऽमिषम् ॥ ॥ ३२५ ॥
भक्षयन्नरके तिष्ठेत्पशुलोमसमाः समाः ॥
गृहस्थोऽपि हि यो नाद्यात्पिशितं तु कदा च न ॥३२६॥
स साक्षान्मुनिभिः प्रोक्तो योगो च ब्रह्मलोकगः ॥
न स्वयं च पशुं हन्याच्छ्राद्धकालेऽप्युपस्थिते ॥ ३२७ ॥
क्रव्यादैः सारमेयाद्यैर्हतं मृगादिमाहरेत् ॥
एतच्छाकवदिच्छन्ति पवित्रं द्विजसत्तमाः ॥ ३२८ ॥
समर्थो यस्य यस्तु[२] स्यादन्नं दत्वातु देहिनाम् ॥
सतामिति[३] निरातङ्को लोकदृष्टं निगद्यते ॥ ३२९ ॥
अन्नादेरपि भक्ष्यस्य स्नेह-मद्या-ऽऽमिषस्य च ॥
महाफला निवृत्तिःस्यात्प्रवृत्तिः स्वर्गसाधना ॥ ३३० ॥
एकोऽब्दशतमश्वेन यजेत पशुना द्विजः ॥
नान्यस्तु मांसमश्नाति स्वर्गप्राप्तिस्तयोः समा ॥ ३३१ ॥
हेमराजत-शङ्खानां पात्राणां वैणवस्य च ॥
चर्मणो रज्जुवस्त्राणां शुद्धिर्जायेत वारिणा ॥ ३३२ ॥
स्फयादीनां यज्ञपात्राणां धान्यानां वाससामपि ॥
अन्येषां चयरूपाणां प्रोक्षणात् शुद्धिरिष्यते ॥ ३३३ ॥
मार्जनान्मखपात्राणां हस्तेन मखकर्मणि ॥
अम्भोजपत्रकैरुष्णैः[४] शुद्ध्यतः कौशिकाविके ॥ ३३४ ॥

---

१. B. D. E. F. read सर्पाकारान् for सर्वाकारान्. २. B. D. E. F. read यस्य for यस्तु. ३. B. D. E. F. read this line in somewhat different way, as—

सतश्चित्ति निरातंको लोकदृष्टं निगद्यते ।.

४. D. reads अंभो गोमूत्रकैरुष्णैः for अंभोजपत्रकैरुष्णैः.

श्रीफलैरंशुपट्टानां सारिष्टैः कुतपस्य च ॥
मृण्मयानि पुनः पाकैः क्षौमाणि सितसर्षपैः ॥ ३३५ ॥
शुद्ध्येत कारुहस्तस्थं पण्यं यत्स्यात्प्रसारितम्[1] ॥
भैक्ष्यं च प्रोक्षणाच्छुद्धेत्स्पृष्टिः[2] साक्षान्न यस्य तु ॥ ३३६ ॥
स्त्रीमुखं च सदा शुद्धं भूमिर्लेपविवर्जिता ॥
अपरा दहनाद्यैश्च गृहं मार्जन-लेपनैः ॥ ३३७ ॥
द्रवद्रव्याणि[3] शुद्ध्यन्ति वह्निना प्लावनेन च ॥
क्रव्यादाद्यैर्हतं मांसं सर्वदा शुचि कीर्तितम् ॥३३८॥
तृप्तिकृत्सौरभेयाश्च स्वभावस्थं महीगतम् ॥
वदन्ति सूरयो वारि पवित्रमिव सर्वदा ॥ ३३९ ॥
गौर्वह्नि-भानवच्छाया जलमश्वं वसुन्धरा ॥
विप्रुषो मक्षिका वायुर्न दुष्यन्ति कदा च न ॥ ३४० ॥
शुचिः प्रस्थापने वत्सो अजाश्वौ मुखतस्तथा ॥
शुचिः प्रस्रवणे वत्सस्तथाजाश्वौ मुखे शुची ॥
न तु गौर्मुखतो मेध्या न च[4] गोमुखजा मलाः ॥ ३४१ ॥
सोम-भास्करयोर्भाभिः पथशुद्धिः प्रकीर्तिता ॥
ओष्ठाधरौ श्मश्रुकरौ सस्नेहौ भोजनादनु ॥ ३४२ ॥
नदुष्येच्छक्जिजः[5] प्राह बाल-वृद्धौस्त्रियोमुखम् ॥ ३४३ ॥
स्नात्वा पीत्वा च भुक्त्वा च सुप्त्वा तप्त्वा तथैव च ॥
गत्वा रथ्यादिके चैव शुद्धिराचमनेन तु ॥ ३४४ ॥
नापो मूत्र-पुरीषाभ्यां नाग्निर्दहति कर्मणा ॥
न स्त्री दुष्यति जारेण न विप्रो वेदकर्मणा ॥ ३४५ ॥

पद्माश्मलोहाः[6] फल-काष्ठ-चर्म-
भाण्डस्थतोयैः स्वयमेव शौचात् ॥
पुंसां निशास्वध्वनि चाऽसखानां ॥
स्त्रीणां च शुद्धिर्विहिता सदापि ॥ ३४६ ॥

---

१. A. reads प्रसावितम् for प्रसारितम. २. B. D. E. and F. read सस्पृष्टिः for स्पृष्टिः. ३. B. reads द्रव्याणि चैव for द्रवद्रव्याणि. ४. A. reads नरस्य मुखजा मलाः for न च गोमुखजा मलाः; while D. reads कस्यापि मुखजा मलाः. ५. A. reads न दुष्येच्च रजः for नदुष्येच्छक्जिजः while B. नदुष्टं ऋत्विजः प्राहस्त्रीवृद्धशिशुरोगिणाम्. ६. B. D. and E. read °लोह° for °लोहाः.

नभसः पंचदश्यां तु पंचम्यां च तथाऽपरे ॥
नभस्यस्य चतुर्दश्यामुपाकर्म यथोदितम् ॥ ३४७ ॥
तद्विदः केचिदिच्छन्ति नभसः श्रवणेन तु ॥
हस्तेन वाथ पञ्चम्यामध्यायानां वदन्ति तत् ॥ ३४८ ॥
यच्छाखयोपनीतः स्यात् ब्रह्मचारी द्विजोत्तमः ॥
तच्छाखाविहितं तस्य उपाकर्मादि कीर्त्यते ॥ ३४९ ॥
अतो वेदाधिकारित्वं वेदपाठस्य कीर्तने ॥
अनुपाकृतविप्रादेर्वेदाध्ययनदुष्कृतम् ॥ ३५० ॥
मुञ्जोपवीताजिनदण्डकाष्ठं त्याज्यं न तत्स्याद्व्रतचारिणापि ॥
अक्लिष्टमेको व्रतलोपपापं संस्कारमन्यं पुनरर्हयेयुः ॥ ३५१ ॥
ओषधीनां तु सद्भावे स्वशाखाविहितं तु यत्[1] ॥
रोहिण्यां च सहस्यस्य[2] उपाकर्माणि कुर्वते ॥ ३५२ ॥
न भवेदनुपाकर्मा ब्राह्मणः स्नातको व्रती ॥
कर्मच्युतो भवेद्व्रात्यो व्रात्यनिष्कृतिकृच्छुचिः ॥ ३५३ ॥
अथाऽतः स्यादनध्यायो मृतगुर्वादिषु त्र्यहम् ॥
मित्रकादिष्वहोरात्रम्[3]अधीत्यारण्यकः शुचिः ॥ ३५४ ॥
अष्टकासु तथाष्टम्यां पूर्णिमास्यां शशिक्षये ॥
मन्वादौ युगपक्षादावैन्द्रचापोच्छ्रयेषु च ॥ ३५५ ॥
चातुर्मास्ये द्वितीयायां चतुर्दश्यामहर्निशम् ॥
अहोरात्रे नृपे संस्थे व्रतिनि श्रोत्रिये यतौ ॥ ३५६ ॥
अत्र त्र्यहमनध्यायमिच्छन्ति चापरे द्वयम् ॥
अशौचे सूतकान्ते च यावच्छुद्धिस्तयोर्भवेत् ॥ ३५७ ॥
देशान्तरगते प्रेते श्रुतेऽपि स्यादहर्निशम् ॥
गुर्वादौ वा नृपत्यादौ इति वासिष्ठजोऽब्रवीत् ॥ ३५८ ॥
प्रतिगृह्य त्वहोरात्रं भुक्त्वा श्राद्धिकमेव च ॥
तज्ज्ञा ब्रूयुरनध्यायानृतुसन्धावहर्निशम् ॥ ३५९ ॥
पश्वाद्यैरन्तरायातैरहोरात्रं विदुर्बुधाः ॥
अकालगर्जिते वृष्टावग्निदाहे च सप्त सा ॥ ३६० ॥

---

१. B. D. E. and F. read हितम् for तु यत्. २. B. reads रोहिण्यां चैव हस्तस्य. ३. A. reads निर्वासादिष्वहोरात्रं. for मित्रकादिष्वहोरात्रं.

सामेषु[1] दुःखितानां च स्वरादीनां च निःस्वने ॥
पतित-श्याव[2]-शूद्रा-ऽन्त्यसन्निधाने न कीर्तयेत् ॥ ३६१ ॥
आत्मन्यशुचि देशे तु विद्युत्स्तनितरोहिते ॥
मृधे च कलहे देशविप्लवे लोकविग्रहे ॥ ३६२ ॥
पांशुवर्षेऽम्बुमध्ये च दिग्दाह-ग्रामदाहयोः ॥
नीहारे च भवेद्विद्वान्सन्ध्ययोरुभयोरपि ॥ ३६३ ॥
धावंश्च न पठेद्विद्वान्पूतिगन्धस्तथैव च ॥
विशिष्टे चागते गेहे गात्रासृङ्‌निर्गमे तथा ॥ ३६४ ॥
भोजनायोपविष्टस्य ह्युत्थितस्यार्द्रपाणिनः[3] ॥
वान्तेऽऽचान्ते तथाऽजीर्णे महारात्रेऽतिमारुते ॥ ३६५ ॥
रजोवृष्टौ च यानादौ आरूढस्य तथा द्विजः ॥
एतानन्यांश्च तत्कालाननध्यायान्विदुर्बुधाः ॥ ३६६ ॥
यो वर्जयेदनध्यायान्वेदाध्ययनकृद्द्विजः ॥ B
भवन्ति तस्य सफला वेदाः प्रोक्ताः फलप्रदाः ॥ ३६७ ॥
ये चैतेषु पठंत्यज्ञाः पाठलोभेन लोभिताः ॥
न शाश्वता भवेद्विद्या निष्फला चैव जायते ॥ ३६८ ॥
यः पठेद्विधिवद्वेदान् व्रती चेन्द्रियसंयमी ॥
ब्रम्हत्वमिह लोकेऽपि ऐश्वर्यसुखभाग्भवेत् ॥ ३६९ ॥
जनानां शृण्वतां मार्गे गच्छन्यस्तु पठेद्द्विजः ॥
निष्फलास्तस्य वेदाश्च वेदविप्लवदोषभाक् ॥ ३७० ॥
यः पठेत्स्वरहीनं तु लक्षणेन विवर्जितम् ॥
सङ्कीर्णग्राममध्ये तु स भवेद्वेदविप्लवी ॥ ३७१ ॥
ये स्वाध्यायमधीयीरन् अनध्यायेषु लोभतः ॥
वज्ररूपेण ते मन्त्रास्तेषां देहे व्यवस्थिताः ॥ ३७२ ॥
नाक्रामेद्गुरादीनां च्छायां च पयोधिताम् ॥
वान्त-ष्ठीवन-विण्मूत्र-कार्पासा-ऽस्थि-कपालिकाः ॥ ३७३ ॥
नावक्षेयाः कदापि स्युर्नृप-विप्रोरगादयः ॥
श्रियं कामं समाकांक्षेन्न स्पृशेन्मर्म कस्यचित् ॥ ३७४ ॥

१. A. reads साम्नां for सामेषु; while E. reads स्वनेषु. २. A. reads °श्राव° for °श्याव°. ३. A. reads आस्थितस्यार्धपाणिनः and E. reads उच्छिष्टस्यार्द्रपाणिनः.

नित्यं वर्तेत चाजस्रं धर्मार्थौ च सदाऽर्जयेत् ॥
न कश्चित्ताडयेद्धीमान्सुतं शिष्यं च ताडयेत् ॥
ताडयेन्नाभितोऽधस्तान्न तानन्यत्र ताडयेत् ॥ ३७५ ॥

आचारेण सदा विद्वान्वर्तेत यो जितेंद्रियः ॥
स ब्रम्हपरमाप्नोति वरेण्योऽमुत्र चेह च ॥ ३७६ ॥

आचारमूलं श्रुतिशास्त्रवित्तम्
आचारशाखाश्च तदुक्तकृत्यम् ॥
आचारपर्णानि हि तन्नियोग
आचारपुष्पाणि यशोधनानि ॥ ३७७ ॥

आचारवृक्षस्य फलं हि नाकस्तस्माच्च सुस्वादुरसश्च मुक्तिः ॥
तस्मादनन्तं फलदं तु तत्वमाचारमेवाश्रय यत्नपूर्वम् ॥ ३७८ ॥
ये धर्मशास्त्रे विहिताश्च केचिद्धर्मा द्विजाद्योरपि ते च सर्वे ॥
यत्नेन कार्याः पितृ-देवभक्तैः श्राद्धानि कार्याण्यथ तानि वक्ष्ये॥३७९॥
यत्नेन धर्मो गृहमेधिविप्रैः प्रीतेन वाचा वपुषा च कार्यः ॥
आयुःप्रजा श्रीर्भुवि पूजितत्वं तस्माल्लभन्ते दिवि देवभोगान्॥३८०॥

इति श्रीबृहत्पराशरीये धर्मशास्त्रे सुव्रतप्रोक्तायां
धर्मसंहितायां षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

बृहत्पराशरसंहिता ।

सप्तमोऽध्यायः ।

श्राद्धं वृद्धावचन्द्रेभच्छाया-ग्रहण-सङ्क्रमे ॥
व्यतीपात[1]-विषुवत्कृष्णपक्ष-पात्रार्थलब्धिषु ॥ १ ॥

अष्टका ह्ययने द्वे च श्राद्धम्प्रति यदा रुचिः ॥
पुण्यः श्राद्धस्य कालोऽयमृषिभिः परिकीर्तितः ॥ २ ॥

युगादिषु च कर्तव्यं मन्वन्तरादिकेऽपि च ॥
श्राद्धकालो ह्ययं प्रोक्तो मन्वाद्यैर्धर्मकर्तृभिः[2] ॥ ३ ॥

नवान्ने नवतोये च नवच्छन्ने तथा गृहे ॥
नावेक्षवेषु चेहन्ते पितरो हिं मघास्विव ॥ ४ ॥

काणः पौनर्भवो रोगी पिशुनो वृद्धिजीवकः
कृतघ्नो मत्सरी क्रूरो मित्रध्रुक् कुनखी गदी ॥ ५ ॥

विद्धप्रजननःश्वित्रि-श्यावदन्तावकीर्णिनः ॥
हीनाङ्गश्चातिरिक्ताङ्गो विक्लवः परनिन्दकः[3] ॥ ६ ॥

क्लीबा-ऽभिशस्त-वाग्दुष्ट-भृतका[4]ध्यापकास्तथा ॥
कन्यादूषी वणिग्वृत्तिर्विनाग्निः सोमविक्रयी ॥ ७ ॥

भार्याजितोऽनपत्यश्च कुण्डाशी कुण्डगोलकः ॥
पित्रादित्यागकृत्स्तेनो वृषलीपति-तर्जकौ[5] ॥ ८ ॥

अनुक्तवृत्तिस्त्व[6]ज्ञातः परपूर्वापतिस्तथा ॥
अजापालो माहिषिकः कर्मदुष्टाश्च निन्दिताः ॥ ९ ॥

यो ऽसत्प्रतिग्रहग्राही यश्च नित्यं प्रतिग्रही ॥
ग्रहसूचक-दूतौ च पितृश्राद्धेषु वर्जिताः ॥ १० ॥

---

१. F. reads ह्युत्पात° for व्यतीपात°. २. A. reads °वक्तृभिः for °कर्तृभिः. ३. A. reads विप्लवः परिविन्दकः for विक्लवः परनिन्दकः. ४. A. reads °काध्यापिताः for °काध्यापकाः. ५. This whole verse is omitted in E. ६. A. reads °स्तस्त्वातः for °स्त्वज्ञातः.

ऐकादशाहे भुञ्जन्तः शूद्रान्नरससंयुताः ॥
गुरुतल्पगो ब्रम्हघ्नो यस्यचोपपतिर्गृहे ॥ ११ ॥
प्रेतस्पृक् तैलनिर्णेक्ता बहुयाजक-याचकौ ॥
बक-काक-बिडाला-ऽश्व-शूद्रवृत्तिश्च गर्हितः ॥१२॥
वाग्दुष्ट-बालदमकौ नित्यमप्रियवाक् च यः ॥
आसक्तो द्यूतकामादावतिवाक् चैव दूषितः ॥ १३ ॥
निराचाराश्च ये विप्राः पितृ-मातृविवर्जिताः ॥
विद्वांसोऽपि हि नाभ्यर्च्याः पितृश्राद्धेषु सत्तमैः ॥ १४ ॥
न वेदैः केवलैर्वापि तपसा केवलेन वा ॥
सद्वृत्तैरेव सा प्रोक्ता पात्रता ब्राह्मणस्य च ॥ १५ ॥
यत्र वेदास्तपो यत्र यत्र वृत्तं द्विजाग्रगे ॥
पितृश्राद्धेषु तं यत्नाद्विद्वान्विप्रं समर्चयेत् ॥ १६ ॥
वेदशास्त्रार्थविच्छान्तः शुचिर्धर्ममनाः सदा ॥
गायत्रीब्रम्हचिन्ताकृत्पितृश्राद्धेषु पावनः ॥ १७ ॥
रथन्तरं बृहज्ज्येष्ठसामवित्त्रिसुपर्णकः ॥
त्रिमधुश्चापि यो विप्रः पितृश्राद्धेषु पूजितः ॥ १८ ॥
मातामहश्च दौहित्रो भागिनेयोऽथ मातुलः ॥
मातृस्वस्रेयत्तज्जश्च तथा मातुलजोऽपि वा ॥१९ ॥
जामाता श्वशुरो बन्धुर्भार्याभ्राता च तत्सुतः ॥
सुवृत्ताश्च सदाचाराश्चैते श्राद्धेषु पावनाः ॥ २० ॥
ऋत्विग्गुरुरुपाध्याय आचार्यः श्रोत्रियोऽपरः ॥
एते श्राद्धेषु वै पूज्याः ज्ञाति-सम्बन्धि-बान्धवाः ॥ २१ ॥
अग्निहोत्री च यो विप्र आवसथ्याग्निकोऽपि च ॥
पितृ-मातृपरावेतौ भोक्तव्यौ हव्य-कव्ययोः ॥ २२ ॥
कृष्येकवृत्तिजीवी यो भक्तो मात्रादिकेषु च ॥
षट्कर्मनिरतः पूज्यो हव्य-कव्ये सदैव हि ॥ २३ ॥
क्षत्रवृत्तिः सदाचारो मात्रादिभक्तितत्परः ॥
शुचिः षट्कर्मयुक्तश्च हव्य-कव्येषु पूजितः ॥ २४ ॥

---

१. This verse is omitted in A. B. D. and E. २. A. reads °निर्मोक्ता for °निर्णेक्ता. ३. B. and E. both read °बालदुष्टकौ for °बालदमकौ° ४. B. C. D. E. read द्विजाग्रते for द्विजाग्रजे. ५. A. reads °श्रेष्ठ° for °ज्येष्ठ°. ६. A. reads तृप्तिदः. ७. This verse is omitted in D.

युगानुरूपतो यस्तु विद्याचारादिसंयुतः ॥
स पूज्योऽनभिशस्तश्च षट्कर्मनिरतो द्विजः ॥ २५ ॥
इत्युक्तगुणसम्पन्नान्ब्राह्मणान्पूर्ववासरे ॥
निमन्त्रयेत तान् भक्त्या नियोगाख्यानपूर्वकम् ॥ २६ ॥
सव्येन देवतार्थं तु पित्र्यमपसव्यवान् ॥
ततस्तैश्चरितव्यं स्यादुक्तं पितृव्रतं द्विजैः ॥ २७ ॥
जितेन्द्रियैस्तु भाव्यं स्यादहोरात्रमतन्द्रितैः ॥
तस्मिन्नहनि प्रातर्वा यत्र श्राद्धमुपस्थितम् ॥ २८ ॥
निमन्त्रयेत तान्भक्त्या तैश्च भाव्यं जितेन्द्रियैः ॥
विप्रोरः-पार्श्व-पृष्ठस्थाः पितृ-मातामहादयः ॥ २९ ॥
भुञ्जन्ति क्रमशः श्राद्धे तथा पिण्डाशिनोऽपि च ॥
निमन्त्रितो द्विजः श्राद्धे न शयीत स्त्रियासह ॥ ३० ॥
अध्वानं न तु वै यायान्न ब्रूयादनृतं वचः ॥
नाधीयीत दिवा स्वापं न कुर्वीत न संवदेत् ॥ ३१ ॥
न म्लेच्छ-पतितैः सार्धं न वदेच्च निषिद्धकम् ॥
प्राङ्मुखौ दैविकौ विप्रौ विप्रास्त्रय उदङ्मुखाः ॥ ३२ ॥
एकैको वोभयत्र स्यादसम्पत्तावधिति क्रमः ॥
पात्रं वा दैविकं कृत्वा विप्र एकस्तु पैतृके ॥ ३३ ॥
इति वा निर्वपेच्छ्राद्धं निर्धनश्चान्यदाचरेत् ॥
गत्वारण्यममानुष्यमूर्ध्वबाहुर्विरौत्यदः ॥ ३४ ॥
निरन्नो निर्धनो देवाः पितरो माऽनृणं कृथाः ॥
न मेऽस्ति वित्तं न गृहं न भार्या
श्राद्धं कथं वः पितरः करोमि ॥
वने प्रविश्येह रुतं मयोच्चैर्
भुजौ कृतौ वर्त्मनि मारुतस्य ॥ ३५ ॥
श्राद्धर्णमेतद्भवतां प्रदत्तं
मह्यं दयध्वं पितृदेवताद्याः ॥
अख्याय चोत्क्षिप्य भुजावितस्ततो
दिवा च रात्रिं समुपोष्य तिष्ठेत् ॥ ३६ ॥

१. In B. and E. this is omitted. २. A. B. D. E. read °गस्थान° for °गाख्यान°. ३. C. reads °उरु° for °उरः.° ४. B. E. read भुंजते for भुंजंति. ५ A. reads वेद° for म्लेच्छ°. ६. C. and F. read भुजावृते for भुजौ कृतौ.

भवेन्नरस्तेन कृतेन तेषा-
मृणेन मुक्तः पितृदेवतानाम् ॥
निर्वित्त-निर्भाग्य-निराश्रयाणां
श्राद्धस्य मार्गः कथितो मुनीन्द्रैः ॥ ३६ ॥

मयाऽऽख्यातं रुदित्वा वः पितरः श्राद्धदेवताः ॥
श्राद्धर्णस्य विमुक्तोऽहं महिताः पितरो मया ॥ ३७ ॥
कृतोपवासस्तत्राह्नि श्राद्धर्णान्मुच्यते द्विजः ॥
एतच्चापि न यः कुर्यात्पितरस्तेन वै हताः ॥ ३८ ॥
सम्पत्तावर्थ-पात्राणामेकैकस्य त्रयस्त्रयः ॥
पित्रादेर्ब्राह्मणाः प्रोक्ताश्चत्वारो वैश्वदेविके ॥ ३९ ॥
द्वौ वापि दैविके [7]विप्रौ चैकैको वा न दोषभाक् ॥
स्यान्मातामहिकेऽप्येवमेकोऽपि वैश्वदेविके ॥ ४० ॥
नत्वेवैकं तु सर्वेषामाश्वलायनमतस्थितः ॥
पितृणामर्चयेद्विप्रमत्रपिण्डा निदर्शनम् ॥ ४२ ॥
न मातामहिकं श्राद्धं श्रौतमुक्तं तु साग्निकैः ॥
अनग्निकस्तु तत्कुर्यादिति केचिन्मतं विदुः ॥ ४३ ॥
साग्निकैरपि कार्यं स्याच्छ्राद्धं मातामहं द्विजैः ॥
षड्दैवत्यमिति ह्येके एके तु पार्वणद्वयम् ॥ ४४ ॥
अपुत्रस्य पितृव्यस्य तत्पुत्रैर्भ्रातृजो भवेत् ॥
स एव तस्य कुर्वीत पिण्डदानोदकक्रियाः ॥ ४५ ॥
पार्वणं तेन कार्यं स्यात्पुत्रवद्भ्रातृजेन तु ॥
पितृस्थानेषु तं कृत्वा शेषं पूर्ववदुच्चरेत् ॥ ४६ ॥
श्राद्धं पत्यापि कार्यं स्यादपुत्रायास्तु योषितः ॥
तस्यापि हि तया कार्यमेकत्वं हि तयोर्यतः ॥ ४७ ॥
भ्रातुर्ज्येष्ठस्य कुर्वीत ज्येष्ठो भ्राताऽनुजस्य च ॥
दैवहीनं तु तत्कुर्यादिति धर्मविदो विदुः ॥ ४८ ॥

---

१. D. reads रुतेन for कृतेन. २. A. B. D. E. read °निर्वृत्ति° निर्भार्य° for °निर्वित्त-निर्भाग्य°. ३. A. C. D. read स तस्मात् for तत्राह्नि. ४. A. C. D. read विप्रमुच्यते for मुच्यते द्विजः. ५. C. reads अथ for अर्थ°. ६. B. reads वैश्वदेविकाः for वैश्वदेविके. ७. B. substitutes प्रोक्तौ for विप्रौ. ८. only D. reads मातामहानाम् for मातामहिके. ९. B. and E. read आप्यायन° for आश्वलायन.°

पितुः पुत्रेण कर्तव्या पिण्डदानोदकक्रिया ॥
पुत्राभावे तु पुत्री च तदभावे सहोदरः ॥ ४९ ॥
मित्रादीनां च कर्तव्यं समीहन्ते यतोऽप्यमी ॥
नावज्ञेयास्तु ते सर्वे कृते तु स्यान्महाफलम् ॥ ५० ॥
पितामहस्तदन्यो वा यस्य जीवन् भवेद्द्विजः ।
प्रत्यक्षास्तेऽपि वै पूज्याः संस्थित्यर्थं यतश्च तत् ॥ ५१ ॥
विद्यमानत्रयाणां स्यात्प्रत्यक्षः पूज्य एव सः ॥
गौतमस्य मतं त्वेतदिति वासिष्ठजोऽब्रवीत् ॥ ५२ ॥
विद्यमाने तु पितरि श्राद्धं कर्तुमुपस्थितः ॥
पितृवत्पितृपित्रादेः कुर्याच्छ्राद्धमसंशयम् ॥ ५३ ॥
पुत्रिकायाः सुतः श्राद्धं निर्वपेन्मातुरेव सः ॥
तत्पितुर्निर्वपत्यस्मात्तृतीयं तु पितुःपितुः ॥ ५४ ॥
अत एव द्विजः पुत्रीमुद्वहेन्न कथं च न ॥
उद्वोढुः पुत्रः पुत्रोऽसौ पुत्रोऽसौ मातुरेव हि ॥ ५५ ॥
पुत्रश्च दुहितुःपुत्रः समौ तौ धार्मिके पथि ॥
अर्थाहृतौ च विप्रोक्तौ[1] तुल्यौ तौ शक्तिजोऽब्रवीत् ॥ ५६ ॥
मुख्यं यथा पितुःश्राद्धं तथा मातामहस्य च ॥
पुत्र-दौहित्रयोर्लोके विशेषो नोपपद्यते ॥ ५७ ॥
दौहित्रः पावनः श्राद्धे[2] कालस्तु कुतपस्तथा ॥
तथा कृष्णास्तिला विद्धन्निति शास्त्रविदो विदुः ॥ ५८ ॥
काम्यमाभ्युदयं चैव द्विविधं पार्वणं स्मृतम् ॥
यथाकामं तु काम्यं स्याद्वृद्धावभ्युदये स्मृतम् ॥ ५९ ॥
क्षत्रियायां तु यो जातो वैश्यायां च तथा सुतः ॥
ब्राह्मणस्य पितुस्तौ तु निर्वपेतां द्विजाग्र्यवत् ॥
क्षत्रियस्य सुतश्चैव तथा वैश्यसुतोऽपि च ॥
शृतान्नेन द्विजांस्तर्प्य श्राद्धद्वयं च निर्वपेत् ॥ ६० ॥
आमान्नेन तु शूद्रस्य तूष्णीं च द्विजपूजनम् ॥
कृत्वा श्राद्धं तु निर्वाप्य सजातीनाशयेत्तथा ॥ ६१ ॥

---

१. B. and E. read अर्थोमौ तावपि प्रोक्तौ for अर्थाहृतौ च विप्रोक्तौ.
२. C. reads पार्वणश्राद्धे for पावनः श्राद्धे.

यः शूद्रो भोजयेद्विप्रांच्छृतपाकाशनेन तु ॥
स तद्विप्रकृतैनोभिर्लिप्यते शक्तिजोऽब्रवीत् ॥ ६२ ॥
शूद्रपाकं द्विजेभ्यश्च विभवान्धो ददाति यः ॥
कृमी भवति पाताले स युगानेकविंशतिम् ॥ ६३ ॥
भोजितेन तु विप्रेण यत्पापं तस्य जायते ॥
तेनासौ लिप्यते मूढो यः शूद्रो भोजयेद्द्विजान् ॥ ६४ ॥
योऽहंमन्यो द्विजाग्र्यांस्तु शूद्रश्रितेन भोजयेत् ॥
स गच्छेन्नरकं घोरं पुनरावृत्तिदुर्लभम् ॥ ६५ ॥
यत्किंचित्किल्बिषं विप्रे कृतपूर्वं तु तिष्ठति ॥
तेनासौ लिप्यते पापी यः शूद्रो भोजयेद्द्विजान् ॥ ६६ ॥
शूद्रोच्छिष्टं[1] तु यो भुङ्क्ते मतिपूर्वं[2] द्विजाधमः ॥
कृमित्वं याति विष्टायां युगानि ह्येकविंशतिः ॥ ६७ ॥
शूद्रोच्छिष्टं तु यो भुङ्क्ते पञ्चाहानि द्विजाधमः[3] ॥
स तद्विष्टाकृमित्वं तु प्राप्नोति हि शतं समाः ॥ ६८ ॥
अतो न भोजयेद्विप्रान्निर्वपेन्नैव पूजयेत् ॥
शूद्रान्नं[4] भोजनायुक्तं इति पाराशरोऽब्रवीत् ॥ ६९ ॥
न भोजयेत् स्त्रियं श्राद्धे यद्यपि व्रतचारिणीम् ॥
पात्रं तस्यै समर्प्य स्यादिति धर्मविदब्रवीत् ॥
द्विजन्मानो न कुर्वीरंच्छ्राद्धमामाशनेन तु ॥ ७० ॥
यदैव स्युः प्रवासस्था भार्या यत्र न सन्निधौ ॥
व्यवधानेन भार्याया ग्रहणे पुत्रजन्मनि ॥
कुर्यादामाशनश्राद्धमिति पाराशरोऽब्रवीत् ॥ ७१ ॥
अग्नौकरणपिण्डांश्च कुर्यादामाशनेन तु ॥
सतिलैर्दधिमध्वाज्यसम्पृक्तैः सक्तुभिरपि[6] ॥ ७२ ॥
यवाद्यं संस्कृतान्नेन द्रव्यं[7] वापि च निर्वपेत् ॥
जलेन पयसा वापि न स्यादश्राद्धकृद्यथा ॥ ७३ ॥

---

१. B. reads शूद्रान्नं यो द्विजो भुङ्क्ते for शूद्रोच्छिष्टं तु यो भुङ्क्ते. २. A. and D. read मन्ये विप्रोऽधमः स तु. ३. B. E. and F. read द्विजोत्तमः for द्विजाधमः. ४. A. B. D. and E. read अशनं for शूद्रान्नं. ५. पात्रं. is omitted in B. C. and E. ६. A. reads सक्तुकैः for सक्तुभिः. ७. A. D. read हेम्ना for द्रव्यं.

आमान्नेन द्विजैः कार्यं न कदाचिदपि द्विजाः ॥
श्रपयित्वा द्विजैकस्तु तथापि पाकमाश्रयेत् ॥ ७४ ॥
न कुर्यात्परपाकेन नैकपाकेन तु द्वयम् ॥
नैकश्राद्धे द्वयं कुर्यान्न च कुर्यात्परान्नभुक् ॥ ७५ ॥
पित्रादीनां सगोत्रा ये तथा मातामहस्य च ॥
तेषामेकेन पाकेन कार्यं पिण्डविवर्जितम् ॥
केचित्सापिण्ड्यमिच्छन्ति समगोत्रतयाऽनघ ॥
अपि मातामहो न स्याद्भिन्नगोत्रतया तथा ॥ ७७ ॥
पृथक्कर्तुमशक्यं स्यादर्थ-पात्राद्यसम्भवे ॥
अवश्यं तत्र कर्तव्यमेकदैवमतः श्रयेत् ॥ ७८ ॥
येषां नोद्वाहसंस्कारा ह्यन्यसंस्कारसंस्कृताः ॥
साङ्कल्पिकं भवेत्तेषां श्राद्धं कार्यं मृतेऽहनि ॥ ७९ ॥
केचित्सापिण्ड्यमिच्छन्ति ब्रह्मसंस्कारवत्तया ॥
आद्यो हि ब्रह्मसंस्कारस्तस्मात्पिण्डः प्रदीयते ॥ ८० ॥
पर्वस्वपि निमित्तेषु कर्तव्यं पिण्डसंयुतम् ॥
पितृणां त्रिविधा यस्माद्गतिः प्रोक्ता मुनीश्वरैः ॥ ८१ ॥
वैश्वदेवः सदा कार्यो श्राद्धे च समुपस्थिते ॥
पाकशुद्ध्यर्थमेवैतत्पूर्वमेव विधीयते ॥ ८२ ॥
वैश्वदेवोऽग्रतश्चैव श्राद्धकाले विशेषतः ॥
पाकशुद्धिस्तु विज्ञेया भुक्तोच्छिष्टं तु वर्जयेत् ॥ ८३ ॥
सम्प्राप्ते पार्वणश्राद्धे एकोद्दिष्टे तथैव च ॥
अग्रतो वैश्वदेवः स्यात् पश्चादेकादशेऽहनि ॥ ८३ ॥
एकोद्दिष्टे विशेषेण प्रागेव ह्यग्निपूजनम् ॥
कालस्तु कुतपस्तस्य रौहणः पार्वणस्य च ॥ ८४ ॥
वामतश्चासनं दद्यात्पितृकार्येषु सत्तमः ॥
दैविकं दक्षिणं तद्वदिति पाराशरोऽब्रवीत् ॥ ८५ ॥

---

१. B. E. read कार्यं पिण्डविवर्जितम् for नैकपाकेन तु द्वयम्. २. These preceding 141½ lines are omitted in F. ३. B. D. E. F. read सपिण्डम् for सापिण्ड्यम्. ४. A. reads येन for ह्यन्य. ५. F. reads सर्वेष्वपि for पर्वस्वपि. ६. D. and E. read रोहिण: for रौहणः; A. also reads as D. and E. too. ७. This verse is omited in B. and E.

आसने चासनं दद्याद्वामे वा दक्षिणेऽपि वा ॥
पितृकार्येषु वामं तु दैवे कर्मणि दक्षिणम् ॥ ८६ ॥
पितृश्राद्धेषु यो दद्याद्दक्षिणं दर्भमासनम् ॥
नाश्नन्ति पितरस्तस्य सार्धानि वत्सराणि षट् ॥ ८७ ॥
तस्माद्वामत एवात्र पितृकर्मणि चासनम् ॥
दैविके दक्षिणं तद्वदिति वासिष्ठजोऽब्रवीत् ॥ ८८ ॥
कुत्र काले च कर्तव्यं श्राद्धं तत्पैतृकं प्रभो? ॥
वदस्व निश्चयं तत्र विवदन्त्यपरेऽत्र तु ॥ ८९ ॥
पञ्चदशमुहूर्ताहस्तत्प्रागर्धंदिनं स्मृतम् ॥
अपरार्धं स्मृता रात्रिस्तन्मध्यः कुतपो मतः ॥ ९० ॥
यथा यथा च ह्रस्वत्वं पुंसः स्थानेन सम्भवेत् ॥
तथा तथा पवित्रः स्यात्कालः श्राद्धार्चनादिषु ॥ ९१ ॥
छायेयं पुरुषस्यैवं तत्पादाधो भवेद्यथा ॥
आधानश्राद्धदानादेः स कालोऽक्षयकृत्स्मृतः ॥ ९२ ॥
अयुतं तु मुहूर्तानामर्धं ह्यष्टदशाधिकम् ॥
त्रिंशद्भिस्तैरहोरात्रमिति माध्यन्दिनी श्रुतिः ॥ ९३ ॥
मध्याह्ने तु गते सूर्ये न पूर्वे न च पश्चिमे ॥
तुल्याग्रसंस्थिते चैव सोऽष्टमो भाग उच्यते ॥ ९४ ॥
दिवसस्याष्टमे भागे मन्दो भवति भास्करः ॥
स कालः कुतपो ज्ञेयस्तत्र दत्तं तु चाक्षयम् ॥ ९५ ॥
मध्याह्नचलितो भानुः किञ्चिन्मन्दगतिर्भवेत् ॥
स कालो रौहिणो नाम पितॄणां दत्तमक्षयम् ॥ ९६ ॥
तस्मात्सर्वप्रयत्नेन रौहिणं तु न लङ्घयेत् ॥
अकाले विधिना दत्तं न देव-पितृगामि तत् ॥ ९७ ॥
अब्दवृद्धिर्भवेद्यत्र तत्राऽऽब्दमुभयात्मकम् ॥
श्राद्धं तत्र च कुर्वीत मासयोरुभयोरपि ॥ ९८ ॥

---

१. दर्श वर्षाणि पंच वा is th extra reading in A. २. B. and E. read दैवपैतृकम् for पैतृकं प्रभो. ३. A. reads वेदस्य for वदस्व; while B. and E. read the whole line—

— वेदस्य निश्चयं तत्र क च दत्ताक्षयं भवेत् ।.

४. A. reads अब्दस्याष्टदशात्मिकम् for अर्धं ह्यष्टदशाधिकम् and B. reads वर्णाष्टशतसंयुतम्. ५. A. B. D. and F. read तुलाग्र° for तुल्याग्र.° ६. This whole verse is omitted in A. B. C. D. and E.

नवन्थ्यं दिवसं कुर्यान्मासयोरुभयोरपि ॥
पिण्डवर्जमसङ्क्रान्ते सङ्क्रान्ते पिण्डसंयुतः ॥
षष्ठिभिर्दिवसैर्मासस्त्रिंशद्भिः पक्ष उच्यते ॥ ९९ ॥
सङ्क्रान्तिरहितः पक्षस्तत्र कार्यं विपिण्डकम् ॥
सिनीवाली मतिक्रम्य यदा सङ्क्रमते रविः ॥
युक्तःसाधारणैर्मासैः स काल उत्तरो भवेत् ॥ १०० ॥
सङ्क्रान्तिवर्जितः कालः स मलः[१] पापसम्भवः ॥
रक्षसां भागधेयोऽसौ उत्सवादिविवर्जितः ॥ १०१ ॥
तत्र नैमित्तिकं कार्यं श्राद्धं पिण्डविवर्जितम् ॥
नित्यं तु सततं कार्यमिति पाराशरोऽब्रवीत् ॥ १०२ ॥
अहोभिर्गुणितैर्यत्[२]स्यात्तत्कार्यं यत्र सर्वदा ॥
तिथि-नक्षत्र-योगाश्च जातकर्मादिकाश्च ये ॥ १०३ ॥
नैमित्तिकाश्च ये चान्ये कार्यास्तेऽपि मलिम्लुचे ॥
तीर्थस्नानं गजच्छायां द्विमुखीं गोप्रदानवत् ॥ १०४ ॥
मलिम्लुचेऽपि कर्तव्यं सपिण्डीकरणादिकम् ॥
आग्रयणममावास्यामष्टकाग्रहसङ्क्रमम् ॥ १०५ ॥
अधिमासेऽपि कार्यं स्यादिति पाराशरोऽब्रवीत् ॥
नित्यं च नित्यशः कार्यमिष्टीः काम्याश्च[३] वर्जयेत् ॥ १०६ ॥
वार्षिकं पिण्डवर्जं स्यादन्यस्मिन्पिण्डसंयुतम् ॥
इष्टिराग्रयणं श्राद्धमन्वाहार्यं च सर्वदा ॥ १०७ ॥
कर्तव्यं सततं विप्रैरिष्टीःकाम्याश्च वर्जयेत् ॥
दैवे कर्मणि सम्प्राप्ते तिथिर्यत्रोदितो रविः ॥
सा तिथिः सकला ज्ञेया विपरीता तु पैतृके ॥ १०८ ॥
वृद्धिमद्दिवसे कार्यं श्राद्धमाभ्युदिकं द्विजैः ॥
क्षीयमाणे दिने कार्यं श्राद्धं विद्वन् ! क्षयाह्निकम् ॥ १०९ ॥
मित्रे चैव सगोत्रे च पितृ-मातृसहोदरे ॥
आसनं नैव दातव्यं भोक्तव्या एवमेव ते ॥ ११० ॥
ब्राह्मणं न सगोत्रं च पूजयेत्पितृकर्मणि ॥
नोपतिष्ठति तत्तेषां किन्तु स्याच्च निराशता ॥ १११ ॥

---

१. E. and F. read स कालः for स मलः. २. A. B. C. D. read गणितैः for गुणितैः. ३. only C. reads इष्टकामांश्च.

स्वगोत्रं भोजयेद्यस्तु पितृश्राद्धेषु वै द्विजः ॥
हताः स्युः पितरस्तेन न भुक्तमुपतिष्ठते ॥ ११२ ॥
श्राद्धं कुर्वन्द्विजोऽज्ञानात् स्वगोत्रं यस्तु भोजयेत् ॥
स लुप्तपितृदेवस्स्यान्नरकं प्रतिपद्यते ॥ ११३ ॥
तस्मान्न गोत्रिणं विप्रं भोजयेद्विधिपूर्वकम् ॥
ज्ञातिमत्त्वेन भोज्यास्ते उत्थितैस्तु द्विजोत्तमैः ॥ ११४ ॥
दक्षिणाप्रवणे देशे श्राद्धं कुर्यात्तु पैतृकम् ॥
पितॄणां पावनो[2] देशः स प्रोक्तोऽक्षयतृप्तिकृत् ॥ ११५ ॥
देशे काले च पात्रे च विधिना हविषा च यत् ॥
तिलैर्दर्भैश्च मन्त्रैश्च श्राद्धं स्याच्छ्रद्धयान्वितम् ॥ ११६ ॥
तैजसानि तु पात्राणि ह्यर्घ्यार्थं भोजनाय च ॥
मृत्पाषाणमयान्येके अपराण्यपरे विदुः ॥ ११७ ॥
पलाश-पद्म-पत्राणि अनिषिद्धानि यानि च ॥
तानि श्राद्धेषु कार्याणि पितृ[3]-देवहितानि च ॥ ११८ ॥
वृद्धिश्राद्धेषु मन्यन्ते मृण्मयानि तु केचन ॥
शौनकस्य मतं ह्येतद्यथा कार्यं तु मृण्मयम् ॥ ११९ ॥
एकद्रव्याणि कार्याणि पात्राणि [4]भोजनार्घयोः ॥
त्रीणि पैतृकपात्राणि द्वे दैवे वैश्वदेविके ॥ १२० ॥
एकस्य वैश्वदेवानि पैतृकाण्येकवस्तुनः ॥
इति वा तानि कार्याणि भेदमेकत्र वर्जयेत् ॥ १२१ ॥
वटा-ऽश्वत्था-ऽर्कपत्रेषु कुम्भी-तिन्दुकयोरपि ॥
कोविदार-करञ्जेषु न भुञ्जीत कदाच न ॥
सुरभी-नागकर्णाद्यैः [6]करवीर-करञ्जकैः ॥
बिल्वैर्यस्त्वर्चयेद्विद्वान् पितॄन् श्राद्धेष्वगर्हितैः ॥
तद्भुञ्जन्तेऽसुराः श्राद्धं निराशैः पितृभिर्गतैः ॥ १२४ ॥
सर्वाणि रक्तपुष्पाणि निषिद्धाण्यपराणि च ॥
वर्जयेत् पितृकार्येषु केतकीकुसुमानि च ॥ १२५ ॥

---

१. B. and F. read स ज्ञातिमध्ये भोज्यस्तु for ज्ञातिमत्त्वेन भोज्यास्ते. २. only B. reads वाचनो for पावनः ३. B. and C. read पात्राणि भोजनार्घयोः for पितृ-देवहितानि च. ४. B. reads भोजनार्घार्चनेष्वपि for पात्राणि भोजनार्घयोः. ५. D. reads भेदमेकत्र वर्जयेत् for द्वे दैवे वैश्वदेविके. ६. B. reads हयारिकांचनारिकैः and D. reads करवीरैश्च नारकैः.

गो-रम्भा-भृङ्गराजाद्यैर्मल्लिकाकुब्जकैरपि ॥
समर्चयेद्द्विजान् श्राद्धे हव्य-कव्योदितैर्द्विजः ॥
न दद्याद्गुग्गुलं श्राद्धे द्विजानां पितृदैवते ॥
धूपाभावे गुडो देयो घृत६.यं द्विजोत्तमाः ॥ १२७ ॥
कुङ्कुमाद्यं चन्दनं च देयं गन्धविमिश्रितम् ॥
ऊर्ध्वं च तिलकं कुर्याद्दैवे पित्र्ये च कर्मणि ॥ १२८ ॥
निराशाः पितरो यान्ति यस्तु कुर्यात्त्रिपुण्ड्रकम् ॥
पवित्रं यदि वा दर्भं करे कृत्वा द्विजाधरः ॥ १२९ ॥
समालभेद्द्विजानज्ञस्तच्छ्राद्धमासुरं भवेत् ॥
गन्धाश्च विविधा देयाः कर्पूरागरुमिश्रिताः ॥ १३० ॥
शक्त्या वस्त्राणि देयानि तदभावे च निष्क्रयम् ॥
दीपश्च सर्पिषा देयस्तिलतैलेन वा पुनः ॥ १३१ ॥
नकाष्ठतैलैरन्यैस्तु कदाचित् सार्षपाऽऽतसैः ॥ १३२ ॥
देशधर्मं समाश्रित्य वंशधर्मं तथापरे ॥
सूरयः श्राद्धमिच्छन्ति पार्वणं च क्षयान्ह्यपि ॥ १३२ ॥
स्त्रीणामपि पृथक् श्राद्धं ते मन्यन्ते स्वधर्मतः ॥
मातामहस्य गोत्रेण मातुस्तेन सपिण्डताम् ॥ १३३ ॥
मातामह्या सहेच्छन्ति मातुस्तेऽपि सपिण्डताम् ॥
स्त्रीणां स्त्रीगोत्रसम्बन्धात्पुंगोत्रेण नृणां यतः ॥ १३४ ॥
सपिण्डीकरणे काले श्राद्धद्वयमुपस्थितम् ॥
दैवाद्यं प्रथमं कुर्यात्पितृणां तदनन्तरम् ॥ १३५ ॥
दैवाद्यं पार्वणं प्रोक्तं प्रेतश्राद्धमथापरम् ॥
एकत्वं तु ततः पश्चात्कृत्वा विप्रांश्च भोजयेत ॥ १३६ ॥
पितृणामर्घ्यपात्राणि प्रेतपात्रमथापरम् ॥
प्रेतपात्रं तु तत्कृत्वा पितृपात्रेषु योजयेत् ॥
ये समाना इति द्वाभ्यां पूर्ववच्छेषमाचरेत् ॥
सपिण्डीकरणं यस्य कृतं न स्याद्द्विजन्मनः ॥ १३७ ॥
अदैवं तस्य देयं स्यात्पिण्डमेकं तु निर्वपेत् ॥
सपिण्डीकरणं चैतात्क्रियाश्चैव क्षयाह्निकम् ॥ १३८ ॥

---

१. B. E. and F. read तु कर्तव्यं for गुडो देयो. २. B. E. and F. read त दुर्बुद्धिः for द्विजाधरः. ३. A. reads विसर्जयेत् for च भोजयेत्.

एकादशाहिकं त्वाद्यं मासि मासि च मासिकम् ॥
वर्षे वर्षे च कर्तव्यं मृतेऽहनि च तत्पुनः ॥ १३९ ॥
नाऽपुत्रस्य सपिण्डत्वं केचिदिच्छन्ति तद्विदः ॥
विशेषतोऽनपत्यस्य सत्यप्यत्राधिकारिणि ॥ १४० ॥
विद्यमानः पिता यस्य सचेद्यदि विपद्यते ॥
तदन्तरा सपिण्डत्वं वदन्ति[1] श्राद्धवादिनः ॥ १४१ ॥
आभ्युदयिकसम्पत्तावर्चा[2] प्रागेव कारयेत् ॥
कुर्यात्परिजनेनै[3]तत्स्वयं वापि द्विजोत्तमः ॥ १४२ ॥
सन्यसन्सर्वकर्माणि तच्छ्राद्धाय च तद्दिनम् ॥
अग्निदाहदिनं चैके केचिन्मृतदिनं विदुः ॥ १४३ ॥
विदेशस्थे श्रुताहस्तु कृष्णा वा[4] द्वादशी सिता ॥
संग्रामे संस्थितानां च प्रेतपक्षे शशिक्षये ॥ १४४ ॥
अग्नि·सर्पादिमृत्यूनां षण्मासोपरि सत्क्रिया ॥
तेषां पार्वणमेवोक्तं क्षयाहेऽपि च सत्तमैः[5] ॥ १४५ ॥
चन्द्रक्षया-ऽनाशक-संयुगेषु यः प्रेतपक्षे मृतवान् सपिण्डः ॥
सपिण्डनानन्तरमाब्दिकानि[6] भवन्ति तेषामिह पार्वणानि ॥ १४६ ॥
अग्नि-सर्पादिमृत्यूनां षण्मासोपरि सत्क्रियाः ॥ } A.
क्षयाहिकानि कार्याणि ब्रूयुर्धर्मविदो जनाः ॥ } १४७ ॥
अब्दादूर्ध्वं चरन्त्येके कृत्वा च वैष्णवं बलिम् ॥
विष्ण्वर्चनं[7] विना नार्वाग्प्रदत्तमुपतिष्ठति ॥ १४८ ॥
विद्युता वृक्षपातेन सर्पेण महिषेण वा ॥
इत्यादिकेन मृत्युः स्यात्तिथौ यत्र च तत्र वै ॥ १४९ ॥
तन्निमित्तस्य तृप्त्यर्थं मासि मासि क्षयाहिकम् ॥
कर्तव्यमवधौ यावत्ततः कुर्वीत सत्क्रियाम् ॥ १५० ॥
अनाशकमृतानां च क्षयाहेऽपि च पार्वणम् ॥
संन्यासवद्धि मन्यन्ते केचिद्विदुरवैदिकम्[8] ॥ १५१ ॥

१. D. reads केचिदिच्छन्ति वा विदः for वदन्ति श्राद्धवादिनः. २. A. B. D. E. and F. read °वर्चागेव तु कारयन् for °वर्चा प्रागेव कारयेत्. ३. A. B. D. E. and F. read परिव्रजन् for परिजनेन. ४. A. reads कृष्णा वा सितद्वादशी for कृष्णा वा द्वादशी सिता. ५. E. reads सत्कृतिः for सत्तमैः ६. C. reads आब्दिकानां for आब्दिकानि. ७. B. E. and F. read कृष्णार्चनं for विष्ण्वर्चनं. ८. B. and E. read अवैदिकम् for अवैदिकम्.

एकोद्दिष्टमदैवं स्यात्तथैकार्घ्यपवित्रकम् ॥
आवाहना-ऽग्नौकरणहीनं तदपसव्यवत् ॥ १५२ ॥
पूर्वोत्तरप्लवे देशे श्राद्धं स्यान्मातृपूर्वकम् ॥
सित-पीतादिपिष्टेन चर्चिते भूतले च तत् ॥ १५३ ॥
उद्दिष्टक्रतुकालस्य तत्प्रागेव विधीयते ॥
आभ्युदयिकदैवानि पूर्वाह्णे स्युरिति स्मृतिः ॥ १५४ ॥
तिलाक्षतोदकैर्युक्तान्यासनानि प्रदक्षिणात् ॥
परिहृत्यादि पृष्ठेन कृत्वा च शान्तिपूर्वकम् ॥ १५५ ॥
व्रीहयो यव-गोधूमा अक्षताश्चाहताः स्मृताः ॥
अक्षतामलकैः पिण्डान्दधि-कर्कन्धुमिश्रितैः ॥ १५६ ॥
नान्दीमुखेभ्यो देवेभ्यः प्रदक्षिणकुशासनम् ॥
पितृभ्यस्तन्मुखेभ्यश्च प्रदक्षिणमिति स्मृतिः ॥ १५७ ॥
कर्कन्धुभिर्यवैः पुष्पैः[2] शमीपत्रैस्तिलैस्तथा ॥
तेभ्यो ह्यर्घ्यः प्रदातव्यः पितृभ्यो दैवतैस्सह ॥ १५८ ॥
मातामहानामप्येवं षट्दैवत्यं श्रिये द्विजः ॥
माङ्गल्यपूर्वकं सर्वं गन्धाद्यपि च धारयेत्[3] ॥ १५९ ॥
तृप्तिकृत्पितृ-मातॄणां धूपो देयश्च गुग्गुलः ॥
घृताभिघारधूपो वा यथा स्यात्परिपूर्णता ॥ १६० ॥
दीपाश्च बहवो देयाः विप्रं प्रतिघृतेन च ॥
तैलेन येन केनापि नवनीतेन चैव ही ॥ १६१ ॥
मालत्या शतपत्र्या वा मल्लिका-कुन्दयोरपि ॥
केतक्या पाटलाया वा स्रजो देया न लोहिताः ॥ १६२ ॥
वासांसि च यथाशक्त्या दद्यात्तेभ्योऽपि निष्क्रयम्[4] ॥
परिपूर्णं यथा तत्स्यात्तथा कार्यं भवेदिति ॥ १६३ ॥
सुवेष-भूषणैस्तत्र सालङ्कारैस्तथा नरैः ॥
कुङ्कुमाद्यनुलिप्ताङ्गैर्भाव्यं तु ब्राह्मणैः सह ॥ १६४ ॥
स्त्रियोऽपि स्युस्तथाभूता गीत-नृत्यादिहर्षिताः ॥
दुन्दुभीनादहृष्टाङ्गा मङ्गलध्वनिकारिकाः ॥ १६५ ॥

---

१. A. B. D. E. and F. read °कृत्य° for °क्रतु°. २. A. B. D. E. and F. read माषैः for पुष्पैः. ३. A. reads दापयेत for धारयेत. ४. D. reads दक्षिणाम् for निष्क्रयम्.

सोमसदोऽग्निष्वात्ताश्च तथा[1] बर्हिषदोऽपि च ॥
सोमपाश्च तथा विद्वंस्तथैव च हविर्भुजः ॥ १६६ ॥
आज्यपाश्च तथा वत्स तथाह्यन्ये सुकालिनः ॥
एते चान्ये च पितरः पूज्याः सर्वे द्विजातिभिः ॥ १६७ ॥
वसवश्च तथा रुद्रास्तथैवादितिसूनवः ॥
देवता अपि यज्ञेषु स्वायम्भुवा हि कीर्तिताः ॥ १६८ ॥
एते च पितरो दिव्यास्तथा वैवस्वतादयः[1] ॥
एतत्पौत्रप्रपौत्राश्च असंख्याः पितरः स्मृताः ॥ १६९ ॥
एते श्राद्धेषु सन्तर्प्या उत्पन्नान्नैर्[2]द्विजातिभिः ॥
सन्तर्पिता इमे सर्वान्प्रीणयन्ति नृणां पितॄन् ॥ १७० ॥
प्रागेव केतितान्विप्रान् स्नातान्[3]काले समागतान् ॥
दत्वार्घ्यान् कृतसच्छौचानाचान्तानुपवेशयेत् ॥ १७१ ॥
ये स्पृशन्तस्तु खान्यद्भिराचामन्ति पिबन्ति च ॥
तेषां न जायते शुद्धिराचमन्त्यसृजा हि ते ॥ १७२ ॥
सर्वाणि स्वानि[4] वक्त्राणि[5] कायच्छिद्राणि[6] चात्मनः ॥
तैराचान्तैर्भवेच्छुद्धिरशुचिस्त्वन्यथा भवेत् ॥ १७३ ॥
व्याहृत्य वैष्णवान्मन्त्रान् स्मृत्वा च वेदमातरम् ॥
शान्तस्वान्तो द्विजान्पृच्छेत्करिष्ये श्राद्धमित्यथ ॥ १७४ ॥
करवै करवाणीति पृष्टा ब्रूयुर्द्विजाह्यतः ॥
अनुज्ञायै वचो ह्येतत् कुरुष्व क्रियतां[7] कुरु ॥ १७५ ॥
ततो दर्भासनं दद्याद्देवेभ्यः सयवं पुनः ॥
दक्षिणं जानु मन्वास्य दक्षिणं च तथासनम् ॥ १७६ ॥
पात्रद्वयमतोऽर्घ्यार्थं तैजसं चैकवस्तुजम् ॥
सापं च सपवित्रं तत्समभ्यर्च्य विधानतः ॥ १७७ ॥
प्राङ्मुखोऽमरतीर्थेषु शन्नो देव्योदकं क्षिपेत् ॥
यवोसीति यवांस्तत्र तूष्णीं पुष्पाणि चन्दनम् ॥ १७८ ॥

---

१. A. B. D. E. and F. read चैतस्सुतादयः for वैवस्वतादयः. २. A. reads पुण्याश्नाद्यैः for उत्पन्नान्नैः. ३. A. reads श्राद्धकाले for स्नातान् काले. ४. B. reads स्यानि. ५. A. reads विप्राणि for कार्याणि and E. F. read वक्त्राणि. ६. E. reads कार्यच्छिद्राणि for कायछिद्राणि ७. B. reads यत्कृतं for क्रियतां.

यवोऽसि पुण्यामृतमिश्रितोऽसि
समस्तधान्यप्रभुरस्यमुत्र ॥
मरुन्मनुष्य-पितृवंशतृप्त्यै
क्षितावतीर्णोऽसि हितोऽसि पुंसाम् ॥ १७९ ॥
उत्पाद्य पूर्वकमिमानमृतेन वेधा
भूयः प्रसन्नमनसा तदुपासितःसन् ॥
चिक्षेप तान्वरुणलोकहिताय सिक्ताः
तेनामृता वरुणदैवतका बभूवुः ॥ १८० ॥
अनीतवान्विधिरिमान्वरुणस्य लोकात्
अन्नप्रभून्भुवि यवान्सुरलोकतृप्त्यै ॥
तत्पिष्टपक्वहविषा पितृ-देवतानां
तृप्ता वसन्ति दिवि ते वरदानवाचः ॥ १८१ ॥

ततः सव्यं करं न्यस्य विप्रदक्षिणजानुनि ॥
देवानावाहयिष्येऽहमिति वाचमुदीरयेत् ॥ १८२ ॥
आवाहयेत्यनुज्ञातो विश्वेदेवास आगतम् ॥
विश्वेदेवाः शृणुतेममिति मन्त्रद्वयं पठेत् ॥ १८३ ॥
सोमेन सह राज्ञेति केचित्पठन्त्यदोऽपि च ॥
व्याहृत्य मन्त्रमावाह्य हस्ते दत्वा पवित्रकम् ॥ १८४ ॥
अर्चयेत्तं द्विजं पुष्पैर्दद्यादर्घ्यं करे पुनः ॥
विश्वेभ्यस्त्वेष देवेभ्यस्तुभ्यमर्घ्यः प्रदीयते ॥ १८५ ॥
या दिव्या इति मन्त्रेण पाणौ विप्रस्य तं क्षिपेत् ॥
अपसव्यमतः कृत्वा निर्वर्त्य वैश्वदैविकम् ॥ १८६ ॥
आपो भूमिगताः केचिदादित्येत्यभिमन्त्र्य च ॥
पुनस्ताभिः कराभ्यां च कुर्वन्ति मुखमार्जनम् ॥ १८७ ॥
उदकं गन्ध-धूपांश्च वासांसि चन्दनं स्रजः ॥
दत्वाऽपसव्यवद्भूत्वा दद्यात्पितृकुशासनम् ॥ १८८ ॥
सोदकान्द्विगुणं भुग्नान्सतिलान्सकुशानपि ॥
गोकर्णमात्रकान्साग्रान्प्रदद्याद्वामपार्श्वतः ॥ १८९ ॥
चतुर्थ्यन्तं सगोत्रं च पितृनाम च शर्मवत् ॥
उच्चार्य पदयोस्तद्वदिदं तुभ्यं कुशासनम् ॥ १९० ॥

१. B. E. and F. read द्विगुणीभूतान् for द्विगुणं भुग्नान्.

पित्रर्थमर्घ्यपात्राणि सम्पूज्य दक्षिणामुखः ॥
तिलोसीत्येतदुच्चार्य यवस्थाने तिलान्क्षिपेत् ॥ १९१ ॥
भूलग्नसव्यजानुः सन्पितृतीर्थेन चाऽत्वरः ॥
पितृध्यानमनाः कुर्यात्पितृकार्यमशेषतः ॥ १९२ ॥
आवाहयिष्ये पित्रादीननुज्ञाऽऽवाहयेति च ॥
उशन्तस्त्वेति प्रोदीर्य तथाऽयन्तु न इत्यपि ॥ १९३ ॥
अन्येऽप्यपहतासुरा इत्याद्यपि पठन्ति हि ॥
अत्रविघ्नव्यपोहार्थं वक्तव्यमिति केचन ॥ १९४ ॥
प्राग्वाद्धिप्रार्चनं कार्यं प्राग्वदर्घ्यप्रसेचनम्[1] ॥
प्राग्वन्मन्त्रं समुच्चार्य प्राग्वच्च मुखमार्जनम् ॥ १९५ ॥
एते तिलास्तु विधिना शशिलोकतस्तु
प्राहृत्य भोजनहितेन शुभाय धन्याः ॥
क्षिप्त्वा मलानि पुरुषस्य च तर्पणाद्यैर्
ये घ्नन्ति तेषु भुवि सत्सु कुतो भयं स्यात् ॥ १९६ ॥
तिलोऽसि तारापति[2]दैवतोऽसि
हितोऽस्यशेषपितृ-देवतानाम् ॥
कर्तासि तृप्तिं परमां पितॄणां
मुक्त स्ततस्त्वं विधिसम्भवोऽसि ॥ १९७ ॥
अर्घ्यपात्राणि सर्वाणि[3] कृत्वा तान्याद्यपात्रके ॥
पितृभ्यस्थानमसीति न्युब्जं कुर्यादधश्च तत् ॥ १९८ ॥
यस्तूद्धरेत्तदज्ञानादर्घ्यपात्रं तु पैतृकम् ॥
तद्धि श्राद्धमभोज्यं स्यात्क्रुद्धैः पितृगणैर्गतैः ॥ १९९ ॥
आश्रित्य प्रथमं पात्रं तिष्ठन्ति पितरो नृणाम् ॥
श्राद्धे तस्मान्न तद्विद्वानुद्धरेत्प्रथमं सुधीः ॥ २०० ॥
वाचयेत्परिपूर्णं तु वासो दत्वा विधानतः ॥
नत्वा[4] सर्वान्द्विजान्पृच्छेत्करिष्येऽग्नाविति द्विजः ॥ २०१ ॥
अस्त्वेतत्परिपूर्णं तु ब्रूयुरेते द्विजातयः ॥
ससर्पि पात्रमादाय[5] सापिधानं विधानतः ॥ २०२ ॥

---

१. C. reads °प्रसेवनं for °प्रसेचनम्. २. B. reads चंद्रासुत° for तारापति°. ३. E. reads पवित्राणि च त्रीण्येव for अर्घ्यपात्राणि सर्वाणि. ४. A. B. D. E. and F. read भूत्वा for नत्वा. ५. A. B. D. E. and F. read भाजनम् for पात्रम्.

कुरुष्वेति ह्यनुज्ञातो जुहोत्यग्नौ ततः पुनः ॥
भोजने पितृविप्राणामिति मन्त्रमुदीरयेत् ॥ २०३ ॥

अग्निशब्दं चतुर्थ्येकवचनान्तं समुच्चरेत् ॥
कव्यवाहनशब्दं च सोमं पितृमदित्यपि ॥ २०४ ॥

पङ्क्तिमूर्धन्यमेवात्र पृच्छेदिति हि केचन ॥
पितृश्राद्धे प्रधानत्वात्सामस्त्येनाथ वा पुनः ॥ २०५ ॥

तूष्णीं यत्र तु होमादौ प्रजापतिस्तु तत्र तु ॥
तृतीयं मनसा दद्याद्यमायास्त्विति वा पुनः ॥ २०६ ॥

अहन्येवास्मिंस्तस्मिन्वा संवादोभून्मनोर्गिरः ॥
अहव्या वाग्यतो वाणी अभूद्यज्ञे प्रजापतेः ॥ २०७ ॥

अग्नावाहुतयः प्रोक्तास्तिस्र एव मनीषिभिः ॥
अग्निवद्विप्रपात्रेषु पश्चात्तज्जुहुयाद्द्विजः ॥ २०८ ॥

अग्नौकरणशेषं तु पितृपात्रेषु क्षापयेत् ॥
प्रतिपाद्य पितॄणां तु दद्याद्वै वैश्वदैविके ॥ २०९ ॥

यश्चाग्नौकरणं दद्यात्पितृविप्रकरेषु च ॥
तेनोच्छेषितमेतत्स्यात्समाप्तिस्तावतैव तु ॥ २१० ॥

पितरः करवक्त्राश्च वन्हिवक्त्राश्च देवताः ॥
अतःपाणौ न तद्देयं पात्रे देयं कुशान्विते ॥ २११ ॥

वैश्वदेविकविप्राणां पात्रे वा यदि वा करे ॥
अनाग्निकस्तु तद्दद्यात्प्रथमं वैश्वदैविके ॥ २१२ ॥

हुतशेषमशेषाणां पात्रे दद्याद्द्विजोत्तमः ॥
पृच्छेत्सर्वांश्च यत्कृत्यं सामान्येन द्विजोत्तमान् ॥ २१३ ॥

दत्वाऽग्नौकरणं चान्यत् विप्राणां तृप्तिकृद्धविः ॥
परिवेष्यमिति ब्रूयुस्ततो विधिरनन्तरम् ॥ २१४ ॥

प्रागग्नौकरणं दद्याद्दत्वा चान्यत्तु तृप्तिकृत् ॥
एकीकृतं तु भुञ्जानाः प्रीणयन्ति नृणां पितॄन् ॥ २१५ ॥

---

१. A. and B. read °मूर्धान° for °मूर्धन्य°. २. B. and E. read सामगान् for सामस्त्येन. ३. A. reads अहव्यकव्यतो वाणी for अहव्या वाग् यतो वाणी. ४. A. B. D. E. and F. read कव्य° for कर°. ५. A. reads विप्रांश्च for सर्वांश्च. ६. A. reads विप्रुद्धिमान् for द्विजोत्तमान्.

परिवेष्य हविः सर्वं तदर्थं यच्च वै श्रुतम् ॥
अभिमन्त्र्य ततः पात्रे आपोशानप्रदानवत् ॥ २१६ ॥
अन्नपूर्णस्य पात्रस्य कर्तव्यमभिषेचनम् ॥
अपो दत्वा तु सङ्कल्प्यमेष श्राद्धविधिर्वरः ॥ २१७ ॥
वर्जितानि न देयानि पितृप्रीतिं विजानता ॥
हविष्याणि प्रदेयानि वक्ष्यमाणानि वर्जयेत् ॥ २१८ ॥
निष्पावान् राजमाषांश्च कुलित्थान् कोरदूषकान् ॥
मसूरान् शीतपाकं च पुलाकं शणमर्कटाः ॥ २१९ ॥
आढक्यः सितसिद्धार्थं वल्लानि स्विन्नधान्यकम् ॥
पिण्याकं परिदग्धं च मथितं च विवर्जयेत् ॥ २२० ॥
नापि नीरस-निर्गन्धं करञ्जं सर्वसक्तुकम् ॥
अप्रोक्षितं च यत्किञ्चित्पर्युषितं विवर्जयेत् ॥ २२१ ॥
लोहितान्वृक्षनिर्यासान्प्रत्यक्षलवणानि च ॥
कृतकृष्णानि लवणं सर्वाः पलाण्डुजातयः ॥ २२२ ॥
कृष्णजीरक-वंशाग्रास्तृणानि च विवर्जयेत् ॥
कुम्भिका-यूप-पालङ्क्यः कटूफलं तण्डुलीयकम् ॥ २२३ ॥
नीलिका च सितच्छत्रा शोभाञ्जन-कुसुम्भिकाः ॥
कोविदार-करञ्जौ च सुमुखा मूलकं तथा ॥ २२४ ॥
कूष्माण्डं गौरवृन्ताकं बृहत्याश्च फलानि च ॥
करीरफल-पुष्पाणि विडङ्गं मरिचानि च ॥ २२५ ॥
जम्भारिका सुजम्बीरा सुपवी बीजपूरकाः ॥
जम्ब्वलाबूनि पिप्पल्यः पटोलं पिण्डमूलकम् ॥ २२६ ॥
मसूराञ्जनपुष्पं च श्राद्धे दत्वा पतत्यधः ॥
विषच्छन्नहतं मांसमन्यच्च चिरसंस्थितम् ॥ २२७ ॥
नित्यं श्राद्धेऽपि वर्ज्यं स्याच्छिद्ध्वराह-चकोरयोः ॥
स्वायम्भुवादिभिः सर्वैर्मुनिभिर्धर्मदर्शिभिः ॥ २२८ ॥

---

१. A. reads अभिमन्त्रणम् for अभिषेचनम्. २. A. reads °कीर्ति for °प्रीतिं; while B. and F. read °तृप्ति. ३. B. E. and F. read चित्रधान्यकम् for स्विन्नधान्यकम्. ४. C. reads कृताः कृष्णतिलावर्णाः for कृतकृष्णानि लवणं. ५. A. B. D. E. and F. read °वार्ताकं for °वृन्ताकं.

निषिद्धानि न देयानि पितृणामहितानि च ॥
एकेन किञ्चित् अपरेण किञ्चित् किञ्चिच्च किञ्चिच्च परैर्मुनीन्द्रैः ॥
श्राद्धे निषिद्धं ह्यशनादि विद्वन्सर्वं पितॄणां ननु किञ्च देयम् ॥२२९॥
सौवीर-तिक्तैर्लवणादिकैस्तत्पात्रस्य शुद्धिर्भवतीह यैस्तु ॥
तद्बीजपूरान्मरिचादियोगात्सिद्धं प्रदेयं ननु दुष्यतीह ॥ २३० ॥
श्राद्धे तु यस्य द्विज दीयमानं पित्रादिकस्येह भवेन्मनुष्यैः ॥
यद्वस्तु यस्येह मनस्यभीष्टमासीत्पुरा तस्य तदेव देयम् ॥२३१॥
दातुश्च यस्मिन्मनसोऽभिलाषः श्रद्धा भवेत्तत्र तु दीयमाने ॥
श्राद्धेऽपि देयं विधिवत्तदेव तद्दत्तमक्षय्यमिति प्रवादः ॥२३२॥
आनीतमम्भो निशि यत्कथञ्चित् यत्पाणिदत्तं भवतीह विद्वन् ॥
हेमाम्बुनिक्षेपहरिस्मृतिभ्यामच्छिद्रतामेति पराशरोक्तिः ॥२३३॥
यत् क्षीरसारैक्षवखण्डयोगाच्छाखाभिधेयं भवतीह विद्वन् ॥
प्राग्यद्गुधूपान्मरिचादियोगात् पाकस्य सिद्धिं प्रवदन्ति तज्ज्ञाः ॥२३४॥
व्रीहयो यव-गोधूमा मुद्गा माषास्तिलास्तथा ॥
नीवारः श्यामकाद्यं च अकृष्टसम्भवानि च ॥ २३५ ॥
आरण्यकालशाकादि प्रतिषिद्धापराणि च ॥
माहेयीक्षीरमध्वादि खड्गादिपिशितानि च ॥ २३६ ॥
शर्करा-गुड-खण्डादि संशुद्धं क्षौद्रमेव च ॥
पितृश्राद्धे हविर्मुख्यं यद्वा तद्वाप्यलाभतः ॥ २३७ ॥
यद्देहिनामत्र शरीरपुष्ट्यै धाता ससर्जाशननाम किञ्चित् ॥
तत्सर्वधान्यान्नमिति ह्यवादि त्रेधा मुनीन्द्रेण पराशरेण ॥ २३८ ॥
शाभावरस्थादिककम्बुजाति यत्किञ्चिदस्मिंस्तुषसारभूतम् ॥
आरण्यजं वा कृषिसम्भवं वा सस्यं तदुक्तं मुनिनाऽशनेषु ॥२३९॥
काण्डोद्भवं यत्त्वशनेषु किञ्चित् पङ्कोद्भवं वा स्थलसम्भवं वा ॥
यत्तुच्छसारं बहुसारमस्मिन्सर्वाणि धान्यानि च शूकवन्ति ॥ २४० ॥
यत्सर्वसारं सतुषं च भक्ष्यं निःशूकशूकान्वितमत्र किञ्चित् ॥
आप्यायनं देहभृतां च सद्यस्तत्प्रोक्तमन्नं ह्यशनेन सद्भिः ॥ २४१ ॥

---

१. A. reads तदक्षयं चेति जनप्रवादः; while B. E. and F. substitute the word श्रुतिः in place of प्रवादः. २. A. reads °मध्यादि instead of °मध्वादि ३. Only B. reads तच्छस्यधान्यान्नमिति त्रिधैवमूचे. ४. A. B. E. and F. read भाष्यैः for अन्नं. ५. B. E. and F. read अशनेषुत्थानम् for अशनेन सद्भिः

प्रतिश्रुतं च भुक्तं च कटुतिक्तं च यत्तथा ॥
केचिदूचुरदेयानि यत् खातप्रतिरोपितम् ॥ २४२ ॥
तुण्डिकेराण्यलाबूनि लिङ्गाख्यानि च यानि तु ॥
श्राद्धे नित्यमदेयानि प्राह सत्यवतीपतिः ॥ २४३ ॥
सोङ्कारया वै गायत्र्या दशावर्तितया जलम् ॥
पूतं तु तेन तत् प्रोक्ष्यं सर्वमन्नं विशुद्धये ॥ २४४ ॥
शुद्धवत्योथ कूष्माण्ड्यः पावमान्यस्तरत्समाः ॥
पूतं तु वारिणैताभिरन्नशोधनमुत्तमम् ॥ २४५ ॥
तद्विष्णोरिति मन्त्रेण गायत्र्या च प्रयत्नवान् ॥
प्रोक्षयेदशनं सर्वं शूद्रदृष्ट्यादिशुद्धये ॥ २४६ ॥
गृहाग्नि-शिशु-देवानां यतीनां ब्रह्मचारिणाम् ॥
तावन्न दीयते किञ्चिद्यावत् पिण्डान्न निर्वपेत् ॥ २४७ ॥
कांजिकं दधि तक्रं च शृतं चाशृतमेव वा ॥
पूर्वाह्णे न प्रदातव्यं एकोद्दिष्टेऽथ पार्वणे ॥ २४८ ॥
आपिण्डदानतो दद्याद्यत्किञ्चिच्छ्राद्धवासरे ॥
तेनैव पितरो यान्ति श्राद्धं गृह्णन्ति नैव च ॥ २४९ ॥
परिवेषयेत्समं सर्वं न कार्यं पङ्क्तिभेदनम् ॥
पङ्क्तिभेदी वृथापाकी नित्यं ब्राह्मणनिंदकः ॥
आदेशी वेदविक्रेता पञ्चैते ब्रह्मघातकाः ॥ २५० ॥
यद्येकपङ्क्त्यां विषमं ददाति स्नेहाद्भयाद्वा यदि चार्थलोभात् ॥
वेदैश्च दृष्टं ऋषिभिश्च गीतं तद्ब्रह्महत्यां मुनयो वदन्ति ॥ २५१ ॥
देवान्पितॄन्मनुष्यांश्च वह्निमभ्यागतांस्तथा ॥
अनभ्यर्च्य तु भुञ्जानो वृथापाक इति स्मृतः ॥ २५२ ॥
पृथ्वी ते पात्रमित्येतद्द्यौरपीति पिधानकम् ॥
एतद्वै ब्राम्हणस्यास्ये जुहोमि चामृतेऽमृतम् ॥ २५३ ॥
इदं विष्णुरिति ह्येतन्मन्त्रमुच्चार्य चापरे ॥
द्विजाङ्गुष्ठं च तत्रान्ने निवेशयन्ति तद्विदः ॥ २५४ ॥

१. A. B. D. E. and F. read शुक्तं for भुक्तं. २. B. D. E. and F. read तुण्डीरका° for तुण्डिकेरा°. ३. A. reads ब्रह्मचारितपस्विनाम्. for यतीनां ब्रह्मचारिणाम्. ४. A. D. and F. read पूर्वमेव न दातव्यं for पूर्वाण्हे न प्रदातव्यं. ५. In A. and D. this verse is omitted. ६. B. and F. read तद्द्विजाः for तद्विदः

जप्त्वा व्याहृतिभिः सार्धं गायत्रीं मधुमतीरिति ॥
सङ्कल्प्यान्नमपोशानं ब्रूयाच्च मधुमध्विति ॥ २५५ ॥
आपोशानं प्रदेयान्नं न तत्संकल्पयेद्द्विजः ॥
संकल्प्यान्नरके याति निराशैः पितृभिर्गतैः ॥ २५६ ॥
आपोशानोदके विप्रपाणौ तिष्ठति यो द्विजः ॥
संकल्पं कुरुतेऽज्ञानात् स्युस्तस्य पितरो हताः ॥ २५७ ॥
जप्त्वा वै वैष्णवान्मन्त्रान्विप्रान्ब्रूयाद्यथासुखम् ॥
भुञ्जीरन्वाग्यतास्तेतु पितृ-देवहितैषिणः ॥ २५८ ॥
अत्युष्णमशनं कार्यं वचो वाच्यं पितृष्वदः ॥
शूद्रं च शूकर-ध्वाङ्क्ष-कुक्कुटानपनाययेत् ॥ २५९ ॥
भुञ्जते ब्राम्हणा यावत्तावत्पुण्यं जपेज्जपम् ॥
पावमान्यानि वाक्यानि पितृसूक्तानि चैवहि ॥ २६० ॥
ततस्तृप्तान् द्विजान्पृच्छेत्तृप्तास्थेत्यनुशासनम् ॥
तृप्तास्मेति द्विजा ब्रूयुस्तदन्नं विकिरेद्भुवि ॥ २६१ ॥
सकृत्सकृत्त्वपो दत्वा शेषमन्नं निवेदयेत् ॥
यथानुज्ञां तथा कृत्वा पिण्डांस्तदनु निर्वपेत् ॥ २६२ ॥
यद्यद्भुक्तं द्विजैरन्नं तत्तदादाय विस्तरैः ॥
स्थालीपाकं तिलोपेतं दक्षिणाशामुखस्ततः ॥ २६३ ॥
अवनिज्य तिलान्दर्भान्पिण्डार्थमवनीतले ॥
तस्मिंश्च निर्वपेत्पिण्डान् गोत्रनामकपूर्वकान् ॥ २६४ ॥
ये देवलोकं पितृलोकमापुः प्राप्तास्तथैवं नरकं नरा ये ॥
अग्नौ हुतेन द्विजभोजनेन तृप्यन्ति पिण्डैर्भुवि तैः प्रदत्तैः ॥२६५॥
यदन्नं लेपरूपं तु क्रमात्तेषु च निक्षिपेत् ॥
प्रक्षाल्य सलिलै तत्र अवनेजनवत्पुनः ॥ २६६ ॥

---

१. A. D. and F. read सार्द्धं for सार्धं. २. A. reads संकल्पते for संकल्पयेत्. ३. A. reads संकल्प्य for संकल्प्यान्. ४. A. and F. do not mention this verse. ५. A. and B. read तेन for तस्य. ६. A. reads अभ्यक्तम् for अत्युष्णम्. ७. A. B. D. E. and F. read पितृप्रियम् for पितृष्वदः. ८. C. reads अपलापयेत् for अपनाययेत्. ९. B. D. and E. read पावमान्यश्च and A. reads पावनानि तु. १०. A. reads विचक्षणम् for विस्तरैः. ११. B. D. E. and F. read स्थालीपाकतिलोपेतं. १२. F. reads ते for तैः.

निवृत्तानर्चयेत्पिण्डान् पुष्प-गन्धविलेपनैः ॥
दीप-वासः प्रदानेन पितॄनर्च्य[1] समाहितः ॥ २६७ ॥
वासो वस्त्रदशां[2] दद्याद्विधिवन्मन्त्रपूर्वकम् ॥
केचिदूर्ध्वमाऽविकं लोम केचिन्मतं न तत्त्विति ॥ २६८ ॥
पञ्चाशद्वार्षिको[3] यस्तु दद्याल्लोम स्वमंशुकम् ॥
तदवश्यं प्रदेयं स्याद्विधिसम्पूर्णताकृते ॥ २६९ ॥
पवित्रं यदि वा दर्भं करात्तत्र विनिःक्षिपेत् ॥
प्रक्षाल्य हस्तावाचम्य प्रोक्षणादिकमाचरेत् ॥ २७० ॥
निर्वपन्त्यपरे पिण्डान् प्रागेव द्विजभोजनात् ॥
खादयेयुः शकुन्तास्तान्पितॄणां तृप्तितत्पराः ॥ २७१ ॥
मातामहानामप्येवं विप्रानाचामयेदथ ॥
वाचयेत द्विजान्स्वस्ति दद्याच्चैवाक्षयोदकम् ॥ २७२ ॥
दक्षिणा हेम देवानां पितॄणां रजतं तथा ॥
शक्त्या दद्यात्स्वधाकारं व्याहरेच्छ्राद्धकृद्द्विजः ॥ २७३ ॥
तिस्रन्पिण्डान्तिके ब्रूयाद्वाचयिष्ये स्वधामिति ॥
वाच्यतामिति विप्रोक्तिः प्रवदेन्मन्त्रपूर्वकम् ॥ २७४ ॥
स्वधोच्यतामिति ब्रूयादस्तु स्वधेति तद्वचः ॥
ऊर्जं वहन्तीरुच्चार्य जलं पिण्डेषु सेचयेत् ॥ २७५ ॥
याः काश्चिद्देवताः श्राद्धे विश्वशब्देन जल्पिताः[5] ॥
प्रीयतामिति च ब्रूयाद्विप्रैरुक्तमिदं जपेत् ॥ २७६ ॥
दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च ॥
श्रद्धा च नो माव्यगमद्बहु देयं च नोऽस्त्विति ॥ २७७ ॥
न्युब्जापिण्डार्घ्यपात्राणि कृत्वोत्तानानि संश्रवात् ॥
क्षिप्त्वा पिण्डेष्वतो विप्रान्पितृपूर्वं विसर्जयेत् ॥ २७८ ॥
वाजे वाजे इति ह्युक्त्वा आमावाजस्य तान् बहिः ॥
ब्रूयात्प्रदक्षिणीकृत्य क्षमध्वमित्थमित्यपि ॥ २७९ ॥
पिण्डानां मध्यमं पिण्डं पितॄन्ध्यायन् समाहितः ॥
[6]प्राशयेत्पुत्रकामां तु भार्यां तच्छ्राद्धकृन्नरः ॥ २८० ॥

---

१. A. B. D. E. and F. read ध्यायन् for अर्च्य. २. F. reads °दशा° for °दशां°; while C. reads दत्वा for अत्र. ३. B. E. and F. read अशीतिवार्षिको for पञ्चाशद्वार्षिको. ४. C. reads अक्षतो° for अक्षयो°. ५. D. reads सूचिताः for जल्पिताः; while B. E. and F. read कीर्तिताः for the same. ६. A. reads this line as—प्राशयेत्पुत्रकामा या भार्या तं श्राद्धदस्य च.

स्नुषा वापि सगोत्रा वा पुं[1]त्रकामा द्विजाज्ञया ॥
आधत्त पितरो गर्भं व्याहरेयुर्द्विजातयः ॥ २८१ ॥
महारोगगृहीतो वा तद्रोगोपशमाय च ॥
घ्नन्तु मे पितरो रोगमित्युक्त्वा प्राशये[2]च्चरुम् ॥ २८२ ॥
अन्यानप्सु हुताशे वा क्षिपन्पिण्डान्द्विजाय वा ॥
अजाय वा प्रदद्याच्च पश्चाद्विप्रविसर्जनम् ॥ २८३ ॥
उद्धा[3]रं पैतृकादेके पाकान्मातामहाय च ॥
[4]एकैनेव हि चैकेऽपि षट्दैवत्यादिति श्रुतिः ॥ २८४ ॥
उद्धारं पितृकादेके पाकान्मातामहाय तु ॥
एकैनेव हि गच्छन्ति भिन्न गोत्रास्तथा द्विजाः ॥ २८५ ॥
निदध्युः पृथगुद्धृत्य पात्रे पिण्डार्थमोदनम् ॥
तथा पाकमपीच्छन्ति भिन्नगोत्रतया द्विजाः ॥ २८६ ॥
आ[5]ब्दिके ऽक्षय्यस्थाने तु वक्तव्यमुपतिष्ठताम् ॥
अभिरम्यतां स्वधास्थाने विप्रोक्तिरभिरताः स्मह ॥ २८७ ॥
ऊर्ध्वं तु प्रोष्ठपद्यास्तु प्रतिपदादिकाश्च याः ॥
पुण्यास्तास्तिथयः सर्वा दशापि सहपञ्चभिः ॥ २८८ ॥
तेषां चतुर्दशी प्रोक्ता[6] ये शस्त्रेण हता नराः ॥
पितृभे च[7] त्रयोदश्यां गयाश्राद्धादिकं फलम् ॥ २८९ ॥
न तत्र पातयेत्पिण्डान् सन्तानेप्सुः कदाचन ॥
पिण्डदानेन कवयो वंशक्षयं वदन्ति हि ॥ २९० ॥
सन्तानेप्सुस्त्रयोदश्यां न पिण्डान् पातयेन्नरः ॥
पातयेत्तमनिच्छंश्च प्राह सत्यवतीपतिः ॥
मघायुक्तत्रयोदश्यां पिण्डनिर्वपणं द्विजः ॥
स सन्तानो नैव कुर्यादित्यन्ये कवयो विदुः ॥ २९१ ॥
यः सङ्क्रमे भानुदिने च कुर्यादुपोषणं पारणकं द्विजन्मा ॥
पिण्डप्रदानं पितृभे च तद्वज्ज्येष्ठो विपद्येत सुतो ऽनुजो वा॥२९२॥

---

१. B. and F. read प्राप्नुते पुत्रकांक्षिणी for पुत्रकामा द्विजाज्ञया. २. A. D. and F. read च तम् instead of चरुम्. ३. A. reads उद्धरेत् for उद्धारं ४. In A. B. D. E. and F. this verse is not mentioned. ५. B. reabs अद्वैते for आब्दिके. ६. A. B. D. E. and F. read पुण्या for प्रोक्ता ७. Only C. reads पितृभ्यश्च for पितृभे च.

पुत्रदा पञ्चमी कर्तुस्तथैवैकादशी तिथिः ॥
सर्वकामा त्वमावास्या पञ्चम्यूर्ध्वं शुभाः स्मृताः ॥ २९३ ॥
अन्नं क्षीरं घृतं क्षौद्रमैक्षवं कालशाकवत् ॥
एतैस्तु तर्पितैर्विप्रैस्तर्पिताः पितरो नृणाम् ॥ २९४ ॥
देशः पर्व च कालश्च हविः पात्रं च सत्क्रियाः ॥
पितृ-दैविकचित्तत्वं योगश्चेतिपितृभादिभिः ॥ २९५ ॥
शौचं च पात्रशुद्धिश्च श्रद्धा च परमा यदि ॥
अन्नं तत्तृप्तिकृच्छ्राद्ध एतत्खलु न चाऽमिषे ॥ २९६ ॥
यस्तु प्राणिवधं कृत्वा मांसेन तर्पयेत् पितॄन् ॥
सोऽधिद्वाश्चंदनं दग्ध्वा कुर्यादङ्गारविक्रयम् ॥ २९७ ॥
क्षित्वा कूपे यथा किञ्चिद्बाल आदातुमिच्छति ॥
पतत्यज्ञानतः सोऽपि मांसेन श्राद्धकृत्तथा ॥ २९८ ॥
सर्वथाऽन्नं यदा नस्यात्तदेवामिषमाश्रयेत् ॥
ब्राम्हणश्च स्वयं नाद्यात्तच्च श्वादिहतं यदि ॥ २९९ ॥
अथान्यत् पापमृत्यूनां शुद्ध्यर्थं श्राद्धमुच्यते ॥
कृतेन तेन येषां तु प्रदत्तमुपतिष्ठति ॥ ३०० ॥
दन्ति-शृङ्गि-गर-व्याल-नीराग्नि-बन्धनैस्तथा ॥
विद्युन्निर्घात-वृक्षैश्च विप्रैश्च स्वात्मना हताः ॥ ३०१ ॥
व्रणसञ्जातकोटैश्च म्लेच्छैश्चैव हतास्तथा ॥
पापमृत्यव एवैते शुभगत्यर्थमुच्यते ॥ ३०२ ॥
नारायणबलिः कार्यो विधानं तस्य चोच्यते ॥
ऊर्ध्वं षण्मासतः कुर्यादेके उर्ध्वं तु वत्सरात् ॥ ३०३ ॥
तेषां पापव्यपोहार्थं कार्यो नारायणो बलिः ॥
धौतवासाः शुचिः स्नात एकादश्यामुपोषितः ॥ ३०४ ॥
शुक्लपक्षे तु सम्पूज्य विष्णुमीशं यमं तथा ॥
नदीतीरं शुचिर्गत्वा प्रदद्याद्दश पिण्डकान् ॥ ३०५ ॥

---

१. A. reads अनन्यवृत्तिकृच्छ्राद्धे for अन्नं तत्तृप्तिकृच्छ्राद्धे. २. B. D. E. and F. read नूनमेतत् instead of एतत्खलु. ३. A. reads चाद्यात्तच्च स्वादु हितं यदि for नाद्यात्तच्च श्वादिहतं यदि. ४. A. reads अपमृत्यूनां for पापमृत्यूनां.

क्षौद्रा-ऽऽज्य-तिलसंयुक्तान् हविषा दक्षिणामुखः ॥
अभ्यर्च्य पुष्प-धूपाद्यैस्तन्नाम-गोत्रपूर्वकान् ॥ ३०६ ॥
विष्णुध्यानमनाः कुर्यात्ततः स्नानमम्भसि क्षिपेत् ॥
निमन्त्रयेत विप्रांश्च पंच सप्ताऽथ वा नव ॥ ३०७ ॥
द्वादश्यां कुतपे स्नाता-धौतवस्त्रान्समागतान् ॥
कृष्णाराधनकृद्भक्त्या पादप्रक्षालितांच्छुभान् ॥ ३०८ ॥
दक्षिणाप्रवणे देशे शुचिस्तानुपवेशयेत् ॥
द्वौ दैवे तु त्रयः पित्र्ये प्राङ्मुखोदङ्मुखान्द्विजान् ॥ ३०९ ॥
आसना-ऽऽवाहनार्घ्यं च कुर्यात् पार्वणवद्द्विजः ॥
भोजयेद्भक्ष्य-भोज्यैश्च क्षौद्रैक्षवाज्य-पायसैः ॥ ३१० ॥
तृप्तान् ज्ञात्वा ततो विप्रांस्तृप्तिं पृच्छेद्यथाविधि ॥
भोज्येन तिलमिश्रेण हविष्येण च तान् पुनः ॥ ३११ ॥
पञ्च पिण्डान्प्रदद्याद्वै दैवं रूपमनुस्मरन् ॥
विष्णु-ब्रह्म-शिवेभ्यश्च त्रीन्पिण्डांश्च यथाक्रमम् ॥ ३१२ ॥
यमाय सानुगायाथ चतुर्थं पिण्डमुत्सृजेत् ॥
मृतं सञ्चिन्त्य मनसा गोत्र-नामकपूर्वकम् ॥ ३१३ ॥
विष्णुं स्मृत्वा क्षिपेत्पिण्डं पञ्चमञ्च ततः पुनः ॥
दक्षिणाभिमुखश्चैव निर्वपेत्पञ्च पिण्डकान् ॥ ३१४ ॥
आचम्य ब्राह्मणःपश्चात्प्रोक्षणादिकमाचरेत् ॥
हिरण्येन च वासोभिर्गोभिर्भूम्या च तान्द्विजान् ॥ ३१५ ॥
प्रणम्य शिरसा पश्चाद्विनयेन प्रसादयेत् ॥
तिलोदकं करे दत्वा प्रेतं संस्मृत्य चेतसि ॥
गोत्रपूर्वं क्षिपेत्पाणौ विष्णुं बुद्धौ निवेश्य च ॥ ३१६ ॥
बहिर्गत्वा तिलाम्भस्तु तस्मैदद्यात्समाहितः ॥
मित्रभृत्यैर्मिश्रैः सार्द्धं पश्चाद्भुञ्जीत वाग्यतः ॥ ३१७ ॥
एवं विष्णुमते स्थित्वा यो दद्यात्पापमृत्यवे ॥
समुद्धरति तं प्रेतं पराशरवचो यथा ॥ ३१८ ॥
सर्वेषां पापमृत्यूनां कार्यो नारायणो बलिः ॥
तस्मादूर्ध्वं च तेभ्यो हि प्रदत्तमुपतिष्ठति ॥ ३१९ ॥

---

१. A. and D. substitute हर्याराधन° for कृष्णाराधन°. २. B. E. and F. read °प्लवने for °प्रवणे.

एवं श्राद्धैः समस्तान्यः सन्तर्पयति वै पितॄन् ॥
ददत्यनुत्तमांस्तस्य पितरस्तर्पिता वरान् ॥ ३२० ॥
विद्या-तपोसुखान्पुत्रान्पूज्यत्वमथ योषितः ॥
सौभाग्यैश्वर्य-तेजश्च बलं श्रैष्ठ्यमरोगताम् ॥ ३२१ ॥
यशः शुचित्वं कुप्यानि सिद्धिं चैवात्मवाञ्छिताम् ॥
यशश्च दीर्घमायुश्च तथैवानुत्तमां मतिम् ॥ ३२२ ॥
अथान्यत्किञ्चिदाख्यामि पितॄणां तु हितार्थं वै ॥
कृत्वेन स्वल्पकेनापि प्राप्नुवन्ति विधेः फलम् ॥ ३२३ ॥
उच्छिष्टस्य विसर्गार्थं विधिस्तात्कालिको हि यः ॥
श्राद्धैर्विहितं यत्प्राक् पितॄणां हितकाङ्क्षिभिः ॥ ३२४ ॥
आदाय सर्वमुच्छिष्टमवनेजनवद्बुधः ॥
तत्रैव निक्षिपेत् भूमौ तिल-दर्भसमन्वितम् ॥ ३२५ ॥
नरकेषु गता ये वै अपमृत्युमृता मम ॥
एतदाप्यायनं तेषां चिरायास्त्विति चोच्चरेत् ॥ ३२६ ॥
करस्य मध्यतो देवाः करपृष्ठेतु राक्षसाः ॥
पात्रस्यालम्भनादौ च तस्मात्तं न प्रदर्शयेत् ॥ ३२७ ॥
दर्भाश्च स्वयमानेया दक्षिणाप्रवणोद्भवाः ॥
तर्पणाद्युज्झिता ये वै इत्याद्यांश्च विवर्जयेत् ॥ ३२८ ॥
न कुशं कुशमित्याहुर्दर्भमूलं कुशःस्मृतः ॥
छिन्ना दर्भा इति प्रोक्तास्तदग्रं कुतपः स्मृतः ॥ ३२९ ॥
हरिता यज्ञिया दर्भाः पीतकाः पाकयाज्ञिकाः ॥
सकुशाः पितृदैवत्याच्छिन्ना वै वैश्वदैविकाः ॥ ३३० ॥
दर्भमूले स्थितो ब्रह्मा दर्भमध्ये जनार्दनः ॥
दर्भाग्रे शङ्करस्तस्थौ दर्भा देवत्रयान्विताः ॥ ३३१ ॥
अहन्येकादशे श्राद्धे प्रतिमासं तु वत्सरम् ॥
प्रतिसंवत्सरं कार्यमेकोद्दिष्टं तु सर्वदा ॥ ३३२ ॥

---

१. A. and D. read सुतान् in th place of वरान्. २. A. B. D. E. and F. read °शौर्य° instead of °ऐश्वर्य°. ३. A. B. D. E. and F. read ओजः for °तेजः . ४. A. reads यशोऽशौकिस्त्वकुप्यानि, while B. reads यशःकुप्यमशोकत्वं, also D. E. and F. read as B. ५. A. B. D. E. and F. read गतिम् in the place of मतिम्. ६. B. E. and F. read पितॄणां मुक्तिदायकम्. ७. A. reads सन्मनुः. ८. B. E. and F. read आलंबनात्पश्चात् instead of आलंभनादौ च. ९. B .C. D. and E. read °युच्छिन्नताः instead of °युज्झिताः.

एकस्य प्रथमं श्राद्धमर्वागब्दाच्च मासिकम् ॥
प्रतिसंवत्सरं चैव शेषं[1] त्रिपुरुषं स्मृतम् ॥ ३३३ ॥
सपिण्डीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः ॥
माता-पित्रोः पृथक्कार्यमेकोद्दिष्टं क्षयाहनि ॥ ३३४ ॥
सपिण्डिकरणादूर्ध्वं प्रतिसंवत्सरं द्विजः ॥
एकोद्दिष्टं प्रकुर्वीत पित्रोरप्यत्र पार्वणम् ॥
चतुर्दश्यां तु यच्छ्राद्धं सपिण्डीकरणे कृते ॥
एकोद्दिष्टविधानेन तत्कुर्याच्छस्त्रपातिते[2] ॥ ३३५ ॥
पित्रादयस्त्रयो यस्य शस्त्रपातास्त्वनुक्रमात् ॥
सम्भूतैः पार्वणं कुर्यादष्टकानि[3] पृथक् पृथक् ॥ ३३६ ॥
[4]सपिण्डीकरणादूर्ध्वं पितुर्यः प्रपितामहः ॥
स तु लेपभुगित्येव प्रलुप्तः पितृपिण्डतः ॥ ३३७ ॥
सपिण्डीकरणादूर्ध्वं कुर्यात्पार्वणवत्सदा ॥
प्रतिसंवत्सरं विद्वच्छागलेयो विधिः स्मृतः ॥ ३३८ ॥
सपिण्डता तु कर्तव्या पितुः पुत्रैः पृथक् पृथक् ॥
स्वाधिकारप्रवृत्तत्वादितरः श्राद्धकर्तृवत् ॥ ३३९ ॥
तीर्थश्राद्धं गयाश्राद्धं श्राद्धं वा परपान्थिकम् ॥
सपिण्डीकरणे कुर्यादकृते तु निवर्तते ॥
यस्य संवत्सरादर्वाक् सपिण्डीकरणं भवेत् ॥
प्रतिमासं तस्य कुर्यात् प्रतिसंवत्सरं तथा ॥ ३४० ॥
अर्वाक् संवत्सराद्वृद्धौ पूर्णे संवत्सरेऽपि च ॥
ये सपिण्डीकृताः प्रेता न तु तेषां पृथक्क्रिया ॥ ३४१ ॥
एकपिण्डीकृतानां तु पृथक्त्वं नोपपद्यते ॥
सपिण्डीकरणादूर्ध्वं मृते कृष्णचतुर्दशीम् ॥ ३४२ ॥
अर्वाग्संवत्सरादूर्ध्वं मृते कृष्णचतुर्दशीम् ॥
ये सपिण्डीकृतास्तेषां पृथक्त्वेनोपपद्यते ॥
पृथक्त्वकरणे तस्य पुनः कार्या सपिण्डता ॥ ३४३ ॥
स्त्रियं श्वश्र्वा पतिर्मात्रा तयासह सपिंडयेत् ॥
तत्सद्भावे पितामह्या तन्मात्रा चापरे विदुः ॥ ३४४ ॥

१. A. reads एकं for शेषं. २. A. reads घातिने instead of पातिते. ३. A. only subtitutes प्रतिसंवत्सरं in the place of अष्टकानि पृथक्. ४. This verse is not mentioned in A., ५. B. and E. read प्रति° instead of पितृ°.

नान्यथा तु पितामह्यां मातामह्यास्तथाऽपरे ॥
उदकं पिण्डदानं च सहभर्त्रा प्रदीयते ॥ ३४५ ॥
अपुत्रा ये मृताःकेचित्स्त्रियो वा पुरुषाऽपि वा ॥
तेषामपि च देयं स्यादेकोद्दिष्टं चे पार्वणम् ॥ ३४६ ॥
अपुत्राश्च मृता ये च कुमाराः संस्कृता अपि ॥
तेषां समानता न स्यान्न स्वधा नाभिरम्यताम् ॥ ३४७ ॥
भर्त्रा सपिण्डता स्त्रीणां कार्यैति कवयो विदुः ॥
स्वस्रा सहापरे तस्यास्तन्मात्रा चापरे विदुः ॥ ३४८ ॥
अनपत्येषु प्रेतेषु न स्वधा नाभिरम्यताम् ॥
एकोद्दिष्टेषु सर्वेषु न स्वधा नाभिरम्यताम् ॥ ३४९ ॥
मित्र-बन्धु-सपिण्डेभ्यः स्त्री-कुमारस्य चैव ही ॥
दद्याद्वै मासिकं श्राद्धं संवत्सरं तु नान्यथा ॥ ३५० ॥
अप्रत्ययगतश्चैव कुल-देशव्यवस्थया ॥
यो यथा क्रियया युक्तः स तथैव हि निर्वपेत् ॥३५१ ॥
दाढर्यार्थं दृश्यते रूढिर्मानवं लिङ्गमेव च ॥
दृढीकृता च विद्वद्भिर्लोकरूढिर्गरीयसी ॥ ३५२ ॥
विकल्पेषु च सर्वेषु स्वयमेकैकमादितः ॥
अङ्गीकरोति यं कर्ता स विधिस्तस्य नेतरः ॥ ३५३ ॥
बहून् हि याजयेद्यस्तु वर्णबाह्यांश्च नित्यशः ॥
मेच्छांश्च शौण्डिकांश्चैव स विप्रो बहुयाजकः ॥ ३५४ ॥
यश्च धैर्येण दुष्टात्मा गो-सुवर्णापहारकः ॥
सङ्गृहीतासवर्णास्त्रिः स विप्रो गण उच्यते ॥ ३५५ ॥
वर्तते यश्च चौर्येण सुवर्णेनापहारकः ॥
सङ्गृहीतसवर्णास्त्रि स विप्रो गौण उच्यते ॥ ३५६ ॥
मृते भर्तरि या नारी रहस्यं कुरुते पतिम् ॥
तस्य वैस्त्रावयेद्गर्भं सा नारी गणिका स्मृता ॥ ३५७ ॥
अन्यदत्ता तु या कन्या पुनरन्यत्र दीयते ॥
अपि तस्या न भोक्तव्यं पुनर्भूः सा प्रकीर्तिता ॥ ३५८ ॥
कैमारं पतिमुत्सृत्य यात्वन्यं पुरुषं श्रिता ॥
पुनः पत्युर्गृहं गच्छेत्पुनर्भूः सा द्वितीयका ॥ ३५९ ॥

१. B. D. E. and F. read न for च.

असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते ॥
सवर्णाय सपिण्डाय सा पुनर्भूस्तृतीयका ॥ ३६० ॥
प्राप्ते द्वादश वर्षेऽत्र या रजो न बिभर्ति हि ॥
धारितं तु तया रेतो रेतोधाः सा प्रकीर्तिता ॥ ३६१ ॥
या भर्तुर्व्यभिचारेण कामं चरति नित्यशः ॥
तस्या अपि न भोक्तव्यं सा भवेत्कामचारिणी ॥ ३६२ ॥
पतिं हित्वा तु या नारी गृहादन्यत्र गच्छति ॥
वरेषु रमते नित्यं स्वैरिणी सा प्रकीर्तिता ॥ ३६३ ॥
भर्तुः शासनमुल्लंघ्य स्वकामेन प्रवर्तते ॥
दीव्यन्ती च हसन्ती च सा भवेत्कामचारिणी॥ ३६४ ॥
पतिं विहाय या नारी सवर्णमन्यमाश्रयेत् ॥
वर्तते ब्राम्हणत्वेन द्वितीया स्वैरिणी तु सा ॥ ३६५ ॥
मृते भर्तरि या याति क्षुत्पिपासातुरा परम् ॥
तवाहमिति सम्भाष्य तृतीया स्वैरिणी तु सा ॥ ३६६ ॥
देश-कालाद्यपेक्ष्यैव गुरुभिर्या प्रदीयते ॥
उत्पन्नसाहसाऽन्यस्मै चतुर्थी स्वैरिणी तु सा ॥ ३६७ ॥
आसु पुत्रास्तु ये जाता वर्ज्यास्ते हव्य-कव्ययोः
तथैव पतयस्तासां वर्जनीयाः प्रयत्नतः ॥ ३६८ ॥
श्राद्धं तैश्च न कर्तव्यं प्रतिलोमविधानतः ॥
वैश्वश्राद्धं पितृश्राद्धं प्रतिलोमविधानतः ॥
वर्णाश्रमबहिःस्थास्ते संकीर्णजन्मसम्भवाः ॥ ३६९ ॥
मातृणां च पितृणां च स्वीयानां पिण्डदाः स्मृताः ॥
उपपतिसुतो यस्तु यश्चैव दीधिषूपतिः ॥ ३७० ॥
परपूर्वपतेर्जाताः सर्वे वर्ज्याः प्रयत्नतः ॥
अजापालादिजाताश्च विशेषेण तु वर्जयेत् ॥ ३७१ ॥
मृतानुगमनं नास्ति ब्राम्हण्या ब्रम्हशासनात् ॥
इतरेषु च वर्णेषु तपः परममुच्यते ॥ ३७२ ॥

---

१. A. reads विटेषु for वरेषु, २. A. and D. read °नुपेक्ष्यैव for °द्यपेक्ष्यैव. ३. A. reads विकीर्ण° for संकीर्ण.° ४. B. D. E. and F. read त्रयाणां for स्वीयानां. ५. B. D. E. also read नच पिंडदाः instead of पिंडदाः स्मृताः.

भर्तुश्चित्यां समारोहेद्या च नारी पतिव्रता ॥
अहन्येकादशी प्राप्ते पृथक्पिण्डे नियोजयेत् ॥ ३७३ ॥

श्रौतैश्च स्मार्तमंत्रैश्च दम्पत्यावेकतां गतौ ॥
एकमृत्युगतौ चैव वह्नावेकत्र तौ हुतौ ॥ ३७४ ॥

एकत्वं च तयोर्यस्माज्जातमाद्यावसानिकम् ॥
एकादशाहिकं श्राद्धमेकमेव स्मृतं बुधैः ॥ ३७५ ॥

आरुह्य भर्तुश्चितिमंगना या प्राप्नोति मृत्युं बहु सत्वयुक्ता ॥
एकादशाहे तु तयोर्विधेयं श्राद्धं पृथक्स्वर्गमपेक्ष्य सद्भिः ॥ ३७६ ॥

एकत्वमिच्छन्ति पतिप्रहीणा एकादशाहादिषु ये नृनार्यः ॥
ते स्वर्गमार्गं विनिहत्य कुर्युः स्त्रीसत्वघातान्नरकेऽधिवासम् ॥ ३७७ ॥

समानमृत्युना यस्तु मृतो भर्ता च योषिताम् ॥
तस्याः सपिण्डता तेन पिण्डमेकत्र[1] निर्वपेत् ॥ ३७८ ॥

स्त्रीपात्रं पतिपात्रे तु[2] सिंचयेदेकमेव हि[3] ॥
श्राद्धे[4] त्रिपुरुषे त्रीणि तत्प्रत्यक्षं पितॄन्प्रति ॥ ३७९ ॥

पत्या सह परासुत्वात्तेनैवास्याः सपिण्डता ॥
पितामह्यापि चान्यत्र ह्येतदाह पराशरः ॥ ३८० ॥

अन्यप्रीतौ न चान्यस्य तृप्तिः कुत्रापि दृश्यते ॥
एवं धीमानमुत्रापि तस्मान्नैकत्वमाश्रयेत् ॥ ३८१ ॥

एकत्वाश्रयणे धर्मो नार्या लुप्तो भवेद्ध्रुवम् ॥
तस्याः सुकृतसामर्थ्यात्पत्युः स्वर्गमिहेष्यते ॥ ३८२ ॥

भर्त्रा सह मृता या तु नाकलोकमभीप्सती[5] ॥
साऽऽद्यश्राद्धे पृथक्पिण्डा नैकत्वं तु बुधैः स्मृतम् ॥ ३८३ ॥

पतिमृत्युः स्त्रियो मृत्युर्[6]निमित्तमेव जायते ॥
निर्निमित्तो न वै मृत्युर्मृत्युना चैकता[7] भवेत् ॥ ३८४ ॥

---

१. B. D. E. and F. read एकं तु for एकत्र, २. B. E. and F. read पितृपात्रेषु for पतिपात्रे तु. ३. A. reads चिंतयेत् for सिंचयेत. ४. B. E. and F. read श्राद्धं for श्राद्धे. ५. B. and E. read समीहया; while D. reads अभिप्सया. ६. A. reads मृत्यो: for मृत्युः. ७. B. reads नैकता instead of चैकता, also A. D. E. and F. too the same.

भर्त्रासह मृता भार्या भर्तारं सा समुद्धरेत् ॥
तस्याः पतिव्रताधर्मः पिण्डैक्येन हतो भवेत् ॥ ३८५ ॥
बलीयस्त्वेन धर्मस्य तुच्छत्वाच्चांगसस्तथा ॥
धर्मेण लुप्यते पापमेकत्वे समता तयोः ॥ ३८६ ॥
नैकत्वं तु तयोरस्माद्युक्तं श्राद्धकर्माणि ॥
पृथगेवहि कर्तव्यं श्राद्धमेकादशाहिकम् ॥ ३८७ ॥
यानि श्राद्धानि कार्याणि तान्युक्तानि पृथक् पृथक् ॥
कर्तव्यं यैस्तु तेऽप्युक्ता विशेषं च निबोधत ॥ ३८८ ॥
औरसाद्याः स्मृताः पुत्रा मुनिभिर्द्वादशैव तु ॥
यथा जात्यनुसारेण वर्णानामनुसारतः ॥ ३८९ ॥
पिण्डप्रदाः क्रमेण स्युः पूर्वाभावे परः परः ॥
यस्माद्यो जायते पुत्रः स भवेत्तस्य पिण्डदः ॥ ३९० ॥
तस्मात्तस्मादपीहन्ते मृताः प्रेतत्वमागताः ॥
तस्मादवश्यमेवं हि श्राद्धं कार्यं विधानतः ॥ ३९१ ॥
शूद्रस्य दासिजः पुत्रः कामतस्तु स पिण्डदः ॥
जात्या जातः सुतो मातुः पिण्डदः स्यात्सुतोऽपि च ॥ ३९२ ॥
जनकस्य न किञ्चित्स्यादर्थात्कामप्रवर्तनात् ॥
वायुभूताश्च पितरो दत्ताभिकांक्षिणः सदा ॥
तस्मात्तेभ्यः सदा देयं नृभिधर्मरतैः सदा ॥ ३९३ ॥
ये खाण्ड-मांस-मधु-पायस-सर्पिरन्नैर्-
देशे च कालसहिते च सुपात्रदत्तैः ॥
प्रीणन्ति देव-मनुजान्पितृवंशजातान्
तेषां नृणां तु पितरो वरदा भवन्ति ॥ ३९४ ॥
मया श्राद्धविधिः प्रोक्तो वर्णानां पितृतृप्तिकृत् ॥
एवं दास्यति यः श्राद्धं वरान्सर्वानवाप्स्यति ॥ ३९५ ॥

इति श्रीबृहत्पराशरीये धर्मशास्त्रे सुव्रतप्रोक्तायां संहितायां श्राद्धाधिकारो नाम सप्तमोऽध्यायः समाप्तः ॥

---

१. A. reads एकत्वेन for पिण्डैक्येन, and D. also the same. २. B. E. and F. read भागमस्य च for च्चागसस्तथा.

वृहत्पराशरसंहिता।

अथ अष्टमोऽध्यायः ।

अथातः सम्प्रवक्ष्यामि शुद्धिं पराशरोदिताम् ॥
सूतके वाप्यशौचे वा यथावत्तां निबोधत ॥ १ ॥

प्रसवं सूतकं प्राहुरशौचं शावमुच्यते ॥
यावत्कालं च यन्मात्रं तथा तावन्निगद्यते ॥ २ ॥

केषांचित्तेन वै मासं केषांचिन्मरणान्तिकम् ॥
सद्यः शौचास्तथा चान्ये अन्ये चैकाहिकाः स्मृताः ॥ ३ ॥

त्रि-षट्-दश-दशद्वाभ्यां दशापि सह पञ्चभिः ॥
तान्येव त्रिगुणान्याहुर्दिनान्येव मनीषिणः ॥ ४ ॥

वक्ष्यमाणं निबोधध्वमुक्तक्रममिदं द्विजाः ।
शक्तिजो यन्मुनीनां च प्राग् ब्रवीत्कलिधर्मवित् ॥ ५ ॥

विष्णुध्यानरतानां च सदैव ब्रह्मचारिणाम् ॥
गृहमेधिद्विजानां तु तथैव व्रतचारिणाम् ॥ ६ ॥

वेदतत्वार्थवेत्तृणां नित्यस्नानकृतां तथा ॥
अतत्संसर्गिणामेषां नाशौचं नापि सूतकम् ॥ ७ ॥

संसर्गं वर्जयेद्यत्नात्संसर्गो दोषकारणम् ॥
कुर्यान्नाशादिसंसर्गं वर्जने स्यादकिल्बिषी ॥८ ॥

वदन्ति मुनयः प्राच्याः संसर्गो दोषकारणम् ॥
असंसर्गः स्वकर्मस्थो द्विजो दोषैर्न लिप्यते ॥ ९ ॥

दानोद्वाहेष्टि-संग्रामे देशविप्लवकादिके ॥
सद्यः शौचं द्विजातीनां सूतकाशौचयोरपि ॥ १० ॥

दातृणां व्रतिनामेके कवयः सत्रिणामपि ॥
सद्यः शौचमदोषाणामूचुर्धर्मविदः कलौ ॥ ११ ॥

---

१ A. B. D. E. and F. read शस्तं for मासं.

सर्वमंत्रपवित्रस्तु अग्निहोत्री षडङ्गवित् ॥
राजा च श्रोत्रियश्चैव सद्यः शौचाः प्रकीर्तिताः ॥ १२ ॥
देशान्तरगते जाते मृते वाऽपि सगोत्रिणि ॥
शेषाहानि दशाहार्वाक् सद्यः शौचमतः परम् ॥ १३ ॥
सत्यप्येकनिवासे तु सद्यः शौचं विशोधनम् ॥
पिण्डनिर्वर्तने जाते मृते वापि सगोत्रजे ॥ १४ ॥
सद्यः शौचं विधातव्यमर्वाक् च दश जन्मनः ॥
बान्धवादिषु विज्ञेयमन्यदूर्ध्वं विधीयते ॥ १५ ॥
नाऽऽशौच-सूतके स्यातां नृपतीनां कदा च न ॥
यज्ञकर्मप्रवृत्तस्य ऋत्विजो दीक्षितस्य च ॥ १६ ॥
पृथक्पिण्डमृते बाले निर्दशेऽन्यत्र च श्रुते ॥
जाते वापि च शुद्धिः स्यात्सद्यः शौचादसंशयम् ॥ १७ ॥
सवेदः साग्निरेकाहाद् ब्राह्मणः शुद्धिमाप्नुयात् ॥
तथैकाहो नृपे संस्थे तथैव ब्रह्मचारिणि ॥ १८ ॥
दुर्भिक्षे राष्ट्रभङ्गे च आपत्काल उपस्थिते ॥
उपसर्गान्मृते वापि सद्यः शौचं विधीयते ॥ १९ ॥
गो-विप्रार्थविपन्नानां आहवेषु तथैव च ॥
ते योगिभिः समा ज्ञेया सद्यः शौचं विधीयते ॥ २० ॥
विप्रे संस्थे व्रतादर्वाक् श्रोत्रिये च तथा द्विजे ॥
अनूचाने गुरौ चैव आचार्ये चापि संस्थिते ॥ २१ ॥
असंस्कृतस्त्रियां राज्ञि श्रोत्रिये निधनं गते ॥
त्रिरात्रमप्यशौचं स्यात्तथैवोदकदायिनः ॥ २२ ॥
विद्वाननग्निको विप्रस्त्रिरात्राच्छुद्धिमाप्नुयात् ॥
मनीषिणः परे ब्रूयुरसपिण्डे अहं मृते ॥ २३ ॥
प्रेतीभूतं च यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः ॥
नियतं ह्यनुगच्छेत त्रिरात्रमशुचिर्भवेत् ॥ २४ ॥
षड्रात्रं नवरात्रं च शवस्पृशां विशुद्धिकृत् ॥
त्र्यहं चैव विशुद्ध्यर्थं धर्मशास्त्रविदो विदुः ॥ २५ ॥

---

१. B. reads विधानेनाग्निको विप्र आशौचात् for सवेदः साग्निरेकाहाद्ब्राह्मणः.
२. B. reads द्विजे मृते for तथा द्विजे.

अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ॥
पदे पदे यज्ञफलमनुपूर्वं लभन्ति ते ॥ २६ ॥
अशुचित्वं न तेषां तु पापं वाऽशुभकारणम् ॥
जलाव-गाहनात्तेषां सद्यः शौचं विधीयते ॥ २७ ॥
असगोत्रमसम्बन्धं प्रेतीभूतं तथा द्विजम् ॥
ऊढ्वा दग्ध्वा द्विजाः सर्वे स्नानान्ते शुचयः स्मृताः ॥ २८ ॥
एकरात्रं वदन्त्येके सद्यः स्नानं तथाऽपरे ॥
गोग्रहादिमृतानां च मुनयः शुद्धिकारणम् ॥ २९ ॥
हतः शूरो विपद्येत शत्रुभिर्यत्र कुत्रचित् ॥
स मुक्तो यतिवत्सद्यः प्रविशेत्परवेधसि ॥ ३० ॥
संन्यासी युद्धसंस्थश्च सम्मुखं शत्रुभिर्नरः ॥
सूर्यमण्डलभेत्ताराविति प्राहुर्मनीषिणः ॥ ३१ ॥
पराङ्मुखे हते सैन्ये यो युद्धाय निवर्तते ॥
तत्पदानीष्टितुल्यानि स्युरित्याह पराशरः ॥ ३२ ॥
वदने प्रविशेद्येषां लोहितं शिरसः पतत् ॥
सोमपानेन ते तुल्या बिन्दवो रुधिरस्य वै ॥ ३३ ॥
सन्यासेन मृता ये वै प्रधने ये तनुत्यजः ॥
मुक्तिभाजो नरास्तेस्युरिति वेदोऽपि कीर्तयेत् ॥ ३४ ॥
सद्यः शौचं विधातव्यं शुद्धिरेवं विधियते ॥
नोच्यन्ते ते मृता लोके सद्यो ब्रह्मवपुर्गताः ॥ ३५ ॥
सन्ध्याचारविहिनानां सूतकं ब्राम्हणे ध्रुवम् ॥
अशौचं द्वादशाहं स्यादिति पाराशरोऽब्रवीत् ॥ ३६ ॥
राज्ञां तु द्वादशाहः स्यात्पक्षो वैश्यस्य पावनः ॥
वृषलस्य तथा मासस्त्र्यहादेष्वपि धर्मतः ॥ ३७ ॥
क्षपा च पक्षिणी सद्भिर्मातुलादिषु कीर्तिताः ॥
गर्भस्रावे च पाते च रात्रयो माससम्मिताः ॥ ३८ ॥

---

१. A. reads शोककारणम् for ऽशुभकारणम्. २. A. reads विग्रहादि° for गोग्रहादि°. ३. A. and D. read मृध° for युद्ध°. ४. A. reads निदर्शनम् for ऽपि कीर्तयेत्. ५. A. reads °र्गमाः for °र्गताः. ६. A. B. E. and F. read तु तेऽस्त्राः for च पाते च.

स्रावं गर्भस्य विद्वांसो मासादर्वाक् चतुर्थकात् ॥
पातमूर्ध्वं वदन्त्येके तत्राधिक्यं च सूतकम् ॥ ३९ ॥

ऋणि-व्यसनि-रोगार्त-पराधीन-कदर्यकाः ॥
तृष्णावन्तो निराचाराः पितृ-मातृविवर्जिताः ॥ ४० ॥

स्त्रीजिताश्चानपत्याश्च देव-ब्राह्मणवर्जिताः ॥
परद्रव्यं जिघृक्षन्तः सद्यः सूतकिनः सदा ॥ ४१ ॥

सूतके मृतशौचे वा अन्यदापद्यते यदि ॥
पूर्वेणैव तु शुद्ध्येत जाते जातं मृते मृतम् ॥ ४२ ॥

एकपिण्डाश्च दायादाः पृथक्दार-निकेतनाः ॥
जन्मन्यपि मृते वापि तेषां वै सूतकं भवेत् ॥ ४३ ॥

भृगु-वह्नि-प्रपाते च देशान्तरमृतेषु च ॥
बाले प्रेते च संन्यस्ते सद्यः शौचं विधीयते ॥ ४४ ॥

अजातदन्ता ये बाला ये च गर्भाद्विनिर्गताः ॥
न तेषामग्निसंस्कारो नाशौचं नोदकक्रिया ॥ ४५ ॥

विवाहोत्सव-यज्ञेषु कर्तारो मृत-सूतके ॥
पूर्वसंकल्पितानर्थान्भोज्यान्तानब्रवीन्मनुः ॥ ४६ ॥

शिल्पिनः कारुकाश्चैव दासो-दासास्तथैव च ॥
इत्यादीनां न ते स्यातामनुगृह्णन्ति यान् द्विजाः ॥ ४७ ॥

पिता पुत्रेण जातेन दद्याच्छ्राद्धं यथाविधि ।
पितॄणां विधिवद्दानं दत्तं तत्राप्यनन्तकम् ॥
तत्राप्यनन्तकं दानं कर्तव्यं पुत्रजन्मनि ॥ ४८ ॥

प्रसवे च द्विजातीनां न कुर्यात्सङ्करं यदि ॥
दशाहाच्छुध्यते माता अवगाह्य पिता शुचिः ॥ ४९ ॥

अतिमानादतिक्रोधात्स्नेहाद्वा यदि वा भयात् ॥
उद्बध्य म्रियते यस्तु न तस्याग्निः प्रदीयते ॥ ५० ॥

---

१ A. reads °कदर्यकाः. २. A. reads गृहस्थान्ताः for जिघृक्षन्तः. ३ A. reads स्मृताः for सदा, B. E. and. F. too the same. ४. A. reads सत्यशौचे for मृतशौचे. ५. B. reads °कृत° for °दार°, E. and. F. also the same. ६. B. E. and F. read संन्यासे for संन्यस्ते. ७. B. D. and F. substitute विनिःसृताः for विनिर्गताः. ८. A. reads ऽशौच° for मृत°.

न स्नायान्नोदकं दद्यान्नापि कुर्यादशौचताम् ॥
सर्पेण शृंगिणा वापि जलेन चाग्निना तथा ॥ ५१ ॥
न स्नानादौ विपन्नस्य तथाचैवात्मघातिनः ॥
अर्वाक् द्विहायनाद्वर्षे न दद्यान्मृतकस्य च ॥ ५२ ॥
किन्तु तस्मिन्ननेक्रूमै कुर्याच्चैवोदकक्रियाम् ॥
सर्पादिप्राप्तमृत्यूनां वह्निदाहादिकाः क्रियाः ॥ ५३ ॥
षण्मासे तु गते कार्या मुनिः प्राह पराशरः ॥
शास्त्रदृष्टं बुधैः[1] कार्यमस्थिसञ्चयनादिकम् ॥ ५४ ॥
तत्कृत्वा तूक्तदिवसैः शुद्धिमर्हति धर्मतः ॥
अन्यायमृतविप्राणां ये वोढारो भवन्ति हि ॥ ५५ ॥
अग्निदाश्चैव ये तेषां तथोदकादिदायिनः ॥
उद्बन्धममृतस्यापि यश्छिन्द्याद्रज्जुपाशकम् ॥ ५६ ॥
ते सर्वे पापसंयुक्ताः प्रायश्चित्तस्य भाजनाः ॥ ५७ ॥
यः सूतकाशौचविशुद्धिकृत्स्यादाख्याय कालं तमनुक्रमेण ॥
पराशरास्याम्बुजानिःसृता या वाच्यास्ततो निष्कृतयो द्विजास्ते ॥५८॥
सूतकाशौचयोरुक्तः शुद्धिपन्थाऽनुपूर्वशः ॥
सर्वैनसां विशुध्यर्थं प्रायश्चित्तं यथाब्रवीत् ॥ ५९ ॥
मनुर्वा याज्ञवल्क्यस्तु वसिष्ठः प्राह निष्कृतिम् ॥
सा कृतादिषु वर्णानां सति धर्मे चतुष्पदे ॥ ६० ॥
मानसा वाचिका दोषास्तथा वै कायकारिताः ॥
धर्माधीना नृणां सर्वे जायन्ते तेऽप्यनिच्छताम् ॥ ६१ ॥
तेषामुपरताक्षाणां प्रत्यहं शुभमिच्छताम् ॥
शक्तिजो निष्कृतिं प्राह युगधर्मानुरूपतः ॥ ६२ ॥
विकृतव्यवहाराणां पापो निष्कृतिकृद्द्विजः ॥[2]
कति विप्रैः कथं कैरिति वाच्या भवेद्धि सा ॥ ६३ ॥
तद्रूपं च प्रवक्ष्यामि यावद्भिः सा द्विजैर्भवेत् ॥
यथाविधाश्च विप्रास्युरिति विद्वन् प्रकीर्त्यते ॥

---

१. A. reads द्विजैः instead of बुधैः. २. F. reads this whole line thus:—विकृतव्यवहाराणां पर्षन्निष्कृतिकृद्द्विजः ।; while A. reads निष्कृतिं व्यवहाराणां वर्षान्निष्कृतिकृद्यथा ।.

पर्षद्दशावरा प्रोक्ता ब्राह्मणैर्वेदपारगैः ॥
सायद्रूपा स धर्मः स्यात् स्वयम्भूरित्यकल्पयत् ॥ ६४ ॥
वेद-शास्त्रविदो विप्रा यं ब्रूयुः सप्त पंच वा ॥
त्रयो वाऽपि स धर्मः स्यादेको वाऽध्यात्मवित्तमः ॥ ६५ ॥
संयमं नियमं वाऽपि उपवासादिकं च यत् ॥
तद्गिरा परिपूर्णं स्यान्निष्कृतिर्व्यावहारिकी ॥ ६६ ॥
न लक्षेणापि मूर्खाणां न चैवाऽधर्मवादिनाम् ॥
विदुषां नापि लुब्धानां न चापि पक्षपातिनाम् ॥ ६७ ॥
श्रुता-ध्ययनसम्पन्नः सत्यवादी जितेंद्रियः ॥
सदा धर्मरतः शान्त एकः पर्षत्त्वमर्हति ॥ ६८ ॥
न सा वृद्धैर्न तरुणैर्न सुरूपैर्धनान्वितैः ॥
त्रिभिरेकेन पर्षत् स्याद्विद्वद्भिर्विदुषापि च ॥ ६९ ॥
वयसा लघवोऽपि[1] स्युर्वृद्धा धर्मविदो द्विजाः ॥
शिशवोऽपि हि मध्यस्थाः सर्वत्र समदर्शनाः ॥ ७० ॥
न सा वृद्धैर्भवेद्विप्रैर्वृध्दास्युर्धर्मवादिनः ॥
यत्र सत्यं स धर्मः स्यात्च्छलं यत्र न गृह्यते ॥ ७१ ॥
न सा सभा यत्र न सन्ति वृद्धा वृद्धा न ते ये न वदन्ति धर्मम् ॥
धर्मो वृथा यत्र न सत्यमस्ति सत्यं न तद्यन्न हृदानुविद्धम्[2] ॥ ७२ ॥
निष्कृतौ व्यवहारे च व्रतस्याशंसने तथा ॥
धर्मं वा यदि वाऽधर्मं परिषत्प्राह तद्भवेत् ॥ ७३ ॥
स्त्रीणां च बाल-वृद्धानां क्षीणानां कुशरीरिणाम् ॥
उपवासाद्यशक्तानां कर्तव्योऽनुग्रहश्च तैः ॥ ७४ ॥
ज्ञात्वा देशं च कालं च व्ययं सामर्थ्यमेव च ॥
कर्तव्योनुग्रहः सद्भिर्मुनिभिः परिकीर्तितः ॥ ७५ ॥
लोभान्मोहाद्भयान्मैत्र्याद्यदि कुर्युरनुग्रहम् ॥
नरकं यान्ति ते मूढाः शतधा वाक्सवाचिनः ॥ ७६ ॥
प्रविश्य पर्षदं[3] ते वै सभ्यानामग्रतःस्थिताः ॥
यथाकालं प्रकुर्युस्ते प्रायश्चित्तं तदीरितम् ॥ ७७ ॥

---

१. A. reads तनवः for लघवः. २. A. B. read छलेनानुविद्धम् for हृदानुविद्धम्. ३. श्रोत्तमान्ते for पर्षदं ते is in all except A. and B.; while B. reads पार्षदाम् for सभ्यानाम्.

किन्त्वयं याचते देवा वदन्तोऽत्र द्विजातयः ॥
सर्वे कुर्वन्ति नियमं गतपापं न संशयः ॥ ७८ ॥

प्रसादो द्विविधो ज्ञेयो दैव्यश्चासुर एव च ॥
क्रीडयापि च तत्रैव देयास्तथैव ते द्विजाः ॥ ७९ ॥

व्यवहारे गोसमैस्तु प्रब्रूयाद्वापि वैरतः ॥
यथाकृतं च तत्पापं तत्तथैव निवेदयेत् ॥ ८० ॥

यस्तेषामन्यथा ब्रूयात्स पापीयान्न संशयः ॥
सत्यमसत्यमेवात्र विपर्यस्तं वदेद्यतः ॥ ८१ ॥

स एवानृतवादी स्यात्सोऽनन्तं नरकं व्रजेत् ॥
ज्योतिषं व्यवहारं च प्रायश्चित्तं चिकित्सितम् ॥ ८२ ॥

अजानन् यो नरो ब्रूयात्साहसं किमतः परम् ? ॥
व्यवहारश्च तैः प्रोक्तो मन्वाद्यैर्धर्मवादिभिः ॥ ८३ ॥

प्रजाभिर्नतु सर्वाभिर्मान्यैश्चैव तु मानवैः ॥
तच्छोधकप्रमाणानि लिखितादीनि तैर्विना ॥ ८४ ॥

जलादीनि च दिव्यानि सांख्योक्तशपथानि च ॥
अन्ये जनपदाचारा कुलधर्मस्तथापरः ॥
परिषद्ब्राम्हणैर्मेध्या निर्णेतव्या यथाविधि ॥ ८५ ॥

जन्म जात्यनुसारेण देश-कालादिधर्मतः ॥
कर्तव्यः सत्तमैः सर्वैर्माननीयश्च वादिभिः ॥ ८६ ॥

गो-ब्राह्मणहतादीनां तथा दम्भादिकारिणाम् ॥ ॥
तप्तकृच्छ्रेण शुद्धिः स्यादिति पाराशरोऽब्रवीत् ॥ ८७ ॥

भोजयेद्ब्राम्हणान्पश्चात्सवृषा गौश्च दक्षिणा ॥
जायन्ते पापनिर्मुक्ताः शक्तिसूनोर्यथा वचः ॥ ८८ ॥

अनाशकान्निवृत्ता ये ब्रम्हचर्यात्तथा द्विजाः ॥
वैडालिकास्ते विज्ञेयाः सर्वधर्मविवर्जिताः ॥ ८९ ॥

---

१. E. reads च वेदितः instead of वदेद्यतः. २. A. only reads नान्यौ for मान्यैः. ३. only B. reads अणु° for कुल°. ४. A. reads मत्या for मेध्या. ५. A. reads मानितव्या for निर्णेतव्या. ६. A., B. and F. read °योऽभिवादिभिः. ७. B. D. E. and F. read शुद्धिः स्यात् for शुध्येयुरिति. ८. C. and F. read अनाशिका° for अनाशका°.

सर्वत्र[1] प्रायशान्तो ये ये च वैडालिकैः समाः ॥
तेषां सर्वाण्यपत्यानि पुल्कसैः सह पातयेत्[2] ॥ ९० ॥
स्त्रीणां च बाल-वृद्धानां रुग्णानां कृशशरीरिणाम् ॥
उपवासाद्यशक्तानां कर्तव्योऽनुग्रहश्च तैः ॥ ९१ ॥
ज्ञात्वा देशं च कालं च वयः सामर्थ्यमेव च ॥
कर्तव्योऽनुग्रहः सद्भिर्मुनिभिः परिकीर्तितः ॥ ९२ ॥
ब्रम्हघ्नश्च सुरापश्च स्तेयी गुर्वङ्गनागमः ॥
एतेषां निष्कृतिं ब्रूयादेतत्संसर्गिणामपि ॥ ९३ ॥
द्वादशाब्दं च विचरेत् ब्रम्हघ्नस्तत्कपालभुक् ॥
सर्वत्र ख्यापयन्कर्म भिक्षां विप्रेषु संचरन् ॥ ९४ ॥
दृष्ट्वा सेतुं समुद्रस्य स्नात्वा वै लवणांभसि ॥
ब्रम्हणेषु चरन् भिक्षां स्वकर्म ख्यापयञ्छुचिः ॥ ९५ ॥
मुण्डितस्तु शिखावर्ज्यः सकौपीनो निराश्रयः ॥
चीर-चीवरवासा वै त्रिः स्नायी सन् शुचिर्व्रती ॥ ९६ ॥
संयताक्ष[3]श्चरेच्छान्तश्छत्रोपानद्विवर्जितः ॥
ब्रम्हघ्नोऽस्मीत्यहं वाचमिति सर्वत्र वै वदेत् ॥ ९७ ॥
गवां च विंशतिं दद्याद्दक्षिणां वृषसंयुताम् ॥
ब्राम्हणेभ्यो निवेद्यैताः शुचिराख्याय भूपतेः ॥ ९८ ॥
पूर्वोक्तप्रत्यवायानां प्रायश्चित्तमिदं स्मृतम् ॥
ब्राह्मणानां प्रसादेन तीर्थेषु गमनेन च ॥ ९९ ॥
गोशतस्य प्रदानेन शुध्यन्ति नात्र संशयः ॥
अवभृथेऽश्वमेधस्य स्नात्वा शुद्धिमवाप्नुयात् ॥ १०० ॥
आख्याय नृपतेर्वाऽपि तेन संशोधितः शुचिः ॥
महापापानि सर्वाणि कथयित्वा महीपतेः ॥ १०१ ॥
निष्कृतिं तद्गिरा दद्यादन्यथा तेऽपि तत्समाः ॥
रोगार्तान्वा द्विजं वापि मार्गे खेदसमन्वितम् ॥
दृष्ट्वा कृत्वा निरातंकं ब्रम्हघ्नः शुद्धिमाप्नुयात् ॥ १०२ ॥

---

१. A. reads सर्वे प्रवेशिता ये वै. for सर्वत्र प्रायशान्तो ये २. A. B. E. F. read घातयेत् instead of पातयेत्. ३. A. and D. read संक्षिताक्षः for संयताक्षः; while C. reads संयुताक्षः.

असंख्यातं धनं दत्त्वा विप्रेभ्यो वापि शुध्यति ॥[1]
अरण्ये निर्जने जप्त्वा शुध्येद्वै वेदसंहिताम् ॥ १०३ ॥
सुरापस्य प्रवक्ष्यामि निष्कृतिं श्रोतुमर्हथ ॥
सुरापस्तु सुरां तप्तां पयो वा जलमेव वा ॥
तप्तं गोमूत्रमाज्यं वा मृतः पीत्वा विशुध्यति ॥
जटी वा चैलवासी वा ब्रह्महत्याव्रतं चरेत् ॥ १०४ ॥
यद्यज्ञानात् पिबेद्विप्रो द्विजातिर्वा सुरां पुनः ॥
पुनः संस्कारकरणाच्छुद्ध्येदाह पराशरः ॥ १०५ ॥
स्तेयं कृत्वा सुवर्णस्य शुद्ध्यै सर्वे द्विजातयः ॥
समर्प्य, मुसलं राज्ञे ख्यापयेत्स्तेयकर्मकृत् ॥ १०६ ॥
शक्तिं चोभयतस्तीक्ष्णामायसं दण्डमेव च ॥
खादिरं लगुडं वापि हन्यादेकेन तं नृपः ॥ १०७ ॥
जीवन्नपि भवेच्छुद्धो मुक्तो वा तेन पाप्मना ॥
मृतश्चेत्प्रेत्य संशुध्येदिति पाराशरोऽब्रवीत् ॥ १०८ ॥
अयः प्रतिकृतिं कृत्वा वह्निवर्णं च तां धमेत् ॥
गुर्वंगनागमं तस्यां लोहमय्यां तु शाययेत् ॥ १०९ ॥
वृषणौ पुनरुत्कृत्य नैर्ऋत्यामुत्सृजेत्तनुम् ॥
स मृतः शुद्धिमाप्नोति नान्यतस्तस्य निष्कृतिः ॥ ११० ॥
संवत्सरं चरेत् कृच्छ्रं प्रजापत्यमथापि वा ॥
चांद्रायणं चरेद्वापि त्रीन्मासान् नियतेंद्रियः ॥ १११ ॥
व्रते तु क्रियमाणे वै विपत्तिः स्यात्कथंचन ॥
स मृतोऽपि भवेच्छुद्ध इति धर्मविनिर्णयः ॥ ११२ ॥
अनिर्दिष्टस्य पापस्य तथोपपातकस्य च ॥
तच्छुध्यैपावनं कुर्याच्चांद्रं व्रतं समाहितः ॥ ११३ ॥
तिष्ठेन्मासं पयोऽशित्वा पराकं वा चरेद्व्रतम् ॥
अनिर्दिष्टस्य पापस्य शुद्धिरेषा प्रकीर्तिता ॥ ११४ ॥
ब्राम्हणः क्षत्रियं हत्वा गवां दद्यात्सहस्रकम् ॥
वृषेणैकेन संयुक्तं पापादस्मात्प्रमुच्यते ॥ ११५ ॥

---

१. Except A, all read °निर्वेदसंहिताम् for वै वेदसंहिताम्. २. A. reads ब्रह्मघ्नस्य for ब्रह्महत्या°. ३. A. reads °वासा for °वासी. ४. A. reads पावनः instead of पाप्मना.

त्रीणि वर्षाणि शुद्ध्यर्थं ब्रह्मघ्नस्य व्रतं चरेत् ॥
चान्द्रायणानि वा त्रीणि कृच्छ्राणि त्रीणि वा ऽऽचरेत् ॥ ११५ ॥
वैश्यं हत्वा द्विजश्चैवमब्दमेकं व्रतं चरेत् ॥
गवां ह्येकशतं दद्याच्चरेच्चान्द्रायणानि च ॥ ११६ ॥
कृच्छ्राणि त्रीणि वा कुर्याद्वचनाद्विदुषामसौ ॥
ये हन्युरप्रदुष्टां स्त्रीं चातुर्वर्ण्यां द्विजातयः ॥
शूद्रहत्या व्रतं ते तु चरन्तः शुद्धिमाप्नुयुः ॥ ११७ ॥
शूद्रां ये चानुलोम्येन निहत्यव्यभिचारिणीम् ॥
मुनयः शुद्धिमिच्छन्ति चन्द्रव्रतेन केचन ॥ ११८ ॥
व्यभिचारात्तु ते हत्वा योषितो ब्राम्हणादयः ॥
तिलधेनुं बस्तमविं क्रमाद्दद्युर्विशुद्धये ॥ ११९ ॥
साध्वीनां तु नरो हत्वा गवां चैव सहस्रकम् ॥
चीर्णेन शुद्धिमाप्नोति योषाहत्याव्रतं चरेत् ॥ १२० ॥
अथ गोघ्नस्य वक्ष्यामि निष्कृतिं श्रोतुमर्हथ ॥
यथा यथा विपत्तिः स्याद्गवां तथोपपद्यते ॥ १२१ ॥
गोघाती पंचगव्याशी गोष्ठशायी च गोनुगः ॥
मासमेकं व्रतं चीर्त्वा गोप्रदानेन शुद्ध्यति ॥ १२२ ॥
एकपादे तु लोमानि द्वये श्मश्रुनिकृन्तनम् ॥
पादत्रये शिखावर्जं सशिखं तु निपातने ॥ १२३ ॥
सशिखं वपनं कृत्वा त्रिसन्ध्यमवगाहनम् ॥
गवां मध्ये वसेद्रात्रौ दिवा गाः समनुव्रजेत् ॥ १२४ ॥
तिष्ठन्तीभिश्च तिष्ठेत व्रजन्तीभिःसह व्रजेत् ॥
पिबन्तीभिः पिवेत्तोयं संविशन्तीभिश्च संविशेत् ॥ १२५ ॥
शृंग-कर्णादिसंयुक्तं चर्मोत्कृत्य तदावृतः ॥
विप्रौकःसु चरेद्भिक्षां स्वकर्म ख्यापयन्व्रती ॥ १२६ ॥
गोघ्नस्य देहि मे भिक्षामिति वाचमुदीरयेत् ॥
मासमेकं व्रतं कृत्वा गोप्रदानेन शुद्ध्यति ॥ १२७ ॥
चौर-व्याघ्रादिकेभ्यश्च सर्वप्राणैः समुद्धरेत् ॥
गर्तप्रपात-पंकाच्च तथान्यादपकारतः ॥ १२८ ॥

---

१. A. and F. read साध्वीनां च भगस्थीनां for साध्वीनां तु नरो हत्वा.
२. A. B. D. E. and F. read उपकारतः for अपकारतः.

भोजयेद्ब्राह्मणान्पश्चात्पुष्प धूपादिपूर्वकम् ॥
दद्याद्गां च वृषं चैकं ततः शुद्ध्यति किल्बिषात् ॥ १२९ ॥
मुनयः केचिदिच्छान्ति विचित्रासु विपत्तिषु ॥
यथासम्भवतस्तासु पृथक् पृथक् विनिष्कृतिम् ॥ १३० ॥
शस्त्र-वस्त्राश्म-मृत्पिंड-यष्टि-मुष्टि-प्रधावनम् ॥
योक्त्रेण तारणं रोधो बन्धनं विद्युदग्नयः ॥ १३२ ॥
ग्रह-पङ्क-प्रपातश्च बद्धव्याघ्रादिभक्षणम् ॥
क्षुत्तृड्-रोगचिकित्सा च तथाऽतिदोह-वाहने ॥ १३३ ॥
मृत्युस्थानानि चैतानि गवामति प्रधावनम् ॥
प्रब्रूयात्पृथगेतेषु प्रायश्चितं पराशरः ॥ १३४ ॥
उपेक्षणं च पङ्कादौ तथोपविषभक्षणे ॥
वक्ष्यमाणक्रमेणैतच्छृणुध्वं द्विजसत्तमाः ॥ १३५ ॥
शस्त्रेण त्रीणि कृच्छ्राणि तदर्धं वा समाचरेत् ॥
अश्मना द्वे चरेत्कृच्छ्रे मृत्पिण्डे नापि कृच्छ्रकम् ॥ १३६ ॥
यष्ट्याघाते चरेत्कृच्छ्रे साक्षान्मुष्ट्या तु तच्चरेत् ॥
योक्त्रेण पादमेकं तु तारणे पादमेव च ॥ १३७ ॥
रोधने कृच्छ्रपादे द्वे कृच्छ्रमेकं तु बन्धने ॥
कूपपाते चरेत्कृच्छ्रमर्धं वाप्यां समाचरेत् ॥ १३८ ॥
गोशत्कृतिपिण्डघाते च प्राजापत्यं चरेद्द्विजः ॥
क्षुत्तृड्-रोगचिकित्सासु कृच्छ्रमुत्प्रेक्षणे चरेत् ॥ १३९ ॥
पतितां पङ्कलग्नां वा अवलिप्तां च यो नरः ॥
स्वस्य चान्यस्य चोपेक्ष्य सार्धं कृच्छ्रं चरेच्छुचिः ॥ १४० ॥
एका च द्वहुभिर्बद्धा क्ष्वेडिता चेन्म्रियेत गौः ॥
पादं पादं चरेयुस्ते इति पाराशरोऽब्रवीत् ॥ १४१ ॥
सुबद्धां येऽवलिप्ताङ्गां पश्यन्तो नोपकुर्वते ॥
घातनोत्प्रेक्षणं प्रोक्तं चरेयुस्ते व्रतं नराः ॥ १४२ ॥
या गर्तादौ विपद्येत क्ष्वेडिता सम्प्रपत्य वा ॥
पादे क्ष्वेडितयोरुक्तं तत्कर्ता व्रतमाचरेत् ॥ १४३ ॥

---

१. A. reads °कुड्य° for °पंक°. २. A. reads अतिप्रधातनम् for अति प्रधावनम्. ३. A. reads शास्त्रेण for शस्त्रेण. ४. B. reads अवलुप्ताङ्गां for अवलिप्ताङ्गां ५. A. reads पाते for पादे.

प्रबद्धा रज्जुदोषेण गोर्विपद्येत यस्य वाः ॥
व्रतपादं चरेत्कृच्छ्रं किंचिद्दद्याच्च दक्षिणाम् ॥ १४४ ॥
योगामपालयन् कुद्यादति वा घातयेद्वृषम् ॥
यदि म्रियेत तद्दोषात्तदा कृच्छ्रार्द्धमाचरेत् ॥ १४५ ॥
घासं यो न क्षुधार्तस्य तृषार्तस्य न वा जलम् ॥
स्वीकृतस्य न चेद्दद्यात्स तत्पादव्रतं चरेत् ॥ १४६ ॥
या तु बद्धा चिकित्सार्थं विशल्यकरणाय च ॥
औषधादिप्रदानाय विपत्तौ नास्ति पातकम् ॥ १४७ ॥
विद्युत्पातादि-दाहाभ्यां कुण्डस्य पतनादिभिः ॥
गोभिर्विपत्तिमापन्नैस्तत्र दोषो न विद्यते ॥ १४८ ॥
पालयन्पश्यतोऽरण्ये गौस्तु व्याघ्रादिभिर्हता ॥
अकुर्वतः प्रतीकारं कृच्छ्रार्धं तस्य पावनम् ॥ १४९ ॥
शृण्वन् शून्येषु पालेषु तथान्यारण्यगामिषु ॥
पाले संभाषयत्युर्विहन्यात्तत्र न दोषभाक् ॥ १५० ॥
गर्भिणी गर्भशल्या तु तद्गर्भे तु विशल्यतः ॥
यत्नतो गौर्विपद्येत तत्र दोषो न विद्यते ॥ १५१ ॥
गर्भस्य पातने पादं द्वौ पादौ गात्रसंभवे ॥
पादोनं व्रतमाचष्ट हत्वा गर्भमचेतनम् ॥ १५२ ॥
अङ्ग-प्रत्यंगभूतेन तद्गर्भे चेतनान्विते ॥
द्विगुणं गोव्रतं कुर्यादेषा गोघ्नस्य निष्कृतिः ॥ १५३ ॥
वज्राद्युत्त्रासने गौश्च गलदामकदोषतः ॥
पादयोर्बंधने चैव पादोनं व्रतमाचरेत् ॥ १५४ ॥
घण्टाभरणदोषेण गौश्चेद्वधमवाप्नुयात् ॥
चरेदर्धं व्रतं तत्र भूषणार्थं च यत्कृतम् ॥ १५५ ॥
गोविपत्ति-वधाशङ्की कुर्याद्यो नैव निष्कृतिम् ॥
सतद्रोमतुल्यानि नरकाण्याविशेत्समाः ॥ १५६ ॥

---

१. A. reads कुःखात् for कुद्यात्. २. A. reads बन्धनमाप्नुयात् instead of बंधनवाप्नुयात्. ३. A. B. D. E. and F. read °विपत्तौ वधाशंकी for °विपत्तिवधाशंकी. ४. A. reads °तुल्या वै for °तुल्यानि.

यःस्नात्वा पापसम्भीतो विप्राराधनतत्परः ॥
तद्वत्तां निष्कृतिं कुर्याद्वतैनाः सोऽश्नुते शुभम् ॥ १५७ ॥
अन्यत्प्राणिवधस्याथ प्रवक्ष्यामि विशोधनम् ॥
गजादिवधशुद्ध्यर्थं यद्व्रतं या च दक्षिणा ॥ १५८ ॥
हस्तिनं तुरगं हत्वा वृषभं खरमेव च ॥
वृषान्क्ष्मां शतगुणं वृषं दद्याद्यथाक्रमम् ॥ १५९ ॥
क्षणाद्गोनिष्क्रयं कृत्वा परगोवधकृन्नरः ॥
तस्याथ निष्कृतिं कुर्याद्वधशुद्धिमपेक्षया ॥ १६० ॥
हंसं श्येनं कपिं गृध्रं जल-स्थलशिखण्डिनम् ॥
भासं च हत्वा स्युर्गावः शुद्ध्यै देयाः पृथक् पृथक् ॥ १६१ ॥
हंस-सारस-चक्राह्व-मयूर-मद्गु-कुक्कुटान् ॥
आटी-पारावत-क्रौञ्च-शुकहा भक्तभोजनात् ॥ १६२ ॥
मेषा-ऽजघ्नो वृषं दद्यात्प्रत्येकं शुद्धये द्विजः ॥
मनीषिणो वदन्त्येनां प्राणिनां वधनिष्कृतिम् ॥ १६३ ॥
क्रौञ्च-सारस-हंसादिशिखि-सारसकुक्कुटान् ॥
शुक-टिट्टिभसंघघ्नो नक्ताशी बकहा शुचिः ॥ १६४ ॥
पारावत-कपोतघ्नः सारि-तित्तिर-चाषहा ॥
त्रिसंध्यांतर्जले प्राणानायम्य स्याच्छुचिर्द्विजः ॥ १६५ ॥
काकं गृध्रं च श्येनं च अन्यं क्रव्यादपक्षिणम् ॥
हत्वा स्यादुपवासेन शुद्धिमाह पराशरः ॥ १६६ ॥
मार्जारं मूषकं सर्पं हत्वाऽजगर-डिण्डिभौ ॥
शर्कराभोजनं दण्डमायसं च ददन् शुचिः ॥ १६७ ॥
मेषं च शशकं गोधां हत्वा कूर्मं च शल्लकम् ॥
वार्ताकं गृंजनं जग्ध्वा ऽहोरात्रोपोषणाच्छुचिः ॥ १६८ ॥
वृकं च जंबुकं हत्वा तरक्षर्क्षौ तथा द्विजः ॥
त्रिरात्रोपोषितः शुद्ध्येत्तिलप्रस्थप्रदानतः ॥ १६९ ॥

---

१. A. reads उक्तां च for तद्वत्तां २. A reads करभं for वृषभं. ३. F. reads वृकान् for वृषान्. ४, A. च्वांशुकं गुंजां, C. too the same, while F. reads पंचांशुकं गुंजां. ५. A. reads तृणां for क्षणात् and B. कणात्. ६. A. reads दत्वा for कृत्वा, F. too the same. ७. B. E. and F. read पिक° for हंस°. ८. F. reads °मद्गुघ्नः for °संघघ्नः ९. A. reads ऽयहात् for बकहा. १० A. B. D. E. and F. read कृशरा° for शर्करा°. ११. A reads this whole line as— विस्नात्वैकोपवासेन शुद्धः स्याद्द्विजपूजनात्.

द्विजः शाखामृगं हत्वा सिंहं चित्रकमेव च ॥
कृत्वा सप्तोपवासान्स दद्याद्ब्राह्मणभोजनम् ॥ १७० ॥
महिषोष्ट्रगजाऽश्वानां हत्वा चान्यतमं द्विजः ॥
त्रिः स्नात्वा चोपवासेन शुद्धः स्याद्द्विजपूजनात् ॥ १७१ ॥
वराहं यदि वा रोहं हत्वा मृगमकामतः ॥
अफालकृष्टभोजी सन् नक्तेनैकेन शुद्ध्यति ॥ १७२ ॥
अथान्यत्सम्प्रवक्ष्यामि अस्पृश्यस्पर्शनादिषु ॥
अभक्ष्यभक्षणादौ च निष्कृतिं श्रोतुमर्हथ ॥ १७३ ॥
उदक्या ब्राह्मणी स्पृष्टा मातंगपतितेन च ॥
चान्द्रायणेन शुद्ध्येत द्विजानां भोजनेन च ॥ १७४ ॥
कापालिकादिकां नारीं गत्वाऽगम्यां तथा पराम् ॥
भुक्त्वा विप्रस्ताद्दिनं स्याच्छुद्धिःचंद्रव्रतेन तु ॥ १७५ ॥
कामतस्तु द्विजः कुर्यादुक्तस्त्रीगमनं यदि ॥
चंद्रव्रतद्वयं शुध्यै प्राह पाराशरो मुनिः ॥ १७६ ॥
दुग्धं सलवणं सक्तून् सदुग्धान्निशि सामिषान् ॥
दन्तच्छिन्नान्सकृद्दंतान्पृथक् पीतजलानि च ॥ १७७ ॥
योऽद्यादुच्छिष्टमाज्यं तु पीतशेषं जलं पिबेत् ॥
एकैकशो विशुद्ध्यर्थं विप्रः चंद्रव्रतं चरेत् ॥ १७८ ॥
वासांसि धावतो यत्र पतन्ति जलबिन्दवः ॥
तदपुण्यं जलस्थानं नरकस्य शिलान्तिकम् ॥ १७९ ॥
तत्र पीत्वा जलं विप्रः श्रान्तस्तृट्परिपीडितः
तदेनसो विशुद्ध्यर्थं कुर्याच्चान्द्रायणं व्रतम् ॥ १८० ॥
नटीं शैलूषिकीं चैव रजकीं वेणुवादिनीम् ॥
गत्वा चांद्रायणं कुर्यात्तथा चर्मोपजीविनीम् ॥ १८१ ॥
गां नृपं चैव वैश्यं च शूद्रं वाप्यनुलोमजम् ॥
क्षत्रियादिस्त्रियं गत्वा विप्रश्चांद्रायणं चरेत् ॥ १८२ ॥
ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददन् ॥
द्वावप्येतावभोज्यान्नौ चरेतां शशिनो व्रतम् ॥ १८३ ॥

---

१. F. reads °भोजनात् for °पूजनात्. २. B. reads पतितेनांत्यजेन वा, E. and F. also read the same. ३. B. reads यस्य for यत्र, E. and F. also the same. ४. A. B. E. and F. read शिलांकितम् for शिलांतिकम्. ५. A. B. E. and F. read शांतः for श्रांतः. ६. A. reads °जीविनीम् for °वादिनीम्. ७. ८. In both places B. D. E. and F. read ददत् for ददन्.

विप्रेणामंत्रितोऽविप्रः शूद्राहूतश्च योऽश्नुते ॥
आमंत्रयितृ-भोक्तारौ शुद्ध्येतामैन्दवेन तु ॥ १८६ ॥
समानार्षीं च यो गच्छेन्मात्रा सह सगोत्रजाम् ॥
मातुलस्य सुतां चैव विप्रश्चान्द्रायणं चरेत् ॥
पीतशेषं जलं पीत्वा भुक्तशेषं तथा घृतम् ॥
भुक्त्वा मूत्र-पुरीषे तु द्विजश्चान्द्रायणं चरेत् ॥ १८७ ॥
सूनिहस्ताच्च गोमांसमस्त्वामद्यमकामतः ॥
पीत्वा चंद्रव्रतं कुर्यात्पावनं शुद्धिदं परम् ॥ १८८ ॥
साग्निः सन्पंचयज्ञान्यो न कुर्वीत द्विजाधमः ॥
परपाकरतो नित्यं आत्मपाकविवर्जितः ॥ १८९ ॥
अदाता च सदा लुब्धः श्वपचः परिकीर्तितः ॥
यो द्विजोऽस्यान्नमश्नाति स कुर्यादैन्दवं व्रतम् ॥ १९० ॥
गणिका-गणयोरन्नं यदन्नं बहुयाजकम्[1] ॥
सीमन्तोन्नयने भुक्त्वा द्विजश्चांद्रायणं चरेत् ॥ १९१ ॥
[2]अजानन् सम्यगश्नीयात्पुत्रजन्मनि यो द्विजः ॥
सोऽभक्ष्यसमश्नाति[3] द्विजश्चांद्रायणं चरेत् ॥ १९२ ॥
महापातकिनामन्नं योऽद्यादज्ञानतो द्विजः ॥
अज्ञानात्तप्तकृच्छ्रं तु ज्ञानाच्चांद्रायणं चरेत् ॥ १९३ ॥
प्रपात-विष-वह्न्यम्बु-प्रव्रज्योद्बन्धनाशकात् ॥
च्युतो हतश्च हंता च प्रत्यवासनिकाः स्मृताः ॥ १९४ ॥
केचिदेतद्विशुद्ध्यर्थमिच्छन्ति व्रतमैन्दवम् ॥
दक्षिणां सवृषां गां च दद्युश्च द्विजभोजनम् ॥ १९५ ॥
गृहद्वारेऽतिथौ प्राप्ते तस्यादत्वा समश्नुते ॥
अभोज्यमशनं तच्च भुक्त्वा चांद्रायणं चरेत् ॥ १९६ ॥
सव्यहस्तस्थिते दर्भे यो द्विजः समुपस्पृशेत्[4] ॥
असृक्पानेन तुल्यं च पीत्वा चान्द्रायणं चरेत् ॥ १९७ ॥
भुक्त्वा शय्यागतः पीत्वा विप्रश्चांद्रायणं चरेत् ॥
अभक्ष्येण समं तद्धि प्रायश्चित्तं समं भवेत् ॥ १९८ ॥

---

१. B. E. and F. read °याचकम् for °याजकम्. २. These three verses are not given in A. ३. A. reads योऽभक्ष्यं च समश्नाति for सोऽभक्ष्यसमश्नाति. ४. B. D. E. and F. read समुपासते for समुपस्पृशेत्.

आसनारूढपादः सन्वस्त्रस्याधमधः कृतम् ॥
धरामुखेन यो भुंक्ते द्विजश्चांद्रायणं चरेत् ॥ १९९ ॥
उद्धृत्य वामहस्तेन यत्किञ्चित्पिबते द्विजः ॥
सुरापानेन तत्तुल्यं पीत्वा चांद्रायणं चरेत् ॥ २०० ॥
स्पृष्टेन तेन संस्नायाद्यदि तच्छृतमश्नुते ॥
चरन् चांद्रायणं शुद्ध्यै त्रीणि कृच्छ्राणि वा द्विजः ॥
अभीयाद्येन स्पृष्टेन उच्छिष्टं चाश्नुते हि सः ॥
चरेच्चांद्रायणं शुद्ध्यै त्रीणि कृच्छ्राणि च द्विजः ॥ २०१ ॥
चांद्रायणं नवश्राद्धे पाराको मासिके मतः ॥
न्यूनाब्दे पादकृच्छ्रं स्यादेकाहः पुनराब्दिके ॥ २०२ ॥
स्नानमन्येषु कुर्वीत प्राणायामं जपं तथा ॥
यःस्वैरिणीनां च पुनर्भुवां च यः कामचारिद्विजयोषितां च ॥
रेतोधृतां पाकमनाय दद्याद्विप्रः स चंद्रव्रतकृच्छुचिः स्यात् ॥
वेश्मन्यज्ञातचांडालो द्विजातेर्यदि तिष्ठति ॥
ब्रह्मकूर्चं चरेन्मासं त्रिः स्नायी नियतेन्द्रियः ॥ २०३ ॥
स्नेहांश्च घृततैलादीन्वस्त्राणि चासनानि च ॥
बहिः कृत्वा दहेद्गेहं संशुद्धो भोजयेद्द्विजान् ॥ २०५ ॥
गोविंशतिं वृषं चैकं तेभ्यो दद्याच्च दक्षिणाम् ॥
इमं च निष्क्रयं ब्रूयुः केऽपि[1] चांद्रायणत्रयम् ॥ २०६ ॥
अल्पपापस्य[2] शुद्ध्यर्थं चरेत्सांतपनं[3] व्रतम् ॥
इमं च निष्क्रयं दद्यादित्येके मुनयो विदुः ॥ २०७ ॥
महापातक शुद्ध्यर्थं सर्वा निष्कृतयो[4] नरैः ॥
नृप-ग्रामेशविदितैः कुर्वाणैः शुद्धिराप्यते ॥ २०८ ॥
सुरा-मूत्र-पुरीषाणां लीढा त्वेकमकामतः ॥
पुनः संस्कारकरणाच्छुद्ध्येदाह पराशरः ॥ २०९ ॥
अभक्ष्यभक्षणो विप्रस्तथैवापेयपानकृत् ॥
व्रतमप्यप्रकुर्वीत वदन्त्यन्ये द्विजोत्तमाः ॥ २१० ॥
कुशा-ऽब्जा-ऽश्वत्थ-पालाश-बिल्वोदुम्बरवारिणा ॥
पीतेन जायते शुद्धिः षड्रात्रेण न संशयः ॥ २११ ॥

---

१. A. reads चांद्रायणं च केचन for केऽपि चांद्रायणत्रयम्. २. B. D. E. and F. read अस्य for अल्प°. ३. A. reads °वा ह्यन्यथं for सांतपनं. ४. A. B. D. E. and F. read सर्वनिष्कृतये for सर्वा निष्कृतयो.

द्रोण्यम्बुक्षीर-कुम्भाम्भः श्वस्पृष्टं केशवारि च ॥
पीत्वारण्ये प्रपातोऽयं पंचगव्यं पिबन्छुचिः ॥ २१२ ॥
भाण्डस्थितमभोज्यानां पयो-दधि-घृतं पिबन् ॥
द्विजातेरुपवासः स्याच्छूद्रो दानेन शुध्यति ॥ २१३ ॥
तत्तोयपीतजीर्णांगः तप्तकृच्छ्रं चरेद्द्विजः ॥
घांते तु तज्जले सद्यः प्राजापत्यं समाचरेत् ॥ २१४ ॥
रजकाद्यंबुपानेन प्राजापत्यं बुधैःस्मृतम् ॥
वान्ते जले तदर्धं तु शूद्रः स्यात्पादकृच्छ्रकृत् ॥ २१५ ॥
चाण्डालकूपपानेन महदेनः प्रजायते ॥
गोमूत्रयावकाहाराः शुद्ध्येयुर्दिवसैस्त्रिभिः ॥ २१६ ॥
घृतं दधि तथा दुग्धं गोष्ठे वाऽशौचसूतके ॥
अभिचारस्य तन्हुत्वा भुक्त्वा वा शूद्रभोजनम् ॥ २१७ ॥
द्रुपदां वा द्विजो जप्त्वा मानस्तोकमथापि वा ॥
क्षुधातिपीडितः पश्चादिति प्राह पराशरः ॥ २१८ ॥
सूतकान्नं द्विजो भुक्त्वा त्रिरात्रोपोषणाच्छुचिः ॥
तोयपाने त्वसौ कुर्यात्पंचगव्यस्य चाशनम् ॥ २१९ ॥
द्रोणाढकं तदर्धं वा प्रस्थं प्रस्थार्धमेव वा ॥
घृतमुच्छिष्टसंस्पृष्टं प्रोक्षणाच्छुचितामियात् ॥ २२० ॥
चरुपक्वं श्रुतं पक्वं अन्नं काकाद्युपाहतम् ॥
तद्ग्रासस्थानसंत्यागात्पूतं हेमाम्बुसिंचनात् ॥ २२१ ॥
केचिद्वदन्ति तज्ज्ञास्तु तस्याग्निभावप्लूडनम् ॥
केचित्प्रणवयुक्तेन वारिणा प्रोक्षणं विदुः ॥ २२२ ॥
केश-कीटकसंदुष्टं अन्नं मक्षिकयापि च ॥
मृद्भस्मवारिणा तत्र क्षेप्तव्यं शुद्धिकारणम् ॥ २२३ ॥
उदक्या ब्राह्मणी स्पृष्टा क्षत्रिण्यापि ह्युदक्यया ॥
अर्धकृच्छ्रं चरेत्पूर्वा तदर्धमपरा चरेत् ॥ २२४ ॥
प्राजापत्यं विशःपत्या विट्पत्नी पादमाचरेत् ॥
शूद्रास्पृष्टा चरेत्कृच्छ्रं शूद्री दानेन शुद्ध्यति ॥ २२५ ॥
ब्राह्मण्या ब्राह्मणी स्पृष्टा उदक्योदक्यया च ते ॥
चरेतां पादकृच्छ्रे द्वे कृते स्नाने विशुद्ध्यति ॥ २२६ ॥

---

१. B. reads °क्षीर° for °क्षीर°. २. B. reads कृच्छ्र° for केश°.

ब्राह्मणी क्षत्रियां स्पृष्ट्वा ब्राह्मणीव्रतमाचरेत् ॥
अपरा क्षत्रियायास्तु वक्तव्यमेवमन्ययोः ॥ २२७ ॥
रजस्वला तु संस्पृष्टा श्व-विट्-शूद्रैश्च वायसैः ॥
स्नानं यावन्निराहारं पंचगव्येन शुद्ध्यति ॥ २२८ ॥
उदक्या ब्राह्मणी स्पृष्टा मद्य-मातंग-भिल्लकैः ॥
गोमूत्रयावकाहारा षड्रात्रेण च शुद्ध्यति ॥ २२९ ॥
उच्छिष्टो ब्राह्मणः स्पृष्ट्वा द्विजातिस्त्रीं रजस्वलाम् ॥
प्राजापत्येन संशुद्ध्येच्चीर्णकृच्छ्रेण वा पुनः ॥ २३० ॥
वदन्ति कवयः केचिदेतद्दोषविशुद्धये ॥
प्राणायामशतं चास्य पंचगव्यस्य भक्षणात् ॥ २३१ ॥
उच्छिष्टो ब्राह्मणः स्पृष्टो ब्राह्मण्युदक्यया चरेत् ॥
प्राजापत्यं च गायत्रीमयुतं नियतं सकृत् ॥ २३२ ॥
क्षत्रिण्यादिभिरुच्छिष्टैः संस्पृष्टो व्रतमाचरेत् ॥
अनुच्छिष्टस्तु तत्स्पर्शे स्नानकर्म यतः स्मृतम् ॥ २३३ ॥
रजकादिकसंस्पर्शे द्विजन्मोदक्ययोषितः ॥
प्राजापत्यं चरेद्विप्रा अन्याश्चरेयुरंशतः ॥ २३४ ॥
उदक्यां ब्राह्मणीं गत्वा क्षत्रियो वैश्य एव च ॥
त्रिरात्रोपोषितः प्राश्य गव्यमाज्यं शुचिर्भवेत् ॥ २३५ ॥
क्षत्रिणीं चैव वैश्यां च जानन् गत्वा तु कामतः ॥
चरेत्सांतपनं विप्रस्तत्पापस्य विमोक्षकृत् ॥ २३६ ॥
वैश्यां च क्षत्रियो गत्वा वैश्यश्च शूद्रिणीं तथा ॥
प्राजापत्यं चरेतां ताविति प्राह पराशरः ॥ २३७ ॥
उच्छिष्टा ब्राम्हणी स्पृष्टा शुना वा वृषलेन वा ॥
अशुद्धा वा भवेत्तावद्यावन्नस्यादुपोषणम् ॥
शुद्धा भवति सा तावद्यावत्पश्यति शीतगुम् ॥ २३८ ॥
विप्रोष्य स्वजनीं वेश्यां महिष्युष्ट्रीमजां खरीम् ॥
प्राजापत्यं चरेद्गत्वा ह्येकैकस्य विशुद्धये ॥ २३९ ॥
शूद्रीं तु ब्राम्हणो गत्वा मासं मासार्धमेव वा ॥
गोमूत्रयावकाहारो मासार्धेन विशुद्ध्यति ॥ २४० ॥
नृपोऽप्यस्वजनां गत्वा प्राजापत्यं समाचरेत् ॥
वैश्यपत्नीमसौ गत्वा कृत्वा सांतपनं शुचिः ॥ २४१ ॥

---

१. B. reads जपेत्स्नानं त्रिकालकृत् for अयुतं नियतं सकृत्.

शूद्रीं तु क्षत्रियो गत्वा गोमूत्रयावकाशनः ॥
दशभिर्दिवसैः शुद्ध्येद्वैश्यःसोऽप्येवमेव हि ॥ २४२ ॥
उत्तमागमनेऽनार्याः सर्वे ते स्युः कराग्निना ॥
महापथं च संप्राज्याः खरयानेन योषितः ॥ २४३ ॥
चाण्डालीमेव भिल्लानामभिगम्य सकृत्स्त्रियम् ॥
चाण्डाल-मेद-भिल्लानामभिगम्य स्त्रियं नरः ॥
शुद्ध्यै पयोव्रतं कुर्यान्मासार्धमघमर्षणम् ॥ २४४ ॥
पतितां च द्विजाम्यर्क्षीं प्राजापत्यं चरेद्विजः ॥
तैलिकस्य स्त्रियं गत्वा तथा मद्यकृतःस्त्रियम् ॥ २४५ ॥
अज्ञानाभिगतौ स्त्रीणां पुंसामनुलोमजस्य च ॥
इमां निष्कृतिमिच्छन्ति घृतयोनिं च केचन ॥ २४६ ॥
पितृव्य-भ्रातृजायां च मातृष्वसारमेव च ॥
भगिनीं चैव धात्रीं च गत्वा कृच्छ्रं समाचरेत् ॥ २४७ ॥
षण्मासान् केचिदिच्छन्ति संगत्यैता विशुद्धये ॥
कृच्छ्रं धर्मविदो विप्राः शुद्धिं तत्वार्थवेदिनः ॥ २४८ ॥
गुरुपत्नीं द्विजो गत्वा मातृष्वसृ-दुहितृषु ॥
क्षिपेच्छुध्यर्थमात्मानं सुसमिद्धे-हुताशने ॥ २४९ ॥
उपाध्याय-नृपा-ऽऽचार्य-शिष्य-योषिद्रमी नरः ॥
षण्मासान्कृच्छ्रचरणाच्छुद्धिमाह पराशरः ॥ २५० ॥
कृतचाण्डालसंस्पर्शः शकृन्मूत्रकरो द्विजः ॥
षड्रात्रोपोषणाच्छुद्ध्येद्भुक्त्वा ऽऽचान्तो नवद्युभिः ॥ २५१ ॥
ऊर्ध्वोच्छिष्टस्य संशुद्ध्यै केचित्प्रजापतिव्रतम् ॥
पराकं पञ्चगव्यं च केचिदाहुर्मनीषिणः ॥ २५२ ॥
उच्छिष्टो ब्राम्हणः स्पृष्ट उच्छिष्टेन द्विजेन तु ॥
आचम्यैव तु शुध्येतां विष्णुनामानुकीर्तनात् ॥ २५३ ॥
क्षत्रियेण तु संस्पृष्टो ब्राह्मणो नक्तभोजनात् ॥
वैश्येन चैव संस्पृष्टो नक्ताशी पंचगव्यपः ॥ २५४ ॥
शूद्रेण तु च संस्पृष्टो एकरात्रोपवासकृत् ॥
उच्छिष्टैः पुनरेतैस्तु प्रोक्तं द्विगुणमर्हति ॥ २५५ ॥

---

१. F. reads सर्वाः for ऽनार्याः.

उच्छिष्टः शूद्रसंस्पृष्टः शुना वापि द्विजोत्तमः ॥
उपोष्य पंचगव्येन शुद्धिः स्यादपरे विदुः ॥ २५६ ॥
अनुच्छिष्टोऽपि यत्स्पर्शात्स्नाति वर्णी विशुद्धये ॥
उच्छिष्टः तस्य संस्पर्शे चरेत्प्रजापतिव्रतम् ॥ २५७ ॥
रजकाद्यन्त्यजैः स्पृष्टः शुध्येत्तस्यार्धमाचरन् ॥
उदक्या ब्राह्मणी कृच्छ्रात्प्राजापत्याद्यथापरे ॥ २५८ ॥
उदक्या ब्राह्मणी स्पृष्टा शुना वा वृषलेन वा ॥
तावत्तिष्ठेन्निराहारा स्नात्वा कालेन शुद्ध्यति ॥ २५९ ॥
उदक्या सूतिका-म्लेच्छसंस्पर्शेऽस्तमिते रवौ ॥
दिवाहृताम्बुना स्नात्वा शुध्येद्विप्राग्निसन्निधौ ॥ २६० ॥
वदन्त्यपां पवित्रत्वं दिवा सूर्यांशु-मारुतैः ।
वन्दयित्वा पवित्रत्वं मन्दार्करश्मि-वायुभिः ॥
मुनयो धर्मवेत्तारो रात्रौ चंद्रांशु-रश्मिभिः ॥ २६१ ॥
सकृच्च ब्राह्मणः प्राश्य षडहं पंचगव्यकम् ॥
हेम्नो दद्याच्च षण्मासान्दत्वा गां च विशुध्यति ॥ २६२ ॥
पंचाहेन नृपः शुध्येत्पंचमासान्ददच्च गाः ॥
चतुर्भिर्दिवसैर्वैश्यश्चतुर्मासान् गवा सह ॥ २६३ ॥
त्र्यहेण तु चतुर्थस्तु दद्यन्मासत्रयं च गाम् ॥
सकृत्स्पर्शाद्भवेच्छुद्ध एतदाह पराशरः ॥ २६४ ॥
रक्तं निःसार्य विप्रस्य कामतोऽकामतोऽपि वा ॥
गायत्र्यष्टसहस्रेण जप्तेन तु भवेच्छुचिः ॥ २६५ ॥
यो यस्य हरते भूमिं हेम गामश्वमेव वा ॥
स तं यत्नात्प्रसाद्यापि तदुक्तः शुद्धिमाप्नुयात् ॥ २६६ ॥
आख्याय भूभृते वापि तेन संशोधितः शुचिः ॥
द्रव्यदण्डाद्विमुक्तिर्वा तपसा वा शुचिर्नरः ॥ २६७ ॥
निराहाराज्जायते च एतदाहुर्मनीषिणः ॥
विनिर्गता यदा शूद्रादुक्यान्ते व्यवस्थिताः ॥ २६८ ॥

---

१. A. reads एकरात्रोपवासेन for उपोष्य पंचगव्येन, B. D. E. and F. also read the same. २. Except B. read °माषान् for °मासान्. ३. A. C. and F. read हेममाषत्रयं for षण्मासत्रयं. ४. A. only reads सकृदहनन्मशुध्येत for सकृत्स्पर्शाद्भवेच्छुद्धः. ५. These 5 lines are not given in B. D. E. and F.

तदा द्विजैस्तु द्रष्टव्य इतिधर्मविदो विदुः ॥
दुःस्वप्नदर्शने चैव वान्ते वा क्षुरकर्मणि ॥
मैथुने कटधूमे च सद्यः स्नानं विधीयते ॥ २६९ ॥
चितां च चितिकाष्ठं च यूपं चण्डालमेव च ॥
स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत् ॥ २७० ॥
श्व-जंबुक-वृकाद्यैश्च यदि दष्टो भवेन्नरः ॥
सचैलो जलमाविश्य दत्वाज्यं शुद्धिमर्हति ॥ २७१ ॥
शुनो घ्राणावलीढस्य नखैर्विलिखितस्य च ॥
यतीनां दर्शनं कार्यमग्निना चोपचूलनम् ॥ २७२ ॥
अवज्ञां तु गुरोः कृत्वा नक्तं तस्य च भोजनम् ॥
नक्षत्रदर्शनं त्वन्य इति प्राह पराशरः ॥ २७३ ॥
कुमारी तु शुना स्पृष्टा जम्बुकेन वृकेण वा ॥
यां दिशं व्रजते सूर्यस्तां दिशं सा विलोकयेत् ॥ २७४ ॥
दिवसे तु यदा ग्रामे शुना स्पृष्टो भवेद्द्विजः ॥
विप्रं प्रदक्षिणीकृत्य घृतं प्राश्य विशुद्ध्यति ॥ २७५ ॥
चातुर्वर्ण्यात्तु या नारी कृताभिगमनापि च ॥
प्रक्षाल्य नाभितोऽधस्तादाचान्तस्तु शुचिर्नरः ॥ २७६ ॥
विप्रे मैथुनिनि स्नानं केचिद्राह्नि शिरोविना ॥
नाभिं यावत् विशस्तद्वल्लिंगशौचोऽन्त्यजः शुचिः ॥ २७७ ॥
अभिगच्छन्सुतार्थं च ऋतावृत्तौ स्त्रियं द्विजः ॥
न च कुर्वीत स स्नानं नाभेरधस्तु शोधयेत् ॥ २७८ ॥
त्वङ्कारं तु गुरोः कृत्वा हुंकारं तु गरीयसः ॥
प्रसाद्यैतावनश्नन्स्यात्स्नात्वा शुद्धो द्विजोत्तमः ॥ २७९ ॥
विवादे शास्त्रतो जित्वा जयो यस्य न जायते ॥
स्मशाने जायते तस्य तमोभावेन दुष्कृतम् ॥ २८० ॥

---

१. B. D. E. and F. read तिला वसूनि काष्ठानि अंत्यजस्यापि वेश्मनः for the given line in the original. २. A. reads अद्भिः प्रक्षालनं for यतीना दर्शनं. ३. A. B. D. E. and F., read दृष्टा for स्पृष्टा. ४. A. reads चतुर्वर्णा-शुचिर्नारी and B. reads चातुर्वर्ण्यशुचिर्नारी, D. E. and F. also read the same as B. ५. A. reads लिंगशौचांतिकं for लिंगशौचोऽन्त्यजः. ६. A. reads अवश्यं for अनश्नन्. ७. A. reads भयं for जयो.

ताडयित्वा तृणेनापि स्कन्धे वाऽऽबध्य रज्जुना ॥
कलहादपि निर्जित्य तं प्रसाद्य विशुद्ध्यति ॥ २८१ ॥
अवगूर्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने ॥
कृच्छ्रातिकृच्छ्रोऽसृक्पाते कृच्छ्रोऽस्यान्तरशोणिते ॥ २८२ ॥
प्रेतमूढ्वा च दग्ध्वा च शुद्धिः स्नानाद्द्विजन्मनाम् ॥
उपवासेन चैकेन ब्रह्मकूर्चं च पावनम् ॥ २८३ ॥
प्रेतीभूतं च यः शूद्रं ब्राम्हणो ज्ञानदुर्बलः ॥
अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत् ॥ २८४ ॥
त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम् ॥
प्राणायामशतं कृत्वा घृतं प्राश्य विशुद्ध्यति ॥ २८५ ॥
अंगुल्या दन्तकाष्ठं च प्रत्यक्षलवणं तथा ॥
मृत्तिकाभक्षणं चैव तुल्यं गोमांसभक्षणम् ॥ २८६ ॥
कृत्वाऽन्यतममेतेषां शुद्ध्यर्थमात्मनो हितम् ॥
चरेच्छशिव्रतं विप्र इति प्राहुर्मनीषिणः ॥ २८७ ॥
केचिद्वदन्ति मुनयः कृच्छ्रं सांतपनं तथा ॥
तदर्द्धं पादकृच्छ्रं वा प्राहुरन्ये द्विजोत्तमाः ॥ २८८ ॥
अर्धोच्छिष्टो द्विजोऽज्ञानाद्यात्यघं नहि किंचन ॥
भुक्त्वाऽनाचम्य वा कुर्याद्विण्मूत्रं केह निष्कृतिः? ॥ २८९ ॥
नक्तोपवासी बाह्ये तु अन्यत्र द्विगुणं चरेत् ॥
अष्टोत्तरशतं जप्त्वा गायत्र्याः शुद्धिमर्हति ॥ २९० ॥
अर्धोच्छिष्टो द्विजः स्पृष्टः शुना वा वृषलेन वा ॥
नक्षत्रदर्शनेऽश्नीयात्पंचगव्यपुरस्सरम् ॥ २९१ ॥
अर्धोच्छिष्टाश्च विप्राद्याः श्वोच्छिष्टैः शूद्रसंस्पृशः ॥
उपवासेन शुद्ध्येयुः पंचगव्यस्य पानतः ॥ २९२ ॥
श्व-काकी-काकसंस्पृष्टो भुञ्जानो ब्राह्मणश्च यः ॥
तदन्नस्य परित्यागं कृत्वा स्नानेन शुद्ध्यति ॥ २९३ ॥
विना यज्ञोपवीतेन भोजनं कुरुते यदि ॥
अथ मूत्र-पुरीषे वा रेतःसेचनमेव वा ॥ २९४ ॥
त्रिरात्रोपोषितो विप्रः पादकृच्छ्रं तु भूमिपः ॥
अहोरात्रोषितो वैश्यः शुद्धिरेषा पुरातनी ॥ २९५ ॥

---

१. A. reads विवादेनापि for कलहादपि

विप्रः क्षुत्कृत्य निष्ठीव्य कृत्वा चानृतभाषणम् ॥
वचनं पतितैःकृत्वा दक्षिणं श्रवणं स्पृशेत् ॥ २९६ ॥
विप्रस्य दक्षिणे कर्णे नित्यं वसति पावकः ॥
अंगुष्ठे दक्षिणे पाणौ तस्मात्तेन च स स्पृशेत् ॥ २९७ ॥
प्रेक्षणं शशिनोऽर्कस्य ब्रह्मेश-विष्णुसंस्मृतिम् ॥
गायत्र्याः शत-साहस्रं सर्वपापहरं स्मृतम् ॥ २९८ ॥
गायत्र्यष्टसहस्रं तु ब्रह्महत्याविशोधनम् ॥
शूद्रवधे द्विजाग्र्यस्य गायत्र्यष्टसहस्रकम् ॥ २९९ ॥
राज्ञः पंचसहस्रं तु स्याद्विशश्च तदर्धकम् ॥
योगेन गतशीलस्तु यदि वा स्यात्सदा नरः ॥ ३०० ॥
विप्रश्च सम्मताचारस्तावुभौ सर्वदा शुची ॥
मक्षिकां सन्ततीर्धारा विप्रुषो ब्रह्मविन्दवः ॥
स्त्रीमुखं बाल-वृद्धौ च न दुष्यन्ति कदाचन ॥ ३०१ ॥
आत्मशय्यात्मबालश्च आत्मवृद्धस्तथैव च ॥
आत्मनः शुचयः सर्वे, परेषामशुचीनि तु ॥ ३०२ ॥
उत्पन्नमातुरे स्नानं दशकृत्वस्त्वनातुरः ॥
स्नात्वा स्नात्वा स्पृशेदेनं ततः शुद्ध्येत्स आतुरः ॥ ३०३ ॥
विवाहोत्सव-यज्ञेषु संग्रामे जलसंप्लवे ॥
पलायने तथारण्ये स्पर्शदोषो न विद्यते ॥ ३०४ ॥
आद्यसङ्गी समो दोषी सङ्गसङ्गी तदर्धतः ॥
तत्सङ्गी तृतीयभागी तुरीयस्तु न दोषभाक् ॥ ३०५ ॥
आद्यस्पृष्टुर्भवेत्स्नानं द्वितीयस्यापि तत्स्मृतम् ॥
शिरः प्रोक्षणमन्येषामन्यथाऽऽचमनं स्मृतम् ॥ ३०६ ॥
पलाश-शिंशिपाकाष्ठदन्तधावनकृन्नरः ॥
दिवाकीर्तिसमस्तावत् यावद्गां नैव पश्यति ॥ ३०७ ॥
पद्माश्म-लोह-फल-काष्ठ-चर्म-
भांण्डस्थतोयैः स्वयमेव शौचात् ॥

---

१. A. B. D. E. and F. read °त्रि° for °अष्ट°. २. Only A. reads गति° for गत°. ३. A. and C. read तावुभौ सर्वदा स्यातां निश्चितं सर्वकर्मसु । ४. A. reads this line thus:-पलायने वनेऽरण्ये स्पृष्टास्पृष्टिर्न दुष्यति । ५. F. substitutes दुष्यते for विद्यते. ६. B. reads भांडस्थले वा स्वयमेव शौचम् for भांडस्थतोयैः स्वयमेव शौचात्.

पुंसां निशास्वध्वनि निःसत्वानां
स्त्रीणां च शुद्धिर्विहिता सदैव ॥ ३०८ ॥
स्नानं स्पृष्टेन येन स्यात्काष्ठाद्यैर्यदि तत्स्पृशेत् ॥
नावारोहणवत् स्पर्शे तत्रोपस्पर्शनाच्छुचिः ॥ ३०९ ॥
म्लेच्छ-लूताशनास्पर्शे श्वभ्रे वा यदि वा स्थले ॥
उपस्पृशेत् शिरः प्रोक्ष्य संशुद्धो जायते द्विजः ॥ ३१० ॥
वस्त्रसंस्पर्शने तस्य सचैलाङ्ग१विगाहनम् ॥
अङ्गस्पर्शनवत्तस्य वदन्ति द्विजसत्तमाः ॥ ३११ ॥
चाण्डालोदकसंस्पृष्टः शुद्धः स्नानेन जायते ॥
तथा तद्भाण्डसंस्पर्शे स्नानमाहुर्मनीषिणः ॥ ३१२ ॥
उदक्या स्पर्शने स्नानमंशुकेनान्तराऽपि वा ॥
तत्स्पृष्टेऽपि भवेत्स्नानं तुल्याः सर्वा रजस्वलाः ॥ ३१३ ॥
संस्पर्शे२ मेद-भिल्लानां तथैव ब्रह्मघातिनाम् ॥
पतितानां च संस्पर्शे स्नानमेव विधीयते ॥ ३१४ ॥
रजस्वलादिसंस्पर्शे उपस्पर्शनमेव च ॥
उदक्यायास्त्रितीयेऽह्नि केचिदाचमनं विदुः ॥ ३१५ ॥
प्रथमेऽहनि चाण्डाली द्वितीये ब्रम्हघातिनी ॥
तृतीये रजकी प्रोक्ता चतुर्थे तु विशुध्यति ॥ ३१६ ॥
पुरुहूतः पुरा दैत्यं त्रिशीर्षाख्यं जघान यत् ॥
तद्वधे ब्रम्हहत्यायाः स्त्रीणां स प्रददौ फलम् ॥ ३१७ ॥
आसां तत्प्रभृति स्त्रीणामस्पृश्यत्वं सदा भवेत् ॥
अंशैर्दिनत्रयं ह्येतच्छुक्र-गुर्वादिकल्पितम् ॥ ३१८ ॥
शबराश्च पुलिन्दाश्च कैवर्ताश्च नटास्तथा ॥
एतान् रजकसन्तुल्यान् केचिदाहुर्मनीषिणः ॥ ३१९ ॥
रजक्याद्यभिगम्यत्वे वैश्या गो-मूत्र-यावकम् ॥
चरन्ति षड्गुणाहोभिः कृच्छ्रं वा द्विगुणं भवेत् ॥ ३२० ॥
ब्रम्ह-क्षत्रिय-विड्जाता शूद्रास्तेऽनुक्रमेण तु ॥
क्रमातिक्रमतश्चान्ये म्लेच्छान्त्यवर्णसंभवाः ॥ ३२१ ॥
भोज्याशनात्तु सच्छूद्रा अभोज्याश्चाः परे स्मृताः ॥
आमाशनानि भोज्यानि शृतमुच्छिष्टमुच्यते ॥ ३२२ ॥

---

१. B. reads °अभो° for °अंग.° २. B. reads संसर्गे for संस्पर्शे.

दास-नापित-गोपाल-कुलमित्रा-ऽर्धसीरिणः॥
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत् ॥ ३२३ ॥
पर्युषितं चिरस्थं च भोज्यं स्नेहसमन्वितम् ॥
यव-गोधूम-माषाणां स्नेह-गोरसविक्रयः ॥ ३२४ ॥
आपद्गतो द्विजोऽश्नीयाद्गृह्णीयाद्वा यतस्ततः ॥
न स लिप्येत पापेन पद्मपत्रमिवाम्भसा ॥ ३२५ ॥
ज्ञापितं[1] शूद्रगेहेऽन्नं कटु पक्कं च यद्भवेत् ॥
नीत्वा नद्यंतिके तद्वै प्रोक्ष्य भुंजन्न दोषभाक् ॥ ३२६ ॥
गायत्र्योङ्कारपूताभिः केचिदद्भिश्च प्रोक्षणम् ॥
मन्यन्ते विष्णुमन्त्रेण कलिधर्मे[2] समाश्रिताः ॥ ३२७ ॥
आमं मांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः ॥
म्लेच्छभाण्डस्थिता ह्येते निष्क्रान्ताः शुचयः स्मृताः ॥ ३२८ ॥
आभीरभाण्डसंस्थानि पयो-दधि-घृतानि च ॥
तावत्पूतं हि तद्भाण्डं यावत्तत्र तु तिष्ठति ॥ ३२९ ॥
पूतानि सर्वपण्यानि कारुहस्तस्थितानि च ॥
अदत्तानि च भक्ष्याणि[3] यत्नतस्तु द्विजातिभिः ॥ ३३० ॥
सर्वस्वोपस्करैर्युक्ता शय्या रक्तांशुकानि च ॥
पुष्पाणि चैव शुध्यन्ति प्रोक्षितानि न संशयः ॥ ३३१ ॥
अलेपं मृण्मयं भाण्डं भाण्डसंचयमेव च ॥
प्रोक्षणादेव शुध्येत सलेपमग्नितापनात्[4] ॥ ३३२ ॥
कांस्यं च भस्मना शुध्येत् मद्य-मांसविवर्जितम् ॥
सुरा-मूत्र-पुरीषाभ्यां शुध्यते ताप-लेपनैः[5] ॥ ३३३ ॥
अलिप्तं मद्य-मूत्राद्यैस्ताम्रमम्लेन शुध्यति ॥
रजसा स्त्री मनोदुष्टा नद्यश्च वेगसंयुताः ॥ ३३४ ॥
अवेगमपि यद्भूरि सरिद्वारि ह्रदे च यत् ॥
सकृदस्पृश्यसंस्पृष्टं न दुष्यति च तत्[6] ह्रदः ॥ ३३५ ॥
सत्येन पूयते वाणी धर्मः सत्येन वर्धते ॥
तस्मात्सत्यं हि वक्तव्यमात्मशुध्यै द्विजातिभिः ॥३३६ ॥
रथ्याकर्दम-तोयानि नावः पथि तृणानि च ॥

---

१. B. reads अर्पितं for ज्ञापितं; while A. reads आर्पितं for ज्ञापितं.
२. A. reads कालधर्मे for कलिधर्मे. ३. A. reads रक्ष्याणि for भक्ष्याणि.
४. A. reads °च्छूडनात् for °तापनात्. ५. A. reads °लेखनैः for °लेपनैः.
६. A. reads साङ्गिरा. for तत् ह्रदः.

मारुतार्केण शुध्यन्ति निशि चंद्रर्क्ष-मारुतैः ।। ३३७ ।।
यथासम्भवमुक्तानि प्रायश्चित्तानि सत्तम ।।
उक्तानुक्तानि सर्वाणि ज्ञातव्यानि द्विजातिभिः ।। ३३८ ।।
प्रायश्चित्तं न यत्प्रोक्तं धर्मशास्त्रप्रवक्तृभिः ।।
द्विजैस्तत्र प्रकल्प्यं स्याद्धर्मशास्त्रार्थचिन्तकैः ।। ३३९ ।।

उक्ता मया निष्कृतयः समासात्
संशुद्धये वर्णचतुष्टयस्य ।।
व्रतानि तेषां विहितानि यानि
वक्ष्याम्यतस्तानि निबोधयेति ।। ३४० ।।

इति श्री बृहत्पाराशरीये धर्मशास्त्रे सुव्रतप्रोक्तायां संहितायां प्रायश्चित्तनिर्णयो नाम अष्टमोऽध्यायः ।। ८ ।।

बृहत्पराशरसंहिता ।

॥ अथ नवमोऽध्यायः ॥

व्रतान्यथ प्रवक्ष्यामि ह्यैन्दवादिक्रमेण तु ॥
पापक्षयः कृतैर्यैः स्याद्धर्मार्थे तु महोदयः ॥ १ ॥
चन्द्रवृद्ध्याऽश्नियात् ग्रासान् शुक्ले कृष्णे च ह्रासयेत् ॥
चन्द्रक्षये न भोक्तव्यं यवमध्यं शशिव्रतम् ॥ २ ॥
विपरीतक्रमेणाश्नन्नादावादाय ह्रासयेत् ॥
वर्धयेदन्यपक्षे तु पिपीलीमध्यमैन्दवम् ॥ ३ ॥
अष्टावष्टौ समश्नीयात्सव्रती प्रतिवासरम् ॥
अष्टग्रासिकमित्येतच्चान्द्रायणमथापरम् ॥ ४ ॥
शतद्वयं तु पिंडानां चत्वारिंशत्समन्वितम् ॥
मासेनैवोपभुंजीत चांद्रायणमथापरम् ॥ ५ ॥
चतुरः प्रातरश्नीयात्सायं ग्रासांश्च तावतः ॥
शिशुचांद्रायणं तज्ज्ञैः प्रोक्तं पापप्रणोदनम् ॥ ६ ॥
मध्यन्दिने यदश्नीयादष्टौ ग्रासान् दिनंप्रति ॥
चांद्रायणं यतीनां तु व्रतज्ञैः परिकीर्तितम् ॥ ७ ॥
शिखण्डसम्मितान् ग्रासान् चन्द्रव्रती प्रयोजयेत् ॥
दोषः स्यादन्यथाभावे तस्मादुक्तं समाश्रयेत् ॥ ८ ॥
एकभुक्तैश्च नक्तैश्च तथैवाऽयाचितैरपि ॥
उपवासैश्चतुर्भिश्च कृच्छ्रः षोडशभिर्दिनैः ॥ ९ ॥
उष्णं जलं पयः सर्पिरेकैकं च त्र्यहं पिबेत् ॥
वायुभक्षस्त्र्यहं तिष्ठेत्तप्तकृच्छ्रोऽयमुच्यते ॥ १० ॥
पलमेकं जलं पीत्वा पलमेकं तथा पयः ॥
पलमेकं तथाज्यस्य मानमेतत्प्रकीर्तितम् ॥ ११ ॥
एतत्त्रिगुणितं तज्ज्ञैर्महासांतपनं स्मृतम् ॥
प्राजापत्यं च कृच्छ्रं च पराकस्त्रिगुणो महान् ॥ १२ ॥

---

१. B. reads मध्ये शशिव्रतं चरेत् for यवमध्यं शशिव्रतम्. २. A. reads °णैतानाश° for °णाश्नन्नाश°.

पद्मोदुम्बर-राजीव-बिल्वपत्रं कुशोदकम् ॥
प्रत्येकं प्रत्यहं प्राश्य पर्णकृच्छ्रः प्रकीर्तितः ॥ १३ ॥
प्रत्येकं प्रत्यहं गव्यं मूत्रं शकृत्पयो दधि ॥
घृतं कुशोदकं पीत्वा उपवासश्च तत्समः ॥ १४ ॥
एभिः सप्ताशनैरुक्तं दिव्यं[१] सान्तपनं द्विजैः ॥
सप्ताहेन तु कृच्छ्रोऽयं मुनिभिः परिकीर्तितः ॥ १५ ॥
एतत्तु त्रिगुणं तज्ज्ञैर्महासान्तपनं स्मृतम् ॥
प्राजापत्यं च कृच्छ्रं च पराकस्त्रिगुणो महान् ॥ १६[२] ॥
एकभुक्तं च नक्तं च अयाचितविशेषणे ॥
पादकृच्छ्रोऽयमुद्दिष्टः त्रिघ्नं प्रजापतिव्रतम् ॥ १७ ॥
अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः ॥
कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिः ॥ १८ ॥
दिनैर्द्वादशभिः प्रोक्तः पराकः समुपोषितैः ॥
एक-द्व्यह-त्र्यहादीनि नक्तं चैव यथाश्रुतम् ॥ १९ ॥
सम्प्राश्य तिलपिण्याकं तक्रं तोयं कुशोदकम् ॥
पञ्चमे ह्युपवासः स्यात्सौम्यकृच्छ्रोऽयमुच्यते ॥ २० ॥
चान्द्रायणे च कृच्छ्रे च त्रिकालं स्नानमाचरेत् ॥
स्नानद्वयं तु कर्तव्यं व्रतेष्वेवापरेषु च ॥ २१ ॥
शक्तिं ज्ञात्वा शरीरस्य स्नानं कार्यं तथा व्रतम्[३] ॥
असामर्थ्ये तु कायस्य याच्यः पर्षदनुग्रहः ॥ २२ ॥
ब्रह्मकूर्चं प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ॥
कृतेन येन मुच्यन्ते प्राणिनः सर्वकिल्बिषैः ॥ २३ ॥
नीलिकायास्तु गोर्मूत्रं कृष्णायाः शकृदुद्धरेत् ॥
पयस्त्वतिसुवर्णायाः पीतायाश्च तथा दधि ॥ २४ ॥
कपिलाया घृतं तद्वन्महापातकनाशनम् ॥
अभावे सर्ववर्णायाः कपिलायाः समुद्धरेत् ॥ २५ ॥
पलानि पञ्च मूत्रस्य अङ्गुष्ठार्धं तु गोमयम् ॥
क्षीरं सप्तपलं ग्राह्यं तथा दध्नः पलत्रयम् ॥ २६ ॥
घृतं चाष्टपलं ग्राह्यं पलमेकं कुशाम्भसः ॥
मन्त्रैः सर्वाणि चैतानि अभिमन्त्र्याथ मिश्रयेत् ॥ २७ ॥

१. A. reads दिनैः for दिव्यं. २. This verse is not mentioned in A.
३. A. reads विधम् for व्रतम्.

गायत्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम् ॥
आप्यायस्वेति वै क्षीरं दधिक्राव्णस्तथा दधि ॥ २८ ॥
तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् ॥
निष्पन्नं पंचगव्यं च पात्रेषु क्रमतः पिबेत् ॥ २९ ॥
मध्यमेन पलाशस्य तत्पत्रेण पिबेद्द्विजः॥
द्वितीयं पद्मपत्रेण ब्रह्मपत्रेण चापरे ॥ ३० ॥
चतुर्थं ताम्रपात्रेण तत्पिबेद्भूतकृद्द्विजः ॥
आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन च ॥ ३१ ॥
उद्धृत्य प्रणवेनैव प्राशयेत्प्रणवेन तु ॥
विष्णुं संस्नापयेद्भक्त्या पंचगव्येन चार्चयेत् ॥ ३२ ॥
कूष्माण्डैर्जुहुयान्मन्त्रैः पञ्चगव्यं हुताशने ॥
सव्याहृत्या च गायत्र्या तथैव प्रणवेन च ॥ ३३ ॥
ब्रह्मकूर्चमिदं प्रोक्तं व्रतं पंचदिनात्मकम् ॥
पञ्चगव्यं च सम्प्राश्य पंचरात्रोपवासकृत् ॥ ३४ ॥
भक्तेन वा समश्नीयाद्यावच्छक्त्या दिनानि च ॥
पाञ्चाहिकं पारणकं व्रतस्यास्य प्रकीर्तितम् ॥ ३५ ॥
निर्दहेत्सर्वपापानि ब्रह्मकूर्चमिदं स्मृतम् ॥
अन्ये वदन्ति कवय उपवासंविना व्रतम् ॥ ३६ ॥
जप-होमादि कर्तव्यं देवतार्चनमेव वा ॥
पञ्चगव्यं च होतव्यं पञ्चगव्यं समश्नियात् ॥ ३७ ॥
ब्राह्मणान् भोजयेत्तावद्यावत्कुर्यादिदं व्रतम् ॥
यत्त्वगस्थिगतं पापं विद्यते पुरुषस्य च ॥ ३८ ॥
ब्रह्मकूर्चो दहेत्सर्वं समिद्धोऽग्निरिवेन्धनम् ॥ ३९ ॥
यावन्ति पापानि भवन्ति पुंसां दैवादकामादपि कामतो वा ॥
उक्तानि तेषां मुनिना व्रतानि शुध्यर्थमेतान्यपराणि चैवम् ॥४०॥
धर्मार्थमेतानि कृतानि पुंसां दद्युर्दिवौकस्त्वविमुक्तसिद्धिः ॥
अत्रापि पूज्यत्वमशेषलोकैस्तेजःशरीरी विचरन् विभाति॥४१॥
यस्यास्ति भीतिः पुरुषस्य पापादिच्छेच्च कर्तुं क्षयमेनसां च॥
प्रीत्येव तं च व्रतदानजप्यं प्रोद्दिश्यमेतन्न तदन्यतस्तु ॥ ४२॥
वदन्ति दानं मुनयः प्रधानं कलौ युगे नान्यदिहास्ति किञ्चित् ॥
विशोधनं सर्वमिहापि पूज्यं वदामि तस्मादथ दानधर्मान् ॥ ४३ ॥

इति बृहत्पाराशरीये धर्मशास्त्रे सुव्रतप्रोक्तायां संहितायां ऐन्दवादिव्रतनिर्णयो नाम नवमोऽध्यायः ॥ ९ ॥

१. A. reads °विमुक्तसिद्धाः for °विमुक्तसिद्धिः.

बृहत्पराशरसंहिता ।

॥ अथ दशमोऽध्यायः ॥

दानानि विधिना सार्धं जगौ यानि पराशरः ॥
व्यासस्य तानि वक्ष्यामि श्रूयतां द्विजसत्तमाः ॥ १ ॥
दानेन प्राप्यते स्वर्गो दानेन सुखमश्नुते ॥
इहामुत्र च दानेन पूज्यो भवति मानवः ॥ २ ॥
न दानात् परमो धर्मस्त्रिषु लोकेषु विद्यते ॥
तस्माद्दानं प्रदातव्यं यथाशक्त्या सदा नरैः ॥ ३ ॥
मुमुक्षवोऽपि योगीशा भिक्षादानोपजीविनः ॥
अन्नं तोय-समायुक्तं पृथगेते तथैव च ॥ ४ ॥
तोयमन्नं च वांच्छन्ति किं पुनः सानुरागिणः ॥
सर्वोपस्करसंयुक्तं गृहं च गृहमातृकम् ॥५ ॥
वृषादियुक्तं सीरं च वृषमेकं तथैव च ॥
गृह्याग्निना प्रदानेन गोप्रदानं तथैव च ॥ ६ ॥
सौरभेय्यौं द्विवक्त्रां च तिलधेनुमतः परम् ॥
घृतधेनुं पयोधेनुं हेमधेनुं सुविस्तरम् ॥ ७ ॥
कृष्णाजिनप्रदानं च वाजिस्यंदनमेव च ॥
एकवाजिप्रदानं च तथा तस्य परिग्रहः ॥ ८ ॥
सुखासनानि यानानि हस्ति रथं तथा गजम् ॥
एकहस्तिप्रदानं च कन्यादानफलं तथा ॥ ९ ॥
भूमिदानफलं चैव तुलापुरुषमेव च ॥
हेम-रूप्यप्रदानं च मणिकादिसमन्वितम् ॥ १० ॥
त्रपु-सीसक-ताम्रादिसर्वधातुप्रदानवत् ॥
नक्षत्र-तिथि-योगेषु यद्यत्तद्दानजं फलम् ॥ ११ ॥
विद्यादानफलं चैव प्राणदानं तथैव च ॥
अभयादिकदानानि प्रतिग्रहे यथा विधिः ॥ १२ ॥

---

१. A. reads स्वर्गो° for सर्वो°. २. A. B. D. E. and F. read गृह्यया: for गृह्याग्निना.

इष्टा-पूर्तौ फलोपेतौ सर्वं विस्तरतो मया ॥
शक्तिसूनोः श्रुतं पूर्वं क्रमात्कथयतः शृणु ॥ १३ ॥
गो-हिरण्यादिदानानां सर्वेषामप्यनुत्तमम् ॥
अन्नदानमपेक्षन्ते सर्वेऽपि हि दिवौकसः ॥ १४ ॥
अन्नार्थं मातरिश्वायमन्नार्थं च तथाऽनलः ॥
अन्नार्थं सविता देवो याति ज्वलति भासते ॥ १५ ॥
अन्नकामः ससर्जेदं विधिरप्यखिलं जगत् ॥
अन्नात्परतरं तत्वं न भूतं न भविष्यति ॥ १६ ॥
दद्यादहरहस्तस्मादन्नं विप्राय मानवः ॥
शृतं वा यदि वा चामं स स्वर्गे सुख मेधते ॥ १७ ॥
शोभनान् संभृतान् कुम्भान् पक्वान्नपरिपूरितान् ॥
अपूपैर्मोदकाद्यैश्च दत्वा दिवि सुखं वसेत् ॥ १८ ॥
मणिकं कलशान्वाऽपि यः पूरयति शक्तितः ॥
सुशुभाद्भिर्द्विजौकस्तु संपूर्णाशो दिवं व्रजेत् ॥ १९ ॥
द्विजान् यः पाययेत्तोयं अन्यानपि पिपासितान्[1] ॥
प्रपां तु कारयेद्ग्रीष्मे देवलोकमवाप्नुयात् ॥ २० ॥
यद्वातृणादिकं दद्याद्वर्षासु च प्रतिश्रयम् ॥
पादाभ्यङ्गं तथैधांसि शीते प्रावरणानि च ॥ २१ ॥
उपानत् पादुके चैव ददत्कामानवाप्नुयात् ॥
सप्तधान्यसमायुक्तं सर्वं स्नेहसमन्वितम् ॥ २२ ॥
सर्वोपस्करसंयुक्तं सर्वालंकारभूषितम् ॥
हिरण्य-गो-वृषा-ऽश्वैश्च तूली-शय्योपधानकैः ॥ २३ ॥
वरस्त्रीभूषणैर्युक्तं सकांस्यं ताम्रभाजनम् ॥
कण्डण्यादिसमायुक्तं ददत् पात्राय मानवः ॥ २४ ॥
पक्वेष्टकचितं कृत्वा सर्वलक्षणसंयुतम् ॥
मृण्मयं वा तथा सद्यः कृत्वा चाश्ममयं तथा ॥ २५ ॥
दत्वा स्थानमवाप्नोति प्राजापत्यमसंशयम् ॥
प्राकारा यत्र सौवर्णा गृहाण्युच्चैस्तराणि च ॥ २६ ॥
माणिक्य-गारुडैर्वज्रैर्मौक्तिकैर्भूषितानि च ॥
देवकन्यासहस्रेण स वृतो गीत-नृत्यकैः ॥ २७ ॥

---

1. A. reads पिपासकान्.

सेव्यमानोऽप्सरःसङ्घैः प्राजापतिसमं वसेत् ॥
अनड्वाहौ च धूर्वाहौ बलवन्तौ सुलक्षणौ ॥ २८ ॥
तरुणौ सुविषाणौ च घंटाभरणभूषितौ ॥
अदुष्टावेकवर्णौ तु सशिरौ दक्षिणान्वितौ ॥ २९ ॥
य आहूय द्विजाग्र्याय ग्द्याद्भक्त्या तु मानवः ॥
सोऽनडुद्रोमतुल्यानि स्वर्गे वर्षाणि तिष्ठति ॥
अप्सराभिर्वृतो नित्यं सेव्यमानः सुरासुरैः ॥ ३० ॥
एकोऽपि हि वृषो देयो धूर्वहः शुभलक्षणः ॥
अरोगश्चापरिक्लिष्टो यस्मात्स दशगोसमः ॥ ३१ ॥

एकेन दत्तेन वृषेण यस्माद्भवन्ति दत्ता दश सौरभेयाः ॥
माहेय्यतो यद्धरणीसमानात्तस्माद्वृषात् पूज्यतमोऽस्ति नान्यः ॥ ३२ ॥

गृष्टिदानं प्रवक्ष्यामि यथा देयं द्विजातिभिः ॥ ॥
यो विधिर्दक्षिणायाश्च तथा सर्वं निबोधत ॥ ३३ ॥
एकरात्रोषितः स्नातो गोदाता पञ्चगव्यपः ॥
पञ्चामृतेन संस्नाप्य सम्पूज्य गरुडध्वजम् ॥ ३४ ॥
सवत्सां वस्त्रसंयुक्तां सितयज्ञोपवीतिनीम् ॥
सुविषाणां सुरूपां च सर्वलक्षणसंयुताम् ॥ ३५ ॥
हेमकल्पितशृंगां च सुरूप्यचरणाग्रकाम् ॥
पयस्विनीं सुशीलां च हिरण्योपरिसंस्थिताम् ॥ ३६ ॥
प्रत्यङ्मुखाय विप्राय गृष्टिं तां च उदङ्मुखीम् ॥
त्वमिमां प्रतिगृह्णीयाः प्रीतोऽस्तु केशवोऽनया ॥
इति दत्वोदकं हस्ते पदान्यष्टौ विसर्जयेत् ॥ ३७ ॥
व्यावर्तेत ततःपश्चात्प्रणम्य शिरसा द्विजम् ॥
अनेन विधिना धेनुं यो विप्राय प्रयच्छति ॥ ३८ ॥
स विष्णुप्रीणमाधाति विष्णुलोकमसंशयम् ॥
आत्मनः पुरुषान् सप्त प्रागधस्ताच्च सप्त च[१] ॥
आत्मानं सप्तजन्मोत्थात्पापाद्विमोचयेन्नरः ॥ ३९ ॥
पदे पदे तु यज्ञस्य गोर्वत्सस्य च मानवः ॥
फलमाप्नोति विप्रेन्द्राः शुश्रावैतत्पुरा हरेः ॥ ४० ॥
सर्वकामसमृद्धात्मा सर्वलोकेषु पूजितः ॥
नाम्नाप्यघौघहन्ता च यावदिन्द्राश्चतुर्दश ॥ ४१ ॥

---

१. B. C. D. E. and F. read प्रागस्तान् सप्त सप्त च.

इक्ष्वाकुणा तथा चान्यैर्बहुधा वसुधाधिपैः ॥
यैर्या नृभिरियं दत्ता जग्मुस्तेऽपि च विष्टपम् ॥ ४२ ॥
पश्यन्ति दीयमानां ये ये भवन्त्यनुमोदकाः ॥
तेऽपि पापाद्विनिर्मुक्ता विष्णुलोकमवाप्नुयुः ॥ ४३ ॥
पादद्वयं मुखं योऽन्यां प्रसवन्त्याः प्रदृश्यते ॥
तदा च द्विमुखो गौः स्याद्देया यावन्न सूयते ॥ ४४ ॥
क्षोणीतुल्या तदा सा गौः सर्वैरुक्ता मुनीश्वरैः ॥
[1]सापि प्राग्विधिना देया सकांस्यदोहना द्विजाः ॥ ४५ ॥
एकत्र पृथिवी सर्वा सशैल-वन-कानना ॥
तस्या गौर्ज्यायसी साक्षादेकत्रोभयतोमुखी ॥ ४६ ॥
गोर्वत्सस्य च लोमानि यावत्संख्यानि सत्तमाः ॥
तावत्सङ्ख्यानि वर्षाणि ध्रुवं ब्रह्मजने वसेत् ॥ ४७ ॥
[2]अरोगामपरिक्लिष्टां धेनुं गामथ वापि च ॥
दत्वा स्वर्गमवाप्नोति यावदाभूतसंक्षयम् ॥ ४८ ॥
तिलधेनुं प्रवक्ष्यामि प्रीणनाय हरेरिमाम् ॥
यथा तुष्यति गोविन्दो दत्तया नु गवाऽनघ ॥ ४९ ॥
ब्रह्मादिवर्णहा गोघ्नः पितृ-मातृसुहृद्वधात् ॥
अग्निदो गुरुहा चैव तथैव गुरुतल्पगः ॥ ५० ॥
सर्वपापसमायुक्तो युक्तो यश्चोपपातकैः ॥
सर्वैः पापैः प्रमुच्येत तिलधेन्वा प्रदत्तया ॥ ५१ ॥
अनुलिप्ते महीपृष्ठे वस्त्राजिनसमावृते ॥
धर्मज्ञाः केचिदिच्छन्ति कुतपे च तिलास्तृते ॥ ५२ ॥
आस्तीर्य त्वाविकं भूमौ तत्र कृष्णाजिनं पुनः ॥
तिलांस्तु प्रक्षिपेत्तत्र कृष्णाढकचतुष्टयम् ॥ ५३ ॥
कुर्यादुत्तरतोऽभ्यर्णे आढकेन तु वत्सकम् ॥
सर्वरत्नैरलङ्कुर्यात्सौरभेयीं सवत्सकाम् ॥ ५४
कार्ये हेममये शृङ्गे चरणा राजतास्तथा ॥

---

१. A. reads सा विप्रा विधिना देया सकांस्यदोहिनी तथा for the line.

२. A. reads this verse in the following manner:—

यः स्वामरोगामक्लिष्टां धेनुं वा यदि वा तनुम् ॥
स्यात्स्वर्गमवाप्नोति देवा यथा कथं हि गौः ॥

मिष्टान्नरसनां कुर्याद्गंधघ्राणवतीं शुभाम् ॥
आस्यं गुडमयं तस्याः सास्ना सूत्रमयी तथा ॥ ५५ ॥
ताम्रपृष्ठेक्षुपादा च कार्या मुक्ताफलेक्षणा ॥
प्रशस्तपत्रश्रवणा फलदन्तवती तथा ॥ ५६ ॥
शुभ्रस्रङ्मयलाङ्गूला नवनीतस्तनान्विता ॥
नारिङ्गैर्बीजपूरैश्च जम्बीरैर्नारिकेलकैः ॥ ५७ ॥
बदरा-ऽऽम्र-कपित्थैश्च मणि-मुक्ताफलार्चिताम् ॥
सितवस्त्रयुगच्छन्नां सितच्छत्रसमन्विताम् ॥ ५८ ॥
इदृग्विधां च तां कुर्यात् श्रद्धया परयान्वितः ॥
कांस्योपदोहनां दद्यात्केशवः प्रीयतामिति ॥ ५९ ॥
कुर्याच्च गृष्टिवद्विद्वान् इमामप्युत्तरामुखीम् ॥
सम्यगुच्चार्य विधिना दत्त्वैतेन द्विजोत्तमः ॥ ६० ॥
सर्वपापैर्विनिर्मुक्तः पितरं सपितामहम् ॥
प्रपितामहं तथा पूर्वं पुरुषाणां चतुष्टयम् ॥ ६१ ॥
पुत्र-पौत्रमधस्ताच्चेत्तथैव च चतुष्टयम् ॥
द्विजेन्द्रास्तारयन्त्येतान् तिलधेनुप्रदा नराः ॥ ६२ ॥
यश्च गृह्णाति विधिवत्पुरुषान् सोऽपि तावतः ॥
चतुर्दश तथा ये च ददतश्चानुमोदकाः ॥ ६३ ॥
दीयमानां च पश्यन्ति तिलधेनुं च ये नराः ॥
शृण्वंति ये च तां भक्त्या दीयमानां द्विजोत्तमाः ॥ ६४ ॥
तेऽप्यशेषाघनिर्मुक्ताः प्रयान्ति विष्णुलोकताम् ॥
प्रशान्ताय सुशीलाय तथाऽमत्सरिणे बुधः ॥
तिलधेनुं नरो दद्याद्वेदस्नाताय धर्मिणे ॥ ६५ ॥
त्रिरात्रं सतिलाहारस्तिलधेनुं ददाति यः ॥
एकरात्रं पुनर्भक्त्या तिलानत्ति प्रयत्नतः ॥ ६६ ॥
दातुर्विशुद्धपापस्य तस्य पुण्यवतो द्विजाः ॥
चान्द्रायणादप्यधिकं शस्तं तत्तिलभक्षणम् ॥ ६७ ॥

---

१. C. B. D. E. and F. read °रत्नवती for °दन्तवती. २. B. D. E. and F. read प्रयोगमपि शृण्वंति पठ्यमानं मनूत्तमाः. ३. A. पठ्यमानां द्विजोत्तमाः and C. पठ्यमानं च मानवाः. ४. B. E. and F. read सीदते for धर्मिणे; while D. reads धार्मिकः for धर्मिणे.

एवं प्रतिग्रहीतापि आदत्ते विधिना द्विजः ॥
स तारयति दातारमात्मानं च न संशयः ॥ ६८ ॥
प्रतिग्रहसुदीप्ताग्निदग्धविप्रमुखेरिताः ॥
न स्फुरन्तीह मन्त्राश्च जप-होमादिकेषु च ॥ ६९ ॥
न दानं दीयते तस्य न तं कर्मणि योजयेत् ॥
निष्फलं तत्कृतं कर्म मृतस्यौषधदानवत् ॥ ७० ॥
अथातः संप्रवक्ष्यामि घृतधेनुमपि द्विजाः ॥
येन सा विधिना देया तं प्रवक्ष्याम्यशेषतः ॥ ७१ ॥
वदामि धेनुं घृतपूर्[1]कल्प्यां विधिं च वस्तूनि च यैः प्रकल्प्या ॥
तस्याः प्रदानेन फलं हि यच्च क्रिया च पात्रं त्वनुपर्व यच्च ॥ ७२ ॥
गोक्षीर-सर्पिर्मधु-खण्ड-दध्ना संस्नाप्य विष्णुं शुभवारिणा च ॥
संपूज्य पुष्पैश्च विलेप्य गन्धैर्दत्वा नैवेद्यं च सधूप-दीपम् ॥ ७३ ॥
घृतं च वह्निर्घृतमेव सोमो घृतं च सूर्यो घृतमेव वारि ॥
प्रदेहि तस्मात् घृतमेव विद्वन् ! घृते प्रदत्ते सकलं प्रदत्तम् ॥ ७४ ॥
घृतेन गव्येन[2] तु पूर्णकुम्भं प्रकल्प्यते गौः करकेन वत्सः ॥
हिरण्यगर्भां मणि-रत्नशोभां कुरुष्व कर्पूरसुचारुनासाम् ॥ ७५ ॥
शृङ्गे च कृष्णागरुदारवे च सौवर्णनेत्रे पटसूत्रसास्ना ॥
क्षौमं च पुच्छं गुड-दुग्धवक्त्रं जिह्वा च तस्या वरशर्करायाः ॥ ७६ ॥
द्राक्षोत्थैश्चैव खर्जूरैरन्यैः स्वादुफलैरपि ॥
उरस्तस्याः प्रकर्तव्यं पृष्ठं ताम्रं च धीमता ॥ ७७ ॥
इक्षुयष्टिमयाः पादाः शफा रौप्यमयास्तथा ॥
धान्यैश्च सप्तभिः पार्श्वे लोमानि सितसर्षपैः ॥ ७८ ॥
कांस्यदोहा प्रकर्तव्या सितवस्त्रावृता तथा ॥
सितच्छत्रसमायुक्ता सितचामरभूषिता ॥ ७९ ॥
वत्सस्य कुर्यादिति भूषणानि प्रोक्तानि सर्वाण्यपि यानि धेनोः ॥
अङ्गानि सर्वाणि च तद्वदस्य छत्रं सवस्त्रं च तथैव विप्राः ॥ ८० ॥
गृहाण चैनां मम पापहन्त्रै दुस्तारसंसारपयोधिपोत ॥
संसारतारो भव भूमिदेव ! स्वर्गं प्रदेह्यक्षयमङ्ग विद्वन् ॥ ८१ ॥
विष्णुः सुरेशो घृतरश्मिरस्याः प्रीतोऽस्तु दानेन वरं ददातु ॥
व्याहृत्य चैतन्निज[3]हस्ततोयं दत्वा क्षमस्वेति च वाग्विधेया ॥८२॥

---

१. A. reads °कल्पितां for °पूर्कल्प्यां. २. A. reads पुण्येन for गव्येन.
३. A. reads द्विज° for निज,° B. D. E. and F. too read the same.

दात्रा द्विजेनात्र तु पूर्वमुक्तं संप्राश्य सर्पिर्व्रतमात्मशुध्यै ॥
कार्यं प्रमुक्तोऽखिलकिल्बिषैस्तु प्राप्नोति कामान् घृत-दुग्धमिश्रान् ॥
घृत-क्षीरवहा नद्यो यत्र पायसकर्दमाः ॥
तेषु लोकेषु विप्रेन्द्र स पुण्येषूपजायते ॥ ८४ ॥
पितुरूर्ध्वं तु ये सप्त पुरुषास्तस्य येऽप्यधः ॥
तेषु तान् द्विजलोकेषु स नयेद्धूतकिल्बिषः ॥ ८५ ॥
सकामानां प्रियं गृष्टिः कथिता तव सत्तम ! ॥
विष्णुलोके नरा यान्ति सकामा घृतधेनुदाः ॥ ८६ ॥
जलधेनुं प्रवक्ष्यामि प्रीयते दत्तया यया ॥
देवदेवो हृषीकेशः सर्वेशः सर्वभावनः ॥ ८७ ॥
जलकुम्भं द्विजश्रेष्ठ सुवर्णरजतस्थितम् ॥
रत्नगर्भमशेषैस्तु ग्राम्यैर्धान्यैः समन्वितम् ॥ ८८ ॥
सितवस्त्रयुगच्छन्नं दूर्वा-पल्लवशोभितम् ॥
कुष्ठ-मांसी-मुरोशीर-वालकामलकैर्युतम् ॥ ८९ ॥
प्रियंगुपत्रसंयुक्तं सितयज्ञोपवीतिनम् ॥
सोपानत्कं च सच्छत्रं दर्भविष्टरसंस्थितम् ॥९० ॥
चतुर्भिः संवृतैः पात्रैस्तिलपूर्णैश्चतुर्दिशम् ॥
स्थगितं दधिपात्रेण घृत-क्षौद्रवता मुखे ॥ ९१ ॥
उपोषितः समभ्यर्च्य वासुदेवं सुरेश्वरम् ॥
पुष्प-धूपोपहारैश्च यथाविभवसंभवम् ॥ ९२ ॥
तस्मिन् कुम्भे लिखेद्धेनुं सवत्सां यक्षकर्दमैः ॥
प्रतिष्ठां तत्र कुर्वीत मंत्रैर्वेदचतुष्टयैः ॥ ९३
सङ्कल्प्य जलधेनुं च समभ्यर्च्य जनार्दनम् ॥
पूजयेद्वत्सकं तद्वत्कृतं जलमयं बुधः ॥ ९४ ॥
अत्रोचुरपरे केचित्पूजयेत् घृतवत्सकम् ॥
पञ्चांशेन तु कुम्भस्य चतुर्थांशेन चापरे ॥
एवं सम्पूज्य गोविन्दं जलधेनुं सवत्सकाम् ॥ ९५ ॥

---

१. A. reads लोकान् for कामान्, D. and F. too the same. २. A. only reads °दिग्धान् for °मिश्रान्. ३. B. reads नयत्यस्त.° ४. B. and E. read पुष्टिः for गृष्टिः; the rest-A. reads घृष्टिः D. F. read घृष्टिः. ५. A. reads °शाश्वतः for °भावनः. ६. B. C. D. E. and F. read सम्पूर्ण° for सुवर्ण°. ७. A. D. and F. read सघृतैः.

सितवस्त्रधरः शान्तो वीतरागो विमत्सरः ॥
दद्याद्विप्राय तां विप्रः प्रीतये जलशायिनः ॥ ९६ ॥
जलशायी जगज्ज्योतिः प्रीयतां केशवो मम ॥
इति चोच्चार्य विप्रेन्द्रो विप्राय प्रतिपादयेत् ॥ ९७ ॥
अपक्वाशनिना स्थेयमहोरात्रमतः परम् ॥
अनेन विधिना दत्वा जलधेनुं द्विजोत्तमाः ॥ ९८ ॥
सर्वाह्लादमवाप्नोति यद्यत् ध्यायति मानवः ॥
शरीरारोग्य-दीर्घायुः प्रशस्यः सर्वकामुकः ॥ ९९ ॥
नृणां भवति दत्तायां जलधेन्वां न संशयः ॥
इमामपि प्रशंसन्ति जलधेनुं द्विजोत्तम ! ॥ १०० ॥
ये नरास्तेन वै यान्ति विष्णुलोकमसंशयम् ॥
हेमा-ऽऽज्याम्भ-तिलैर्विद्वन् धेनुर्यद्यपि कल्पिता ॥
तथापि ते च भक्ष्याः स्युर्धर्मशास्त्रमतादृताः ॥ १०१ ॥
भक्षणीयं च यद्वस्तु धेन्वंगेषु प्रकल्पितम् ॥
तस्यादृश्यं तदभ्येति वेदमन्त्रैः प्रतिष्ठितम् ॥ १०२ ॥
पुनः संवृतमन्त्रेषु तदाकुंचनमुद्रया ॥
कृते विसर्जने तेषां वस्तुरूपं पुनर्भवेत् ॥ १०३ ॥
अथान्यत्संप्रवक्ष्यामि दानानामुत्तमं परम् ॥
यद्दत्वा मानवो याति सायुज्यं परवेधसः ॥ १०४ ॥
धेनुर्देया सुवर्णस्य कारयित्वा द्विजातये ॥
यां दत्वा प्राङ् महीपाला ब्रह्मणः सदनं गताः ॥ १०५ ॥
सा चतुर्भिस्त्रिभिर्वापि शुद्धवर्णपलैर्द्विजः ॥
पलाभ्यामपि च द्वाभ्यां पलेनैकेन वा पुनः ॥ १०६ ॥
हीनं तु नैव कर्तव्यं सत्यां सम्पदि सद्द्विजाः ॥
हीनं तु कुर्वतो दानं दातुस्तन्निष्फलं भवेत् ॥ १०७ ॥
चतुर्थांशेन धेन्वास्तु हैमं वत्सं प्रकल्पयेत् ॥
सर्वरत्नैरलङ्कुर्यात् वक्ष्यमाणक्रमेण तु ॥ १०८ ॥
राजतं वत्सकं कुर्याद्ब्रूयुरन्ये च तद्विदः ॥
अलङ्काराश्च सर्वेऽपि गोवद्वत्से प्रकल्पयेत् ॥ १०९ ॥

१. A. reads °योनिः for °ज्योतिः. २. A. reads प्रशमः सार्वकामिकः for प्रशस्यः सर्वकामुकः. ३. A. and F. read this line thus-इमामपि प्रपद्यन्ति दीयमानां द्विजोत्तमाः. ४. E. and F. read thus-तेऽपि दानंविना यांति.

सकाशाद्वासुदेवस्य यां शुश्राव युधिष्ठिरः ॥
दत्वा प्राप्तो हरेर्लोकं सा मयेयमुदीरिता ॥ ११० ॥
मुक्ताफलशफा कार्या प्रवालकविषाणिका ॥
पद्मरागाक्षियुग्मा च घृतपात्रस्तनान्विता ॥ १११ ॥
कर्पूरा-ऽगरुलालाटा २.कैरारदना स्मृता ॥
मिष्टान्नमुखसंयुक्ता शंखशृंगांतरा तथा ॥ ११२ ॥
जात्यशुक्तिललाटा च द्राक्षादिरसना तथा ॥
सुपर्णयुग्मपार्श्वा सा क्षौमसास्नावती तथा ॥ ११३ ॥
इक्ष्वंघ्रिर्गुडजानुश्च पञ्चगव्यगुदा स्मृता ॥
नारीकेलैश्च कर्तव्यौ कर्णौ पृष्ठं च कांस्यकम् ॥ ११४ ॥
सत्पट्टसूत्रलाङ्गूला सप्तधान्यसमावृता ॥
फल-पुष्पोपसम्पन्ना छत्रोपानत्समन्विता ॥ ११५ ॥
सुवर्णधेनुमार्याय विप्राय प्रतिपादयेत् ॥
अश्वमेधसहस्रस्य दत्वा फलमवाप्नुयात् ॥ ११६ ॥
कुलानां हि सहस्रं तु स्वर्गं नयत्यसंशयम् ॥
किमन्यैर्बहुभिर्दानैरलं हेमगवाऽनया ॥ ११७ ॥
हेमधेनुप्रदानेन कृतकृत्यो हि वर्तते ॥
हिरण्यगर्भो भगवान् प्रीयतामिति कीर्तयेत् ॥ ११८ ॥
उपवासी विशुद्धात्मा दत्वा सोम-रविग्रहे ॥
दीयमानां च पश्यन्ति ये नरा हेमगामिमाम् ॥ ११९ ॥
पठ्यमानां च शृण्वन्ति तेऽपि यान्ति त्रिविष्टपम् ॥
यत्रास्ते लिखिता गेहे स्वर्णदानस्य संस्तुतिः ॥
रक्षो-भूत-पिशाचाद्यास्ततो नश्यन्ति सद्विजाः ॥ १२० ॥
एता मयोक्तास्तव वत्स! सर्वा गृष्ट्यादिका विस्तरतोऽत्र गावः ॥
इक्ष्वाकुभूभृत्प्रभृतिक्षितीशा जग्मुर्दिवं या विधिवच्च दत्वा ॥ १२१ ॥
कृष्णाजिनस्य दानस्य प्रवक्ष्यामि शुभं विधिम् ॥
प्रमाणं च विधिर्यस्य यस्मै विप्राय दीयते ॥ १२२ ॥

---

१. A. reads सामगेयम for सा मयेयम्. २. A. B. D. F. read °नासा च for °लालाटा. ३. B. C. E. read द्राक्षादिरसना. for शर्करारदना ४. A. reads °पक्ष° for °पर्ण,° D. and F. too the same. ५. A. reads °प्रभावेन for °प्रदानेन. ६. B. E and F. read उपवास° for उपवासी.

वैशाख्यां पूर्णिमायां च कार्तिक्यामथ वापि च ॥
उभयोस्तत्प्रदातव्यं रवि-सोमग्रहेऽपि च ॥ १२३ ॥
अक्लिष्टमच्छिद्रमलोमकं च सघ्राणरंध्रं सशफं सशोकम् ॥
साण्डप्रदेशं सविषाणवक्त्रं शस्तं प्रदाने सितकृष्णचर्म ॥ १२४ ॥
एवमेतद्विधं चर्म गृहीत्वा द्विज पावनम् ॥
कल्पयेद्धेनुवत्तच्च हेमशृंगादिकं तथा ॥ १२५ ॥
शृङ्गे हेममये तस्य शफाश्च रजतस्य च ॥
मुक्ताफलैश्च लाङ्गूलं कुर्यात् शाठ्यं विवर्जयेत् ॥ १२६ ।'
•अनुलिप्ते महीपृष्ठे प्रसृते कुतपेऽशुके ॥
तत्र प्रसारयेन्मार्गं तिलैस्तदपि पूरयेत् ॥ १२७ ॥
वदन्ति तद्विदः सर्वे चतुर्द्रोणैस्तु पूरयेत् ॥
पुंसो नाभिप्रमाणं तु अपरे कवयो विदुः ॥ १२८ ॥
नाभिमात्रं वदन्त्यन्ये राशिं कुर्यादिति द्विजः ॥
तिलैश्च पूरयेत् पश्चादजिनं च समन्ततः ॥ १२९ ॥
हेमनाभं च तं कुर्यात् हेम्ना कर्षेण तु द्विजः ॥
शक्त्या वापि प्रकर्तव्यं मनःशुद्धिर्यथा भवेत् ॥ १३० ॥
सौवर्णं क्षीरपूर्णं तु पात्रं प्राच्यां निधापयेत् ॥
राजतं दधिपूर्णं तु तथा दक्षिणतो द्विजः ॥ १३१ ॥
ताम्रमाज्यभृतं पात्रं पश्चिमायां दिशि स्मृतम् ॥
क्षौद्रपूर्णं तथा कांस्यं चतुर्दिक्षु क्रमेण तु ॥ १३२ ॥
शक्त्या वापि च कर्तव्यं वित्तशाठ्यं विवर्जयेत् ॥
दद्याद्वेदविदे चैव ब्राह्मणायाहिताग्नये ॥ १३३ ॥
परिधाप्याऽहते वस्त्रे अलङ्कृत्य च भूषणैः ॥
चतस्रो गृष्टयः कार्या इत्यन्ये कवयो विदुः ॥ १३४ ॥
वदन्ति मुनयो गाथां मार्गमाहात्म्यवेदिनः ॥
नानाविधांश्च विद्वांसः पुराणार्थविदो विदुः ॥ १३५ ॥
यस्तु कृष्णाजिनं दद्यात्सखुरं शृंगसंयुतम् ॥
तिलैः प्रच्छाद्य वासोभिः सर्वरत्नैरलङ्कृतम् ॥ १३६ ॥
ससमुद्रगुहा तेन सशैल-वन-कानना ॥

---

१. B. reads एतयोः for उभयोः. २. A. reads °शष्प° for °कृष्ण°; while E. F. read °मृक्ष° for °कृष्ण.°

चतुरस्रा भवेद्दत्ता पृथिवी नात्र संशयः ॥ १३७ ॥
कृष्णाजिने तिलान् दत्वा हिरण्य-मधु-सर्पिषा ॥
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् ॥ १३८ ॥
यः कृष्णाजिनमास्तीर्य हेमरत्नयुतैस्तिलैः ॥
वस्त्रावृतं सोपवासो विष्णोरायतने तथा ॥ १३९ ॥
वैशाख्यां पूर्णिमायां वा कार्तिक्यां वा समाहितः ॥
दद्याद्विप्रे तपोयुक्ते सद्वृत्ते च यतेन्द्रिये ॥ १४० ॥
आहिताग्नौ ससन्ताने प्रदद्याद्भूरिदक्षिणम् ॥
यावन्त्यजिनलोमानि तिला वस्त्रस्य तन्वतः ॥ १४१ ॥
तावन्त्यब्दसहस्राणि दाता विष्णुपुरे वसेत् ॥
विशेषमपरे ब्रूयुर्विषुवायनयोर्द्वयोः ॥ १४२ ॥
तदन्नणं बहिर्लोम प्राग्ग्रीवं तु प्रसारयेत् ॥
चतसृषु तथा दिक्षु सुवर्ण-रजतानि च ॥ १४३ ॥
निधाय शक्त्या पात्राणि क्षीराद्यैः[1] पूरितानि च ॥
तस्य पश्चात्समिद्धाग्निं परिसंमुह्य तं पुनः ॥ १४४ ॥
पर्युक्ष्य च परिस्तीर्य महाव्याहृतिभिस्तथा ॥
साज्यान् हुत्वा तिलांस्तत्र विप्राय प्रतिपादयेत् ॥ १४५ ॥
नाभिं स्पृशन्नदोतोयं मार्गं गृह्णाम्यहं त्विदम् ॥
धीमान् दद्याद्द्विजेन्द्राय वाचयित्वा प्रतिग्रहम् ॥ १४६ ॥
पश्चाद्वस्त्रादिकं[2] दद्यादेषा प्रतिग्रहे स्थितिः ॥
यमगीतामथो गाथामुदाहरन्ति तद्विदः ॥
दातॄणां सत्तमानां तु विशेषप्रतिपत्तये ॥ १४७ ॥
गो-भू-हिरण्यसंयुक्तं मार्गमेकं ददाति यः ॥
स सर्वपापकर्मापि सायुज्यं ब्रह्मणो व्रजेत् ॥ १४८ ॥
प्रोक्तेन चैतेन मुनीश मार्गं दद्याद्द्विजेन्द्रे विधिना प्रयुक्तम् ॥
पापानि हत्वा स पुरातनानि प्रयाति वेधोवपुरेव योगी ॥ १४९ ॥
सुखासनं च यो दद्याज्जवनाख्यमथोत्तमम्[3] ॥
देवयानैर्दिवं याति स्तूयमानः सुरासुरैः ॥ १५० ॥

---

१. A. reads °राद्यैः for °राद्यैः. २. B. reads हस्तोदकं for वस्त्रादिकं D. E. F. and A. too read the same. ३. C. reads आपनाख्यम् for जवनाख्यम् and D. E. and F. read विमानाख्यम्.

यो रथं हयसंयुक्तं हेमपुष्पैरलङ्कृतम् ॥
कृतरज्जुं च पट्टाद्यैर्नेत्रपट्टकृतैरपि ॥ १५१॥
तत्सर्वं स्थगितैर्वस्त्रैः पाट्टिपट्टालकैः शुभैः ॥
मुक्ताफलैस्तथानेकैर्मणिभिश्चोपशोभितम् ॥ १५२ ॥
हयौ चैव शुभैर्वस्त्रैर्भूषितावप्यलङ्कृतौ ॥
तौ भूषणैरलङ्कृत्य मुखयन्त्रसुशोभितौ ॥ १५३ ॥
सपर्याणौ कशायुक्तौ ग्रीवाभरणभूषितौ ॥
शुभलक्षणसंयुक्तौ तरुणौ तत्र योजयेत् ॥ १५४ ॥
रवि-सोमग्रहे दद्याच्छुभे वाऽन्यत्र पर्वणि ॥
अयनयोर्द्विजाग्र्याय स प्राप्नोत्यर्कलोकताम् ॥ १५५ ॥
वसेद्रविसमं तत्र सेव्यमानः स दैवतैः ॥
एकं वापि हयं दत्वा सर्वालङ्कारभूषितम् ॥ १५६ ॥
सुलक्षणं युवानं च सोऽश्विलोकमवाप्नुयात् ॥
दद्यादश्वरथं यस्तु हेमरत्नविभूषितम् ॥ १५७ ॥
दिव्यवस्त्रपरिच्छन्नं नेत्रपट्टादिभिः शुभैः ॥
सौवर्णैरर्धचन्द्रैश्च राजतैर्वा विभूषितम् ॥ १५८ ॥
शुभैर्मुक्ताफलैरन्यैर्नीलवस्त्रादिभिस्तथा ॥
गजौ सुलक्षणोपेतौ सुशीलौ नीरुजावपि ॥ १५९ ॥
शुभदन्तौ सुरूपौ च हेमालङ्कारधारिणौ ॥
दिव्यवस्त्रैः परिच्छन्नौ कर्णशंखावलम्बिनौ ॥ १६० ॥
पट्ट-नेत्रादिकक्षौ तौ विशिष्टमणिमण्डितौ ॥
ईदृग् रथं च संयोज्य पताकाभिविभूषितम् ॥ १६१ ॥
शोभितं पुष्पमालाभिः शङ्ख-दुन्दुभिनिःस्वनैः ॥
चतुर्वेदाय विप्राय त्रिवेदाय तथा पुनः ॥ १६२ ॥
शुचये च द्विवेदाय श्रोत्रियाय कृतेष्टये ॥
अलङ्कृत्य समालाभिः परिधाप्य सुवाससी ॥ १६३ ॥
तस्य हस्तोदकं दद्यात्प्रीयतां केशवो मम ॥
एवं हस्तिरथं दद्यात्समभ्यर्च्य द्विजातये ॥
निहत्य सर्वपापानि विष्णुलोके महीयते ॥ १६४ ॥

---

१. D. reads समारभ्य and A. reads समालभ्य.

वसेच्चतुर्भुजस्तत्र सेव्यमानश्चतुर्भुजैः ॥
अनन्तकालमातिष्ठेच्छङ्ख-चक्र-गदाधरः ॥ १६५ ॥
पश्यन्तीह रथं ये तु दीयमानं नरा द्विज ! ॥
तेऽपि विष्णुपुरं यान्ति वासिष्ठजवचो यथा ॥ १६६ ॥
एकमपीह यो दद्याद्धस्तिनं च सभूषणम् ॥
सवस्त्रं हेमरदनं नखैरजतकल्पितैः ॥ १६७ ॥
मणि-मुक्ताफलैर्युक्तं सुवर्ण-रजतान्वितम् ॥
पूर्वोक्ताय तु विप्राय चतुर्वेदाय वा द्विजाः ॥ १६८ ॥
यो दद्याद्विधिवत्सोऽपि सदा विष्णुपुरं वसेत् ॥
विधिवद्यश्च गृह्णाति सर्वमेव प्रतिग्रहम् ॥ १६९ ॥
दातृलोकमवाप्नोति पराशरवचो यथा ॥
अलङ्कृत्य तु यः कन्यां ब्राह्मोद्वाहेन यच्छति ॥ १७० ॥
अन्योद्वाहेन केनापि गजदानशतं लभेत् ॥
गजदानस्य यत्पुण्यं तस्माच्छतगुणं फलम् ॥ १७१ ॥
कन्यादा विधिवत्सर्वे प्राप्नुवन्ति ह्यसंशयम् ॥
पुत्रदानं च वाञ्छन्ति केचिद्वत्स मनीषिणः ॥ १७२ ॥
कन्यादानात्परं ब्रूयुः पुत्रदानं शतोत्तरम् ॥
भूमिं सस्यवतीं दद्यात् यस्तु विप्राय मानवः ॥ १७३ ॥
स मूल-शूकतुल्यानि विष्णुलोके सदा वसेत् ॥
षड्भिस्तु सहितान् विप्रान्वंशानुभयतो दश ॥
तानेव द्विगुणान्याहुरिति केचिन्निवर्तनम् ॥ १७४॥
दशहस्तैर्भवेद्वंशश्चतुर्भिस्तैस्तु विस्तरः ॥
दैर्घ्येऽपि दशभिर्वंशैर्गोचर्म परिकीर्तितम् ॥ १७५[1] ॥
अपि गोचर्ममात्रेण भूमिं दद्याद्द्विजातये ॥
विष्णुलोकमवाप्नोति केचिदाहुर्मनीषिणः ॥ १७६ ॥
पञ्चहस्तकदण्डानां चत्वारिंशद् दशाहता ॥
पञ्चभिर्गुणिता सा तु निवर्तनमिति स्मृतम् ॥ १७७ ॥
बालवत्सकधेनूनां सहस्रं यत्र तिष्ठति ॥
तद्वै निवर्तनं ज्ञेयं इति केचिद्वदन्ति हि ॥ १७८ ॥

---

१. A. reads this verse thus—
दशहस्तकवंशेन वंशाश्चत्वारिविस्तरे ॥
दश दैर्घ्ये स विज्ञेयो गोचर्म इति कीर्तितम् ॥

ताम्रपट्टे पटे वाऽपि लेखयित्वा च शासनम् ॥
ग्रामं विप्राय वा दद्याद्दशसीरक्षितिं पुनः ॥ १७९ ॥
सीरस्यैकस्य वा दद्यात्तस्य पुण्यं किमुच्यते ॥
भूम्यंशुकणिकातुल्याः समा विष्णुपुरे वसेत् ॥ १८० ॥
भूमिदानात्परो धर्मस्त्रैलोक्येऽपि न विद्यते ॥
पादैकमात्रदानेन तस्य विष्णुपुरे स्थितिः ॥ १८१ ॥
तस्य दानात्परो धर्मस्तद्धृतेः पातकं परम् ॥
तस्मात्तां यत्नतो दद्याद्धरणं च विवर्जयेत् ॥ १८२ ॥
इहैव भूमिदानस्य प्रत्यक्षं चिह्नमीक्ष्यते ॥
क्षितिदः स्वर्गतो भ्रष्टः क्षितिनाथः पुनर्भवेत् ॥ १८३ ॥
भुनक्ति च पुनर्भोगान् यथा दिवि तथा भुवि ॥
गजैरश्वैर्नरैर्युक्तो हेम-रत्नविभूषितः ॥ १८४ ॥
वरस्त्रीगणसंसेव्यः स्तूयमानः स्वबन्धुभिः ॥
छत्रालङ्कारसंयुक्तो गीत-वाद्योत्सवादिभिः ॥ १८५ ॥
इत्यादि भूमिदानस्य चिह्नं ते वत्स ! कीर्तितम् ॥
वित्तेनाऽपि हि यः क्रीत्वा भूमिं विप्राय यच्छति ॥ १८६ ॥
यावत्तिष्ठति सा भूमिस्तावत्स्वर्गे महीयते ॥
गृहभूमिं च यो दद्याद्दद्यादाश्रममात्रकम् ॥ १८७ ॥
गृहोपकरणं दत्वा गृहदानफलं लभेत् ॥
हस्तमात्रां च यो दद्याद्भूमिं विप्राय मानवः ॥ १८८ ॥
किष्कुमात्रां च यो दद्याद्भूमिं वेदविदे नरः ॥
तस्यापि हि महापुण्यं दद्यादंगुलमात्रकम् ॥ १८९ ॥
नैतस्मात्परमं दानं किंचिदस्ति धरातले ॥
पुण्यं फलं प्रवक्ष्यामि विशेषेण तु तच्छृणु ॥ १९० ॥
यत्र हैमानि सद्मानि मणिभिर्भूषितानि च ॥
प्राकारा यत्र सौवर्णाश्चतुर्द्वाराः सतोरणाः ॥ १९१ ॥
दिव्याश्चाप्सरसो यत्र तासां सङ्ख्या ह्यनेकशः ॥
सुपर्वाणौकसा युक्तौ ग्रीवाभरणभूषितौ ॥ १९२ ॥
दृष्ट्वैव कामदेवोऽपि भवेत्कामातुरः क्षणात् ॥
सुकेशा सुललाटाश्च बालचन्द्रोपमभ्रुवः ॥ १९३ ॥

---

१. B. and C. read किंचित्.°

सुनासा-कर्ण-गण्डाश्च शुभोष्ठाधरपल्लवाः ॥
सुग्रीवा भुजपाल्यग्राः पीनोत्तुङ्गस्तनास्तथा ॥ १९४ ॥
सुमध्योरुनितम्बाश्च सुश्रेण्यश्च शुभोरुकाः ॥
सुजानु-जङ्घ-गुल्फाश्च सुपादाः सुनखास्तथा ॥ १९५ ॥
केन रूपेण ता वर्ण्या ह्यप्सरसो द्विजाः ॥
वैष्णव्यो गणिकास्सर्वा दिव्यस्रग्वस्त्रभूषणाः ॥ १९६ ॥
दिव्यानुलेपलिप्ताङ्गा दिव्यालङ्कारभूषिताः ॥
मन्मथोऽपि हि ता दृष्ट्वाभवेत्कामातुरः स्वयम् ॥ १९७ ॥
मुनीनामपि चेतांसि या दृष्ट्वा चुक्षुभुः क्षणात् ॥
वर्ण्यन्ते ताः कथं देव्यो या लक्ष्मीप्रतिमोपमाः ॥ १९८ ॥
वैष्णवाप्सरसां सङ्घैर्वृतश्चामरधारिभिः[1] ॥
गीयमानश्च गन्धर्वैस्तूयमानश्च दैवतैः ॥ १९९ ॥
वसेद्विष्णुपुरे तावद्यावद्विष्णुरजः क्षितौ ॥
पुण्यं च भूमिदानस्य कथितं तव वत्सक ॥ २०० ॥

मेरुर्धरित्री कुलपर्वताश्च पाथोऽर्णवः स्वर्गतलादिकादिः ॥
देयानि सर्वाणि च सर्वकामैः प्रोक्तानि दानानि पुराणविद्भिः ॥ २०१ ॥

आत्मतुल्यं सुवर्णं वा रजतं द्रव्यमेव च ॥
यो ददाति द्विजाग्र्येभ्यस्तस्याप्येतत्फलं भवेत् ॥ २०२ ॥
ब्रह्महत्यादिपापैस्तु यदि युक्तो भवेन्नरः ॥
स तत्पापविनिर्मुक्तः प्रोक्ते विष्णुपुरे वसेत् ॥ २०३ ॥
तुलापुरुष-भूमी च दीयमाने च ये नराः ॥
पश्यन्ति तेऽपि यान्ति द्यां ये च स्युरनुमोदकाः ॥ २०४ ॥
गुडं वा यदि वा खण्डं लवणं चापि तोलितम् ॥
यो ददात्यात्मना तुल्यं नारी वा पुरुषोऽपि वा ॥ २०५ ॥
पुमान्प्रद्युम्नवत् स स्यान्नारी स्यात्पार्वतीसमा ॥
सौभाग्य-रूपसंयुक्तो भुञ्जीताऽन्ते त्रिविष्टपम् ॥ २०६ ॥
हिरण्यं दक्षिणायुक्तं सवस्त्रं भूषणान्वितम् ॥
अलङ्कृत्य द्विजाग्र्यं तं परिधाप्य च वाससी ॥ २०७ ॥
खण्डादि तोलितं पश्चाद्विप्राय प्रतिपादयेत्[2] ॥
सर्वकामसमृद्धात्मा चिरकालं वसेद्दिवि ॥ २०८ ॥

---

१. A. B. D. E. and F. read वेष्टितश्चाऽमरादिभिः. २. B. E. and F. read °द्धायुर्वहेत्°.

उष्ट्रं खराजौ माहिषं च मेषमश्वं[1] करेणुं महिषीमजां च ॥
ययुः खरोष्ट्रीमविकां मुनीन्द्राः हेमादियुक्तं सकलं च दानम् ॥ २०९ ॥
वराणि रत्नानि च हैम-रूप्यं शुभानि वासांसि च कांस्य-ताम्रे ॥
उपाधिमात्रं करभादि कृत्वा हेमादिदानं द्विज दीयते हि ॥ २१० ॥

केचिद्वदन्ति चैतानि कृत्वा हेममयानि च ॥
सर्वोपस्करयुक्तानि देयानि हेमधेनुवत् ॥ २११ ॥
अर्चयित्वा हृषीकेशं पुण्येऽह्नि विधिपूर्वकम् ॥
अग्निशुद्धं सुवर्णं च विप्रायाहूय यच्छति ॥ २१२ ॥
स भुक्त्वा विष्णुलोकं तु यदाऽऽगच्छति संसृतौ ॥
तदाऽसौ तेन पुण्येन धनयुक्तो द्विजो भवेत् ॥ २१३ ॥
यो रूप्यमुत्तमं दद्यादर्थिने ब्राह्मणाय च ॥
सोऽतीव धनसंयुक्तो रूपयुक्तश्च जायते ॥ २१४ ॥
माणिक्यानि विचित्राणि नानानामानि यो नरः ॥
तथा ताम्रं च कांस्यं च त्रपु वा सीसकादिकम् ॥ २१५ ॥
यो दद्याद्भक्तितो विप्रः सोमलोकमवाप्नुयात् ॥
स सम्भुज्य तु तं लोकं रूपवानिह जायते ॥ २१६ ॥
घृतं ददाति यो विप्रः सोऽत्यन्तं सुखमश्नुते ॥
भोजनाभ्यञ्जनार्थं वा भवेत्सोऽपि सुखी नरः ॥ २१७ ॥
सततं तैलदानेन भोजनाभ्यञ्जनाय च ॥
स्निग्धदेहोऽतितेजस्वी रूपयुक्तः प्रजायते ॥ २१८ ॥
मृगनाभिं च कर्पूरं तगरं[2] चन्दनादिकम् ॥
गन्धद्रव्याणि यो दद्याद्धनी भोगी स जायते ॥ २१९ ॥
ताम्बूलं पुष्पमालाश्च पुष्पस्याभरणानि च ॥
यो दद्याद्वेषवान्भोगी धनयुक्तः स जायते ॥
सुमतिर्वीर्यवांश्चैव[3] धनयुक्तश्च सर्वदा ॥ २२० ॥
शिशिरर्तौ च यो दद्यादनलं सेन्धनं नरः ॥
स समिद्धोदराग्निः सन् प्रज्ञासूर्ययुतो[4] भवेत् ॥ २२१ ॥

---

१. A. B. E. and F. read अश्वि for अश्वं. २. A. reads अगरुं for तगरं. ३. A. reads वेषवान् for वीर्यवान्. ४. A. B. D. E. and F. read प्रज्ञारूपयुतो for प्रज्ञासूर्ययुतो.

यो दद्याद्दुर्लभानां च नित्यमेधांसि मानवः ॥
श्रियायुक्तो भवेदत्र सङ्ग्रामे चापराजितः ॥ २२२ ॥
अथ किं बहुनोक्तेन दानधर्मविवेचने ॥
यद्यदिष्टतमं यस्य तत्तस्मै प्रतिपादयेत् ॥ २२३ ॥
तिलान् दर्भांश्च नित्यार्थं तृणान्यास्तरणाय च ॥
भुक्त्वा स तु सुखं स्वर्गे ग्रामश्चात्र भवेद्भुवि ॥ २२४ ॥
गुडमिक्षुरसं खण्डं दुग्ध-खर्जूर-खाद्यकान् ॥
फलानि दत्वा सर्वाणि स्वादूनि मधुराणि च ॥ २२५ ॥
सर्वाणि फलशाकानि लवणानि तथा द्विज ! ॥
स्थाल्यादिगृहपाकं च दत्वा गोत्राधिको भवेत् ॥ २२६ ॥
कूष्माण्डं त्रपुषं दत्वा वृन्ताकादि पटोलकान् ॥
शुभानि कन्दमूलानि सुहृष्टः पुत्रवान् भवेत् ॥ २२७ ॥
बदरा-ऽऽम्र-कपित्थानि खर्जूर-दाडिमानि च ॥
चिञ्चांश्चामलकं दत्वा पुत्रवानिह जायते ॥ २२८ ॥
या नारी द्विज! चैतानि द्विजे भक्त्योपपादयेत् ॥
सर्वं तस्या भवेत्तद्धि धेनुदानसमान्वितम् ॥
सपुत्रा सुभगा पुष्टा पार्वतीवेह जायते ॥ २२९ ॥
योऽर्थिने तृण-काष्ठानि ब्राह्मणायोपपादयेत् ॥
सर्वं दत्तं भवेत्तस्य धेनुदानसमं फलम् ॥ २३० ॥
भोजनाच्छादने दत्वा दत्वा चोपानहौ द्विजः ॥
स्वर्गलोकं तु सम्भुज्य पूर्णकामोऽत्र जायते ॥ २३१ ॥
याः पण्यनार्योऽतिसकामपुंसं कामोपभुक्त्यै निजदत्तदेहाः ॥
गीर्वाणचेतोहररूपवत्यः पौरंदरास्ता गणिका भवन्ति ॥ २३२ ॥
गृहं वा मठिकं वाऽपि शयना-ऽऽसन-विष्टरम् ॥
दत्वा च कशिपुं विद्वान् विप्रान् यः पाठयेन्नरः ॥ २३३ ॥

---

१. F. reads दुर्बलानां for दुर्लभानां while A. B. D. read मानवान् and E. ब्राह्मणान्. २. A. reads धनी for भुवि and B. reads धनी सुखी for भवेद्भुवि. ३. B. E. and F. read the whole thus—
रम्याणि सर्वशाकानि सहिंगु-लवणानि च ।.
४. A. reads °पात्राणि for °पाकं च, D. and F. too as A. ५. A. reads °शुभगात्राधिको भवेत् for दत्वा-गोत्राधिको भवेत्. ६. A. B. D. E. and F. read चारान् instead of चिञ्चाः. ७. A. C. and D. read °विष्टपम् for विष्टरम्.

महीदानादिकं व्यास! विद्यादानं शताधिकम् ॥
विद्यार्थिनां च विप्राणां पादाभ्यङ्गमुपानहौ ॥ २३४ ॥
यो ददाति द्विजश्रेष्ठ ब्रह्मलोकं स गच्छति ॥
आदावारभ्य वेदांस्तु शास्त्रं वाऽन्यतमं द्विजः ॥ २३५ ॥
अध्यापयेद्द्विजान् शिष्यान् विद्यादानं तदुच्यते ॥
उपाध्यायं निवेश्याग्रे तस्य कृत्वा च वेतनम् ॥ २३६ ॥
विद्यां भक्त्या प्रयच्छेद्यः परब्रह्मण्यसौ[1] विशेत् ॥
विद्यार्थिने च विप्राय यो दद्याद्भोजनं द्विजः ॥ २३७ ॥
पादाभ्यङ्गं तथा स्नानं सोऽपि विद्यांशभाग्भवेत् ॥
यः स्वयं पाठयेद्विप्रान् स्नात्वा भक्त्या च स द्विजः ॥ २३८ ॥
साक्षात् ब्रह्म समभ्येति भूयो नायाति संसृतौ ॥
ऋचं वा यदि वार्धं पादं पादार्धमेव च ॥ २३९ ॥
अध्यापयति तस्याऽपि नास्ति शिष्यस्य निष्कृतिः ॥
मन्त्ररूपं च यो दद्यादेकं वाऽपि शुभाक्षरम् ॥
तस्य दानस्य वै शिष्यो निष्कृतिं कर्तुमक्षमः ॥ २४० ॥
यद्विप्र शिष्यप्रतिपादितेन विद्याप्रदानेन न तुल्यमस्ति ॥
दानं धरित्र्यामविनाशि किंचित्तस्मात्प्रदेयं सततं तदेव ॥ २४१ ॥
रोगार्तस्यौषधं पथ्यं यो ददाति नरो यदि ॥
अन्यस्यापि च कस्यापि प्राणदः स तु मानवः ॥ २४२ ॥
किं रत्नैर्भूषणैर्दत्तैर्गोभिर्वासोभिरेव च ॥
किं वित्तैर्भूषणैर्वस्त्रै रत्नैर्गोभिस्तुरंगमैः ॥
आदत्तैः प्राणहीनेन प्राणदानमतोऽधिकम् ॥ २४३ ॥
अन्नं प्राणो जलं प्राणः प्राणश्चौषधमुच्यते ॥
तस्मादौषधदानेन दाता सुरसमो[2] द्विजाः ॥ २४४ ॥
प्राणदानं च यो दद्यात्सर्वेषामपि देहिनाम् ॥
स याति परमं स्थानं यत्र देवश्चतुर्भुजः ॥ २४५ ॥
यो दद्यान्मधुरां वाचमाश्वासनकरीमृताम्[3] ॥
रोग-क्षुधादिनार्तस्य स गोमेधफलं लभेत् ॥ २४६ ॥
क्लीबा-ऽन्ध-बधिरादीनां रोगार्त-कुशरीरिणाम् ॥

---

१. B. E. and F. read परब्रह्मसुतो instead of परब्रह्मण्यसौ २. A. B. D. E. and F. read दत्तास्युरसमो instead of दाता सुरसमो. ३. A. B. D. E. and F. read °करामृताम् for ° करीमृताम्.

तेषां यद्दीयते दानं दयादानं तदुच्यते ॥ २४७ ॥
ये यच्छन्ति दयादानं सानुकम्पेन चेतसा ॥
तेऽपि तद्दानधर्मेण विष्णुलोकमवाप्नुयुः ॥ २४८ ॥
अथान्यत्संप्रवक्ष्यामि तिथि-मासगतं द्विज ! ॥
यत्प्रदाने मुनिश्रेष्ठ ! विशिष्टं फलमिष्यते ॥ २४९ ॥
मासे मार्गशिरे दानं पूर्णचन्द्रतिथौ नरः ॥
विधिना तत्प्रवक्ष्यामि यत्प्रदानं महत्फलम् ॥ २५० ॥
कांस्यस्य पात्रमाक्लिष्टं लवणप्रस्थपूरितम् ॥
हिरण्यनाभं वस्त्रेण कुसुम्भेन च छादितम् ॥ २५१ ॥
स्नातः स्नाताय विप्राय सवस्त्रं प्रतिपाद्य च ॥
सौभाग्य-रूप-लावण्ययुक्तो भवति वै नरः ॥ २५२ ॥
गौरसर्षपकल्केन पौष्यामुत्सादितो नरः ॥
स पुनरभिषेक्तव्यः कुम्भेन गव्यसर्पिषा ॥ २५३ ॥
सर्वगन्धोदकैस्तीर्थैः फल-रत्नसमन्वितैः ॥
ससुवर्णमुखं कृत्वा प्रदद्यात्तद्द्विजन्मने ॥ २५४ ॥
घृतेन स्नापयेद्विष्णुं भक्त्या सम्पूजयेद्धरिम् ॥
घृतं च जुहुयाद्वह्नौ घृतं दद्याद्द्विजातये ॥ २५५ ॥
छत्रं वासोयुगं दद्यात्सोपवासः समाहितः ॥
कर्मणा तेन धर्मज्ञः पुष्टिमाप्नोत्यनुत्तमाम् ॥ २५६ ॥
माघ्यां कुर्वन् तिलैः श्राद्धं मुच्यते सर्वपातकैः ॥
शुभं शयनमास्तीर्य फाल्गुन्यां सद्द्विजातये ॥ २५७ ॥
रूप-द्रविणसंयुक्तो भार्यां रूपवतीं लभेत् ॥
नरः प्राप्नोति धर्मज्ञः प्रमाणं राजवेश्मनि ॥ २५८ ॥
नारी च शुभभर्तारं रूप-सौभाग्यसंयुतम् ॥
प्राप्नोति विपुलान्भोगान्नात्र कार्या विचारणा ॥ २५९ ॥
पौर्णमासीषु चैतासु मासर्क्षसंयुतासु च ॥
एतेषामेव दानानां फलं दशगुणं लभेत् ॥ २६० ॥

१. A. and D. read कृत्वा गुर्वी दयां नराः. २. A. reads स्नात्वा शान्ताय for स्नातः स्नाताय; while D. reads स्नाताचान्ताय. ३. B. and E. read उत्सारितो for उत्सादितो. ४. A. reads °गंधोषधिस्नानैः, B. D. E. and F. read °गंधोषधैस्तोयैः. ५. A. B. E. and F. read °पुष्प° for °रत्न.° ६. A. reads हुत्वा for कृत्वा. ७. A. reads श्रियं प्राप्नोत्यनुत्तमाम्.

महापूर्वासु चैतासु फलमक्षय्यमश्नुते ॥
द्वादश्यां शुक्लपक्षस्य चैत्रे वस्त्रप्रदो नरः ॥ २६१ ॥
अक्षयान् लभते भोगान्नाकलोकेऽविनश्वरे ॥
इत्येतत्कथितं विप्र फलं चैत्रस्य सत्तम ॥ २६२ ॥
दद्यात्क्षेमं च वैशाखे द्वादश्यां यो नरः सिते ॥
शुक्ले छत्रोपानहौ च विष्णुलोकमवाप्नुयात् ॥ २६३ ॥
आस्तीर्य शयनं दत्त्वा प्रणम्य भोगशायिनम् ॥
आषाढशुक्लद्वादश्यां श्वेतद्वीपमवाप्नुयात् ॥ २६४ ॥
श्रावणे वस्त्रदानेन विष्णुसायुज्यमृच्छति ॥
गोदः प्रयाति गोलोकं मासे भाद्रपदे द्विजः ॥ २६५ ॥
प्रीणयेदश्वशिरसं यश्च दत्वा तथाश्विने ॥
विष्णुलोकमवाप्नोति कुलमुद्धरते स्वकम् ॥ २६६ ॥
कंबलस्य प्रदानेन कार्तिक्यां भोगमाप्नुयात् ॥
प्रदानं लवणानां तु मार्गशीर्षे महाफलम् ॥ २६७ ॥
धान्यानां च तथा पौषे दारूणामप्यनन्तरम् ॥
फाल्गुने सर्वगन्धानां भवेद्दानं महाफलम् ॥ २६८ ॥
भगर्क्षसंयुता चैत्रे द्वादशी तु महाफला ॥
मासे तु माधवे शुक्लद्वादशी करसंयुता ॥ २६९ ॥
वायव्येन युता शुक्ले शुचौ मूलेन वैष्णवी ॥
नभस्याश्विनयोः पुण्या श्रावण्यजर्क्षसंयुता ॥ २७० ॥
पौष्णर्क्षसंयुता चोर्जे मार्गे च कृत्तिकायुता ॥
सहस्ये तिष्यकोपेता तपस्यादित्यसंयुता ॥ २७१ ॥
पश्येद्गुर्वर्क्षसंयुक्ता द्वादशी पावना स्मृता ॥
नक्षत्रयुक्तास्वेतासु दत्तं दानाद्यनंतकम् ॥ २७२ ॥

---

१. A. and B. read मघापूर्वासु. २. B. reads योदद्याक्षेम वैशाखे मेषकं द्वादशीदिने. ३. B. E. and F. read दद्यात् प्रीतये भोगशायिनः for दत्वा प्रणम्य भोगशायिनम्. ४. B. E. and F. read श्वेतद्वीपाधिपो भवेत् for श्वेतद्वीपमवाप्नुयात्. ५. B. E. and F. read this line thus :—

कुलत्रयं समुद्धृत्य विष्णुलोकमवाप्नुयात् ।.

६. A. reads सरोमवस्त्रदानेन for कंबलस्य प्रदानेन. ७. A. reads दिवम् for भोगम्. ८. B. D. E. and F. read सुखप्रदम्. for महाफलम्. ९. A. reads शुक्रे for शुक्ले. १०. B. E. and F. read ऽभिभसंयुक्ता for तिष्यकोपेता.

मेषं च मेषसङ्क्रान्तौ गोवृषं वृषसङ्क्रमे ॥
शयना-ऽऽसनदानं च मिथुनोपगमे तथा ॥ २७३ ॥
कर्कप्रवेशे सक्तून् हि प्रदद्याच्छर्करां तथा ॥
सिंहप्रवेशे पात्राणां तैजसानां तथैव च ॥ २७४ ॥
कन्याप्रवेशे वस्त्राणां सुरभीणां तथैव च ॥
तुलाप्रवेशे धान्यानां बीजानामपि चोत्तमम् ॥ २७५ ॥
कीटप्रवेशे वस्त्राणां वेश्मनां दानमेव च ॥
धनुःप्रवेशे शस्त्राणां यानानां तु तथैव च ॥ २७६ ॥
झषप्रवेशे सर्वेषां अन्नानां दानमुत्तमम् ॥[1]
कुम्भप्रवेशे दानं तु गवामर्थे तृणस्य च ॥
मीनप्रवेशेऽम्लानानां माल्यानामपि चोत्तमम् ॥ २७७ ॥
दानान्यथैतानि मया द्विजेन्द्राः प्रोक्तानि कालेषु नरैः[2] प्रदाय ॥
प्राप्नोति कामान्मनसा विमृष्टान् तस्मात्प्रशंसन्ति हि कालदानम् ॥ २७८ ॥
अशौचे सूतके चैव न देयं न प्रतिग्रहः ॥
सतोरपि तयोर्देया सदा चाभयदक्षिणा ॥ २७९ ॥
रात्रौ दानं न दातव्यं दातव्यमभयं द्विजैः ॥
इमानि त्रीणि देयानि विद्या-कन्याप्रतिग्रहः ॥ २८० ॥
देवानामतिथीनां[3] च गवामपि च पूजनम् ॥
रात्रावपि हि कर्तव्यमिति पाराशरोऽब्रवीत् ॥ २८१ ॥
शुचिः सन्नशुचिर्वाऽपि दद्याद्गृह्णीत चाभयम् ॥
अभयस्य दानकालोऽयं यदा भयमुपस्थितम् ॥ २८२ ॥
अन्यप्रतिग्रहो विद्वन् ग्राह्यश्च शुचिना द्विज ॥
अशौचे सूतके वाऽपि न तु ग्राह्या भवन्ति ते ॥ २८३ ॥
अभ्यक्तेन च धर्मज्ञ! तथा मुक्तशिखेन च ॥
स्नात्वाऽऽचम्य[4] पयः स्पृश्य गृह्णीत प्रयतः शुचिः ॥ २८४ ॥
द्रव्यस्य नाम गृह्णीयाद्दाता तथा निवेदयेत् ॥
तोयं दत्वा तथा दाता दाने विधिरयं स्मृतः ॥ २८५ ॥

---

१. A. B. D. E. F. read this line thus :—

झषप्रवेशे दारूणां दानमग्नेस्तथैव च ।.

२. C. reads मुनिः for नरः. ३. A. reads पांथानाम् for देवानाम्; while D. reads पात्राणाम् for देवानाम्. ४. सम्यगुपस्पृश्य गृहीता for °चम्य पयः स्पृश्य गृह्णीत.

प्रतिग्रहीता सावित्रं सर्वं मन्त्रमुदीरयेत् ॥
सार्घ्यं द्रव्येण तत्सर्वं तद्द्रव्यं च सदैवतम् ॥ २८६ ॥
समापय्य ततः पश्चात्कामं स्तुत्वा प्रतिग्रहम् ॥
प्रतिग्रही पठेदुच्चैः प्रतिगृह्य द्विजोत्तमात् ॥ २८७ ॥
मन्दं पठेच्च राजन्यो उपांशु च तथा विशः ॥
मनसा च तथा शूद्रात्कर्तव्यं स्वस्तिवाचनम् ॥ २८८ ॥
सोङ्कारं ब्राह्मणो ब्रूयान्निरोङ्कारं महीपतिः ॥
उपांशु च तथा वैश्यः स्वस्ति शूद्रे तथैव च ॥ २८९ ॥
न दानं यशसे दद्यान्न भयान्नोपकारिणे ॥
न नृत्य-गीतशीलेभ्यो हासकेभ्यश्च धार्मिकः ॥ २९० ॥
पात्रभूतोऽपि यो विप्रः प्रतिगृह्य प्रतिग्रहम् ॥
असत्सु विनियुञ्जीत तस्मै देयं न तद्भवेत् ॥ २९१ ॥
सञ्चयं कुरुते यस्तु समादाय इतस्ततः ॥
धर्मार्थं नोपयुञ्जीत न तं तस्करमर्चयेत् ॥ २९२ ॥
यस्मै दित्सा द्विजाय स्यादुररीकृत्य तं नरः ॥
दानं च हृदि सञ्चिन्त्य जलमध्ये जलं क्षिपेत् ॥ २९३ ॥
वदन्ति मुनयो गाथां परोक्षे दानसत्फलम् ॥
परोक्षमक्षयं दानं प्रत्यक्षात्कोटिशो भवेत् ॥ २९४ ॥
पात्रं मनसि सञ्चिन्त्य गुणवत्तदभिप्सितम् ॥
अप्सु ब्राह्मणहस्ते वा भूमौ वापि जलं क्षिपेत् ॥ २९५ ॥
दानकाले तु सम्प्राप्ते पात्रे चासन्निधौ जलम् ॥
अन्यविप्रकरे दद्याद्दानं पात्राय दीयते ॥ २९६ ॥
विष्णुर्भूर्वरुणो यत्र गृह्णंत्वाह करोदकम् ॥
तद्दानं ब्रह्मसम्प्राप्तमक्षय्यमिति विष्णुगीः ॥ २९७ ॥
लक्ष्मीभ्रष्टाय यद्दत्तं दरिद्रायार्थिने द्विजाः ॥
तदक्षयं समुद्दिष्टमिति पाराशरोऽब्रवीत् ॥ २९८ ॥
राज्यभ्रष्टं च राजानं भूयो राज्ये निवेशयेत् ॥
विष्णुलोकं चिरं भुक्त्वा भूयो भूमिपतिर्भवेत् ॥ २९९ ॥
प्रतिश्रुत्य द्विजायार्थं यो न यच्छति तं पुनः ॥
न च स्मारयते विप्रस्तुल्यं तदुपपातकम् ॥ ३०० ॥

---

१. A. B. D. E. and F. read प्रतिमाहि for प्रतिमही. २. A. reads भवेत्स्वातीर्दिवौकसाम्.

प्रतिश्रुत्य च यत्किञ्चिद्द्विजेभ्यो न प्रयच्छति ॥
स वै द्वादशजन्मानि शृगालयोनिमाप्नुयात् ॥ ३०१ ॥
गृष्ट्यादीनथ वक्ष्यामि यथालक्षणलक्षितान् ॥
मानं भूमि-तिलादीनां यथावत्तन्निबोधत ॥ ३०२ ॥
अजातदन्ता या तु स्याद्‌द्विदन्तसमन्विता ॥
वर्षादर्वाक् चतुर्थाच्च वत्सिकेति निगद्यते ॥ ३०३ ॥
सुशीला च सुवर्णा च नीरोगा च पयस्विनी ॥
सवत्सा प्रथमं सूता गृष्टिर्गौरभिधीयते ॥ ३०४ ॥
अरोगा याऽपरिक्लिष्टा प्रसववत्यथ सूतिका ॥
सूता याऽतिपयोयुक्ता सा गौः सामान्यतः स्मृता ॥ ३०५ ॥
पूर्वोक्तगुणसंयुक्ता प्रत्यग्रप्रसवा तथा ॥
साथ गौर्धेनुरित्युक्ता वसिष्ठजवचो यथा ॥ ३०६ ॥
पञ्चगुञ्जो भवेन्माषः कर्षः षोडशभिश्च तैः ॥
तैश्चतुर्भिः पलं प्रोक्तं दाने मानं च पुण्यदम् ॥ ३०७ ॥
भद्रं नरैकहस्ताभिः प्रसृतीभिश्चतसृभिः ॥
मानकं तैश्चतुर्भिश्च सेतिकेति प्रकीर्तिता ॥ ३०८ ॥
ताभिश्चतसृभिः प्रस्थश्चतुर्भिराढकश्च तैः ॥
द्रोणश्चतुर्भिस्तैरुक्तो धान्यमानमिति स्मृतम् ॥ ३०९ ॥
तिलप्रसृतिभिर्भाण्डं चतुर्भिर्यत्प्रपूर्यते ॥
तैश्चतुर्भिश्च कर्षो हि तैश्चतुर्भिश्च वै पलम् ॥ ३१० ॥
पलैश्च तैश्चतुर्भिः स्यात् श्रीपाटी तच्चतुष्टयम् ॥
करकं चतसृभिस्ताभिश्चतुर्भिस्तैर्घटः स्मृतः ॥ ३११ ॥
इत्यन्यैर्मुनिभिः प्रोक्तं घृतगौस्तिलगौः समाः ॥
किञ्च वो बहुनोक्तेन दानस्य तु पुनःपुनः ॥ ३१२ ॥
दीयते यद्दरिद्राय कुटुम्बिने तदक्षयम् ॥
सुकृदुधाय विप्राय भक्त्या परमया वसु ॥ ३१३ ॥

---

१. E. and F. read भूमिसमा for सामान्यतः. २. A. reads कर्षोद्दादश- A. .. कर्षः षोडशभिश्च; D. also the same. ३. A. and D. read दाने मा.. ..ग्रसः; while B. E. and F. read तौल्यमानं पुरातनैः instead of दाने मानं च पुण्यदम्. ४. Only B. reads सीतिका for सेतिका; while D. reads सेनिका. ५. B. D. E. and F. read पारदं तैः for पलैश्च तैः. ६. B. E. read करंटं. ७. E. only reads तिसृभिः for चतसृभिः.

दीयते वेदविदुषे तदुपतिष्ठति यौवने ॥
अथान्यत्सम्प्रवक्ष्यामि दानानि निष्फलानि तु ॥
तथा निष्फलजन्मानि यथावत्तन्निबोधत ॥ ३१४ ॥
वृथा जन्मानि चत्वारि वृथा दानानि षोडश ॥
पृथक् तानि प्रवक्ष्यामि निबोध त्वं द्विजोत्तम! ॥ ३१५ ॥
अपुत्रस्य वृथा जन्म ये च धर्मबहिष्कृताः ॥
दरिद्रस्य वृथा जन्म व्याधितस्य तथैव च ॥ ३१६ ॥
अपुण्यस्थाने यद्दत्तं वृथा दानं प्रकीर्तितम् ॥
पुण्यस्थानेषु यद्दत्तं वृथा दानं तदुच्यते ॥
आरूढपतिते दानं अन्यायोपार्जितं च यत् ॥ ३१७ ॥
व्यर्थमब्राह्मणे दानं पतिते तस्करेऽपि च ॥
गुरोरप्रीतिजनके कृतघ्ने ग्रामयाजके ॥ ३१८ ॥
ब्रह्मबन्धौ च यद्दानं यद्दत्तं वृषलीपतौ ॥
वेदविक्रयिणे चैव यस्य चोपपतिर्गृहे ॥ ३१९ ॥
स्त्रीजिते चैवं यद्दत्तं व्यालग्राहे तथैव च ॥
परिचारके तु यद्दत्तं वृथा दानानि षोडश ॥ ३२० ॥
तमोवृतश्च यो दद्याद्भयात्क्रोधात्तथैव च ॥
विद्वांश्च दानं तत्सर्वं भुङ्क्ते गर्भस्थ एव हि ॥ ३२१ ॥
ईर्ष्यया मन्युना दानं यद्दानमर्थकारणात् ॥
यो ददाति द्विजातिभ्यो बालभावे तदश्नुते ॥ ३२२ ॥
स्वयं नीत्वा च यद्दानं भक्त्या पात्रे प्रदीयते ॥
अप्रमेयगुणं तद्धि उपतिष्ठति यौवने ॥ ३२३ ॥
यत्सद्विप्राय वृद्धाय भक्त्या च परया वसु ॥
दीयते वेदविदुषे तदुपतिष्ठति वार्द्धके ॥ ३२४ ॥
तस्मात्सर्वास्ववस्थासु सर्वदानानि सत्तमाः ॥
दातव्यानि द्विजातिभ्यः स्वर्गमार्गमभीप्सता ॥ ३२५ ॥
भूमेः प्रतिग्रहं कुर्याद्भूमिं कृत्वा प्रदक्षिणाम् ॥
करे गृह्य तथा कन्यां दासदास्यो तथा द्विजः ॥ ३२६ ॥
करं तु हृदि विन्यस्य धर्म्यो ज्ञेयः प्रतिग्रहः ॥
आरुह्य च गजस्योक्तः कर्णेऽश्वस्य सटासु च ॥ ३२७ ॥

१. A. reads यत्सद्वृत्ताय.

तथा चैकशफानां च सर्वेषामविशेषतः॥
प्रतिगृह्णीत गां शृङ्गे पुच्छे कृष्णाजिनं तथा॥ ३२८॥
कर्णजाः पशवः सर्वे ग्राह्याः पुच्छे विचक्षणैः॥
प्रतिग्रहं तथोष्ट्रस्य आरुह्यैव तु पादुके॥ ३२९॥
ईषायां तु रथोऽक्षे वा छत्रं दण्डे विधारयेत्॥
द्रुमाणामथ सर्वेषां मूले न्यस्तकरो भवेत्॥ ३३०॥
आयुधानि समादाय तथाऽऽमुच्य विभूषणम्॥
धर्मध्वजस्तथा स्पृष्ट्वा प्रविश्य च तथा गृहम्॥ ३३१॥
अवतीर्य तु सर्वाणि जलस्थानानि यानि तु॥
उपविश्य च शय्यायां स्पर्शयित्वा करेण वा॥ ३३२॥
द्रव्याण्यन्यानि चादाय स्पृष्ट्वा वा ब्राह्मणः पठेत्॥
कन्यादाने तु न पठेत् द्रव्याणि तु पृथक् पृथक्॥ ३३३॥
प्रतिग्रहाद्द्विजश्रेष्ठ तथैवान्तर्भवन्ति ते॥
द्रव्याणामथ सर्वेषां द्रव्यसंश्रयणान्नरः॥ ३३४॥
वाचयेज्जलमादाय ओंकारेण प्रतिग्रहम्॥
प्रतिग्रहस्य यो धर्म्यं न जानाति द्विजो विधिम्॥
स द्रव्यस्तेयसंयुक्तो नरकं प्रतिपद्यते॥ ३३५॥

अथापि वक्ष्यामि विधेर्विशेषान् वाजिप्रदाने च प्रतिग्रहे च॥
दातृ-ग्रहीत्रोरपि येन पुण्यं स्वर्गाय जायेत शृणुध्वमेतत्॥ ३३६॥
गृह्णीत योऽश्वं विधिवद्द्विजेन्द्राः कुर्यादसौ पञ्चदिनानि पूर्वम्॥
पञ्चोपचारैरुत विष्णुपूजां कूष्माण्डमन्त्रैर्घृत-दुग्धहोमम्॥ ३३७॥
यद्ग्राम इत्यादि मरुत्वतीयं सोङ्कारभूरादिभिरन्वितं च॥
प्रत्येकमष्टौ जुहुयाद्द्विजाग्र्यः सौर्येण मन्त्रेण च तद्वदष्टौ॥ ३३८॥
षष्ठ्या प्रयुक्तं त्रिशतं जुहोति कुर्याच्च गायत्रिजपं सहस्रम्॥
पश्चात्स गृह्णन् तुरगं द्विजाग्र्यस्तथा स्वमात्मानमजं नयेत॥ ३३९॥

---

१. A. reads पृष्ठे. for पुच्छे. B. E. and F. also read the same. २. B. E. and F. read माद्य: for ऽक्षे वा. ३. A. B. E. and F. read उपवेश्य for उपविश्य. ४. A. B. E. F. read च for न. ५. A. B. E. F. read तु for न. ६. A. reads परिग्रहे for प्रतिग्रहे. ७. Only A. reads युत° for उत. ८. B. and E. read °त्वरीयं for °त्वतीयं.

दाताऽपि चैतद्व्रतमाविदध्याद्विजाग्र्यवत्प्राक्तनपापशुध्यै ॥
द्वावप्यमू सूर्यजनं लभेते सर्वत्र[1] पूज्यौ द्विज वृन्दमध्ये ॥ ३४० ॥
अश्वप्रतिग्रहविधिं च प्रतिग्रहं च जानाति योऽश्वस्य पुराणगाथाः[2] ॥
स एव धन्यः स च पूजनीयः इहैव लोके द्विज-देवमान्यः ॥ ३४१ ॥
विशेषपूज्यप्रतिपादनाय तिथौ प्रदत्तं द्विज यत्र यत्र ॥
प्रागुक्तमेतत्पुनरुच्यते यत्तच्छ्रूयतामत्र[3] हि कथ्यमानम् ॥ ३४२ ॥

श्रावणे शुक्लपक्षे तु द्वादश्यां प्रीयते हरिः[4] ॥
गोप्रदानेन विप्रेन्द्र[5] वदन्त्येतन्मनीषिणः ॥ ३४३ ॥
पौषे[6] शुक्ले तथा वत्स[7] द्वादश्यां घृतधेनुकाम् ॥
घृतार्चैः प्रीणनायालं प्रदद्यात्फलदायिनीम् ॥ ३४४ ॥
तथैव माघद्वादश्यां प्रदत्ता तिलगौर्द्विजाः ॥
केशवं प्रीणयत्याशु सर्वान् कामान् प्रयच्छति ॥ ३४५ ॥
ज्येष्ठे मासि सिते पक्षे द्वादश्यां जलधेनुकाम् ॥
दत्वा विप्राय विधिना प्रीणयत्यम्बुशायिनम् ॥ ३४६ ॥
यत्र वा तत्र वा काले यद्वा तद्वा प्रदीयते ॥
विशेषार्थमिदं प्रोक्तं नान्यत्काले निषेधनम्[8] ॥ ३४७ ॥
विष्णुमुद्दिश्य विप्रेभ्यो निःस्वेभ्यो यत्प्रदीयते ॥
भवेत्तदक्षयं दानं उत्तमत्वात्परैरिदम् ॥ ३४८ ॥
काले पात्रे तथा देशे धनं न्यायार्जितं तथा ॥
यद्दत्तं ब्राह्मणश्रेष्ठे तदनन्तं प्रकीर्तितम् ॥ ३४९ ॥
चन्द्रे वा यदि वा सूर्ये दृष्टे राहौ महाग्रहे ॥
अक्षयं कथितं सर्वं तदप्यर्के विशिष्यते ॥ ३५० ॥
द्वादशीषु च शुक्लासु विशेषात् श्रवणेन च ॥
यत्र यद्दीयते किञ्चित्तदनंतं प्रजायते ॥ ३५१ ॥
विशेषाद्बुधयुक्तेषु पक्षान्त्येषु च सर्वदा ॥
तृतीयासु च सर्वासु शुक्लासु च विशेषतः ॥ ३५२ ॥

---

१. A. substitutes अत्रापि for सर्वत्र. २. A. and D. substitute °गीताः for °गाथाः. ३. B. reads संस्तूयताम्. ४. A. and D. read द्विजाः instead of हरिः. ५. A. and D. read गोविंदः instead of विप्रेन्द्र. ६. A. B. D. E. and F. read पुष्ये for पौषे. ७. B. E. and F. read द्विजश्रेष्ठ for तथा वत्स. ८. A. B. D. E. and F. read नान्यकालनिषेधकम् for नान्यत्काले निषेधनम्.

वैशाखे शुक्लपक्षे तु विशेषादपि मानवः ॥
आषाढी कार्तिकी चैव फाल्गुनी तु विशेषतः ॥ ३५३ ॥
तिस्रश्चैताः पौर्णमास्यो दाने विप्र महाफलाः ॥
व्यतीपातेषु सर्वेषु समर्क्षेषु द्विजोत्तम ! ॥ ३५४ ॥
ग्रहसङ्क्रमकालेषु तोव्ररश्मेर्विशेषतः ॥
तुला-मेषप्रवेशेषु योगेषु मिथुनस्य च ॥ ३५५ ॥
रवेर्महाफलं दानं तेभ्योऽपि स्यान्महाफलम् ॥
यदा भानुः प्रविशति मकरं द्विजसत्तमाः ॥ ३५६ ॥
आषाढेऽश्वयुजे चैव पौषे चैत्रे तथैव च ॥
द्वादशीप्रभृति प्रोक्तं पुण्यं दिनचतुष्टयम् ॥ ३५७ ॥
मिथुनं च तथा कन्यां धन्विनं मीनमेव च ॥
प्रवेशे भास्करे पुण्यं कथितं द्विजसत्तमाः ॥
षडशीतिमुखं नाम दाने दिनचतुष्टयम् ॥ ३५८ ॥
अच्छिन्ननाले यद्दत्तं पुत्रे जाते द्विजोत्तमाः ॥
संस्कारे चैव पुत्रस्य तदक्षय्यं प्रकीर्तितम् ॥ ३५९ ॥
इष्टयश्च विविधाः प्रोक्तास्ताश्च कार्या यथोदिताः ॥
सर्वा अपि हि सद्विप्रैरिष्टधर्ममभीप्सुभिः ॥ ३६० ॥
सत्सप्तभेधिद्विजनाकलब्धिसिद्ध्यर्थमुक्तानि कियन्ति विप्राः ॥
दानानि वक्ष्याम्यथ पूर्तधर्मं स्याद्येन पुंसां विहितेन पुण्यम् ॥ ३६१ ॥
ब्रह्मेश-हरि-सूर्याणां स्कन्देभास्या-ऽश्विनां तथा ॥
मातृणां च ग्रहाणां च गृहाणि कारयेन्नरः ॥ ३६२ ॥
इष्टकादशकं वाऽपि यश्चार्पयति विष्णवे ॥
अनेन विधिना कुर्याद्विष्णुलोकमवाप्नुयात् ॥ ३६३ ॥
एवं यः सर्वदेवानां मन्दिरं कारयेन्नरः ॥
स याति वैष्णवं लोकं प्राप्यं योगशतैः कृतैः ॥ ३६४ ॥
समाचरति यो भग्नं सुधाभिधवलं यदि ॥
कुरुते देवहर्म्यं च विशिष्टैर्लेप-चित्रकैः ॥ ३६५ ॥

१. A. reads °प्रयोगेषु for °प्रवेशेषु. २. B. reads सर्वाश्रमेषु for सर्वा अपि हि. ३. B. only reads पूर्व° for पूर्त.° ४. B. D. read मातृदुर्गा° for मातृणां च. ५. B. E. and F. read इष्टिका° for इष्टका.°

सम्मार्जयति यश्चापि यतो यश्चानुलेपयेत् ॥
प्रदीपं तत्र यो दद्यात्स याति विष्णुलोकताम् ॥ ३६६ ॥
पूजयेद्विधिना यस्तु पञ्चोपचारसंयुतः ॥
स विष्णुलोकमभ्येति यावदाभूतसम्प्लवम् ॥ ३६७ ॥
यावन्त्यश्चेष्टकास्तत्र चिता देवस्य सद्मनि ॥
तावन्त्यब्दसहस्राणि तत्कर्ता स्वर्गमाविशेत् ॥ ३६८ ॥
सन्निहत्य-तडागानि पुष्करिण्यश्च दीर्घिकाः ॥
• तथा कूपाश्च वाप्यश्च कर्तव्या गृहमेधिभिः ॥ ३६९ ॥
खातमात्रं प्रकर्तव्यमेकाहिकमपि क्षितौ ॥
यावत्पीत्वा जलं गौस्तु तृषार्ता वितृषा भवेत् ॥ ३७० ॥
पिबन्ति सर्वसत्वानि तृषार्तान्यम्भसामिह ॥
वर्षाणि बिन्दुतुल्यानि तत्कर्ता दिवमावसेत् ॥ ३७१ ॥
उपकुर्वन्ति यावन्ति गण्डूषाणि क्रियासु च ॥
कुर्वन्ति स्नान-शौचादि तथैवाचमनान्यपि ॥ ३७२ ॥
तावत्सङ्ख्यानि वर्षाणि लक्षाणि दिवि मोदते ॥[1]
अपां स्रष्टा वसेत्स्वर्गे सेव्यमानोऽप्सरोगणैः ॥ ३७३ ॥
आरामाश्चापि कर्तव्याः शुभवृक्षैः सुशोभिताः ॥
अश्वत्थोदुम्बर-प्लक्ष-चूत-राजाद-नीवरैः ॥ ३७४ ॥
जम्बू-निम्ब-कदम्बैश्च खर्जूरैर्नारिकेलकैः ॥
बकुलैश्चम्पकैर्हृद्यैः पाटला-ऽशोक-किंशुकैः ॥ ३७५ ॥
द्रुमैर्नानाविधैरन्यैः फल-पुष्पोपयोगिभिः ॥
जाती-जपादिपुष्पैस्तु शोभिताश्च समन्ततः ॥ ३७६ ॥
फलोपयोगिनः सर्वे तथा पुष्पोपयोगिनः ॥
आरामेषु च कर्तव्याः पितृ-देवोपयोगदाः ॥ ३७७ ॥
गाथामुदाहरन्त्यत्र तद्विदः कवयोऽपरे ॥
वृक्षरोपकलोकानां[2] उक्ता या पुष्पवाटिकाः ॥ ३७८ ॥
अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दशचिंचिणीश्च ॥
षट्[3]चम्पकं तालशतत्रयं च पञ्चाम्रवृक्षैर्नरकं न पश्येत् ॥ ३७९ ॥

---

१. B. C. D. E. and F. read अथो स च विशेत्स्वर्गे; while B. reads स्वर्गे अक्षयमावासः. २. B. C. D. E. and F. read °पादपाः. ३. B. reads षट्चम्पकं.

कपित्थ-बिल्वामलकीत्रयं च पंचाम्रवापी नरकं नयाति ॥ ३८० ॥
यावन्ति खादन्ति फलानि वृक्षात्क्षुधार्दिग्धास्तनुभृद्गणाद्याः ॥
वर्षाणि तावन्ति वसन्ति नाके वृक्षैकवापास्त्रिदशौघसेव्याः ॥ ३८१ ॥
यावन्ति पुष्पाणि महीरुहाणां दिवौकसां मूर्ध्नि धरातले वा ॥
पतन्ति तावन्ति च वत्सराणां कल्पानि वृक्षैर्दिवमारुहन्ति ॥ ३८२ ॥
यत्कालपक्वैर्मधुरैरजस्रं शाखाच्युतैः स्वादुफलैर्नगाद्याः ॥
सर्वाणि सत्वानि च तर्पयेयुः तं श्राद्धदानेन च वृक्षनाथान् ॥ ३८३ ॥
उद्दिश्य विष्णुं जगतामधीशं नारायणं यः सुकृतं करोति ॥
आनन्त्यमाप्नोति कृतं तु तस्मादनन्तरूपो भगवान्पुराणः ॥ ३८४ ॥
दानानि सर्वाण्यभिधाय विद्वन्निष्टं च पूर्तं गृहमेधिकर्म ॥
कुर्वन्ति शान्तिं मनुजाः शुभाय वक्ष्यामि तस्मादथ सर्वशान्तिम् ॥३८५॥
उक्तानि सर्वदानानि इष्टापूर्तश्च सत्तमाः ॥
अतः परं प्रवक्ष्यामि गणेशादिकशान्तयः ॥ ३८६ ॥

इति बृहत्पराशरीये धर्मशास्त्रे सुव्रतप्रोक्तायां संहितायां दानधर्मेषु पूर्तविनिर्णयो नाम दशमोऽध्यायः ॥ १० ॥

---

१. B. reads—
आरोप्य बिल्वामलकीकपित्थान्वराम्रवापी नरकं न याति ।.
२. F. reads नर-पक्षिसंघाः. ३. B. and F. read नाके रमते गवापि for वृक्षैर्दिवमारुहंति. ४. C. and D. read समर्पयस्व for तर्पयेयुः. ५. A. C. D. E. and F. read पुरुषः for सुकृतं.

बृहत्पराशरसंहिता ।

॥ अथैकादशोऽध्यायः ॥

शान्तीनामथ सर्वासां ग्रहशान्तिः परा स्मृता ॥
ग्रहेभ्योऽपि गणेशस्तु तस्य शान्तिरथोच्यते ॥ १ ॥
यदि पुङ्कृतकर्माणि भवन्ति फलदानि हि ॥
तदा धर्मोऽ-र्थ-कामास्तु संसिध्येरन्सदा नृणाम् ॥ २ ॥
तन्नृभिः क्रियमाणानां सर्वेषां कर्मणाममुम् ॥
विघ्नार्थमसृजद्ब्रह्मा शङ्करश्च विनायकम् ॥ ३ ॥
तेनोपहतपुंसां तु कर्म स्यान्निष्फलं कृतम् ॥
स्त्रीणामपि तथा सर्वं क्रियमाणं तु निष्फलम् ॥ ४ ॥
जलावगाहनं स्वप्ने क्रव्यादारोहणं तथा ॥
खरोष्ट्र-म्लेच्छसंसर्गो मुण्ड-काषायवाससाम् ॥ ५ ॥
पश्यन्त्यात्मानमेवेह सीदन्तं प्रतिवासरम् ॥
यानि कुर्वन्ति कर्माणि तानि स्युः क्लेशदानि च ॥ ६ ॥
राजपुत्रो न राज्याप्त्या वराप्त्या न तु कन्यका ॥
अन्तर्वत्नी अपत्याप्त्या आचार्यत्वेन च द्विजः ॥ ७ ॥
अधीयानास्तु विद्याप्त्या कृषिकृत् सस्यसम्पदा ॥
वणिग्वर्तनलाभेन युज्यते निर्धनश्च[1] सन् ॥ ८ ॥
तस्मात्तदुपशान्त्यर्थं समभ्यर्च्य गणेश्वरम् ॥
स्नपनं कारयेत्तस्य विधिवत्पुण्यवासरे ॥ ९ ॥
चतुर्थ्यां शुक्लपक्षे तु अयने चोत्तरे शुभे ॥
पुण्यार्थं सर्वसिध्यर्थं कुर्याच्छान्तिं विनायकीम् ॥ १० ॥
स्त्रासनासीनं संस्थाप्य आरक्तार्षभचर्मणि ॥
सितसर्षपकल्केन साज्येनाच्छादितस्य च ॥ ११ ॥

---

१. B. C. D. E. and F. read तद्भूतश्च for निर्धनश्च.

विलिप्तशिरसस्तस्य गन्धैः सर्वैस्तथौषधैः ॥
अष्टौ वा चतुरो वापि स्वस्तिवाच्यान् द्विजान् शुभान् ॥ १२॥
एकवर्णैश्चतुर्भिश्च पुम्भिः कुम्भैश्च यज्जलम् ॥
समानीतं क्षिपेत्तत्र वक्ष्यमाणमृदस्तथा ॥ १३ ॥
अश्वेभस्थान-वल्मीक-ह्रद-सङ्गममृत्तिकाः ॥
रोचनां गुग्गुलं गन्धान् तस्मिन्नम्भसि तान् क्षिपेत् ॥ १४ ॥
एतद्वै पावनं स्नानं सहस्राक्षमृषिस्मृतम् ॥
तेन त्वां शतधारेण पावमान्यः पुनन्त्वमुम् ॥ १५ ॥
नवभिः पावमानीभिः कुम्भं तमभिमन्त्रयेत् ॥
शक्रादिदशदिक्पाला ब्रह्मेश-केशवादयः ॥ १६ ॥
आपस्ते घ्नन्तु दौर्भाग्यं शान्तिं ददतु सर्वदा ॥
सुमित्रियान इत्याद्यैर्मन्त्रैरेकेऽभिषेचनम् ॥ १७ ॥
वदन्ति वदतां श्रेष्ठा दौर्भाग्यस्योपशान्तये ॥
समुद्रा गिरयो नद्यो मुनयश्च पतिव्रताः ॥ १८ ॥
दौर्भाग्यं घ्नन्तु मे सर्वे शान्तिं यच्छन्तु सर्वदा ॥
पाद-गुल्फोरु-जङ्घाऽऽन्त्र-नितम्बोदर-नाभिषु ॥ १९ ॥
स्तनोर-बाहु-हस्ताग्र-ग्रीवा-अंसाङ्गसन्धिषु ॥
नासा-ललाट-कर्णभ्रु-केशान्तेषु च यत् स्थितम् ॥ २० ॥
तदापो घ्नन्तु दौर्भाग्यं शान्तिं यच्छन्तु सर्वदा ।
स्नातस्य मस्तके दर्भान् साज्येन परिगृह्य च ॥ २१ ॥
जुहुयात्सार्षपं तैलमौदुम्बरस्रुवेण तत् ॥
मितश्च सम्मितश्चैव तथा साल-कटङ्कटौ ॥ २२ ॥
कूष्माण्डो राजपुत्रश्चेत्यन्तेस्वाहासमन्वितैः ॥
नामभिश्च बलिं दद्यान्मन्त्रैर्नमः-स्वधान्वितैः॥
चतुष्पथं समाश्रित्य शूर्पे कृत्वा कुशांस्तथा ॥ २३ ॥
निधाय तेषु दर्भेषु शुक्ला-ऽशुक्लांश्च तण्डुलान् ।
ओदनं पललोपेतं पक्वामाम्मत्स्यकानपि ॥ २४ ॥
तथा मांसं च कुल्माषान् तथैव त्रिविधां सुराम् ।
पूरिकाण्डेरकापूपान्फलानि मूलकं स्रजः ॥ २५ ॥

१. From the preceding śloka राजपुत्रो न राज्ञाख्या, till the śloka रोचनां गुग्गलं, these are not given in D.; २. A. reads शं ते for शांतिं. ३. A. reads शाल-कंटकटौ; while D. E. F. read शालक-कंटकौ.

गणेशमातुःपार्वत्याः कुर्यादुपस्थितिं पुनः ॥
दूर्वा-सर्षप-पुष्पैश्च पूर्णमर्घाञ्जलिं क्षिपेत् ॥ २६ ॥
सौभाग्यमम्बिके देहि क्षमां रूपं यशोऽपि च ॥
श्रियं पुत्रांश्च कामांश्च तथा शौर्यं च देहि मे ॥ २७ ॥
गणेशमातर्हे बाले यत्किञ्चिन्मदभीप्सितम् ॥
एकमात्रैव तद्देवि देहि गौरि! वरान् वरान् ॥ २८ ॥
ततस्तु वाससी शुक्ले परिधायाऽहते शुभे ॥
सितचन्दनलिप्ताङ्गः सितस्रग्भूषणान्वितः ॥ २९ ॥
तानन्यांश्च द्विजान् सर्वान् भोजयेद्विविधाशनैः ॥
वस्त्रयुग्मं गुरोर्दद्यात्तेषु तस्य वराशिषः ॥ ३० ॥
एतेन सम्पूज्य गणाधिनाथं विघ्नोपशान्त्यै जननीं तथास्य ॥
स्मार्तोक्तसम्यग्विधिना स कामान्प्राप्नोति चान्यान्मनसा यदिच्छेत्॥३१॥
स्नात्वा विधायार्चनमम्बिकायाः सम्पूज्य लोकान्सखि-बन्धुमिश्रान् ॥
आचार्यवृद्धान्वनिताः कुमारीः प्रध्वस्तविघ्नः श्रियमेति गुर्वीम् ॥ ३२ ॥
स्मृत्युक्तमन्त्रैर्विधिवत्प्रयुक्तैर्नित्यं शिवानन्दनपूजनं च ॥
कृतान्तरायान्विनिहत्य सर्वान् कुर्यादथातो ग्रहयागमेनम् ॥ ३३ ॥

इति विनायकशांतिः ।

मुनीनां व्यासमुख्यानां शक्तिसूनुः पुरोऽब्रवीत् ॥
शुभाय ग्रहपूजायां वदतस्तान्निबोधत ॥ ३४ ॥
यद्वर्णा यत्सुता विद्वन् जाता देशेषु येषु च ॥
तेषां तदधिदैवत्यं समिधो दक्षिणा च या ॥ ३५ ॥
यस्य यत्र च दिग्भागे मण्डलं स्याद्विवस्वतः ॥
होमकर्मणि ये विप्रा या संख्या समिधामपि ॥ ३६ ॥
अग्निकुण्डप्रमाणं तु प्रमाणं समिधामपि ॥
सर्वमेव यथोद्देशं वक्ष्यामि द्विजसत्तम ॥ ३७ ॥
रक्तः कश्यपजो भानुः शुक्लो ब्रम्हसुतः शशी ॥
रक्तो रौद्रसुतो भौमः पीतः सोमसुतो बुधः ॥ ३८ ॥
पीतो ब्रम्हसुराचार्यः शुक्लः शुक्रो भृगूद्वहः ॥
कृष्णः शनी रवेः पुत्रः कृष्णो राहुः प्रजापतिः ॥ ३९ ॥
कृष्णः केतुः कृशानूत्थः कृष्णा पापास्त्रयोऽप्यमी ॥
कालिङ्गोऽर्को यामुनः सोम आवन्त्यो भौम उच्यते ॥ ४० ॥
मागधो बुध इत्युक्तः सैन्धवस्तु बृहस्पतिः ॥

सैन्धवो ह्यमराचार्यः सौरिः सौराष्ट्रदेशजः ॥ ४१ ॥
राहुः सिंहलदेशोत्थो मध्यदेशभवोऽग्निजः ॥
जन्मदेशा इमे प्रोक्ता ग्रहजातकवेत्तृभिः ॥ ४२ ॥
ताम्रं रविमुमां चन्द्रं स्कन्दं भौमं हरिं बुधम् ॥
ब्रह्माणं च गुरुं विद्यात् [illegible] शुक्रं यमं शनिम् ॥ ४३ ॥
कालं राहुं चित्रगुप्तं केतुमित्यधिदैवतम् ॥
एतद्विज्ञाय यः कुर्यात्तत्सर्वं सफलं भवेत् ॥ ४४ ॥
अर्कस्त्वर्काय होतव्यः सर्वव्याधिविनाशनः ॥
सुधांशवे च सोमाय पलाशः सार्वकामिकः ॥ ४५ ॥
खदिरश्चार्थलाभाय मङ्गलाय विवेकिभिः ॥
स्वरूपकृदपामार्गो होतव्यश्च बुधाय वै ॥ ४६ ॥
प्रभाप्रदस्तथाश्वत्थो होतव्योऽमरमन्त्रिणे ॥
ऊर्जा-सौभाग्यकृदूर्वा दैत्यामात्याय सद्विजैः ॥ ४७ ॥
शमी पापोपशान्त्यर्थं होतव्या मन्दगामिने ॥
दीर्घायुर्धर्मकृद्दूर्वा होतव्या राहवे द्विज ॥ ४८ ॥
धर्मविद्यार्थकृद्दर्भः सद्भिर्देयोऽग्निसूनवे ॥
दधि-क्षीरा-ऽऽज्यसंमिश्राः समिधः शुभवृद्धये ॥ ४९ ॥
प्रादेशमात्रकाः सर्वा अष्टावष्टोत्तरं शतम् ॥
अष्टाविंशतिरेकैकं संख्यैषा प्रतिदैवतम् ॥ ५० ॥
वृद्धौ तु फलभूयस्त्वमुक्तादन्यत्तु पायसम् ॥
नवभवनकं लेख्यं चतुरस्रं तु मण्डलम् ॥ ५१ ॥
ग्रहास्तत्र प्रतिष्ठाप्या वक्ष्यमाणक्रमेण तु ॥
मध्ये तु भास्करः स्थाप्यः पूर्वदक्षिणतः शशी ॥ ५२ ॥
दक्षिणेन धरासूनुर्बुधः पूर्वोत्तरेण तु ॥
उत्तरस्यां सुराचार्यः पूर्वस्यां भृगुनन्दनः ॥ ५३ ॥
पश्चिमायां शनिः कुर्याद्राहुर्दक्षिणपश्चिमे ॥
पश्चिमोत्तरतः केतुरिति स्थाप्या ग्रहाः क्रमात् ॥ ५४ ॥
पटे वा मण्डले लेख्या ईशान्यां दिशि पावकात् ॥
ताम्रोऽर्कः स्फाटिकश्चन्द्रो रक्तचन्दनजोऽपरः ॥ ५५ ॥

---

१. B. E. read सर्वव्याधिहरः for [illegible] १.

सोमसूनु-सुराचार्यौ स्वर्णशोभौ प्रकीर्तितौ ॥
राजतो भृगुपुत्रश्च कार्ष्णायसः शनैश्चरः ॥ ५६ ॥
राहुश्च सैसकः कार्यः कार्यः केतुश्च कांस्यजः ॥
सर्वानेतन्मयान्कृत्वा समभ्यर्च्य सदा गृहे ॥ ५७ ॥
लेखयेद्वर्णकैः स्वैः स्वैर्विधिवत्पिष्टकेन वा ॥
ग्रहाणां साधिदैवानां प्रतिष्ठापनमन्त्रकान् ॥ ५८ ॥
वदन्ति मन्त्रतत्त्वार्थवेदिनो द्विजसत्तमाः ॥
आदित्यं गर्भमित्युक्त्वाग्निं दूतमनेन च ॥ ५९ ॥
एताभ्यां स्थापयेदर्कं त्र्यम्बकमिति च शङ्करम् ॥
अप्स्वन्तरीति शीतांशुं श्रीश्च ते इति पार्वतीम् ॥ ६० ॥
स्योनापृथिवीति भौमं च यदक्रंदेति वा गुहम् ॥
इदं विष्णुर्विधिं स्थाप्य तद्विष्णोरिति वै हरिम् ॥ ६१ ॥
इन्द्र आसां सुराचार्यं आब्रह्मन्निति वेधसम् ॥
इन्द्रं दैवीर्भृगोःसूनुं सजोषेत्यमराधिपम् ॥ ६२ ॥
शन्नो देवी रवेः सूनुं यमाय त्वा तथा यमम् ॥
आयं गौरीति राहुश्च कालं कार्षीरसीति च ॥ ६३ ॥
ब्रह्मजज्ञेति केतुं च चित्रं चित्रावसोरिति ॥
स्युरेतानि मैत्राणि मूलमन्त्रास्तथापरे ॥ ६४ ॥
आकृष्णेन च तीव्रांशोरिमन्देवा निशाकरम् ॥
अग्निर्मूर्धेति भूसूनोरुद्बुध्यस्वं बुधस्य च ॥ ६५ ॥
बृहस्पतेरिति गुरोरन्नात्परिस्रुतो भृगोः ॥
शन्नो देवी शनैर्गन्तुः काण्डात्काण्डात्परस्य च ॥ ६६ ॥
केतुं कृण्वन्नग्निसूनोरिति मन्त्राः प्रकीर्तिताः ॥
वेदमन्त्रैर्विना कश्चिद्विधिर्नास्ति द्विजन्मनाम् ॥
कर्तव्याः स्वस्वमन्त्रैश्च स्वैः स्वैश्च प्रतिदैवतम् ॥ ६७ ॥
सघृता सयवाश्चापि होतव्याश्च द्विजैस्तिलाः ॥
मध्यमानामिकामूललग्नाङ्गुष्ठचतसृभिः ॥ ६८ ॥
यावन्तोऽङ्गुलिभिर्ग्राह्यास्तिलास्तावद्भिराहुतिम् ॥
हस्तमात्रं पृथक्त्वेन वेद्योऽपि तावतैव तु ॥ ६९ ॥
बाहुमात्रं चतुष्कोणे एके चाऽङ्गुलिमात्रकम् ॥
चतुरस्रं चतुष्कुण्डं एकयोनिसमन्वितम् ॥ ७० ॥

शुभमेवालया युक्तं सुशान्तिकरमुत्तमम् ॥
होमार्थं मण्डपं कुर्याच्चतुर्द्वारं सतोरणम् ॥ ७१ ॥

चतुर्दिक्षु ध्वजाः कार्या नानावर्णाः शुभावहाः ॥
तथा तत्तोयकुम्भाश्च दूर्वा-पल्लवसंयुताः ॥ ७२ ॥

पुनर्नवीकृतं सर्वं मण्डपामात्र आश्रयेत् ॥
षट्कर्मनिरताः शान्ता ये न वृथाः प्रतिग्रहैः ॥ ७३ ॥

नियोज्यास्तेऽग्निकार्यादौ स्फुरन्मन्त्रा द्विजोत्तमाः ॥
प्रतिग्रहाग्निदग्धस्य जप-होमादि कुर्वतः ॥ ७४ ॥

यस्य मन्त्राण्यवीर्याणि तत्कृतं कर्म निष्फलम् ॥
ओदनं सगुडं भानोः पायसं शशिनस्तथा ॥ ७५ ॥

हविष्यं भूमिपुत्रस्य क्षीरान्नं च बुधस्य च ॥
षष्टिक्यं ब्रह्मपुत्रस्य दध्ना तु भार्गवस्य च ॥
पूर्णं हविः शनैर्गन्तुर्मांसं राहोः शृताघृतम् ॥ ७६ ॥

चित्रान्नमग्निसूनोश्च भोज्यान्नामर्मिश्रस्यजाः ॥
कृतहोमास्तथाऽन्येऽपि ये सम्भूता द्विजोत्तमाः ॥ ७७ ॥

यथावर्णानि वासांसि देयानि कुसुमानि च ॥
देया गन्धाश्च सर्वेषां देयो धूपश्च गुग्गुलः ॥ ७८ ॥

धेनुः शङ्खो वृषः स्वर्णं वासांस्यश्वः सिता च गौः ॥
अविश्च्छागलकश्चैव क्रमशो दक्षिणाः स्मृताः ॥ ७९ ॥

प्रत्यहं प्रतिमासं च प्रत्यब्दं वा विधानतः ॥
वर्णिभिश्च ग्रहाः पूज्या राजभिश्च सदैव हि ॥ ८० ॥

दुःखितो यस्तु यस्य स्यात्पूज्यस्तस्य स यत्नतः ॥
वेधसैते नियुक्ताः प्राक् स्वभक्तं पूजयिष्यथ ॥ ८१ ॥

वरं यच्छन्ति संहृष्टा विप्रा वन्हिर्नृपास्तथा ॥
असन्तुष्टा दहन्त्येते तस्मात्तानर्चयेत्सदा ॥ ८२ ॥

ग्रहाधीनमिदं सर्वमुत्पत्ति-प्रलयात्मकम् ॥
जगत्यभाव-भावी च तस्मात्पूज्यतमा ग्रहाः ॥ ८३ ॥

सानुकूलैर्ग्रहैर्यानि कुर्यात्कर्माणि मानवः ॥
सफलानि भवन्त्यस्य निष्फलानि स्युरन्यथा ॥ ८४ ॥

---

१. A. reads आविकः छागलश्चैव for अविश्च्छागलकश्चैव.

कुर्वन्ति चैतद्विधिना ग्रहाणामातिथ्यमब्दं प्रतिवासरं ये ॥
आरोग्यदेहा धन-धान्ययुक्ता दीर्घायुषः श्रीसहिता भवन्ति ॥ ८५ ॥

इति ग्रहशान्तिः ।

वसत्स्वकस्मात्सदनेष्वतोऽद्भुतं वयो विशेयुर्यदरण्यवासिनः ॥
विशेषतो गृध्र-कपोत-पिङ्गलास्तथैव चोलूकसकाक-वायसाः ॥ ८६ ॥
तरक्षु-गोमायु-मृगारि-ऋक्षका दिवाप्यकस्मादकुतोऽपि निर्भयाः ॥
विशन्ति यत्ते तदतीव चाद्भुतं गृहे पुरे शान्तिकमेव सिद्धये ॥ ८७ ॥

अथाद्भुतानि जायन्ते वर्णानां गृहमेधिनाम् ॥
नानाविधानि तेषां तु प्रशान्त्यै शान्तिरुच्यते ॥ ८८ ॥
यस्याद्भुतानि जायन्ते मृत्युं तस्य वदेद्द्विजः ॥
धन-धान्यक्षयं चापि भार्या-पुत्रक्षयं तथा ॥ ८९ ॥
भयं वा जायते शत्रो राज्ञो वा जायते भयम् ॥
शान्तिस्तत्र विधातव्या यथोक्ता मुनिपुङ्गवैः ॥ ९० ॥
यदि गोधूमशाखायां यवशाखोपजायते ॥
यवे गोधूमशाखा स्यादेवं सर्वाशनेषु च ॥ ९१ ॥
सर्षपे तिलशाखा चेत्तिलशाखासु सर्षपम् ॥
माषे मुद्गस्तु मुद्गे स्यादकृष्टिर्भवेद्यदि ॥ ९२ ॥
अम्भःप्रपूर्णकुम्भेषु ज्वलदग्निमवेक्षते ॥
उद्वर्तनं च कूपानां मत्तो वा मधुजालकम् ॥ ९३ ॥
विधिवद्वायुलिङ्गञ्च निर्वाप्य वायवं चरुम् ॥
महावाताय सततं हृदयं तु प्रशाम्यतु ॥ ९४ ॥
त्रि-पञ्च-सप्त वा हुत्वा सर्वत्र ह्यत्र तुल्यता ॥
स्त्रियो गावो महिष्यो वा सुतौ वत्सौ च षण्ढकौ
द्वौ द्वौ यत्र प्रजायेते शान्तिस्तत्र विधीयते ॥ ९५ ॥
वृषभस्तोदयं नर्देत् वडवाऽश्वं प्रेदारुहेत् ॥
अश्वतरी प्रसूते ऽग्निं प्रस्वेदः प्रतिमासु च ॥ ९६ ॥
मृदङ्ग-पटहादीनामकुतोऽपि ध्वनिर्यदि ॥
गृध्र-काक-कपोताद्या विशेयुर्यदि वा गृहे ॥ ९७ ॥

---

१. A. reads वसेयुः for विशेयुः. २. C. reads पक्षसां for वायसं. ३. C. and D. read °ववाहरेत for °श्वं प्रदारुहेत. ४. C. and D. read °ता ऽग्नि for °ते ऽग्निं.

यवपिष्टेन निर्माप्य विधिवद्वारुणं चरुम् ॥
मन्त्रैर्वरुणदैवत्यैर्जुहुयाद्वरुणाय तम् ॥ ९८ ॥

महावरुणदेवाय जलानां पतये तथा ॥
मन्त्रैर्वरुणदैवत्यैर्मन्त्रैश्च जुहुयाच्चरुम् ॥ ९९ ॥

जुहुयादाहुतीस्तिस्रो मन्त्रैश्च वरुणाय तम् ॥
मज्जस्य तुल्यतां कृत्वा स्वाहान्तैर्वरुणदैवतैः ॥ १०० ॥

इन्द्रचापेक्षणं रात्रौ शक्रप्रज्वलनं तथा ॥
गजाऽश्वशफवक्रान्तर्ज्वलनं च प्रतिक्षणम् ॥ १०१ ॥

स्थूणाप्ररोहणं यस्स्यात्काण्डस्याप्ररोहणम् ॥
विद्युन्निर्घातवज्राणां पतनं वा भवेद्यदि ॥ १०२ ॥

मृदाकुं काकसंसर्गं विपरीतप्रदर्शनम् ॥
शुभाय वारुणीयो निर्वाप्यो विधिवद्द्विजैः ॥ १०३ ॥

अग्नये त्वग्निराजाय महावैश्वानराय च ॥
हृदये मम यश्चैतत्तत्सर्वं च वदेतु वः ॥ १०४ ॥

ग्रहशान्तिश्च सर्वत्र शनेः पूजा विशेषतः ॥
दक्षिणा सवृषा गौस्तु वस्त्रयुग्मं द्विजातये ॥
प्रदद्याद्दोषशान्त्यर्थं सर्वोत्पातेषु वै द्विजः ॥ १०५ ॥

एतेषु चान्येष्वपि चाद्भुतेषु जातेषु सावित्रजपं सहस्रम् ॥
होमं विदध्यादपि विष्णुमन्त्रै ब्रह्मेशमन्त्रैरपि वा द्विजोत्तमः ॥ १०६ ॥

इति अद्भुतशान्तिः ।

अभिधास्येऽथ रुद्राणां शान्तिर्या गृहमेधिनाम् ॥
पञ्चाङ्गानां विधानं तु यत्कृतं हन्ति पातकम् ॥ १०७ ॥

ब्राह्मणो विधिवत्स्नात्वा सर्वोपद्रवनाशनम् ॥
कुर्याद्विधानं रुद्राणां यजुर्विधाननिर्मितम् ॥ १०८ ॥

इषेत्वादिषु मन्त्रेषु यं ब्रह्माद्येषु या क्रिया ॥
दशप्रणवयुक्तेषु भूर्भुवःस्वरितीति च ॥ १०९ ॥

---

१. A. reads this half line as :—
तिस्रस्तु जुहुयान्मन्त्रैरेतैर्वरुणाय तम् ।
२. A, B. E. F. and D. read °स्याम° for °स्यास°.

आर्षं छन्दश्च दैवत्यं न्यासं च विनियोगतः ॥
पराशरोदितं वक्ष्ये शेषं मुनिविभाषितम् ॥ ११० ॥
मनो ज्योतिरथोऽभ्यग्निर्मूर्धानं चैव मर्माणि ॥
मानस्तोके इतिह्येतत्प्रथमं पञ्चकं स्मरेत् ॥ १११ ॥
याते रुद्रेति चूडायां शिरोऽस्मिन्महत्यर्णवे ॥
असङ्ख्याताः सहस्राणि ललाटे विन्यसेद्द्विजः ॥ ११२॥
चक्षुषोर्विन्यसेद्दे तु त्र्यम्बकं तु यजामहे ॥
मानस्तोक इति ह्येतन्नासिकायां न्यसेद्बुधः ॥ ११३ ॥
अवतत्यधनुर्वक्त्रे नीलग्रीवाय वा गले ॥
नमस्ते आयुधेत्येतत्स्मरेन्मन्त्रं प्रकोष्ठके ॥ ११४ ॥
विन्यसेद्वास्तुमन्त्रोऽयं ये तीर्थानीति हस्तयोः ॥
नमोऽस्तु विकिरेभ्यो वै हृदये मलनाशनम् ॥ ११५ ॥
नाभ्यां विद्वान्न्यसेन्मन्त्रं नमो हिरण्यबाहवे ॥
गुह्ये मन्त्रस्तु संस्मर्य इमा रुद्राय इत्यपि ॥ ११६ ॥
मानोमहान्त इत्यूर्वोः एष ते रुद्र जानुनोः ॥
अव रुद्रमितिह्येतज्जङ्घयोर्मन्त्रमुच्चरेत् ॥ ११७ ॥
सव्यं च पादयोर्न्यस्य वामं न्यस्योरुमध्यतः ॥
अघोरं हृदि विन्यस्य मुखे तत्पुरुषं न्यसेत् ॥
ईशानं मूर्ध्नि विन्यस्य हंसं नाम सदाशिवम् ॥
हंसहंसेति यो ब्रूयात् हंसोनाम सदाशिवः ॥
एवं न्यासविधिं कृत्वा ततः सम्पुटमाचरेत् ॥
कवचं अध्यबोधाद्धि तदुपरि विस्मिमेत्यपि ॥
नेत्रं तु नीलग्रीवाय प्रमुखा धन्वनोऽस्त्रकम् ॥ ११८ ॥
य एतावन्त एतेन दिग्बन्धुर्दिक्प्रबंधनम् ॥
ॐ मोमिति नमस्कारं ततो भगवते पुनः ॥ ११९ ॥
रुद्रायेति विधानज्ञो दशाक्षरं ततो न्यसेत् ॥
प्रणवं विन्यसेन् मूर्ध्नि नकारं नासिकान्तरे ॥ १२० ॥
मोकारं तु ललाटे तु मकारं मुखमध्यतः ॥
गकारं कण्ठदेशे तु वकारं हृदये न्यसेत् ॥ १२१ ॥

१. A. D. E. F. read for स्थितमित्यपि for विस्मिमेत्यपि.

तेकारं दक्षिणे हस्ते रुकारं वामतो न्यसेत् ॥
द्राकारं नाभिदेशे तु यकारं पादयोर्न्यसेत् ॥ १२२ ॥
त्रातारमिन्द्रं त्वन्नोऽग्ने सुगःपन्थामिति चापि ॥
तत्त्वायामि वदेद्वाके निर्ऋतिरित्यपीरयेत् ॥ १२३ ॥
येयं सोमं तमीशानमस्मे रुद्रा इति स्मरेत् ॥
स्योना पृथिवीतिमन्त्र ह्येतत् द्विजः कुर्वीत सम्पुटम् ॥ १२४ ॥
सुत्रामादि दिशां पालान्प्राच्यादिषु स्मरेदथ ॥
रौद्रीकरणमेतद्धि कृत्वा पापैः प्रमुच्यते ॥ १२५ ॥
यक्ष-रक्षः-पिशाचाद्याः प्रेत-भूत-ग्रहादिकाः ॥
दुष्टदैत्य-शाकिन्यो रेवत्यो वृद्धकाश्च याः ॥ १२६ ॥
सिंह-व्याघ्रादयोऽऽरण्या ये दुष्टश्वापदा द्विजाः ॥
म्लेच्छा बन्धक-चोराद्या यमदूता वृकादयः ॥ १२७ ॥
रौद्रभूतमिमं सर्वे द्विजं पश्यन्ति वह्निवत् ॥
दैदीप्यमानमर्चिर्भिर्दुष्टदिग्बन्धकारकम् ॥ १२८ ॥
दह्यमाना दवीयांसः सप्तधामसु धामभिः ॥
प्रणश्यन्ति हि ये दुष्टा द्विजास्ते रुद्ररूपिणः ॥ १२९ ॥
पञ्चास्यं सौम्यमात्मानं सर्वाभरणभूषितम् ॥
मृगलाञ्छनमूर्धानं शुद्धस्फटिकसन्निभम् ॥ १३० ॥
फणासहस्रविस्फूर्जदुरगेन्द्रोपवीतिनम् ॥
सप्तार्चिवज्ज्वलद्भालं जटाजूटकिरीटिनम् ॥ १३१ ॥
सहस्रकरवद्भ्राजत् खट्वाङ्गाङ्गविभूषितम् ॥
ब्रह्माण्डखण्डवत्क्रूरं नृकपालकधारिणम् ॥ १३२ ॥
दैदीप्यमानं चन्द्रार्कज्वलदग्नित्रिनेत्रिणम् ॥
त्रैलोक्यप्रतिकृद्भास्वत्स्कन्धकापालमालिनम् ॥ १३३ ॥
दीप्तनक्षत्रमालावदक्षमालाधरं द्विजः ॥ २.
निःशेषवारिसम्पूर्णं कमण्डलुधरं त्वजम् ॥ १३४ ॥
जगद्बाधिर्यकृन्नादं घण्ट-डमरुधारिणम् ॥
केयूरबद्धनागेन्द्रमूर्धमणिविराजितम् ॥ १३५ ॥

---

१. These two verses are only written in A.; २. A. D. F. read वृकादयः for वृकादयः. ३. B. reads अर्ज डमरुधारिणम्, F. and D. also read the same; while C. and E. read घण्टाडमरुधारिणम्.

मेखला-किंकिणीमालायुक्तारावविराजितम् ॥
घर्घराव्यक्तनिर्गच्छद्गम्भीरारावनूपुरम् ॥ १३६ ॥
सहेमपट्टनीलाभव्याघ्रचर्मोत्तरीयकम् ॥
विद्युल्लताप्रभागङ्गा धृतमूर्द्ध सुरार्चितम् ॥ १३७ ॥
समस्तभुवनाभारधरणोक्षासनस्थितम् ॥
त्रैलोक्यवनितामौलिनतदेहार्द्धपार्वतिम् ॥ १३८ ॥
लक्षसूर्यप्रभाभास्वत्त्रैलोक्यकृतपाण्डुरम् ॥
अमृतप्लुतहृष्टाङ्गं दिव्यभोगसमाकुलम् ॥ १३९ ॥
दिग्दैवतैःसमायुक्तं सुरासुरनमस्कृतम् ॥
नित्यं शाश्वतमव्यक्तं व्यापिनं नन्दिनं ध्रुवम् ॥ १४० ॥
द्विजो ध्यात्वैवमात्मानं सम्यक् रुद्रस्वरूपिणम् ॥
सम्प्रध्वस्तान्तरायः सन् ततो यजनमारभेत् ॥ १४१ ॥
अनुलिप्ते सुलिप्ते च देशे गोचर्ममात्रके ॥
स्थण्डिलेऽम्बुजमालिख्य मन्त्रैः प्रक्षाल्य तत्पुनः ॥ १४२ ॥
तत्र पूजा प्रकर्तव्या नमश्च शम्भवाय च ॥
मानो महान्तमिति च सिद्धमन्त्रं स्मरेद्बुधः ॥ १४३ ॥
स्वललाटे पुनर्ध्यायेत्तेजोरूपं शिवं द्विजः ॥
दशाक्षरेण मन्त्रेण दद्यात्पाद्यादिकं पुनः ॥ १४४ ॥
न्यासमन्त्रैश्च सोङ्कारैर्मानस्तोक इतीत्यपि ॥
शम्भवायेति मन्त्रेण दद्याद्गंधोदकादिकम् ॥ १४५ ॥
पुष्प-धूप प्रदीपादि यथालाभं निवेद्यकम् ॥
दशाक्षरेण तेनैव नमः कुर्यात्पुनर्द्विजः ॥ १४६ ॥
शिखा तस्य तु रुद्रस्योत्तरनारायणं द्विजः ॥
शिरः पुरुषसूक्तं च शिवसङ्कल्पकं च हृत् ॥ १४७ ॥
कवचं चाप्रतिरथं नेत्रं विभ्राट् बृहत्पिबन् ॥
शतरुद्रीयमन्त्रेण देवस्यास्त्रं प्रकल्पयेत् ॥ १४८ ॥
पश्चाङ्गानि स्मरेदष्टप्रणवं च जपेद्द्विजः ॥
उद्धृत्य प्रणवेनेशं विकिरिद्रे विसर्जयेत् ॥ १४९ ॥

---

१. A. D. read °मूर्धनतदेहार्धपार्वतिम्. २. D. E. and F. read स्थिरम् for ध्रुवम्. ३. A. B. D. E. F. read °अस्त्रं च for °मंत्रेण.

रुद्ररूपो द्विजो यश्च यत्कुर्यात्तद्धि सिध्यति ॥
अक्षतान्वा तिलान्वापि यवान्वा समिधोऽपि वा ॥ १५० ॥
शम्भवायेति जुहुयात्सर्वांस्तानाज्यसिक्तकान् ॥
पञ्चपञ्चाथ षट् षट् वा अष्टावष्टौ तथापि वा ॥ १५१ ॥
दशदशैकादश वा जुहुयात्साधको द्विजः ॥
द्विजः स्वदारसंतुष्टः शुचिः स्नातो यतेन्द्रियः ॥ १५२ ॥
जप-तर्पण-होमादौ रतो यो वत्सरं जपेत् ॥
दशानामश्वमेधानां फलं प्राप्नोति वै द्विजः ॥ १५३ ॥
सौवर्णपृथिवीदानपुण्यभाक् जायते नरः ॥
महापापोपपापैश्च मुक्तो रुद्रत्वमृच्छति ॥ १५४ ॥
एकादशगुणान् रुद्रानावृत्य याति रुद्रताम् ॥
रुद्रजापी शुचिः पुण्यः पाङ्क्तेयः श्राद्धभुम्वरः ॥ १५५ ॥
पूर्वजानां शतं सैकं तारयेद्रुद्रजाप्यकृत् ॥
एकतो योगिनः सर्वे ज्ञातिभिः सह तद्गतैः ॥ १५६ ॥
एकतो रुद्रजापी तु मान्यः सर्वैस्तु दैवतैः ॥
पात्रमत्र पवित्रं तु नाधिकं रुद्रजापिनः ॥ १५७ ॥
तस्मै दत्तं च तद्भुक्तं सदाऽनन्ताय कल्प्यते ॥
वेदाङ्गवेदिनामतः शिवभक्तः सदाधिकः ॥ १५८ ॥

इति रुद्रपूजाविधिः ।

अथातः सिद्धिकामः सन्कन्द-मूल-फलाशनः ॥
गोमूत्र-यावक-क्षीर-दधि-शाकाँ-ऽऽज्यभोजनः ॥ १५९ ॥
हविष्यभोजनो वाऽसौ विप्रो योल्पभोजनः ॥[1]
जप-होमादि कुर्वाणो यथोक्तफलभाग्भवेत् ॥ १६० ॥
शिरसा सह रुद्राणां जपैर्दशशतैर्ध्रुवम् ॥[2]
सर्वे मन्त्रा भवन्त्यस्य ब्राह्मणस्योक्तकारिणः ॥ १६१ ॥
सिद्धा मन्त्रा द्विजेन्द्रस्य चिन्तितार्थफलप्रदाः ॥
रुद्रस्यैवास्य सर्वे ते भवन्तीश्वरनोदिताः ॥ १६२ ॥

---

१. A. B. D. E. F. read उदरभोजनः for योल्पभोजनः २. C. reads शिरः साहस्र° for शिरसा सह.

एकादश शुभान्कुम्भान् आहृत्य विधिसम्मितान् ॥
सहिरण्यान्सवस्त्रांश्च फल-पुष्पोपशोभितान् ॥ १६३ ॥
गन्धोदका-ऽक्षतैर्युक्तान् पूजयेद्रुद्रभक्तिकृत् ॥
अथैकादशरुद्रैश्च एकैकमभिमंत्रयेत् ॥
एवं संपूज्य तान्कुम्भान् नमस्कृत्याभिमन्त्र्य च ॥
पूजयेद्भक्तितो रुद्रानेकादश महागुणान् ॥ १६४ ॥
एकादशाहमात्मानमन्यं वा हित काम्यया ॥
विनायकोपसृष्टं च स्नायात्काकपदाहतम् ॥ १६५ ॥
•धृतवत्सां काकवन्ध्यां स्नापयेच्च तथाऽऽतुराम् ॥
जपेदेतत्सकृद्विप्रः सर्वदोषैर्विमुच्यते ॥ १६६ ॥
अनड्वाहं च वस्त्रं च दद्याद्धेनुं च दक्षिणाम् ॥
भोजयेद्विदुषो विप्रान्समाप्तौ कर्मणो द्विजः ॥ १६७ ॥
भक्त्यैकादशवस्त्राद्यैर्यथाशक्त्या समर्चयेत् ॥
अथ वा चरुभिक्षाशी शिरोरुद्रसहस्रकम् ॥ १६८ ॥
जपेद्गोष्ठे तथारण्ये सिद्धक्षेत्रे शिवालये ॥
अग्न्यागारे समुद्रे च नदी-निर्झर-पर्वते ॥ १६९ ॥
जपेदन्यत्र वा विद्वान् शुचौ देशे मनोरमे ॥
धीरो दृढव्रतो मौनी त्यक्तक्रोधो यतेन्द्रियः ॥ १७० ॥
धौतवासास्त्वधःशायी रुद्रलोके महीयते ॥
नमो गणेभ्य इत्यस्य मन्त्रस्य ब्राह्मणोऽयुतम् ॥ १७१ ॥
जप्त्वा च श्रीफलैर्हुत्वा सर्वकार्येषु सिद्धिभाक् ॥
नमोऽस्तु नीलग्रीवायेत्येतन्मंत्रेण सप्तधा ॥
आवर्त्योदकमामन्त्र्य विषार्तश्रवणे क्षिपेत् ॥
विषेण मुच्यते सद्यः कालदष्टोऽपि जीवति ॥ १७२ ॥
विषस्याभिभवो न स्यान्नरस्य तस्य कर्हिचित् ॥
ग्रहग्रस्तं ज्वरग्रस्तं रक्षः-शाकिनिदूषितम् ॥ १७३ ॥
ब्रह्मराक्षसग्रस्तं च अन्यदोषोपगूहितम् ॥
प्रमुञ्च धन्वन इति भस्मना सर्षपैस्तथा ॥ १७४ ॥
ताडयेन्मुञ्च मुञ्चेति शीघ्रमेव विमुञ्चति ॥
नमः शम्भव इत्यस्य मन्त्रस्य चायुतं द्विजः ॥ १७५ ॥

---

१. A. reads एकादशार° for एकादशाह°.

जप्त्वा खादिरसमिधो हुत्वा विप्रः सहस्रकम् ॥
तीक्ष्णतैलप्लुतं सम्यङ्मन्त्रान्ते चामुकं हन ॥ १७६ ॥
फट्फट्कारेण जुहुयात्क्षयो रोगश्चिराद्भवेत् ॥
जलमध्ये शतावर्तात् ज्यो वृष्टिर्निगद्यते ॥ १७७ ॥
नाभिमात्रे जले विप्रः प्रविश्य जुहुयाज्जलम् ॥
कुर्यादेकार्णवां धात्रीं मन्त्रमाहात्म्यतो भृशम् ॥ १७८ ॥
नमःस्वभ्य इत्यमुना मन्त्रेण तु सहस्रकम् ॥
लवणं मध्वाहुतीनां तु राजा शीघ्रं वशी भवेत् ॥ १७९ ॥
द्विगुणां पलाशसमिधं महावाणी प्रजायते ॥
त्रिगुणां नवपद्मानां पाताले सिध्यति ध्रुवम् ॥ १८० ॥
चतुर्गुणेन मन्त्रेण वरदा श्रीः प्रवर्तते ॥
समुद्रगानदीकूले पुलिने वा पवित्रके ॥ १८१ ॥
खड्गोपरि श्रीफलानां हुत्वा त्रिंशत् शतानि च ॥
खड्गविद्याधरो विप्रः शिवाज्ञातः प्रजायते ॥ १८२ ॥
अणिमाद्यष्टगुणं हुत्वा जपेन्मन्त्रसहस्रकम् ॥
अणिमादिकसिद्धीनां पतिरेव भवेद्द्विजः ॥ १८३ ॥
छन्दो-दैवतमार्षेयमथातः शतरुद्रिये ॥
ज्ञातेन कर्मसम्यक्त्वं द्विजानां येन जायते ॥ १८४ ॥
आद्यानुवाके रुद्राणामाद्यायां च ऋचि द्विजः ॥
छन्दो गायत्रमन्यासु अनुष्टुप् तिसृषु स्मृतम् ॥ १८५ ॥
पङ्क्तिस्तिसृषु विज्ञेया अनुष्टुभ् सप्तसु स्मृतम् ॥
द्वयोश्च जगती विप्रा उक्तमाद्यानुवाकयोः ॥ १८६ ॥
अद्यानुवाके प्रथमा बृहती जगती तथा ॥
अनुष्टुप् च तृतीयायां द्वयोस्त्रिष्टुप् स्मृता द्विज ॥ १८७ ॥
अपरासु तथानुष्टुप् अनुवाकद्वयं स्मृतम् ॥
रुद्रः सर्वासु दैवत्यं विनियोगो यथोचितः ॥ १८८ ॥
यज्जाग्रतादिषट्के च शिवसंकल्पमात्रकम् ॥
रुद्रस्तु देवता षट्सु विनियोगो जपादिषु ॥ १८९ ॥

१. C. reads भंजनं वरम् for चामुकं हन; while B. reads जहि for हन- २. A. B. D. E. and F. read त्रिगुणेन च for त्रिगुणां नव°. ३. A. B. E. F. read ज्ञानेन for ज्ञातेन. ४. A. reads °मार्षकम् for °मात्रकम्. F. and D. also the same.

सहस्रशीर्षा इत्यादि द्विगुणाष्टसु देवता ॥
पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः ॥ १९० ॥
छन्दः सर्वासु चाऽनुष्टुप् विनियोगो जपादिषु ॥
अद्भ्यः सम्भूत इत्यादौ उत्तरनारायणस्त्वृषिः ॥ १९१ ॥
आशुः शिशान इत्यादिरप्रतिरथ उच्यते ॥
पूर्वानुवाक्ये दैवत्यं त्रिष्टुभ् छंदं प्रकीर्तितम् ॥ १९२ ॥
एतन्नाम्ना मुनिस्तत्र देवता अमरेश्वरः ॥
आशुः शिशान इत्यादिरप्रतिरथ उच्यते ॥
त्रिष्टुभ् छन्दो जपादौ च विनियोगो यथोचितम् ॥ १९३ ॥
त्र्यम्बकमिति चैवात्र वसिष्ठस्यार्षमुच्यते ॥
दैवत्योमापतिर्ह्यत्र छन्दस्त्रिष्टुभ् प्रकीर्तितः ॥ १९४ ॥
विभ्राट् बृहच्च इत्यादौ सूर्यो दैवतमुच्यते ॥
एतत्सञ्चिन्त्य सकलं द्विजाग्र्यो रुद्रजाप्यकृत् ॥ १९५ ॥
यद्यदारभते तत्तद्यथोक्तफलदं भवेत् ॥
वेदाध्यायस्य दातॄणां श्रद्धया द्रविणस्य च ॥ १९६ ॥
प्रजानामायुषः कीर्तेर्भूयस्त्वं रुद्रजापिनः ॥
इमं मन्त्रं पवित्रं च रहस्यं पापनाशनम् ॥ १९७ ॥
रुद्रविधिं विधिश्रेष्ठं कुर्याद्विप्रः शिवेरितः ॥
शैवागमविशेषज्ञो वेद-वेदाङ्ग-पारगः ॥ १९८ ॥

कुर्याद्यदेवं विधिवद्विधानं शम्भोरजस्रं प्रथितं द्विजेन्द्राः ॥
प्राप्नोति लोकं स शिवस्य साक्षादत्रापि स स्याच्छिववत्सुपूज्यः ॥ १९९ ॥
मन्त्राणि सर्वाणि च सद्द्विजस्य निर्देशकर्तॄणि भवन्ति तस्य ॥
यः साधयेत्प्रोक्तविधानविज्ञो मन्त्राभिपूज्यः स तु शम्भुवत्स्यात् ॥ २०० ॥
मन्त्रं त्रिनेत्रं जुहुयात् हुताशे यो बिल्वपत्रैर्घृत-दुग्धमिश्रैः ॥
निहत्य मृत्युं श्रियमेति धाम्यां प्राप्नोति पश्चाच्छिवलोकमेव ॥ २०१ ॥

पञ्चभागश्च षड्जातः पञ्चेन्द्रं पञ्चवारुणम् ॥
षड्जातिं च जपित्वा तु सर्वपापैः प्रमुच्यते ॥ २०२ ॥

इति रुद्रशांतिः ।

अथातः सम्प्रवक्षामि तडागादिविधिं शुभम् ॥
कृतेन येन तेषां तु प्रतिष्ठा सम्प्रजायते ॥ २०३ ॥

अस्मद्ग्रामस्य तातेन पृच्छते रघुपुङ्गवे ॥
तडागाद्युत्सवे प्रोक्तो विधिः सोऽयं प्रकीर्तितः ॥ २०४ ॥
दीर्घिकासु तडागेषु सन्निहत्यासु यो विधिः ॥
तं वसिष्ठोऽवदत्सम्यक् दशरथस्य पृच्छतः ॥ २०५ ॥
तस्माच्च श्रुतवान् शक्तिः शुश्रावातः पराशरः ॥
तत्प्रसादेन तत्प्रोक्तो यो विधिः सम्प्रवक्ष्यते ॥ २०६ ॥
तडागादिनिपानानां यावन्नोत्सर्जनं कृतम् ॥
तावत्तत्परकीयं तु स्नानादीनामनर्हकम् ॥ २०७ ॥
अप्रतिष्ठितदेवानां न कार्यं पूजनं नरैः ॥
अप्रतिष्ठितखातानामपेयं तोयमुच्यते ॥ २०८ ॥
तदुत्सर्गः प्रकर्तव्यो निजवित्तानुसारतः ॥
वित्तशाठ्यं प्रहेयं स्यादित्युवाच पराशरः ॥ २०९ ॥
तद्विधिज्ञः शुचिः शान्तो ब्राह्मणो धर्मवृद्धये ॥
तदर्थं वरणीयोऽसौ चतुर्भिर्ब्राह्मणैः सह ॥ २१० ॥
आचार्यस्तत्रकर्तव्यः पूर्तधर्मविवृद्धये ॥
विपरीतमतिर्यःस्यात्तत्कृतं कर्मनिष्फलम् ॥ २११ ॥
तडागपालिपृष्ठे तु मण्डपं तत्र कारयेत् ॥
पूर्वोत्तरप्लवे देशे शुचिः स्वस्थः समाहितः ॥ २१२ ॥
चतुरस्रं चतुर्द्वारं दशहस्तप्रमाणकम् ॥
स्वामिहस्तप्रमाणेन तोरणानि च कारयेत् ॥ २१३ ॥
पताका विविधाः कार्या नानावर्णाः समन्ततः ॥
शुभपल्लवसंयुक्ता द्वारेषु कलशाः स्मृताः ॥ २१४ ॥
यथावर्णं यथाकाष्ठं यथाकार्यं प्रमाणतः ॥
तथा यूपान्प्रवक्ष्यामि वर्णानां हितकाम्यया ॥ २१५ ॥
पालाशो ब्राह्मणः प्रोक्तो न्यग्रोधो भूभुजः स्मृतः ॥
बैल्वो वैश्यस्य यूपःस्याच्छूद्रस्यौदुम्बरः स्मृतः ॥ २१६ ॥
शिरःप्रमाणो विप्रस्य आकण्ठं क्षत्रियस्य च ॥
उरःप्रमाणो वैश्यस्य शूद्रस्य नाभिमात्रकः ॥ २१७ ॥
वेदिका पादमूले तु यूपस्तत्र निखन्यते ॥
यूपस्य दक्षिणे भागे तोरणं तत्र कारयेत् ॥ २१८ ॥

ब्रह्मस्थानं च तन्मध्ये अष्टौ भागाः प्रकीर्तिताः ॥
तेषामुत्तरतः सोमं कुबेरं कुविदङ्गतम् ॥ २१९ ॥
धनदं धन्वनागेति ईशावास्येति शङ्करम् ॥
आकृष्णेनेत्यादिमन्त्रैश्च स्वैः स्वैः कल्प्यास्तथा ग्रहाः ॥ २२० ॥
त्रातारमिन्द्रमितीन्द्रं अग्निं दूतं च पावकम् ॥
अग्निःपृथुरित्यादि धर्मराजं द्विजोत्तमः ॥ २२१ ॥
तद्विष्णोरिति वै विष्णुं नमः सूतेति नैर्ऋतिम् ॥
सप्तर्षयस्तु इत्यादि मन्त्रैःसप्तर्षींस्तथा ॥ २२२ ॥
वरुणस्योत्तंभनमसि वरुणं च प्रपूजयेत् ॥
एवं द्वाविंशतिस्थानानि मन्त्रोक्तानि पृथक् पृथक् ॥ २२३ ॥
इमं मे, तत्त्वाः, सत्वन्नस्तत्वायामि ह्युदुत्तमम् ॥
समुद्रोऽसि समुद्रेति त्रीन् समुद्रान् निमीनापि ॥ २२४ ॥
दशभिर्वारुणैर्मन्त्रैराहुतीनां शतत्रयम् ॥
शतमर्धं शतं वापि विंशत्यष्टोत्तरं शतम् ॥ २२५ ॥
गोसहस्रं शतं वापि शतार्धं वा प्रदीयते ॥
अलाभे चैव गां दद्यादेकामपि पयस्विनीम् ॥ २२६ ॥
अरोगां वत्ससंयुक्तां सुरूपां भूषणान्विताम् ॥
सौवर्णा राजतास्ताम्राः कांस्याः सीसाश्च शक्तितः ॥ २२७ ॥
मत्स्या नक्रादयः कार्या विविधावर्तवृत्तयः[१] ॥
गो-वत्सौ वस्त्रबद्धौ च आग्नेय्यां दिशि संस्थितौ ॥ २२८ ॥
वायव्याभिमुखौ तत्र कारयेद्वारिमध्यतः ॥
वस्त्रयुग्मानि विप्रेभ्यो मुद्रिका-छत्रिकादयः ॥ २२९ ॥
भक्त्या चैताः प्रदातव्याः प्रसाद्य यत्नतो द्विजाः ॥
विप्रान् सन्तोष्य देयानि दानानि विविधान्यपि ॥ २३० ॥
हेमपुरुषसंयुक्तां शय्यां दद्याच्च शक्तितः ॥
आसनानि प्रशस्तानि भाजनानि निवेदयेत् ॥ २३१ ॥
एतत्प्रदक्षिणीकृत्य स्वात्मना च विपश्चितः ॥
प्रसादयेत् द्विजान् सर्वान्वांछन्पूर्तफलं नरः ॥ २३२ ॥
कृताञ्जलिपुटो भूत्वा विप्राणामग्रतः स्थितः ॥
ब्रूयादेवं, भवन्तोऽत्र सर्वे विप्रवपुर्धराः ॥ २३३ ॥

---

१. A. reads °धाः पूर्ववृद्धये for °धावर्तवृत्तयः.

ते यूयं तारयध्वं मां संसारार्णवतो द्विजाः ॥
आगता मम पुण्येन पूर्तकर्मप्रसाधकाः ॥ २३४ ॥
कूर्मश्च मकरश्चैव सौवर्णस्तत्र कारयेत् ॥
मीनाश्च रासभाश्चैव ताम्रा दर्दुरकाः स्मृताः ॥ २३५ ॥
जलकुञ्जर-गोधाश्च सैसास्तत्र प्रकल्पयेत् ॥
अन्येऽपि जलजास्तत्र शक्तितस्तान्प्रकल्पयेत् ॥ २३६ ॥
इमं पुण्यं प्रशस्तं च तडागादिविधिं नरः ॥
वापी-कूप-तडागादौ कारयेत् ब्राम्हणैर्बुधैः ॥ २३७ ॥
खातयित्वा तडागादि स्वभावाच्छाठ्यवर्जितः ॥
मानवः क्रीडति स्वर्गे यावदिन्द्राश्चतुर्दश ॥ २३८ ॥
एतद्विधानं विदधाति भक्त्या खातेषु सर्वेषु तडागकेषु ॥
सोऽमुत्र कामैः परिपूर्णदेहो भुङ्क्ते धरित्र्यामिह सर्वभोगान् ॥ २३९ ॥
वदन्ति केचिद्वरुणस्य लोके प्रयाति भोगान्वरुणस्य भुङ्क्ते ॥
भुक्त्वा चिरं तत्र पुनर्धरित्र्यां नरेन्द्रतामेति पराशरोक्तिः ॥२४०॥

इति तडागादिप्रतिष्ठा।

अथातः सम्प्रवक्ष्यामि द्विजेन्द्राः श्रूयतामितः ॥
लक्षहोमविधिं पुण्यं कोटिहोमविधिं ततः ॥ २४१ ॥
स्वयंभूर्यमुवाच प्राक् अस्मत्तातं पितामहः ॥
तमिमं सम्प्रवक्ष्यामि श्रूयतां पापनाशनम् ॥ २४२ ॥
ये चेह ब्राह्मणाः कार्या भूमिर्वा यत्र मण्डपम् ॥
समिधो याश्च ये मन्त्रा अन्यच्च तत्र यद्भवेत् ॥ २४३ ॥
लक्षहोममिमं विप्राः कथ्यमानं निबोधत ॥
युग्माश्च ऋत्विजः कार्या ब्राम्हणा ये विपश्चितः॥ २४४ ॥
नियमव्रतसंपन्ना सहिताः पार्थिवेन तु ॥
नित्यं जपरता ये च नियोज्यास्तादृशा द्विजाः ॥ २४५ ॥
कन्द-मूल-फलाहारा दधि-क्षीराशिनोऽपि च ॥
प्रागुदीच्यां समे देशे स्थण्डिलं यत्र कारयेत् ॥ २४६ ॥
तत्र वेदीं प्रकुर्वीत पञ्चहस्तप्रमाणिकाम्[1] ॥
दक्षिणोत्तर आयामे त्रिशत्तु पूर्वपश्चिमे ॥ २४७ ॥

१. A. reads °समन्विताम् for °प्रमाणिकाम्.

कुण्डानि खनितव्यानि अङ्गुलान्येकविंशतिः ॥
निधापयेद्धिरण्यं च रत्नानि विविधानि च ॥ २४८ ॥
सिकतोपरि दातव्या तत्राप्यग्निं समिन्धयेत् ॥
ग्रहांश्चैव सनक्षत्रान् दिशि प्राच्यां समर्चयेत् ॥ २४९ ॥
अवदानविधानेन स्थालीपाकं समर्पयेत् ॥
आज्यभागाहुतीर्हुत्वा नवाहुत्या च होमयेत् ॥ २५० ॥
अग्निं सोमं तथा सूर्यं विष्णुं चैव प्रजापतिम् ॥
विश्वेदेवान् महेन्द्रं च मित्रं स्विष्टकृतं तथा ॥ २५१ ॥
दधि-मधु-घृताक्तानां समिधां चैव याज्ञिकाः ॥
होमयेच्च सहस्रं तु मंत्रैश्चैव यथाक्रमम् ॥ २५२ ॥
चतुर्विंशति गायत्र्या मानस्तोकेति षट् तथा ॥
त्रिंशत् ग्रहादिमन्त्रैश्च चत्वारश्चैव वैष्णवैः ॥ २५३ ॥
कूष्माण्डैर्जुहुयात्पञ्च विकिरेद्वाथ षोडश ॥
जुहुयाद्दशसहस्राणि जातवेदस इत्यृचा ॥ २५४ ॥
तथा पञ्चसहस्राणि जुहुयादिन्द्रदैवतैः ॥
हुते शतसहस्रे तु अभिषेकं विधापयेत् ॥ २५५ ॥
पुण्याभिषेके यत्प्रोक्तं तत्प्रदाय शुभं भवेत् ॥
अथ षोडशभिः कुम्भैः सहिरण्यैः समङ्गलैः ॥ २५६ ॥
सर्वौषधिसमायुक्तैर्नानारत्नविभूषितैः ॥
अभिषेकं ततः कुर्यात्स्नानमन्त्रैर्यथोचितैः ॥ २५७ ॥
समाप्ते तु ततस्तस्मिन् प्रधाना दक्षिणाः स्मृताः ॥
गजा-ऽश्वरथ-यानानि-भूमि-वस्त्रयुगानि च ॥ २५८ ॥
अन्नं च गोशतं हेम ऋत्विजां चैव दक्षिणा ॥
नृपेणैकादशेनाथ दातव्या दश धेनवः ॥ २५९ ॥
स्वशक्त्यातः प्रदातव्यं वित्तशाठ्यं न कारयेत् ॥
एवं कृते तु यत्किञ्चित् ग्रहपीडासमुद्भवम् ॥ २६० ॥
भौममाकाशगं वापि अरिष्टं यच्च जायते ॥
तत्सर्वं लक्षहोमेन प्रशमं याति निश्चितम् ॥ २६१ ॥

---

१. A. B. D. E. and F. read किरिकया तु for विकिरेद्वाथ. २. D. and F. read पुष्पाभिषेके for पुण्याभिषेके; while C. reads इष्वाभिषेके.

शान्तिर्भवति पुष्टिश्च बलं तेजः प्रवर्द्धते ॥
वृष्टिर्भवति राष्ट्रे च सर्वोपद्रवसंक्षयः ॥ २६२ ॥

इति लक्षहोमविधिः।

अथातः सम्प्रवक्ष्यामि कोटिहोमविधिं द्विजाः ॥
श्रूयतामादरेणैष सर्वकामफलप्रदः ॥ २६३ ॥
सानुष्ठाना द्विजाः प्रोक्ता ऋत्विजो यागकर्मणि ॥
विधिज्ञाश्चैव मन्त्रज्ञाः स्वदारनिरताश्च ये ॥ २६४ ॥
वरणीया विशेषेण ग्रहयागक्रियाविदः ॥
एकाङ्गविकलो विप्रो धन-धान्यापहारकः ॥ २६५ ॥
सर्वाङ्गविकलो यस्तु यजमानं हिनस्ति सः ॥
तस्मात्सर्वप्रयत्नेन वेदाङ्गविधिकोविदाः ॥ २६६ ॥
प्रकर्तव्या विशेषेण ग्रहयज्ञविदो द्विजाः ॥
कार्यश्चैव प्रयत्नेन ग्रहयज्ञश्च वै द्विजैः ॥ २६७ ॥
अध्येता चैव मन्त्राणां ऋचामष्टोत्तरं शतम् ॥
स एव ऋत्विग् विज्ञेयः सर्वकामफलप्रदः ॥ २६८ ॥
आवाहनीयो यत्नेन प्रणिपत्य मुहुर्मुहुः ॥
ग्रहाः फलन्तु नागाश्च[1] सुराश्चैव नरेश्वराः ॥ २६९ ॥
एवं कृते तु यत्किञ्चित् ग्रहपीडासमुद्भवम ॥
तत्सर्वं नाशयेद्दुःखं कृतघ्नसौहृदं यथा ॥ २७० ॥
अस्माच्छतगुणः प्रोक्तः कोटिहोमः स्वयम्भुवा ॥
आहुतीभिः प्रयत्नेन दक्षिणाभिः फलेन च ॥ २७१ ॥
पूर्ववद् ग्रहदेवानां आवाहन-विसर्जने ॥
होममन्त्रास्त एवोक्ताः स्नानं दानं तथैव च ॥ २७२ ॥
मण्डपस्य च वेद्याश्च विशेषं च निबोधत ॥
कोटिहोमे चतुर्हस्तं चतुर्हस्तायतं पुनः ॥ २७३ ॥
योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलम् ॥
द्व्यङ्गुलेनोच्छ्रिता कार्या प्रथमा मेखला बुधैः ॥ २७४ ॥

---

१. E. reads गावश्च for नागाश्च; while B. D. E. and F. ग्रहा रघुः फलं नागाः for ग्रहाः फलंतु नागाश्च.

म्यङ्गुलैरुच्छ्रता तद्वद्द्वितीया मेखला स्मृता ॥
उच्छ्राये मेखला या तु तृतीया चतुरङ्गुला ॥ २७५ ॥
द्व्यंगुलस्तत्र विस्तारः पूर्वयोरेव शस्यते ॥
वितस्तिमात्रा योनिः स्यात्षट्-सप्ताङ्गुलविस्तृता ॥ २७६ ॥
कूर्मपृष्ठोन्नता मध्ये पार्श्वतश्चांगुलोच्छ्रिता ॥
गजोष्ठसदृशा तद्वदायामच्छिद्रसंयुता ॥ २७७ ॥
एतत्सर्वेषु कुण्डेषु योनिलक्षणमीरितम् ॥
मेखलोपरि सर्वत्र अश्वत्थपत्रसन्निभा ॥ २७८ ॥
वेदी च कोटिहोमे स्यात् वितस्तीनां चतुष्टयम् ॥
चतुरस्रा समा तद्वत्त्रिभिर्वप्रैः समावृता ॥ २७९ ॥
विप्रप्रमाणं पूर्वोक्तं वेदिकायास्तथोच्छ्रयः ॥
ततः षोडशहस्तः स्यान्मण्डपश्च चतुर्मुखः ॥ २८० ॥
पूर्वद्वारेऽपि संस्थाप्य बह्वृचं वेदपारगम् ॥
यजुर्वेदं तथा याम्ये पश्चिमे सामवेदिनम् ॥ २८१ ॥
अथर्ववेदिनं तद्वदुत्तरे स्थापयेद्बुधः ॥
अष्टौ तु होमकाः कार्या वेद-वेदाङ्गवेदिनः ॥ २८२ ॥
एवं द्वादश विप्राणां वस्त्रमाल्यानुलेपनैः ॥
पूर्ववत्पूजनं कृत्वा सर्वाभरणभूषणैः ॥ २८३ ॥
रात्रिसूक्तं च सौरं च पावमानं तु मङ्गलम् ॥
पूर्वतो बह्वृचः शान्तिं पावमानमुदङ्मुखम् ॥ २८४ ॥
सूक्तं रौद्रं च सौम्यश्च कूष्माण्डं शान्तिमेव च ॥
पाठयेद्दक्षिणे द्वारे यजुर्वेदिनमुत्तमम् ॥ २८५ ॥
सौपर्णमथ वैराजमाग्नेयीं रुद्रसंहिताम् ॥
पञ्चभिः सप्तभिर्वाथ होमःकार्यश्च पुर्ववत् ॥ २८६ ॥
स्नाने दाने च ये मन्त्रास्त एव द्विजसत्तमाः ॥
ज्येष्ठसाम तथा शान्तिं छन्दोगः पश्चिमे जपेत् ॥ २८७ ॥
स्वविधानं तथा शान्तिमथर्वोत्तरतो जपेत् ॥

---

१. E. F. read आयत° for आयाम°. २. A. E. read शौक्तं for सूक्तं.
३. A. B. E. F. read वैराजः instead of वैराजम्.

वसोर्धाराविधानं तु लक्षहोमवदिष्यते ॥
अनेन विधिना यश्च ग्रहपूजां समाचरेत् ॥ २८८ ॥
सर्वान् कामानवाप्नोति ततो विष्णुपुरं व्रजेत् ॥
यः पठेत् शृणुयाद्वापि ग्रहयागमिमं नरः ॥ २८९ ॥
सर्वपापविनिर्मुक्तः स गच्छेद्वैष्णवं पदम् ॥
अश्वमेधसहस्रं च दश चाष्टौ च धर्मवित् ॥ २९० ॥
कृत्वा यत्फलमाप्नोति कोटिहोमात्तदश्नुते ॥
ब्रह्महत्यासहस्राणि भ्रूणहत्यार्बुदानि च ॥
नश्यन्ति कोटिहोमेन स्वयम्भुवचनं यथा ॥ २९१ ॥

प्रपेदिरे येऽस्य पितामहाद्याः श्वभ्राणि पापेन गरीयसा तान् ॥
उद्धृत्य नाकं स नयेद्धि सर्वान् यः कोटिहोमं नृपतिः करोति ॥ २९२ ॥
राष्ट्रं मनोवाञ्छितवृष्टियुक्तं धान्यैश्च रत्नैः पशुभिः समेतम् ॥
निर्द्वन्द्वनीरोगमदस्यु तस्य यो लक्षकोटीहवनं विदध्यात् ॥ २९३ ॥
यो लक्षकोटिं विदधाति भूभृत् तद्वत्परो लक्षशतं जुहोति ॥
प्रत्यब्दमाप्नोति स दीर्घमायुर्भुङ्क्ते सपत्नान्विजयी धरित्रीम् ॥ २९४ ॥
यो ब्रह्मघाती गुरुदारगामी ग्रामादिदाहात्[1] ध्रुवपापयुक्तः ॥
पापैरशेषैः पुरुषो विमुक्तः[2] स कोटिहोमाद्विबुधत्वमेति[3] ॥ २९५ ॥
तस्मात्सदा भूपतयो विदध्युर्वृष्ट्यै प्रजासौख्यबलस्य पुष्ट्यै ॥
आयुः प्रवृद्ध्यै विजयाय कीर्त्यै लक्षादिहोमं ग्रहयागमेतम् ॥ २९६ ॥

इति कोटिहोमविधिः।

अथान्यत्सम्प्रवक्ष्यामि विधिं पावनमुत्तमम् ॥
अस्मत्तातप्रतीतोऽयं[4] रघुपौत्रस्य धीमतः ॥ २९७ ॥
अनपत्यस्य पुत्रार्थमकरोद्वैभाण्डकः स्वयम् ॥
सहस्रशीर्षसूक्तस्य विधानं चरुपाककृत् ॥ २९८ ॥
यैर्यैर्नृपैः कृतं पूर्वमन्यैरपि द्विजोत्तमैः ॥
उपासितानि सद्भक्त्या श्रोत्रियैः श्रुतिपारगैः ॥ २९९ ॥

---

१. A. E. and F. read °दाहोध्रव° for °दाहात् ध्रुव.° २. A. B. C. D. read राजा स मुक्तः शतलक्षहोमात् for पापैरशेषैः पुरुषो विमुक्तः. ३. Only D. reads भ्रवमेति नाकम् for विबुधत्वमेति. ४. A. and C. read °प्रभावोऽयं for °प्रतीतोऽयं; while D. reads °प्रतोषाय for °प्रतीतोऽयं.

आत्मविद्भिर्निराहारैः श्रौतिभिर्मन्त्रवित्तमैः ॥
सिध्यन्ति सर्वमन्त्राणि विधिविद्भिर्द्विजोत्तमैः ॥ ३०० ॥
क्रियमाणाः क्रियाः सर्वाः सिध्यन्ति व्रतचारिभिः[1] ॥
न पाठाच्च धनात् ज्ञानादात्मनः प्रतिपादनात्[2] ॥ ३०१ ॥
प्राक्कनात्कर्मणः पुंसां सर्वाः सिध्यन्ति सिद्धयः ॥
शुक्लपक्षे शुभे वारे शुभनक्षत्रगोचरे ॥ ३०२ ॥
द्वादश्यां पुत्रकामो यश्चरुं[3] कुर्वीत वैष्णवम् ॥
दम्पत्योरुपवासः स्यादेकादश्यां सुरालये ॥ ३०३ ॥
ऋग्भिः षोडषभिः सम्यगर्चयित्वा जनार्दनम् ॥
चरुं पुरुषसूक्तेन श्रपयेत्पुत्रकाम्यया ॥ ३०४ ॥
प्राप्नुयाद् वैष्णवं पुत्रं चिरायुं सन्ततिक्षमम् ॥ ३०५ ॥
द्वादश्यां द्वादश चरून् विधिवन्निर्वपेद्द्विजः ॥
यः करोति महायागं विष्णुलोकं स गच्छति[4] ॥ ३०६ ॥
हुत्वाऽऽज्यं विधिवत्पूर्वं ऋग्भिः षोडशभिस्तथा ॥
समिधोऽश्वत्थवृक्षस्य हुत्वाज्यं जुहुयात्पुनः ॥ ३०७ ॥
उपस्थानं ततः कुर्याद्ध्यात्वा तु मधुसूदनम् ॥
हविर्होमं ततः कृत्वा दद्यात्पञ्च घृताहुतीः ॥ ३०८ ॥
कामप्रदं नमस्कृत्य नारी नारायणं पतिम् ॥
सम्प्राश्य च हविःशेषं[5] वसेल्लब्धाशनी गृहे ॥ ३०९ ॥
ततः कृत्वा इदं कर्म कर्तव्यं द्विजतर्पणम् ॥
रजःस्त्रीषु[6] निवर्तेत यावद्गर्भं न विन्दति ॥ ३१० ॥
असूता मृतपुत्रा वा या च कन्याः प्रसूयते[7] ॥
क्षिप्रं सा जनयेत्पुत्रं पराशरवचो यथा ॥ ३११ ॥
होमान्ते दक्षिणां दद्यात् गृहं वासस्तथा तिलान् ॥
भूमिं हिरण्यं रत्नानि यथा सम्भवमेव वा ॥ ३१२ ॥
यः सिद्धमन्त्रः सततं द्विजेन्द्रः सम्पूज्य विष्णुं विधिवत्सुतार्थी ॥
इमं विधानं विदधाति सम्यक् स पुत्रमाप्नोति हरेः प्रसादात् ॥३१३॥

इति पुत्रार्थं पुरुषसूक्तविधानम्।

---

१. F. reads ब्रह्मचारिभिः, D. also the same. २. A. C. read प्रोक्तस्य for प्राक्तनात्. ३. A. C. F. read पुत्रकामाय for पुत्रकामो यः. ४. A. reads इहायाति स विष्णोः परमं पदम् for महायागं विष्णुलोकं स गच्छति. ५. A. B. and C. read हविःशेषं. ६. A. B. D. E. F. read अन्यस्त्रीषु. ७. B. reads प्रसूर्भवेत् for प्रसूयते.

अथातः सम्प्रवक्ष्यामि ग्रहमन्त्राधिदैवतम् ॥
आर्षं छन्दश्च यज्ज्ञानात्कर्म स्यात्सफलं कृतम् ॥ ३१४ ॥
आकृष्णेनेति मन्त्रेऽस्मिन्दैवत्वे सविता महत् ॥
ऋषिर्हिरण्यस्तूपाख्यस्त्रिष्टुप् च्छन्दः प्रकीर्तितम् ॥ ३१५ ॥
आप्यायस्वेति सोमाऽत्र दैवतं गौतमो मुनिः ॥
गायत्री छन्द उद्दिष्टं विनियोगो यथेप्सितम् ॥ ३१६ ॥
अग्निर्मूर्धेति मन्त्रोऽत्र दैवतं भौम उच्यते ॥
विरूपाक्षो मुनिर्धीमान् छन्दो गायत्रमिष्यते ॥ ३१७ ॥
उद्बुध्यस्वेति मन्त्रस्य बुधश्चैव तु दैवतम् ॥
मुनिर्बुधश्च मन्तव्यस्त्रिष्टुप् छन्दः प्रकीर्तितम् ॥ ३१८ ॥
बृहस्पते अतीत्यत्र देवतापि बृहस्पतिः ॥
आर्षं गृत्समदोऽस्येति छन्दस्त्रिष्टुप् प्रकीर्तितम् ॥ ३१९ ॥
शुक्रःशुशुक्केति ह्यत्र शुक्र इत्यधिदैवतम् ॥
शुक्रस्यापि तथार्षं च विराट् छन्दः प्रकीर्तितम् ॥ ३२० ॥
शन्नो देवीति चेत्यत्र शनिर्दैवतमुच्यते ॥
सिन्धुर्नाम ऋषिर्विद्वान् छन्दो गायत्रमुच्यते ॥ ३२१ ॥
काण्डात् काण्डादिति राहुर्दैवतं हि तदुच्यते ॥
ऋषिः प्रजापतिः प्रोक्तोऽनुष्टुप् छन्दः प्रकीर्तितः ॥ ३२२ ॥
केतुं कृण्वन्निति प्रोक्तं दैवतं केतुरेव हि ॥
मधुच्छन्दस आर्षं च गायत्रं छन्द एव हि ॥ ३२३ ॥
स्योनापृथिवीति मन्त्रस्य स्कन्दश्च देवता स्मृता ॥
आर्षं मेधातिथिश्चात्र स्वयम्भूर्दैवतं परम् ॥ ३२४ ॥
भर्गाख्यश्च मुनिश्चात्र बृहती छन्द उच्यते ॥
इन्द्रकुत्सेति दैवत्यं इन्द्र एव स्मृतो बुधैः ॥ ३२५ ॥
आर्षं कुत्सस्य चात्रत्र त्रिष्टुप् छन्दः प्रकीर्तितम् ॥
यस्मिन्वृक्षेति चात्रत्र यमो वै देवता परा ॥ ३२६ ॥
ऋषिस्तु कुण्डलोमा च त्रिष्टुप् छन्दः स्मरेद्बुधः ॥
ब्रह्मजज्ञानमित्यत्र कालो वै दैवतं महत् ॥ ३२७ ॥

---

१. A. and E. read कुल्मलो नाम for कुण्डलोमा च, B. the same, F. too while C. reads कुललो नाम and D. कुल्मषो नाम.

मुनिर्धर्मतनुर्नाम त्रिष्टुप् छन्दोऽभिधीयते ॥
आयातमिति च ह्यस्यां चित्रगुप्तस्तु दैवतम् ॥ ३२८॥
आर्षं तु वामदेवोऽस्य त्रिष्टुप्छन्दो बुधैर्मतम् ॥
अग्निं दूतमिति ह्यस्यां अग्निर्वै देवता स्मृता ॥ ३२९ ॥
आर्षं मेधातिथिर्नाम छन्दो गायत्रमेव हि ॥
अप्सुमे सोम इत्यत्र सोमं वै दैवतं स्मरेत् ॥ ३३० ॥
मेधातिथिरिहाप्यार्षमनुष्टुप् छन्द उच्यते ॥
पुरुषसूक्तस्य दैवत्यं पुरुष एव मतं बुधैः ॥ ३३१ ॥
भूमिपृथिव्यन्तरिक्षमित्यत्र दैवतं क्षितिः॥
ऋषिः शातातपो ह्यत्र छन्दश्चानुष्टुबुच्यते ॥ ३३२ ॥
आर्षं नारायणस्येह छन्दश्चानुष्टुबित्यपि ॥
इन्द्रायेंदो मरूत्वते मरुत्वान्दैवतं महत् ॥ ३३३ ॥
आर्षं तु काश्यपस्येह गायत्रं च्छन्द एव हि ॥
मरुत्वंतमिति ह्यत्र सुरेन्द्रो देवता मता ॥ ३३४ ॥
अत्रापि कश्यपस्यार्षं गायत्रं छन्द एव हि ॥
उत्तानपर्णइत्यत्र इन्द्रो दैवतमुच्यते ॥ ३३५ ॥
आर्षं साङ्ख्यस्य चात्रोक्तं अनुष्टुप् छन्द इत्यपि ॥
प्रजापते इति ह्यत्र देवता च प्रजापतिः ॥ ३३६ ॥
हिरण्यगर्भस्यार्षं तु त्रिष्टुप् छन्दो मतं बुधैः॥
आयं गौरिति चैवात्र देवता फणिनो मता ॥ ३३७ ॥
सर्पराजो मुनिस्तत्र गायत्रं छन्द उच्यते ॥
एष ब्रह्मा ऋत्विज इति ब्रह्मदेवोऽधिदैवतम् ॥
ऋषिर्वै वामदेवोऽत्र गायत्रं छन्द इष्यते ॥ ३३८॥
आतून इन्द्रवृत्रहं सुरेन्द्रः सगणेश्वरः ॥
तथार्षं वामदेवस्य गायत्रं छन्द इत्यपि ॥ ३३९ ॥
जातवेदस इत्यत्र जातवेदास्तु दैवतम् ॥
काश्यपस्यार्षमत्रापि छन्दोनुष्टुप् प्रकीर्तितम् ॥ ३४० ॥
अनोनियुद्भिरित्यस्मिन्वायुर्दैवतमुच्यते ॥
आर्षमत्र वसिष्ठस्य अनुष्टुप् छन्द उच्यते ॥ ३४१ ॥

---

१. B. C. D. E. and F. read पूजनो for फणिनो. २. E. and F. read द्विषोऽधिदैवतम् for ब्रह्मदेवोऽधिदैवतम्, also this verse is not in B. C. and D.

ॐद्यावाकाशदैवत्यं मुनिः प्रोक्तः प्रजापतिः ॥
छन्दो गायत्रमित्युक्तं विनियोगो यथेप्सितम् ॥ ३४२ ॥

एषो उँषेति चाप्यत्र अश्विनौ दैवते स्मरेत् ॥
प्रस्कण्वश्चार्षमत्रापि ग.यत्रं च्छन्द उत्तमम् ॥ ३४३ ॥

मरुतो यस्य हि क्षये मरुद्दैवतमुच्यते ॥
गौतमं च मुनिं विद्धि च्छन्दश्च प्रथमं मुने ॥ ३४४ ॥

छन्दस्तथार्षं सहदैवतेन ज्ञात्वा द्विजो यः कुरुते विधानम् ॥
वेदोक्तमर्थं प्रददाति सम्यक् सर्वं फलं कर्तुरिहाप्यमुत्र ॥ ३४५ ॥

यो लक्षहोमं यदि कोटिहोमं राजा विदध्यात्प्रतिवर्षमेकम् ॥
राष्ट्रे सुवृष्टिर्विजयः सुभक्ष्यमारोग्यता स्यात्सुकृतस्य वृद्धिः ॥ ३४६ ॥

भवन्ति पुत्राः शुभवंशवृध्यै दीर्घायुषो राजहिता धरित्र्याम् ॥
सुकीर्तिमन्तो जयिनोऽपि राज्ये प्रतापवन्तो रवि-चन्द्रतुल्याः ॥ ३४७ ॥

इति श्रीबृहत्पाराशरीये धर्मशास्त्रे शान्तिविधिर्नाम एकादशोऽध्यायः समाप्तः ॥ ११ ॥

---

१. A. reads अथवा इत्याकाशो देवता आर्षमेव तत् or आदित्यआकाश दैवत्यं; while C. reads नमः प्रकाशदैवत्यं. २. B. C. D. E. F. read इषो उपेति for एषो उपेति. ३. A. reads °संततिक्षमा for °वंशवृध्यै.

बृहत्पराशरसंहिता।

॥ अथ द्वादशोऽध्यायः ॥

अथातो नृपतेर्धर्मं वक्ष्यामि हितकाम्यया ॥
पराशरात् श्रुतं विप्रा वक्ष्यमाणं निबोधत ॥ १ ॥

भूभृद्भूमौ परो देवः पूज्योऽसौ परदेववत् ॥
स विधातापि सर्वस्य रक्षिता शासिता च सः ॥ २ ॥

इन्द्रा-ऽग्नि-यम-वित्तेशा-ऽनलेश-मातरिश्वनः ॥
शीतांशुस्तीव्रभासश्च ब्रह्माद्योऽसृजन्नृपम् ॥ ३ ॥

नृपो वेधा नृपः शम्भुर्नृपोऽर्को विश्रवाः ॥
दाता हर्ता नृपः कर्ता नृणां कर्मानुसारतः ॥ ४ ॥

नासृक्षद्यदि राजानं नापि दण्डं व्यधास्यत ॥
नामंस्यतो यदा चैषा का भविष्यज्जगत्स्थितिः ! ॥ ५ ॥

नाग्रहीष्यन् पुरोडाशान् मनुष्य-पितृ-देवताः ॥
नाभविष्यत् श्व-काकानां भागधेयं हुतं हविः ॥ ६ ॥

निर्गुणोऽपि यथा स्त्रीणां सदा पूज्यः पतिर्भवेत् ॥
तथा राजापि लोकानां पूज्यः स्याद्विगुणोऽपि सन् ॥ ७ ॥

स्वकर्मस्थान्नृपो लोकान् पिता पुत्रानिवौरसान् ॥
शिक्षयेत् धर्मविद्दण्डैरधर्मकारिणो जनान् ॥ ८ ॥

नरान् दण्डधृतः कुर्यात् धर्मज्ञानार्थसाधकान् ॥
समर्थानश्वपत्यादीन्शूरान् स्वामिहितोद्यतान् ॥ ९ ॥

शुचीन् प्राज्ञान् स्वधर्मज्ञान् विप्रान् मुद्राकरान् हितान् ॥
लेखकानपि कायस्थान् लेख्यकृत्यविचक्षणान् ॥ १० ॥

अमात्यान् मन्त्रिणो दूतान् यथोदितपुरोहितान् ॥
प्राड्विवाकान् समस्तान् वा हितांश्च रक्षकानपि ॥ ११ ॥

---

१. A. B. D. E. and F. read शीतांश्चांशानभासाश्च for शीतांशुस्तीव्रभासश्च.

२. A. B. read दंडंनाप्यकारेष्यन्तु for नापि दंडं व्यधास्यत.

शूरानथ शुचीन् प्राज्ञान् परविश्वासकारिणः ॥
सर्वस्थानेषु चाध्यक्षान् सत्कृत्य वेदिनो परे ॥ १२ ॥
महायत्नः कुमाराणामन्तःपुरस्य रक्षणे ॥
वृद्धान् कञ्चुकिनो विप्रा : शुचीनाढ्यांश्च वीरकान् ॥ १३ ॥
यथोदितानि दुर्गाणि कुर्यात्तेष्वपि रक्षणम् ॥
उद्वाहमुदितं स्त्रीणां यौनसम्बन्धकारणात् ॥ १४ ॥
सुगुप्तकृत्यविज्ञानमात्मरक्षा प्रयत्नतः ॥
प्रातः सन्ध्यार्चनादूर्ध्वं गूढपुंवचनश्रुतिः ॥ १५ ॥
यथोक्तकार्ये राज्ये च नित्यं कुर्यात्परीक्षणम् ॥
कोशेभाश्व-रथाद्यानां हेतीनां वर्मणामपि ॥ १६ ॥
कुर्यादालोकनं नित्यमनालस्यो महीपतिः ॥
अमात्य मन्त्रि-योद्धॄणां सम्मानं नित्यशोऽपि च ॥ १७ ॥
देवार्चनं सदा होमः शान्तिश्च वृद्धसेवनम् ॥
यज्ञो दानं तथोत्पातसमये शान्तयोऽपि च ॥ १८ ॥
वर्जनं विषयासक्तेर्भूमिदानं सशासनम् ॥
प्राणिवर्जितदेशे च नीतिज्ञो मन्त्रकृद्भवेत् ॥ १९ ॥
नित्यमुत्साहयुक्तश्च विजिगीषुरुदायुधः ॥
सदालङ्कारयुक्तश्च सदैव प्रियभाषकः ॥ २० ॥
सदा प्रियाहते युक्तः पूज्यो नाकेऽप्यसौ नृपः ॥
सदा साधुषु सन्मानं विपरीतेषु घातनम् ॥ २१ ॥
दण्डं दम्येषु कुर्वाणो राजा यज्ञफलं लभेत् ॥
वृद्धान् साधून् द्विजान् मौलान् यो न सन्मानयेन्नृपः ॥ २२ ॥
पीडां करोति चमीषां राजा शीघ्रं क्षयं व्रजेत् ॥
यस्तु सन्मानयेद्देतान् देवान् विप्रांश्च पूजयेत् ॥ २३ ॥

---

१. A. B. D. E. and F. read भावयान् instead of अथ. २. A. C. D. F. read सुभीरुकान् for °श्च वीरकान्. ३. Only C. reads यौवने बंधुकारणात् for यौनसंबंधकारणात्. ४. A. D. F. read गुप्तपुंकृत° for सुगुप्तकृत्य.° ५. A. reads गुप्त° for गूढ°; while B. and E. read गूढपुंवचनश्रुति: and D. F. read गूढपुंसवचनश्रुतिम्. ६. E. and F. read चर्मणाम् instead of वर्मणाम्. ७ B. C. D. E. and F. read प्रजा° for प्रिय°. ८. A. B. D. E. and F. substitute दंडयेषु for दम्येषु. ९. Only A. reads इष्ट° for यज्ञ.° १०. A. reads मौलीन् for मौलान्.

पराजयेत्सोप्यरींस्तान् दीर्घायुरपि जायते ॥
पीड्यमानां प्रजां रक्षेत्कायस्थैश्चोरै-तस्करैः ॥ २४ ॥
धान्येक्षु-तृण-तोयैश्च सम्पन्नं परमण्डलम् ॥
हीनवाहनपुंस्त्वं तु मत्वैतत्प्रविशेन्नृपः ॥ २५ ॥
मासे सहसि यात्रार्थी कृतपुण्याहघोषवान् ॥
विधिवद्यानकं कुर्याद्यद्व्यूहैरक्षयन् बलम् ॥ २६ ॥
यत्राचलसरोरक्षा वृक्षरक्षा तु यत्र च ॥
वासं तत्रविधायैव रात्रौ रक्षेत्स्वकं बलम् ॥ २७ ॥
चतुर्दिक्षु च सैन्यस्य निशि शूरान् धनुर्धरान् ॥
स्वयं राजा नियुञ्जीत समीक्ष्य भूबलाबलम् ॥ २८ ॥
राज्यस्य षड्गुणान् मत्वा सन्धिविग्रहयानकान् ॥
आसनं संशयं द्वैधं सम्यक् ज्ञात्वा समाचरेत् ॥ २९ ॥
निर्भेदं स्वबलं कुर्यान्निहन्याद्भिन्नचेतनम्
दासीकर्मकरान् दासान् भिन्दतो रक्षयेन्नृपः ॥ ३० ॥
निकटस्थायिनो नित्यं जानन्ति चेष्टितं प्रभोः ॥
तस्मात्ते यत्नतो रक्ष्या भेदमूलं यतस्त्वमी ॥ ३१ ॥
एते परस्य यत्नेन भेदनीयास्ततोऽपरे ॥
यथा परो न जानाति तथा भेदं समाचरेत् ॥ ३२ ॥
परामात्य-प्रधानानां व्यलीकद्भूतशब्दितम् ॥
उत्थापयेत्स्वसेनायाः स्याद्यथा चित्तभेदना ॥ ३३ ॥
परसैन्ये बहु गतान्विविधान् कुहकानपि ॥
कारयेत् गरदानादि वह्निपाताननेकशः ॥ ३४ ॥
स्वसैन्ये गरदानादि नृपो यत्नेन रक्षयेत् ॥
नियुज्य विज्ञः पुरुषानुक्तं सर्वं निशामयेत् ॥ ३५ ॥

---

१. A. B. D. read चाट° for चोर°. २. B. only reads °कृतृण° for °क्षु-तृण°. ३. A. B. D. E. read प्रयाणं विधिवत् for विधिवद्यानकं. ४. A. B. D. E. and F. read °सरित्° for °सरो°. ५. Only A. reads सन्यस्य for सैन्यस्य. ६. A. reads संशयद्वैधं and B. D. E. F. read संश्रयेत् द्वैधं. ७. B. E. and F. read भूमचेतनम् and D. reads भूतचेतसम्. ८. B. and E. read शब्दद्भूषितम्. ९. A. reads श्चित्तभेदिता, B. श्चित्तभेदिना, D. reads श्चित्तचेदिता and F. reads श्चित्तभेदता for श्चित्तभेदना. १०. A. reads करिणां for कारयेत्, C. and D. also read as A. ११. A. and C. read ऽभयदित्यादि for गरदानादि.

अन्तर्भीरून् बहिः शूरान् साग्निकान् ब्रह्मणोत्तमान् ॥
धर्मज्ञान् कुल-सम्पन्नान् बिभृयादात्मसन्निधौ ॥ ३६ ॥
प्रविशन् परदेशे च प्रजां स्वीकृत्य संविशेत् ॥
उत्सार्य मार्गतो लोकान् दूरीकृत्य व्रजेन्नृपः ॥ ३७ ॥
सस्यादि दाहयेत्सर्वं यवसानि धनानि च ॥
भिन्द्यात्सर्वनिपानानि प्राकारान्परिखास्तथा ॥ ३८ ॥
अपसृत्य समादाय भूमिं साधारणां नृपः ॥
गमयेत् वार्षिकान्मासानासौद्य स्वधरां नृपः ॥ ३९ ॥
न युद्धमाश्रयेत्प्राज्ञो न कुर्यात्स्वबलक्षयम् ॥
साम्ना भेदेन दानेन त्रिभिरेव वशं नयेत् ॥ ४० ॥
वदन्ति सर्वे नीतिज्ञा दण्डस्याऽगतिका गतिः ॥
तद्वर्जं वशमायाति यथा शत्रुस्तथा चरेत् ॥ ४१ ॥
आक्रान्ता दर्भसूच्योऽपि भिंद्युर्मृद्व्योऽपि भूतलम् ॥
नातो यतेत युद्धाय युद्धसिद्धिरसिद्धिवत् ॥ ४२ ॥
स्वधरात्यन्तिके देशे युद्धमिच्छेत्स्वधर्मवित् ॥
न तु प्रविश्य तद्दूरभूमिं युद्धं समाचरेत् ॥ ४३ ॥
किञ्चित्सुप्तेषु लोकेषु क्षपायां युद्धमाचरेत् ॥
सुधोरव्यसने चापि योधयेत्परसैनिकैः ॥ ४४ ॥
व्यूहैर्व्यूह्य यथोक्तैर्वा रक्षां कृत्वापि चात्मनः ॥
सैनिकांस्तान् समस्तांश्च प्रेरयेद्युद्धविन्नृपः ॥ ४५ ॥
सम्मानयेत्समस्तांश्च योद्धॄंस्तेनापतीन्नृपः ॥
अन्विच्छन् जयलक्ष्मीं च नीतिज्ञः पृथिवीपतिः ॥ ४६ ॥

---

१. A. B. D. E. and F. read साकारान् for साग्निकान्. २. A. C. D. differ in reading this line as- उत्सार्य मार्गतो दूरीकृत्वापि मार्गशोधनम्, C. substittues उत्सार्यं for उत्सार्य and कृत्वापि for कृत्यापि and मार्गतो व्रजेत् for मार्गशोधनम्, ३. C. reads सपवानि for यवसानि. ४. A. B. D. E. F. read असौ च वसुधाधिपः for असौद्य स्वधरां नृपः. ५. A. B. D. E. F. read राजा for प्राज्ञः. ६. Only C. reads विद्युद्भ्रोपपातनम्. ७. B. E. both read स्वधामा° for स्वधरा°; while C. reads स्वस्थस्यात्ययिके for स्वधरात्यंतिके. ८. A. reads उत्सहेत् for आचरेत्. C. reads उत्सृजेत्, D. as A. ९. A. reads °वासतो for °व्यसने, C. reads सन्नीरवासतो, D. E. and F. as A. १०. C. reads यो वसेद्यतो नृपः.

स्नेहेनापि समं पत्न्या शय्यास्थोऽपि हि मानवः ॥
पुष्पैरपि न युध्येत युद्धं तत्र विपत्तये ॥ ४७ ॥
हीनं परबलं मत्वा निरुत्साहमनादरम् ॥
समस्तबलसंयुक्तः स्वयमुत्थाप्य योधयेत् ॥ ४८ ॥
न हन्यात् मुक्तकेशं च नाशयेन्न[1] निरायुधम् ॥
पराङ्मुखं न पतितं[2] न तवास्मीति वादिनम् ॥ ४९ ॥
अन्यानपि निषिद्धांश्च न हन्यात्धर्मवित्नृपः ॥
हत्वा च नरकं यान्ति भ्रूणहत्यासमैनसा ॥ ५० ॥
पराङ्मुखीकृते सैन्ये यो युद्धान्न[3] निवर्तते ॥
तत्पदानीष्टितुल्यानि[4] भूम्यर्थं स्वामिनोऽपि वा[5] ॥ ५१ ॥
शिरोहतस्य ये वक्त्रे विशन्ति रक्तबिन्दवः ॥
सोमपानेन ते तुल्या इति वासिष्ठजोऽब्रवीत् ॥ ५२ ॥
युध्यन्ते भूभृतो ये च भूम्यर्थमेकचेतसः ॥
इष्टस्तैर्बहुभिर्योगैरेवं यान्ति त्रिविष्टपम् ॥ ५३ ॥
एष एव परो धर्मो नृपतेर्यद्रणार्जितम् ॥
विप्रेभ्यो दीयते वित्तं प्रजाभ्यश्चाभयं तथा ॥ ५४ ॥
यदा तु वशतां याति स देशो न्यायतोऽर्जितः ॥
तद्देशव्यवहारेण यथावत्परिपालयेत् ॥ ५५ ॥
रणार्जितेन वित्तेन राजा[6] कुर्यान्मखान्द्विजान् ॥
अर्चयेद्विविधद्रांश्चा साधून्[7] सम्मानयेदपि ॥ ५६ ॥
मातुलः श्वशुरो बन्धुरन्यो वापि हि यो जितः[8] ॥
अदण्ड्यः कोऽपि नास्त्येवं[9] राजनीतिविदो विदुः ॥ ५७ ॥
सुसहायमतिप्रौढं शूरं प्राज्ञानुरागदम् ॥
सोत्साहं विजिगीषुं च मत्वा राजा[10] नियामयेत् ॥ ५८ ॥

---

१. A. reads नासीनं न, for नाशयेन्न. B. too the same. D. E. F. also the same. २. A. and C. read प्रहृतं for पतितं. ३. C. only reads युद्धाय for युद्धान्न. ४. B. and F. read पदानि क्रतु° for तत्पदानीष्टि°. ५. A. reads चैकचेतसः for स्वामिनोऽपि वा, C. reads भूत्यर्थं चैकचेतसः, D. also as C. ६. A. C. D. E. F. read विद्वान् for राजा. ७. Only C.; reads सताम् for साधून्. ८. A. B. D. E. F. read ऽर्चितः for जितः. ९. A. reads नो राज्ञो for नास्त्येव. १०. A. and C. read भूभृत्क्षिप्रं for मत्वा राजा, also E. and F. read the same.

मत्वा चार्थयेतः सर्वान् युक्तानप्यर्थकृद्भवेत् ॥
सार्थकांश्च नियुञ्जीत सर्वतोऽर्थमुपार्जयेत् ॥ ५९ ॥
सर्वाण्यपि च वित्तानि यतस्ततोऽपि राजनि ॥
प्रविशंतीव तोयानि सर्वाण्यपि हि सागरे ॥ ६० ॥
नृपस्यापदि जातायां देवद्रव्याणि कोशवत् ॥
आदाय रक्षेदात्मानं पुनस्तत्र च निःक्षिपेत् ॥ ६१ ॥
वित्तं वार्धुषिकाणां तु कदर्यस्यापि यद्धनम् ॥
पाषण्डि-गणिकावित्तं हरन्नार्तो न किल्विषी ॥ ६२ ॥
देव-ब्राह्मण-पाषण्डि-गणका-गणिकादयः ॥
वणिग्वार्धुषिकाः सर्वे स्वस्थे राजनि सुस्थिताः ॥ ६३ ॥
यथा वह्निश्च गोमांसं दहन्नपि न पातकी ॥
आददानस्तथा राजा धनमार्तो न किल्विषी ॥ ६४ ॥
गृह्णीयात्सर्वदा राजा करानपीडयन्प्रजाः ॥
स्तोके स्तोकान् पृथक् साम्ना स भुङ्क्ते सुचिरं धराम् ॥ ६५ ॥
सदा चोद्यमिना भाव्यं नृपेण विजिगीषुणा ॥
विजिगीषुर्नृपो नान्यैः कदाचिदभिभूयते ॥ ६६ ॥
तदेवं हृदि सन्धाय धृतोत्साहो नृपो भवेत् ॥
दैव-पौरुषसंयोगे सर्वाः सिद्ध्यन्ति सिद्धयः ॥ ६७ ॥

नैकेन चक्रेण रथः प्रयाति नचैकपक्षो दिवि याति पक्षिः ॥
एवं हि दैवेन न केवलेन पुंसोऽर्थसिद्धिर्नरकारतो वा ॥ ६८ ॥
केचिद्धि दैवस्य तु केवलस्य प्राधान्यमिच्छन्ति मतिप्रवीणाः ॥
पुंस्कारयुक्तस्य नरस्य केचिदप्यत्र दृष्टा पुरुषार्थसिद्धिः ॥ ६९ ॥

अत्युच्च-नीचकृतहेतिपरिश्रमी च
शौर्यान्वितश्च गुणवांश्च सुधीश्च विद्वान् ॥
प्राप्नोति नैव विधिना स पराङ्मुखेन
स्वीयोदरस्य परिपूरणमन्नमात्रम् ॥ ७० ॥

---

१. A. reads °मतः सर्वानयुक्तानर्थकृद्भवेत्. B. reads °हृद्भवेत् for °कृद्भवेत्. C. reads नियुक्तार्थमियुक् भवेत्, D. न नियुक्तानप्यहृद्भवेत्. २. B. reads भार्तो for मार्तो. ३. B. and D. read °गायका-गणकादयः for °गणका°-गणिकादयः. ४. A. reads दृष्टा. ५. B. E. read अत्युच्चमी for अत्युच्चनी.°

शुभ्राणि हर्म्याणि वराङ्गनाश्च नानाप्रकारो विभवो नरस्य ॥
उर्वीपतित्वं नृपकारता च सर्वं हि मंक्षु क्षयमेति दैवात् ॥ ७१ ॥
केषां हि पुंसां महतो हि दैवात्स्थानस्थितानामपि चार्थसिद्धिः ॥
केषां प्रभुत्वं बहुजोवितं च एको हि देवो बलवानतोऽत्र ॥ ७२ ॥
पुं-स्त्रोप्रयोगादथशुक्र-शोणितात् को देहमध्ये विदधाति गर्भं ॥
स्त्रीणां तु तद्विप्र न चापि पुंसां सर्वापि चैषा ननु दैवचेष्टा ॥ ७३ ॥
कासां तु गर्भस्य न सम्भवोऽस्ति केषां च शुक्रं ननु वीर्यहीनम् ॥
दधाति गर्भं ननु कापि दैवात् काश्चित्तु गर्भं न दधाति दैवात् ॥ ७४॥
धाता विधाता निजकर्मयोगात् विधेस्त्वभीष्टं त्वनुभावभाव्यम् ॥
देवासुराणां सह दैत्यकानां स ह्येव कर्ता च मनूद्भवानाम् ॥ ७५ ॥
दैवात् मघोनोऽपि सहस्रमक्ष्णां दैवाद्धिमांशोः क्षयरोगिताऽभूत् ॥
दैवात्पयोधेर्लवणोदकत्वं दैवाद्भवेच्चित्रतरा च वृष्टिः ॥ ७६ ॥
यद्यप्यमुष्माच्च परोऽस्ति दैवात् कुर्यात्तथापीह नरो नृकारम् ॥
उद्दीपयेत्कर्मकरो नृकारादुद्दीपितं कर्म करोति लक्ष्मीः ॥ ७७ ॥
दैवेन केचित्प्रसभेन केचित्केचिन्नृकारेण नरस्य चार्थाः ॥
सिध्यन्ति यत्नेन विधीयमानास्तेषां प्रधानं नरकारमाहुः ॥ ७८ ॥
स्वामिः प्रधानं नय-दुर्ग-कोशान् दण्डं च मित्राणि च नीतिविज्ञाः ॥
अङ्गानि राज्यस्य वदन्ति सप्त सप्ताङ्गपूर्वो नृपतिर्धराभुक् ॥ ७९ ॥
दुर्वृत्त-सद्वृत्तनरेषु दण्डं राजा विधत्ते निपुणोऽर्थसिध्यै ॥
दण्डस्य मत्वोर्जितवित्तसत्वं पुंसोऽर्थहीनस्य दमं तु हीनम् ॥ ८० ॥
अन्यायतो ये तु जनं नरेशाः सम्पीड्य वित्तानि हरन्ति लोभात् ॥
तत्क्रोधवह्नौ परिदग्धदेहा गतायुषस्ते तु भवन्ति भूपाः ॥ ८१ ॥

---

१. A. B. D. and E. अकृतो for महतो. २. D. reads °शुक्रसेकात्. ३. C. reads अधत्तगर्भापि जहाति गर्भं. ४. A. reads विधिस्त्वदृष्टं तनुभोगभाग्यम्, B. विधिस्त्वदृष्टस्तनुभावभाव्यः, D. विधेस्त्वदृष्टं त्वनुभाव्यभाग्यम्. ५. A. reads देवोरगाणां. D. E. F. also the same. ६. B. reads च नराणां for दैत्यकानां. ७. B. reads °गामिता for °रोगिता. D. and E. also read as B. ८. A. B. D. E. and F. read नरो for °करो. ९. A. reads श्रीर्वितनोति सद्यः. B. simply alters तनोति for करोति in the original, C. reads श्रीरिव वै तनोति, D. E. and F. as A.; १०. A. reads कृतकेन, C. स्वहठेन and D. प्रहर्षेण for प्रसभेन. ११. C. reads भज for नय.° १२. A. reads हीनार्थपुंसस्तु दमं तु हीनम्, and C. दमान्ति हीनम्. १३. C. reads °वृद्धा for °वह्नौ. १४. B. reads गतायुषः for क्षीणायुषः.

दण्डो महान् मध्यमकाधमस्तु मानं तु तेषां त्रसरेणुकादि ॥
सोऽशीतिसाहस्रपणो महान् स्यादर्धोर्द्धको तस्य तदर्धको वा ॥८२॥

सर्वार्थपादश्च हरश्च दण्डो पात्यौ नृपेणेति वदन्ति सन्तः ॥
पाण्यादिपच्छेदन-मारणं च निर्वासनं राष्ट्रत एव सद्यः ॥ ८३ ॥

ज्ञात्वापराधं मनुजस्य यस्तु देशं च कालं च वपुर्वयश्च ॥
दंड्येषु दण्डं विदधाति भूभृत् साम्यं स बध्नाति पुरन्दरस्य ॥ ८४ ॥

यः शास्त्रदृष्टेन पथा नरेशो दण्डं विदध्याद्विधिवत्करांश्च ॥
सोऽतीव कांतिं वितनोति गुर्वीं आयुश्च दीर्घं दिवि देवभोगान् ॥८५॥

यस्त्यक्तमार्गाणि कुलानि राजा श्रेणीश्च जातीश्च गणांश्च लोकान् ॥
आनीय मार्गे विदधाति धर्म्ये नाकेऽपि गीर्वाणगणैः प्रशस्यते ॥८६॥

यः स्वधर्मे स्थितो राजा प्रजाधर्मेण पालयेत् ॥
सर्वकामसमृद्धात्मा विष्णुलोकमवाप्नुयात् ॥ ८७ ॥

हर्यश्व-वन्हि-यम-वित्तनाथ-शीतांशुरूपाणि हि बिभ्रतीह ॥
सर्वेऽपि भूपास्त्विह पञ्चरूपास्तं कथ्यमानं शृणुत द्विजेन्द्राः ॥ ८८ ॥

यदा जिगीषुर्धृतशस्त्रपाणिस्त्विषुं समालम्ब्य स विद्धसैन्यः ॥
सर्वान् सपत्नानिह जेतुकामस्तदा स हर्यश्व इवेह भाति ॥ ८९ ॥

अकारणात्कारणतोऽपि चैव प्रजां दहेत्कोपसमिद्धरोचिः ॥
यदा तदेनं नृपनीतिविज्ञास्तनूनपातं प्रवदन्ति भूपम् ॥ ९० ॥

धर्मासनस्थः श्रुतिशास्त्रदृष्ट्या शुभाशुभाचारविचारकृत्स्यात् ॥
धर्म्येषु दानं त्वघकृत्सु दण्डं तदा ऽयमीशास्त्विह धर्मराजः ॥ ९१ ॥

यदा त्वमात्य-द्विज-याचकादीन् प्रहृष्टचित्तस्तु यथोचितेन ॥
धनप्रदानेन करोति हृष्टान् भूभृत्तदाऽसौ द्रविणेशवत्स्यात् ॥ ९२ ॥

समस्तशीतांशुगुणप्रयुक्तो यदा प्रजामेष शुभाय पश्येत् ॥
प्रसन्नमूर्तिर्गतमत्सरः सन् तदोच्यते सोम इतेि क्षितीशः ॥ ९३ ॥

आज्ञा नृपाणां परमं हि तेजो यस्तां न मन्येत स शस्त्रवध्यः ॥
ब्रूयाच्च कुर्याच्च वदेच्च भूभृत्कार्यं तदेवं भुवि सर्वलोकैः ॥ ९४ ॥

---

१. C. reads अर्धार्द्धिके for अर्धार्धको. २. A. B. D. E. F. read तदन्वकौ च for तदर्द्धको वा. ३. B. E. read वरांश्च for करांश्च. ४. C. reads नागैश्च° for नाकेऽपि. ५. F. reads °विष्णु° for °वन्हि.° ६. C. reads स्त्विर्यं for °स्त्विषुं.° ७. A. B. C. D. E. and F. भिन्नसैन्यः for विद्धसैन्यः. ८. B. E. F. read °प्रयुक्तं for °प्रयुक्तो.

दुर्धर्षतिग्मांशुसमानदीप्तेर्ब्रूयान् मनुष्यः परुषं नृपस्य ॥
यस्तस्य तेजोऽप्यवमन्यमानः सद्यः स पंचत्वमुपैति पापात् ॥ ९४ ॥
योऽज्ञाय सर्वं विदधाति पश्येत् शृणोति जानाति चकास्ति शास्ति ॥
कस्तस्य चाज्ञां न बिभर्ति राज्ञः समस्तदेवांशभवो हि यस्मात्॥९५॥

इति राजधर्मः ।

अथ विप्रो वनं गच्छेद्विना वा सहभार्यया ॥
जितेन्द्रियो वसेत्तत्र नित्यं श्रौताग्निकर्मकृत् ॥ ९६ ॥
वन्यैर्मुन्यशनैर्मेध्यैः श्यामा-नीवार-कङ्गुभिः ॥
कन्द-मूल-फलैः शाकैः स्नेहैश्च फलसम्भवैः ॥ ९७ ॥
सायं-प्रातश्च जुहुयात्त्रिकालं स्नानमाचरेत् ॥
चर्मचीवरवासाः स्यात् श्मश्रु-लोम-जटाधरः ॥ ९८ ॥
पितॄंश्च तर्पयेन्नित्यं देवांश्चाजस्रमर्चयेत् ॥
अर्चयेदतिथीन्नित्यं तथा भृत्यांश्च पोषयेत् ॥ ९९ ॥
न किञ्चित्प्रतिगृह्णीयात्स्वाध्यायं नित्यमाचरेत् ॥
सर्वसत्वहितो दान्तः शान्तश्चाध्यात्मचिन्तकः ॥ १०० ॥
सन्तुष्टस्वान्तको नित्यं दानशीलः सदा द्विजः ॥
कश्चिच्चेदं समाश्राय सुवृत्त्या वर्तयेत्सदा ॥ १०१॥
एकाह्निकं तु कुर्वीत मासिकं वाथ सञ्चयम् ॥
षाण्मासिकं वाब्दिकं वा यज्ञार्थं च वने वसन् ॥ १०२ ॥
त्यक्त्वा तदाश्विने मासि स्थानमन्यत्समाश्रयेत् ॥
यथावदग्निहोत्रं तु समिदाज्यैस्तु पालयेत् ॥ १०३ ॥
चान्द्र-कृच्छ्र-पराकाद्यैः पक्ष-मासोपवासकैः ॥
त्रिरात्रैरेकरात्रैश्च आश्रमस्थः क्षिपेद्वपुः ॥ १०४ ॥
तिष्ठेच्चाव्रतिकस्तत्र स्वप्यादधस्तथा निशि ॥
अतन्द्रितो भवेन्नित्यं वासरं प्रपदैर्नयेत् ॥ १०५ ॥

---

१. A. reads °कर्मवित् for °कर्मकृत्. २. C. reads सन्यस्तश्चान्तको and B. सन्तुष्टस्यान्तको respectively. ३. A. B. D. E. F. substitute तदृत्त्या for सुवृत्त्या. ४. D. reads समिदाद्यैः for समिदाज्यैः. ५. A. and D. read द्व्येकरात्रैश्च for एकरात्रैश्च.

योगाभ्यासरतो नित्यं स्थानाऽऽसन-विहारवान् ॥
हेमन्त-ग्रीष्म-वर्षासु जलाग्न्याकाशमाश्रयेत् ॥१०६॥
दन्तोलूखलिको वापि कालपक्वभुगेव वा ॥
स्याद्वाश्मकुट्टको विप्रः फलस्नेहैश्च कर्मकृत् ॥ १०७ ॥
शत्रौ मित्रे समस्वान्तस्तथैव सुख-दुःखयोः ॥
समदृष्टिश्च सर्वेषु न विशेद्वनगह्वरम् ॥ १०८ ॥
म्लेच्छव्याप्तानि सर्वाणि वनानि स्युः कलौ युगे ॥
न भूपाः शासितारश्च ग्रामोपान्ते वसेद्वतः ॥ १०९ ॥
ग्रामाश्च नगरादेशास्तथारण्य-वनानि च ॥
क्षितीशरक्षितान्येव सर्वेषां फलदानिहि ॥ ११० ॥
प्रथमं भूपतेस्तस्मात्कृत्यं शंसेद्विजाग्रजाः ॥
योगं वाऽरण्यवासं वा कुर्वीत तदनुज्ञया ॥ १११ ॥
सुत्रामा-ऽनल-वायूनां यमस्येन्दोर्विवस्वतः ॥
ईशं वित्तेशयोर्ब्रह्ममात्राभ्यो निर्मितो नृपः ॥ ११२ ॥
पारत्रिकं तु यत्किञ्चिद्यत्किञ्चिदैहिकं तथा ॥
नृपाज्ञया द्विजातीनां तत्सर्वं सिध्यति ध्रुवम् ॥ ११३ ॥
नृपतेः प्रथमं तस्मात् साध्योर्थश्चादिकं द्विजः ॥
रक्षार्थं कथयित्वा तु यथा कार्यं समापयेत् ॥ ११४ ॥
धेनुः पूर्वं वसिष्ठस्य ह्यासीद्दुर्वाससोऽपि च ॥
वनवासाश्रमस्थस्य वह्निकार्याय तां श्रयेत् ॥ ११५ ॥
फलस्नेहा यदा न स्युः कालवैगुण्यतो द्विजाः ॥
तदा गोदुग्ध-सर्पिभ्यामग्निकार्यं समापयेत् ॥ ११६ ॥
तथा सर्वेषु कालेषु तथा सर्वाश्रमेषु च ॥
गोदुग्धादि पवित्रं स्यात्सर्वकार्येषु सत्तमाः ॥ ११७ ॥
वनवासिषु सर्वेषु भिक्षां कुर्याद्वनाश्रमी ॥
तदा सर्वं प्रकुर्वीत पितृदेवार्चनादिकम् ॥ ११८ ॥

---

१. A. reads ह्याद्रेवासादिकं चरेत् for जलाग्न्याकाशमाश्रयेत्. २. C. reads °पक्ष° for °पक्व°. ३. A. reads निवसेद्गह्वरं वनम्; while B. D. E. read निवासं गव्हरं वनम्. ४. A. C. D. read इन्द्र° for ईशं.° ५. A. reads वैषिकं for ऐहिकं. B. D. E. and F. too read the same. ६. D. reads वनवासाय for वन्हिकार्याय.

अष्टौ भुञ्जीत वा ग्रासान् ग्रामादाहृत्य यत्नवान् ॥
वासनासंक्षयं गच्छेदनिलाशः प्रागुदीचिकः ॥ ११९ ॥

विधाय विप्रो वनवासधर्मान् सर्वानिमानुक्तविधिक्रमेण ॥
स शोध्य पापानि वपुर्विशोध्य ब्रह्माधिगच्छेत्परमं द्विजेन्द्राः ॥१२०॥

आश्रमत्रयधर्मान्वा चरित्वा प्राक् द्विजास्ततः ॥
द्वयस्य वा ततः पश्चाच्चतुर्थाश्रममाचरेत् ॥ १२० ॥
द्विजाग्रजो यदा पश्येत् वलीपलितमात्मनः ॥
उपरामस्तथाक्षाणां क्षैण्यं कामस्य सद्द्विजाः ॥ १२१ ॥
समीक्ष्य पुत्रं पौत्रं वा दृष्ट्वा वा दुहितुः सुतम् ॥
अधीत्य विधिवद्वेदान् कृत्वा यज्ञान्विधानतः ॥ १२२ ॥
निश्चयं मनसः कृत्वा चतुर्थाश्रममाविशेत् ॥
प्राजापत्यां विधायेष्टिं वनाद्वा सद्मनोऽपि वा ॥ १२३ ॥
समस्तदक्षिणायुक्तान् सर्ववेदांस्ततश्च तान् ॥
अग्नीनात्मनि चारोप्य दण्डान् विधिवदाहरेत् ॥ १२४ ॥
किञ्चिद्वेदं समास्थाय तद्धर्मेण च वर्तयेत् ॥
वाङ्-मनः-कायदण्डाश्च तथा सत्वादयो गुणाः॥ १२५ ॥
त्रयोऽपि नियता यस्य स त्रिदण्डीति कथ्यते ॥
कमण्डलुरक्षमाला च भिक्षापात्रमथापरम् ॥ १२६ ॥
काषायवासः कौपीनं कार्यार्थं वस्त्रमेव वा ॥
शिखा यज्ञोपवीतं च दण्डानां त्रितयं तथा ॥ १२७ ॥
द्विकालं विधिवत्स्नानं भिक्षया चैकभोजनम् ॥
शुद्धैकवृत्तिविप्रेषु सत्कर्मनिरतेषु च ॥ १२८ ॥
भिक्षाचर्या यतेः प्रोक्ता व्रतचर्या तथैव च ॥
असम्भाषश्च शूद्रेण तथा च शिल्पि-कारुभिः ॥ १२९ ॥
अवक्तृत्वं तथा स्त्रीभिः कृत्यमेतद्यतेः स्मृतम् ॥
न कदम्बकसंरोधो नित्यमेकान्तशीलता ॥ १३० ॥
सदैव प्राणसंरोधः सदैवाध्यात्मचिन्तनम् ॥
मृद्वेणुदार्वलाब्वश्ममयं पात्रं यतेः स्मृतम् ॥ १३१ ॥

---

१. A. and D. read आसमासं क्षयं गच्छेदनिला° for वासनासंक्षयं गच्छेद-निला.° २. A. reads उपरतिं for उपरामः. ३. Only A. reads समास्थाप्य for समास्थाय. ४. C. and E. read वनचर्या for व्रतचर्या.

शुद्धिरद्भिरमीषां तु गोबालैश्चावघर्षणम् ॥
न दण्डैर्न च दण्डेन विना वा तेन वा तथा ॥ १३२ ॥
मोक्षावाप्तिर्भवेत्पुंसां किन्त्वस्याध्यात्मचिन्तनात् ॥
समत्वं सुख-दुःखेषु तथा विद्वेष-रागयोः ॥ १३३ ॥
आत्मान्ययोः समानत्वमजस्रं चात्मचिन्तनम् ॥ १३४ ॥
यतिभिस्त्रिभिरेकत्र द्वाभ्यां पञ्चभिरेव वा ॥
न स्थातव्यं कदाचित्स्यात्तिष्ठन्तो नाशमाप्नुयुः ॥ १३५ ॥
बहुत्वं यत्र भिक्षूणां वार्तास्तत्र विचित्रकाः ॥
स्नेह-पैशून्य-मात्सर्यं भिक्षूणां नृपतेरपि ॥ १३६ ॥
तस्मादेकान्तशीलेन भवितव्यं तपोर्थिना ॥
आत्माभ्यासरतेश्चैव ब्रह्मप्राप्त्यभिलाषुकः ॥ १३७ ॥
त्रिदण्डग्रहणादेव यतित्वं नैव जायते ॥
अध्यात्मयोगयुक्तस्य ब्रह्मावाप्तिर्भवेद्यतः ॥
जितेन्द्रियो हि दण्डार्हो युवा न स्यात्तथा सरुक् ॥ १३८ ॥
युवा नीरुक् तथा भिक्षुरात्मबुद्धिप्रदूषकः ॥
भिक्षुर्गेहे वसन्यत्र कामार्तोऽन्योऽभिगच्छति ॥ १३९ ॥
तत्सद्मनाथं वृक्षान्वै सह तेनैव पातयेत् ॥
एकरात्रं तु निवसेद्भिक्षुर्यस्य गृहाङ्गणे ॥ १४० ॥
तस्यं वै तारयेत्पूर्वान् विंशतिं पितृमातृतः ॥
भिक्षुर्यस्यान्नभुक् ब्रह्मयोगाभ्यासरतो भवेत् ॥ १४१ ॥
परिणामश्च योगेन कृतकृत्यो गृही भवेत् ॥
निर्ममो निरहङ्कारः सर्वसहः प्रसन्नधीः ॥ १४२ ॥
ब्रह्मण्यात्मनि गोमायौ मुनौ म्लेच्छे च तुल्यदृक् ॥
चिह्नानि धात्रा कथितानि धत्ते वर्तेत यो वै विहितेन भिक्षुः ॥
योऽध्यात्मवेदी सततं जिताक्षः स ब्रह्मकाये गमनं करोति ॥ १४३ ॥
वनस्थ-भिक्षुधर्मान्वै यानुवाच पराशरः ॥
यथावदभिधायैतान् वक्ष्याम्याश्रमभेदकान् ॥ १४४ ॥

इति वानप्रस्थ-भिक्षुधर्माः ।

---

१. E. and F. read °भवकर्षणम् for °भवघर्षणम्. २. A. reads °रतेनैव for °रतश्चैव. ३. A. reads °ब्रह्मणीप्सता for °ब्रह्मभिलाषुकः. ४. A. reads स नाशयति वृक्षान्वै for तस्य वै तारयेत्पूर्वान्. ५. B. reads श्रीगामौ for गोमायौ.

अथातः सम्प्रवक्ष्यामि भेदमाश्रमसम्भवम् ॥
ब्रह्मचर्यादिकानां तु याथातथ्यं निबोधत ॥ १४५ ॥
चतुर्णामाश्रमाणां तु भेदो दृष्टो मनीषिभिः ॥
प्रत्येकशो वदाम्येनं श्रुणुध्वं द्विजसत्तमाः ॥ १४६ ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ॥
एतद्भेदान् प्रवक्ष्यामि श्रुणुध्वं पापनाशनम् ॥ १४७ ॥
चतुर्धा ब्रह्मचारी स्याद्गायत्रो वैधसस्तथा ॥
प्राजापत्यो बृहन्नेति लक्षणानि पृथक् पृथक् ॥ १४८ ॥
अक्षारलवणाशी स्यात् गायत्र्यभ्यासतत्परः[1] ॥
वर्तते भिक्षया[2] नित्यं गायत्रोऽयं प्रकीर्तितः ॥ १४९ ॥
चतुर्धा द्वादशाब्दानि योऽधीयानश्चतुःश्रुतीः ॥
भिक्षया ब्रह्मचर्येण तिष्ठेत्[3] ब्राह्मः स उच्यते ॥ १५० ॥
गुरोर्वा गुरुपुत्रस्य तत्पत्न्या वापि सन्निधौ ॥
यो वसेदभ्यसन् ज्ञानं[4] ब्रह्मचारी स नैष्ठिकः ॥ १५१ ॥
ऋतुकालाभिगामी सन् परस्त्रीं पर्व वर्जयन् ॥
वेदानध्येति भिक्षाभुक् प्राजापत्योऽयमुच्यते ॥ १५२ ॥
गृहस्थस्तु चतुर्भेदो वार्ता-शालीनवृत्तिकौ[5] ॥
यायावरस्तथा वान्यो घोरसन्यासिकस्तथा ॥ १५३ ॥
कृषि-गोरक्ष-वाणिज्यैः कुर्वन् सर्वाः क्रिया द्विजः ॥
विहितैरात्मविधैश्च वार्तावृत्तिः स उच्यते ॥ १५४ ॥
वेदात्यध्येति यजते याजयेश्च च पाठयेत् ॥
कुर्यात्कर्मा[6]प्रतिग्राही शालीनो ध्यानकृद्[7]द्विजः ॥ १५५ ॥
उक्तः सन् कारयेदन्यांक्रियां कुर्यात्प्रतिग्रहम्[8] ॥
पाठयेच्च तथात्मानं यायावरः स उच्यते ॥ १५६ ॥
तिष्ठेद्यश्च शिलोञ्छाभ्यामुद्धृताम्भिश्च उच्यते ॥
आत्मविश्व क्रिया॰ कुर्यात् घोरसंन्यासिकः स्मृतः ॥ १५७ ॥

---

१. C. reads °सकृत् परम् for °भ्याससतत्परः. २. C. reads क्षमया for भिक्षया. ३. C. reads तेव्वभ्यात्मं तदुच्यते, for तिष्ठेत् ब्राम्हः स उच्यते. ४. C. reads °शात्मसज्ञानं for °दभ्यसन् ज्ञानं. ५. C. reads मतः शालीन-सीस्रकौ for वार्ता-शालीनवृत्तिकौ. ६. C. reads कर्मा° for कर्मा.° ७. A. reads ऽध्यात्मकृत् for ध्यानकृत्. ८. C. reads प्रतिग्रहे for प्रतिग्रहम्.

वानप्रस्थश्चतुर्भेदो वैखानस उदुम्बरः ॥
वालखिल्यो वनेवासी तल्लक्षणमथोच्यते ॥ १५८ ॥
फलैर्मूलैरकृष्टान्नैरग्निकर्म वने वसन् ॥
कुर्यात्पञ्चमहायज्ञान् स वैखानस आत्मवित् ॥ १५९ ॥
प्रातर्दृष्टदिगानीतैर्फलाकृष्टाशनेन्धनैः ॥
उदुम्बरो मतो ज्ञानी पञ्चयज्ञाग्निकर्मकृत् ॥ १६० ॥
चतुरो न्यासकृदग्निकार्यं कुर्वन्वने वसन् ॥
फलकोद्देर्वनोत्थैश्च बहुभिःश्रुतिचोदितैः ॥ १६१ ॥
उद्धृत्य परिपूताद्भिस्तथाऽयाचितवृत्तिकः ॥
फलैर्वन्यैर्वनाश्रैश्च फेनपः पञ्चयज्ञकृत् ॥ १६२ ॥
वनस्थो वालखिल्यो यो धत्ते वल्कलचीवरम् ॥
अग्निकार्यकृदात्मज्ञ ऊर्जान्ते संचितं त्यजन् ॥ १६३ ॥
चतुर्भेदः परिव्राट् स्यात् कुटीचक-बहूदकौ ॥
हंसाः परमहंसाश्च वक्ष्यन्ते ते पृथक् पृथक् ॥ १६४ ॥
पुत्रस्य भ्रातृपुत्रस्य भ्रातृ-दौहित्रयोरपि ॥
तदुपान्तकुटीस्थो यः स भैक्ष्यवृत्तिभुक् द्विजः ॥ १६५ ॥
प्रतिचर्याकृतःसोऽपि यो वासःपूतवारिपः ॥
तथा त्रिदण्डभृत् शान्त आत्मज्ञः स कुटीचकः ॥ १६६ ॥
ज्ञेयो बहूदको नाम यः पवित्रितपादुकः ॥
शिखासनोपवीतानि धातुकाषायवस्त्रभृत् ॥ १६७ ॥
साधुवृत्तिर्द्विजौकस्तु भिक्षाभुगात्मचिन्तकः ॥
बहूदकस्त्वयं ज्ञेयो यः परिव्राट् त्रिदण्डभृत् ॥ १६८ ॥

---

१. A. B. D. E. F. read फेनपो वा for वनेवासी. २. A. B. D. E. and F. read °दिष्टा° for °दृष्ट.° ३. C. reads, लब्धैः फलैर्वन्यफलैः. ४. C. reads परिभूताद्भि for परिपूताद्भिः. ५. C. reads वैविक्तवृत्तिकः for ऽयाचितवृत्तिकः. ६. C. reads वसेत् for धत्ते. ७. C. reads this line thus:—

तदुप्पान्तः कुटीस्थो वा बहैक्ष्यं वृत्तिभुक् द्विजः ।.

८. A. reads—

प्रतिचार्यकृतस्तेयी यो वस्त्रपूतवारिपः ।.

एकदण्डधरा हंसा शिखोपवीतधारिणः ॥
वार्याधारकराः शान्ता भूतानामभयङ्कराः ॥ १६९ ॥
वसन्त्येकक्षपां ग्रामे नगरे पञ्चशर्वरीः ॥
कर्षयन्तो व्रतैर्देहमात्मज्ञानरताः सदा ॥ १७० ॥
एकदण्डधरा मुण्डा कन्था-कौपीनवाससः ॥
अव्यक्तलिङ्गिनोऽव्यक्ता सर्वदैव च मौनिनः ॥ १७१ ॥
शिखादिरहिताः शान्ता उन्मत्तवेषधारिणः ॥
भग्न-शून्यामरौकःसु वासिनो ब्रह्मचिन्तकाः ॥ १७२ ॥
एते परमहंसा वै नैष्ठिका ब्रह्मभिक्षवः ॥
उक्तास्तद्व्रतभेदश्चैरात्मनः प्रार्थनाकराः ॥ १७३ ॥
यो ब्रह्मचर्यव्रतचारिभेदो भेदो गृहस्थस्य तथैव यश्च ॥
योऽरण्यवासिद्विजकर्मभेदो यतेस्तथा नैष्ठिकमुक्तिभेदाः ॥ १७४ ।
चतुर्णामाश्रमाणां तु भेदमुक्त्वा पराशरः ॥
अथाब्रवीत् द्विजा योगं श्रुणुध्वं पापनाशनम् ॥ १७५ ॥
मुमुक्षवो विरज्यन्ते देहाद्गेहादितो यथा ॥
शरीरज्ञास्तथा प्राहुः परब्रह्मलयंगमाः ॥ १ ॥
ख-वाय्वग्न्यंबु-धात्रीभिरारब्धमाशुनाशि च ॥
तन्मुख्यगुणसंयुक्तं तत्पञ्चाक्षालयं त्यजेत् ॥ २ ॥
शुक्र-शोणितसंयोगात्स्त्रीकोष्ठपाकसम्भवम् ॥
दुःखेन दशभिर्मासैर्व्यायितं भूरिदोहदैः ॥ ३ ॥
जनन्या दौहदाभावे गर्भस्थस्यापि दुःखिताः ॥
अत्यन्तं जायमानस्य योनियन्त्रनिपीडनात् ॥ ४ ॥

---

१. A. reads वार्याधानकराः; while C. and E. read वार्याचारकराः for वार्याधारकराः. २. A. B. C. read अभयप्रदाः for अभयङ्कराः. ३. C. reads सर्वशः for °शर्वरीः. ४. C. मर्षयन्तो for कर्षयन्तो. ५. C. reads अत्यन्त° for अव्यक्त.° ६. C. reads प्रार्थनापराः for प्रार्थनाकराः. ७. C. reads this whole line thus:—

हिरण्यवासो द्विजकर्मभेदो ह्युक्तो मयासीद्द्विजभिक्षुभेदः ॥.

८. B. C. D. E. F. read देहादितो for गेहादितो. ९. B. and E. read °पाप° for °पाक°. १०. C. reads व्यापितं; while A. and E. read व्यायितं for व्यायतं. ११. B. reads जनन्या दौर्हृदभावे; while C. reads जनन्यादौ गृहाभावे for जनन्या दोहदाभावे.

जातस्य बालरोगाद्यैर्योगिनीग्रहदोषतः ॥
देहिनः सर्वदा दुःखं दंतजन्मादिकैर्ग्रहैः ॥ ५ ॥
एवं बाल्ये महद्दुःखं कौमार्ये यौवनेऽपि च ॥
स्त्रिया विनापि सार्धं वा दारिद्र्यैश्वर्ययोरपि ॥ ६ ॥
क्षुत्तृड्भ्यां प्रथमे न्स्तरक्षणाद्यैर्द्वितीयके ॥
वृद्धत्वे चानयोर्दुःखं तस्माद्दुःखमयं वपुः ॥ ८ ॥
मांसेन लेपितं बद्धं स्नायुभिः कुल्यसञ्चयम् ॥
मेदोमेहनसम्पूर्णं कफ-पित्त-वसाश्रयम् ॥ ९ ॥
अमेध्यपूर्णं भस्त्रावत्सर्वं वै सर्वदाऽशुचि ॥
मृत्स्नया स्नान गन्धाद्यैर्निर्गन्धि क्रियते बहिः ॥ १० ॥
दुर्गन्धं सर्वरन्ध्रेषु स्वघ्राणोद्वेगकारकम् ॥
सततं स्रवतेऽमेध्यं किं देहस्योच्यते शुभम् ॥ ११ ॥
यददग्धं भवेन्मृत्स्ना दग्धं भस्मत्वमाप्नुयात् ॥
मृतस्य दृश्यते किञ्चित् तृष्णाकोपरतस्य तु ॥ १२ ॥
क इहोत्पद्यते विद्वान् को वेह म्रियते पुनः ॥
यन्त्रोपममिदं धीमान् वायुत्यक्तं मृतं भवेत् ॥ १३ ॥
पृथगात्मा पृथक् स्वाम्तं पृथक् खानि दशापि च ॥
पृथक् पृथक् च भूतानि पृथक् तेषां गुणोत्करः ॥ १४ ॥
पृथक् प्राणादिवायुश्च तद्वृतिश्च पृथक् पृथक् ॥
पृथक् पृथगिति ह्येतत् शरीरं किमिहोच्यते ॥ १५ ॥
आरम्भकाणि यान्येव तेषु यान्ति तदंशकाः ॥
आत्मा चान्यद्वाप्नोति यातनीयं पुनर्वपुः ॥ १६ ॥

---

१. B. and E. read हत° for दन्त°; while C. reads पूजा° for दन्त° २. A. reads कामात्तयौवने and B. मन्मथाद्यौवने for कौमार्ये यौवने ३. A. B. E. read बालं for बद्धं. ४. B. reads मीढ° for मेदो.° ५. B. and E. read अमेध्यपूर्णभस्त्रावत् and अमेध्यपूर्णं वस्नावत् respectively; while C. reads अमेध्यपूर्णसस्रावं for अमेध्यपूर्णं भस्त्रावत्. ६. B. and E. read तृष्णायाः and C. reads तृसायाः. ७. C. D. read °कोपरि तस्य च for °कोपरतस्य तु. ८. Only C. reads दशानि for दशापि. ९. B. reads गुणोत्तरः for गुणोत्करः. १०. C. reads.

अन्यद्वाप्यवाप्नोति याति वीर्यं पुनर्वपुः ।;

while B. E. read पावनीयं for यातनीयं.

यः[1] पश्येत् शृणुयाज्जिघ्रेत् स्पृशेद्विद्यात्स्मरेद्वदेत् ॥
स्वप्याच्च जागृयाद्गच्छेद्भिन्द्यात्[2] गायेत् जपेत् पठेत् ॥ १७ ॥
गृह्णीयाद[3]र्पयेद्द्याज्जायेत जनयेदपि ॥
सोऽस्ति कश्चित्परो देहाद्यो देहीति निगद्यते ॥ १८ ॥
नैकश्चेत्स्या[4]न्न देहेऽस्मिन् प्रत्यभिज्ञा कथं भवेत ॥
एकदृक्-दृष्टि[5]रूपस्य पुनरन्येन पश्यतः ॥ १९ ॥
अद्रा[6]क्षं यदहं वस्तु तदेवैतत्स्पृ[7]शाम्यथ ॥
यथाऽस्प्रा[8]क्षं च पश्यामि प्रतीतिर्यस्य जायते ॥ २० ॥
दर्शन-स्पर्शनाभ्यां च ग्रहणादेकवस्तुनः ॥
अस्ति ह्यात्मा परो देहात्तथा देह्यस्ति कश्चन ॥ २१ ॥
गृही च गृहमध्यस्थो मग्नं किंचित्समाचरेत् ॥
देहे क्षतादिसंरोहात्तथा देह्यस्ति कश्चन ॥ २२ ॥
ज्ञानयोगफलेनायं कर्मयोगफलेन च ॥
स एव मुच्यते[9] कुर्वन् उद्दे[10]शौ तस्य तार्यिति ॥ २३ ॥
तार्यते[11] कर्मणा चायं बध्यते[12] कर्मणापि च ॥
उभयथापि नैवात्र[13] प्रत्यक्षं दृश्यते द्विजाः ॥ २४ ॥
मायावित्वं च मूकत्वमतिरिक्ताङ्गता क्रमात् ॥
अवाक्त्वं धान्यहर्तॄणां पैशून्ये पूतिनासिता ॥ २५ ॥
भरतो वर्णकैश्चित्रैः स्वदेहं चित्रयेद्यथा ॥
कुर्वन्नानाविधं कर्म तथात्मा कर्मजा[14]स्तनूः ॥ २६ ॥

---

१. C. reads मांतस्य शृणुयात्पाद स्पर्शे जिघ्रेत्स्वादिदृलत्. २. C. reads भयात्, and यतेत वा, respectively for भिन्द्यात् and जपेत् पठेत्. ३. A. reads यस्तथा for अर्पयेत्; while C. reads this line thus—

गृण्हीयाद्यथाऽन्यच्च जायेत स नयेदपि ।.

४. D. reads नवे देहे for न देहेऽस्मिन्. ५. E. F. read दृष्टरूपस्य for दृष्टिरूपस्य. B. D. also read the same. ६. E. reads अद्राक्ष्यं for अद्राक्षं. ७. B. and E. read सृशाम्यथ for स्पृशाम्यथ. ८. B. E. both read यथापक्षं for यथाऽस्प्राक्षं. ९. A. reads युज्यते for मुच्यते. B. D. E. F. also read as A., but C. reads पुज्यते for युज्यते. १०. Only A. reads निर्देश्यौ for उद्देशौ. ११. C. reads वार्यते for तार्यते; while D. reads तीर्यते for तार्यते. १२. B. C. both read बाध्यते for बध्यते. १३. A. reads अन्नं for अत्र. १४. B. reads तथा कर्मप्रजास्तनूः for तथात्मा कर्मजास्तनूः; while C. reads तथात्मा कर्मजस्तनुम्.

जरायुजाण्डजादीनि वपूंषि योऽग्रहीन्निजैः ॥
कर्मभिर्वर्णभेदैश्च चित्तदौर्गत्यरुग्युतः ॥ २७ ॥
बधिर-क्लीब-निःस्वा-ऽन्धा जायन्ते पुरुषाधमाः ॥
निरेनसः पुनर्भूत्वा विद्वद्विप्रकुलेषु च ॥ २८ ॥
महाकुलेषु चान्येषु जायन्ते लक्षणान्विताः ॥
धनवन्तः प्रजावन्तो विद्यावन्तो यशस्विनः ॥ २९ ॥
रूप-सौभाग्यसंयुक्ताः सर्वेषामुपकारकाः ॥
ब्रह्माभ्यासरताः शान्ताःषट्कर्मनिरतास्तथा ॥ ३० ॥
पञ्चयज्ञकृतो नित्यमग्निष्टोमादिषु स्थिताः ॥
द्विजोपास्तिकरा नित्यं गुर्वाचार्यादिपूजकाः ॥ ३१ ॥
चतुराश्रमधर्माणां सेविनः समदर्शिनः ॥
गुणैः सर्वैः समायुक्तास्तेजस्विनो जनप्रियाः ॥ ३२ ॥
एवंभूताश्च ये विप्रास्तेषां विष्णुः सदान्तिके ॥
विष्णुश्च सर्वदैवत्यस्तस्माद्विष्णुमना भवेत् ॥ ३३ ॥
देवतार्चाकृतां नित्यं गुरूपास्तिकृतां तथा ॥
ब्रह्मैवाभ्यसतां सम्यक् ब्रह्मसान्निध्यमिष्यते ॥ ३४ ॥
उपास्य तत्सदा ब्रह्म यावत्साधकतां वहेत् ॥
बह्वायासाद्विदित्वा यत्संसरेन्नेह मानवः ॥ ३५ ॥
वदन्ति ब्रह्मवेत्तारो ब्रह्माभ्यासमनेकशः ॥
ब्रह्मापि द्विविधं धीमन्नपरं परमेव च ॥ ३६ ॥
समस्तं परमं ब्रह्म शब्दब्रह्मेति कीर्तितम् ॥
प्रणवाख्यं त्रिरूपं तत्प्रागेव हि विशेषतः ॥ ३७ ॥

---

१. Only C. reads त्रित्र° for चित्त.° २. B. reads नीरेतसः for निरेनसः. E. D. also the same; while C. निरतः स पुनर्भूत्वा. ३. A. D. C. E. read वेदवन्तो for विद्यावन्तो. ४. A. C. D. read नयनप्रियाः for उपकारकाः. ५. B. E. and F. read °वर्णानां for °धर्माणां. ६. C. reads कथिताः for सेविनः. ७. A. C. D. read द्विजप्रियाः or जनप्रियाः. ८. C. reads विष्णुमयो for विष्णुमनाः. ९. C reads आचामतां for अभ्यसतां. १०. A. reads बहूपायात्, and C. reads बहुपापात्. D. and F. read as A.; ११. B. reads संस्मरन् for संसरेत्. १२. B. C. read वेदेशे for °वेत्तारो. १३. D. reads °न्यास° for °भ्यास°. १४. C. reads समात्रं for समस्तं. १५. B. C. E. and F. read विरूपं for त्रिरूपं. १६. B. D. E. F. read वागेव for प्रागेव.

प्राणायामैस्तदभ्यस्य पूरकाद्यैश्च वायुभिः ॥
पूरक-कुम्भकौ वायू रेचकस्तु तृतीयकः[1] ॥ ३८ ॥
येन व्यावर्तते वायुर्नासाग्रान्निःसरेद्बहिः ॥
पूरयेत्[2] श्वासयोगेन पूरकं तद्विदो विदुः ॥ ३९ ॥
आपूर्य निश्चलीकृत्य यःकश्चिद्धार्यते निलः ॥
श्वासयोगं वदन्त्येनं कवयः कुम्भकं त्विति ॥
ब्रह्मध्यानसमायुक्तं वायुं यो न बहिर्नयेत् ॥ ४० ॥
कुम्भकः पवनः स स्याद्यो बहिर्नैव मुच्यते ॥
रेचकं तद्विदुस्तज्ञा रेच्यते यः शनैः शनैः ॥ ४१ ॥
न वेगाद्रेचयेद्वायुं सर्वथा विघ्नभाग्[3] भवेत् ॥
मोचयेन्मन्दमन्दं तु बहिः स्यात्कुम्भितो यथा ॥ ४२ ॥
नासाग्रस्थितपाणिस्तु सशिरश्चालनक्षमम्[4] ॥
अनिलं रेचयेद्योगी न मन्दं नातिवेगतः ॥ ४३ ॥
न ज्ञायतेऽनिलो यस्य निःसरन् नासिकाग्रतः ॥
यस्यास्ते कुम्भितोऽजस्रं प्राणयोगी[5] स उच्यते ॥ ४४ ॥
दीर्घायुस्त्वं परं ज्ञानं[6] समस्ता योगसिद्धयः ॥
देहे तस्याऽवतिष्ठन्ति प्राणो[7] येन वशीकृतः ॥ ४५ ॥
यत्र तिष्ठति जीवःस्यान्निःसृतेमृत उच्यते ॥
स किन्न धार्यते प्राणो[8] ब्रम्हास्तिः सति यत्र तु ॥ ४६ ॥
प्राण एवायमात्मास्ते प्राणो देहस्य वाहकः ॥
शरीरान्निःसृते प्राणे नात्मा विग्रह[9]वाहकः ॥ ४७ ॥
देहं त्यक्त्वा यदा जीवो बहिराकाशमास्थितः ॥
तदा निर्विषयो वायुर्भवेदत्र न संशयः ॥ ४८ ॥

---

१. C. reads द्वितीयकः for तृतीयकः. २. A. reads:—
श्वासयोगेन तं प्राहुः पूरकं तद्विदोऽनिलम्।.
३. B. reads निर्गतो भयात् for विघ्नभाग्भवेत्; D. E. and F. also read as B.; ४. A. reads स स्मीषश्चानलक्षमम्, B. स्वच्छयेश्चानलक्षमम्, C. सशिखं चालनक्षयम्, D. सशिखश्चालनं क्षमम् and E. सस्कोषिच्चलनक्षमम् all for स शिरश्चालनक्षमम्. ५. B. and E. read प्राणयागी for प्राणयोगी. ६. Only A. reads जन्यं for ज्ञानं. ७. C. reads प्राणायाम° for प्राणो येन. ८. F. reads प्राणान् ब्रम्हा तिष्ठाति यत्र तु for प्राणो ब्रम्हास्तिः स हि यत्र तु. ९. B. D. E. read निग्रह° for विग्रह°.

तदा स सर्वदेहेषु नासाग्रमास्थितः शिवः ॥
प्रत्यक्षः सर्वभूतानां तिष्ठते न च लक्ष्यते ॥ ४९ ॥

यदा न श्वसते वायुस्तदा निष्फलमुच्यते[1] ॥
नाभिसंस्थं तु विज्ञाय जन्मबन्धाद्विमुच्यते ॥ ५० ॥

देहस्थः सर्वसत्वानां स जीवति शृणोति च ॥
धर्माधर्मैरवष्टब्धो[2] देहे देहे व्यवस्थितः ॥ ५१ ॥

सं[3] हृत्पंकजसंस्थस्तु अध ऊर्ध्वं प्रधावति ॥
धर्माधर्मैर्महापाशैर्गृहीतःसन् प्रवर्तते ॥ ५२ ॥

उर्ध्वमुच्छ्वसते यावत्प्राणाख्यस्तु समीरणः ॥
तावत्प्राणस्तु विज्ञेयो यावन्नासाग्रमास्थितः ॥ ५३ ॥

अत्रस्थं निष्कलं[4] ब्रह्म यावन्न श्वसिति द्विज ॥
श्वासेन हि समायोगादाकाशात्पुनरागतः ॥ ५५ ॥

नासारन्ध्रसमालीनस्तदा निष्फलमुच्यते ॥
सं[5] जीव इति विख्यातः स विष्णुः स महेश्वरः ॥ ५६ ॥

ध्यातव्या देवतास्तत्र क्रमेण पूरकादिषु ॥
विष्णु-ब्रह्मेश्वरास्तेषु स्थानेषु स्थानविद्भिः[6] ॥ ५७ ॥

नीलपङ्कजवत् श्याममासीनं नाभिमध्यतः ॥
महात्मानं चतुर्बाहुं पूरके तु हरिं स्मरेत् ॥ ५८ ॥

हृत्पद्मे कुम्भके ध्यायेत् ब्रह्माणं पङ्कजासनम् ॥
रक्तेन्दीवरवर्णाभं चतुर्वक्त्रं पितामहम् ॥ ५९ ॥

रेचके शङ्करं ध्यायेल्ललाटस्थं त्रिशूलिनम् ॥
शुद्धस्फटिकसङ्काशं संसारार्णवतारकम् ॥ ६० ॥

एवं श्वसनसंरोधाद्देवतात्रयचिन्तनात् ॥
अग्नि-वाय्वंभसंयोगादन्तरं शुध्यते त्रिभिः ॥ ६१ ॥

---

१. A, reads नि.कलम् for निष्फलम्. F. also reads as A.; २. B. and E. read महापाशैर्गृहीतःसन्प्रवर्तते for °रवष्टब्धो देहेदेहे व्यवस्थितः. ३. B. E. read सकृत्पंकज° for स हृत्पंक ज.° ४. B. reads निष्फलं for निष्कलं. ५. Only B. and E. read स जीवति इति ख्यातः for स जीव इति विख्यातः. ६. A. reads ध्यानकृत्° for स्थानवित्° and B. ध्यानेषु विधिवत् for स्थानेषु स्थानवित्°; while C. reads स्थावरा for स्थानवित्°. E. reads the same as B.

निरोधादभवद्वायुस्तस्मादग्निस्ततो जलम् ॥
इति त्रिदेवतायोगात् शुद्ध्यतेऽन्तः पुनर्द्विजाः ॥ ६२ ॥

व्याहृतिप्रणवोपेताः प्राणायामास्तु षोडश ॥
अपि भ्रूणहणं मासात्पुनन्त्यहरहः कृताः ॥ ६३ ॥

प्रातरह्नि च सायं च पूरकं ब्रह्मणोऽन्तिकम् ॥
रेचकेन तृतीयेन प्राप्नुयात्परमं पदम् ॥ ६४ ॥

न प्राणेनाप्यपानेन वायुं वेगेन रेचयेत् ॥
प्रागुक्तेन प्रयोगेण मोचयेत्प्राणसंयमी ॥ ६५ ॥

शरीरं च शिरोग्रीवा विद्वान् पाणी च पद्द्वयम् ॥
सर्वाङ्गं निश्चलं धार्यमापूर्यसर्वनाडिकाः ॥ ६६ ॥

संवृत्याङ्गानि सर्वाणि कूर्मवद्ध्यानकृद्द्विजः ॥
बद्धासनोऽचलाङ्गस्तु कुर्यादसुनिरोधनम् ॥ ६७ ॥

कृत्वा सुसंयमं विद्वान्विधिवत्समुपस्पृशेत् ॥
अन्तरं शुध्यते यस्मात्तस्मादाचमनं स्मृतम् ॥ ६८ ॥

इत्युक्तः प्राणसंरोधो देवतात्रयसंयुतः ॥
त्रिमात्रः प्रणवस्तत्र ध्यातव्यः सर्वयोगिभिः ॥ ६९ ॥

स्मर्यमाणस्य यातस्य विश्रान्तिःस्यादमातृके ॥
तत्परं निष्कलं ज्ञानं तद्विदुर्ब्रह्मचिन्तकाः ॥ ७० ॥

मृदुमध्यान्तसत्वाच्च स्थूलसूक्ष्मानुभावतः ॥
त्रिविधं प्राणसंरोधं विदुस्तत्त्ववेदिनः ॥ ७१ ॥

क्रियमाणो विशेषेण प्रत्याहारोऽयमुच्यते ॥
सर्वं प्रागुक्तमेवास्य विशेषं तु निबोधत ॥ ७२ ॥

---

१. C. reads भवन्ति for व्याहृति°. २. A. B. D. E. and F. read अहश्च for अन्हि च. ३. B. reads उज्वलाङ्गः for अचलाङ्गः. E. also reads the same. ४. C. reads सुसंचयं for सुसंयमं and विधित्सुः for विधिवत् respectively. ५. A. reads अमात्रिके for अमातृके. ६. C. and D. read निष्फलं for निष्कलं. ७. B. D. E. and F. read—

मृदुमध्यस्थसत्वाच्च स्थूललक्ष्यानुभावतः ।;

while C. reads °मध्योत्तमत्वाच्च for मध्यान्तसत्वाच्च.

बाह्यं वायुं यथोत्थाप्य[1] आकृष्य यच्छनैः शनैः ॥
निरुन्ध्याद्विधिवद्योगी प्रत्याहारः स उच्यते ॥ ७३ ॥

व्याहृत्याऽभिमुखीकृत्य[2] खानि यत्र निरुध्य च ॥
चिन्तयेन्निश्चलीकृत्य प्रत्याहारः स उच्यते ॥ ७४ ॥

प्राणाद्या[3] वायवः स्थूलाः सङ्कल्पाद्यास्तथाऽणवः[4] ॥
निरोद्धव्या दशाप्येते[5] प्राणसंयमकारिभिः ॥ ७५ ॥

वायुरेकोऽपि देहस्थः क्रियाभेदेन भिद्यते ॥
प्रकर्षेणासमन्ताच्च नयनादि[6]क्रियाः स्मृताः ॥ ७६ ॥

भविष्या-ऽतीतकालेभ्यः कर्मभ्यश्चाशु[7]संयमी ॥
सर्वानिलांस्तथा खानि निरुध्यैकत्र धारयेत् ॥
स धीमान्वेदविद्विद्वान् स योगी ब्रह्मवित्तमः ॥ ७७ ॥

स्थानं द्विजन्मा विधिवत्त्वजस्र[8]मभ्यस्य संयाति विधेःपरस्य ॥
पराशरोक्तैर्बहुभिःप्रकारैरुक्तो विधिः प्राणनिरोधनस्य ॥ ७८ ॥

प्रत्याहारो विशेपस्तु प्रोक्तस्तस्यैव वित्तमाः ॥
यदभ्यस्याप्नुयाद्ब्रह्म सर्वदानंदमव्ययम् ॥ ८० ॥

एतैस्तु पुनरावृत्तिः कदाचिदिह दृश्यते ॥
संसृतिं[9] नाप्नुयाद्येन शक्तिसूनुस्तदब्रवीत् ॥ ८१ ॥

उक्तस्तु संयमः पूर्वं त्रिविधो मलनाशनः[10] ॥
निबोधत चतुर्थं तु ध्यानं प्रणववेधसः ॥ ८२ ॥

विधिवत्प्रणवध्यानमेकचित्तस्तु योऽभ्यसेत् ॥
ब्रम्हाभ्येति स मुक्तात्मा स योगी योगिनां वरः ॥ ८३ ॥

---

१. A. reads यथोत्साहं for यथोत्थाप्य. B. E. and F. also read the same. २. Only F. reads व्याहृत्यभिमुखोऽन्यत्र for व्याहृत्याऽभिमुखीकृत्य ३. Only C. reads प्राणाद्यवयवाः for प्राणाद्या वायवः. ४. C. reads सुवायवः for तथाऽणवः. ५. A. reads दशास्वेते and D. तथाप्येते for दशाप्येते; while C. reads दृशोऽप्येते. ६. C. reads न यानादि° for नयनादि°. ७. B. and E. read अनुसंयमी and F. reads आत्मसंयमी for शुसंयमी; while C. reads अस्तु संयमी. ८. B. E. read नितान्तं for अजस्रं. ९. B. reads संस्मृतं, and C. संस्मृतिं for संसृतिं. १०. Only C. reads विधिहीनो हि नाशनः for त्रिविधो मलनाशनः.

तद्ध्यानमसुसंरोधस्तुर्यं सम्यगिहोच्यते ॥
तदन्यथानपेक्षं च चित्तक्षेपविवर्जितम् ॥ ८४ ॥
चतुर्णामाश्रमाणां तु भेदमुक्त्वा पराशरः ॥
अथाब्रवीद्विजा योगं श्रृणुध्वं पापनाशनम् ॥ ८५ ॥
तच्छान्तं निर्मलं शुद्धं ध्यातव्यं हृत्सरोरुहे ॥
तद्ध्येयं तद्वरेण्यं च बीजं मुक्तेस्तदुच्यते ॥ ८६ ॥
सश्रित्य व्याहृतीः सप्त प्रणवाद्यास्तदन्तकाः ॥
सम्यगुक्तमिदं ध्यात्वा परब्रह्मणि योजयेत् ॥ ८७ ॥
हुतभुक् पवनो जीवस्त्रयोऽप्येते हृदि स्थिताः ॥
एतत्सर्वं तु चैकत्र संस्मरेत् ध्यानकृद्विजः ॥ ८८ ॥
ॐकारवर्त्मनालेन उद्धृत्योपरि योजयेत् ॥
योजयेत्सर्वमप्येतत्सिद्धयोगो स उच्यते ॥ ८९ ॥
शून्यभूतस्तु यत्प्राणः श्वासं जीवेति संज्ञितम् ॥
यस्मादुत्पद्यते श्वासः पुनस्तत्र निवेशयेत् ॥ ९० ॥
आद्यं तं प्रणवं विद्वान् घटाकाशवदभ्यसेत् ॥ ९१ ॥
स पश्येन्निर्मलं शुद्धं पुरुषं तमसंशयम् ॥
अन्तर्वक्रो वहिः सर्पन् त्सर्पवत्कुण्डलाकृतिः ॥ ९२ ॥
ध्यातव्यः प्रणवस्तत्र मध्यगं धाम संस्मरेत् ॥
स मात्रा स च बिन्दुश्च तदेव परमं पदम् ॥ ९३ ॥
तदभ्यस्यं हि तज्ज्ञात्वा स तस्मिन्नेव लीयते ॥
प्रथमं प्रणवो ऽव्यक्तः ह्यक्षरः परमाक्षरः ॥
सर्वज्ञत्वमवाप्नोति प्राप्नोति परमं पदम् ॥ ९४ ॥

---

१. B. E. F. read तदन्यार्थानपेक्षं for तदन्यथानपेक्षं. २. This whole verse is not mentioned in A. C. D. and F.; ३. B. E. read ओंकारवर्त्मना तेन; while C. reads ओंकारावर्तनालेन for ओंकारवर्त्मनालेन. ४. C. reads हासजीवितसंज्ञितम्. ५. C. reads निर्गलं for निर्मलं. ६. B. E. and F. read मध्यमं for मध्यगं. ७. A. reads स धामात्मा C. reads स ध्यातात्मा, for समात्रा स. ८. B. and E. read तदर्थस्य for तदभ्यस्यं and D. तदभ्यसन्. ९. B. reads प्रथमाक्षरः for परमाक्षरः. १०. C. reads हृज्जत्वमन्यदाप्नोति for सर्वज्ञत्वमवाप्नोति.

पञ्चमं तु पदं विद्वान् तत्सार्धमवतिष्ठते[1] ॥
नादबिन्दुसमभ्यासात् प्राप्नुयात्परमं पदम् ॥ ९५ ॥
पदं प्राप्य निवर्तन्ते धाम्नि[2] स्वं स्वान्तमेव च ॥
सर्वेऽप्यमातृका[3] वर्णाः पुनस्तत्र विशन्ति च ॥ ९६ ॥
वर्णात्मा सन्नवर्णस्तु समस्तवर्णजीवनम् ॥
न दीर्घं नापि ह्रस्वं च न घोषं नाप्यघोषवत् ॥ ९७ ॥
न विसर्गं न तल्लीनं[4] नानुस्वारविपर्ययः ॥
हृद्याकाशनिविष्टं यदचलत्वं प्रयाति चेत् ॥ ९८ ॥
ज्ञानयोगे त्रिषष्टिर्वै बिभ्रतीत्यक्षराणि तु ॥
तत्पदं योगिभिर्ध्येयं व्योम यस्य तु मध्यगम् ॥ ९९ ॥
व्योमान्तं सततं ध्येयमनंताकाशमव्ययम् ॥
चिन्तयामो वयं यद्वै धियो यो नः प्रचोदयात् ॥ १०० ॥
एतद्ब्रह्म त्रयीरूपमेतद्भर्गस्त्रयीमयम् ॥
एषा सा परमा मुक्तिर्गत्वा यां न निवर्तते ॥ १०१ ॥

आदाय चापं प्रणवं च बाणं सन्धाय चात्मानमवेक्ष्य लक्ष्यम् ॥
स तद्विधि तत्र निवेश्य[6] योगी प्राप्नोति नित्यं[7] स तु मुक्तिकामः[8] ॥ १०२ ॥
उद्देशतः[9] किञ्चिदवादि विद्वन् ध्यानं[10] विधेर्यत्ध्वनिपूर्वकस्य ॥
सर्वं विधानं विधिवच्च सम्यक् वक्तुं समर्थो विधिरेव चास्य ॥ १०३ ॥

इति बृहत्पराशरे प्रणवध्यानविधिः ॥

अथान्यत्सम्प्रवक्ष्यामि विधानं ध्यानकर्मणाम् ॥
नानामतोदितं[11] कार्यं परब्रह्मासिकारकम् ॥ १०४ ॥

---

१. A. C. D. F. read तन्मूर्धन्यवतिष्ठते for तत्सार्धमवतिष्ठते. २. A. reads भास्यश्चान्त्यमेव च, and B. यदि for पदं, C. यत्प्राप्य न for पदं प्राप्य and F. यदि प्राप्य निवर्तन्ते भास्यः स्वान्तमेव च, ३. C. reads सर्वेभ्यो for सर्वेऽप्य° ४. A. reads लब्धानं for तल्लीनं. ५. A. reads भवन्ति for विशति. B. D. and F. also read as A.; while E. reads विभर्ति for the original. ६. A. reads विविश्य; while C. reads प्रविश्य for निवेश्य. ७. A. B. D. E. F. read योगी for नित्यं. ८. A. D. F. read °धाम for °कामः. ९. A. D. F. read उद्देश्यतः for उद्देशतः; while C. उद्देशेन for उद्देशतः. १०. B. D. C. E. and F. read विधेबं for विधेर्यत्. ११. B. D. E. F. read °विध्युदितं for °मतोदितं.

कर्मात्मकस्त्विह प्रोक्तः कः परात्मा परं च किम् ॥
वक्ष्यमाणमिदं विप्राः शृणुध्वं भक्तितत्पराः ॥ १०५ ॥
स्वीयेन कर्मणा येषां शरीरग्रहणं भवेत् ॥
कर्मात्मानस्त उच्यन्ते निर्गता परमात्मनः ॥ १०६ ॥
यं न स्पृशन्ति दुःखाद्यास्तथा सत्वादयो[1] गुणाः ॥
कादाचित्कं न कर्मास्ति[2] परमात्मा ततः परम् ॥ १०७ ॥
निष्ठा-नाशौ न विद्येते गुणा यं न स्पृशन्ति हि ॥
अजःसन् कथमेतस्मिल्लोके जातो[3]ऽभिधीयते ॥ १०८ ॥
स्वात्मानमेव चात्मानं वेष्टयेत्कोशकारवत् ॥
कर्मणैव प्रजातस्तु बाह्यस्वार्थविमोहितः ॥ १०९ ॥
तस्माद्विवर्जयेत्[4]कर्म स्वर्गादेरपि साधकम् ॥
संसरेत्[5]स्वर्गतः कर्मक्षये स तु पुनर्यतः ॥ ११० ॥
सीमैषा परमा विद्वन् ब्रह्मणः[6] पात-मोक्षयोः ॥
कर्मस्थानमियं धात्री कृतमत्रोपभुज्यते ॥ १११ ॥
वैदिकः कर्मयोगश्च दिवोऽप्यावर्तकः स तु ॥
योनेहावृत्तिकृत्तं च[7] ज्ञानयोगमतोऽभ्यसेत् ॥ ११२ ॥
हृदि निःसृतनाडीनां सहस्राणां द्विसप्ततिः ॥
तन्मध्यावस्थितं तेजः शशिप्रभं विभाति यत् ॥ ११३ ॥
तन्मध्यमण्डले ह्यात्मा विधूमाचलदीपवत् ॥
स ज्ञातव्यो विदित्वा तं संसरेन्न[8] पुनर्यतः ॥ ११४ ॥
पुटीभूतमधोवक्त्रं तत्कृतपद्मं व्यवस्थितम् ॥
नाभ्युत्थोदान[9]वातेन कृत्वोर्ध्वास्यं विकासयेत्[10] ॥ ११५ ॥

---

१. A. B. E. and F. read सुखाद्यो for सत्वादयो; while C. reads ससत्वया. २. C. reads कदाचित् केन कर्माणि for कादाचित्कं न कर्मास्ति. ३. Only C. reads लोकपालो° for लोके जातो°. ४. F. reads विसर्जयेत् for विवर्जयेत्. ५. B. reads संस्मरेत् for संसरेत्, but F. reads संसारं. ६. C. reads ब्राह्मण्यः पाश-मोक्षयोः for ब्रह्मणः पात-मोक्षयोः. ७. B. D. E. F. read आवृत्ति[illegible]त्वञ्च for आवृत्तिकृत्तं च. ८. B. reads संस्मरन् for संसरेन्. ९. B. and F. read नाभ्युत्सादन° for नाभ्युत्थोदान.° १०. B. E. read कृत्वा शोभ्यां for कृत्वा चास्यं. in C. The two lines are read thus:—

भूरिभुवमधोवक्त्रं तद्भुयातव्यं व्यवस्थितम्
नानुच्छेदेन वातेन कृत्वांह्यास्य विकासयेत् ॥.

शिकास्य तस्य मध्यस्थमचलं दीपशिखेव तत् ॥
तदूर्ध्वं निःसरच्छुभ्रं सूक्ष्मं तत्तु विचिन्तयेत् ॥ ११६ ॥
ललनाद्वारनिर्गच्छन्योगी मूर्ध्नि तु चिन्तयेत् ॥
तावत्तु चिन्तयेद्यावन्निरालम्बत्वमृच्छति ॥ ११७ ॥
निरालम्बं यदा ध्यानं कुर्वाणो निश्चलो भवेत् ॥
तदा तदुच्यते ब्रह्म स योगी ब्रह्मवित्तमः ॥ ११९ ॥
तत्पदं च पदातीतं तत्प्राप्तौ मुक्त उच्यते ॥
इति ध्यानं विधातव्यं मुक्तिकृत्सद्भिरौर्द्विजाः ॥ १२० ॥
भूतानामात्मभूतस्य तानि सम्यक् प्रपश्यतः ॥
विमुह्यन्त्यमरा मार्गे पदं किमपदस्य तु ॥ १२१ ॥
यो न तिष्ठति नो याति न किञ्चित्सर्व एव यः ॥
अर्वाग्यो वाङ्मयो यश्च सकलश्रुतिरश्रुतिः ॥ १२३ ॥
योऽप्यन्तिके दवीयांश्च योऽस्ति नास्ति स्वरूपकः ॥
यस्य तत्वस्य संवित्तिः स तस्मिन्नेव लीयते ॥ १२४ ॥
यस्तु सर्वाणि भूतानि पश्यत्यात्मगतानि तु ॥
आत्मानं तेषु सर्वेषु ततो यो न विरज्यते ॥ १२५ ॥
सर्वभूतात्मभूतात्मा यत्र पश्यति धीमतिः ॥
शोक-मोहौ च किं तस्य ह्येकत्वमनुपश्यतः ॥ १२६ ॥
समासाद्युक्तमाद्विर्यन्मन्त्र-ब्राह्मणयोर्द्विजाः ॥
ॐ खं ब्रह्मेति चाम्नायो दर्शकस्त्वेषं वेधसः ॥ १२७ ॥
आत्मज्ञाने बहूपाया उक्तास्तद्धि मनीषिभिः ॥
तैस्तैः सर्वैः स मन्तव्यो ज्ञातव्यश्चोपदेशतः ॥ १२८ ॥
न वेदैर्ज्ञेयता तस्य न शास्त्रैर्बहुभिः श्रुतैः ॥
न यज्ञैर्न जपैर्होमैः शौचैर्वाग्मितयापि च ॥ १२९ ॥

---

१. Only B. and E. read चलदीप° for अचलं दीप.° २. C. reads कुम्तयोगी for योगी मूर्ध्नि. ३. A. B. D. E. and F. read कुर्वतो for कुर्वाणो. ४. Only F. reads °प्राप्तो for °प्राप्तौ. ५. B. reads °स्वपरे for °स्त्वमरा. ६. B. and E. read अवाग्मी for अर्वाग्यो. ७. A. reads सर्वश्रुतिषु वै श्रुतिः and C. reads सर्वश्रुतिप्रचोदितः for सकलश्रुतिरश्रुतिः. ८. C. reads यस्येदं न ममेति for यस्य तत्वस्य संवित्तिः. ९. D. reads धाम्ना वो for चाम्नायो. १०. B. and E. read दर्शक-श्चेति; while C. D. and F. read दर्शकस्त्वेक° for दर्शकस्त्वेष. ११. The two lines are not mentioned in C.

गुरूपदेशतो भक्त्या सम्यगभ्यासतस्तथा ॥
ज्ञातव्यः परमात्मैवं भक्तिकृत्तत्परेण च ॥ १३० ॥
ध्यानज्ञानस्य तद्भक्तेर्यत्र विश्रमते मनः ॥
तदेवोपादिशेत्तस्य वस्तु ज्ञानोपदेशकम् ॥ १३१ ॥
मनो यस्य निषण्णं तु जायते यत्र वस्तुनि ॥
स तु ध्यायेत्तदेवेति यावत्स्यात्ध्यानसन्ततिः ॥ १३२ ॥
तत्र ध्याने तु संलग्ने हरावात्मनि वा पुनः ॥
ध्यानं योजयते योगी तं निरालम्बतां नयेत् ॥ १३३ ॥
योगशास्त्रेषु यत्प्रोक्तं रहस्यारण्यकेषु च ॥
तत्तथोपदिशेद्ध्यानं ध्यायेदपि तथैव च ॥ १३४ ॥
प्रवदन्त्यन्यथा केचित् शुभादिभेदतस्त्वतः ॥
त्रैविध्यं विदुषो विद्वन् सिद्धिदं च परापरम् ॥ १३५ ॥
चित्तजं श्रुतिजं भावं भावनाभवमेव च ॥
त्रैविध्यमात्मना सिध्येद्योगाभ्यासफलप्रदम् ॥ १३६ ॥
आत्मशक्तिः शिवश्चेति चैतन्यमिति संज्ञितम् ॥
उत्तरोत्तरवैशिष्ट्याद्योगाभ्यासः प्रवर्तते ॥ १३७ ॥
स एको निश्चलीभूतकर्मात्मा यमुपार्जितः ॥
न बिभेति स एकाकी परेषां जायते भयम् ॥ १३८ ॥
तदेवं गातिभिर्ब्रह्मध्यानं यस्यास्ति योगिनः ॥
सं विशोत्तमजं शान्तं कदाचित्संसरेन्न तु ॥ १३९ ॥

---

१. C. reads भक्ति कृत्वा परेण च for भक्तिकृत्तत्परेण च. २. B. and F. read धाता ज्ञानस्य, and D. reads ध्यानाज्ज्ञातश्च; while F. ध्यानाज्ज्ञानस्य for ध्यानज्ञानस्य. ३. B. C. E. read विषण्णं for निषण्णं. ४. A. and D. read ज्ञायते for जायते. ५. Only A. reads सा for स्यात्. ६. A. D. F. read नियोजयेत् for योजयते. ७. A. reads वातादि° for शुभादि°; while D. reads श्रुतादि° for शुभादि.° ८. A. reads विविदुस्त्वपरे परम् and C. reads विद्धि तत्त्वं परम्परम्. ९. A. B. E. and F. read श्रुतिजं वाग्जं चिन्ताजं and D. reads श्रुतिजं वाय चिन्ताजं. १०. E. reads °स्तव° for °भव°. ११. A. C. D. read आत्मविद्धुपैतत् for आत्मना सिद्ध्येत्. १२. A. C. D. read संस्थितम् for संज्ञितम् १३. A. C. D. read यत्र योजितः for यमुपार्जितः. १४. A. C. D. read भयं वै जायतेऽन्यतः for परेषां जायते भयम्. १५. C. reads संवित्स्तोत्तम् for स विशोत्तम्. १६. A. D. E. and F. read संस्मरेत् for संसरेत्.

त्र्यम्बकश्च चतुर्वक्त्रश्चतुर्बाहुः परेश्वरः ॥
एक एव महेशो वै तज्ज्ञैस्त्रिधेति कीर्त्यते ॥ १४० ॥
नाभिमध्यस्थितं विद्धि वस्तु विद्वन् सुनिर्मलम् ॥
रविवद्भ्राजमानं तु काशद्रश्मिगणैर्द्विज ॥ १४१ ॥
चिन्तयेत् हृदि मध्यस्थं दीप्तिमत्सूर्यमण्डलम् ॥
तस्य मध्यगतः सोमो वह्निश्चन्द्रशिखो महान् ॥ १४२ ॥
तन्मध्ये तु परं सूक्ष्मं तद्ध्यायेद्योगमात्मनः ॥
तन्मध्ये चिन्तयेदेतद्वक्ष्यमाणक्रमेण तु ॥ १४३ ॥
बिन्दुमध्यगतो नादो नादमध्यगतो ध्वनिः ॥
ध्वनिमध्यगतस्तारस्तारमध्यगतोऽशुमान् ॥ १४४ ॥
तस्य मध्यगतं ब्रह्म शान्तं तस्य तु मध्यगम् ॥
परं पदं तु यच्छान्तं सम्यग्व्याहृत्य योजयेत् ॥ १४५ ॥
जीवात्मा कायमध्यस्थस्तत्रापि देहवर्जितः ॥
वक्त्र-नासापुटस्थस्तु भुञ्जीत विषयान् प्रभुः ॥ १४६ ॥
इत्येतद्ध्यानमार्गं तु वदन्ति कवयो द्विजाः ॥
केचिदन्येऽन्यथा ब्रूयु रूपं ब्रह्मविदो विधेः ॥ १४७ ॥
न नामापि हि दुःखस्य शर्म यत्र निरन्तरम् ॥
ब्रह्मणो रूपमानन्दं तन्मुक्तावुपलभ्यते ॥ १४८ ॥
सर्वव्यापी य एकस्तु यश्चानन्तश्च भावुकः ॥
स मन्तव्योऽमरो ह्यात्मा सर्वं व्याप्य च यः स्थितः ॥ १४९ ॥
एकं व्योम यथानैकं गृहाद्यैरुपलक्ष्यते ॥
एको ह्यात्मा तथानैको जलागारेषु सूर्यवत् ॥ १५० ॥
विश्वरूपो मणिर्यद्वत् वर्णान् गृह्णात्यनेकशः ॥
उपाधितस्तथात्मैको नानादेहेषु कर्मतः ॥ १५१ ॥
कला-काष्ठादिरूपेण वर्तमानादिभेदकृत् ॥
एकःकालो यथा नाना तथात्मैकोऽप्यनेकधा ॥ १५२ ॥

---

१. A. reads सं तु and C. विज्ञानं तु ज्ञानं D. विज्ञानेन for वस्तु विद्वन्. २. A. C. D. F. read उद्धृत्य for व्याहृत्य. ३. C. reads विदुः for विधेः. ४. C. reads तन्मुक्तं रूपमुच्यते. ५. A. B. C. D. E. read भावकः for भावुकः. ६. A. C. D. F. read जलाधारेषु for जलागारेषु. ७. A. C. D. F. read तत्त्वं for यद्वत्. ८. C. reads उपाधिस्थस्तथा चैको for उपाधितस्तथात्मैको. ९. B. and E. read °वादेह कर्मतः for °देहेषु कर्मतः.

देहमध्यस्थितं देवं यो न ध्यायति मूढधीः ॥
सोऽङ्कलब्धं मधु त्यक्त्वा क्लेशायाज्ञो गिरिं व्रजेत् ॥ १५३ ॥

यस्तीर्थयानं जप-यज्ञ-होमान् कुर्यान्नपुष्मान् न च वेत्ति विष्णुम् ॥
स मांसपिण्डं परिहृत्य दूरादज्ञः प्रधावेदधिरुह्य पृष्ठम् ॥ १५४ ॥

संभ्राम्यते विधिवशात्करणोग्रचक्रे
पापेन कुम्भ इव धातृवरेण नूनम् ॥
आरोप्य स्वार्थधृतदण्डमुखेन पूर्णे
हृत्पद्मसंस्थशिवतत्वमतिप्रहीणः ॥ १५५ ॥

द्वौ मार्गावात्मनो ज्ञेयौ ब्राह्मणैर्ब्रह्मचिन्तकैः ॥
अभियाति विदित्वा यौ सायुज्यं परवेधसः ॥ १५६ ॥

विद्वन् धूमादिरेको वै द्वितीयस्त्वर्चिरादिकः ॥
प्रत्येतव्यौ प्रयत्नेन यत्प्रतीतिर्नजायते ॥ १५७ ॥

धूमः क्षपाऽसितः पक्षो दक्षिणायनमेव च ॥
लोकः पित्र्यश्च सोमश्च मातरिश्वानुकर्षणम् ॥ १५८ ॥

यथा धातृक्रमादेते सम्भवन्ति समाश्रिताः ॥
अर्चिर्दिनं सितः पक्षस्तथाचैवोत्तरायणम् ॥ १५९ ॥

देवलोकस्तथा सूर्यो विद्युतश्च क्रमादिमान् ॥
मानसाः पुरुषा यान्ति जानन्तो ब्रह्मलोकताम् ॥ १६० ॥

यत्र याताः पुनर्नेह संसरन्ति द्विजाः क्वचित् ॥
मार्गद्वयमिदं धीमन्मन्तव्यं सततं द्विजैः ॥ १६१ ॥

ज्ञानेन येन विज्ञातुर्ज्ञान-मोक्षौ च सिध्यतः ॥
गृहारण्यस्थ-भिक्षूणां त्रयाणामपि धीमताम् ॥ १६२ ॥

ज्ञानमभ्यस्यमानं तु तथा दहति संसृतिम् ॥
ज्ञानं समानमेतद्धै इति ब्रह्मविदो विदुः ॥ १६३ ॥

---

१. A. C. D. F. read सोऽर्कलब्धं for सोऽङ्कलब्धं. २. B. reads क्लेशायत्तो and E. reads क्लेशायज्ञो for क्लेशायाज्ञो. ३. C. reads सतु वैष्णवः स्यात् for नच वेत्ति विष्णुम्. ४. D. reads प्रधावेच्च तरक्षुपृष्ठे; while C. reads प्रभावेश्च वरिष्ठपृष्ठे for प्रधावेदधिरुह्य पृष्ठम्. ५. F. reads सम्प्राप्यते for सम्भ्राम्यते. ६. B. D. E. and F. read साम्राज्यं for सायुज्यं. ७. C. reads अविराडिकः for अर्चिरादिकः. ८. C. reads यत्र देवौ प्रतीतव्यौ for प्रत्येतव्यौ प्रयत्नेन. ९. B. D. E. read °वर्षणम् for °कर्षणम्. १०. C. reads देहं for नेह. ११. A. D. F. C. °नाक° for °ज्ञान.°

यथा दहति चैधांसि समिद्धश्चाशुशुक्षणिः ॥
तस्मान्मार्गद्वयेनापि आत्मा श्रेयो द्विजोत्तमैः ॥ १६४ ॥
ये न जानन्ति ते यान्ति दन्दशूकादियोनिषु ॥
यत्र गत्वा कृमित्वं वा कीटत्वमथ वाऽऽप्नुयुः ॥ १६५ ॥
एताभ्योऽप्यधमास्वेव जायन्ते ते कुयोनिषु ॥
विद्याविद्ये च मन्तव्ये ते हेतू स्वर्गमोक्षयोः ॥ १६६ ॥
विद्या मोक्षप्रदा च स्यादविद्या मृत्युजन्मकृत् ॥
ज्ञानयोगस्तथा कर्म विद्याविद्ये स्मृते बुधैः ॥ १६७ ॥
अपवर्गाय द्वे[२] चापि कर्म कृत्वा निवेदयेत् ॥
कर्मापि क्रियमाणं वै निरपेक्षं तु मोक्षकृत् ॥ १६८ ॥
विष्णवे गुरवे वापि कर्म कृत्वा निवेदयेत् ॥
आत्मनः फलमिच्छंस्तु यत्कर्म कुरुते नरः ॥
तेनैव वाञ्छितप्राप्तिस्तेनान्यश्चोपजायते ॥
हरिर्वा नित्यमभ्यस्यः सर्वभावेन सद्विजैः ॥
तदभ्यासादवाप्नोति मृत्यौ दृष्टे हरिस्मृतिम् ॥ १६९ ॥
एक एव हि स ध्येयो यत्परं नास्ति किञ्चन ॥
विराट् सम्राट् महानेष सदा ध्येयो जितेन्द्रियैः ॥ १७० ॥
महान्तं पुरुषं देवं रविरूपं तमःपरम् ॥
ब्रह्मवित्सोऽतिमृत्युं वै प्रयात्येवानिवर्तकम् ॥ १७१ ॥
एष एव नृणां पन्था ब्रह्मा वै यमुपासते ॥
ये ये जन्मस्वनेकेषु विधिवच्चैकचेतसः ॥ १७२ ॥
न भक्त्या नापि योगेन नाभ्यासैर्नैकजन्मना ॥
ब्रह्माप्तिर्जायते पुंसां किन्तु स्यान्नरिजन्मभिः ॥ १७३ ॥
यद्देवा सन्तताभ्यासाच्च ब्रह्म प्रतिपेदिरे ॥
तन्मनुष्यैः कथं प्राप्यमेकेनैव च जन्मना ॥ १७४ ॥

---

१. A. reads पतंगत्वं for यत्र गत्वा. B. also the same, but C. reads पन्नगत्वं. २. A. reads वैतृणां, B. द्वे वापि and C. वै नृणां. ३. A. C. D. read निविदपाव च for कृत्वा निवेदयेत्. ४. A. reads देवं रविरूपमतः परम्, B. देवं विरूपं तमसः परम् and C. देव हरि रूपमतः परम् for देवं रविरूपं तमःपरम्. ५. A. reads स्या for स्यात्.

ज्ञानाभ्यासैर्न तद्ब्रह्म कृतैर्दंभस्वरूपकैः ॥
न प्राप्यते परं ब्रह्म न चाप्यासनमुद्रया ॥ १७५ ॥
बहुभिः किमुपायैस्तु प्रोक्तैर्वा ग्रन्थविस्तरैः ॥
एकमेवाभ्यसेत्तत्वं येन चित्ते वसेद्धरिः ॥ १७६ ॥
एकैव भावशुद्धिस्तु यथा स्यात्क्रियते तथा ॥
अन्यत्कुर्यान्मनस्त्वन्यद्विरुद्धमिति सर्वथा ॥ १७७ ॥
भावः स्वर्गाय मोक्षाय नरकायापि स स्मृतः ॥
तस्मात्तं शोधयेद्यत्नाच्छुचिःस्याद्भावशुद्धितः ॥ १७८ ॥
एकस्याः पुत्र-भर्तारौ हृदयोपरि योषितः ॥
भिन्नभावौ भवेतां तौ भावमेवं विशोधयेत् ॥ १७९ ॥
परिष्वक्तो नरो नार्या ह्लादमेति यथा युवा ॥
तल्पस्थोऽपि सकामां तां भावहीनो न कामयेत् ॥ १८० ॥
एको भावो हरौ कार्यो यथाऽसौ निश्चलो भवेत् ॥
तद्बुध्या पञ्चतां गच्छन् स्वर्गं मोक्षमवाप्नुयात् ॥ १८१ ॥
त्यक्त्वापि विविधान् भोगान् तपस्तप्त्वातिदुष्करम् ॥
मृत्युकाले मतिर्या स्यात्तां गतिं याति मानवः ॥ १८२ ॥
योऽगप्रयोगः कथितः समासात्ध्यानस्य मार्गो बहुधाऽभ्यधायि ॥
योऽभ्यस्यमानस्तु भवेद्विधानात् ब्रह्मातिकृच्छ्रश्च तथा द्विजानाम् ॥१८३॥
प्रत्याहारश्च योगश्च ध्यानं विस्तरतस्तथा ॥
उक्तं द्विजहितार्थाय ब्रह्मापाशिकरं तथा ॥ १८४ ॥
अङ्गुल्यङ्गुष्ठयोर्नादः क्षणः स्यात्तद्द्वयं त्रुटिः ॥
द्वाभ्यां चैव लवस्ताभ्यां निमेषोऽपि लवद्वयम् ॥ १८५ ॥
तैःपञ्चदशभिः काष्ठा ताश्च त्रिंशत्कला स्मृता ॥
द्वाविंशतित्रिभागस्तु घटिकेति प्रकीर्तितः ॥ १८६ ॥
तद्द्वयं च मुहूर्तःस्यात्तात्रिंशत्तु क्षपा-दिनम् ॥
तत्पञ्चदशकं पक्षस्तद्द्वयं मास उच्यते ॥ १८७ ॥

---

१. B. and E. read देवस्वरूपकैः for दंभस्वरूपकैः. २. B. and E. read प्रायैः for प्रोक्तैः. ३. A. C. F. read क्रियतां for क्रियते. ४. C. reads भार्याः संल्हादयति यौवनम् and F. नार्या साल्हादयति यौवनः for ल्हादमेति यथा युवा, ५. B. reads °रस्य प्रयतं, E. and F. read °रस्य नियतं for °कृच्छ्रश्च तथा. ६. B. reads त्रुटि° for लव° and तद्द्वयम् for लवद्वयम् respectively. ७. A. B. D. E. and F. read त्रिंशाति° for द्वाविंशाति.° ८. C. reads त्रुटिका for घटिका.

तद्द्वयं ऋतुरित्युक्तं तद्द्वयं काल उच्यते ॥
तत्सार्धमयनं प्रोक्तं तद्द्वयं वत्सरस्तथा ॥ १८८ ॥
पञ्चभिस्तैर्युगं प्रोक्तं तद्द्वादशकषष्ठिकम् ॥
षष्ठिकःषष्ठिगुणितो वाक्पतेर्युगमुच्यते ॥ १८९ ॥
तद्द्वयं तु कलिःप्रोक्तस्तद्द्वयं द्वापरो भवेत् ॥
कलित्रयेण त्रेता स्यात्कृतःकलिचतुष्टयम् ॥ १९० ॥
षष्ठिघ्नःसोऽपि कालैःप्रजानाथयुगः स्मृतः ॥ १९१ ॥
कलिभिर्दशभिर्ब्रह्मन् चतुर्युगमिति स्मृतम् ॥
चतुर्युगसहस्रेण ब्रह्माहःकल्प उच्यते ॥ १९२ ॥
अष्टयुगा भवेत्सन्ध्या सायंसन्ध्या च तावती ॥
तदेकसप्ततिगुणं मन्वन्तरमिति स्मृतम् ॥ १९३ ॥
मन्वन्तरद्वयेनेह शक्रपातः प्रकीर्तितः ॥
एतन्मानेन वर्षाणां शतं ब्रह्मक्षयः स्मृतः ॥ १९४ ॥
ब्रह्मक्षयशतेनापि विष्णोरेकमहर्भवेत् ॥
एतद्दिवसमानेन शतवर्षेण तत्क्षयः ॥ १९५ ॥
तत्क्षयस्त्रिगुणोष्टाभी रुद्रस्य त्रुटिरुच्यते ॥
एवमाब्दिकमानेन प्रयातेऽब्दशते द्विजाः ॥
रुद्र[1]आत्मनि लीयेत निष्कलंकं निरामयम् ॥ १९६ ॥
नि[2]ष्प्रकम्पं जगत् व्योम व्योमातीतं परं पदम् ॥
त[3]न्निदिध्यासससंशुध्या स तत्रैव विलीयते ॥ १९७ ॥
परम्पराणां परमं वि[4]चिन्त्य परात्परं दि[5]ष्टपदादतीतम् ॥
क्षणादिकालं क्रमशोऽब्दमेवं प्रयाति तं तत्पदमव्ययं च ॥ १९८ ।
तमात्मरूपं परमव्ययं च विश्वेश्वरं [illegible]तभरं प्रपेदे ॥
शान्तिं च गत्वा विधिमां च योगी प्रयाति तद्वै पदमव्ययं च ॥१९९॥

---

१. C. reads this line thus:—

रुद्रस्यात्मनि लीयंते भूतभौतिकवह्नयः ।

२. B. reads—

लब्धं यथानेन परं पदं तत्तद्ध्यानयोगात्स तु तत्र लीयते ।

This line is mentioned excess in C. ३. A. F. read तत्पदध्यान° for तन्निदिध्यास.° ४. C. स्वचिन्त्यं for विचिन्त्य. D. F. also read the same. ५. D. read व्यष्टपदादतीतम् for दिष्टपदादतीतम्. ६. C. reads ऽप्रमत्तः for ऽब्दमेव; while D. ऽथ मत्वा and F. reads ऽष्टमेव.

कालज्ञानेन योगोऽयं योगिभिर्ध्यानकारिभिः ॥
मुमुक्षुभिःसदा ज्ञेयं निरालम्बं परं पदम् ॥ २०१ ॥

पराशरोदितं शास्त्रं चतुर्वर्णाश्रमाय च[1] ॥
वेदितव्यं प्रयत्नेन सदा ध्येयं द्विजातिभिः ॥ २०२ ॥

दश द्वादश चाष्टौ वा सप्त षट् पंच वा त्रयः[2] ॥
दैविके पैतृके वापि श्लोकाःश्राव्या द्विजातिभिः ॥ २०३ ॥

श्रावयिष्यति यः श्राद्धे ब्राम्हणान्भक्तितत्परः ॥
प्राद्ययन्ति पितरस्तस्य तृप्तिं वै शाश्वतीं द्विजाः ॥ २०५ ॥

य इदं श्रुणुयाद्वापि श्रावयेत्पाठयेदपि ॥
स प्रध्वस्ततमस्तोमो[3] ब्रह्मलोकमवाप्नुयात् ॥ २०६ ॥

त्रिभिःश्लोकसहस्रैस्तु त्रिभिर्वृत्तशतैरपि ॥
पराशरोदितं धर्मशास्त्रं प्रोवाच सुव्रतः ॥ २०७ ॥

नमोऽस्तु याज्ञवल्क्याय मनवे विष्णवे नमः ॥
गौतमाय वसिष्ठाय नमः पाराशराय च ॥ २०८ ॥

इति श्री बृहत्पाराशरे धर्मशास्त्रे सुव्रतप्रोक्तायां संहितायां योगनिरूपणो नाम द्वादशोऽध्यायः ॥ १२ ॥

॥ इति बृहत्पराशरस्मृतिः समाप्ता ॥

१. C. reads °जनाश्रयेत् for °श्रमाय च. २. C. reads नव for त्रयः.
३. C. reads °समस्तैनाः for °तमस्तोमो; also D. and F. read the same.

BOMBAY SANSKRIT & PRAKRIT SERIES.

Edited under the superintendence of Prof. S. R. Bhandarkar, M.A., and Prof. V. S. Ghate, M.A.

	Rs.	a.	p
Âpastambîya Dharmasûtra, Part I., with Critical Notes and Index and various Readings of the Hiranyakeśi Dharmasûtra by Dr. G. Bühler (B. S. S. No. 44) ..	1	6	0
,, ,, Part II., containing extracts from Haradatta's Commentary called Ujjvalâ by Dr. G. Bühler (B. S. S. No. 50) ...	1	2	0
Âtharvaṇa Upanishads and Commentaries, by Col. G. A. Jacob (B. S. S. No. 40) ...	1	4	0
Bhatti-Kâvya with Mallinâtha's Commentary. Vol. I., by K. P. Trivedi, B.A. (B. S. S. No. 56)	9	0	0
,, ,, Vol. II., by K. P. Trivedi, B.A. (B. S. S. No. 57)... ...	6	0	0
Concordance to the Principal Upanishads and Bhagavadgîtâ, by Col. G. A. Jacob (B. S. S. No. 39)	4	0	0
Dasákumâracharita of Daṇḍin, Part I., with Critical Notes, etc., by Dr. G. Bühler (B. S. S. No. 10)—*Under revision.*			
,, ,, Part II., by Dr. P. Peterson (B. S. S. No. 42)	0	8	0
Deśînâmamâlâ, Part I., Text and Critical Notes, by Prof. Pischel and Dr. G. Bühler (B. S. S. No. 17).			

	Rs.	a.	p.
Ekâvali of Vidyâdhara, with the Commentary, Tarala, of Mallinâtha, and Critical Notes, etc., by K. P. Trivedi, B.A. (B. S. S. No. 63) ...	14	0	0
Gaüḍavaho, by Vâkpati, by S. P. Pandit, M. A. (B. S. S, No. 34)	3	0	0
Hand-book to Ṛigveda, Part I., by Dr. P. Peterson (B. S. S. No. 41)	1	8	0
" " Part II., by Dr. P. Peterson, (B. S. S. No. 43)	2	8	0
Harshacharita, by Dr. A. A. Führer, Text and Comm. (B. S. S. No. 66)	2	0	0
Hitopadeśa of Nârâyaṇa, by Dr. P. Peterson (B. S. S. No. 33)	0	14	0
Hymns from the Ṛigveda, by Dr. P. Peterson and S. R. Bhandarkar, M. A. (B. S. S. No. 36)	2	4	0
Hymns from the Ṛigveda (Second Selection), by Dr. P. Peterson (B. S. S. No. 58)	4	0	0
Kâdambarî, Vol. I. (Text), by Dr. P. Peterson (B. S. S. No. 24)	2	0	0
" Vol. II. (Introduction and Notes) by Dr. P. Peterson (B. S. S. No. 24)	4	8	0
Kîrti-Kaumudî, by A. V. Kathavate, B.A. (B. S. S. No. 25) *Copy-right restored to the Editor* ...			
Kumârapâla-Charita, by S. P. Pandit, M.A., (B. S. S. No. 60)	8	8	0
Mahâbhâshya of Patañjali, Vol. I., Parts I., II, and III. (together), 2nd Edn., by Dr. F. Kielhorn (B. S. S. Nos. 18-20)	4	8	0
Mahâbhâshya of Patañjali, Vol. I., Part II., by Dr. F. Kielhorn (B. S. S. No. 19).	1	0	0
Vol. I., Part III., by Dr. F. Kielhorn, (B. S. S. No. 20).	1	0	0
" " Vol. II., Parts I., II. and III. (together), 2nd Edn., by Dr. F. Kielhorn (B. S. S. Nos. 21, 22 and 26)	9	0	0

	Rs.	a.	p.
Mahâbhâshya of Patañjali Vol. III. Parts I., II., and III. (together), 2nd Edn., by Dr. Kielhorn (B. S. S. No. 28-30)	9	0	0
Mahânârâyaṇa Upanishad, by Col. G. A. Jacob (B. S. S. No 35)	0	7	0
Mâlatî-Mâdhava, with Critical Notes, etc., by Dr. R. G. Bhandarkar (B. S. S. No. 15), 2nd Edn.	4	4	0
Malavikâgnimitra, by S. P. Pandit, M. A. (B. S. S. No. 6), 2nd Edn.	2	2	0
Mrichchhakaṭika with two Commentaries and various Readings, by N. B. Godbole, B. A., (B. S. S. No. 52)	3	8	0
Mudrârâkshasa, with the Commentary of Dhuṇḍirâja, by K. T. Telang, M.A. (B. S. S. No. 27)—*Copy-right restored to the Editor*			
Naishkarmyasiddhi, with the Chandrikâ of Jñânottama, by Col. G. A. Jacob (B. S. S. No 34), 2nd Edn.	2	8	0
Navasâhasâṅkacharita, Part I., by Pandit Vâmanshâstri Islâmpurkar (B. S. S. No. 53)... ...	1	10	0
Nîti and Vairâgya Satakas, with notes and extracts from two Commentaries, by K. T. Telang, M. A. (B. S. S. No. 11)—*Copyright restored to the Editor.*			
Nyâyakośa, by Mahâmahopâdhyâya Bhimâchârya Zaḷkikar. (B. S. S. No. 49)	6	0	0
Pañchatantra, Book I., with Notes, by Dr. F. Kielhorn (B. S. S. No. 4.)	0	6	0
„ Books II. and III. with Notes, by Dr. G. Bühler (B. S. S. No. 3)	0	4	0
„ „ IV. and V., with Notes, by Dr. G. Bühler (B. S. S. No. 1)	0	4	0
Parâśara-Smṛiti, Vol. I., Part I., by Pandit Vâmanshâstri Islâmpurkar (B. S. S. No. 47)	2	2	0

	Rs.	a.	p.
Pârâśara-Smriti, Vol. I., Part II., by Pandit Vamanshastri Islâmpurkar (B. S. S. No. 48)	2	0	0
,, ,, Vol. II., Part I., by Do. (B. S. S. No. 59)	4	0	0
,, ,, ,, Part II., by Do. (B. S. S. No. 64)	5	0	0
,, ,, Vol. III., Part I., by Do. (B. S. S. No 67)	4	0	0
Paribhâshenduśekhara, Part I., Text and various Readings, by Dr. F. Kielhorn (B. S. S. No. 2)	0	8	0
,, Part II., Translation and Notes, by Do. (Paribhâshâs 1-37) (B. S. S. No. 7)	0	8	0
,, Part II., Translation and Notes, by Do. (Paribhâshâs 38 to 69) (B. S. S. No. 9)	0	8	0
,, Part II., Translation and Notes, by Do. (Paribhâshâs 70 to 122), (B. S. S. No. 12)...	0	8	0
Pâtañjala-Sûtrâṇi, with the Scholium of Vyâsa and Vâchaspati's Commentary, by Mahâmahopâdhyâya Rajaram Shastri Bodas (B. S. S. No. 46)	1	10	0
Pratâparudrayaśobhûshaṇa of Vidyânâtha, by K. P. Trivedi, B.A. (B. S. S. No. 65)	11	0	0
Raghuvaṃśa, Part I. (Cantos i-vi), with Mallinâtha's Commentary and Notes, by S. P. Pandit, M.A. (B. S. S. No. 5)	1	8	0
,, Part II. (Cantos vii-xiii), with Mallinâtha's Commentary and Notes, by S. P. Pandit, M. A. (B. S. S. No. 8)...	0	12	0
,, Part III. (Cantos xiv-xix), with Mallinâtha's Commentary and Notes, by Do. (B. S. S. No. 13)	0	8	0
Râjataraṅgiṇî, Vol. I., by Pandit Durgâprasâda (B. S. S. No. 45)	1	8	0
,, Vol. II., by Do. (B. S. S. No. 51)	1	4	0

	Rs.	a.	p.
Râjataraṅgiṇî, Vol. III., by Dr. P. Peterson (B. S. S. No. 54)	1	2	0
Rekhâgaṇita, Vol. I., by H. H. Dhruva, B. A., and K. P. Trivedi, B. A. (B. S. S. No. 61)	12	0	0
„ Vol. II., by Do. Do. (B. S. S. No. 62)	9	0	0
Śârṅgadharapaddhati, Vol. I., by Dr. P. Peterson (B. S. S. No. 37)	3	0	0
Subhâshitâvali of Vallabhadeva, by Do. (B. S. S. No. 31)	2	8	0
Tarka-Kaumudî of Laugâkshi Bhâskara, by M. N. Dvivedi, B. A. (B. S. S. No. 32)—*Copyright restored to the Editor* ...			
Tarka-Saṃgraha, with two Commentaries and Notes, by Y. V. Athalye, M.A. (B. S. S. No. 55) ...			
Vâsishṭha Dharmaśâstra, by Dr. A. Führer (B. S. S. No. 23)	0	8	0
Vikramâṅkadevacharita, by Dr. G. Bühler (B. S. S. No. 14)—*Copy-right restored to the Editor* ...			
Vikramorvaśîya, with Notes, by S. P. Pandit, M. A. and B. R. Arte, M. A. (B. S. S. No. 16) 3rd Edn.	2	0	0

SANSKRIT PUBLICATIONS NOT INCLUDED IN THE BOMBAY SANSKRIT AND PRAKRIT SERIES.

	Rs.	a.	p.
Amarakośa, the Thesaurus of Sanskrit Words of Amara-Siṃha with the Commentary of Maheśvara. Edited by Raghunath Shastri Talekar with Index	0	13	0
Atharvaveda-Saṃhitâ with the Commentary of Sâyaṇâchârya. Edited by S. P. Pandit, M.A., Vols. I., II., III. and IV., each at	10	0	0
Kâvyaprakâśa (2nd Edition). Edited by Vâmanâchârya Zalkikar	5	4	0

Pahlavi.

	Rs.	a.	p.
Vendidad, complete in 2 Volumes	10	0	0